नन्वारा॰ नास्वरूपावगमनं तु पुरुषार्थः। पुरुषार्थो हि प्रयोजनं, पुरुषार्थश्च सुखं दुःखनिवृत्तिर्वा, न चानयोरन्यतरताऽस्य। अयमस्याभिप्रायः, यो येनार्थेनार्थी स तत्प्राप्तये तदीयोपायमधिगंतुमुपादेयं वा यतते येन प्रयुक्तः क्रियायां प्रवर्तते तत्प्रयोजनं, ज्ञानेन प्रयुज्यते श्रवणादिक्रियायामुपयोगिवस्तुपरिज्ञानं प्रयोजनं भवतु; आराधना तु कथमुपयोगिनी? सकलसुखरूपकेवलज्ञानपरमाव्याबाधतां जनयतीत्युपयोगिनी। तथा चोक्तं—'चतुर्विधाराधनाफलं प्राप्तानिति'। ततोऽयमर्थः, अनन्त ज्ञानादिफलनिमित्ताराधनाऽवबोधनार्थमिदं शास्त्रमा-

---

मोहनीय कर्मके नष्ट हो जानेसे तथा ज्ञानावरण और दर्शनावरणके चले जानेसे जो अतिशय युक्त पूजाके भाजन हैं, यह अर्थ 'अरहंते' पदसे यहाँ कहा गया है; क्योंकि 'अर्हन्' यह नाम सार्थक है। जैसे सर्वनाम शब्द स्वीकार किये गये शब्दार्थोंके संज्ञापनेको अपनानेसे सार्थक हैं।

अथवा 'जगत् प्रसिद्ध' यह पद अर्हन्तोंका विशेषण है; क्योंकि ये महात्मा पाँच महाकल्याणक स्थानोंमें तीनों लोकोंके द्वारा जैसे प्रख्यात होते हैं वैसे अन्य सिद्ध नहीं होते। सभी वस्तु किसी न किसी रूपमें प्रतीत होती हैं, सर्वथा अप्रतीत कोई नहीं है। अतः यहाँ 'प्रसिद्ध' पदका ग्रहण प्रकर्षताका परिचायक है। जैसे 'रूपवानको कन्या देना'। यहाँ रूपवान् शब्द विशिष्ट रूपका बोधक है। अतः 'जगत में सबसे' अधिक प्रसिद्ध यह अर्थ यहाँ लेना। और उक्त प्रकारसे अर्हन्त ही सबसे अधिक या सिद्धोंसे अधिक प्रसिद्ध हैं।

प्रयोजनको जाने बिना श्रोता श्रवण या अध्ययनमें प्रयत्न नहीं करता। और मैं (ग्रंथकार) परोपकार करनेके लिये यह ग्रन्थ बनाता हूँ, अतः प्रयोजन प्रकट करता हूँ—'वोच्छं आराहणं' इससे यह प्रयोजन सूचित किया है कि शास्त्रश्रवणसे आराधनाके स्वरूपका ज्ञान होता है।

शंका—आराधनाके स्वरूपको जानना तो पुरुषार्थ नहीं है; क्योंकि पुरुषार्थ प्रयोजन है और पुरुषार्थ है सुख अथवा दुःखनिवृत्ति। आराधनाके स्वरूपको जानना न तो सुख है और न दुःख निवृत्ति है। हमारे इस कथनका अभिप्राय यह है कि जो जिस अर्थका इच्छुक होता है वह उसकी प्राप्तिके लिये उसके उपाय या उपादेयको जाननेका प्रयत्न करता है। जिसके द्वारा प्रेरित होकर, मनुष्य क्रियामें लगता है वह प्रयोजन है। ज्ञानके द्वारा श्रवण आदि क्रियामें लगता है अतः उपयोगी वस्तुका ज्ञान प्रयोजन हो सकता है परन्तु आराधना कैसे उपयोगी है?

समाधान—समस्त सुख रूप केवलज्ञान और परम अव्याबाधताको उत्पन्न करनेसे आराधना उपयोगी है। कहा है 'चार प्रकारकी आराधनाके फलको प्राप्त।'

अतः अभिप्राय यह है कि अनन्त ज्ञानादि रूप फलकी प्राप्तिमें निमित्त आराधनाके स्वरूप-

रभ्यत इति साध्यमाराधनास्वरूपज्ञानं साधनमिदं शास्त्रमिति साध्यसाधनरूपसंबन्धोऽपि शास्त्रप्रयोजनयोरत एव वाक्याल्लभ्यते। अभिधेयभूतास्तु चतस्र आराधनाः। ग्राह्यमिदं शास्त्रं प्रयोजनादित्रयसमन्वितत्वात् व्याकरणादिवदिति। एवमनया मङ्गलं प्रयोजनादित्रयं च सूचितं 'कमसो' क्रमेण पूर्वशास्त्रनिरूपितेन। एतेन स्वमनीषिकार्चितमिदं न भवति। आप्तवचनानुसारितया प्रमाणमिदमित्याख्यातं भवति। 'पुव्वसुत्ताणं' इति वाक्यशेषाध्याहारेणं लभ्यते ॥१॥

का आराधना कस्य वा? न ह्याराध्यापरिज्ञानेनात्मभूताराधना शक्या प्रतिपत्तुं इत्याशंकायामाह—

उज्जोवणमुज्जवणं णिव्वहणं साहणं च णिच्छरणं।
दंसणणाणचरित्ततवाणमाराहणा भणिया ॥ २ ॥

उज्जोवणमुज्जवणमित्यादिकं। 'उज्जोवणं' उद्योतनं शङ्कादिनिरसनं सम्यक्त्वाराधना श्रुतनिरूपिते वस्तुनि किमित्थं भवेन्न भवेदिति समुपजातायाः शङ्कायाः संशयप्रतिसंज्ञिताया अपाकृतिः। कथं? हेतुबलेन आप्तवचनेन वा समुपजाताया इत्थमेवेदमिति निश्चित्य। यद्धि यस्य विरोधि यत्रोपजातं तत्र नेतरत्पदं बध्नाति, यथा शीतस्पर्शेनाक्रान्ते शिशिरकरे उष्णता। विरोधि च निश्चयज्ञानं। संशीतेर्विरोधना च नियोगतस्तद्भावे तदेतरस्य तदा अभवनात्। वक्ष्यामः कांक्षादीनां स्वरूपं तन्निरासक्रमं च प्रस्तावे। अनिश्रयो

का ज्ञान करानेके लिये इस शास्त्रको प्रारम्भ करते हैं। आराधनाके स्वरूपका ज्ञान साध्य है और उसका साधन यह शास्त्र है। इस प्रकार शास्त्र और प्रयोजनमें साध्य साधनरूप सम्बन्ध है यह भी इसी वाक्यसे ज्ञात होता है। इस शास्त्रका अभिधेयभूत अर्थात् जो इसके द्वारा कहा गया है वह है चार आराधना। अतः प्रयोजन, सम्बन्ध और अभिधेयसे युक्त होनेसे यह शास्त्र उसी तरह उपादेय है जैसे व्याकरणशास्त्र उपादेय है।

इस प्रकार इस गाथासे मंगल प्रयोजन, सम्बन्ध और अभिधेयको सूचित किया है।

'कमसो' का अर्थ है क्रमसे अर्थात् पूर्व शास्त्रोंमें जैसा कहा है वैसा ही कहूँगा। इससे यह सूचित किया है कि यह ग्रन्थकारकी अपनी बुद्धिकी उपज नहीं है किन्तु आप्त पुरुषोंके वचनोंके अनुसार होनेसे प्रमाण है। 'कमसो' के साथ 'पुव्व सुत्ताणं' पूर्व शास्त्रोंके इस वाक्यांशका अध्याहार करनेसे उक्त अर्थ निकलता है ॥१॥

आराध्यको जाने बिना उसकी आत्मभूत आराधनाको जानना शक्य नहीं है। अतः आराधना किसे कहते हैं और वह किसके होती है इस शंकाके समाधानके लिये आचार्य कहते हैं—

गाथा—सम्यग्दर्शन सम्यग्ज्ञान, सम्यक्चारित्र और सम्यक्त्वके उद्योतन, उद्यवन, निर्वहन, साधन और (णिच्छरणं) निस्तरणको (आराहणा) आराधना कहा है ॥२॥

टीका—'उज्जोवण' का अर्थ है उद्योतन अर्थात् शंका आदि दोषोंको दूर करना। यह सम्यक्त्व आराधना है। शास्त्रमें कही गई वस्तुके विषयमें 'क्या ऐसा है अथवा नहीं है' इसप्रकार से उत्पन्न हुई शंकाको, जिसका दूसरा नाम संशय है, दूर करना सम्यक्त्वाराधना है। युक्तिके बलसे अथवा आप्त वचनके द्वारा यह इसी प्रकार है ऐसा निश्चय करके उत्पन्न हुई शंकाको दूर करना सम्यक्त्वका उद्योतन है। जिसका विरोधी जहाँ होता है वहाँ वह ठहर नहीं सकता। जैसे शीत स्पर्शसे व्याप्त चन्द्रमामें उष्णता नहीं ठहरती। निश्चयात्मक ज्ञान संशयका विरोधी है अतः इन दोनोंमें नियमसे विरोध है; क्योंकि एकके रहते हुए वहाँ उस समय दूसरा नहीं रहता।

वैपरीत्यं वा ज्ञानस्य मलं, निश्चयेनानिश्चयव्युदासः । यथार्थतया वैपरीत्यस्य निरासो ज्ञानस्योद्योतनं । भावना-विरहो मलं चारित्रस्य, तासु भावनासु वृत्तिरुद्योतनं चारित्रस्य । तपसोऽसंयमपरिणामः कलङ्कस्तस्य स्थितस्य स्वापाकृतिः संयमभावनया तपस उद्योतनम् । उत्कृष्टं यवनं उद्यवनं ।

ननु मिश्रणं युप्रकृतेरर्थः, मिश्रणं च संयोगस्तः । तथा हि गुडमिश्रा धाना इति कथिते गुडेन संयुक्ता इति प्रतीयते । संयोगश्च विभिन्नयोरर्थयोरप्राप्तयोः प्राप्तिर्न च दर्शनादयोऽर्थान्तरभूता आत्मनस्तद्रूपादिकल-रूपाभावात् । तत्कथं दर्शनादिभिरात्मनो मिश्रणमिति ? उच्यते-विशेषवाच्योऽपि सामान्येनलक्षणतया वर्तते, यथा काकेभ्यो रक्ष्यतां सर्पिरित्यत्रोपघातकसामान्यमेवार्थः काकशब्दस्य प्रतीतस्तद्वत्संबन्धसामान्यमत्र यवन-शब्दाभिधेयं । असकृद्दर्शनादिपरिणतिरुद्यवनं ।

निराकुलं वहनं धारणं निर्वहणं, परिषहाद्युपनिपातेऽप्याकुलतामन्तरेण दर्शनादिपरिणतौ वृत्तिः । उप-योगान्तरेणान्तर्हितानां दर्शनादिपरिणामानां निष्पादनं साधनम् । भवान्तरप्रापणं दर्शनादीनां निस्तरणम् । एवमाराधनाशब्दस्यानेकार्थवृत्तितायां यथावसरं तत्र तत्र व्याख्या कार्या ।

आगे हम कांक्षा आदिका स्वरूप और उनके निरासका क्रम कहेंगे। अनिश्चय अथवा विपरीतता ज्ञानका मल वा दोष है। निश्चयके द्वारा अनिश्चयका परिहार होता है। और यथा-र्थतासे विपरीतताका निरास होता है। यह ज्ञानका उद्योतन है अर्थात् ज्ञानका निश्चयात्मक और विपरीततारहित होना ही ज्ञानका उद्योतन है।

भावनाका न करना चारित्रका मल है। अतः उन भावनाओंमें लगना चारित्रका उद्यो-तन है। असंयमरूप परिणाम तपका कलंक है। संयमकी भावनाके द्वारा उसको दूर करना तप-का उद्योतन है।

उत्कृष्ट यवनको उद्यवन कहते हैं।

शंका—'यु' धातुका अर्थ मिश्रण है। संयोगपनेको मिश्रण कहते हैं। जैसे 'गुड़से मिश्रित धान' कहने पर गुड़से संयुक्त धानकी प्रतीति होती है। दो विभिन्न पदार्थ जो एक दूसरेसे अलग हैं उनके मिलनेको संयोग कहते हैं। किन्तु दर्शन आदि तो आत्मासे भिन्न पदार्थ नहीं हैं क्योंकि दर्शन आदिसे रहित आत्माका अभाव है। तब दर्शन आदिके साथ आत्माका मिश्रण कैसे संभव है?

समाधान—जिस शब्दका जो विशेष अर्थ होता है वह भी उपलक्षणसे सामान्य रूप लिया जाता है। जैसे 'कौओंसे घी को बचाओ' यहाँ काक शब्दका अर्थ उपघातक सामान्य ही है अर्थात् जो घी को हानि पहुँचा सकते हैं उन सबसे घी को बचाओ। इसी तरह यहाँ 'यवन' शब्दका अर्थ सम्बन्धमात्र है, कोई विशेष सम्बन्ध नहीं। अतः बार बार आत्माका दर्शन आदि रूप परि-णत होना उद्यवन है। निराकुलतापूर्वक 'वहन' अर्थात् धारण करनेको 'निर्वहण' कहते हैं। परी-षह आदि आने पर भी आकुलताके बिना सम्यग्दर्शन आदि रूप परिणतिमें संलग्न होना निर्वहण है। अन्य कार्योंमें उपयोग लगनेसे तिरोहित हुए सम्यग्दर्शन आदि रूप परिणामोंको पुनः उत्पन्न करना साधन है। और सम्यग्दर्शन आदिको दूसरे भवमें भी साथ ले जाना निस्तरण है।

इस प्रकार आराधना शब्दके अनेक अर्थ होने पर अवसरके अनुसार व्याख्या करना चाहिये।

अत्रान्ये व्याचक्षते—निस्तरणशब्दः सामर्थ्यवाची स प्रत्येकं सम्बध्यते उद्योतनादिभिरुद्योतनादीनां दर्शनादिभिश्चतुर्भिरपि यथासंख्येन संबन्धः। उद्योतनं मरणकाले प्रागवस्थाया उत्कर्षेण निर्मलीकरणं अविघ्नेन दर्शनाराधनेत्यादिना क्रमेण। त एवं पर्यनुयोज्याः किमत्र ज्ञानादीनां निर्मलीकरणमिष्टमनिष्टं वा। इष्टं चेद्दर्शनेनैव किमिति सम्बध्यते निर्मलीकरणं ? उत्कर्षेण यवनमपि सर्वेषामिष्यते। अनाकुलं वहनमपि साधारणं किमुच्यते व्रतगुप्तिसमितीनां निश्चयेनानाकुलं वहनमिति ? न च निस्तरणशब्दात्सामर्थ्यं प्रतीयते। उद्योतन सामर्थ्यमित्यादिषु न च कश्चिदर्थः, अविघ्नेनेति कथमयमर्थो लभ्यते उद्योतनादिशब्दैरनुपात्तो। मरणकालश्च कः ? मनुष्यभवपर्यायविनाशसमयो मरणकालसमयेन यद्युच्यते, न तत्र भावनोत्कर्षः, मारणान्तिकसमुद्घाते परिणाममान्द्यात्। अत्र भावनाकालो मरणकालशब्देनोच्यते सोऽनुपात्तोऽप्रकृतश्च कथमिह लभ्यते। भावनाकालगतव्यापारकथनायेदं शास्त्रं प्रस्तुतमिति लभ्यत इति चेत्, न तथाऽसूत्रितत्वात्। 'दंसणणाणचरित्ततवाणमुज्जोवणमाराहणा भणिया' 'दंसणणाणचरित्ततवाणुज्जवणमाराधणा' इति, इति प्रत्येकमभिसंबन्धोऽत्र कार्यः। अन्यथा असमासेन निर्देशं कुर्यात् ॥२॥

यहाँ अन्य व्याख्याकार कहते हैं—निस्तरण शब्द सामर्थ्यवाचक है। अतः उद्योतन आदिमेंसे प्रत्येकके साथ उसका सम्बन्ध होता है। और उद्योतन आदिका दर्शन आदि चारोंके साथ क्रमसे सम्बन्ध होता है। जैसे मरणकालमें पूर्वकी अवस्थाका उत्कृष्ट रूपसे निर्मल करना सम्यग्दर्शनका उद्योतन है अर्थात् निर्विघ्नतापूर्वक सम्यग्दर्शनकी आराधना उद्योतन है, इस प्रकार-क्रमसे करना चाहिये।

उनसे पूछना चाहिए कि क्या यहाँ ज्ञानादिका निर्मल करना इष्ट है या अनिष्ट ? यदि इष्ट है तो निर्मल करनेका सम्बन्ध अकेले दर्शनके साथ ही क्यों जोड़ा जाता है ? उत्कृष्ट रूपसे यवन भी सभी दर्शन आदिका इष्ट है। निराकुलतापूर्वक धारण करना भी सामान्य है। तब आप व्रत, गुप्ति और समितिके निश्चयपूर्वक निराकुल धारणाकी बात क्यों कहते है ? तथा निस्तरण शब्दसे सामर्थ्यकी प्रतीति भी नहीं होती। उसे उद्योतन आदिके साथ जोड़ने पर उद्योतन सामर्थ्य, उद्यवन सामर्थ्य इत्यादिसे कोई अर्थ सिद्ध नहीं होता। तथा उद्योतन आदिसे तो निर्विघ्नता अर्थ नहीं निकलता। तब यह अर्थ आप कैसे लेते हैं ? तथा मरणकालसे आपका क्या अभिप्राय है ? यदि मरणकाल समयसे मनुष्य पर्यायके विनाशका समय लेते हैं तो उस समय तो भावनाकी उत्कृष्टता सम्भव नहीं हैं क्योंकि मारणान्तिक समुद्घातमें परिणामोंमें मन्दता होती है। यदि यहाँ मरणकाल शब्दसे भावना काल लेते हों तो उसका तो यहाँ ग्रहण नही है। तब जिसका प्रकरण नहीं है उसे कैसे लिया जा सकता है ?

शंका—भावना कालमें होनेवाले व्यापारका कथन करनेके लिए यह शास्त्र रचा जाता है ?

समाधान—नहीं, ऐसा ग्रन्थकारने नहीं कहा है। ग्रन्थकारने तो दसणणाणचरित्ततवाणं उज्जोवणं आराहणा भणिया'—दर्शन ज्ञान चारित्र और तपके उद्योतनको आराधना कहा है। 'उज्जवणं आराहणा भणिया'—दर्शन ज्ञान चारित्र और तपके उद्यवनको आराधना कहा है अतः प्रत्येकके साथ सम्बन्ध यहाँ करना चाहिए। यदि ग्रन्थकारको ऐसा इष्ट न होता तो वे 'दंसण' इत्यादिका निर्देश समासपूर्वक न करते।

भावार्थ—सम्यग्दर्शन आदिके उद्योतनको चार प्रकार की आराधना कहा है। सम्यग्दर्शन आदिके निर्मल करनेको उद्योतन कहते हैं। उत्कृष्ट यवन अर्थात् मिश्रणको—बार बार दर्शनादि-

किं चतुर्विधैवाराधनेत्याशङ्कायामाह—

दुविहा पुण जिणवयणे भणिया आराहणा समासेण ।
सम्मत्तम्मि य पढमा बिदिया य हवे चरित्तंमि ॥ ३ ॥

'दुविहा पुण जिणवयणे समासेण दुविहा आराहणा भणिया' इति पदसंबन्धः । आवरणमोहजया- ज्जिनाः । ज्ञानदर्शनावरणजयात्सर्वज्ञाः सर्वदर्शिनः । मोहजयाद्वीतरागद्वेषाः । सर्वज्ञानां सर्वदर्शिनां वीत- रागद्वेषाणां वचनं जिनवचनं । एतेन असत्यवचनकारणाभावात् प्रामाण्यमख्यातमागमस्य । वक्तुरज्ञानाद्राग- द्वेषाभ्यां वा प्रवृत्तं वचः अयथार्थविबोधनादप्रामाण्यमास्कन्दति । तत्र च 'समासेण' संक्षेपेण 'दुविहा' द्विप्रकारा 'भणिया' कथिता 'आराहणा' आराधना । का प्रथमा आराधना का द्वितीयेत्यत आह—'सम्मत्तम्मि य पढमा' श्रद्धानविषया प्रथमाराधना । 'विदिया य' द्वितीया च 'हवे' भवेत् 'चरित्तं मि' चारित्रविषया आराधना । दर्शनचारित्राराधनयोः प्रथमद्वितीयव्यपदेशः उत्पत्त्यपेक्षया गुणस्थानापेक्षया चेति । केचित्तु दर्शनपरिणा- मोत्पत्त्युत्तरकाले हि चारित्रपरिणाम उत्पद्यत इति प्राथम्यं दर्शनाराधनायाः । असंयतसम्यग्दृष्टिगुणस्थानं पूर्वं

रूप परिणमन करनेको उद्यवन कहते हैं। परीषह आदि आने पर भी निराकुलतापूर्वक वहन अर्थात् धारण करनेको निर्वहन कहते हैं। अन्य तरफ उपयोग लगनेमें दर्शन आदिसे मनके हटने पर पुनः उनमें उपयोग लगाना साधन है। अर्थात् नित्य या नैमित्तिक कार्य करते समय सम्यग्दर्शन आदि- में व्यवधान आ जाये तो पुनः उपायपूर्वक उसे करना साधन है। दूसरे भवमें भी सम्यग्दर्शनादि- को साथ ले जाना अथवा उस भव में मरणपर्यन्त धारण करना निस्तरण है। तत्त्वार्थ श्रद्धानको सम्यग्दर्शन कहते हैं। स्व और परके निर्णयको सम्यग्ज्ञान कहते हैं। पापका बन्ध करानेवाली क्रियाओंके त्यागको चारित्र कहते हैं और इन्द्रिय तथा मनके नियमनको तप कहते हैं ॥२॥

क्या आराधना चार ही प्रकारकी होती है ऐसी आशङ्कामें आचार्य कहते हैं—

गा०—जिनागममें संक्षेपसे आराधना दो प्रकारकी कही है। श्रद्धान विषयक प्रथम आरा- धना है। और दूसरी चारित्रविषयक आराधना है ॥ ३ ॥

टी०—जिनवचनमें संक्षेपसे दो प्रकारकी आराधना कही है। ज्ञानावरण, दर्शनावरण और मोहको जीतनेसे जिन होते हैं तथा ज्ञानावरण और दर्शनावरणको जीतनेसे सर्वज्ञ सर्वदर्शी होते हैं। मोहको जीतनेसे वीतरागी और वीतद्वेषी होते हैं। सर्वज्ञ सर्वदर्शी और वीतराग तथा वीतद्वेषी महापुरुषोंका वचन जिनवचन कहलाता है। इससे असत्य बोलनेके कारणोंका अभाव होनेसे आगमके प्रामाण्यको स्थापित किया है। वक्ताके अज्ञानसे अथवा रागद्वेषसे कहा गया वचन अयथार्थका बोध करानेसे अप्रमाण होता है।

उस जिनवचनमें 'समासेण' अर्थात् संक्षेपसे 'आराहणा' अर्थात् आराधना, 'दुविहा' अर्थात् दो भेदरूप, 'भणिदा' अर्थात् कही है। पहली आराधना कौन है और दूसरी कौन है ? इसके उत्तर में कहते हैं—'सम्मत्तम्मि य पढमा' अर्थात् श्रद्धानविषयक प्रथम आराधना है और 'विदिया हवे चरित्तम्मि' चारित्र विषयक दूसरी आराधना है।

उत्पत्तिकी अपेक्षा और गुणस्थानकी अपेक्षा दर्शनाराधनाको प्रथम तथा चारित्राराधना- को द्वितीय कहा है ऐसा कोई कहते हैं। उनका कहना है कि सम्यग्दर्शनरूप परिणामकी उत्पत्ति

प्रमत्तसंयतादिकं तु परमिति । श्रद्धानविरतिपरिणामयोर्युगपदप्यस्ति प्रादुर्भावः, श्रद्धानवतो वा असंयतस्य पश्चाद्विरतिरुपजायते । तत्किमुच्यते 'उत्पत्त्यपेक्षयेति । असंयतसम्यग्दृष्टीनां कुतः क्रमो येन तदपेक्षया प्रथमद्वितीय-व्यपदेशवृत्तिः स्यात् । उत्पत्त्यपेक्षया तत्रोक्त एव नियमः । आगमे वचनपौर्वापर्यमपेक्ष्य 'असंजदसम्माइट्ठि-संजदासंजदपमत्तसंजदा' इति वचनात् । तदेव वचनं किमर्थं क्रममाश्रित्य प्रवृत्तमुत नान्तरीयकतया ? न तावदस्ति परिणामानां नियोगभावी क्रमः । यदि स्यान्न यौगपद्यं कदाचित्स्यात् । दृश्यते च सम्यग्दृष्टि-संयतासंयता इति चैकदा । अथ नानेकं वचनमेकः प्रयोक्तुं लभत इति वक्तुरिच्छानुविधायी क्रमः सूत्रविवक्षाकृतं प्राथम्यं द्वितीयता चेति वाच्य न गुणस्थानापेक्षयेति । किं चोपजातदर्शनादिपरिणामस्यात्मनस्तद्गतातिशय-वृत्तिराराधना साऽत्र प्रस्तुता । तत्र च प्राथम्यं द्वितीयता वा, तत्किमुच्यते उत्पत्त्यपेक्षया गुणस्थानापेक्षया चेति ।

अस्य सूत्रस्योपोद्घातमेवमपरे वर्णयन्ति—अस्मिन् शास्त्रे किमयमेव निश्चयश्चतुर्विधैवाराधनेति, उतान्योऽपि विकल्पः संभवतीति ? अस्तीत्याहेति तदयुक्तम् 'दंसणणाणचरित्ततवाणमाराहणा भणिया' इत्यतीत-

---

होनेके उत्तरकालमें चारित्ररूप परिणाम उत्पन्न होता है इसलिये दर्शनाराधना प्रथम है । असंयत सम्यग्दृष्टि गुणस्थान पहले होता है प्रमत्तसंयत आदि बादमें होते हैं ।

किन्तु श्रद्धानरूप और विरतिरूप परिणाम एक साथ भी प्रकट होते हैं । अथवा सम्यग्दर्शन-से सम्पन्न असंयतके पीछेसे भी चारित्र उत्पन्न होता है, तब उत्पत्तिकी अपेक्षा प्रथम और द्वितीय हैं ऐसा कैसे कहते हैं ? असंयत सम्यग्दृष्टियोंका क्रम कैसे संभव है जिससे उसकी अपेक्षा प्रथम और द्वितीय व्यवहार हो सके । उत्पत्तिकी अपेक्षासे उनके सम्बन्धमें नियम कहा ही है ।

पूर्वपक्ष—आगममें वचनके पौर्वापर्यकी अपेक्षासे दर्शनाराधनाको प्रथम और चारित्रा-राधनाको द्वितीय कहा है, क्योंकि आगममें 'असंयतसम्यग्दृष्टी, संयतासयत, प्रमत्तसंयत' ऐसा वचन क्रम है ।

उत्तर—वही वचन किसलिये क्रमका आश्रय लेकर प्रवृत्त हुआ है ? क्या यह क्रम परस्परमें अविनाभावी होनेसे रखा गया है ? परिणामोंके क्रमसे ही होनेका तो कोई नियम नहीं है । यदि होता तो एक साथ श्रद्धान और चारित्र भी नहीं होते । किन्तु सम्यग्दृष्टि और संयतासयत एक कालमें होते देखे जाते है ।

पूर्वपक्ष—एक व्यक्ति एक साथ अनेक वचनोंका प्रयोग नही कर सकता इसलिये क्रम वक्ता-की इच्छाका अनुसरण करता है ।

उत्तर—तब प्रथम और द्वितीयपनेको सूत्रकी विवक्षाकृत कहना चाहिये अर्थात् सूत्रमें जिसकी प्रथम विवक्षा है वह प्रथम है और जिसकी विवक्षा बादमे है वह द्वितीय है । गुणस्थानकी अपेक्षा नहीं कहना चाहिये ।

दूसरे, जिस आत्मामें दर्शनादि परिणाम उत्पन्न हो गये है उनका दर्शन आदिके विषयमें विशेष अतिशय उत्पन्न करनेका नाम आराधना है । वही आराधना यहां प्रस्तुत है । उसके विषय-में उत्पत्तिकी अपेक्षा या गुणस्थानकी अपेक्षा प्रथमपना और द्वितीयपना कैसे आप कहते हैं ?

अन्य कुछ व्याख्याकार इस गाथासूत्रका उपोद्घात इस प्रकार कहते हैं—इस शास्त्रमे क्या यही निश्चय है कि आराधना चार ही प्रकार की है अथवा कोई दूसरा भी विकल्प संभव है ? यदि कहते हो 'है' तो ऐसा कहना उचित नहीं है क्योंकि गाथामे दर्शन ज्ञान चारित्र और तप आरा-

कालाभिधानक्रियातः प्रतीयते नास्य शास्त्रस्य व्यापार इति । यद्यस्य व्यापारः शास्त्रस्य वक्तुमिष्टः स्यात् 'भण्णदि' इति ब्रूयात् । 'जिणवयणे भणिया दुविहा आराहणा' इति वचनात् । संक्षेपनिरूपणापि 'तत्रैवेति-नेह संक्षेपव्याख्यम् । वस्तु बहूपन्यस्तं दुरवगमं मन्दबुद्धीनामिति । तदनुग्रहाय स्वल्पस्योपन्यासः । स संक्षेपस्त्रि-प्रकारः—वचनसंक्षेपोऽर्थसंक्षेपस्तदुभयसंक्षेपश्चेति । वचनबहुत्वस्यार्थनिश्चयो न जायते जडानामिति वचनं संक्षिप्यते । अर्थस्तु सप्रपञ्च एव । अनुयोगद्वारादीनां बहूनामुपन्यासमकृत्वा दिङ्मात्रोपन्यासः प्रस्तुतस्यार्थ-संक्षेपः । वचनानि तु बहूनि । तस्योभयसंक्षेपः पाश्चात्यः । द्विविधाराधनेति वचनसंक्षेपो नार्थसंक्षेपः । ज्ञानस्याराधना तपसश्च विद्यमानापि न वचनेनोच्यते । 'परमुखेनैवावबोधयितुं शक्यत इति ।

दंसणमाराहंतेण णाणमाराहियं हवे णियमा ।
णाणं आराहंतेण दंसणं होइ भयणिज्जं ॥ ४ ॥

'दंसणमाराहंतेण' दर्शनाराधनायां कथितायां ज्ञानाराधनापि शक्यते प्रतिपत्तुम्, अन्यथानवबोधनायां

धना 'भणिता' 'कही है' इस प्रकार अतीत काल सम्बन्धी क्रियाका प्रयोग किया गया है। इससे प्रतीत होता है कि इस शास्त्रका उसमें व्यापार नहीं है। यदि उनको कथन करनेमें इस शास्त्रका व्यापार इष्ट होता तो 'भण्णदि' ऐसा लिखते। किन्तु वे कहते हैं 'जिणवयणे भणिया दुविहा आरा-धणा।' जिनवचनमें दो प्रकारकी आराधना कही है। उसीमें संक्षेप भी कथन किया है इसलिये यहाँ संक्षेप भी नहीं कहना चाहिये।

इसका समाधान यह है कि बहुत विस्तारसे कथन मन्दबुद्धियोंके लिये दुरवगम होता है। वे उसे समझनेमें असमर्थ होते हैं। उनके कल्याणके लिये संक्षेप कथन किया जाता है। उस संक्षेपके तीन प्रकार हैं—वचन संक्षेप, अर्थ संक्षेप और उभय संक्षेप। वचनका विस्तार होने पर जड़बुद्धि अर्थका निश्चय नहीं कर सकते। इसलिये वचनका संक्षेप किया जाता है। अर्थका तो विस्तार रहता ही है। बहुतसे अनुयोगद्वार आदिका उपन्यास न करके केवल दिशामात्रका बतलाना प्रस्तुत विषयका अर्थ संक्षेप है। वचन तो बहुत है। उन दोनोंका अर्थात् वचन और अर्थका संक्षेप उभय संक्षेप है। 'दुविहा आराधणा' यह वचन संक्षेप है, अर्थ संक्षेप नहीं है। ज्ञानकी आराधना और तपकी आराधनाके विद्यमान होते हुए भी उन्हे वचनसे नहीं कहा। उन्हे परमुखसे ही अर्थात् दर्शन और चारित्राराधनाके द्वारा ही जाना जा सकता है।

भावार्थ—पहले विस्तारमें रुचि रखने वाले शिष्योंको दृष्टिमें रखकर चार प्रकारकी आराधना कही। पीछे संक्षेप रुचि शिष्योंकी अपेक्षा उसे दो प्रकारका कहा, क्योंकि दर्शनका ज्ञानके साथ तथा चारित्रका तपके साथ अविनाभाव होनेसे दर्शनाराधनामें ज्ञानाराधनाका और चारित्राराधनामें तप आराधनाका अन्तर्भाव होता है। तथा सम्यग्दर्शन आराधनाके होने पर ही ज्ञानाराधनापूर्वक चारित्राराधना होती है ॥ ३ ॥

गा०—दर्शनकी आराधना करने वालेके द्वारा नियमसे ज्ञानकी आराधना होती है। किन्तु ज्ञानकी आराधना करने वालेके द्वारा दर्शनकी आराधना भजनीय है, होती भी है, नहीं भी होती ॥ ४ ॥

टी०—'दंसणमाराहंतेण' अर्थात् दर्शन आराधनाका कथन करने पर ज्ञान आराधनाको भी

---

१. तत्रैव—मु० । २. परमुखे—आ० ।

शरावाद्यन्यतमभाजनमात्रप्रतिपत्तिवत्। ननु भाजनान्तरेणाग्नेरानयनं न संभवतीति भवत्यनभिहितेऽपि भाजन-मात्रे प्रतिपत्तिरिह कथम् ? इहाप्यविनाभावादित्याचष्टे 'दंसणमाराहंतेण'।

अन्यथापरे संबन्धमारचयन्ति गाथायाः। यदि द्विविधा आराधना 'चतुर्विधाराधनाफलं प्राप्ताः सिद्धाः' इति प्रतिज्ञा हीयते द्वयोरसंग्रहात् इति चेत् नास्मिन्नपि विकल्पे तयोरपि संग्रहार्थम्। कथं 'दंसणमाराहंतेण' इति प्रतिज्ञा हीयते इति। अत्र प्रतिज्ञा शब्देन किमुच्यते ? साध्यनिर्देशः प्रतिज्ञेति तावन्न गृहीतम्। चतुर्विधाराधनाफलप्राप्तत्वस्येह साध्यता नास्ति। सिद्धमेव हि चतुर्विधाराधनाफलप्राप्तत्वमनूद्यत इति। अथाभ्युपगतिः प्रतिज्ञा सा किन्नोपपद्यते ? सन्ति चतस्रः आराधनास्तासां च फलं ते प्राप्तवन्तस्ततः सत्यभ्युपगन्तव्ये कथमभ्युपगमानुपपत्तिः ? चतुर्विधेत्युक्तवन्तः द्विविधेति कथं न विरुद्धमिति पूर्वापरव्याहतिरिति चोद्यते। तथा यच्चोद्यमेव चोद्यते समासेन द्विविधेति वचनात्, प्रपञ्चनिरूपणायां चतुर्विधा तत्को विरोधः ? तेन विरोधपरिहाराय आगतेयं गाथा।

'दंसणं' श्रद्धान रुचि., 'आराधंतेण' आराधयता, 'णाणं' सम्यग्ज्ञान, 'आराधिदं' आराधितं 'हवे' भवेत् 'णियमा' निश्चयेन। यस्य हि यद्विषया श्रद्धा तस्य कथंचिदप्यज्ञाने न सा भवति। न हि निर्विषया रुचि

जानना शक्य है। जैसे आग लानेकी प्रेरणा करने पर उसको लानेके लिए सकोरा आदि किसी एक पात्र मात्रका बोध हो जाता है।

शङ्का—बिना किसी आधारके आगका लाना संभव नही है इसलिये पात्रमात्रका कथन न करने पर उसका बोध हो जाता है। किन्तु यहाँ यह कैसे संभव है ?

समाधान—यहाँ भी अविनाभाव होनेसे 'दसणमाराहतेण' इत्यादि कहा है।

यहाँ अन्य व्याख्याकार गाथाके सम्बन्धका आरम्भ इस प्रकार करते है—यदि आराधनाके भेद दो हैं तो 'चार प्रकारकी आराधनाके फलको प्राप्त सिद्ध है' यह प्रतिज्ञा पूर्ण नहीं होती; क्योंकि इसमे शेष दोका संग्रह नही किया है। किन्तु ऐसा कहना ठीक नहीं है क्योंकि यहाँ यह बत-लाते हैं कि उन दोमें भी शेष दोका संग्रह होता है। उसीके लिये 'दंसणमाराहंतेण' आदि कहा है।

तथा आप कहते हैं कि प्रतिज्ञाकी हानि होती है। यहाँ प्रतिज्ञा शब्दसे आप क्या कहते हैं ? साध्यके निर्देशको प्रतिज्ञा कहते हैं। उसका तो यहाँ ग्रहण नहीं किया है; क्योंकि 'चार प्रकारकी आराधनाके फलको प्राप्त' यह यहाँ साध्य नहों है। चार प्रकारकी आराधनाके फलको प्राप्त होना तो सिद्ध है, साध्य नहीं है। उसीका यहाँ अनुवाद मात्र किया है। यदि प्रतिज्ञाका अर्थ स्वीकृति है तो वह यहाँ क्यों नहीं उत्पन्न होती ? चार आराधनाएँ हैं और उनका फल सिद्धोने प्राप्त किया है ऐसा स्वीकार करने पर स्वीकृतिकी अनुपपत्ति कैसे हुई।

शंका—पहले कहा आराधनाके चार भेद हैं अब कहते हैं दो भेद हैं। तो यह पूर्वापर विरुद्ध कैसे नहीं है ?

समाधान—आप व्यर्थ ही तर्कमें कुतर्क लगाते है। ग्रन्थकार कहते हैं कि संक्षेपसे आरा-धनाके दो भेद हैं और बिस्तारसे कहने पर चार भेद हैं इसमें विरोध कैसा ? अतः विरोध दूर करनेके लिये ही यह गाथा आनी है। अस्तु

'दंसण' अर्थात् श्रद्धान या रुचिकी 'आराधंतेण' आराधना करनेसे 'णाण' अर्थात् सम्यग्ज्ञान 'आराधिद' आराधित, 'हवे' होता है। 'णियमा' निश्चयसे। जिसकी जिस विषयमें श्रद्धा होती है उसका उस विषयमें अज्ञान होने पर किसी भी तरह वह श्रद्धा नहीं होती। रुचि विषयके बिना

प्रवर्तते। बुद्धिपरिगृहीतवस्तुविषया श्रद्धेत्यविनाभावः श्रद्धाया ज्ञानेन।

अथवान्यथा व्याख्या—आत्मनो विषयाकारपरिणामवृत्तिर्ज्ञानं तदावरणक्षयोपशमजनितं, भूम्यावरणापनये तोयजन्मवत्। तद्गतविशुद्धिः प्रसन्नता अभिरुचिः श्रद्धा। श्रुतिनिरूपितार्थविषया सत्यभावना दर्शनं। तद्दर्शनमोहोपशमक्षयोपशमनिमित्तं तोया[1]श्रयपंकाभावे जलप्रसादवत्। तस्मिन्नाराध्यमाने ज्ञानसिद्धिरवश्यंभाविनी निराश्रयधर्मस्य केवलस्य सिद्ध्य[2]भावादिति।

तदेतत्परीक्ष्यते, विषयाकारपरिणतिरात्मनो यदि[3] स्याद्रूपरसगन्धस्पर्शात्मकता स्यात्तथा च—

'अरसमरूवमगंधं अव्वत्तं चेदणागुणमसद्दं'—[समय० ४९]

इत्यनेन विरोधः। विरुद्धश्च नीलपीतादिपरिणामो नैकत्र युज्यते। एकदा आकारद्वयसंवेदनप्रसंगश्च—बाह्यस्यैकं नीलादिविज्ञानगतमपरम्। विज्ञानगतविशुद्धिः प्रसन्नता अभिरुचिः श्रद्धेति वाऽसमीचीनं गदितम् चैतन्यस्य धर्मः श्रद्धानं न तु ज्ञानं, ज्ञानधर्मत्वे क्षायोपशमिकज्ञानविनाशे कथमवस्थितिर्दर्शनस्य। न हि धर्मिणि विनष्टे धर्मस्यावस्थितिः। चैतन्यमविनाशि तदाश्रयं तदिति चेत् ज्ञानस्य धर्मता नश्यति। किं च यो यस्य धर्मः स तस्य स्वरूपम्। न चान्यस्य धर्मिणो रूपं धर्म्यन्तरस्य प्रभवति। न हि बलाकायाः शुक्लता कुन्दकुसुमस्य कदाचन। एवं मतेः प्रसन्नता श्रुतादेर्न स्यात्, श्रुतादेर्वा प्रसन्नता मतेरिष्यते। एवं ज्ञानभेदे

नहीं होती। बुद्धिके द्वारा ग्रहण की गई वस्तुमें श्रद्धा होती है अतः श्रद्धाका ज्ञानके साथ अविनाभाव है।

इस गाथाको लेकर एक अन्य व्याख्या इस प्रकार है—आत्माके विषयाकार परिणमनको ज्ञान कहते हैं। वह ज्ञान ज्ञानावरणके क्षयोपशमसे उत्पन्न होता है। जैसे भूमिरूप आवरणको हटा देने पर पृथ्वीसे पानीका जन्म होता है। उस ज्ञानमें जो निर्मलता होती है उसे प्रसन्नता या स्वच्छता कहते हैं। और उसमें अभिरुचिको श्रद्धा कहते हैं। शास्त्रमें निरूपित अर्थके विषयमें सत्य-भावना श्रद्धा है। वही दर्शन है। वह दर्शनमोहके उपशम या क्षयोपशमसे होता है। जैसे पानीमें मिश्रित कीचड़के अभावमें जल निर्मल होता है। उस दर्शनकी आराधना करने पर ज्ञानकी सिद्धि अवश्य होती है क्योंकि जिस धर्मका कोई आश्रय नहीं है उसकी सिद्धि एकाकी नहीं होती।

अब इस व्याख्याकी परीक्षा करते हैं—

यदि आत्मा विषयाकार रूप परिणमन करता है तो विषयकी तरह आत्मा रूप, रस, गन्ध और स्पर्शादिमय हो जायेगा। और ऐसा होने पर जो आत्माको अरस, अरूप, अगन्ध, अव्यक्त, अशब्द और चेतना गुणवाला कहा है उसके साथ विरोध आता है। तथा नील पीत आदि रूप परिणाम परस्परमें विरुद्ध होनेसे एक जगह नहीं रह सकते। तथा एक ही कालमें दो आकारोंको जाननेका प्रसंग आता है एक बाह्य नीलादि और दूसरा ज्ञानगत आकार। तथा ज्ञानमें जो विशुद्धि या प्रसन्नता है उसे अभिरुचि या श्रद्धा कहना भी समीचीन नहीं है। श्रद्धान चैतन्यका धर्म है, ज्ञानका नहीं। यदि उसे ज्ञानका धर्म माना जायगा तो क्षायोपशमिक ज्ञानके नष्ट होने पर दर्शन कैसे रह सकेगा। धर्मीके नष्ट होने पर धर्म नहीं रहता। यदि कहोगे कि चैतन्य अविनाशी है अतः दर्शनका वही आश्रय है तो वह ज्ञानका धर्म नहीं हो सकता। तथा जो जिसका धर्म होता है वह उसका स्वरूप होता है एक धर्मीका स्वरूप दूसरे धर्मीका नहीं हो सकता। बगुलोंकी पंक्ति-का धर्म शुक्लता कभी भी कुन्दके फूलोंका धर्म नहीं हो सकती। इसी तरह मतिज्ञानकी निर्मलता

---

१. तोयाशय—आ०। २. सिद्धभा—अ० आ०। ३. यदि न स्या—अ० आ०।

तद्गतोऽकरणात् अपि प्रसक्तोऽयं इति क्षायिकस्य वा भवति न सर्वथा: [illegible] अनुद्भूतिः अभावो वा ।

न हि दर्शनमोहोदयं विना दर्शनस्याभावो युज्यते । यदि स्यात् दर्शनमोहनीयकल्पना अफलता भवेत् । अथ यथात्म्यविषया श्रद्धा आत्मनि प्रतिबन्धकसद्भावान्नोदेति, तदभावे तूद्भवति, यदि प्रतिबन्धकं किंचिन्न स्यात् । आत्मनि परिणामिनि सति किमिति सदा न भवेत् ? अपरिणामत्वे नात्मनि कदाचिदपि भवेत् । तद् अनुभवसिद्धमेतत् सहकारिकारणासन्निधानादात्मा श्रद्धानरूपेण न परिणमते । न तु किंचित्प्रतिबन्धकमस्तीति चेत् किं तत्सहकारि यस्याभावान्नोत्पत्तिः श्रद्धायाः ? अन्वयव्यतिरेकसमधिगम्यो हि हेतुफलभावः सर्व एव, तदंतरेण हेतुता प्रतिज्ञामात्रेण एव कल्पिता वस्तुविचारे अनुपयोगिनीति प्रतिबन्धकसद्भावानुमानमत्र मेऽभिमतं, तथैवं सति न घटते । किंचित् श्रुतनिरूपितार्थविषया सत्यभावनेति वा संबंधम् । अवध्यादिनिरूपितार्थविषया सत्यभावना किं न दर्शनं ? अवध्यादिकमपि वस्तुयाथात्म्यसंस्पर्शि । अथ च तत्सहजं समीचीनज्ञानोपयोगोपलक्षणमिति मन्यसे भवतु प्रकृतिप्रसंगेन—

"[illegible] ।
[illegible] होंति सिद्धाणं ॥" [ ]

इत्यनेन च व्याख्या विरुध्यते । गुणान्तरत्वेन उपन्यासानुपपत्तेः । क्षायिकक्षायोपशमिकयोर्भेदोऽस्ति

श्रुतादि ज्ञानोंकी नहीं हो सकेगी और न श्रुतादि ज्ञानकी निर्मलता मतिज्ञानकी । इस प्रकार ज्ञान भेद होने पर उन ज्ञानोंमें होने वाली निर्मलतामें भी भेद होता है। यह क्षायोपशमिक ज्ञानोंकी बात है । क्षायिककी क्या बात है । क्षायिकी निर्मलता न तो नवीन उत्पन्न होती है न नष्ट होती है ।

दर्शन मोहके उदयके बिना दर्शनका अभाव नहीं होता । यदि हो तो दर्शन मोहनीय कर्मकी मान्यता नहीं बनती ।

यदि कहोगे कि प्रतिबन्धकका सद्भाव रहनेसे आत्मामें यथार्थ विषयक श्रद्धा नहीं होती, यदि कोई प्रतिबन्धक नहीं होता तो उसके अभावमें श्रद्धा प्रकट होती है । यदि आत्मा परिणामी है तो सदा श्रद्धा क्यों नहीं रहती । यदि आत्मा अपरिणामी है तो कभी भी श्रद्धा प्रकट नहीं होगी । इसलिये यह अनुभव सिद्ध है कि सहकारी कारणोंके न रहनेसे आत्मा श्रद्धान रूपसे परिणमन नहीं करता, उसका प्रतिबन्धक कोई नहीं है ।

तब प्रश्न होता है कि वह सहकारी कौन है जिसके अभावके कारण श्रद्धाकी उत्पत्ति नहीं होती । सर्वत्र कार्यकारणभाव अन्वय और व्यतिरेकके द्वारा ही जाना जाता है । अन्वय व्यतिरेकके बिना केवल कहने मात्रसे ही यदि किसीमें कार्यकारणभाव हो तो वस्तु विचारमें उसका कोई उपयोग संभव नहीं है उसमें वह अनुपयोगी है । इसीसे आगममें प्रतिबंधकके सद्भावके अनुमानको मान्य किया गया है । अर्थात् प्रतिबन्धकके होनेसे श्रद्धा प्रकट नहीं होती और उसके अभावमें प्रकट होती है । ऐसा होने पर आपका उक्त कथन घटित नहीं होता ।

तथा शास्त्रमें निरूपित अर्थको विषय करने वाली सत्यभावना दर्शन है यह कहना भी ठीक नहीं है क्योंकि तब प्रश्न होता है कि अवधि आदि ज्ञानोंके द्वारा निरूपित अर्थको विषय करने वाली सत्यभावना दर्शन क्यों नहीं है ? क्योंकि अवधि आदि ज्ञान भी यथार्थ वस्तुको विषय करते हैं । यदि कहोगे कि समीचीन ज्ञानोपयोग लक्षण वाला श्रुत ज्ञान है इसलिये उसका ग्रहण किया है तो आगममें जो सिद्धोंके आठ गुण-सम्यक्त्व, ज्ञान, दर्शन, वीर्य, सूक्ष्मत्व, अवगाहन, अगुरुलघु

---

१. तावदर्थ—आ० मु० ।

वा न वा ? यदि नास्ति भावपंचकनिरूपणाकारिणा आगमेन विरोधः । अथ अस्ति भेदः परिणामः परिणामान्तरस्य स्वरूपं न भवति । परिणामक वस्य परिणामिस्वरूपता न्याय्या । यौ भिन्नप्रतिबंधकापायजन्यौ, न तावन्योऽन्यस्य धर्मधर्मिणौ यथा अवधिकेवले भिन्नप्रतिबन्धकापायजन्ये, तथा न ज्ञानदर्शने ।

ज्ञानाराधना चारित्राराधनेति द्वैविध्यं कस्मान्नोपन्यस्तं इत्यत्र चोद्ये प्रतिविधानामाह—'णाणमाराधंतेण दंसणं होइ भयणिज्जं ।' ज्ञानशब्दः सामान्यवाची संशये, विपर्यासे, समीचीने च वृत्तः । संशयज्ञानं, विपर्यासज्ञानं सम्यग्ज्ञानमिति प्रयोगदर्शनात् । तेन ज्ञाने परिणत आत्मा नियोगतस्तत्त्वश्रद्धाने विपरिणमत एवेति न नियोगोऽस्ति, मिथ्याज्ञानपरिणतस्य तत्त्वश्रद्धाया अभावात् । ततो ज्ञानस्य दर्शनाविनाभावित्वस्याभावात् न ज्ञानाराधनोक्त्या दर्शनाराधनावगतु शक्येति न तथा संक्षेपाभिधानमागमे प्रक्रान्तमिति भावार्थः । 'णाणं' ज्ञान । 'आराधंतेण' आराधयता । 'दंसणं' दर्शन । 'होदि' भवति । 'भयणिज्जं' भजनीय विकल्प्यम् । अत्र दंसणशब्देन दर्शनविषयमाराधनमुच्यते । ततोऽयमर्थः दर्शनाराधना भाज्येति भजनीयतया अविनाभावित्वाभाव सूचित । सम्यग्ज्ञाने आराधिते भवत्याराधिता, मिथ्याज्ञानाराधनायां नेति भजनीयता । अथवा ज्ञानाराधना चारित्राराधनेति च शक्यते संक्षेप्तुम् ।

और अव्याबाध कहे हैं उसके साथ उक्त व्याख्याका विरोध आता है। क्योंकि एक गुणका अन्य गुणरूपसे उपन्यास नहीं किया जा सकता।

तथा क्षायिक और क्षायोपशमिकमे भेद है या नहीं ? यदि नहीं है तो पाँच भावोंका निरूपण करनेवाले आगमसे विरोध आता है। यदि भेद है तो एक परिणाम दूसरे परिणामका स्वरूप नहीं होता, इसलिए परिणामोंके समूहको परिणामीका स्वरूप मानना न्याय है।

तब जो भिन्न प्रतिबन्धकोंके अभावमे उत्पन्न होते हैं वे परस्परमें एक दूसरेके धर्म-धर्मी नही हो सकते। जैसे अवधिज्ञान और केवलज्ञान, अवधिज्ञानावरण और केवलज्ञानावरण रूप भिन्न प्रतिबन्धकोके अभावमें उत्पन्न होनेसे परस्परमें धर्म-धर्मी नही है उसी तरह ज्ञान और दर्शन भी परस्परमें धर्म-धर्मी नहीं हैं।

शंका—ज्ञानाराधना और चारित्राराधना इस प्रकारसे दो आराधना क्यो नही कही ?

समाधान—इसका उत्तर देते हैं—'णाणमाराधंतेण दंसणं होइ भयणिज्जं।' यहाँ ज्ञान शब्द सामान्यवाची है क्योंकि संशय, विपर्यय और समीचीनमे रहता है। संशयज्ञान, विपरीतज्ञान, सम्यग्ज्ञान ऐसा प्रयोग देखा जाता है। इसलिए ज्ञानरूप परिणमन करनेवाला आत्मा नियमसे तत्त्व श्रद्धान रूपसे परिणमन करता ही है ऐसा नियम नहीं है; क्योंकि जो आत्मा मिथ्याज्ञान रूपसे परिणमन करता है उसके तत्त्व श्रद्धाका अभाव होता है, इसलिए ज्ञान दर्शनका अविनाभावी नहीं है। अतः ज्ञानाराधनाके कहनेसे दर्शनाराधनाका ग्रहण शक्य नही है। इसलिए आगममें उस प्रकारसे संक्षेप कथन नहीं किया है। अतः ज्ञानकी आराधनासे दर्शनकी आराधना भजनीय है। यहाँ दर्शन शब्दसे दर्शन विषयक आराधनाको कहा है। अतः यह अर्थ हुआ कि दर्शन आराधना भजनीय है। इससे ज्ञानाराधनाके साथ दर्शनाराधनाके अविनाभावके अभावको सूचित किया है। अर्थात् सम्यग्ज्ञानकी आराधना करने पर तो दर्शनकी आराधना होती है, किन्तु मिथ्याज्ञानकी आराधना करने पर दर्शनकी आराधना नहीं होती है। अथवा ज्ञानाराधना और चारित्राराधना इस प्रकारसे भी संक्षेप किया जा सकता है।

भावार्थ—दर्शन श्रद्धानको कहते हैं। श्रद्धान अज्ञात वस्तुमें नहीं होता। अतः श्रद्धाका

ननु च ज्ञानमन्तरेणापि दर्शनं वर्तते, यतो मिथ्यादृष्टिरपि ज्ञानस्याराधको भवति । अतोऽविनाभावाभाव इत्यत आह—

सुद्धणया पुण णाणं मिच्छादिट्ठिस्स वेंति अण्णाणं ।
तम्हा मिच्छादिट्ठी णाणस्साराहओ णेव ॥ ५ ॥

शुद्धनयाः पुन । अनन्तधर्मात्मकस्य वस्तुनोऽन्यतमधर्मपरिच्छेदस्तदविनाभाविधर्मबलप्रसूतो नयः । तथा चोक्तम् इति । "उपपत्तिबलादर्थपरिच्छेदी नयः' इति । शुद्धो नयो येषां ते शुद्धनयाः । निरपेक्षनयनिरासाय शुद्धविशेषणम् । नित्यमेव सर्वथा क्षणिकमेवेति ये परिच्छेदास्ते विपर्यासरूपास्तथाविधस्य प्रतिपक्षधर्मानपेक्षस्य वस्तुनि रूपस्याभावात् । सापेक्षं रूपं निराकाङ्क्षतारूपेण दर्शयतः प्रत्ययस्य अतस्मिंस्तदिति ज्ञानं भ्रान्तमिति भ्रान्तता । तद्दोषरहितता शुद्धता । तथा हि—कृतकत्वेन अनित्यतामेव वस्तुन. प्रत्येति ज्ञानं न तस्स-

---

ज्ञानके साथ अविनाभाव है। अत गाथा सूत्रमें ठीक ही कहा है कि तत्त्व श्रद्धानकी आराधना करने पर सम्यग्ज्ञानकी आराधना अवश्य होती है। इस पर प्रश्न होता है कि ज्ञानाराधना और चारित्राराधना ऐसे दो भेद क्यों नहीं रखे ? इसके उत्तरमें कहा है कि सम्यग्ज्ञानकी आराधना करने पर सम्यग्दर्शनकी आराधना होती है किन्तु मिथ्याज्ञानकी आराधनामें सम्यक्त्वकी आराधना नहीं होती। इस प्रकार ज्ञान और दर्शनमें अविनाभाव न होने से ज्ञानाराधनामें दर्शनाराधना भाज्य है। इस पर पुन प्रश्न होता है कि जब 'सम्यग्ज्ञानकी आराधना' कहने पर सम्यक्त्वकी आराधनाका बोध हो सकता है तो वैसा क्यों नहीं कहा ? इसका उत्तर है कि ज्ञानके सम्यक् व्यपदेशमें सम्यक्त्व मुख्य हेतु है। सम्यक्त्वके विना ज्ञान सम्यक् नहीं कहलाता। अत सम्यग्ज्ञानका प्राधान्य नहीं है ॥४॥

'ज्ञानके विना भी सम्यग्दर्शन होता है क्योंकि मिथ्यादृष्टि भी ज्ञानका आराधक होता है। अतः ज्ञानके साथ सम्यग्दर्शनका अविनाभाव सम्बन्ध नहीं है। इस आशंकाका उत्तर देते हैं—

गा०—किन्तु शुद्धनय दृष्टि वाले ज्ञानी जन मिथ्यादृष्टिके ज्ञानको अज्ञान कहते हैं, इसलिए मिथ्यादृष्टि ज्ञानका आराधक नहीं ही होता ॥५॥

टी०—अनन्त धर्मात्मक वस्तुके किसी एक धर्मके जाननेको नय कहते हैं। यह नय उस धर्मके साथ ही रहनेवाले अन्य धर्मोंके बलसे उत्पन्न होता है। अर्थात् नय जिस धर्मको जानता है उस धर्मके साथ जो अनन्त धर्म उस वस्तुमे रहते हैं उनका निषेध नही करता। किन्तु उनको गौण करके एक धर्मकी मुख्यतासे वस्तुको जाननेका नाम नय है। कहा भी है—युक्तिके बलसे वस्तुके जाननेको नय कहते हैं। शुद्ध नय जिनका है वे शुद्धनय होते हैं। यहाँ निरपेक्ष नयके निरासके लिए 'शुद्ध' विशेषण लगाया है। वस्तु सर्वथा नित्य ही है अथवा सर्वथा क्षणिक ही है इस प्रकारके जो ज्ञान हैं वे विपरीत रूप है क्योंकि इस प्रकारके प्रतिपक्षी धर्मोंसे निरपेक्ष रूपका वस्तुमें अभाव है। वस्तुका स्वरूप सापेक्ष है उसे जो निरपेक्ष रूपसे दिखलाने वाला ज्ञान है, वह भ्रान्त है। क्योंकि जो जिस रूप नहीं है उसे उस रूप दिखलाता है वह ज्ञान भ्रान्त होता है। और जो उस दोषसे रहित है वह शुद्ध है। इसका खुलासा इस प्रकार है—वस्तुको उत्पत्तिको देखकर मिथ्याज्ञान वस्तुको सर्वथा अनित्य ही मानता है। किन्तु वह सर्वथा अनित्य नहीं है। समस्त

र्थंवा वस्त्वनित्यं, नित्यानित्यात्मकत्वात्सकलस्य । यदि हि नित्यमेव स्यात् क्रियमाणतानुरूपहेतुसंपर्केणा-[1]युक्ता तस्मात्कथंचिन्नित्यं भवत्येव च न भवतीति युक्तमनित्यत्वम् ॥ शुद्धा नया येषां प्रतिपत्तॄणां ते शुद्धनयाः । 'पुण' पुनः । 'अण्णाणं' ज्ञानमित्यभिमतं परस्य । 'मिच्छादिट्ठिस्स' मिथ्यादृष्टेः । 'बेंति' ब्रुवते । 'अण्णाणं' अज्ञानं इति । न ज्ञानशब्दः सामान्यवाची । किन्तु यथार्थप्रतिपत्तिरेव ज्ञानशब्दाभिधेयेति । ज्ञायते गम्यते अर्थः परिच्छिद्यते येन तज्ज्ञानम् । वस्त्वन्यभूतं च [2]रूपमादर्शयता नार्थः परिच्छिद्यते तस्मान्न मिथ्याज्ञानं ज्ञानशब्द-स्यार्थः, तदज्ञानमित्येव ग्राह्यम् ॥ ननु च—

"गदि इंदिये च काये जोगे वेदे कसाय णाणे य ।
संजमदंसणलेस्सा भविया सम्मत्तसण्णि आहारे ॥" —[प्रा० पं० सं० १।५७]

इत्यत्र ज्ञानशब्दः सामान्यवाची सत्यं, ज्ञातिर्ज्ञानमिति व्युत्पत्तौ सा निरूपणा सामान्यशब्द इति ॥ 'तम्हा' तस्मात् । 'मिच्छादिट्ठी' तत्त्वश्रद्धानरहित 'णाणस्साराधको ण होदित्ति' पदघटना । ज्ञानं नारा-धयतीत्यर्थः ॥

यदुक्तं अज्ञाने दर्शनाभाव इति किं तदज्ञानं कस्य भवतीति ? तत इदं सूत्रं इति । तदपेशलं । किं तदज्ञानमित्यस्य प्रश्नस्य प्रतिवचनं न सूत्रेऽस्ति । मिथ्याज्ञानलक्षणप्रतिपादनपरमिथ्यादृष्टिसम्बन्धिज्ञानत्वमेव

वस्तु समूह नित्यानित्यात्मक है—कथंचित् नित्य और कथंचित् अनित्य है । यदि वस्तु सर्वथा नित्य होती तो उसको करनेके अनुरूप कारणोंका अभाव होता । अतः वस्तु नित्य भी है और अनित्य भी है ।

जिन ज्ञाताओंके नय शुद्ध होते हैं वे शुद्धनय वाले होते है । ऐसे शुद्धनय वाले मिथ्यादृष्टिके ज्ञानको अज्ञान कहते हैं । यहाँ ज्ञान शब्द सामान्य ज्ञानका वाचक नहीं है किन्तु ज्ञान शब्दका अर्थ यथार्थ ज्ञान ही है । जिसके द्वारा वस्तु जानी जाती है वह ज्ञान है । जो वस्तुमें नहीं पाये जानेवाले रूपको दर्शाता है वह वस्तुको नहीं जानता । अतः ज्ञान शब्दका अर्थ मिथ्याज्ञान नहीं है । मिथ्याज्ञान अज्ञान ही है ऐसा स्वीकार करना चाहिए ।

शंका—'गइ इंदिये च काये' इत्यादि गाथाके द्वारा चौदह मार्गणा बतलाई है । उनमें भी ज्ञान शब्द आता है जो ज्ञान सामान्यका वाचक है ?

समाधान—आपका कहना सत्य है । 'ज्ञातिर्ज्ञानं' जानना ज्ञान है, इस व्युत्पत्तिके अनुसार वहाँ ज्ञान शब्दसे ज्ञान सामान्यका ग्रहण किया है ।

'तम्हा' इस कारणसे 'मिच्छादिट्ठी' जो तत्त्व श्रद्धानसे रहित है वह, णाणस्साराधको न होदि' ज्ञानका आराधक नहीं होता । इस प्रकार पदोंका सम्बन्ध होता है ।

इस गाथाकी अन्य टीकाकार इस प्रकार व्याख्या करते हैं—पूर्वमें जो अज्ञान अवस्थामें सम्यग्दर्शनकी आराधनाका अभाव कहा है वह अज्ञान क्या है और किसको होता है, इसको बत-लानेके लिए यह गाथा सूत्र है । किन्तु उनका यह कथन अयुक्त है । 'वह अज्ञान क्या है' इस प्रश्नका कोई उत्तर इस गाथामें नहीं है । उनका यह भी कथन है कि मिथ्याज्ञानका लक्षण कहते हुए जो मिथ्यादृष्टिसे सम्बद्ध ज्ञानको अज्ञान कहा है उसमें उक्त दोनों प्रश्नोंका उत्तर आता है ।

---

१. युक्तता स्यात्स्याद्वतो–मु० । यवता तस्याव–अ० । २. रूपवता दर्शयता–आ० ।

ज्ञानाराधकत्वमित्युभयोरपि प्रतिवचनमिति विकल्प्यते। एवमपि 'तम्हा ण मिच्छदिट्ठि' इति सूत्रे मिथ्यादृष्टेर्ज्ञानस्याराधकत्वाभावमेव सूत्रकार उपसंहरति। तत्परित्यज्यासूत्रितमुपादेयमिति केयं स्वतन्त्रता?

चारित्राराधना कथ्यते। चतुर्थ्या आराधनायाः प्रतिपत्तिक्रमं वर्णयत्याह—

संजममाराहंतेण तवो आराहिओ हवे णियमा ॥
आराहंतेण तवं चारित्तं होइ भयणिज्जं ॥ ६ ॥

'संजममाराहंतेण' संयम इत्यनेन शब्देन इह चारित्रमित्युच्यते। कर्मादाननिमित्तक्रियाभ्य उपरमः संयमः। स च चारित्रम्। यथा चाभ्यधायि—'कर्मादाननिमित्तक्रियोपरमो ज्ञानवतश्चारित्रमिति'[1]। 'संजमं' चारित्रं, 'आराधंतेण' आराधयता। 'तवो' तपः। 'आराधिदो' आराधितं। 'हवे' भवेत्। 'णियमा' अवश्यमेव। कथं? इह अनशनं नाम अशनत्यागः। स च त्रिप्रकारः। मनसा भुञ्जे, भोजयामि, भोजने व्यापृतस्यानुमतिं करोमि। भुङ्क्ष्व, भुंङ्क्ष्व, पचनं कुर्विति वचसा। तथा चतुर्विधस्याहारस्याभिसंधिपूर्वकं कायेनादानं, हस्तसंज्ञायाः प्रवर्तनं अनुमतिसूचनं कायेन। एतासां मनोवाक्कायक्रियाणां कर्मोपादानकारणानां त्यागोऽनशनं चारित्रमेव। योगत्रयेण तृप्तिकारिण्यां भुजिक्रियायां दर्पवाहिन्यां निराकृतिः अवमोदर्यम्। तथा आहारसंज्ञाया जयो वृत्तिपरिसंख्यानम्। रसगोचरगार्द्ध्यत्यजनं त्रिधा रसपरित्यागः। कायसुखाभिलाषत्यजनं कायक्लेशः।

यदि इसे मान भी लिया जाये तब भी जो गाथामें 'तम्हा वा मिच्छादिट्ठी' इत्यादि कहा है वह बतलाता है कि गाथा सूत्रके कर्ता आचार्य 'मिथ्यादृष्टि ज्ञानका आराधक नहीं होता' यही उपसंहार करते हैं। अतः उसे छोड़कर जो बात गाथा सूत्रमें नहीं कही, उसे ग्रहण करना, यह कैसी स्वतन्त्रता है ॥५॥

आगे चारित्राराधनाको कहते हैं। उसके साथ चौथी तप आराधनाकी प्रतिपत्तिका क्रम दिखलाते हैं—

गा०—संयमकी आराधना करने वालेके द्वारा तप नियमसे आराधित होता है। किन्तु तपकी आराधना करने वालेके द्वारा चारित्र भजनीय होता है ॥ ६ ॥

टी०—'संजममाराहंतेण' यहाँ आगत संयम शब्दसे चारित्रका ग्रहण होता है। कर्मोंके ग्रहणमें निमित्त क्रियाओंके त्यागको संयम कहते हैं और वह चारित्र है। कहा भी है—ज्ञानी पुरुषके कर्मोंके ग्रहणमें निमित्त क्रियाओंके त्यागको चारित्र कहते हैं।

चारित्रकी आराधना करने वालेके द्वारा तप नियमसे आराधित कैसे होता है यह बतलाते हैं—अनशन नामक तपमें अनशन नाम भोजनके त्यागका है। उसके तीन प्रकार हैं—मनसे भोजन करता हूँ, भोजन कराता हूँ, भोजनमें लगे हुएको अनुमति करता हूँ। मैं भोजन करता हूँ, तुम भोजन करो, भोजन बनाओ इस प्रकार वचनसे कहना। तथा चार प्रकारके आहारका संकल्पपूर्वक कायसे ग्रहण करना, हाथसे संकेत करना, कायसे अनुमतिका सूचन करना। ये जो मन वचन कायकी क्रियाएँ हैं जो कर्मोंके ग्रहणमें कारण हैं उनका त्याग अनशन है जो चारित्र ही है।

तृप्ति करने वाले तथा मद पैदा करने वाले खानपानका मन वचन कायसे त्याग अवमौदर्य है। आहार संज्ञाके जीतनेको वृत्तिपरिसंख्यान तप कहते हैं। मन वचन कायसे रसविषयक लम्पटताके त्यागको रसपरित्याग तप कहते हैं। शारीरिक सुखकी इच्छाके त्यागको कायक्लेश तप

---

१. सर्वा० सि० १।१।

चित्तव्याकुलतापराजयो विविक्तशयनासनम् । स्वकृतापराधगूहनत्यजनं आलोचना । स्वकृतादशुभयोगात्प्रतिनिवृत्तिः प्रतिक्रमणं । तदुभयोज्झनं उभयं । येन यत्र वा अशुभोपयोगोऽभूत्तन्निराक्रिया, ततोऽपगमनं विवेकः । देहे ममत्वनिरासः कायोत्सर्गः । तपोऽनशनादिकं यथा भवति चारित्रं तथोक्तमेव । असंयमजुगुप्सार्थमेव प्रव्रज्याहापनं छेदः । मूलं पुनश्चारित्रादानम् । ज्ञानदर्शनचारित्रतपसामतीचारा अशुभक्रियाः । तासामपोहनं विनयः । चारित्रस्य कारणानुमननं वैयावृत्यं ॥

एवं स्वाध्यायो ध्यानं च अविरतिप्रमादकषायत्यजनरूपतया । इत्थं चारित्राराधनयोक्त्या प्रत्येतु सर्वथा तपस आराधना । अशनादिकं यदि नाम त्यक्तं न नियोगतोऽविरतिः प्रत्याख्याता भवति । कृताशनत्यागा अपि हि दृश्यंते असंयता इत्येतच्चेतसि कृत्वाह—आराधंतेणेति 'आराधंतेण' आराधयता । 'तवं' तपः । 'चारित्तं' चारित्रं सकलविरतियोगः । 'होदि' भवति । 'भयणिज्जं' भजनीयम् । तपस्युद्यतः करोति वा न वा असंयमपरिहारं इति यावत् । अत्रान्येषां व्याख्या—चारित्राराधनाया तपस आराधनायाः सिद्धिरवश्यंभाविनीत्युक्तं तत्कथं ? तदिदं संयममाराधंतेणेत्यादि एवं सूत्रोपोद्धात. कृतः स नोपपद्यते । चारित्राराधनायां तपस आराधनया सिद्धिर्भवतीति नोक्तं क्वचित्सूत्रकारेण तत्किमुच्येत उक्तमिति ? 'सिद्धियाय हवे चरित्तंहि' इति वचनेनोक्तमिति चेन्न अशब्दार्थत्वात् । शब्देन हि यत्प्रतीयते तदुक्तमिति युक्तं वक्तुं । अपि च भवतु

कहते हैं। चित्तकी व्याकुलताके दूर करनेको विविक्त शयनासन तप कहते हैं। अपने द्वारा किया गये अपराधको छिपानेका त्याग करना आलोचना है। अपने द्वारा किये गये अशुभ मन वचन कायके व्यापारका प्रतीकार करना प्रतिक्रमण है। इन दोनोंको ही करना उभय है। जिसके द्वारा अथवा जिस स्थान पर अशुभ उपयोग हुआ हो उनसे अलग होना विवेक है। शरीरमें ममत्वका त्याग कायोत्सर्ग है। अनशनादि तप जिस प्रकार चारित्र हैं ऊपर कहा ही है।

असंयमके प्रति ग्लानि प्रकट करनेके लिये दीक्षाके कालको कम कर देना छेद प्रायश्चित्त है। और पुनः चारित्र ग्रहण करना मूल प्रायश्चित्त है। ज्ञान, दर्शन, चारित्र और तपके अतीचारोंको अशुभ क्रिया कहते हैं उनका त्याग अर्थात् ज्ञानादिमें दोष न लगाना विनय है। चारित्रके कारणोंमें अनुमति देना वैयावृत्य है। इसी प्रकार स्वाध्याय और ध्यान भी चारित्र है क्योंकि ये सब अविरति, प्रमाद और कषायके त्यागरूप हैं।

इस प्रकार चारित्राराधनाके कथनसे तप आराधनाको जाना जा सकता है। यदि भोजन आदिका त्याग किया तो अविरतिका त्याग नियमसे नहीं किया। 'भोजनका त्याग करने वाले भी असंयमी देखे जाते हैं' यह बात चित्तमें रखकर आचार्य कहते हैं—

तपकी आराधना करने वालेके द्वारा, सकलविरतिसे सम्बन्धरूप चारित्र, 'भयणिज्जं' भजनीय है। अर्थात् तपमें जो संलग्न है वह असंयमका त्याग करता भी है और नहीं भी करता।

अन्य टीकाकार इसकी व्याख्या इस प्रकार करते हैं—चारित्रकी आराधनामें तपकी आराधनाकी सिद्धि अवश्य होती है ऐसा जो कहा वह कैसे ? उसीके समाधानके लिये 'संजममाराधंतेण' इत्यादि कहा है। ऐसा वे इस गाथाकी उत्थानिकामें कहते हैं। उनका कथन ठीक नहीं है—क्योंकि चारित्रकी आराधना करनेपर तप आराधनाकी सिद्धि होती है ऐसा ग्रन्थकारने कहीं भी नहीं कहा। तब कैसे कहते हैं कि ग्रन्थकारने ऐसा कहा है ? यदि कहोगे कि—

'सिद्धियाय हवे चरित्तम्मि' इस कथनके द्वारा कहा है ? तो यह भी ठीक नहीं है क्योंकि

तेनोक्तं इह तथैवोक्तं किमिति पुनरुपन्यस्यते ? तत्कथमिति वा युक्तं सूत्रे चारित्रसिद्धावितरसिद्धिक्रमस्यानुपन्यासात् ॥ प्रतिज्ञामात्राद्विप्रतिपन्नो न प्रतिपद्यते इति युक्तिप्रश्नोऽयं स कथं युज्यते व्याख्यान्तरसूचिते प्रतिविधाने । अन्ये व्याख्यानं "त्रयोदशात्मके चारित्रे सर्वथा प्रयतनं संयमः । स च बाह्यतपः संस्कारिताभ्यन्तरतपसा विना न संभवति । तदुपकृतात्मकत्वात्संयमस्वरूपस्येति" तदघटमानं । न हि प्रयतनं संयमशब्दस्यार्थः । क्वचिदपि संयमशब्दस्य तथाऽप्रयुक्तत्वात् । प्रयोगावृत्तिसमधिगम्यो हि शब्दार्थः । 'विदिया य हवे चरित्तंहि' इति सूत्रे चारित्रशब्देन सामान्यवाचिना सकलचारित्रमिति किमर्थं विशेषेणोच्यते ? सर्वस्य हि सामायिकादेश्चारित्रस्याराधना चारित्राराधना भवति । यथाहि—'पंडितपंडितमरणं खीणकसाया मरंति केवलिणो', इत्यन्ये यथाख्यातचारित्राराधनामपि कथयति । बाह्यतपःसंस्कारिताभ्यन्तरतपसा इति वा असंबद्धं । अन्तरेणापि बाह्यतपोऽनुष्ठानं अंतर्मुहूर्तमात्रेणाधिगतरत्नत्रयाणां भद्दणराजप्रभृतीनां पुरुदेवस्य भगवतः शिष्याणां निर्वाणगमनमागमे प्रतीतमेव ॥

इन शब्दोंका यह अर्थ नहीं है। शब्दके द्वारा जिसकी प्रतीति हो, उसे उनका कथन कहना युक्त है। तथा, यदि उन्होंने ऐसा कहा है तो पुनः उसीका उपन्यास वह क्यों करते और वह कैसे युक्त हो सकता है ? क्योंकि गाथामें चारित्रकी सिद्धिमें अन्यकी सिद्धिके क्रमका कथन नहीं है। 'प्रतिज्ञामात्रसे विवादग्रस्त व्यक्ति नहीं समझता' इस प्रकारका युक्तिप्रश्न अन्य व्याख्याओंके द्वारा सूचित प्रतिविधानमें कैसे युक्त हो सकता है ?

एक अन्य व्याख्यामें कहा है—'तेरह प्रकारके चारित्रमें सर्वथा प्रयत्नशील होनेका नाम संयम है। वह संयम बाह्यतपके द्वारा संस्कार किये गये अभ्यन्तर तपके बिना नहीं होता अर्थात् बाह्य और अभ्यन्तर तपके होनेपर ही संयम होता है; क्योंकि संयमका स्वरूप तपके द्वारा उपकृत होता है' किन्तु उक्त कथन घटित नहीं होता; क्योंकि संयम शब्दका अर्थ प्रयत्नशील होना नहीं है। किसी ग्रन्थमें संयम शब्दका प्रयोग इस अर्थमें नहीं हुआ है। शब्दका अर्थ उसके बारंबार प्रयोगसे जाना जाता है।

'विदिया य हवे चरित्तम्मि' इस गाथा सूत्रमें आगत चारित्र शब्द सामान्य चारित्रका वाचक है, उसका सकल चारित्र रूप विशेष अर्थ आप कैसे कहते हैं ? समस्त सामायिक आदि चारित्रकी आराधना चारित्राराधना है। आगे कहेंगे कि क्षीणकषाय और केवलीके पण्डित पण्डित मरण होता है। अतः यथाख्यातचारित्राराधना भी उसमे आती है। तथा बाह्य तपके द्वारा संस्कारित अभ्यन्तर तपसे' इत्यादि कथन भी असम्बद्ध है क्योंकि बाह्य तपके अनुष्ठानके बिना भी अन्तर्मुहूर्तमात्रमें रत्नत्रयको प्राप्त करके, भगवान् ऋषभदेवके शिष्य भद्दणराज वगैरहका निर्वाण गमन आगममें प्रसिद्ध ही है।

भावार्थ—संयम शब्दमें 'सं' का अर्थ है सम्यक् अर्थात् मन वचन कायके द्वारा पापको लाने वाली क्रियाओंका 'यमन'—त्याग संयम है। अतः संयमका अर्थ चारित्र है। वह बाह्य अनशन आदि और अभ्यन्तर प्रायश्चित्तादिके भेदसे बारह प्रकारका है। उस तपकी आराधना चारित्राराधनामें आती है क्योंकि उसमें भी अविरति, प्रमाद और कषायका त्याग होता है। किन्तु तप आराधनामें चारित्राराधना नहीं आती; क्योंकि तपस्वी असंयमका त्यागी होता भी है और नहीं भी होता। भोजनादिका त्याग करने वाले भी कोई-कोई असंयमी देखे जाते हैं। इस ग्रन्थ पर अन्य भी टीकाएँ थीं। उन्हींके मतका निराकरण ऊपर टीकाकार अपराजित सूरिने किया है।

ननु तपस्यायत्तनिर्जरानुक्रमेण निर्जरामुपयाच्छन्ति सन्ति कर्माणि यदा निःशेषाण्यपगतानि भवन्ति तदा स्वात्मस्वरूपं निर्वाणमुपजायते ततो निर्वाणस्य कारणं निर्जरैव, तस्याश्च संपादकं तपस्ततो युक्तं दर्शनाराधना तप आराधना चेति द्विविधा आराधनेति भवितु' इत्यारेकायां, तपो निर्जरा मुक्तेरनुगुणा करोति सति चारित्रे संवरकारिणि नान्यथेति प्रदर्शयति 'सम्मादिट्ठिस्स वि' इत्यादिना—

सम्मादिठ्ठिस्स वि अविरदस्स ण तवो महागुणो होदि ।
होदि हु हत्थिण्हाणं चुंदच्छुदकम्म तं तस्स ॥७॥

'सम्मादिठ्ठिस्सवि' तत्वार्थश्रद्धानवतोऽपि । 'अविरदस्स' असंयतस्य । 'न तवो' तप. । 'महागुणो' गुणशब्दोऽनेकार्थवृत्तिः । रूपादयो गुणशब्देनोच्यन्ते यथाभणदा—'रूपरसगन्धस्पर्शसंख्यापरिमाणानि, पृथक्त्वं, संयोगविभागौ,, परत्वापरत्वबुद्धयः, सुखदुःखेच्छाद्वेषप्रयत्नाश्च गुणाः क्रियावद्गुणवत्समवायिकारणं द्रव्य'-इत्यस्मिन्सूत्रे गृहीता. ॥ 'गुणभूता वयमत्र नगरे' इति । अत्राप्रधानवाचीयस्य गुणस्य भावादिति विशेषेण वर्तते । 'गुणोऽनेन कृत' इत्यत्र उपकारार्थे वृत्ति । इह उपकारे वर्तमानो गृह्यते । महागुणः उपकारोऽस्येति महागुणं । 'होदि' भवति । क्रिया चैव हि भाव्यते निषेध्यते वा इति वचनात् । 'न' तु भवनक्रियया संबध्यते, तपो न भवति महोपकारमिति । एतदुक्तं भवति कर्मनिर्मूलनं कर्तुमसमर्थं तपः सम्यग्दृष्टेरप्यसंयतस्य । पुनरितरस्य असति

उन्होंने जो बाह्य तपके बिना मुक्ति प्राप्तिका निर्देश किया है उसका अभिप्राय इतना ही है कि जिन दीक्षा धारण करनेके पश्चात् ही अन्तर्मुहूर्तमे क्षपक श्रेणि पर आरोहण करके मुक्त हुए। अतः उन्हे अनशन आदि बाह्य तप नहीं करना पड़ा। अभ्यन्तर तप तो रहा ही ॥ ६ ॥

निर्जरा तपके अधीन है। जब क्रमसे निर्जराको प्राप्त होते होते सब कर्म चले जाते हैं तब 'स्व' में स्थिति रूप निर्वाणकी प्राप्ति होती है। अत· निर्वाणका कारण निर्जरा ही है और निर्जराका सम्पादक है तप। इसलिये दर्शनाराधना और तप आराधना ये दो आराधना कहना युक्त है। इस आशंकाके उत्तरमे आचार्य 'संवरको करने वाले चारित्रके होने पर ही तप मुक्तिके अनुकूल निर्जरा करता है, अन्यथा नहीं' ऐसा कथन करते है—

गा०—सम्यग्दृष्टी भी जो अविरत है अर्थात् अविरत सम्यग्दृष्टीका तप महान् उपकारी नहीं होता। उसका वह तप हाथीके स्नानकी और मथनचर्मपालिका मथानीकी रस्सीकी तरह होता है ॥ ७ ॥

टी०—तत्त्वार्थ श्रद्धानवान् भी, असयमीका तप महागुणवाला नही होता।

गुण शब्दके अनेक अर्थ है। कही गुण शब्दसे रूपादि कहे जाते है जैसे वैशेषिक दर्शनके सूत्रमें गुण शब्दसे रूप, रस, गन्ध, स्पर्श, सख्या, परिमाण, पृथक्त्व, सयोग, विभाग, परत्व, अपरत्व, बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, आदि लिये गये हैं। 'हम इस नगरमे गुणभूत हैं' इस वाक्यमें गुणशब्दका अर्थ गौण या अप्रधान है। 'इसने गुण किया' इस वाक्यमे 'गुण' का अर्थ उपकार है। यहाँ भी गुणशब्दका अर्थ उपकार है। अतः महान् है 'गुण' अर्थात् उपकार इसका। गाथामें 'होदि' क्रिया है उसका अर्थ 'होता है'। उसके साथ 'ण' का सम्बन्ध लगाना चाहिये। तब अर्थ होता है—तप महान् उपकारी नहीं है। पूरे वाक्यका अभिप्राय है—असंयमी सम्यग्दृष्टीका भी तप कर्मोंको जड़से नष्ट करनेमें असमर्थ है। फिर जो सम्यग्दृष्टी नहीं है, उसके संवरके

---

१. मदं संखिवक-च, दमंव सं-मु०, ये तु चुंदच्छिदकम्म इति पठन्ति-मूलारा० ।

संवरे प्रतिसमयमुपचीयमानकर्मसंहतेः का मुक्तिः? ननु सत्यपि संयमे विना निर्जरां न निर्वृतिरिति। तपस एव-प्राधान्यमिवास्तु 'सम्माइट्ठिस्स वि अकदतवो भावणावज्जियस्स न चारित्तं महागुणं होदित्ति'। सत्यमेवमेतत् चारित्रप्राधान्यविवक्षापरा इयं चोदना। असिश्छिनत्तीत्यत्र छेत्तारमन्तरेण नासिरेव संपद्यते छिदा, तथा तदीय-तैक्ष्ण्यगौरवकाठिन्यातिशयनिरूपणवाञ्छायां तस्यैव स्वातन्त्र्यं निगद्यते। एवमिहापीति न दोषः। कुतः? यस्मात् 'होदि हु हत्थिण्हाणं' होदि भवति। 'हु' शब्द एवकारार्थः। स हत्थिण्हाणमित्यनेन संबन्धनीयः। हस्तिस्नानमेवेति। यथा हस्ती स्नातोऽपि न नैर्मल्यं वहति पुनरपि करावर्जितपांसुपटलमलिनतया तद्वत्तपसा निर्जीर्णेऽपि कर्मांशे बहुतरादानं असंयममुखेनेति मन्यते। दृष्टान्तान्तरमाचष्टे—चुंदच्छुदकम्म मन्थनचर्मपालिकेव तद्वत्संयमहीनं तपः। दृष्टान्तद्वयोपन्यासः किमर्थम् इति चेत्। अपगतादबहुतरोपादानं कर्मणोऽसंयमनिमित्त-स्येति प्रदर्शनाय हस्तिस्नानोपन्यासः। आर्द्रतनुतया बहुतरमुपादत्ते रजः। बन्धरहिता निर्जरा स्वास्थ्यं प्रापयति नेतरा बन्धसहभाविनीति। किमिव मन्थनचर्मपालिकेव। सा हि बन्धसहितां मुक्तिं वर्तयति। अन्ये व्याचक्षते—कालभेदमनपेक्ष्य शुद्धिमशुद्धिं च दर्शयता प्रथम उपात्तः। तदयुक्तं सकलकर्मापायो हि शुद्धिः,

---

अभावमें प्रति समय बन्धनेवाले कर्मोंका संचय होते हुए मुक्तिकी बात ही क्या है?

शङ्का—संयमके होनेपर भी निर्जराके बिना मुक्ति नहीं होती। अतः ऐसा भी कहा जा सकता है कि जिसने तपकी भावना नहीं की उस सम्यग्दृष्टीका चारित्र महान् उपकारी नहीं है?

समाधान—आपका कथन यथार्थ ही है। यह कथन चारित्रकी प्रधानताकी विवक्षाको लिये हुए है। जैसे 'तलवार काटती है' ऐसा कहा जाता है। किन्तु काटनेवाले व्यक्तिके बिना केवल अकेली तलवार नहीं काटती। परन्तु तलवारकी तीक्ष्णता, गौरव और कठोरता आदि अतिशयोंको बतलानेकी इच्छा होनेपर 'तलवार काटती है' इस प्रकार तलवारके स्वातन्त्र्यको कहा जाता है। इसी तरह यहाँ भी है अतः कोई दोष नहीं है।

उक्त कथनके समर्थनमें ग्रन्थकार दृष्टान्त देते हैं—जैसे हाथी स्नान करके भी निर्मल नहीं होता, वह अपनी सूँडके द्वारा धूल उठाकर अपनेपर डालता है। उसी तरह तपके द्वारा कुछ कर्मोंकी निर्जरा होनेपर भी असंयमके द्वारा उससे अधिक कर्मोंका बन्ध होता रहता है। ऐसा माना गया है।

दूसरा दृष्टान्त देते हैं—मन्थनचर्मपालिकाकी तरह संयमहीन तप होता है।

शङ्का—दो दृष्टान्त किस लिये दिये हैं?

समाधान—तपके द्वारा जितनी कर्मनिर्जरा होती है, असंयमके निमित्तसे उससे बहुत अधिक कर्मोंका बन्ध होता है, यह बतलानेके लिए हस्तिस्नानका दृष्टान्त दिया है क्योंकि स्नानके पश्चात् शरीरके गीले होनेसे बहुत-सी धूल उसपर जम जाती है। तथा बन्धरहित निर्जरा मोक्ष प्राप्त कराती है, बन्धके साथ होनेवाली निर्जरा नहीं। जैसे मन्थनचर्मपालिका। वह तो बन्ध-सहित मुक्ति देती है अर्थात् मथानी चलाते समय एक ओरसे रस्सी छूटती जाती है किन्तु साथ ही दूसरी ओरसे लिपटती जाती है।

दूसरे टीकाकार कहते हैं—समयभेदकी अपेक्षा न करके शुद्धि और अशुद्धिको दिखलानेके लिये प्रथम दृष्टान्त दिया है। किन्तु ऐसा कहना अयुक्त है क्योंकि समस्त कर्मोंके विनाशको शुद्धि

अशुद्धिश्च कर्मणा सह वृत्ति', तत्रासती शुद्धिः कथमादर्श्यते कर्मांशापगममात्रतः ? शुद्धिर्वा या मुक्तिः सा कस्य न विद्यते ? फलं दत्वा प्रयान्त्यात्मनः कर्मपुद्गलस्कन्धाः । यच्चोक्तं यदा तु कालभेदेन वैधर्म्यमाशंक्यते बंधनशातनयोरेकसमयत्वात् इति ततो द्वितीयो दृष्टान्तः । रज्जुवेष्टननिर्गमनयोरेककालत्वादिति तदप्यसार । न हि चंद्रमुखी कन्या इत्यत्र एवमाशंका संभवति, सदा संपूर्णमाननं वामलोचनायाः निशानाथस्य कदाचिदेव पूर्णता ततोऽनुमानमिति साधारणधर्ममात्रावलम्बन एवोपमानोपमेय भावः, वैधर्म्यं तूपमानोपमेययोरस्ति अन्यथा उपमानमिदं उपमेयमिति भेदो निरास्पदः । अपि च उपमेयस्यातिशयं प्रदर्शयितुमेवोपमानं प्रवृत्तम् ।। न ह्येकस्योपमानस्यानुक्तावृष्टे[1]तदुपादीयते (?) इति युक्तम् ।

संक्षेपस्य प्रकारान्तराख्यानायाह—

अहवा चारित्ताराहणाए आराहियं हवइ सव्वं ।।
आराहणाए सेसस्स चारित्ताराहणा भज्जा ।। ८ ।।

और कर्मोंके साथ रहनेको अशुद्धि कहते हैं। जब वहाँ शुद्धि नहीं है तो कैसे उसे दिखलाते हैं ? और कुछ कर्मोंके चले जाने मात्रसे यदि शुद्धि या मुक्ति मानते हो तो ऐसी शुद्धि किस जीवमें नहीं है क्योंकि कर्मपुद्गलस्कन्ध प्रत्येक आत्माको फल देकर जाते रहते हैं। और भी कहा है कि जब कालभेदसे वैधर्म्यकी आशंका की जाती है चूँकि बन्धन और निर्जराका एक ही काल है तब दूसरा दृष्टान्त दिया है; क्योंकि रस्सीके लिपटने और छूटनेका एक ही काल है, यह कथन भी निस्सार है। 'चन्द्रमुखी कन्या' इस दृष्टान्तमें इस प्रकारकी आशंका सम्भव नही है कि कन्याका मुख तो सदा सम्पूर्ण रहता है और चन्द्रमा तो पूर्णिमाके ही दिन पूर्ण होता है। उपमान उपमेय भाव दोनोंमें पाये जानेवाले साधारण धर्मोंको ही लेकर किया जाता है, दोनोंमें वैधर्म्य तो होता ही है। यदि न होता तो उनमें यह उपमान और यह उपमेय ऐसा भेद ही न होता। तथा उपमेयकी विशेषता दिखलानेके लिए ही उपमान होता है। अकेले उपमानके लिये उपमेय नही होता ।।७।।

भावार्थ—मिथ्यादृष्टिकी तो बात ही क्या, तत्त्वोंका श्रद्धानी सम्यग्दृष्टी भी यदि अविरत है, हिंसादि विषयोंमें प्रवृत्त रहता है, उसका तप करना महान् उपकारक नही है। अर्थात् वह कर्मोंको सर्वथा नष्ट नहीं कर सकता। जो संयमसे हीन होता है उसके संवरके अभावमें प्रतिसमय नये-नये कर्मोंका बन्ध होता रहता है। अतः उसकी मुक्ति नही हो सकती। यह कथन चारित्रकी प्रधानता दिखलानेके लिये है। जैसे तपके प्राधान्यकी विवक्षामें कहा है—तपसे ही मुक्ति होती है अतः तप करना चाहिए। असंयमीका तप हाथीके स्नानकी तरह होता है। जैसे हाथी स्नान करके शरीरके भींग जानेसे अपनी सूंड द्वारा अपने ऊपर डाली गई बहुत-सी धूल ग्रहण कर लेता है। उसी तरह असयमी तपके द्वारा कुछ कर्मोंकी निर्जरा करके भोजनादिकी लम्पटतावश बहुत अधिक कर्मबन्ध करता है। दूसरा दृष्टान्त है मन्थनचर्मपालिका। हस्तिस्नान दृष्टान्तके द्वारा तो यह बतलाया है कि जितनी निर्जरा करता है उससे बहुत अधिक कर्मबन्ध करता है और दूसरे दृष्टान्तसे बतलाया है कि बन्धके साथ-साथ होनेवाली निर्जरासे मुक्ति नही हो सकती ।। ७ ।।

संक्षेपसे आराधनाके अन्य प्रकार कहते है—

१. दृष्टेरित—मु० ।

बहुधेति । एकद्व्यादिसंख्येयासंख्येयानंतरूपेण हि जैनी निरूपणा ॥ चरन्ति यान्ति तेन हितप्राप्तिं अहितनिवारणं चेति चारित्रं, चर्यते सेव्यते सज्जनैरिति वा चारित्रं सामायिकादिकं, तस्याराधनायां तत्परिणतौ सत्यां आराधितं निष्पादितं । 'हवइ' भवति । 'सव्वं' सर्वं ज्ञानं दर्शनं तपश्च, प्रकारकात्स्न्यें सर्वशब्दोऽत्र प्रवृत्तः । यथा सर्वमोदनं भुंक्ते इति व्रीहिशाल्योदनप्रकारकात्स्न्यं भुजिक्रियायाः कर्मत्वेन प्रतीयते । एवमिहापि मुक्त्युपायप्रकाराणां ज्ञानादीनां सामस्त्यमाख्यायते । चारित्राराधनैकैवेत्यनेन गाथार्द्धेन कथितम् । अत्रेयमाशंका—कस्मादेकत्वनिरूपणाराधनायाश्चारित्रमुखेनैव क्रियते नान्यमुखेनेत्यत आह—'आराधणाए' आराधनायां । 'सेसस्स' शेषस्य । ज्ञानदर्शनतपसां अन्यतमस्य । चारित्राराधना । 'भज्जा' भाज्या विकल्प्या । कथं ? असंयतसम्यग्दृष्टिर्भवति ज्ञानदर्शनयोराराधको नेतरयोः । मिथ्यादृष्टिस्त्वनशनादावुद्यतोऽपि न चारित्रमाराधयति । कश्चित्पुनः ज्ञानादीनि च चारित्रमपि संपादयतीति नाविनाभाविता इतराराधनायां चारित्राराधनाया इति न तन्मुखेनैकत्वनिरूपणेति भावः ॥ ननु क्षायिकवीतरागसम्यक्त्वाराधनायां, क्षायिकज्ञानाराधनायां च इतरेषामप्याराधना नियोगतः सम्भवति तत्किमुच्यते शेषाराधनायां चारित्राराधना भाज्येति ? क्षायोपशमिक-

---

गा०—अथवा चारित्रकी आराधनामें ज्ञान, दर्शन, तप सब आराधित होता है । ज्ञान दर्शन और तपमेंसे किसीकी भी आराधनामें चारित्रकी आराधना भाज्य होती है ॥ ८ ॥

टी०—जैनधर्ममें वस्तुके कथन करनेके एक, दो, संख्यात, असंख्यात और अनन्तरूप है । जिसके द्वारा जीव हितकी प्राप्ति और अहितका निवारण करते हैं उसे चारित्र कहते हैं । अथवा सज्जनोंके द्वारा जो 'चर्यते' सेवन किया जाता है वह सामायिक आदिरूप चारित्र है । उसकी आराधना करनेपर अर्थात् उस रूप परिणतिके होनेपर सब-ज्ञान दर्शन और तप आराधित—निष्पादित होता है । यहाँ 'सर्व' शब्द समस्त प्रकारोंमें प्रयुक्त हुआ है । जैसे 'सब ओदनको खाता है', यहाँ ओदन अर्थात् भात या चावलके व्रीहि, शालि आदि जितने प्रकार हैं वे सब खानेरूप क्रियाके कर्मरूपसे प्रतीत होते हैं । अर्थात् सब प्रकारके चावलोंका भात खाता है यह 'सब ओदन' से अभिप्राय है । इसी प्रकार यहाँ भी 'सर्व' शब्दसे मुक्तिके उपायोंके जो प्रकार ज्ञानादि है उन सबका ग्रहण इष्ट है । इस तरह 'एक चारित्राराधना ही है' यह इस आधी गाथासे कहा है । यहाँ यह शंका होती है कि चारित्रकी मुख्यतासे ही आराधनाका एक प्रकार क्यों कहा है अर्थात् आराधनाके एक प्रकारमें चारित्रको ही क्यों लिया है ?

इसका उत्तर देते हुए आचार्य कहते हैं—शेष अर्थात् ज्ञान दर्शन और तपमेंसे किसी एककी आराधना करनेपर चारित्रकी आराधना भाज्य है; क्योंकि असंयत सम्यग्दृष्टि ज्ञान और दर्शनका ही आराधक होता है, चारित्र और तपका नहीं । और मिथ्यादृष्टि तो अनशन आदिमें तत्पर रहते हुए भी चारित्रकी की आराधना नहीं करता । कोई ज्ञानादिकी आराधना करता है और कोई चारित्रकी भी आराधना करता है । इस प्रकार अन्य आराधनाओंके साथ चारित्रकी आराधनाका अविनाभाव नहीं है अर्थात् चारित्राराधनाके बिना भी अन्य आराधना होती है । इसलिए उनकी मुख्यतासे आराधनाका एक प्रकार नहीं कहा है । यह उक्त कथनका भाव है ।

शङ्का—क्षायिक वीतराग सम्यक्त्वकी आराधनामें और क्षायिकज्ञानकी आराधनामें अन्य चारित्रादिकी भी आराधना नियमसे होती है तब कैसे कहते हैं कि शेष आराधनाओंमें चारित्राराधना भाज्य है ?

ज्ञानदर्शनापेक्षयैतदुक्तं इति ज्ञेयम् ।

अन्येषां व्याख्या "'चारित्ताराधणाए' इत्यत्र चारित्रशब्देन सच्चारित्रमुपात्तम् । तच्च सद्दर्शनात्मक-ज्ञाननिरूपितक्रमाप्रच्यवनेन प्रयत्नवृत्तिरूपं तस्मिन्नाराध्यमाने शेषसिद्धिर्भवत्येव । कथं ? सज्ज्ञानकार्यं चारित्रं सज्ज्ञानं च दर्शनाहितं (?) कार्यं हि कारणाविनाभावित्वं प्रयुक्तं इति ।" सानुपपन्ना । प्रतिज्ञामात्रेण हि सूत्रमिदमवस्थितं, एतत्साधनाय सूत्रद्वयमुत्तरं यत्र हि सूत्रकारो न निबंधनं वदति । आत्मनः प्रतिज्ञातस्य तत्र व्याख्यातुरवसरो निबंधनाख्याने । यत्र तु स एव वदति तत्र तदेव व्याख्यातुमवगन्तव्यमिति व्याख्याक्रमः शास्त्रेषु । न चैतत्तेन प्रतिविधानमसूत्रितम् स्वयमेवोत्प्रेक्षते । 'कादव्वमिणमकादव्वयत्ति णाऊण होदि परिहारो' इत्यत्र निरूपयिष्यति यतः सूत्रकारः । किं च उत्तरसूत्रानुष्ठानमस्यां व्याख्यायां चारित्राराधनामुखेनैकैवाराधनेति प्रतिपिपादयिषितम् । तच्च सप्रतिविधानं प्रतिपादयितुं कोऽवसर उत्तरगाथायाः । इतराराधनान्तर्भावकारिण्याश्चारित्राराधनाया निरूपणायां चारित्रस्वरूपाख्यानाय उत्तरगाथायातेति कथमनवसर इति चेत् यद्येवं दर्शना-राधनायां ज्ञानाराधनामन्तर्भाव्य प्रवर्तमानायां दर्शनस्वरूपं किं नोच्यते सूत्रकारेण ? स्वेच्छेति चेन्न व्याख्यानु-

---

उत्तर—उक्त कथन क्षायोपशमिकज्ञान और क्षायोपशमिक सम्यक्त्वकी अपेक्षा किया है ऐसा जानना ।

इस गाथापर अन्य टीकाकारोंकी व्याख्या इस प्रकार है—'चारित्ताराधणाए' यहाँ चारित्र शब्दसे सम्यक्चारित्र लिया है। वह सम्यक्चारित्र शास्त्रमें कहे गये सम्यग्दर्शनसे विशिष्ट सम्यग्ज्ञानके क्रमसे च्युत न होते हुए अर्थात् सम्यग्दर्शनपूर्वक सम्यग्ज्ञानके साथ सावधानतापूर्वक प्रवृत्तिरूप होता है। उसकी आराधना करनेपर शेष आराधनाओंकी सिद्धि होती ही है क्योंकि सम्यग्ज्ञानका कार्य चारित्र है और सम्यग्ज्ञान सम्यग्दर्शनपूर्वक होता है। कार्य कारणका अविना-भावी होता है—कारणके बिना कार्य नहीं होता ।

किन्तु यह व्याख्या ठीक नही है। इस गाथामें तो गाथाकारने केवल प्रतिज्ञामात्र की है कि चारित्राराधनामें सब आराधना आती है। इसकी सिद्धिके लिए आगे दो गाथाएँ हैं जिनमें ग्रन्थकारने उसका कारण कहा है कि क्यों चारित्राराधनामें अन्य आराधना समाविष्ट होती है। वहाँ व्याख्याताको उसका कारण बतलानेका अवसर है। शास्त्रोंमें व्याख्याका यही क्रम है कि ग्रन्थकारने स्वयं जहाँ जो कहा है वहाँ वही व्याख्याकारको कहना चाहिये। इस गाथामें तो उसने ऐसा नहीं कहा। व्याख्याकार स्वयं ही कल्पना करता है। गाथासूत्रकार तो आगे 'कादव्वमिण-मकादव्व' इत्यादि द्वारा कहेंगे।

तथा 'चारित्राराधनाकी मुख्यतासे एक ही आराधना है' इस व्याख्यामें आगेके गाथासूत्रका कथन करना इष्ट है। यदि वह कथन यहीं कर दिया जाता है तो आगेकी गाथाके कथनका अवसर नहीं रहता ।

शङ्का—अन्य आराधनाओंका अपनेमें अन्तर्भाव करनेवाली चारित्राराधनाका निरूपण करनेपर चारित्रका स्वरूप बतलानेके लिये आगेकी गाथा आई है ? तब आप कैसे कहते हैं कि आगेकी गाथाके कथनका अवसर नहीं रहता ?

उत्तर—यदि ऐसा है तो दर्शनाराधना अपनेमें ज्ञानाराधनाको अन्तर्भूत करके प्रवृत्त हुई है अतः गाथाकारने सम्यग्दर्शनका भी स्वरूप क्यों नहीं कहा ? वह भी कहना चाहिए था। यदि

वाञ्छितं शास्त्रकाराणां न्यायापेतेच्छा अयुक्ता ।

कथं चारित्राराधनायां कथितायां इतरासां प्रतिपत्तिरविनाभावात् तावज्ज्ञानदर्शनाराधनयोरन्तर्भाव इत्युत्तरगाथायाः पूर्वार्द्धेन कथयति—

कायव्वमिणमकायव्वयत्ति णाऊण होइ परिहारो ।
तं चेव हवइ णाणं तं चेव य होइ सम्मत्तं ॥ ९ ॥

'कादव्वं' कर्तव्यं । 'इणं' इदं । 'अकादव्वमिति' अकर्तव्यमिति । 'णादूण' ज्ञात्वा । 'हवदि' भवति । 'परिहारो' परिवर्जनं चारित्रमिति शेषः । कर्तव्याकर्तव्यपरिज्ञानं पूर्वं तदुत्तरकालं अकर्तृपरिहरणं यत्तच्च चारित्रमिति सूत्रार्थः । ननु परिहार इत्यत्र परिहारो वर्जनार्थः । तथा हि—परिहरति सर्पमित्यत्र सर्पं वर्जयतीति गम्यते । ततश्च यद्वर्जनीयं तत्परिज्ञानमेव वर्जनमुपयुज्यते । तत एवं वक्तव्यं—अकादव्वमिणत्ति[1] णादूण हवदि परिहारो इति, कादव्वमित्येतत्किमर्थमुपन्यस्तं ? कर्तव्यपरिज्ञानं करणे एवोपयुज्यते इति ॥ अत्र प्रतिविधीयते—कादव्वमिणत्ति णादूण हवदि परिहारो इति पदघटनैका, अकादव्वमिणत्ति णादूण हवदि परिहारो इत्यपरा ॥ तत्राद्यायां पदघटनायां परिशब्दः समंताद्भाववृत्तिः । यथा परिधावतीत्यत्र हि समंताद्धावतीति गम्यते । हरति तूपादानवचनः । तथाहि प्रयोगः—कपिलिकां[2] हरति—कपिलिकामुपादत्त इति यावत् । मनसा, वचसा, कायेन कर्तव्यस्य संवरहेतोरुपादानं गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयानां उपादानं चारित्रमिति

कहोगे कि यह उनकी इच्छा है तो ऐसा कहना भी ठीक नहीं है क्योंकि न्यायका अनुसरण करनेवाले शास्त्रकारोंकी इच्छा न्यायसे रहित नहीं होती ॥ ८ ॥

चारित्राराधनाके कहनेपर अन्य आराधनाओंका ज्ञान कैसे सम्भव है ? इस प्रश्नका समाधान है कि चारित्राराधनाके साथ ज्ञान और दर्शनका अविनाभाव है अतः उसमें उनका अन्तर्भाव होता है । यही वार्ता आगेकी गाथाके पूर्वार्द्धसे कहते हैं—

गा०—यह कर्तव्य है और यह अकर्तव्य है इस प्रकार जानकर त्याग होता है । वही चैतन्यज्ञान है और वही सम्यक्त्व है ॥ ९ ॥

टी०—पहले कर्तव्य और अकर्तव्यका परिज्ञान होता है । उसके पश्चात् अकर्तव्यका त्याग किया जाता है । यही चारित्र है । यह गाथासूत्रका अर्थ है ।

शंका—'परिहारो' में परिहार शब्दका अर्थ त्याग है । इसका खुलासा इस प्रकार है—'सर्पका परिहार करता है' ऐसा कहनेपर 'सर्पको त्यागता है' यही अर्थ ज्ञात होता है । अतः जो त्यागने योग्य है उसीका जानना योग्य है । ऐसी स्थितिमें ऐसा कहना चाहिए कि 'अकर्तव्यको जानकर उसका परिहार होता है ।' तब कर्तव्यको जाननेको क्यों कहा ? कर्तव्यका परिज्ञान तो करनेके लिए होता है छोडनेके लिए नही होता ?

उत्तर—गाथामें 'कादव्वमिणत्ति णादूण हवदि परिहारो' यह एक पद सम्बन्ध है । और 'अकादव्वमिणत्ति णादूण हवदि परिहारो' यह दूसरा पद सम्बन्ध है । उनमेंसे प्रथम पद सम्बन्धमें 'परि' शब्दका अर्थ अच्छी तरह या पूर्णरूपसे होता है । जैसे 'परिधावति' का अर्थ अच्छी तरहसे, या पूर्णरूपसे दौड़ता है । 'हरति' का अर्थ ग्रहण करना है । जैसे 'कपिलिकां हरति' का अर्थ कपिलिकाको ग्रहण करता है । अतः इस वाक्यका अर्थ होता है—मनसे, वचनसे, कायसे, संवरके

---

१. अं मि त्ति—आ० । २. कपलिकां—अ० ।

वाक्यार्थः। आस्रवबंधहेतवो ये परिणामास्ते न कर्तव्याः, न निर्वर्त्यास्तेषां परिहरणं परिवर्जनं चारित्रमिति संबंधनीयम्। परिहार्य एव परिज्ञानमंतरेणापि तत्परिहारो दृश्यते। यथा शत्रुजनाध्यासितं देशं परिहरति कश्चित्तत्र तेषां अवस्थानमप्रतिपद्यमानोऽपि मार्गान्तरगामी एव [1]अज्ञात्वापि परिहार्यं परिहरेदिति विनाभावितेति चेदयमभिप्रायः सूरेः—सामान्यशब्दा अपि विशेषप्रवृत्तयो दृश्यंते। तथा हि—गोशब्दो गोत्वसामान्यांगीकरणेन प्रवृत्तो गौर्न हंतव्या, गौस्तथा न स्प्रष्टव्या इत्यादावन्यत्र विशेषमेवाभिधेयी—करोति। महति गोमंडले गोपालकमासीनमेत्य कश्चित्पृच्छति गौर्दृष्टा भवतेति। अत्र वाक्ये गोशब्दस्तदभिप्रेतां कालाक्षीं स्वस्तिमतीं वा प्रत्याययति। एवमत्र परिहारशब्दः परिवर्जनसामान्यगोचरोऽपि नियतानेकपरिहार्यविषये परिहरणे प्रयुक्तः। न च नियोगसाध्यनेकपरिहार्यविषयपरिहरणं असकृत्प्रवृत्तिपरिज्ञानं विना युज्यते। इति मिथ्यादर्शनं, असंयमाः, कषाया, अशुभाश्च योगाः प्रत्येकमनेकविकल्पाः सततं परिहरणीयाः। तत्कथं परिहरेदज्ञः। ननु ज्ञानचारित्रयोरविनाभाविता द्योत्या 'नादूण होदि परिहारो' इत्यनेन[2] न श्रद्धानाविनाभावितेत्याशंकायामाह—'तं चेव हवइ' इत्यादिकं। तं चेव तदेव चैतन्यं। 'हवइ' भवति, 'णाणं' ज्ञानं। 'तं चेव य' तदेव च 'हवइ' भवति, 'सम्मत्तं' तत्त्वश्रद्धानं चेति चैतन्यद्रव्याव्यतिरेकात् ज्ञानदर्शनयोरेकता ख्याता। ततो ज्ञाना-

हेतु कर्तव्यको ग्रहण करना, गुप्ति, समिति, धर्म, अनुप्रेक्षा और परीषह जयको अंगीकार करना चारित्र है। आस्रव और बन्धके हेतु जो परिणाम हैं वे नहीं करने चाहिए। अतः उनका परिहार अर्थात् त्याग चारित्र है। इस प्रकार सम्बन्ध लगाना चाहिये। जो पदार्थ त्यागने योग्य होता है, उसे जाने बिना भी उसका त्याग देखा जाता है जैसे कोई शत्रुओंसे युक्त स्थानको छोड़ता है। यद्यपि वह उस स्थान में उनके आवासको नहीं जानता, फिर भी दूसरे मार्गसे चला जाता है। इस प्रकार त्यागने योग्यको नहीं जानते हुए भी त्यागना चाहिए।

शङ्का—तब तो 'त्याज्य पदार्थको जानकर छोड़ना चाहिये' इस प्रकारका अविनाभाव नहीं रहा?

समाधान—आचार्यका अभिप्राय यह है कि सामान्य शब्दोंकी भी प्रवृत्ति विशेषमें देखी जाती है। जैसे 'गौ' शब्द गौसामान्यको लेकर प्रवृत्त होता है जैसे गौका वध नहीं करना चाहिए। गौको छूना चाहिए। किन्तु अन्यत्र यही सामान्यवाची गौ शब्द विशेष गौके अर्थमें प्रवृत्त होता देखा जाता है। जैसे—किसी बड़े गोमण्डलमें बैठे हुए ग्वालेके पास आकर कोई पूछता है—आपने गौ देखी है क्या? इस वाक्यमें गौ शब्द उस व्यक्तिको इष्ट काली गाय या अमुक प्रकारकी गायका बोध कराता है। इसी तरह परिहार शब्द यद्यपि त्याग सामान्यका वाचक है तथापि यहाँ उसका प्रयोग निश्चित अनेक त्यागने योग्य विषयोंके त्यागमें हुआ है। और नियमसे त्यागने योग्य अनेक विषयोंका त्याग बार-बार जाने बिना सम्भव नहीं है। इस प्रकार मिथ्यादर्शन, असंयम, कषाय, अशुभयोग और इनमेंसे प्रत्येकके अनेक भेद निरन्तर त्यागने योग्य हैं। जो अनजान है वह कैसे उनका त्याग कर सकता है?

शङ्का—'जानकर परिहार होता है' इस वचनसे ज्ञान और चारित्रकी अविनाभाविता प्रकट होती है, श्रद्धानकी अविनाभाविता प्रकट नहीं होती?

इस आशङ्काका आचार्य उत्तर देते हैं—वही चैतन्य ज्ञानरूप है और वही चैतन्य सम्यक्त्व-रूप है। अतः चैतन्यरूप द्रव्यसे अभिन्न होनेसे ज्ञान और दर्शनकी एकता बतलाई है। अतः

१. एवमन्यत्रापि परिहार्यात् परि—आ०। २. नेन श्रद्धा—अ० आ० मु०।

विनाभाविता कथनेन श्रद्धानस्यापि कथितैव भवति। चारित्रमेव ज्ञानदर्शने इति कल्पनायां 'जाणुग हुवइ परिहारो' इति पूर्वं ज्ञानं पश्चात्परिहार इति भेदोपन्यासः[1] सूत्रकारस्य अघटमानः[2] स्यात्। तं चेवेति नपुंसकलिंगनिर्देशश्च न स्यात्। 'सो चेव हुवइ णाणं' इति वक्तव्यं भवति परिहारशब्दस्य पुंल्लिंगत्वात्। अथवा कर्तव्याकर्तव्यपरिज्ञाने सत्यकर्तव्यानां मिथ्यादर्शनं, अज्ञानं, असंयमः, कषायाः, योग इत्यमीषां परिहारश्चारित्रमित्येतस्मिन्नर्थे परिगृहीते 'तं चेव परिहरणसामान्यं चारित्रं, ज्ञानं दर्शनं इत्येकमेवेति। चारित्राराधनायामेव भेदवादिनोऽभिमतस्याराधनाप्रकारस्यान्तर्लीनतया चारित्राराधनैकैवेति सूत्रार्थः॥

चारित्राराधनायामंतर्भावो ज्ञानदर्शनाराधनयोरेव निगदितो न तपस आराधनाया इत्यत आह—

चरणम्मि तम्मि जो उज्जमो आउंजणा य जो होई।
सो चेव जिणेहिं तवो भणिदो असढं चरंतस्स॥१०॥

'चरणम्मि' चारित्रे। 'तम्मि' एतस्मिन् अकर्तव्यपरिहरणे। 'जो य उज्जमो' उद्योगः। 'आउंजणा य' उपयोगश्च। 'जिणेहिं तवो होदित्ति भणिदो' इति पदघटना। चरणोद्योगोपयोगावेव तपो भवतीति जिनैः कृतकर्मारिपराजयैरुक्तमिति यावत्। कृतसुखपरिहारो हि चारित्रे प्रयतते न सुखासक्तचित्तस्ततश्च बाह्यानि

चारित्रकी ज्ञानके साथ अविनाभाविता बतलानेसे श्रद्धानकी भी अविनाभाविता कही गई समझना।

यदि चारित्रको ही ज्ञान और दर्शनरूप माना जाता है तो 'जानकर परिहार होता है' इस कथनमें जो पहले ज्ञानका और पश्चात् परिहारका भेदरूपसे उपन्यास ग्रन्थकारने किया है वह नहीं बन सकेगा। तथा 'तं चेव' इस पदमें जो नपुंसक लिंगका निर्देश किया है वह भी नहीं बनेगा, किन्तु 'सो चेव हुवइ णाणं' ऐसा प्रयोग करना होगा क्योंकि 'परिहार' शब्द पुंल्लिंग है और वही चारित्र है।

अथवा कर्तव्य और अकर्तव्यका परिज्ञान होने पर अकर्तव्य जो मिथ्यादर्शन, अज्ञान, असंयम, कषाय और योग हैं उनका परिहार चारित्र है, ऐसा अर्थ लेने पर 'तं चेव' अर्थात् परिहार-सामान्य ही चारित्र, ज्ञान और दर्शन है इस प्रकार एक ही हैं। इस प्रकार चारित्राराधनामें ही भेदवादियोंको इष्ट आराधनाके प्रकारोंका अन्तर्भाव होनेसे चारित्राराधना एक ही है यह इस गाथासूत्रका अर्थ है॥

भावार्थ—चारित्रके दो प्रकार हैं—कर्तव्यको स्वीकार करना और अकर्तव्यको त्यागना। ज्ञान और दर्शन पूर्वक हितकी प्राप्ति तथा अहितके परिहाररूपसे परिणत चैतन्य ही ज्ञान और दर्शनरूप है। अतः चारित्रका ज्ञान और दर्शनके साथ अविनाभाव होनेसे चारित्रमें दोनोंका अन्तर्भाव होता है॥ ९॥

चारित्राराधनामें ज्ञानाराधना और दर्शनाराधनाका ही अन्तर्भाव कहा है, तप आराधनाका नहीं कहा। अतः कहते हैं—

गा०—उस अकर्तव्यके त्यागरूप चारित्रमें जो उद्योग है और उपयोग होता है, उन उद्योग और उपयोगको ही छल कपट त्यागकर करने वालेका जिनेन्द्रदेवने तप कहा है॥ १०॥

टी०—उस अकर्तव्यके परिहाररूप चारित्रमें जो उद्योग और उपयोग है जिनदेवने उसे तप कहा है। अर्थात् चारित्रमें उद्योग और उपयोग ही तप है, ऐसा कर्मरूपी शत्रुओंको पराजित करने

---

१. भेदोप न्यासो—आ०। २. अघटमानं—आ० ज०।

तपांसि चारित्रप्रारंभं प्रति परिकरतामुपयान्तीति । तथा च वक्ष्यति 'बाहिरतवेण होदि खु सव्वा सुहसीलदा परिचत्ता' इति । तथा स्वाध्यायश्रुतभावना पंचविधा तत्र वर्तमानश्चारित्रे परिणतो भवति । तथा च वक्ष्यति 'सुदभावणाए णाणं दंसणतवसंजमं च परिणमदि' त्ति । परिणाम एव उपयोगः । 'कृतातिचारजुगुप्सापुरःसरं वचनमालोचनेति' अकर्तव्यपरिहरणोपयोगः कथं न चारित्रं ? कृतातिचारस्य यतेस्तदतिचारपराङ्मुखता योगत्रयेण हा दुष्टं कृतं चिंतितमनुमतं चेति परिणामः प्रतिक्रमणम् । उभयं चरणोपयोगः । एवमतिचारनिमित्त-द्रव्यक्षेत्रादिकान्मनसा अपगतिस्तत्र अनादृतिर्विवेकः । इति उपयोगता विवेकस्य दुस्त्यजशरीरममत्वनिवृत्तिर्म-मेदं शरीरं न भवति नाहमस्येति भावना सा च परिग्रहपरित्यागोपयोग एवेति चारित्रम् । तपसोऽनशनादेश्चा-रित्रपरिकरतोक्तैव । सातिचारं चारित्रमचारित्रमेवेति बुद्धया निश्चित्यात्मनो, न्यूनतापादनं, क्रियास्वभ्युत्था-नवन्दनादिकासु असयमपरिहारेण वृत्तेश्चारित्रपरिकर. । पुनः प्रव्रज्यादानमपि चारित्रोपयोग एवेति । विनयस्तु पंच प्रकारः ज्ञानदर्शनविनययोर्ज्ञानदर्शनपरिकरतया तदुपयोगरूपतया च ज्ञानदर्शनाभ्यामभेदात्तद्वदेव चारित्रा-राधनांतर्भावः ।

इन्द्रियविषयस्य रागद्वेषयोः कषायाणां च परित्याग., अयोग्यवाक्कायक्रियायास्त्यागः, ईर्यादिषु निर-वद्या च वृत्तिश्चारित्रोपयोग एवेति चारित्रे विनयस्यान्तर्भावः । तपोऽधिके तपसि च भक्तिः, अनासादना च

वाले जिनदेवने कहा है। जो सुखको त्यागता है वही चारित्रमें प्रयत्नशील होता है, जिसका चित्त सुखमें आसक्त है वह चारित्र धारण नही कर सकता। अतः बाह्य तप चारित्रको प्रारम्भ करनेमें सहायक होते हैं। आगे कहेंगे—'बाह्य तपसे समस्त सुखशीलता छूट जाती है'। तथा स्वाध्यायके पाँच भेद पाँच श्रुत भावनारूप हैं। जो उसमें प्रवृत्ति करता है वह चारित्रमें प्रवृत्ति करता है। आगे कहेंगे—'श्रुतभावनासे ज्ञान, दर्शन, तप और संयमरूप परिणत होता है।' परिणामका ही नाम उपयोग है। किये हुए दोषोंके प्रति ग्लानि पूर्वक जो वचन होता है वह आलोचना है। तब अकर्तव्यके त्यागमें जो उपयोग होता है वह चारित्र क्यों नही है। जिस साधुने अपने व्रतोंमें दोष लगाया है उसका उन दोषोसे विमुख होकर, हाँ, मैंने बुरा किया, या बुरा विचारा या उसमें अनु-मति दी, इस प्रकारके परिणामोंको प्रतिक्रमण कहते हैं। आलोचना और प्रतिक्रमणको उभय कहते हैं। अतिचारमें निमित्त द्रव्य, क्षेत्र आदिका मनसे हटाना, उनमें अनादर भावका होना विवेक प्रायश्चित्त है। इस प्रकार विवेकको उपयोगिता है। जिसको छोड़ना कठिन है उस शरीर-से ममत्व न करना 'यह शरीर मेरा नही है, न मैं इसका हूँ' इस प्रकारकी भावना व्युत्सर्ग है वह भी परिग्रहके त्यागरूप उपयोग ही है अतः चारित्र है।

अनशन आदि तप चारित्रके परिकर हैं—उसके सहायक हैं, यह पहले कहा ही है सदोष चारित्र अचारित्र ही है ऐसा बुद्धिके द्वारा निश्चित करके आत्मामें पूर्णताका लाना, खड़े होना, वन्दना आदि क्रियाओंमें असंयमका परिहार करते हुए प्रवृत्त होना, ये सब भी चारित्रका परिकर है। दोष लगाने पर पुनः दीक्षा ग्रहण करना भी चारित्रमें उपयोग ही है। विनयके पाँच भेद हैं। उनमेंसे ज्ञानविनय और दर्शनविनय ज्ञान और दर्शनके परिकर होनेसे तथा ज्ञान और दर्शनमें उपयोगरूप होनेसे ज्ञान और दर्शनसे अभिन्न हैं अतः ज्ञान और दर्शनकी तरह उनका अन्तर्भाव चारित्राराधनामें होता है।

इन्द्रियोंके विषयोंमें राग द्वेषका तथा कषायोंका त्याग, अनुचित वचन और कायकी क्रिया-का त्याग, तथा ईर्या समिति आदिमें निर्दोष प्रवृत्ति चारित्रोपयोगरूप होनेसे चारित्रविनयका

परेषां तपोविनयः, तं विना सुतपसोऽभावात् तपसः परिकरता अस्या सपरिकरं हि तपश्चारित्रस्य परिकरः । उपयोगो वा नान्या गतिरस्ति' (?) मन्यते । 'अलर्ड चरंतस्स' शाठ्यमंतरेण वर्तमानस्य भवेत्तया च चतुर्विधा, द्विविधा, एकविधा, वा आराधना स्यात् कस्मान्न निरूप्यते ।

पुरुषो हि प्रेक्षापूर्वकारी प्रयोजनायत्तचेष्टः सति प्रयोजने तत्साधनाय प्रयतते नान्यथा, तत्कथमियमाराधना व्याख्या प्रयोजिका[2] भवत्स्वेत्याशंकायां, निर्वाणसुखस्याव्याबाधात्मकस्य पुरुषार्थस्योपायत्वप्रदर्शनेन आराधनाव्याख्या तदर्थिनामुपयोगिनी इत्येतत्प्रतिपादनायोत्तरप्रबंधः । अथवा व्यावर्णितविकल्पा या आराधना तस्यां चेष्टा कर्तव्येत्येतदाख्यानायोत्तरसूत्राणि, तथा चोपसंहारः 'कायव्वा खु तदत्थं आदहिदमवेसिणा चेट्ठा' इति ॥

अन्येऽत्र व्याचक्षते ज्ञानदर्शनचारित्रेषु किं प्रधानमिति चोद्ये चारित्रप्राधान्यख्यापनायोत्तरसूत्रमिति तदयुक्तम्—

णाणस्स दंसणस्स य सारो चरणं हवे जहाखादं ।
चरणस्स तस्स सारो णिव्वाणमणुत्तरं भणियं ॥११॥

'णाणस्स दंसणस्स य सारो चरणं जहाखादं' इत्युक्ते ज्ञानदर्शनाभ्यां प्रधानं चारित्रं इति प्रतीतेरनु-

---

अन्तर्भाव चारित्रमें होता है। विशिष्ट तपस्वियोंमें और तपमें भक्ति तथा दूसरोंकी आसादना न करना तपविनय है। उसके बिना सम्यक् तप नहीं हो सकता। अतः तपविनय तपका परिकर है। और अपने परिकरके साथ तप चारित्रका परिकर है। उसके बिना गति नहीं है। जो कपट त्याग कर ऐसा करता है उसीके यह तप होता है। इस प्रकार आराधनाके चार, दो और एक भेद हैं।

भावार्थ—चारित्र वही धारण करता है जो सुखको त्याग देता है। चारित्रमें उद्यम करना बाह्य तप है। इस तरह बाह्य तप चारित्रका परिकर है उसकी सहायक सामग्री है। और चारित्ररूप परिणाम अन्तरंग तप है। अन्तरंग तपके भेद प्रायश्चित्त आदि पाप प्रवृत्तियोंको दूर करते हैं अतः तप चारित्रसे भिन्न नहीं है ॥११॥

पुरुष सोच-विचारकर काम करता है। उसकी चेष्टा प्रयोजनके अधीन होती है। प्रयोजन होने पर उसकी सिद्धिके लिये वह प्रयत्न करता है। प्रयोजन न होने पर नहीं करता। तब यह आराधनाका व्याख्यान कैसे उसका प्रयोजक है? ऐसी आशंका होने पर आचार्य कहते है बाधारहित मोक्ष सुख पुरुषार्थ है वह पुरुषका प्रयोजन है। जो मोक्ष सुखके अभिलाषी हैं उनको उसका उपाय बतलानेके लिये आराधनाका कथन उपयोगी है। यह बतलानेके लिए आगेका कथन करते हैं। अथवा जिस आराधनाके भेदोंका कथन किया है उसमें चेष्टा करना चाहिये यह कहनेके लिये आगेका कथन है। इसीलिये ग्रन्थकारने उपसंहारमें कहा है कि आत्महितके अन्वेषकको उसके लिये चेष्टा करना चाहिये—

गा०—ज्ञानका और दर्शनका सार यथाख्यात चारित्र होता है। उस यथाख्यात चारित्रका सार सर्वोत्कृष्ट निर्वाण कहा है ॥ ११ ॥

टी०—अन्य व्याख्याकार कहते हैं कि ज्ञान, दर्शन और चारित्रमें कौन प्रधान है ऐसा

---

१. नान्यथास्तिता–आ० मु० । २ प्रयोजिता–आ० मु० ।

पवतेः। त्रयाणामपि कर्मापायनिमित्ततास्ति वा न वा ? यदि नास्तीत्युच्यते सूत्रविरोधः 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इति सूत्रमवस्थितम्। अथोपायतास्ति ? परार्थतया गुणत्वं त्रयाणामिति का प्रधानता चारित्रस्य ? ज्ञानदर्शने चारित्रार्थे चारित्रं तु न तदर्थमिति न युक्तं वक्तुं ज्ञानदर्शनयोः साध्यत्वात्तदुपायतया चारित्रस्य चारित्रं तदर्थमिति तस्य किमित्यप्रधानता न भवति ? न हि चारित्रमंतरेण क्षायिकं ज्ञानं, क्षायिकं वीतरागसम्यक्त्वं चोपजायते। तस्मात्पूर्वोक्त एव उत्तरप्रबंधक्रमः। इदं सूत्रं यथाख्यातचारित्रस्वरूपं तत्फलं च गदितुं आयातम्। णाणस्स दंसणस्स य सारो' सारशब्दोऽतिशयितगुणवचनः। तथा प्रयोगः—

"पढमं चिय विगलियमच्छरेण सुयणेण गहियसारम्मि।
दोसं मोत्तूण खलो गेण्हउ कव्वम्मि किं अण्णं॥" [ ]

प्रथममेव साधुजनेन विगलितमात्सर्येण गृहीतेऽतिशयितगुणे काव्ये दोषं मुक्त्वा खलः किमन्यद्गृह्णाति इति गाथार्थः॥

ज्ञानदर्शनयोरतिशयितरूपं किं तन्मोहनीयजन्यकलंकरहितं, 'चरणं' चारित्रं। 'हवे'। 'जहाखादं' यथाख्यातं। तथा चोक्तं—

"चारित्तं खलु धम्मो धम्मो जो सो समोत्ति णिद्दिट्ठो॥
मोहक्खोहविहूणो परिणामो अप्पणो य समो।" [प्रव० सा० १।७] इति॥

"मोहो द्विविधो दर्शनमोहश्चारित्रमोहश्च। तत्र दर्शनमोहजन्यं अश्रद्धानं शंकाकांक्षाविचि-

---

प्रश्न करने पर चारित्रकी प्रधानता बतलानेके लिये यह गाथासूत्र कहा है। किन्तु यह अयुक्त है क्योंकि 'ज्ञान और दर्शनका सार यथाख्यात चारित्र है' ऐसा कहने पर 'चारित्र ज्ञान और दर्शनसे प्रधान है' ऐसी प्रतीति नहीं होती। प्रश्न होता है कि ये तीनों कर्मोंके विनाशमें निमित्त है या नहीं ? यदि कहते हो नहीं हैं तो सूत्रमें विरोध आता है क्योंकि 'सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र मोक्षका मार्ग है' ऐसा सूत्र है। यदि तीनो मोक्षके उपाय हैं तो परार्थ-परके लिये होनेसे तीनों गौण हो जाते हैं तब चारित्रको प्रधानता कैसी ? यदि कहोगे कि ज्ञान और दर्शन चारित्रके लिये हैं चारित्र ज्ञानदर्शनके लिये नहीं है, तो ऐसा कहना युक्त नहीं है क्योंकि साध्य ज्ञान और दर्शन हैं। उनकी सिद्धिका उपाय चारित्र है। अतः चारित्र ज्ञान दर्शनके लिये है तब वह अप्रधान क्यों नहीं हुआ ? चारित्रके बिना न तो क्षायिक ज्ञान होता है और न क्षायिक वीतराग सम्यक्त्व उत्पन्न होता है। इसलिये जो पूर्वमें उत्तरगाथाके क्रमके सम्बन्धमें कहा है वही युक्त है। यह गाथासूत्र यथाख्यात चारित्रका स्वरूप और उसका फल कहनेके लिये आया है।

'णाणस्स दंसणस्स य सारो' यहाँ सार शब्द सतिशय गुणका वाचक है। इस अर्थमें उसका प्रयोग देखा जाता है। किसी कविने कहा है—प्रथम ही मात्सर्य भावसे रहित साधुजनोंके द्वारा काव्यका सार ग्रहण कर लिये जाने पर दोषके सिवाय दुर्जन और क्या ग्रहण करें। यहाँ 'सार' शब्दका प्रयोग सातिशय गुणके अर्थमें ही किया गया है।

प्रश्न होता है कि ज्ञान और दर्शनका सातिशय रूप क्या है ? तो वह है मोहनीयसे उत्पन्न होने वाले कलंकसे रहित यथाख्यात चारित्र। कहा है—

'निश्चयसे चारित्र धर्म है और धर्म समभावको कहा है। तथा मोह और क्षोभसे रहित आत्माका परिणाम सम है। मोहके दो भेद हैं—दर्शनमोह और चारित्रमोह। उनमेंसे दर्शनमोहसे

कित्सान्यदृष्टिप्रशंसासंस्तवरूपं। चारित्रमोहजन्यौ रागद्वेषौ तदनुन्मिश्रं ज्ञानं दर्शनं च यथाख्यातचारित्रमित्युच्यते" इति सूत्रार्थः। 'चरणस्स' चारित्रस्य, 'तस्स' तस्य, यथाख्याताख्यस्य, 'सारो' अतिशयितं फलं साध्यसाधनलक्षणसंबंधनिमित्ता षष्ठीयं तेन साध्यफलं लब्धं, सारशब्दस्तु तस्यातिशयमाचष्टे। ततोऽयमर्थो जातः यथाख्यातचारित्रस्य फलमतिशयितमिति। किं तत् 'णिव्वाणं' निर्वाणं विनाशः। तथा प्रयोगः—निर्वाणः प्रदीपो नष्ट इति यावत्। विनाशसामान्यमुपादाय वर्तमानोऽपि निर्वाणशब्दस्य चरणशब्दस्य निर्जातकर्मशातनसामर्थ्याभिधायिनः प्रयोगात्कर्मविनाशगोचरो भवति। स च कर्मणां विनाशो द्विप्रकारः, कतिपयप्रलयः सकलप्रलयश्च। तत्र द्वितीयपरिग्रहमाचष्टे—'अणुत्तरमिति' न विद्यतेऽन्यदुत्तरमधिकं अस्मादित्यनुत्तरं। 'भणिदं' उक्तं 'प्रवचने' इति शेषः।

अथवा ज्ञानश्रद्धानयोः फलं दुःखहेतुक्रियापरिहारः। यदत्र[1] च फलं तत्र सन्निहितो हेतुस्ततश्चारित्राराधनायां इतरान्तर्भाव[2] इत्यायातमिदं सूत्रं 'णाणस्स दंसणस्स य सारो चरणं हवे जहाखादं' इति॥ पापक्रिया दुःखहेतु तत्परिहारश्च असति ज्ञाने श्रद्धाने वा न संभवति, क्वचिन्मनसो रंजनं अप्रीतिर्वा पापक्रियाभिनवकर्मसंवरणं चिरंतननिरासं च विदधाति चरणमदो युक्तमुच्यते 'चरणस्स तस्स सारो णिव्वाणमणुत्तरं' इति।

अश्रद्धान उत्पन्न होता है। आत्मा, मोक्ष आदिके अस्तित्वमें शङ्काका होना, विषयभोगोंकी इच्छा, धर्मात्माको देखकर ग्लानि, मिथ्यादृष्टीकी मनसे प्रशंसा और वचनसे स्तुति करना, ये सब उस अश्रद्धानके रूप हैं। चारित्रमोहसे राग-द्वेष उत्पन्न होते हैं। उनसे रहित ज्ञान और दर्शनको यथाख्यात चारित्र कहते हैं। यह गाथासूत्रका अर्थ है।

उस यथाख्यात नामक चारित्रका सार अर्थात् सातिशय फल। यहाँ यह षष्ठी विभक्ति साध्य-साधनरूप सम्बन्धके निमित्तको लेकर है। उससे साध्यफलका बोध होता है। और 'सार' शब्द उसके अतिशयको कहता है। अतः यह अर्थ हुआ कि यथाख्यात चारित्रका सातिशयफल निर्वाण है। निर्वाणका अर्थ विनाश है। कहा जाता है दीपकका निर्वाण हो गया अर्थात् दीपक नष्ट हो गया। इस तरह यद्यपि निर्वाण शब्दका अर्थ विनाशमात्र है तथापि उत्पन्न हुए कर्मोंको नष्ट करनेकी शक्तिवाले चारित्र शब्दका प्रयोग होनेसे कर्मोंका विनाश अर्थ लिया जाता है। कर्मोंका विनाश दो प्रकारका है—कुछ कर्मोंका विनाश और सब कर्मोंका विनाश। यहाँ दूसरेका ग्रहण किया है क्योंकि 'अणुत्तर' शब्दका प्रयोग किया है। जिससे अधिक कोई नहीं है उसे अनुत्तर कहते हैं। 'भणिदं' अर्थात् आगममें कहा है।

अथवा श्रद्धान और ज्ञानका फल दुःखकी कारण क्रियाओंका त्याग है। यहाँ जो फल है त्याग उसमें उसके हेतु ज्ञान और दर्शन समाविष्ट हैं। अत चारित्राराधनामें अन्य आराधनाओंका अन्तर्भाव होनेसे 'ज्ञान और दर्शनका सार यथाख्यातचारित्र है' यह गाथा सूत्र आया है।

पापकर्म दुःखके कारण हैं। उनका त्याग ज्ञान और श्रद्धानके विना सम्भव नहीं है। किसीमें मनका अनुरक्त होना और किसीसे द्वेष करना पापक्रिया है। चारित्र नवीन कर्मोंके आनेको रोकता है और पुराने कर्मोंका विनाश करता है। अतः उचित ही कहा है कि उस चारित्रका सार सर्वोत्कृष्ट निर्वाण है॥११॥

भावार्थ—रागद्वेषसे रहित ज्ञान और दर्शनको ही आगममें यथाख्यात चारित्र कहा है। उसका सार निर्वाण अर्थात् समस्त कर्मोंका विनाश है। निर्वाणसे उत्कृष्ट अन्य नहीं है॥११॥

---

१. यत्तत्त्व–आ० मु०। २. इतरेतरान्त–आ० मु०।

यज्ज्ञानं दुःखहेतुनिराकरणफलमित्यस्यान्वयप्रसाधनाय दृष्टान्तमाह—

चक्खुस्स दंसणस्स य सारो सप्पादिदोसपरिहरणं ।
चक्खू होइ णिरत्थं दठ्ठूण बिले पडंतस्स ॥१२॥

'चक्खुस्स दंसणस्स य सारो' इति । 'चक्खुस्स' चक्षुषः । द्रव्येन्द्रियमिह चक्षुरिति गृहीतं निर्वृत्तिरुप-करणं च तज्जन्यत्वाद्रूपगोचरं विज्ञानं दर्शनं तस्य संबंधितयोच्यते । ततोऽयमर्थो जायते—चक्षुर्जन्यायाः प्रतीतेः सारो फलं किं 'सप्पादिदोसपरिहरणं' सर्पकंटकादीनां स्पर्शनादिक्रियायाः दुःखदायिन्याः परिहारः सर्पादिभिः संपाद्यत्वात् स्पर्शनभक्षणादिकः क्रियाविशेषः सर्पादिदोष इत्युच्यते, तस्य परिहरणं परिवर्जनं ततोऽयं वाक्यार्थः—यज्ज्ञानं तद्दुःखनिराकरणफलं यथा चक्षुर्जन्यसर्पादिगोचरज्ञानं सर्पादिस्पर्शनभक्षणादिपरिहरणफल-मिति । चक्षुर्ज्ञानमिह चक्षुरुच्यते चक्षुःप्रसूतं ज्ञानं । 'होदि' भवति । 'णिरत्थं' निरर्थकं । 'दठ्ठूण' दृष्ट्वा ज्ञात्वा बिलादिकमग्रतः स्थितं, बिलग्रहणमुपलक्षणं उपघातकारिणाम् । 'पडंतस्स' पततः पुरुषस्य ।

अत्रापरा व्याख्या—ज्ञानाद्दर्शनाच्चात्मोपकारिविशिष्टफलदायिचारित्रं इत्युक्तं । ननु ज्ञानमिष्टानिष्ट-मार्गोपदर्शि तद् युक्तं ज्ञानस्योपकारित्वमभिधातु इति चेन्न ज्ञानमात्रेणेष्टार्थसिद्धिः, यतो ज्ञानं प्रवृत्तिहीनं असत्समं । अत्र वस्तुनि दृष्टान्तवर्णनेन निगमयति—'चक्खुस्स दंसणस्स य, इति । ज्ञानदर्शनाभ्यामपि चारित्रस्यात्मोपकारिता कस्मिन्सूत्रे निगदिता येनोक्तमित्युच्यते । अतीतसूत्र इति चेत्तन्मिथ्या णाणस्स दंसणस्स य सारो चरणं हवे जहाखादं' । इत्यतो वाक्यात्किं ज्ञानदर्शनाभ्यां चारित्रमेवोपकारीत्ययं प्रत्ययो

दुःखके कारणोंको दूर करना ज्ञानका फल है इस अन्वयकी सिद्धिके लिए दृष्टान्त कहते हैं—

गा०—चक्षुसे देखनेका सार सर्प आदि दोषोंसे दूर रहना है। देखकर भी आगे वर्तमान साँपके बिलमें गिरनेवाले मनुष्यकी आँख व्यर्थ है ।।१२।।

टी०—यहाँ 'चक्षु' से निर्वृति और उपकरणरूप द्रव्येन्द्रियका ग्रहण किया है। उससे उत्पन्न और रूपको जाननेवाले ज्ञानको यहाँ दर्शन कहा है। उससे यह अर्थ होता है—चक्षुसे होनेवाले ज्ञानका फल सर्प, कण्टक आदिकी दुःख देनेवाली क्रिया—काटना या पैरमें लगना आदिसे बचना है। गाथामें सर्पादिदोषसे बचना है। सो सर्प आदिके द्वारा किये जानेवाले स्पर्शन, काटना आदि क्रिया विशेषको सर्पादिदोष कहा जाता है। उसका परिहार फल है। सब वाक्यका अर्थ यह हुआ—जो ज्ञान है उसका फल दुःखका निराकरण है। जैसे चक्षुसे होनेवाले सर्पादिके ज्ञानका फल सर्पादिके स्पर्शसे उनके काटने आदिसे बचना है। यहाँ चक्षुसे चक्षुज्ञान अर्थात् चक्षुसे होनेवाला ज्ञान लेना चाहिए। आगे स्थित साँपके बिल आदिको देखकर भी, जानकर भी, उसमें गिरनेवाले मनुष्यका, चक्षुज्ञान, निरर्थक है।

इस गाथाकी अन्य व्याख्याकार इस प्रकार व्याख्या करते हैं—'ज्ञान और दर्शनसे चारित्र आत्माका विशेष उपकारी और विशिष्ट फलदायी है ऐसा कहा है। यदि कोई कहता है कि ज्ञान इष्ट और अनिष्टमार्गका दर्शक है अतः उसको उपकारी कहना युक्त है। तो उसका यह कहना ठीक नहीं है क्योंकि ज्ञानमात्रसे इष्टकी सिद्धि नहीं होती, आचरणहीन ज्ञान 'न हुए' के समान है। यहाँ दृष्टान्तके द्वारा उसका समर्थन करते हैं 'चक्खुस्स दंसणस्स' इत्यादि ?

इन व्याख्याकारसे हम पूछते हैं कि ज्ञान और दर्शनसे भी चारित्र आत्माका विशेष उप-कारी है यह किस गाथासूत्रमें कहा है ? यतः आप कहते हैं—'कहा है'। यदि कहोगे कि पिछले

चाभते ? एवमिति तदनुभवविरुद्धमाचरतीत्युपेक्ष्यते, न चेत्कथमुक्तमित्युच्यते । किंच तस्य सूत्रस्य या पातनिका कृता ज्ञानदर्शनचारित्रेषु किं प्रधानमित्यत्र प्रश्ने, प्रधानस्य निरूपणार्थं सूत्रमित्यनया च विरुध्यते ।

'चरणस्स तस्स सारो णिव्वाणमणुत्तरं भणियं' इत्युक्तं चारित्रस्य समतारूपस्य फलमशेषकर्मापाय इत्युक्तं । कर्मापायो हि कथं पुरुषार्थः दुःखनिवृत्तिः सुखं चाभिमतं फलमित्यारेकायां प्रधानपुरुषार्थस्य अखिलबाधाव्यपगमरूपस्य सुखस्य निबंधनतयोपयोगितामाचष्टे सकलकर्मापायस्य—

णिव्वाणस्स य सारो अव्वाबाहं सुहं अणोवमियं ॥
कायव्वा हु तदट्ठं आदहिदगवेसिणा चेट्ठा ॥१३॥

'णिव्वाणस्स य सारो' इति । निरवशेषकर्मापायस्य सार· फलं । अव्वाबाहं कर्मजन्यसकलदुःखापायः कारणाभावे कार्यस्य अनुत्पत्तेः । 'अणोवमियं' उपमातीतं । 'कायव्वा' कर्तव्या । 'चेट्ठा' चेष्टा । 'तदट्ठं' अव्याबाधसुखार्थम् । 'आदहिदगवेसिणा' आत्महितं मृगयता । क्व चेष्टा कार्या ? आराधनायां मृतावनतिचारज्ञानदर्शनचारित्रपरिणतिरूपायां । कस्मात् ?

जम्हा चरित्तसारो भणिया आराहणा पवयणम्मि ।
सव्वस्स पवयणस्स य सारो आराहणा तम्हा ॥१४॥

'जम्हा' यस्मात् 'चरित्तसारो' चारित्रस्य ज्ञाने दर्शने पापक्रियानिवृत्तौ च प्रयतस्य, चरणं प्रवृत्तिः

गाथासूत्रमें कहा है तो यह मिथ्या कथन है 'ज्ञान और दर्शनका सार यथाख्यात चारित्र है' इस वाक्यसे 'ज्ञान और दर्शनसे चारित्र विशेष उपकारी है' ऐसा बोध होता है क्या ? यदि कहोगे 'होता है' तो आपका आचरण अनुभव विरुद्ध है· अतः वह उपेक्षणीय है । यदि कहोगे 'नहीं होता' तो आपने ऐसा क्यों कहा ?

दूसरे, उस गाथासूत्रकी जो उत्थानिका है उसमें 'ज्ञान दर्शन चारित्रमें कौन प्रधान है' ऐसा प्रश्न करनेपर प्रधानका कथन करनेके लिए गाथासूत्र कहते हैं ऐसा कहा है, उससे भी विरोध आता है ॥१२॥

'चरणस्स तस्स सारो' इत्यादिमें समतारूप चारित्रका फल समस्त कर्मोंका विनाश कहा है । किन्तु कर्मोंका विनाश पुरुषार्थ कैसे है ? दुःखकी निवृत्ति और सुखको फल कहा है ऐसी आशङ्का होनेपर ग्रन्थकार प्रधान पुरुषार्थ जो बाधारहित सुख है, उसका कारण होनेसे समस्तकर्मोंके विनाशकी उपयोगिता बतलाते हैं—

गा०—निर्वाणका सार बाधारहित उपमारहित सुख है । अतः आत्महितके खोजीको उस अव्याबाध सुखकी प्राप्तिके लिए चेष्टा करना चाहिए ॥१३॥

टी०—समस्तकर्मोंके विनाशका फल कर्मजन्य समस्त दुःखोंसे रहित, उपमारहित सुख है । अतः आत्महितके खोजीको, उस बाधारहित सुखके लिये, चेष्टा करना चाहिए । अर्थात् निरतिचार ज्ञानदर्शनचारित्रकी परिणतिरूप आराधनाको अपनाना चाहिए ॥१३॥

गा०—क्योंकि प्रवचनमें चारित्रका फल आराधना कहा है । इसलिए समस्त प्रवचनका सार आराधना ही है ॥१४॥

टी०—ज्ञानमें, दर्शनमें, और पापकर्मसे निवृत्तिमें जो प्रयत्नशील है उसकी परिणतिको

परिणतिरिह चारित्रशब्देन गृहीता, ततोऽयमर्थो लभ्यः 'सारः' फलमिति । 'भणिया' कथिता । 'आराहणा' आराधना मृतौ अनतिचाररत्नत्रयता । 'पवयणम्मि' प्रोच्यते दृष्टेष्टप्रमाणाविरुद्धेन जीवादयः पदार्था अनेनास्मिन्वेति प्रवचनं जिनागमस्तस्मिन् । अतिशयवत्ताराधनाया प्रक्रांतायाः उपसंहरत्युत्तरार्धेन सव्वस्स इत्यादिना । 'सव्वस्स' समस्तस्य । 'पवयणस्स' जिनागमस्य । 'सारो' अतिशयः । 'आराहणा' आराधना व्यावर्णितरूपा । 'तम्हा' तस्मात् । च शब्द एवकारार्थः । स चाराधनाशब्दात्परतो द्रष्टव्यः आराधनैव सार इति ।

अन्यत्र व्याख्या—यदिदमुक्तं फलं एतच्चारित्रमात्रादुत विशिष्टाज्जायते इत्याह—जम्हा चरित्तसारो इति । किं पातनिकार्थो गाथायां संवादमुपयाति न चेतीत्यत्र श्रोतारः प्रमाणं ॥१४॥

कस्मात् ? अतिशयवत्याराधनागमेऽभिहिता यस्मात्—

सुचिरमवि णिरदिचारं विहरित्ता णाणदंसणचरित्ते ॥
मरणे विराधयित्ता अणंतसंसारिओ दिट्ठो ॥१५॥

'सुचिरं' अतिचिरकालमपि । 'णिरदिचारं' अतिचारमंतरेण । 'विहरित्ता' विहृत्य । क्व ? 'णाणदंसणचरित्ते' ज्ञाने श्रद्धाने समतायां च । 'मरणे' भवपर्यायविनाशकाले । विराधयित्वा रत्नत्रयपरिणामान्विनाश्य मिथ्यादर्शनेऽज्ञानेऽसंयमे परिणतो भूत्वा । 'अणंतसंसारिओ' अनंतभवपर्यायपरिवर्तने उद्यत. । 'दिट्ठो' दृष्टः । देशोनं पूर्वकोटीकालं अनतिचाररत्नत्रयप्रवृत्तानामपि मरणकाले ततः प्रच्युतानां मुक्त्यभावं संसारे चिरपरिभ्रमणकथनव्याजेन दर्शनं वर्णयति सूत्रकारः ॥१५॥

यहाँ चारित्रशब्दसे ग्रहण किया है। तब यह अर्थ प्राप्त होता है कि चारित्रका फल, प्रवचनमें—जिसके द्वारा अथवा जिसमें जीवादिपदार्थ प्रत्यक्ष और अनुमान प्रमाणसे अविरुद्ध कहे जाते हैं वह प्रवचन अर्थात् जिनागम है उसमें, आराधनाको कहा है। गाथाके उत्तरार्धद्वारा प्रकरण प्राप्त आराधनाकी अतिशयवत्ताका उपसंहार करते हैं—इस कारण से समस्त जिनागमका सार आराधना है। गाथामें जो 'य' च शब्द है वह एवकार (ही) के अर्थमें है और उसे आराधना शब्दके आगे लगाना चाहिए अर्थात् जिनागमका सार आराधना ही है।

अन्यत्र इस गाथाकी व्याख्या इस प्रकार की गई है—यह जो फल कहा है वह चारित्र सामान्यसे प्राप्त होता है या विशिष्टचारित्रसे प्राप्त होता है। इसके उत्तरमें आचार्यने 'जम्हा चरित्तसारो' आदि गाथा कही है। हमारा प्रश्न है कि इस आपकी उत्थानिकाके अर्थका गाथाके साथ मेल खाता है क्या ? इस विषयमें श्रोतागण ही प्रमाण हैं। हम अधिक क्या कहें ॥१४॥

आगममें आराधनाकी अतिशयवत्ता क्यों कही है इसका समाधान करते हैं—

गा०—ज्ञान श्रद्धान और चारित्रमें बहुत कालतक भी अतिचार बिना बिहार करके मरणकालमें विराधना करके अनन्तभव धारण करनेवाला देखा गया है ॥१५॥

टी०—ज्ञानमें, दर्शनमें और समतारूप चारित्रमें सुदीर्घकालतक अतिचार रहित बिहार करके भी अर्थात् ज्ञानदर्शनचारित्रका निर्दोष पालन करके भी जब उस पर्यायके विनाशका समय आवे अर्थात् मरते समय यदि रत्नत्रयरूप परिणामोंको नष्ट करके मिथ्यादर्शन, अज्ञान और असंयमरूप परिणामोंको अपनावे तो उसका संसार अनन्त होता है। अर्थात् कर्मभूमिमें मनुष्यपर्यायकी उत्कृष्ट आयु एक पूर्वकोटी होती है। आठ वर्षकी अवस्थाके पश्चात् संयम धारण करके कुछ कम एक पूर्वकोटिकालतक उसका निरतिचार पालन किया। किन्तु मरणकाल आनेपर

अनुपगतमिथ्यात्वस्य अविचलितचारित्रस्यापि परीषहपरिभवादुपगतसंक्लेशस्य महती संसृतिरिति भयोपदर्शनेन संक्लेशः परित्याज्यः इति निगदति सूत्रकारः 'समिदीसु य' इत्यादिना—

समिदिसु य गुत्तीसु य दंसणणाणे य णिरदिचाराणं ।
आसादणबहुलाणं उक्कस्सं अंतरं होई ॥ १६ ॥

अन्ये व्याचक्षते—"उक्तस्यानंतसंसारस्य प्रमाणप्रतिपादनाय आयाता गाथा अनंतस्यानंतविकल्पत्वात् अनंतविशेषः प्रतिपादनीयः" इति । अस्यां व्याख्यायां उक्कस्सं अंतर होदीत्येतावदुपयुज्यते । इतरस्य वचनसंदर्भस्य अनर्थकत्वं प्रसज्यत इति । समिदीसु य सम्यगयनादिषु अयनं समितिः, सम्यक्श्रुतज्ञाननिरूपितक्रमेण गमनादिषु वृत्तिः समितिः । सावद्ययोगेभ्य आत्मनो गोपनं गुप्तिः । वस्तुयाथात्म्यश्रद्धानं दर्शनं । अपेतमिथ्यात्वकलंकस्यात्मनो वस्तुतत्त्वपरिज्ञानं मत्यादिक्षायोपशमिकं ज्ञानं । क्षायिके सति ज्ञाने आसादनाया असंभवः । मोहजन्यत्वात्संक्लेशस्य, मोहस्य च केवलज्ञानोत्पत्तेः प्रागेव विनष्टत्वात् । तथा चोक्तं—'मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम्' [त० सू० १०।१] इति । वीतरागसम्यक्त्वं चेह न गृहीतम् । मोहप्रलय-

---

उससे च्युत हो गया तो संसारमें चिरकालतक भ्रमण करना पड़ता है। इस चिरकाल परिभ्रमणके बहानेसे सूत्रकार उसकी मुक्तिका अभाव बतलाते हैं ॥१५॥

जो मिथ्यात्वभावको प्राप्त नहीं हुआ है जिसका चारित्र भी निश्चल है फिर भी यदि वह परीषहसे घबराकर संक्लेशभावको प्राप्त होता है तो उसका संसार सुदीर्घ है, ऐसा भय दिखलाकर ग्रन्थकार संक्लेशको त्यागनेका उपदेश देते हैं—

गा०—समितियोंमें और गुप्तियोंमें और दर्शन और ज्ञानमें जो अतिचार रहित प्रवृत्ति करते हैं। किन्तु मरणकाल आने पर परीषहके भयसे समिति आदिमें बारम्बार दोष लगाते हुए संक्लेश परिणाम करते हैं उनका अर्धपुद्गल परावर्तन काल प्रमाण उत्कृष्ट अन्तर होता है। अर्थात् मरते समय रत्नत्रयसे च्युत होकर पुनः उतना काल बीतने पर रत्नत्रय प्राप्त करते हैं ॥१६॥

टीका—अन्य व्याख्याकार कहते हैं कि 'ऊपर जो अनन्त संसार कहा है उसका प्रमाण बतलानेके लिए यह गाथा आई है। क्योंकि अनन्तके अनन्त भेद होते हैं अतः अनन्तविशेषका कथन करना आवश्यक था। इस व्याख्यामें 'उत्कृष्ट अन्तर होता है' गाथा के इस अन्तिम चरणकी उपयुक्तता तो होती है, किन्तु शेष वचन रचना निरर्थक पड़ जाती है। अस्तु।

सम्यक् अयनको समिति कहते हैं। सम्यक् अर्थात् श्रुतज्ञानमें कहे गये क्रमके अनुसार चलने आदिमें प्रवृत्ति करना समिति है। सावद्य योगोंसे अर्थात् सदोष मन वचन कायकी प्रवृत्तिसे आत्माका गोपन अर्थात् रक्षण करना गुप्ति है। वस्तुका जैसा स्वरूप है वैसा ही श्रद्धान सम्यग्दर्शन है। मिथ्यात्वरूप कलंकसे रहित आत्माके वस्तुतत्त्वके परिज्ञानको मति आदिरूप क्षायोपशमिक ज्ञान कहते हैं। यहाँ क्षायोपशमिक ज्ञानको ही लेनेका हेतु यह है कि क्षायिकज्ञानके होते उसमें दोष लगाना असम्भव है। क्योंकि संक्लेश मोहके उदयसे होता है और मोहकर्म केवलज्ञानके उत्पन्न होनेसे पहले ही नष्ट हो जाता है। कहा भी है—'मोहके क्षयसे तदनन्तर ज्ञानावरण, दर्शनावरण और अन्तरायके क्षयसे केवलज्ञान होता है।'

यहाँ दर्शनसे वीतराग सम्यक्त्वका ग्रहण नहीं किया गया है क्योंकि मोहका नाश हुए बिना वीतरागता नहीं होती।

मन्तरेण वीतरागता नास्तीति । ईर्यासमितेरतिचारः मंदालोकगमनं, पदविन्यासदेशस्य सम्यगनालोचनम्, अन्यगतचित्तादिकम् । इदं वचनं मम वक्तुं युक्तं न वेति अनालोच्य भाषणं, अज्ञात्वा वा । अत एवोक्तं 'अपुट्ठो दु ण भासेज्ज भासमाणस्स अंतरे' इति । अपुष्टश्रुतधर्मतया मुनिः अपुष्ट इत्युच्यते । भाषासमिति-क्रमानभिज्ञो मौनं गृह्णीयात् इत्यर्थः । एवमादिको भाषासमित्यतिचारः । उद्गमादिदोषे गृहीतं भोजनमनु-मननं वचसा, कायेन वा प्रशंसा, तैः सहवासः, क्रियासु प्रवर्तनं वा एषणासमित्यतीचारः । आदातव्यस्य, स्थाप्यस्य, वा अनालोचनं, किमत्र जंतवः सन्ति न सन्ति वेति दुःप्रमार्जनं च आदाननिक्षेपणसमित्यतिचारः । कायभूम्यशोधनं, मलसंपातदेशानिरूपणादि, पवनसंनिवेशदिनकरादिविपूतक्रमेण वृत्तिश्च प्रतिष्ठापनासमित्यतिचारः । असमाहितचित्ततया कायक्रियानिवृत्तिः कायगुप्तेरतिचारः । एकपादादिस्थानं वा जनसंचरणदेशे, अशुभध्याना-भिनिविष्टस्य वा निश्चलता । आप्ताभासप्रतिबिंबाभिमुखतया वा तदाराधनाव्यापृत इवावस्थानं । सचित्तभूमौ संपततसु समंततः अंकुरेषु महति वा वाते हरितेषु; रोषाद्वा दर्पाद्वा तूष्णीं अवस्थानं निश्चला स्थितिः कायोत्सर्गः कायगुप्तिरित्यस्मिन्पक्षे शरीरममतायाः अपरित्यागः कायोत्सर्गदोषो वा कायगुप्तेरतिचारः । रागादि-सहिता स्वाध्याये वृत्तिर्मनोगुप्तेरतिचारः । [1]शंकाकांक्षाविचिकित्साऽन्यदृष्टिप्रशंसासंस्तवाः सम्यग्दर्शनातीचाराः । द्रव्यक्षेत्रकालभावशुद्धिमंतरेण श्रुतस्य पठनं श्रुतातिचारः । अक्षरपदादीनां न्यूनताकरणं, अतिवृद्धिकरणं, विप-

---

मन्द प्रकाशमें चलना, पैर रखनेके स्थानको अच्छी तरह न देखना, गमन करते समय चित्तका उपयोग अन्यत्र होना, ये ईर्यासमितिके अतीचार हैं। यह वचन मुझे कहना युक्त है अथवा नहीं, ऐसा विचार किये बिना बोलना, या बिना जाने बोलना। इसीसे कहा है—'बोलने-वालेके बीचमें बिना समझे नहीं बोलना चाहिये।' ऐसे मुनिको जिसने शास्त्रकी बातको पुष्ट रूपसे नहीं सुना है अपुष्ट कहा है। अपुष्ट मुनिको बीचमें नहीं बोलना चाहिये। भाषा-समितिके क्रमसे जो अनजान है उसे मौन ले लेना चाहिये। इत्यादि भाषा समितिके अतीचार हैं। उद्गम आदि दोष होने पर भी भोजन ले लेना, वचन से उसकी अनुमति देना, कायसे उसकी प्रशंसा करना, ऐसे मुनियोंके साथ रहना, या क्रियाओंमें उनके साथ प्रवृत्ति करना, एषणासमिति-के अतीचार हैं। जो वस्तु ग्रहण करने योग्य या रखने योग्य है, उसे ग्रहण करते या स्थापित करते समय 'यहाँ जन्तु हैं या नहीं' ऐसा नहीं देखना या पिच्छिकासे सावधानता पूर्वक प्रमार्जन न करना आदाननिक्षेपण समितिके अतीचार हैं। शरीर और भूमिका शोधन न करना, मलत्याग करनेके स्थानको न देखना आदि प्रतिष्ठापना समितिके अतीचार हैं। चित्तके असावधान रहते हुए शारीरिक क्रियाका रोकना कायगुप्तिका अतीचार है। जहाँ मनुष्य आते जाते हैं वहाँ एक पैर आदिसे खड़े होना, अशुभ ध्यानमें लीन होकर निश्चल होना, मिथ्या देवताओंकी मूर्तिके सम्मुख ऐसे खड़े होना मानों उनकी आराधनामें लगे हैं, सचित्त भूमिमें जहाँ चारों ओर हरित वनस्पति फैली है, क्रोध या घमण्डसे मौनपूर्वक निश्चल खड़े होना कायगुप्तिके अतीचार हैं।

जो कायोत्सर्गको कायगुप्ति मानते हैं उनके पक्षमें शरीरसे ममत्वको न छोड़ना अथवा जो कायोत्सर्गके दोष कहे हैं वे कायगुप्तिके अतीचार हैं। स्वाध्यायमें रागादिसहित प्रवृत्ति मनोगुप्तिका अतीचार है। शङ्का, कांक्षा, विचिकित्सा, मिथ्यादृष्टियोंकी प्रशंसा, संस्तव ये सम्यग्दर्शनके अती-चार हैं। द्रव्य, क्षेत्र, काल और भावकी शुद्धिके बिना श्रुतका पढ़ना श्रुतका अतीचार है। अक्षर

---

१. 'शंका···सम्यग्दृष्टेरतीचाराः'—त० सू० ७।२३।

पौर्वापर्यरचनाविपरीतार्थनिरूपणा ग्रंथार्थयोर्वैपरीत्यं अमी ज्ञानातिचाराः। उक्तातिचारविगमो निरतिचारता चारित्रादीनाम्।

मरणकाले रत्नत्रयपरिणामाभावे दोष उक्तः। इदानीमाराधनाफलातिशयख्यापनायाह—

दिट्ठा अणादिमिच्छादिट्ठी जम्हा खणेण सिद्धा य ॥
आराहया चरित्तस्स तेण आराहणा सारो ॥ १७ ॥

दिट्ठा इत्यादिकं। 'दिट्ठा' दृष्टा उपलब्धाः। 'अणादिमिच्छादिट्ठी' अनादिमिथ्यादृष्टयः। भद्दणादयो राजपुत्रास्तस्मिन्नेव भवे त्रसतामापन्नाः अत एवानादिमिथ्यादृष्टयः प्रथमजिनपादमूले श्रुतधर्मसाराः समारोपितरत्नत्रयाः। 'जम्हा' यस्मात्खणेन क्षणग्रहणं कालस्याल्पस्योपलक्षणार्थम्, अन्यथा क्षणस्याल्पकालतया कर्मघातनस्य कर्तुमशक्यत्वात्, सकलकर्मघातनपुरस्सरं सिद्धत्वमेव न स्यात्। 'सिद्ध य' सिद्धाश्च परिप्राप्ताशेषज्ञानादिस्वभावाः, चशब्देन निरस्तद्रव्यभावकर्मसंहतयश्च, दृष्टा आराधनासंपादकाः। चरित्तस्स चारित्रस्य। चारित्रग्रहणं रत्नत्रयोपलक्षणं। एतेन चारित्राराधनां स्तौति इत्येतद्व्याख्यानं निरस्तं। चारित्राराधनास्तवनस्य नाय प्रस्तावः। आयुरंते रत्नत्रयपरिणतिरिह प्रक्रांता स्तोतुं, किमुच्यते चारित्राराधनां स्तौतीति।

पद आदिको कम करना या उनको बढ़ाना, आगेको पीछे और पीछेके पाठको आगे करके पौर्वापर्य रचनामें विपरीतता करना, विपरीत अर्थ करना, ग्रन्थ और अर्थमें विपरीतता करना, ये ज्ञानके अतीचार हैं। चारित्र आदिमें कहे अतिचारोंको न लगाना निरतिचारता है।

विशेषार्थ—पं० आशाधरने अपने मूलाराधना दर्पणमें लिखा है कि जयनन्दि इस गाथाको पूर्वकी गाथाकी संवादगाथा मानते हैं ॥१६॥

मरते समय रत्नत्रयरूप परिणामोंका अभाव होनेमें दोष कहा। अब आराधनाके फलका अतिशय कहते हैं—

गा०—क्योंकि रत्नत्रयके आराधक अनादिमिथ्यादृष्टि क्षणमात्रमें अर्थात् अल्पकालमें द्रव्य-कर्म भावकर्मसे रहित सिद्ध देखे गये हैं। इसलिये आराधना सार है ॥१७॥

टीका—भद्दण आदि राजपुत्रोंने उसी भवमें त्रसपर्याय प्राप्त की थी। अतएव वे अनादि-मिथ्यादृष्टि थे। उन्होंने भगवान् ऋषभदेवके पादमूलमें धर्मका सार सुनकर रत्नत्रय धारण किया था और क्षणमात्रमें सिद्धत्व पद प्राप्त किया था। यहाँ 'क्षण' शब्दका ग्रहण कालकी अल्पताके उपलक्षणके लिये किया है। अन्यथा 'क्षण' बहुत छोटा काल है उतने कालमें समस्त कर्मोंका नाश करना अशक्य है और तब समस्त कर्मोंके विनाशपूर्वक होनेवाला सिद्धत्व ही प्राप्त नहीं हो सकता। जिन्होंने समस्त ज्ञानादिस्वभावको प्राप्त कर लिया है और 'च' शब्दसे द्रव्यकर्म और भावकर्मोंके समूहको नष्ट कर दिया है उन्हें सिद्ध कहते हैं। यहाँ चारित्रका ग्रहण रत्नत्रयका उपलक्षण है।

अतः जो 'चारित्राराधनाका स्तवन करते हैं' ऐसा व्याख्यान करते हैं उसका निरास कर दिया है। यह प्रकरण चारित्राराधनाके स्तवनका नहीं है। यहाँ तो आयुके अन्त समयमें रत्नत्रय-रूप परिणतिका स्तवन है। तब चारित्राराधनाके स्तवनकी बात क्यों करते हैं।

भावार्थ—अनादिकालसे मिथ्यात्वका उदय होनेसे नित्यनिगोदपर्यायमें रहकर भद्र-विवर्द्धन आदि ९२३ भरतचक्रवर्तीके पुत्र हुए और उन्होंने भगवान् ऋषभदेवके पादमूलमें धर्म सुनकर

'सव्वस्स पवयणस्स य सारो आराहणा तम्हा' इति यदुक्तं, यस्मिन्नेव काले मरणं तस्मिन्नेव काले रत्नत्रयपरिणतेन भाव्यं हितार्थिना अन्यथा किमिति चारित्रे तपसि च प्रयासः क्रियते इति शिष्यशंकामुपन्यस्यति सूत्रकारः—

जदि पवयणस्स सारो मरणे आराहणा हवदि दिट्ठा।
किंदाइं सेसकाले जदि जददि तवे चरित्ते य ॥ १८ ॥

जदि पवयणस्स इत्यादिना । 'पवयणस्स' प्रवचनस्य । 'सारो' अतिशय इति । 'मरणे' आयुरंते । 'आराहणा' आराधना रत्नत्रयपरिणतिः । 'जदि दिट्ठा' इति पदसंबंधः । यद्युपलब्धा । 'हवदि' भवेत् । 'किदाइं' किमिदानीं । 'सेसकाले' मरणकालादन्यः कालः शेषकालस्तत्र 'जददि' प्रयतनं क्रियते । क्व 'तवे' तपसि, 'चरित्ते' सामायिकादिके सावद्यक्रियापरिहारात्मके । चशब्दात् ज्ञानदर्शनयोश्च । एतदुक्तं भवति—ग्रहणकालादिषु भावितरत्नत्रयस्यापि मरणे तदभावे यदि सिद्धि., अकृतभावनस्यापि मृतौ रत्नत्रयसान्निध्यात्सा सिद्धिर्यदि भवति मरणधना सा महती ससृतिमावहति । अन्यदा आत्तायामपि विराधनायां मृतिकाले रत्नत्रयोपपत्तौ संसारोच्छित्तिर्भवत्येव । ततो मरणकाले प्रयत्नः कार्यं इत्यस्माभिरुपन्यस्तं । इतरकालवृत्तं तु रत्नत्रयं संवरनिर्जरयोर्घातिकर्मणां च क्षयनिमित्तं इतीष्यत एव । तथा चोक्तं—'सम्यग्दृष्टिश्रावकविरतानंतवियोजकदर्शनमोहक्षपकोपशमकोपशांतमोहक्षपकक्षीणमोहजिनाः क्रमशोऽसंख्येयगुणनिर्जराः' [त०सू० ९।४५] इति ।

रत्नत्रय धारण किया और अल्पकालमें ही सिद्धपद प्राप्त किया। इससे सिद्ध होता है कि आयुके अन्तमें आराधना सर्वोत्कृष्ट है ॥१७॥

यदि 'समस्त प्रवचनका सार आराधना है' तो जिस कालमें मरण हो उसी कालमें अपना हित चाहनेवालेको रत्नत्रय धारण करना चाहिए, अन्यकालमें चारित्र और तपमें प्रयास क्यों किया जाये ? शिष्यकी इस शंकाको गाथासूत्रकार उपस्थित करते हैं—

गा०—प्रवचनका अतिशय आयुके अन्तमें आराधना यदि देखी जाती है। तो क्यों इस समय मरणकालसे अन्यकालमें यति तप चारित्र और ज्ञानदर्शनमें यत्न करता है ? ॥१८॥

टीका—गाथामें आये 'च' शब्दसे ज्ञान और दर्शन लेना चाहिए। कहनेका आशय यह है कि मरणकालसे भिन्नकालमें अर्थात् दीक्षा ग्रहण, शिक्षाकाल आदिमें रत्नत्रयका पालन करनेपर भी यदि मरणकालमें उसका पालन न किया जाये तो मुक्तिकी प्राप्ति नहीं होती, और अन्यकालमें रत्नत्रयकी भावना न करके भी मरते समय रत्नत्रय धारण करनेसे वह मुक्ति यदि प्राप्त होती है तब तो मरणकालमें होनेवाला रत्नत्रय ही मोक्षका कारण हुआ। अतः शेषकालमें उसका प्रयास करना निष्फल हुआ।

इसका उत्तर देते हैं—मरण समय जो रत्नत्रयकी विराधना है वह संसारको बहुत दीर्घ करती है। किन्तु अन्यकालमें विराधना होनेपर भी मरते समय रत्नत्रय धारण करनेपर संसारका उच्छेद होता ही है। अतः मरणकालमें प्रयत्न करना चाहिए यह हमने कहा है। अन्य कालोंमें धारण किया गया रत्नत्रय संवर, निर्जरा और घातिकर्मोंका क्षय करनेमें निमित्त होता है इसलिए उसे हम स्वीकार करते ही हैं। तत्त्वार्थसूत्रमें कहा है—सम्यग्दृष्टि, श्रावक, मुनि अनन्तानुबन्धी-कषायका विसंयोजन करनेवाला, दर्शनमोहका क्षय करनेवाला, उपशम श्रेणीवाला, उपशान्तमोह, क्षपकश्रेणिवाला, क्षीणमोह और जिन इनके क्रमसे असंख्यातगुनी असंख्यातगुनी निर्जरा होती है।

एवमसंख्यातगुणनिर्जराः सम्यग्दर्शनादिगुणनिमित्ताः कथमफलता। क्षायिकं सम्यक्त्वं ज्ञानं चारित्रं च यत्साध्यं तदपि कालान्तरभाव्यस्य एव इतरकालभूतस्यापि भावनया।

तदेव चोद्यं चोद्यते इति चेतसि कृत्वा सूरिस्तोद्यानुसारेणापि परिहर्तुं शक्यते इत्याचष्टे—

आराहणाए कज्जे परियम्मं सव्वदा वि कायव्वं।
परियम्मभाविदस्स हु सुहसज्झाराहणा होइ॥ १९॥

आराहणाए कज्जे इति। आराधनाशब्दः सम्यग्दर्शनादिपरिणामसंसिद्धिमनाश्रितकालभेदां प्रतिपादयितुं उद्यतोऽपि मरणे विराधयित्ता इत्यत्र मरणकालविशेषस्य प्रस्तुतत्वात् प्रकरणानुरोधेन तद्विषयायामेवाराधनायां गृह्यते। ततोऽयमर्थः—मृतिकालगोचररत्नत्रयसिद्ध्यर्थं 'परियम्मं' परिकर्म परिकरः। 'सव्वदा' सर्वस्मिन्नपि काले—ग्रहणकालः, शिक्षाकालः, प्रतिसेवनाकाल सल्लेखनाकालश्चेह सर्वशब्देन गृह्यते। 'करणिज्जं' अवश्य-करणीयं। कुतोऽयं नियोग इत्याशंक्याह—'परियम्मभाविदस्स' 'खु' परिकरेण भावितस्यैव 'खु' शब्दोऽव-धारणार्थः। 'सुहसज्झा' होदि' सुखेन क्लेशमंतरेण साध्या भवति। का 'आराहणा' आराधना मृतिगोचरा।

येन हि यत्साध्यं तेन पूर्वं तस्य परिकरोऽनुष्ठेय इत्यमुं अर्थं दृष्टांतबलेन साधयितुमुत्तरसूत्रम्। तथा च वदंति 'दृष्टांतसिद्धावुभयोर्विवादे साध्यं प्रसिद्ध्येत्' [स्वयंभू० स्तो० ५४] इति।—

जह रायकुलपसूओ जोग्गं णिच्चमवि कुणइ परियम्मं।
तो जिदकरणो जुद्धे कम्मसमत्थो भविस्सदि हि॥ २०॥

तो जब इनके सम्यग्दर्शन आदि गुणोंके निमित्तसे असंख्यात गुणी निर्जरा होती है तो वे निष्फल कैसे हैं? जो साध्य है क्षायिक सम्यक्त्व, ज्ञान, चारित्र वह सब, अन्यकालमें की गई रत्नत्रय भावनासे प्राप्त होता ही है॥१८॥

उक्त गाथामें उठाये गये तर्कको मनमें रखकर आचार्य तर्कके अनुसार भी उसका परिहार हो सकता है यह कहते हैं—

गा०—आराधनाके कार्यके लिये परिकर्म सभी कालमें करना चाहिये; क्योंकि परिकर्म करने वालेके ही आराधना सुखपूर्वक साध्य होती है॥१९॥

टी०—यद्यपि आराधना शब्द कालभेदका आश्रय न लेकर सम्यग्दर्शन आदि परिणामोंकी सम्यक् सिद्धिको कहता है तथापि १५ वीं गाथामें 'मरणे विराधयित्ता' ऐसा कहनेसे मरणकाल विशेषके प्रस्तुत होनेसे प्रकरणके अनुरोधसे मरणकाल सम्बन्धी आराधनाके अर्थमें यहाँ लिया गया है। तब यह अर्थ होता है—मरते समयके रत्नत्रयकी सिद्धिके लिये सर्वदा, ग्रहणकाल, शिक्षाकाल, प्रति सेवनाकाल और सल्लेखना काल इन सब कालोंमे परिकर्म अर्थात् सम्यक्त्वादि अनुष्ठान करना चाहिये; क्योंकि जो अन्यकालोंमें भी रत्नत्रयके परिकरका पालन करता है उसीके मरते समयकी आराधना सुखपूर्वक होती है॥१९॥

जो व्यक्ति जिस कामको सिद्ध करना चाहता है उसे पहले उसकी साधन सामग्रीका आयो-जन करना चाहिये, इस बातको दृष्टान्तके बलसे साधन करनेके लिये आगेकी गाथा कहते हैं। क्योंकि समन्तभद्र स्वामीने कहा है कि वादी और प्रौर प्रतिवादीमें विवाद हो तो दृष्टान्तकी सिद्धि होने पर साध्यकी सिद्धि होती है—

'जह' यथा। 'रायकुलपसूदो' राजपुत्रः। 'जोग्गं' योग्यं। प्रहरणक्रियायाः 'परियम्मं' परिकर्म परिकरं। 'णिच्चमवि' समरकालात्प्राक् प्रतिदिवसमपि। 'कुणदि' करोति। 'तो' ततः पश्चात्। 'जिदकरणो' क्रियंते रूपादिगोचराः विज्ञप्तय एभिरिति करणानि इंद्रियाण्युच्यंते क्वचित्करणशब्देन। अन्यत्र क्रियानिष्पत्तौ यदतिशयितं साधकं तत्करणमिति साधकतममात्रमुच्यते। क्वचित्तु क्रियासामान्यवचनः यथा 'डुकृञ् करणे' इति। अत्र क्रियावाची गृहीतः। जितशब्दश्च स्ववशीकरणवृत्तिस्तथा जितभार्यः स्ववशीकृतभार्य इति गम्यते। तेनायमर्थः स्ववशीकृतक्रियः सन् 'जुद्धे' युद्धे समरे 'कम्मसमत्थो' कर्मसमर्थः। कर्मशब्दो अनेकार्थः। मिथ्यादर्शनाविरति-प्रमादकषायैर्ज्ञानप्रतिबंधादिसामर्थ्याध्यासितानि क्रियंते इति कर्माणि ज्ञानावरणादीनि। कर्तुः क्रियया व्यापकत्वेन विवक्षितमपि कर्म, यथा 'कर्मणि द्वितीयेति'। तथा क्रियावचनोऽपि अस्ति, किं कर्म करोषि ? कां क्रियामित्यर्थः। इह क्रियावाची गृहीतः। सा चात्र क्रियाऽभ्यसनप्रहरणताडनादिका तस्यां 'समत्थो भविस्सदि' समर्थो भविष्यामीति। यो यत्साधयितुं वांछति स तत्परिकर्मणि प्राक् प्रयतते, यथा रिपून्निहन्तुकामो हनन-कर्मोपायं अस्त्रशिक्षां करोति इत्येतावानर्थो दर्शितोऽनया गाथया।

इदानीं हेतोः पक्षधर्मयोजनायाह—

इयसामण्णं साधू वि कुणदि णिच्चमवि जोगपरियम्मं।
तो जिदकरणो मरणे झाणसमत्थो [1]भविस्सदि॥ २१॥

गा०—जैसे राजपुत्र योग्य शस्त्र प्रहारका अभ्यास युद्धकालसे पहले प्रतिदिन भी करता है। पश्चात् शस्त्र प्रहार रूप क्रियाको अपने अधीन करके युद्ध करनेमें समर्थ होता है॥२०॥

टी०—जिनके द्वारा रूपादि विषयक ज्ञान किया जाता है उन्हें करण कहते हैं। इस प्रकार कहीं 'करण' शब्दसे इन्द्रियाँ कही जाती हैं। अन्यत्र क्रियाकी निष्पत्तिमें जो सर्वाधिक साधक होता है उसे करण कहते हैं। साधकतमको करण कहा है। कहीं पर करण शब्द क्रिया सामान्यका वाचक है जैसे 'डुकृञ् करणे'। यहाँ करण शब्द क्रियावाची ग्रहण किया है। और जित' शब्दका अर्थ अपने वशमें करना है। जैसे 'जितभार्य शब्दसे भार्याको अपने वशमें करने वाले पुरुषका बोध होता है। अतः 'जितकरण' का अर्थ क्रियाको अपने वशमें करने वाला होता है।

इसी तरह 'कम्मसमत्थो' में कर्म शब्दके अनेक अर्थ हैं। मिथ्यादर्शन, अविरति, प्रमाद, कषायके द्वारा ज्ञानको रोकने आदिकी शक्तिसे युक्त जो किये जाते हैं उन ज्ञानावरण आदिको कर्म कहते हैं। तथा कर्ताकी क्रियाके द्वारा व्यापक होने रूपसे जो विवक्षित होता है उसे भी कर्म कहते हैं। जैसे 'कर्म में द्वितीया विभक्ति होती है'। कर्म शब्द क्रियावाचक भी है। जैसे क्या कर्म करते हो अर्थात् क्या क्रिया करते हो। यहाँ कर्म शब्द क्रियावाची लिया है। यहाँ मारना, प्रहार करना आदि क्रिया ली गई है।

जो जिसको साधन करना चाहता है वह पहले उसके परिकर्ममें लगता है जैसे जो शत्रुओं को मारना चाहता है वह मारनेके उपाय अस्त्र शिक्षामें लगता है। इतना अर्थ इस गाथासे बत-लाया है॥२०॥

अब उक्त दृष्टान्तकी योजना प्रकृत चर्चामें करते हैं—

गा०—इसी प्रकार साधु भी ध्यानका परिकर्म जो (सामण्णं) श्रामण्य है उसे नित्य भी

1. भविस्संति-मू०।

इह सामण्णमिदि । 'इय' एव । 'सामण्णं' समणस्स भावो सामण्णं समता इत्यभियुक्ता निरुक्तिमाहुः । भवतोऽस्मादभिधानप्रत्ययौ इति भाववाचिना द्रव्यशब्दस्य वृत्तौ [1]निमित्तभूतो गुण उच्यते । तथा चोक्तम्—'यस्य गुणस्य भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति', ततोऽपि समण इत्यस्य शब्दस्य जीवे प्रवृत्तौ किं निमित्तं गुणः समता, क्व जीविते, मरणे, लाभेऽलाभे, सुखे, दुःखे, बंधुषु, रिपौ च । एतेषु रागः क्वचित्क्वचिद्द्वेषश्चासमानता, तदुभयाकरणं जीवितादिस्वरूपपरिज्ञानं समचित्तता । अर्थयाथात्म्यग्राहित्वेन जीवितादिविषयाणां ज्ञानानां समता । जीवितं नाम प्राणधारणं तदायुरायत्तं न ममेच्छया वर्तते, सत्यामपि तस्यां प्राणानामनवस्थानात् । सर्वं हि जगदिच्छति प्राणानामनपायं न च तेऽवतिष्ठन्ते । मरणं नाम इंद्रियादिप्राणेभ्यो विगम आत्मनः । तथा चोक्तम्—'मृङ् प्राणत्यागे' [ ] इति । त्यागो हि वियोग आत्मनः सकाशात् प्राणानां पृथग्भावः । स आयुःसंज्ञितानां पुद्गलानां अशेषगलनात् । अत्र द्रव्येंद्रियाणां उपघातकशरादिद्रव्यसंपाताद्भावेंद्रियस्य चोपयोगस्य विनाशः तदा[2]वरणोदयात् । तदुदयादेव च लब्धेरभावः । वीर्यान्तरायोदयात्त्रिविधबलप्राणहानिः । मुखस्य नासिकायाश्च पिधानात् श्लेष्मादिनावरोधात् उच्छ्वासनिश्वासहानिः । अभिमतस्य लाभो लाभांतरायक्षयोपशमात् । अलाभस्तदुदयात् । सुखं नाम प्रीतिः सद्वेद्योदयात् अभिलषितविषयसान्निध्यात् । दुःखं तु बाधात्मकमसद्वेद्योदयहेतुकम् । बंधवो नाम न नियताः केचन सन्ति । संसृतौ

करता है, कि इसके पश्चात् मनको वशमें करके मैं मरते समय ध्यानमें समर्थ होऊँगा ॥२१॥

टी०—समणके भावको सामण्ण कहते है ऐसी निरुक्ति विशेषज्ञोंने की है। 'सामण्ण'का अर्थ समता है। द्रव्य शब्दमें प्रवृत्तिका निमित्त जो गुण होता है उसे भाव शब्दसे कहते हैं। कहा भी है—जिस गुणके होनेसे द्रव्यमें शब्दका निवेश होता है उसके वाचक शब्दसे त्व और तल प्रत्यय होते है। यहाँ भी समण शब्दकी जीवमे प्रवृत्तिका गुण समता है अर्थात् समता गुणके कारण ही जीवको समण कहा जाता है। जीवनमें मरणमें, लाभमें अलाभमें, सुख और दुःखमें, बन्धुमें और शत्रुमें समान भावको समता कहते हैं। और इनमें किसीसे राग और किसीसे द्वेष करना असमानता है। और राग-द्वेषका न करना तथा जीवन आदिके स्वरूपको जानना समचित्तता है। जीवन आदि विषयोंके ज्ञान यथार्थग्राही होनेसे समतारूप है।

प्राणधारणको जीवन कहते हैं। वह आयुके अधीन है मेरी इच्छाके अधीन नहीं है। मेरी इच्छाके होने पर भी प्राण नही ठहरते। सर्व जगत चाहता है कि हमारे प्राण बने रहें। किन्तु वे नहीं रहते। आत्माके इन्द्रिय आदि प्राणोंके चले जानेको मरण कहते हैं। कहा भी है—मृङ् धातु प्राणत्यागके अर्थमे है। त्याग वियोगको कहते हैं। आत्मासे प्राणोंका पृथक् होना वियोग है। वह आयुकर्म सम्बन्धी पुद्गलोंके पूर्णरूपसे समाप्त होनेसे होता है। उपघातक बाण आदिके लगनेसे द्रव्येन्द्रियोंका विनाश होता है और उपयोगरूप भावेन्द्रियका विनाश ज्ञानावरणके उदयसे होता है। उसीके उदयसे लब्धिरूप भावेन्द्रियका विनाश होता है। वीर्यान्तराय कर्मके उदयसे मनोबल, वचनबल और कायबल रूप प्राणोंकी हानि होती है। मुख और नाकको बन्द करनेसे या जुखाम-से उनकी रुकावट होनेसे श्वासोच्छ्वास प्राणकी हानि होती है। लाभान्तरायके क्षयोपशमसे इष्ट वस्तुका लाभ होता है और उसके उदयसे लाभ नहीं होता। सुख प्रीतिको कहते हैं वह सातावेद-नीयके उदयसे इष्ट वस्तुकी प्राप्तिसे होता है। दुःख बाधारूप होता है उसमें असाता वेदनीयका

---

१. निवृत्तं ततो आ० मु०। २. विषयस्तादा—आ० मु०।

परिभ्रमतः उपकारापेक्षा हि ते । यदि त एव बान्धवाः कृतापकारा इति किमाख्याः ? अरयोऽपि कदाचिदुपकारित्वात् सुहृद इति किं न बन्धवः ? अपि च स्नेहस्य सर्वासंयममूलस्य हेतुतया सन्मार्गप्रतिबंधकारितया च ते एव महाशत्रवः । किं च पुण्योदयादेव संपद्यते सकलं सुखं सुखहेतुवस्तुसान्निध्यं च । निपुण्यस्य न ते किंचिदपि कर्तुं क्षमाः । न च कुर्वन्ति । तथा हि—मातरं त्यजति पुत्रः सा च सुतं । तथाऽसातवेद्योदये न कश्चित्किंचिदप्यपकारं करोति । बाह्या हि शत्रवो नाभ्यंतरकर्मणि असति पीडामुपजनयन्ति । इत्येवंभूता सर्वत्र समचित्तता सामण्णं । 'सत्तू वि' शत्रुरपि । 'कुणदि' करोति । 'णिच्चमवि' नित्यमपि सर्वदापि । 'जोगपरिकम्मं' योगशब्दोऽनेकार्थः । 'योगनिमित्तं ग्रहणं' इत्यात्मप्रदेशपरिस्पंदं त्रिविधवर्गणासहायमाचष्टे । क्वचित्संबंधमात्रवचनः 'अस्यानेन योग' इति । क्वचिद्ध्यानवचनः यथा 'योगस्थित' इति । इहायं परिगृहीतः । ततो ध्यानपरिकरं करोतीति यावत् । रागद्वेषमिथ्यात्वासंश्लिष्टं अर्थयाथात्म्यस्पर्शि प्रतिनिवृत्तविषयांतरसंचारं ज्ञानं ध्यानमित्युच्यते । अभावितसमानभावोऽनधिगतवस्तुयाथात्म्यश्च न ध्यातुं क्षम इति भावः । ''तो' ततः 'वसीकियचित्तकरणो' इत्यत्र करणशब्दः अंतःकरणे मनसि वर्तते । ततोऽयमर्थः स्ववशीकृतचित्तोऽहं मरणे भवपर्वविनाशवेलायां । 'झाणसमत्थो' ध्यानस्यैकाग्रचिन्तानिरोधस्य । ध्यानशब्दोऽत्र प्रशस्तध्यानविषये ग्राह्यो[1] नाऽशुभयोर्नरकतिर्यग्गतिनिर्वर्तनप्रवणयोः । योगे परिकर्मणि सदात्मनः प्रवृत्तत्वात् अयत्नसाध्यता धर्मशुक्लयोर्निर्वर्तने 'समत्थो' शक्तः ''भविस्संति' भविष्यामीति ॥

उदय हेतु है । बन्धु कोई नियत नहीं है । संसारमें भ्रमण करते हुए जीवका जो उपकार करते हैं वे बन्धु कहे जाते हैं । यदि वे ही कभी अपकार करते हैं तो शत्रु हो जाते हैं । शत्रु भी कभी-कभी उपकार करते हैं तो वे बन्धु क्यों नहीं है ? तथा स्नेह समस्त असंयमका मूल हेतु और सन्मार्गमें रुकावट डालने वाला है । अतः जिन्हें हम बन्धु मानते हैं वे ही महाशत्रु हैं । तथा पुण्यकर्मके उदयसे ही सर्व सुख और सुखकारक वस्तुओंकी प्राप्ति होती है । जो पुण्यहीन है उसको सुखके साधन भी कुछ नहीं कर सकते । माता पुत्रको त्याग देती है और पुत्र माताको त्याग देता है । तथा असाता वेदनीयके उदयके अभावमें कोई किंचित् भी अपकार नहीं कर सकता । अभ्यन्तर कर्मके अभावमें बाह्य शत्रु पीड़ा नहीं पहुँचाते । इस प्रकारसे सर्वत्र समचित्तताको सामण्ण कहते हैं । 'जोगपरिकम्म'में योग शब्दके अनेक अर्थ हैं । 'योगनिमित्तं ग्रहणं' यहाँ मनोवर्गणा, वचनवर्गणा और कायवर्गणाके निमित्तसे होने वाले आत्माके प्रदेशोंके हलनचलनको योग कहा है । कहीं योग शब्दका अर्थ सम्बन्धमात्र है । जैसे 'इसका इसके साथ योग है ।' कहीं योगका अर्थ ध्यान है । जैसे 'योगस्थित' में योगका अर्थ ध्यान है । यहाँ योगका अर्थ ध्यान लिया है । राग-द्वेष और मिथ्यात्व से अछूते, वस्तुके यथार्थ स्वरूपको ग्रहण करने वाले और अन्य विषयोंमें संचार न करने वाले ज्ञानको ध्यान कहते हैं । इसका अभिप्राय यह है कि जिसने समानताकी भावना नहीं भायी है और न वस्तुके यथार्थ स्वरूपको जाना है वह ध्यान नहीं कर सकता । 'जितकरणो' में करण शब्द अन्तःकरण मनके अर्थमें है । अतः यह अर्थ हुआ कि 'मरते समय मेरा चित्त मेरे वशमें है' । 'झाणसमत्थो' में ध्यान शब्दका अर्थ एक ही विषयमें चिन्ताका निरोध करना है । यहाँ ध्यानसे प्रशस्त ध्यान ग्रहण करना, नरक गति और तिर्यञ्चगतिमें ले जाने वाले अशुभ ध्यान नहीं लेना । योगके परिकर्ममें तो आत्मा सदा लगा रहता है अतः उसके लिये प्रयत्न नहीं करना पड़ता । यहाँ योगसे शुभध्यान लिया गया है । अतः उसका परिकर्म—अभ्यास करना होता है जिससे मरते समय में

---

१. ग्राह्यो शुभ–अ० आ० मु० ।

कृतपरिकरो राजपुत्रो लक्ष्यवेधादिकासु क्रियासु उपलब्धकौशलः क्रियां प्रहरणादिकां संपाद्य यथाफलं प्राप्नोति इति एतदुत्तरगाथयाचष्टे ओगाभावित इत्यनया—

ओगाभाविदकरणो सत्तू जेदूण जुद्धरंगम्मि ।
जह सो कुमारमल्लो रज्जपडायं बला हरदि ॥२२॥

जोगाभाविदकरणो परिकर्मणा अभ्यस्तकृतलक्ष्यवेधनताडनप्रहरणादिक्रियः । आभावित इत्यत्राङ् भृशार्थे प्रयुक्तः । तथा च प्रयोगः—आधूमितं भृशं धूमेन परिपूर्णमित्यर्थः । 'सत्तू' शत्रून् । 'जेदूण' जित्वा । 'जुद्धरंगम्मि' युद्धार्थं संस्कृतो देशो युद्धरंगमित्युच्यते तत्र । 'जह' यथा । 'सो' सः भावितात्मा । 'कुमारमल्लो' प्राणिनां कालकृतोऽवस्थाविशेषो द्वितीयः कुमारत्वं नाम । तद्योगाद्राजपुत्रः कुमारः स एव मल्लः । 'रज्जपडायं' राज्यध्वजं । 'बला' बलात्कारेण । 'हरदि' हरति गृह्णाति ॥२२॥

दार्ष्टान्तिके योजयितुं उत्तरगाथा—

तह भाविदसामण्णो मिच्छत्तादी रिवू विजेदूण ।
आराहणापडायं हरइ सुसंथाररंगम्हि ॥२३॥

'तह भाविदसामण्णो' इति । 'तह' तथैव राजपुत्रवदेव । 'भाविदसामण्णो' भावितसमानभावः । पुण्यमिति शेषः । 'मिच्छत्तादी' मिथ्यात्वासंयमकषायाशुभयोगाः इत्येतान् । 'रिवू' रिपून् । 'विजेदूण' भृशं जित्वा । विशब्दो भृशार्थे प्रयुक्तः । यथा विवृद्धो मल्लः भृशं वृद्ध इति यावत् । अथवा 'विजेदूण' नानाप्रकारं जित्वा यथा विचित्रमिति नानाचित्रमिति यावत् । एकान्तमिथ्यात्वं, संशयमिथ्यात्वं, विपर्ययमिथ्यात्वं

धर्म और शुक्ल ध्यान करनेमे समर्थ हो सकूं ॥२१॥

'जैसे अभ्यास किया हुआ राजपुत्र लक्ष्यको वेधने आदिकी क्रियामें कुशलता प्राप्त करके शस्त्रप्रहार आदिके द्वारा राज्य लाभ करता है' यह आगेकी गाथासे कहते हैं—

गा०—जैसे अभ्यासके द्वारा बार-बार लक्ष्यवेध शस्त्रप्रहार आदि क्रियामें दक्ष वह योद्धा राजपुत्र युद्धभूमिमें शत्रुको जीतकर राज्यके ध्वजको बलपूर्वक हरता है ॥२२॥

टी०—'जोगाभाविदकरणो' में आभावित शब्दमें जो 'आ' है उसका अर्थ बार-बार या बहुत अधिक है। जैसे 'आधूमितं' का अर्थ धुएँसे अच्छी तरह भरा हुआ है। जो स्थान युद्धके लिए तैयार किया गया हो उसे युद्धरंग कहते हैं। प्राणियोंकी कालकृत जो दूसरी अवस्था विशेष होती है उसे कुमार अवस्था कहते हैं। उस अवस्थाके सम्बन्धसे यहाँ राजपुत्रको कुमार कहा है। अर्थात् जैसे युद्धमें दक्ष राजपुत्र शत्रुको जीतकर बलपूर्वक उसकी राज्यपताका हर लेता है वैसे ही आगे इस दृष्टान्तको दार्ष्टान्तिकमें लगानेके लिए उत्तरगाथा कहते हैं—

गा०—उस राजपुत्रकी ही तरह पूर्वमें समानभावका अभ्यासी साधु मिथ्यात्व आदि शत्रुओंको पूरी तरहसे जीतकर शोभनीय संस्तररूपी रंगभूमिमें आराधनारूपी पताकाको ग्रहण करता है ॥२३॥

टी०—मिथ्यात्व आदिमें आदि शब्दसे मिथ्यात्व असंयम, कषाय और अशुभयोग लेना। 'विजेदूण' में 'वि' शब्दका अर्थ बहुत या पूरी तरह है। जैसे 'विवृद्धो मल्लः' का अर्थ बहुत अधिक बढ़ा हुआ योद्धा है। अथवा 'विजेदूण' का अर्थ 'नानाप्रकारसे जीतकर' होता है। जैसे विचित्रका अर्थ नानाचित्र होता है।

इत्यनेकधा मिथ्यात्वपरिणामाः स्थिताः । तत्रैकान्तमिथ्यात्वं नाम वस्तुनो जीवादेर्नित्यत्वमेव स्वभावो न चानित्यत्वादिकम् । असदुत्पत्त्या सतो निरोधे वा अनित्यता भवति । न चासत उत्पत्तिर्यदि स्याद्गगनकुसुमादिकं किन्नोपजायते ? असत्त्वाविशेषे खकुसुमादेर्घटादेश्च घटादिकं उपजायते न वियत्कुसुमादिकं इत्यत्र न नियामकं हेतुं पश्यामः । न च सद्विनश्यति, विनाशो ह्यसत्त्वं, भावाभावौ हि परस्परपरिहारस्थिति लक्षणौ नैकतां यात । न भावोऽभावो भवति, इत्यमसत्त्वे उत्पादनिरोधयोरभावान्नित्यतैवावतिष्ठते इति इदमेकं मिथ्यात्वं । एतस्य जय उच्यते—न नित्यतैव वस्तुनो रूपं, अनित्यताया अपि प्रमाणसमधिगम्यत्वात् । रागद्वेष-मिथ्यात्वसंशयविपर्ययादीनां आत्मनि सतां पश्चादनुभवप्रतिष्ठापितमसत्वमनुभवोपनीतं[1] चासत्वं प्रागनुभूतानामित्यनित्यता । पुद्गलद्रव्यस्यापि मेघादेर्वर्णान्यथाभावः आम्रफलादीनां रूपरसगंधादन्यथाभावश्च प्रत्यक्षग्राह्योऽशक्यापन्हवः । तथानुमानग्राह्यश्च—यत्सत्तत्सर्वं नित्यानित्यात्मकं यथा घटस्तथा च जीवादिकं सदिति कारणानां प्रतिनियतजननस्वभावकार्यत्वात् । घटादेर्जनकानि सन्ति इत्युत्पत्तिः न खरविषाणादेः । न च भावाभावयोर्विरोधः एकस्मिन्वस्तुन्येकदा प्रवृत्तेः रूपरसादीनामिव । अपररूपेणासत्त्वं सति विद्यते न वा । यद्यस्ति न विरोधः, न चेत्सर्वात्मकता । न ह्यभावो नाम भावादन्यः । अपि तु भावस्यैव रूपान्तरम् । ततोऽयुक्तो

एकान्तमिथ्यात्व, संशयमिथ्यात्व, विपर्ययमिथ्यात्व, इत्यादि मिथ्यात्वपरिणाम अनेक प्रकार हैं। जीवादिवस्तुका स्वभाव नित्यता ही है, अनित्यता नहीं है इसे एकान्तमिथ्यात्व कहते हैं। असत्‌की उत्पत्ति नहीं होती। यदि होती है तो आकाशका फूल क्यों नहीं उत्पन्न होता ? जब आकाशका फूल और घट दोनों ही असत् हैं तो घटादि तो पैदा होते हैं और आकाशका फूल पैदा नहीं होता, इसमें कोई नियामक हेतु हम नहीं देखते। तथा सत्‌का विनाश नही होता। विनाश कहते है असत्त्वको। किन्तु भाव और अभाव दोनों भिन्न है, दोनोंके लक्षण भिन्न हैं। वे कभी एक नहीं हो सकते। भाव-अभाव नहीं होता। इस प्रकार असत्वमें उत्पाद और विनाशका अभाव होनेसे नित्यता ही ठहरती है। यह एक मिथ्यात्व है। अब इसको जीतनेका कथन करते हैं।

वस्तुका रूप केवल नित्यता ही नहीं है, अनित्यताका भी प्रमाणसे बोध होता है। राग, द्वेष, मिथ्यात्व, संशय, विपर्यय आदि आत्मामें पहले सत् प्रतीत होते हैं। पीछे अनुभवके द्वारा उनका असत्त्व प्रतिष्ठापित होता है। तथा पहले उनका आत्मामें अनुभव होता है और पीछे अनुभवसे ही उनका असत्त्व ज्ञात होता है। इसलिए ये अनित्य है। पुद्गलद्रव्य मेघ आदिका रूप भी बदलता देखा जाता है। आम्रफल आदिमें रूप, रस, गन्ध आदिका बदलना प्रत्यक्ष देखा जाता है। उसका लोप करना अशक्य है। तथा अनुमान प्रमाणसे भी उसका ग्रहण होता है, जो इस प्रकार है—जो सत् है वह सब नित्यानित्यात्मक है, जैसे घट। उसी तरह जीवादि भी सत् होनेसे नित्यानित्यात्मक है। कारणोंका स्वभाव प्रतिनियत कार्योंको ही उत्पन्न करना है। घटादिके उत्पन्न करनेवाले कारण हैं इसलिए उनकी उत्पत्ति होती है। गधेके सींग जैसे असम्भव कार्योंको उत्पन्न करनेवाले कारण नहीं हैं इसलिए उनकी उत्पत्ति नहीं होती। तथा भाव और अभावमें कोई विरोध नहीं है, रूप रस आदिकी तरह एक वस्तुमें दोनो एककालमें रहते हैं। जो वस्तु सत् है वह अपनेसे भिन्न वस्तुकी अपेक्षा असत् है या नहीं ? यदि है तो भाव अभावमें विरोध नहीं रहा। और यदि कहोगे कि नहीं है तो वह वस्तु सर्वात्मक हो जायेगी; क्योंकि उसमें किसी

---

१. तं सत्वं प्रागननुभू—आ० मु०।

नित्यत्वैकान्तवादः इति। एवंभूतया तत्त्वश्रद्धया पराभूयते नित्यमेवेति मिथ्यात्वम्। (तथा क्षणिकमेव सर्वं कथं कार्यकारि, यद्वस्तु सर्वथा सामर्थ्यविरहोऽभावलक्षणं) कार्यकारिता च न नित्यस्य। कथं तर्हि नित्यं स्वसं पाद्यं क्रमेण वा कुर्याद्युगपदेव वा? न तावत्क्रमेण कार्यात्मलाभस्य कारणस्वभावसान्निध्यमात्रपराधीनत्वात्। सर्वं कार्यमाप्तुमुत्पित्सूनां सामर्थ्यानां सदा सान्निध्यत्वात् कुतः कार्याणां क्रमः। समर्थहेतुभावेऽप्यभावे न तत्तस्य कार्यं स्यात्। यथा सन्निहितेऽपि यवबीजेऽनुपजायमानस्य शाल्यंकुरस्य न यवबीजकार्यता। युगपत्करोति चेत् द्वितीयादौ क्षणेऽकिंचित्करता स्यान्न च तथा दृश्यते। इत्थं नित्यवस्तुलक्षणस्य कार्यकारित्वस्याभावात्, अनित्ये सद्भावात् क्षणिकमेवेत्यध्यवसायो मिथ्यात्वमेव। तस्य जय उच्यते—सत्यं सर्वथा नित्ये वस्तुन्यभावे नास्त्युक्तया नीत्या नित्यानित्यात्मके तु संभविनी कार्यकारिता। एकान्तेन क्षणिकतैव वस्तुनो यदि रूपं कार्यकारिता नास्ति। एकस्य वस्तुन एकमेव रूपं नापरमिति प्रतिज्ञानात्। एवमन्यत्रापि योज्य[1] एकान्तमिथ्यात्वजयः। संशयमिथ्यात्वं वस्तुस्वरूपानवधारणात्मकं तस्य जयः कथंचिन्नित्यानित्यात्मकाः सर्वे भावा इति भावनया। विपर्ययमिथ्यात्वं हिंसाया दुर्गतिवर्तिन्याः स्वर्गादिहेतुताध्यवसितिज्ञानम्, अहिंसायाश्च प्रत्यपायहेतु-

---

वस्तुका अभाव नहीं है। अभाव भावसे भिन्न नहीं है। किन्तु भावका ही रूपान्तर अभाव है। अतः एकान्तनित्यवाद अयुक्त है। इस प्रकारकी तत्त्वश्रद्धासे 'नित्य ही है' यह मिथ्यात्व छूट जाता है।

तथा सब क्षणिक भी कैसे कार्यकारी है? वस्तुमें सब सामर्थ्यका अभाव तो अभावका लक्षण है इसपर बौद्ध कहता है—

नित्यपदार्थ कार्यकारी नहीं है। वह नित्यपदार्थ अपना कार्य क्रमसे करता है अथवा एकसाथ करता है? क्रमसे तो कार्य कर नहीं सकता क्योंकि कार्यकी उत्पत्ति कारण स्वभावमात्रके अधीन है। जब नित्यपदार्थमें सब कार्योको उत्पन्न करनेकी शक्तियाँ सदा वर्तमान हैं तब कार्य क्रमसे कैसे हो सकते हैं? समर्थकारणके रहते हुए भी यदि कार्य नहीं होता तो उसे उस कारणका कार्य नहीं माना जा सकता। जैसे जौ बीजके रहते हुए भी उससे धानका अंकुर नहीं उगता। अतः धानका अंकुर जौबीजका कार्य नहीं होता। यदि कहोगे कि नित्य एकसाथ सब कार्योंको उत्पन्न करता है तो दूसरे आदि क्षणोंमें वह नित्यपदार्थ अकिंचित्कर हो जायेगा; क्योंकि सब कार्य पहले क्षणमें ही उत्पन्न हो जानेसे दूसरे क्षणमें उसे करनेके लिए कोई कार्य शेष नहीं रहेगा। किन्तु ऐसा नहीं देखा जाता। इस प्रकार नित्यवस्तुमें वस्तुका लक्षण कार्यकारीपना नहीं बनता। अतः अनित्यमें कार्यकारीपना होनेसे सब क्षणिक ही हैं। जैन कहते हैं—इस प्रकार निश्चय करना भी मिथ्यात्व ही है। अब उस मिथ्यात्वको जीतनेका उपाय कहते हैं—

यह सत्य है कि उक्तनीतिके अनुसार सर्वथा नित्यवस्तुमें कार्यकारिता नहीं है किन्तु नित्यानित्यात्मकवस्तुमें कार्यकारिता है। यदि वस्तुका स्वरूप सर्वथा क्षणिकता है तो उसमें कार्यकारीपना नहीं है। क्योंकि आपने एकवस्तुका एक ही रूप माना है दूसरा नहीं माना। इसी प्रकार अन्यत्र भी एकान्तमिथ्यात्वको जीतनेकी योजना करनी चाहिए।

वस्तुके स्वरूपका कुछ भी निश्चय न करना संशयमिथ्यात्व है। सब पदार्थ कथंचित् नित्यानित्यात्मक हैं इस भावनासे उसको जीतना चाहिए। दुर्गतिमें ले जानेवाली हिंसाको

---

१. योज्यः आ० मु०।

तेति एतस्य जयः । परोक्षस्योपायोपेयभावस्य अप्रत्यक्षत्वात् । अनुमानस्य च प्रत्यक्षपृष्ठभाविनस्तत्राप्रवृत्तेः । आगमः सर्वज्ञेन निरस्तरागद्वेषेण प्रणीतः उपेयोपायतत्त्वस्य ज्ञापक आश्रयणीयः । कपिलादीनामसर्वज्ञतया न तत्प्रणीत आगमोऽदृष्टप्रतिपत्तावुपायः । तदसर्वज्ञता दृष्टेष्टप्रमाणविरुद्धवचनतया रथ्यापुरुषवत् । नित्यस्तु न शब्दो विद्यते । यदि स्यात्सर्वस्य नित्यतया पुरुषदोषानुपश्लिष्टतास्तीति प्रामाण्यं भवेत् ततो जिनागमेन हिंसाया दुःखहेतुत्वप्रतीतेर्विपर्ययमिथ्यात्वप्रसिद्धिः तस्य जय अविपरीतज्ञानेन । 'आराधणापडायं' आराधनापताकां । 'हरदि' गृह्णाति । 'सुसंथाररंगम्मि' शोभनासंस्तररंगे उद्गमादिदोषानुपहतता शोभनता ॥

चिरमभावितरत्नत्रयाणामन्तर्मुहूर्तकालभावनाना सिद्धिरिष्यते तत्किं चिरभावनयेत्यस्योत्तरमाचष्टे—

पुव्वमभाविदजोग्गो आराधेज्ज मरणे जदि वि कोई ।
खण्णुगदिट्ठंतो सो तं खु पमाणं ण सव्वत्थ ॥२४॥

'पुव्वं' पूर्वं मरणकालात् । 'अभावितजोग्गो' अभावितपरिकरः । 'आराधेज्ज' आराधयेत् । किं मरणं रत्नत्रयानुगतभवपर्यायप्रलयं । 'जदि वि' यद्यपि । 'कोई' कश्चित् । 'खण्णुगदिट्ठंतो' स्थाणुदृष्टान्तः । 'सो' सः । 'तं खु' तदेव । अकृतपरिकरस्य कस्यचिद्रत्नत्रयसमापन्नं । 'सव्वत्थ' सर्वत्र । 'ण पमाणं न पमाणं । अथाख्यानमत्र वाच्यम् ॥२४॥

एवं पीठिका समाप्ता ॥

स्वर्गादिका हेतु मानना और अहिंसाको दुर्गतिका कारण मानना विपर्ययमिथ्यात्व है । इसकी जयका उपाय कहते हैं—

उपायपना और उपेयपना परोक्ष है, प्रत्यक्ष नहीं है । प्रत्यक्षके पीछे होनेवाला अनुमान भी उन्हें नहीं जान सकता । रागद्वेषसे रहित सर्वज्ञके द्वारा कहा गया आगम ही उपाय और उपेयभावको बतलाता है उसीका आश्रय लेना चाहिए । कपिल आदि सर्वज्ञ नहीं थे । अतः उनके द्वारा कहा गया आगम अदृष्टको जाननेका उपाय नहीं है । कपिलादिके वचन सड़कपर घूमते आदमीकी तरह प्रत्यक्ष और अनुमान प्रमाणसे विरुद्ध है अतः वे सर्वज्ञ नहीं हैं । तथा यह कहना कि वेद नित्य है ठीक नहीं है क्योंकि शब्द नित्य नहीं होता । यदि शब्द नित्य हो तो सभी शब्दोंके नित्य होनेसे पुरुषोंके दोष उसमें नहीं प्रवेश कर सकते अतः सभी शब्द प्रमाण मानने होंगे । अतः जिनागमसे प्रसिद्ध है कि हिंसा दुःखका कारण है अतः उसे सुखका कारण मानना विपर्यय-मिथ्यात्व है । अविपरीत सच्चे ज्ञानसे उसको जीता जाता है ॥२३॥

यहाँ कोई शङ्का करता है कि जिन्होंने चिरकाल तक रत्नत्रयकी भावना नहीं भायी है, केवल अन्तर्मुहूर्तकालतक ही रत्नत्रयकी आराधना की है, उनकी भी मुक्ति मानी जाती है तब आप चिरकाल भावनाकी बात कैसे करते हैं, इसका उत्तर देते है—

गा०—मरण समयसे पहले ध्यानके परिकरका अभ्यास न करनेवाला यद्यपि कोई मरते समय आराधना करे तो वह स्थाणुदृष्टान्मात्र है । सर्वत्र (पमाणं ण) प्रमाण नहीं है ॥२४॥

टी०—जैसे यदि किसीको किसी ठूँठमेंसे अचानक धनका लाभ हो जाये तो उसे सर्वत्र प्रमाण नहीं माना जाता । उसी तरह यदि किसीने मरनेसे पूर्व रत्नत्रयका अभ्यास नहीं किया और कदाचित् मरते समय किया और उसे सिद्धि प्राप्त हो गई तो उसे सर्वत्र प्रमाणके रूपमें स्वीकार नहीं किया जा सकता ॥२४॥

इस प्रकार पीठिका समाप्त हुई ॥

मरणाणि सत्तरस देसिदाणि तित्थंकरेहिं जिणवयणे ॥
तत्थ वि य पंच इह संगहेण मरणाणि वोच्छामि ॥२५॥

मरणान्यनेकप्रकाराणि इति शास्त्रान्तरे निर्दिष्टानि। तेष्विह निरूप्याणीमानीति निरूपयितुं इदमुत्तरं सूत्रं मरणाणीति। मरणं विगमो विनाशः विपरिणाम इत्येकोऽर्थः। तच्च मरणं जीवितपूर्वम्। जीवितं स्थिति-रविनाशोऽवस्थितिरिति यावत्। स्थितिपूर्वको विनाशः। यदस्थितिकं तन्न विनश्यति यथा बन्ध्यासुतः। तथा च स्थितिरहितं वस्तु क्षणिकवादिनिरूप्यं जीवितं जन्मपुरोगं अनुत्पन्नस्य स्थित्यभावात्। तत उत्पत्तिविगमो ध्रौव्यं च सर्वेषां रूपाणि। अस्या च प्रक्रियायां मरणं नामोत्पन्नपर्यायविनाश.। देवत्वं, तिर्यक्त्वं, नारकत्वं, मनुष्यत्वं, इत्यमीषां पर्यायाणां प्रध्वंस इह मरणशब्दवाच्यः। अथवा प्राणपरित्यागो मरणं। तथा चाभ्यधायि-मृङ् प्राणत्यागे इति। एवमेव प्राणग्रहणं जन्म, प्राणानां धारणं जीवितं। प्राणा द्विविधा द्रव्यप्राणा भाव-प्राणाश्च। तत्र द्रव्यप्राणा इन्द्रियाणि, बलं, उच्छ्वास, आयुरित्येतानि पुद्गलद्रव्याणि। भावप्राणा ज्ञानदर्शन-चारित्राणि। एतत्प्राणापेक्षया सिद्धानां जीवितं। तत्रायुर्द्विभेदं अद्धायुर्भवायुरिति च। भवधारणं भवायुर्भवः शरीरं तच्च ध्रियते आत्मना[1] आयुष्कोदयेन। ततो भवधारणमायुष्काख्यं कर्म तदेव भवायुरित्युच्यते। तथा चोक्तम्—

> देहो भवोत्ति वुच्चदि धारिज्जइ आउगेण य भवो सो।
> तो वुच्चदि भवधारणमाउगकम्मं भवाउत्ति ॥ [ ]

गा०—जिनागममें तीर्थङ्करोंने मरण सत्तरह कहे हैं। उन सत्तरह प्रकारके मरणोंमेंसे भी यहाँ (संगहेण) संक्षेपसे पाँच मरणोंको कहूँगा ॥२५॥

टी०—मरण अनेक प्रकारके हैं ऐसा अन्य शास्त्रोंमें कहा है। उनमेंसे यहाँ इन मरणोंको कहना है यह बतलानेके लिए यह गाथासूत्र आया है। मरण, विगम, विनाश, विपरिणाम इन सब शब्दोंका अर्थ एक है। वह मरण जीवनपूर्वक होता है। जीवन, स्थिति, अविनाश, अवस्थिति ये सब एकार्थक हैं। स्थितिपूर्वक विनाश होता है। जिसकी स्थिति नहीं है उसका विनाश नहीं है जैसे बाँझका पुत्र नहीं होता तो उसका विनाश भी नहीं होता। क्षणिकवादी बौद्धोंने जिस वस्तुको कहा है उसकी स्थिति नहीं है अर्थात् वह वस्तु ही नहीं है। जीवन जन्मपूर्वक होता है। जो उत्पन्न नहीं हुआ उसकी स्थिति नहीं है। इसलिए प्रत्येक वस्तु उत्पत्ति, विनाश और ध्रौव्यरूपको लिए हुए है। इस प्रक्रियाके अनुसार उत्पन्न हुई पर्यायके विनाशका नाम मरण है। देवपना, तिर्यञ्चपना, नारकपना और मनुष्यपना इन पर्यायोंका विनाश यहाँ मरणशब्दसे लिया है। अथवा प्राण छोडनेका नाम मरण है। कहा भी है—'मृङ्धातु' प्राणत्यागके अर्थमें है। इसी तरह प्राणग्रहणको जन्म कहते हैं। प्राणोंको धारण करना जीवन है। प्राणोंके दो भेद हैं—द्रव्य-प्राण और भावप्राण। इन्द्रिय पाँच, तीन बल, उच्छ्वास और आयु ये पुद्गलद्रव्य द्रव्यप्राण हैं। ज्ञान, दर्शन, चारित्र ये भावप्राण हैं। इन भावप्राणोंकी अपेक्षा सिद्धोंमें जीवन होता है। उन प्राणोंमें आयुप्राणके दो भेद हैं—अद्धायु और भवायु। भवधारणको भवायु कहते हैं। भव शरीरको कहते हैं। आयुकर्मके उदयसे आत्मा भवधारण करता है। अतः आयुकर्म भवधारणरूप है उसे ही भवायु कहते हैं। कहा भी है—शरीरको भव कहते हैं। वह भव आयुकर्मके द्वारा धारण किया

१. आत्मनः आ० मु०।

इति आयुर्वशेनैव जीवो जायते जीवति च आयुष एवोदयेन । अन्यस्यायुष उदये म्रति मृतिमुपैति पूर्वस्य चायुष्कस्य विनाशे ।

तथा चोक्तम्—

आउगवसेण जीवो जायदि जीवदि य आउगस्सुदये ।
अण्णाउगोदये वा मरदि य पुव्वाउणासे वा ॥' इति ॥ [ ]

अद्धाशब्देन काल उच्यते, आउगशब्देन द्रव्यस्य स्थितिः । तेन द्रव्याणां स्थितिकालः अद्धायुरित्युच्यते । [1]द्रव्यार्थापेक्षया द्रव्याणामनाद्यनिधनं भवत्यद्धायुः । पर्यायार्थापेक्षया चतुर्विधं भवत्यनाद्यनिधनं, साद्यनिधनं सनिधनमनादि, सादिसनिधनमिति । चैतन्यरूपादिमत्त्वगतिस्थितिहेतुत्वादिसामान्यापेक्षया अनाद्यनिधना स्थितिः । केवलज्ञानादिकाना साद्यनिधनता । भव्यत्वस्य अनादिसनिधनता । सादिसनिधनता कोपादीनाम् । अथवा द्रव्यक्षेत्रकालभावानाश्रित्य चतुर्विधा भवति स्थितिः । एतस्याद्धायुषो वशेन भवधारणायुषो निरूपणा भवति । आयुःसंज्ञितानां कर्मणां पुद्गलद्रव्यतया आयु-स्थितेर्न द्रव्यस्थितेरत्यन्तान्यथात्वं । अथवा अनुभूयमानायुःसंज्ञकपुद्गलगलनं मरणं । तानि मरणानि 'सत्तरस' 'सप्तदश' । 'देसिदाणि' 'कथितानि' । 'तित्थंकरेहिं' तीर्थकरैः । 'जिणवयणे' जिनानां वचने । ननु तीर्थंकरैरुक्तानि इत्यनेनैव गतं किं जिनवचनग्रहणेन ? नैष दोषः जिनशब्देन गणधरा

जाता है । इसलिए भवधारणमें कारण आयुकर्मको भवायु कहते हैं ।

इस प्रकार आयुके वशसे ही जीव जन्म लेता है और आयुके उदयसे ही जीवित रहता है । पूर्व आयुका विनाश और आगेकी अन्य आयुका उदय होनेपर मरण होता है ।

कहा है—आयुके वशसे जीव जन्म लेता है । आयुके उदयमें जीवित रहता है । अन्य आयुका उदय होनेपर अथवा पूर्वआयुका नाश होनेपर मरता है ।

अद्धाशब्दसे काल कहा जाता है और आयुशब्दसे द्रव्यकी स्थिति । अतः द्रव्योंके स्थितिकालको अद्धायु कहते हैं । द्रव्यार्थिकनयकी अपेक्षा द्रव्योंकी अद्धायु अनादिनिधन है । और पर्यायार्थिककी अपेक्षा चार प्रकार की है—अनादिअनिधन, सादिअनिधन, अनादिसान्त और सादिसान्त । चैतन्य, रूपादिमत्ता, गतिहेतुता, स्थितिहेतुता आदि सामान्यकी अपेक्षा द्रव्योंकी स्थिति अनादि अनिधन है अर्थात् जीवादिद्रव्योंका अपना-अपना स्वभाव सदासे है और सदा रहेगा अतः वे सब इस दृष्टिसे अनादिअनन्त हैं । केवलज्ञान आदिकी अद्धायु सादिअनिधन है क्योंकि वह प्रकट होकर नष्ट नहीं होता । भव्यत्वकी अद्धायु अनादिसनिधन (सान्त) है क्योंकि भव्यत्व भाव यद्यपि अनादि होता है किन्तु मुक्त होनेपर नष्ट हो जाता है । कोप आदि सादि सनिधन हैं ।

अथवा द्रव्य, क्षेत्र, काल और भावके आश्रयसे स्थिति चार प्रकारकी होती है । इस अद्धायुके द्वारा भवधारणरूप आयुका कथन होता है । जिन कर्मोंकी आयुसंज्ञा होती है वे कर्मपुद्गलद्रव्यरूप होनेसे आयुस्थिति द्रव्यस्थितिसे अत्यन्त भिन्न नहीं है । अथवा जो आयु संज्ञावाले पुद्गल उदयमें आ रहे हैं उनके गल जानेको मरण कहते हैं । वे मरण जिनवचनमें तीर्थङ्करोंने सतरह कहे हैं ।

शङ्का—तीर्थङ्करोंने कहे हैं इतना ही कहना पर्याप्त है, जिनवचनके कहनेकी क्या आवश्यकता है ?

१. इत्यर्था–आ० मु० ।

उच्यन्ते । अन्तरेण चशब्दं समुच्चयार्थगतिः । तत्रायं संबन्धः–जिनवचने च किं ? सप्तदशमरणानि । एतेन तीर्थकृतो गणधराश्च मरणविकल्पानुपपादितवन्तः । तदुभयवचनसिद्धं प्रमाणमविशङ्कनीयमित्येतदाचष्टे १ आवीचिमरणं २. तद्भवमरणं ३. अवधिमरणं ४. आदिअंतायं ५ बालमरणं ६. पंडितमरणं ७. आसण्णमरणं ८. बालपंडियं ९. ससल्लमरणं १०. बलायमरणं ११. वसट्टमरणं १२. विप्पाणसमरणं १३. गिद्धपुट्ठमरणं १४. भत्तपच्चक्खाणं १५. पाउवगमणमरणं १६. इंगिणीमरणं १७. केवलिमरणं चेति । एतेषां स्वरूपता यथागमं संक्षेपतो निरूप्यते ॥

वीचिशब्दस्तरंगाभिधायी इह तु वीचिरिव वीचिरिति आयुष उदये वर्तते । यथा समुद्रादौ वीचयो नैरन्तर्येणोद्गच्छन्ति एवं क्रमेण आयुष्काख्यं कर्म अनुसमयमुदेति इति तदुदय आवीचिशब्देन भण्यते । आयुषः अनुभवनं जीवितं, तच्च प्रतिसमयं जीवितभंगस्य मरणं । अतो मरणमपि अत्र आवीचि, उदयादनन्तरसमये मरणमपि वर्तते इति । तत्पुनरावीचिकामरणं अनादिसनिधनं भव्यानाम् । ननु च सिद्धानामेव मरणं विच्छित्तिमुपयान्ति नेतरेषां ते च न भव्याः । भविष्यत्सिद्धत्वपर्याया हि भव्याः । सिद्धास्त्वधिगतसिद्धत्वपर्यायास्ततः किमुच्यते भव्यानामनादिसनिधनमिति । 'भविदाणमणादियं मरणं आवीचियं सणिधणं च' इति यदेवाधिगतभव्यत्वपर्यायं द्रव्यं तदेवेदमिति कृत्वा भव्यानामित्युक्तं इति नियतम् । अभव्यानां पुनरुदयं प्रति सामान्या-

---

समाधान—इसमें कोई दोष नहीं है । यहाँ जिनशब्दसे गणधर कहे गये हैं । 'च' शब्दके विना भी समुच्चयरूप अर्थका ज्ञान होता है । अतः ऐसा सम्बन्ध लेना और जिनवचनमें सतरह मरण कहे हैं । इससे यह बोध होता है कि तीर्थङ्करों और गणधरोंने मरणके भेद कहे हैं । अतः उन दोनोंके वचनोंसे सिद्ध होनेसे प्रमाण है उसमें किसी प्रकार शङ्का नहीं करना चाहिए । वे हैं—१. आवीचिमरण, २. तद्भवमरण, ३. अवधिमरण, ४. आदि अन्तमरण, ५. बालमरण, ६. पंडितमरण, ७. आसण्णमरण, ८. बालपंडितमरण, ९. ससल्लमरण, १०. बलायमरण, ११. वसट्टमरण, १२. विप्पाणसमरण, १३ गिद्धपुट्ठमरण, १४. भक्तप्रत्याख्यानमरण, १५. प्रायोपगमन मरण, १६ इंगिणीमरण और १७. केवलीमरण । उनका स्वरूप आगमके अनुसार संक्षेपसे कहते हैं—वीचीशब्द तरंगको कहता है । किन्तु यहाँ 'वीचिके समान ऐसा अर्थ करनेसे वीचीका अर्थ आयुका उदय है । जैसे समुद्र वगैरहमें तरंगे निरन्तर उठा करती हैं उसी प्रकार क्रमसे आयुनामक कर्म प्रतिसमय उदयमें आता है इसलिए उसके उदयको आवीचि शब्दसे कहा है । आयुके अनुभवनको जीवन कहते हैं । वह प्रतिसमय होता है । उसका भंग मरण है । अतः जीवनकी तरह मरण भी आवीची है क्योंकि आयुका उदय प्रतिसमय होता है अतः प्रत्येक अनन्तर समयमें मरण भी होता है । उसी प्रति समय होनेवाले मरणको आवीचिमरण कहते हैं । वह भव्यजीवोंके अनादिसान्त है ।

शङ्का—सिद्धोंके ही मरणका अन्त होता है, दूसरोंके नहीं । किन्तु सिद्ध भव्य नहीं हैं । जिनकी भविष्यमें सिद्धपर्याय होनेवाली हैं उन्हें भव्य कहते हैं । सिद्ध तो सिद्धपर्याय प्राप्तकर चुके हैं । तब कैसे कहते हैं कि भव्यजीवोंका मरण अनादिसान्त है ?

समाधान—ऐसा कहा है कि भव्योंका आवीचिमरण अनादि और सान्त है । अतः जो द्रव्य भव्यत्वपर्यायको प्राप्त था वही यह है ऐसा मानकर भव्योंके अनादिसान्त मरण कहा है ऐसा निश्चित है । अभव्यजीवोंके सामान्य अपेक्षासे आयुका उदय बराबर रहता है अतः उनका आवीचिमरण अनादिनिधन है । किन्तु भवकी अपेक्षा और क्षेत्रादिकी अपेक्षा सादि है । चार

पेक्षयाऽवीचिकमनादिनिधनं । भवापेक्षया क्षेत्राद्यपेक्षया च सादिकं । चतुर्णामायुष्काणां मध्ये द्वयोर्यद्यपि सत्कर्मता तथापि एकस्यैवायुष उदयः । द्वयोः प्रकृत्योः सत्कर्मता सह भवति । उच्यते—तिर्यङ्मनुष्यायुष्कयोः सर्वैरायुष्कैः सह सत्कर्मता देवनारकायुष्कयोस्तिर्यङ्मानवायुष्काभ्यां सत्कर्मता । भवतु नामैषां सत्कर्मव्यवस्था । द्वयोरायुष्कप्रकृत्योः किं न युगपदुदयः ? अत्रोच्यते—अनुभूयमानप्रकृतिस्थितीनामुपरि इतरस्यायुषो निषेको यतस्ततो न युगपदायुषःप्रकृत्योरुदयः । किं च यस्मादेकस्य जीवस्य द्वयोर्भवयोर्गत्योर्वा न संभवः । भवं गतिं च प्रयोज्य अपेक्ष्य आयुष उदयो नान्यथा ततो नायुष्कद्वयोरुदयः । एवमेकस्यायुष्कर्मणः एकैव प्रकृतिरुदेत्येकस्यात्मनस्तस्मादेकैकायुष्कप्रकृतिगलनरूपामेव मृतिमुपैति । तदेतत्प्रकृतिमरणं कालभेदेन एकस्यापि चतुर्विधं भवति तदावीचिकमेव । एवं प्रकृत्यावीचिमरणं व्याख्यातम् । द्वितीयं स्थित्यावीचिकमरणं ।

भवधारणकारणत्वपरिणतानां पुद्गलानां स्नेहादात्मप्रदेशेष्ववस्थितिरित्युच्यते । आत्मनः कषायपरिणामः सहकारी पुद्गलानां स्निग्धतायाः परिणामिकारणं तु तदेव पुद्गलद्रव्यं । सा चैषा स्थितिरेकादिकैकोत्तरा देशोनत्रयस्त्रिंशत्सागरोपमाणां यावन्तः समयास्तावद्भेदा उत्कर्षस्थितिः । अंतर्मुहूर्तभवा परा । तस्या वीचय इव क्रमेणावस्थितायाः विनाशादात्मनो भवति स्थित्यावीचिकमरणं ।

आयुकर्मोंमेसे यद्यपि एकजीवके दो ही आयुकर्मोंकी सत्ता रहती है (एक जिसे भोगता है और दूसरी जिसे परभवके लिए बाँधा है)। तथापि उदय एक ही आयुका होता है। दो प्रकृतियाँ सत्तामें एकसाथ रह सकती है। वही कहते हैं—तिर्यञ्चायु और मनुष्यायु सब आयुओंके साथ सत्तामें रहती है अर्थात् देवायु और नरकायु दूसरी देवायु और नरकायुके साथ सत्तामें नहीं रहती; क्योंकि देव मरकर देव या नारकी नहीं हो सकता और न नारकी मरकर नारकी या देव होता है।

शङ्का—आयुकर्मोंकी यह सत्कर्मव्यवस्था रहो, किन्तु दो आयुकर्मो का एकसाथ उदय क्यों नहीं होता ?

समाधान—आयुकर्मकी जिस प्रकृतिकी स्थिति अनुभवमें आ रही है और जिस आयुकी स्थितिका उदय हो रहा है उसकी स्थिति जहाँ समाप्त होती है उससे ऊपर दूसरी आयुके निषेक रहते हैं। अत जबतक पहली आयुकी स्थिति समाप्त नहीं होती तबतक दूसरी उदयमें आ नहीं सकती। इसलिए एकसाथ आयुकी दो प्रकृतियोंका उदय नहीं होता। तथा एक जीवके एकसाथ दो भव या दो गति सम्भव नहीं है। और भव तथा गतिको लेकर उसके अनुसार आयुका उदय होता है, अन्यथा नहीं होता, इसलिए भी दो आयुका उदय एकजीवके नहीं होता। इस प्रकार एक आयुकर्मकी एक ही प्रकृति एकजीवके उदयमें आती है अतः एक-एक आयुकर्मके गलनरूप ही मरण होता है। यह प्रकृतिमरण कालभेदसे एक भी जीवके चार प्रकारका होता है। वह आवीचिकमरण ही है। इस प्रकार प्रकृति आवीचिमरणका व्याख्यान किया।

दूसरा स्थिति आवीचिकमरण है। भवधारणमें कारणरूपसे परिणत हुए पुद्गलोंके स्नेहवश आत्माके प्रदेशोंमें ठहरनेको स्थिति कहते हैं। आत्माका कषायरूप परिणाम पुद्गलोंकी स्निग्धताका सहकारी होता है। परिणामी कारण तो स्वयं पुद्गलद्रव्य ही है। यह स्थिति एक समयसे लेकर एक-एक समय बढ़ते-बढ़ते कुछ कम तेतीस सागरके जितने समय है उतने भेदवाली होती है। यह उत्कृष्ट स्थिति है। जघन्यस्थिति अन्तर्मुहूर्त प्रमाण होती है। तरंगोंके समान क्रमसे अवस्थित उस स्थितिके विनाशसे आत्माके स्थिति आवीचिकमरण होता है।

भवान्तरप्राप्तिरनन्तरोपश्लिष्टपूर्वभवविगमनं तद्भवमरणं। तच्चानन्तशः प्राप्तं जीवेनेति ज्ञातव्यं तेन तद्भवमरणं न दुर्लभम्।

अनुभवावीचिकामरणमुच्यते—कर्मपुद्गलानां रसः अनुभव इत्युच्यते, स च परमाणुषु षोढा वृद्धिहानिक्रमेण वीचय इव क्रमेणावस्थितस्तस्य प्रलयोऽनुभवावीचिमरणं।

आयुःसंज्ञितानां पुद्गलानां प्रदेशा जघन्यनिषेकादारभ्य एकादिवृद्धिक्रमेणावस्थिता वीचय इव तेषां गलनं प्रदेशावीचिकामरणं।

अवधिमरणं नाम कथ्यते—यो यादृशं मरणं सांप्रतमुपैति तादृगेव यदि मरणं भविष्यति तदवधिमरणं। तद्द्विविधं देशावधिमरणं सर्वावधिमरणं इति।

तत्र सर्वावधिमरणं नाम यदायुर्यथाभूतमुदेति सांप्रतं प्रकृतिस्थित्यनुभवप्रदेशैस्तथाभूतमेवायुः प्रकृत्यादिविशिष्टं पुनर्बध्नाति उदेष्यति च यदि तत्सर्वावधिमरणं।

यत्सांप्रतमुदेत्यायुर्यथाभूतं तथाभूतमेव बध्नाति देशतो यदि तद्देशावधिमरणं। एतदुक्तं भवति देशतः सर्वतो वा सादृश्येनावधीकृतेन विशेषितं मरणमवधिमरणमिति। सांप्रतेन मरणेनासादृश्यभावि यदि मरणमाद्यन्तमरणं उच्यते, आदिशब्देन सांप्रतं प्राथमिकं मरणमुच्यते तस्य अंतो विनाशभावो यस्मिन्नुत्तरमरणे तदेतदाद्यन्तमरणं अभिधीयते। प्रकृतिस्थित्यनुभवप्रदेशैर्यथाभूतैः सांप्रतमुपैति मृतिं तथाभूतां यदि सर्वतो देशतो वा नोपैति तदाद्यन्तमरणं।

बालमरणमुच्यते—बालस्य मरणं बालमरणं, स च बालः पञ्चप्रकारः अव्यक्तबालः व्यवहारबालः,

---

भवान्तर प्राप्तिपूर्वक उसके अनन्तर पूर्ववर्ती भवका विनाश तद्भवमरण है। वह तो इस जीवने अनन्तबार प्राप्त किया है। अतः तद्भवमरण दुर्लभ नहीं है।

अनुभव आवीचिमरण कहते हैं—कर्मपुद्गलोंके रसको अनुभव कहते हैं। वह अनुभव परमाणुओंमें छह प्रकारकी वृद्धि हानिके रूपसे तरंगोंकी तरह क्रमसे अवस्थित है। उसका विनाश अनुभव आवीचिमरण है। आयुसंज्ञावाले पुद्गलोंके प्रदेश जघन्य निषेकसे लेकर एक आदि वृद्धिके क्रमसे तरंगोंकी तरह अवस्थित है उनके गलनेको प्रदेश आवीचिकामरण कहते हैं।

अवधिमरणको कहते हैं—जो वर्तमानमें जैसा मरण प्राप्त करता है यदि वैसा ही मरण होगा तो उसे अवधिमरण कहते हैं। उसके दो भेद हैं—देशावधिमरण और सर्वावधिमरण। वर्तमानमें जो आयु जैसे प्रकृति, स्थिति, अनुभव और प्रदेशोंको लेकर उदयमें आ रही है वैसी ही प्रकृति आदिको लिए हुए यदि पुनः आयुबन्ध करता है और उसी प्रकार भविष्यमें उसका उदय होता है तो उसे सर्वावधिमरण कहते हैं। और वर्तमानमें जैसा आयुका उदय होता है वैसा ही यदि एक देश बन्ध करता है वह देशावधिमरण है। इसका अभिप्राय यह है एक देशसे अथवा सर्वदेशसे मर्यादाको लिए हुए सादृश्यसे विशिष्ट मरणको अवधिमरण कहते हैं। वर्तमानमरणसे यदि आगामिमरण असमान होता है तो उसे आद्यन्तमरण कहते हैं। यहाँ आदि शब्दसे वर्तमानका प्राथमिकमरण कहा जाता है। उसका अन्त अर्थात् विनाश जिस उत्तरमरणमें होता है उसे आद्यन्तमरण कहते हैं। 'वर्तमानमें जिस प्रकारके प्रकृति, स्थिति, अनुभव और प्रदेश द्वारा मरणको प्राप्त होता है यदि एकदेश या सर्वदेशसे उस प्रकारके मरणको प्राप्त नहीं होता तो वह आद्यन्तमरण है।

बालमरणको कहते हैं—बालके मरणको बालमरण कहते हैं। वह बाल पाँच प्रकारका

ज्ञानबालः, दर्शनबालः, चारित्रबाल इति । अव्यक्तः शिशुः धर्मार्थकामकार्याणि यो न वेत्ति न च तदाचरणसमर्थशरीरः सोऽव्यक्तबालः । लोकवेदसमयव्यवहारान्यो न वेत्ति शिशुर्वासौ व्यवहारबालः । मिथ्यादृष्टयः [1]सर्वेऽर्थतत्त्वश्रद्धानरहिताः दर्शनबालाः । वस्तुयाथात्म्यग्राहिज्ञानन्यूना ज्ञानबालाः । अचारित्राः प्राणभृतश्चारित्रबालाः । एतेषां बालानां मरणं बालमरणं । एतानि च अतीते काले अनंतानि । अनंताश्च मृतिमिमां प्रपद्यंते । इह दर्शनबालो गृहीतः नेतरे बालाः कथं ? यस्मात्सम्यग्दृष्टेरितरबालत्वे सत्यपि दर्शनपंडिततायाः सद्भावात्पंडितमरणमेवेष्यते ।

दर्शनबालस्य पुनः संक्षेपतो द्विविधं मरणं । इच्छया प्रवृत्तमनिच्छयेति च । तयोराद्यमग्निना धूमेन, शस्त्रेण, विषेण, उदकेन, मरुत्प्रपातेन, उच्छ्वासनिरोधेन, अतिशीतोष्णपातेन, रज्ज्वा, क्षुधा, तृषा, जिह्वोत्पाटनेन, विरुद्धाहारसेवनया च बाला मृतिं ढौकन्ते, कुतश्चिन्निमित्ताज्जीवितपरित्यागैषिणः काले अकाले वा अध्यवसानादिना यन्मरणं जिजीविषोः तद्द्वितीयम् । एतैर्बालमरणैर्दुर्गतिगामिनो म्रियन्ते विषयव्यासक्तबुद्धयः अज्ञानपटलावगुंठिताः, ऋद्धिरससातगुरुकाः । बहुतीव्रपापकर्मास्रवद्वाराण्येतानि बालमरणानि जातिजरामरणव्यसनापादनक्षमाणि ॥

पंडितमरणमुच्यते—व्यवहारपंडितः, सम्यक्त्वपंडितः, ज्ञानपंडितश्चारित्रपंडितः इति चत्वारो विकल्पाः । लोकवेदसमयव्यवहारनिपुणो व्यवहारपंडितः अथवाऽनेकशास्त्रज्ञः शुश्रूषादिबुद्धिगुणसमन्वितः व्यवहारपंडितः,

---

है—अव्यक्तबाल, व्यवहारबाल, ज्ञानबाल, दर्शनबाल, चारित्रबाल । अव्यक्त छोटे बच्चेको कहते हैं । जो धर्म, अर्थ और कामको नहीं जानता और न जिसका शरीर ही उनका आचरण करनेमें समर्थ है वह अव्यक्तबाल है । जो लोक, वेद और समय सम्बन्धी व्यवहारोंको नहीं जानता अथवा इन विषयोंमें शिशु समान है वह व्यवहारबाल है । अर्थ और तत्त्वके श्रद्धानसे रहित सब मिथ्यादृष्टि दर्शनबाल हैं । वस्तुको यथार्थरूपसे ग्रहण करनेवाले ज्ञानसे जो हीन हैं वे ज्ञानबाल हैं । जो चारित्रपालन किये विना जीते है वे चारित्रबाल हैं । इन बालोंके मरणको बालमरण कहते हैं । अतीतकालमें ये बालमरण अनन्त हो चुके हैं । अनन्तजीव इस मरणको प्राप्त होते हैं । यहाँ इनमेसे दर्शनबालका ग्रहण किया है, अन्य बालोंका नहीं; क्योंकि सम्यग्दृष्टि में इतर बालपना रहते हुए भी दर्शनपंडितपना रहता है इसलिए उसके पंडितमरण ही स्वीकार किया है ।

संक्षेपसे दर्शनबालका मरण दो प्रकार का है एक इच्छापूर्वक, दूसरा अनिच्छापूर्वक । आगसे, धुएँसे, शस्त्रसे, विषसे, जलसे, पर्वतसे गिरनेसे, श्वासके रुकनेसे, अति शीत या अति गर्मी पड़नेसे, रस्सीसे, भूखसे, प्याससे, जीभ उखाड़नेसे और प्रकृति विरुद्ध आहारके सेवनसे बालपुरुष मरणको प्राप्त होते हैं यह इच्छापूर्वक मरण है अर्थात् ऐसे उपाय स्वयं करके वे मरते हैं ।

किसी निमित्त वश जीवनको त्यागनेकी इच्छा होने पर भी अन्तरंगमें जीनेकी इच्छा रहते हुए काल या अकालमें अध्यवसान आदिसे जो मरण होता है वह अनिच्छापूर्वक दर्शनबाल मरण है । जो दुर्गतिमें जानेवाले हैं, विषयोंमें अतिआसक्त हैं, अज्ञान पटलसे आच्छादित हैं, ऋद्धि, रस और सुखके लालची है वे इन बालमरणोंमे मरण करते है । ये बालमरण बहुत तीव्र पापकर्मोंके आस्रवके द्वार है, जन्म, जरा, मरणके दुःखोंको लानेवाले हैं ।

पण्डितमरणको कहते है—इसके चार भेद हैं, व्यवहार पण्डित, सम्यक्त्व पण्डित, ज्ञानपण्डित और चारित्र पण्डित । जो लोक, वेद और समयके व्यवहारमें निपुण हैं वह व्यवहारपण्डित

---

१. सर्वथा तत्व-आ० मु० ।

क्षायिकेण क्षायोपशमिकेनौपशमिकेन वा सम्यग्दर्शनेन परिणतः दर्शनपंडितः। मत्यादिपंचप्रकारसम्यग्ज्ञानेषु परिणतः ज्ञानपंडितः। सामायिकच्छेदोपस्थापनापरिहारविशुद्धसूक्ष्मसांपराययथाख्यातचारित्रेषु कस्मिंश्चिच्चारित्रे वृत्तश्चारित्रपंडितः। इह पुनर्ज्ञानदर्शनचारित्रपंडितानां अधिकारः। व्यवहारपंडितस्य मिथ्यादृष्टेः बालमरणं [1]बालो भवति सम्यग्दृष्टेस्तदेव दर्शनपंडितमरणं भवति। तद्दर्शनपंडितमरणं नरके, भवनेषु, विमानेषु, ज्योतिष्केषु, वानव्यंतरेषु, द्वीपसमुद्रेषु च। ज्ञानपंडितमरणानि च तेष्वेव। मनुष्यलोके एव केवलमनःपर्ययज्ञानपंडितमरणं भवति।

ओसण्णमरणमुच्यते—निर्वाणमार्गप्रस्थितात्संयतसार्थाद्यो हीनः प्रच्युतः सोऽभिधीयते ओसण्ण इति। तस्य मरणं ओसण्णमरणमिति। ओसण्णग्रहणेन पार्श्वस्थाः, स्वच्छंदाः, कुशीलाः संसक्ताश्च गृह्यन्ते। तथा चोक्तम्॥

पासत्थो सच्छंदो कुसील संसत्त होंति ओसण्णा॥
जं सिद्धिपच्छिदादो [2]ओहीणा साधु सत्थादो॥—[ ]

के पुनस्ते? ऋद्धिप्रियाः, रसेष्वासक्ताः, दुःखभीरवः सदा दुःखकातराः, कषायेषु परिणताः, संज्ञावशगाः, पापश्रुताभ्यासकारिणः, त्रयोदशविधासु क्रियास्वलसाः, सदा संक्लिष्टचेतसः, भक्ते उपकरणे च प्रतिबद्धाः, निमित्तमंत्रौषधयोगोपजीविनः गृहस्थवैयावृत्यकराः, गुणहीना गुप्तिषु समितिषु चानुद्यताः मंदसंवेगा दशप्रकारे धर्मे अकृतबुद्धयः शबलचारित्राः ओसण्णा इत्युच्यंते। एवंभूताः संतो मृत्वा वराका भवसहस्रेषु

है। अथवा जो अनेक शास्त्रोंका ज्ञाता है, सेवा आदि बौद्धिक गुणोंसे युक्त है वह व्यवहारपण्डित है। क्षायिक, क्षायोपशमिक अथवा औपशमिक सम्यग्दर्शनसे जो युक्त है वह दर्शनपण्डित है। जो मति आदि पाँच प्रकारके सम्यग्ज्ञान रूपसे परिणत है वह ज्ञानपण्डित है। जो सामायिक, छेदोपस्थापना, परिहारविशुद्धि, सूक्ष्मसाम्पराय और यथाख्यात चारित्रमेंसे किसी एक चारित्रका पालक है वह चारित्रपण्डित है। यहाँ ज्ञान, दर्शन और चारित्र पण्डितोंका अधिकार है। व्यवहारपण्डित मिथ्यादृष्टि का तो बालमरण होता है और सम्यग्दृष्टिका मरण दर्शनपण्डित मरण है। वह दर्शनपण्डित मरण नरकमें भवनवासी देवोंमें, वैमानिक देवोंमें, ज्योतिष्क देवोंमें, व्यन्तर देवोंमें और द्वीप समुद्रोंमें होता है। ज्ञानपण्डित मरण भी इन्हींमें होता है। किन्तु केवलज्ञान और मनः पर्ययज्ञान पण्डितमरण मनुष्य लोकमें ही होता है।

ओसण्णमरणको कहते हैं—निर्वाण मार्गपर प्रस्थान करनेवाले संयमियोंके संघसे जो हीन हो गया है उसे निकाल दिया गया है वह ओसण्ण कहलाता है। उसके मरणको ओसण्णमरण कहते हैं। ओसण्णके ग्रहणसे पार्श्वस्थ, स्वच्छन्द, कुशील और संसक्तोंका ग्रहण होता है। कहा भी है—पार्श्वस्थ, स्वच्छन्द कुशील और संसक्त ये ओसण्ण होते हैं क्योंकि ये मोक्षके लिए प्रस्थान करनेवाले साधुसंघसे बाहर होते हैं।

ऋद्धियोंके प्रेमी, रसोंमें आसक्त, दुःखसे भीत, सदा दुःखसे कातर, कषायोंमें संलग्न, आहारादिसंज्ञाके अधीन, पापवर्धक शास्त्रोंके अभ्यासी, तेरह प्रकारकी क्रियाओंमें आलसी, सदा संक्लेशयुक्त चित्तवाले, भोजन और उपकरणोंसे प्रतिबद्ध, निमित्तशास्त्र, मंत्र, औषध आदिसे आजीविका करनेवाले, गृहस्थोंका वैयावृत्य करनेवाले, गुणोंसे हीन, गुप्तियों और समितियोंमें उदासीन, संवेग भावमें मन्द, दस प्रकारके धर्ममें मनको न लगानेवाले तथा सदोष चारित्रवाले मुनियोंको अवसन्न कहते हैं। इस प्रकारसे रहते हुए ये बेचारे मरकर हजारों भवोंमें भ्रमण करते

---

१. अधा आ० मु० । २. आहीणा आ० ।

भवति । दुःखानि भुक्त्वा भुक्त्वा पार्श्वस्थरूपेण सुचिरं विहृत्यान्ते आत्मनः शुद्धिं कृत्वा यदि मृतिमुपैति प्रशस्तमेव मरणं भवति ।

सम्यग्दृष्टेः संयतासंयतस्य बालपंडितमरणं यतोऽसावुभयरूपो बालः पंडितश्च । स्थूलकृतात्प्राणातिपातादेर्विरमणलक्षणं चारित्रमस्ति दर्शनं च ततश्चारित्रपंडितो दर्शनपंडितश्च[1] । कुतश्चित्सूक्ष्मादसंयमादनिवृत्त इति चारित्रबालः । तत् बालपंडितमरणं गर्भजेषु पर्याप्तकेषु तिर्यक्षु मनुजेषु भवति । दर्शनपंडितमरणं तु तेषु देवनारकेषु च ।

सशल्यमरणं द्विविधं यतो द्विविधं शल्यं द्रव्यशल्यं भावशल्यमिति । मिथ्यादर्शनमायानिदानशल्यानां कारणं कर्म द्रव्यशल्यं । द्रव्यशल्येन सह मरणं पंचानां स्थावराणां भवति असंज्ञिनां त्रसानां च । ननु द्रव्यशल्यं सर्वत्रास्ति तत्किमुच्यते स्थावराणामिति । भावशल्यविनिर्मुक्तं द्रव्यशल्यमपेक्ष्यते । एतदुक्तं—सम्यक्त्वातिचाराणां दर्शनशल्यस्यासम्यग्दर्शनस्य च स्थावरेषु अभावात् त्रसेषु च विकलेंद्रियेषु । इदमेव स्यादनागते काले इति मनसः प्रणिधानं निदानं न च तदसंज्ञिष्वस्ति । मार्गस्य दूषणं, मार्गनाशनं, उन्मार्गप्ररूपणं, मार्गस्थानां भेदकरणं च मिथ्यादर्शनशल्यानि ।

तत्र निदानं त्रिविधं प्रशस्तमप्रशस्तं भोगकृतं चेति । परिपूर्णं संयममाराधयितुकामस्य जन्मांतरे पुंस्त्वादिप्रार्थना प्रशस्तं निदानं, मानकषायप्रेरितस्य कुलरूपादिप्रार्थनमनागतभवविषयं अप्रशस्तं निदानं । अथवा

हैं। किन्तु दुःख उठाते-उठाते पार्श्वस्थरूपमें चिरकाल तक विहार करके अन्तमें आत्माकी शुद्धि करके यदि मरते है तो प्रशस्तमरण ही होता है।

सम्यग्दृष्टि संयतासंयतके मरणको बालपण्डित मरण कहते हैं क्योंकि यह बाल और पण्डित दोनों ही होता है। इसके स्थूल हिंसा आदिसे विरतिरूप चारित्र और दर्शन दोनों होते हैं अतः यह चारित्रपण्डित भी है और दर्शनपण्डित भी है। किन्तु कुछ सूक्ष्म असंयमसे निवृत्त नहीं होता, इसलिए चारित्रमें बाल है।

यह बालपण्डित मरण गर्भज और पर्याप्तक तिर्यञ्चों तथा मनुष्योंमें होता है। दर्शनपण्डित मरण तो इनमें भी होता है और देव तथा नारकियोंमें भी होता है।

सशल्य मरणके दो भेद हैं क्योंकि शल्यके दो भेद हैं—द्रव्यशल्य और भावशल्य। मिथ्यादर्शन, माया और निदान इन शल्योंका कारण जो कर्म है उस कर्मको द्रव्यशल्य कहते हैं। द्रव्यशल्यके साथ मरण पाँचों स्थावरों, असंज्ञियों और त्रसोंका होता है।

शंका—द्रव्यशल्य तो सर्वत्र है तब स्थावरोंके क्यों कहा?

समाधान—यहाँ भावशल्यसे रहित द्रव्यशल्यकी अपेक्षा है। यह कहा है कि सम्यग्दर्शनके अतिचारोंका कारण दर्शनशल्य है और सम्यग्दर्शन स्थावरोंमें तथा विकलेन्द्रिय त्रसोंमें नहीं होता।

आगामीकालमें यही होना चाहिए इस प्रकारके मनके उपयोगको निदान कहते हैं। असंज्ञियोंमें इस प्रकारका निदान नहीं होता। मोक्षमार्गको दोष लगाना, मार्गका नाश करना, मिथ्यामार्गका कथन करना, या मोक्षमार्गका कथन न करना, और जो मोक्षमार्गी हैं उनमें भेद डालना ये मिथ्यादर्शनशल्य हैं। उनमेंसे निदानके तीन भेद हैं—प्रशस्त, अप्रशस्त और भोगकृत। परिपूर्ण संयमकी आराधना करनेकी इच्छासे परभवमें पुरुषत्व आदि प्राप्तिकी प्रार्थना प्रशस्त

---

१. तश्च । ततश्चारित्रपंडितो दर्शनपंडितश्च कृत–आ० ।

क्रोधाविष्टस्य स्वशत्रुवधप्रार्थना वशिष्ठमुनेरुग्रसेनोन्मूलने । इह परत्र च भोगा अपि इत्थंभूता अस्माद् व्रतशीलादिकाद् भवन्त्विति मनःप्रणिधानं भोगनिदानं । असंयतसम्यग्दृष्टेः संयतासंयतस्य वा निदानशल्यं भवति । पार्श्वस्थादिरूपेण चिरं विहृत्य पश्चादपि आलोचनामंतरेण यो मरणमुपैति तन्मायाशल्यं मरणं तस्य भवति । एतच्च संयते, संयतासंयते, अविरतसम्यग्दृष्टावपि भवति ।

बलायमरणमुच्यते—विनयवैयावृत्त्यादावकृतादरः, प्रशस्तयोगोद्वहनालसः, प्रमादवान्व्रतेषु, समितिषु, गुप्तिषु च स्ववीर्यनिगूहनपरः, धर्मचिंतायां निद्रया घूर्णित इव ध्याननमस्कारादेः पलायते अनुपयुक्ततया, एतस्य मरणं बलायमरणं । सम्यक्त्वपंडिते, ज्ञानपंडिते चरणपंडिते च बलायमरणमपि[1] संभवति । ओसण्णमरणं सशल्यमरणं च यदभिहितं तत्र नियमेन बलायमरणम् । तद्व्यतिरिक्तमपि बलायमरणं भवति । निःशल्यः संविग्नो भूत्वा चिरं रत्नत्रयप्रवृत्तस्य संस्तरमुपगतस्य शुभोपयोगात्पलायमानस्य भावस्य शुभस्यानवस्थानात् ।

वसट्टमरणं नाम—आर्ते रौद्रे च प्रवर्तमानस्य मरणं । तत्पुनश्चतुर्विधं—इंद्रियवसट्टमरणं, वेदणावसट्टमरणं, कसायवसट्टमरणं, नोकसायवसट्टमरणं इति । इंद्रियवसट्टमरणं यत् तत्पंचविधं इंद्रियविषयापेक्षया । सुरैर्नरैस्तिर्यग्भिरजीवैश्च कृतेषु ततविततघनसुषिरशब्देषु मनोज्ञेषु रक्तोऽमनोज्ञेषु द्विष्टो मृतिमेति । यथा चतुःप्रकारे आहारे रक्तस्य द्विष्टस्य वा मरणं, पूर्वोक्तानां सुरनरादीनां गंधे द्विष्टस्य रक्तस्य वा मरणं, तेषामेव

निदान है। मानकषायसे प्रेरित होकर आगामी भवमें उच्चकुल, सुन्दररूप आदिकी प्रार्थना अप्रशस्त निदान है। अथवा क्रोधके आवेशमें आकर अपने शत्रुके वधकी प्रार्थना, जैसे वशिष्ठने उग्रसेनके विनाशकी प्रार्थना की थी, अप्रशस्त निदान है। इस व्रतशील आदिके प्रभावसे इस भवमें और परभवमें इस प्रकारके भोग मुझे प्राप्त हों, इस प्रकार मनके संकल्पको भोगनिदान कहते हैं। असंयत सम्यग्दृष्टी अथवा संयतासंयतके निदानशल्य होता है। चिरकालतक पार्श्वस्थ आदि साधुके रूपमें विहार करनेके पश्चात् भी जो आलोचना किये बिना मर जाता है उसका वह मायाशल्य मरण होता है। ऐसा मरण संयत, संयतासंयत और अविरत सम्यग्दृष्टिमे होता है।

बलायमरणको कहते हैं—जो विनय वैयावृत्य आदिमें आदरभाव नहीं रखता, प्रशस्त योगके धारणमें आलसी है, प्रमादी है, व्रतोंमें, समितियोंमें और गुप्तियोंमें अपनी शक्तिको छिपाता है, धर्मके चिन्तनमें निद्राके वशीभूत जैसा रहता है, उपयोग न लगनेसे ध्यान नमस्कार आदिसे दूर भागता है, उसका मरण बलायमरण है। दर्शनपण्डित, ज्ञानपण्डित और चारित्रपण्डितके बलायमरण भी सम्भव है। ओसण्णमरण और सशल्यमरणमें नियमसे बलायमरण होता है। उनके अतिरिक्त भी बलायमरण होता है। जो शल्यरहित विरक्त होकर चिरकालतक रत्नत्रयका पालन करता है किन्तु मरते समय संस्तरपर आरूढ़ होकर शुभोपयोगसे दूर भागता है, उसके शुभभावके स्थिर न रहनेसे बलायमरण होता है।

वसट्टमरण कहते हैं—आर्त और रौद्रध्यानपूर्वक मरणको वसट्टमरण कहते हैं। उसके चार भेद हैं—इन्द्रियवसट्टमरण, वेदनासमट्टमरण, कसायवसट्टमरण, और नोकसायवसट्टमरण। इन्द्रियवसट्टमरण इन्द्रियोंके विषयोंकी अपेक्षा पाँच प्रकारका है। देवों, मनुष्यों, पशु-पक्षियों और अजीवोंके द्वारा किये गये तत, वितत, घन, और शुषिर शब्दोंमें, मनोज्ञ शब्दोंमें राग और अमनोज्ञ शब्दोंमें द्वेष करते हुए मरण होता है। यह श्रोत्रेन्द्रियवसट्टमरण है। चार प्रकारके

---

१. मरणं भवति अ० ।

रूपे संस्थाने वा रक्तस्य द्विष्टस्य वा मरणं, तेषामेव स्पर्शे रागवतो द्वेषवतो वा मरणं, इति इंद्रियविषय-वशार्तमरणविकल्पाः ।

वेदनावसट्टमरणं द्विभेदं समासतः सातवेदनावशार्तमरणं असातवेदनावशार्तमरणमिति । शारीरे मानसे वा दुःखे उपयुक्तस्य मरणं दुःखवशार्तमरणमुच्यते । यो दुःखेन मोहमुपागतस्तस्य मरणमिति यावत् । तथा शारीरे मानसे वा सुखे उपयुक्तस्य मरणं सातवशार्तमरणं ।

कषायभेदात्कषायवशार्तमरणं चतुर्विधं भवति । अनुबंधरोषो म आत्मनि परत्र उभयत्र वा मारणवशो[1] भवति । तस्य क्रोधवशार्तमरणं भवति । मानवशार्तमरणमष्टविधं भवति कुलेन, रूपेन, बलेन, श्रुतेन, ऐश्वर्येण, लाभेन, प्रज्ञया, तपसा वा आत्मानमुत्कर्षयतो मरणमपेक्ष्य विख्याते विशाले उन्नते कुले समुत्पन्नोऽहमिति मन्यमानस्य मृतिः कुलमानवशार्तमरणम् । निरुपहतपंचेंद्रियसमग्रगात्रस्तेजस्वी प्रत्यग्रयौवनः सकलजनतायेतः-सम्मदकरश्च इति भावयतो मृतिः रूपवशार्तमरणं । वृक्षपर्वताद्युत्पाटनक्षमोऽहं योद्धुमहं, मित्राणां च बलं ममास्ति इति बलाभिमानोद्गताभ्यामानवशार्तमरणं । बहुपरिवारो बहुशासनोऽहं इति ऐश्वर्यमानोन्मत्तस्य मरणं मानवशार्तमरणं । लोकवेदसमयसिद्धान्तशास्त्राणि शिक्षितानि इति श्रुतमानोन्मत्तस्य मरणं श्रुतमानवशार्तमरण-मुच्यते । तीक्ष्णा मम बुद्धिः सर्वत्राप्रतिहता इति प्रज्ञामत्तस्य मरणं प्रज्ञावशार्तमरणमुच्यते । व्यापारे क्रियमाणे

आहारमें राग या द्वेष करते हुए मरण रसनेन्द्रियवसट्टमरण है। पूर्वोक्तदेव मनुष्य आदिकी गन्धमें रागद्वेष करते हुए मरण घ्राणेन्द्रियवसट्टमरण है। उन्हींके रूप आकार आदिमें रागद्वेष करने-वालेका मरण चक्षुइन्द्रियवसट्टमरण है। उन्हींके स्पर्शमें रागद्वेष करनेवालेका मरण स्पर्शनेन्द्रिय-वसट्टमरण है। इस प्रकार इन्द्रिय और मनके वशसे होनेवाले आर्तध्यानपूर्वक मरणके भेद हैं।

वेदनावसट्टमरणके संक्षेपसे दो भेद हैं—सातवेदनावशार्तमरण और असातवेदनावशार्त-मरण। शारीरिक अथवा मानसिक दुःखमें उपयोग रहते हुए होनेवाले मरणको दुःखवशार्तमरण कहते हैं। अर्थात् जो दुःखसे मोहको प्राप्त हुआ उसका मरण दुःखवशार्तमरण है। तथा शारीरिक अथवा मानसिक सुखमें उपयोग रहते हुए होनेवाला मरण सातवशार्त मरण है।

कषायके भेदसे कषायवशार्तमरणके चार भेद होते हैं। अपनेमें, दूसरेमें अथवा दोनोंमें मारनेके लिए उत्पन्न हुआ क्रोध मरणका कारण होता है। वह क्रोधवशार्तमरण है। मानवशा-र्तमरणके आठ भेद हैं—कुल, रूप, बल, शास्त्र, ऐश्वर्य, लाभ, बुद्धि अथवा तपसे अपनेको बड़ा मानते हुए मरण होनेकी अपेक्षा ये आठ भेद होते हैं। मैं अति प्रसिद्ध विशाल उच्चकुलमें उत्पन्न हुआ हूँ ऐसा मानते हुए होनेवाले मरणको कुलमानवश आर्तमरण कहते हैं। मेरा शरीर समस्त पाँच इन्द्रियोंसे पूर्ण है, तेजस्वी और नवयौवनसे सम्पन्न है, मेरा रूप समस्त जनताके चित्तको मर्दन करता है, ऐसी भावना होते हुए जो मरण होता है वह रूपवश आर्तमरण है। मैं वृक्ष पर्वत आदिको उखाड़नेमें समर्थ हूँ, लड़नेमें समर्थ हूँ, मेरे साथ मित्रोंका बल है, इस प्रकार बलके अभिमानको धारण करते हुए होनेवाला मरण बलमानवश आर्तमरण है। मैं बहुत परिवार वाला हूँ मेरा शासन बहुतोंपर है इस प्रकार ऐश्वर्यके मानसे उन्मत्तका मरण ऐश्वर्यमान वशार्त-मरण है। मैंने लोक, वेद, समय और सिद्धान्त सम्बन्धी शास्त्रोंको पढ़ा है इस प्रकार शास्त्रके मानसे उन्मत्तका मरण श्रुतमानवश आर्तमरण है। मेरी बुद्धि तीक्ष्ण है, सब विषयोंमें उसकी

---

१. वा मरणवशो भवति अ० । वा मारणवशो भवति आ० ।—वशोपि मरणवशः ज–मु० ।

मम सर्वत्र लाभो जायते इति लाभमानं भावयतो मरणं लाभवशार्तमरणम्। तपो मयानुष्ठीयते अन्यो मत्सदृशस्तपश्चरणे नास्ति इति संकल्पयतस्तपोमानवशार्तमरणं भवति। माया पंचविकल्पा निकृतिः, उपधिः, सातिप्रयोगः, प्रणिधिः प्रतिकुंचनमिति। अतिसंधानकुशलता धने कार्ये वा कृताभिलाषस्य वंचना निकृतिः उच्यते। सद्भावं प्रच्छाद्य धर्मव्याजेन स्तैन्यादिदोषे प्रवृत्तिरुपधिसंज्ञिता माया। अर्थेषु विसंवादः स्वहस्तनिक्षिप्तद्रव्यापहरणं, दूषणं, प्रशंसा वा सातिप्रयोगः। प्रतिरूपद्रव्यमानकरणानि, ऊनातिरिक्तमानं; संयोजनया द्रव्यविनाशनमिति प्रणिधिमाया। आलोचनं कुर्वतो दोषविनिगूहनं प्रतिकुंचनमाया। एवंविधं मायावशार्तमरणं। उपकरणेषु, भक्तपानक्षेत्रेषु, शरीरे, निवासस्थानेषु च इच्छां मूर्छां च वहतो मरणं लोभवशार्तमरणं। हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुंन्नपुंसकवेदे मूढमतेर्मरणं नोकषायवशार्तमरणं। नोकषायवशार्तमरणमुपगतो जायते मनुजतिर्यग्योनिषु, असुरेषु, कंदर्पेषु, किल्बिषिकेषु च। मिथ्यादृष्टेरेतदेव बालमरणं भवति। दर्शनपंडितोऽपि अविरतसम्यग्दृष्टिः संयतासंयतोऽपि वशार्तमरणमुपैति तस्य तद्बालपंडितं भवति दर्शनपंडितं वा।

अप्रतिषिद्धे अननुज्ञाते च द्वे मरणे 'विप्पाणस'[1] गिद्धपुट्ठमितिसंज्ञिते कृती प्रवर्तेते। दुर्भिक्षे, कांतारे, दुस्तरे, पूर्वशत्रुभये, दुष्टनृपभये, स्तेनभये, तिर्यगुपसर्गे एकाकिनः सोढुमशक्ये ब्रह्मव्रतनाशादिचारित्रदूषणे च

बेरोक गति है इस प्रकार प्रज्ञाके मदसे मत्तके मरणको प्रज्ञामानवश आर्तमरण कहते हैं। व्यापार करनेपर मुझे सर्वत्र लाभ होता है इस प्रकार लाभका मान करते हुए होनेवाले मरणको लाभमानवशार्तमरण कहते हैं। मैं तप करता हूँ, तपश्चरणमें मेरे समान दूसरा नहीं है। ऐसा संकल्प करते हुए होनेवाले मरणको तपमानवशार्तमरण कहते हैं।

मायाके पाँच भेद हैं—निकृति, उपधि, सातिप्रयोग, प्रणधि और प्रतिकुञ्चन। दूसरोंकी गुप्त बातोंकी खोजमे कुशलता, तथा धन अथवा किसी कार्यकी अभिलाषावालेको ठगना निकृति है। समीचीन भावको छिपाकर धर्मके बहानेसे चोरी आदि दोषोंमें प्रवृत्तिको उपधिनामक माया कहते है। अर्थ (धन) के विषयमें झगड़ा करना, अपने हाथमें रखे द्रव्यको हर लेना, प्रयोजनके अनुसार दोष लगाना या प्रशंसा करना सातिप्रयोग माया है। असली वस्तुमें उसके समान नकली वस्तु मिलाना, कमती बढ़ती तोलना, मिलावटके द्वारा द्रव्यका विनाश करना ये प्रणिधिमाया है। आलोचना करते समय दोषोंको छिपाना प्रतिकुंचन माया है। इस प्रकारके मायाचारपूर्वक होनेवाले मरणको मायावशार्तमरण कहते है। उपकरणोंमें, खानपानके क्षेत्रोमें, शरीरमें, निवास स्थानोंमें इच्छा और ममत्व रहते हुए होनेवाले मरणको लोभवशार्तमरण कहते हैं। हास्य, रति, अरति, शोक, भय, जुगुप्सा, स्त्रीवेद, नपुंसकवेद और पुरुषवेदको लेकर जिसकी बुद्धि मूढ हो गई है उसका मरण नोकषायवशार्तमरण है। नोकषायवशार्तमरणसे मरा हुआ प्राणी मनुष्य योनि, तिर्यञ्चयोनि, तथा असुर, कन्दर्प और किल्विषजातिके देवोंमें उत्पन्न होता है। मिथ्यादृष्टिके होनेवाला यही मरण बालमरण होता है। दर्शनपण्डित, अविरतसम्यग्दृष्टि और संयतासंयतके भी वशार्तमरण होता है उनका वह मरण बालपण्डितमरण अथवा दर्शनपण्डितमरण होता है।

विप्पणास और गिद्धपुट्ठ नामके दो मरण ऐसे हैं जिनका निषेध भी नहीं है अनुज्ञा भी नहीं है। दुर्भिक्षमें, भयानक जंगलमें, पूर्वशत्रुका भय होनेपर, या दुष्ट राजाका भय होनेपर, चोरका भय होनेपर, तिर्यञ्चकृत उपसर्ग होनेपर जिसे अकेले सहन करना अशक्य है, या ब्रह्मचर्य-

---

1. वप्पाणि–आ० मु० अ० ।

जाते संविग्नः पापभीरुः कर्मणामुदयमुपस्थितं ज्ञात्वा तं सोढुमशक्तः तन्निस्तरणस्यासत्युपाये सावद्यकरणभीरुः विराधनमरणभीरुश्च एतस्मिन् कारणे जाते कालेऽमुष्मिन् किं भवेत्कुशलमिति गणयतो यद्युपसर्गभयत्रासितः संयमाद्भ्रश्यामि ततः संयमभ्रष्टो दर्शनादपि न वेदनामसंक्लिष्टः सोढुं उत्सहेत ततो रत्नत्रयाराधनाच्च्युतिर्मे-मेति निश्चितमतिर्निर्मायश्चरणदर्शनविशुद्धः, धृतिमान्, ज्ञानसहायोऽनिदानः, अर्हदन्तिके, आलोचनामासाद्य कृतशुद्धिः, सुलेश्य प्राणापाननिरोधं करोति यत्तद्विप्पाणसं मरणमुच्यते ! शस्त्रग्रहणेन यद्भवति तद्गिद्धपुट्ठ-मित्युच्यते । मरणविकल्पसंभवप्रदर्शनमिदं सर्वत्र कर्तव्यतयोपदिश्यते । प्रायोपगमनमिंगिणीमरणं भक्तप्रत्या-ख्यानं इत्येतान्येवोत्तमानि पूर्वपुरुषैः प्रवर्तितानि । एवं दिङ्मात्रेण पूर्वागमानुसारि सप्तदशमरणव्याख्यान-मत्रोपक्रान्तम् ।

एतेषु सप्तदशसु पंच मरणानि इह संक्षेपतो निरूपयिष्यामीति प्रतिज्ञानेन कृता । कानि तानि पंच मरणानि इत्याशंकाया नामनिर्देशार्थं गाथा पंडितपंडितमरणमित्यादिका—

पंडिदपंडिदमरणं पंडिदयं बालपंडिदं चेव ॥
बालमरणं चउत्थं पंचमयं बालबालं च ॥ २६ ॥

ननु भवपर्यायप्रलयो मरणमिति यदि गृह्यते तस्य को भेदो भवपर्यायस्य अनेकत्वात् मरणं तद्विनाशः कथं न भिद्यते इति । मनुष्ये पंचप्रकारतानुपपन्ना अनंतत्वात् एकजीवगतस्यापि भवपर्यायस्य नानाजीवापेक्षाया

व्रतका विनाश आदि दूषण चारित्रमे होनेपर ससारसे विरक्त और पापसे डरनेवाला साधु कर्मोंका उदय उपस्थित जानकर उसे सहनेमें असमर्थ होनेसे उससे निकलनेका उपाय न होनेपर पापकर्म करनेसे डरता हुआ, साथ ही विराधनापूर्वक मरणसे डरता हुआ विचारता है इस कालमे इस प्रकारके कारण उपस्थित होनेपर कैसे कुशल रह सकती है, यदि उपसर्गके भयसे डरकर संयमसे भ्रष्ट होता हूँ तो संयमसे भी भ्रष्ट और दर्शनसे भी भ्रष्ट होता हूँ। और बिना संक्लेशके वेदना-को सहन कर नहीं सकता। तब मैं रत्नत्रयके आराधनसे डिग जाऊँगा, ऐसी निश्चित मति करके सम्यक्त्व और चारित्रमें विशुद्ध, धैर्यशाली, ज्ञानसे सहायता लेनेवाला वह साधु किसी निदानके विना अर्हन्तके पासमें आलोचना प्रायश्चित्त लेकर शुभलेश्यापूर्वक श्वासोच्छ्वासका निरोध करता है। उसे विप्पणास मरण कहते हैं। और शस्त्रग्रहणसे होनेवाले मरणको गिद्धपुट्ठ कहते हैं।

मरणके भेदोका यह प्रदर्शन सर्वत्र कर्तव्यरूपसे किया जाता है। किन्तु प्रायोपगमन, इंगिणी-मरण और भक्तप्रत्याख्यान ये तीन ही मरण उत्तम हैं, पूर्व पुरुषोंने इनका पालन किया है। इस प्रकार सक्षेपसे पूर्व आगमके अनुसार सतरह मरणोंका व्याख्यान यहाँ किया ॥२५॥

इन सतरहमें से पाँच मरणोंको यहाँ संक्षेपसे कहूँगा ऐसी प्रतिज्ञा ऊपर की है। वे मरण कौन हैं ऐसी शका करने पर उनका नाम निर्देश करनेके लिए गाथा कहते हैं—

गाथा—पण्डितपण्डितमरण, पण्डितमरण, बाल पण्डितमरण, चौथा बालमरण और पाँचवा बाल बालमरण, ये पाँच मरण है।

टीका—शंका—यदि भवपर्यायके विनाशको मरण कहते हो तो उसका भेद कैसा ? भव-पर्याय तो अनेक हैं और उनका विनाश मरण है तब मरणके भेद उतने क्यों नहीं होंगे। अतः मनुष्यमें मरणके पाँच प्रकार ठीक नहीं है। एक जीव की भी भवपर्याय अनन्त होती हैं तब नाना-

कोऽवसरः पंचत्वस्य । प्राणिनः प्राणेभ्यो वियोगो मरणं इति चेत्तदेकविधमेव सामान्यतः । प्राणभेदापेक्षयेति चेद्दशप्रकारतापद्यते । उदयप्राप्तकर्मपुद्गलगलनं मरणं इति यदि गृह्यते प्रतिसमयं गलनान्न पंचता । गुणभेदापेक्षया जीवान्पंचधा व्यवस्थाप्य तत्संबंधेन पंचविधं मरणमुच्यते ।

अन्यथा व्याख्या—प्रशस्ततमं, प्रशस्ततरं, ईषत्प्रशस्तं, अविशिष्टं, अविशिष्टतरं इति पंडितपंडितमरणादीनि केचिद् व्याचक्षते । पंडितशब्दः प्रशस्तमित्यस्मिन्नर्थे क्व प्रयुक्तो दृष्टो येनैवं व्याख्यायते ? किं च आगमांतराननुगतं चेदं व्याख्यानं ।

'ववहारे सम्मत्ते णाणे चरणे य पंडिदस्स तदा ।
पंडिदमरणं भणिदं चदुव्विधं तव्वंति हि ॥' [ ]

इति वदता चतुःप्रकाराः पंडिता उपवर्णिताः । तेषां मध्ये अतिशयितं पांडित्यं यस्य ज्ञानदर्शनचारित्रेषु स पंडितपंडित इत्युच्यते । एतत्पांडित्यप्रकर्षरहितं पांडित्यं यस्य स पंडित इत्युच्यते । व्याख्यातं बाल्यं पांडित्यं च यस्य स भवति बालपंडितः तस्य मरणं बालपंडितमरणं । यस्मिन्न संभवति पांडित्यं चतुर्णामप्येकं असौ बालः । सर्वतो न्यूनो बालबालः तस्य मरणं बालबालमरणं ।

अथ के पंडितपंडिता येषां मरणं पंडितपंडितमिति भण्यते इत्यारेकायामाह—

पडिदपंडितमरणे खीणकसाया मरंति केवलिणो ।
विरदाविरदा जीवा मरंति तदियेण मरणेण ॥२७॥

जीवोंकी अपेक्षा पाँच भेद कैसे संभव हैं ? यदि कहोगे कि प्राणीका प्राणोंसे वियोग मरण है तो वह सामान्यसे एक ही प्रकार का है। प्राणभेदकी अपेक्षा लेना हो तो दस भेद हो सकते हैं ? यदि उदय प्राप्त कर्म पुद्गलोंके गलनेका नाम मरण है तो कर्म पुद्गलोका गलन तो प्रति समय होता है अतः पाँच भेद नहीं बनते ?

समाधान—गुणभेदकी अपेक्षा जीवोंके पाँच भेद करके उनके सम्बन्धसे मरणके पाँच भेद कहे हैं।

अन्य व्याख्याकार पण्डितपण्डितमरण आदि पाँच मरणोंको प्रशस्ततम, प्रशस्ततर, ईषत् प्रशस्त, अविशिष्ट और अविशिष्टतर कहते हैं। हम उनसे पूछते हैं कि पण्डित शब्दका प्रशस्त अर्थमें प्रयोग कहाँ देखा है जिससे आप ऐसी व्याख्या करते हैं। तथा यह व्याख्यान अन्य आगमोंके अनुकूल नहीं है।

आगममें कहा है—व्यवहारमें, सम्यक्त्वमें, ज्ञानमें और चारित्रमें पण्डितके मरणको पण्डित-मरण कहते हैं अतः उसके चार भेद हैं। इस प्रकार चार प्रकारके पण्डित कहे हैं। उनके मध्यमें जिसका पाण्डित्य ज्ञान, दर्शन और चारित्रमें अतिशयशाली है उसे पण्डितपण्डित कहते हैं। उसके पाण्डित्यके प्रकर्षसे रहित जिसका पाण्डित्य होता है उसे पण्डित कहते हैं। पूर्वमें व्याख्यात बालपन और पाण्डित्य जिसमें होते हैं वह बालपण्डित है। उसका मरण बालपण्डितमरण है। और जिसमें चारों प्रकारके पाण्डित्यमें से एक भी पाण्डित्य नहीं है वह बाल है और जो सबसे हीन है वह बालबाल मरण है ॥२६॥

वे पण्डितपण्डित कौन हैं जिनका मरण पण्डितपण्डित कहा जाता है ? ऐसी शङ्का होनेपर आचार्य कहते हैं—

पंडितपंडितमरणं खीणकसाया मरंति केवलिणो। सामान्यमृतेर्विशेषमृति' कर्मतया निर्दिष्टा पंडितपंडितमरणमिति। यथा गोपोपं पुष्ट. इति। 'खीणकसाया', कषन्ति हिंसन्ति आत्मानमिति कषायाः। अथवा कषायशब्देन वनस्पतीनां त्वक्पत्रमूलफलरस उच्यते। स यथा वस्त्रादीनां वर्णमन्यथा संपादयति एवं जीवस्य क्षमामार्दवार्जवसंतोषाख्यगुणान्विनाश्यान्यथा व्यवस्थापयंतीति क्रोधमानमायालोभाः कषाया इति भण्यंते। ते क्षीणाः कषाया येषां ते क्षीणकषायाः। द्रव्यकर्मणा कषायवेदनीयानां विनाशात्सम्भूता अपि भावकषायाः प्रलयमुपगता इति क्षीणकषाया इति भण्यन्ते। केवलमसहायं ज्ञानं इंद्रियाणि मनःप्रकाशादिकं चानपेक्ष्य युगपदशेषद्रव्यपर्यायभासनसमर्थं सदा[1] प्रवर्तते तदेषामस्ति ते केवलिनः। यद्यपि केवलज्ञानवस्तुसामान्ये न प्रवर्तते केवलिशब्दस्तथापि सयोगकेवलिनो मरणस्यासंभवादयोगकेवलिनो ग्रहण। अन्यान्ये क्षीणकषायाः श्रुतकेवलिनश्चेति व्याचक्षते। तेषां तद्व्याख्यानमसमंजसं श्रुतशब्दमंतरेण केवलिशब्दस्य क्वचिदप्यागमे समस्तश्रुतरत्नवत्यपि प्रयोगादर्शनात्। प्रसिद्धशब्दार्थासंभवो यदि स्यात् यथा कथंचिदन्योऽर्थो व्याख्येयः स्यात्। संभवति प्रतीतेऽर्थे कथं तत्परित्यागः। अपि च पांडित्यप्रकर्षः क्षायिकज्ञानदर्शनचारित्रापेक्षस्तत्र सन्निहितो न श्रुतकेवलिनि। विरदाविरदा जीवाः स्थूलकृतात्प्राणातिपातादेर्व्यावृत्ता. इति विरताः सूक्ष्मात्प्राव्यावृत्तेरविरताः। विरता यदि कथमविरता अविरताश्चेत्कथं विरताः इति विरोधाशंका न कार्या। विरत-

---

गा०—पण्डितपण्डितमरणसे क्षीण कषाय और अयोगकेवली मरते हैं। विरताविरत जीव तीसरे मरणसे मरते हैं ॥२७॥

टी०—'पण्डितपण्डितमरण मरते हैं' यहाँ पण्डितपण्डित नामक विशेष मरणको 'मरते हैं' इस सामान्य मरणके कर्मरूपसे कहा है। जैसे बैलके समान पुष्टको सामान्य पुष्ट शब्दसे कहा है। जो 'कषन्ति' अर्थात् आत्माका घात करती हैं उन्हे कषाय कहते हैं। कषाय शब्दसे वनस्पतियोंके छाल, पात्र, जड़ और फलका रस कहा जाता है। वह रस जैसे वस्त्रादिके रंगको बदल देता है इसी प्रकार जीवके क्षमा, मार्दव, आर्जव और सन्तोष नामक गुणोंको नष्ट करके अन्यथा कर देते हैं इसलिए क्रोध, मान, माया, लोभको कषाय कहते हैं। वे कषाय जिनकी क्षीण हो गई हैं—नष्ट हो गई हैं वे क्षीणकषाय होते है। कषाय वेदनीय नामक द्रव्यकर्मोंका विनाश होनेसे उनका निमित्त पाकर होने वाली भावकषाय जिनकी नष्ट हो गई है वे क्षीणकषाय कहे जाते हैं। केवल अर्थात् असहाय ज्ञान, जो इन्द्रियाँ, मन, प्रकाश आदि की अपेक्षा न करके एक साथ समस्त द्रव्य-पर्यायोको जाननेमें समर्थ हैं वह केवलज्ञान है। वह जिनके हैं वे केवली होते हैं। यद्यपि केवली शब्द केवलज्ञान रूप वस्तुसामान्यमें प्रवृत्त नही होता, तथापि सयोगकेवलीका मरण असम्भव होनेसे अयोगकेवलीका ग्रहण होता है। दूसरे व्याख्याकार 'क्षीणकषाय और श्रुतकेवली' ऐसा व्याख्यान करते है। उनका वह व्याख्यान ठीक नहीं है। श्रुत शब्दके बिना केवली शब्दका प्रयोग किसी भी आगममें समस्त श्रुतधारीके लिए नही देखा गया। यदि शब्दका प्रसिद्ध अर्थ असम्भव ही हो तो जिस किसी तरह अन्य अर्थ किया जा सकता है। जब सम्भव अर्थ प्रतीतिसिद्ध है तो उसे कैसे छोड़ा जा सकता है? दूसरे, पाण्डित्यका प्रकर्ष वहाँ क्षायिकज्ञान, क्षायिकदर्शन और क्षायिक चारित्रकी अपेक्षा लिया गया है, वह श्रुतकेवलीमें नहीं है।

जो स्थूल हिंसा आदिसे निवृत्त होनेसे विरत और सूक्ष्म हिंसा आदिसे अनिवृत्त होनेसे अविरत होते हैं वे जीव विरताविरत होते हैं। यदि वे विरत हैं तो अविरत कैसे हैं और अविरत

---

१. सदात्र–अ० आ० मु०।

त्वाविरतत्वयोः अपेक्षाभेदाद्विरोधो नाशङ्कनीयः। यथा द्रव्यपर्यायरूपापेक्षे नित्यानित्यत्वे एकद्रव्याधिकरणे एकस्मिन्नपि समये न विरोधमुपयातः। अथवा अप्रत्याख्यानावरणानां क्षयोपशमे सति स्थूलात्प्राणातिपातादेर्विरतोऽस्मि न सूक्ष्मादित्येक एव परिणाम उपजायते। विरोधश्च नाम अनेकाधिकरणः यथा शीतोष्णस्पर्शादीनां। द्रव्यभावप्राणधारणाज्जीवा इति निरूप्यंते। 'तइएण' तृतीयेन मरणेन म्रियन्ते। वस्तुपरिणामवृत्तिक्रमो यदि स्यात्तदा गण्यमाने[1] द्वित्वं त्रित्वं वा प्रतिपद्येरन्। गुणस्थानापेक्षायां सम्यङ्मिथ्यादृष्टेरेव तृतीयता न संयतासंयतत्वस्य तत्किमुच्यते तृतीयेनेति? मरणस्य तु सामान्यापेक्षायां एकत्वमेवेति न तृतीयता। विशेषापेक्षायां च अतीतानां च अनंतत्वादनागतानां चातिबहुत्वसंभवात्। अत्रोच्यते-सूत्रनिर्दिष्टक्रमापेक्षया तृतीयता ग्राह्या।

विरताविरतपरिणामविशेषनिर्देशादेव जीवद्रव्यस्य गते जीवा इति सूत्रे वचनमपार्थकमिति चेन्नानर्थकं मतांतरनिवृत्तिपरत्वात्। सांख्या हि प्रकृतिधर्मतां मरणस्याभ्युपयन्ति पुरुषस्य सर्वथा नित्यत्वात्। तत्तथा न, उत्पादव्ययध्रौव्यात्मकत्वादात्मनः। अत्रोच्यते—पंडितपंडितमरणादनंतरं पंडितमरणं तदुल्लंघ्य

हैं तो विरत कैसे हैं इस प्रकारके विरोधकी आशङ्का नहीं करना चाहिए। अपेक्षा भेदसे विरतपने और अविरतपनेमें विरोधको कोई स्थान नहीं है। जैसे एक द्रव्यमें एक ही समयमें द्रव्यरूपकी अपेक्षा नित्यपना और पर्यायरूपकी अपेक्षा अनित्यपनामें कोई विरोध नहीं आता। अथवा अप्रत्याख्यानावरण कषायोंका क्षयोपशम होनेपर स्थूल हिंसा आदिसे मैं विरत हूँ किन्तु सूक्ष्म हिंसादिसे विरत नहीं हूँ इस प्रकारका एक ही परिणाम होता है। विरोध तो उनमें होता है जो एक आधारमें न रहकर अनेक आधारोंमे रहते हैं जैसे शीतस्पर्श और उष्णस्पर्श आदिमें विरोध है। अस्तु,

द्रव्यप्राण और भावप्राणोंको धारण करनेसे जीव कहे जाते हैं। विरताविरत जीव तीसरे मरणसे मरते हैं।

शंका—यहाँ तृतीयसे यदि वस्तुके परिणामोंकी वृत्तिका क्रम लेते हैं तो गणना करनेपर दोपना या तीनपना प्राप्त होता है। गुणस्थानकी अपेक्षा सम्यग्मिथ्यादृष्टि गुणस्थान ही तीसरा है, संयतासंयत नहीं है तब कैसे तीसरा कहते हैं। तथा सामान्यकी अपेक्षा मरण तो एक ही है, तीसरापना कैसे? विशेषकी अपेक्षा अतीतमरण अनन्त हैं और भाविमरण उससे भी अधिक सम्भव हैं?

समाधान—सूत्रमें जिस क्रमसे मरणोंका निर्देश किया है उसकी अपेक्षा तीसरा लेना चाहिए।

शंका—विरताविरत परिणाम विशेषका निर्देश करनेसे ही जीवद्रव्यका ज्ञान हो जाता है तब गाथामें जीवा पद व्यर्थ है?

समाधान—व्यर्थ नहीं है यह मतान्तरकी निवृत्तिके लिए है। सांख्य मतवाले मरणको प्रकृतिका धर्म मानते हैं क्योंकि उनके मतमें पुरुष सर्वथा नित्य है। किन्तु ऐसा नहीं है, क्योंकि आत्मा उत्पाद व्यय और ध्रौव्यात्मक है।

शंका—पण्डितपण्डितमरणके अनन्तर पण्डितमरण आता है। उसे छोड़कर तीसरे मरणका

---

१. गणने आ० मु०।

तृतीयस्य स्वामित्वं कस्मात्प्रदर्श्यते क्रमोल्लंघने प्रयोजनं वाच्यम् ? इति चेदुच्यते—उत्कृष्टजघन्यपंडितत्वमध्यवृत्तिपंडितत्वमित्येतद्वाख्यातुं उभयावधिप्रदर्शनं क्रियते। अथवा पंडितमरणे बहुवक्तव्यमस्तीति तत्ताव्यासिकं व्यवस्थाप्य अल्पवक्तव्यतया बालपंडितमेव प्राग् व्याचष्टे।

कतिविधं पंडितमरणं किं स्वामिकं वा इत्यारेकायां इयं गाथा पायोपगमणमरणं इत्यादिका—

पायोपगमणमरणं भत्तपइण्णा य इंगिणी चेव।
तिविहं पंडितमरणं साहुस्स जहुत्तचारिस्स ॥२८॥

पादाभ्यामुपगमनं ढौकनं तेन प्रवर्तितं मरणं पादोपगमनमरणं। इतरमरणयोरपि पादाभ्यामुपगमनमस्तीति त्रैविध्यानुपपत्तिरिति चेन्न मरणविशेषे वक्ष्यमाणलक्षणे रूढिरूपेणायं प्रवर्तते, रूढौ च क्रिया उपादीयमाना शब्दव्युत्पत्त्यर्थैव। यथा गच्छतीति गौरिति शब्दव्युत्पत्तौ क्रियमाणायामपि गमनक्रियाकर्तृतास्तीति

स्वामी क्यों कहा ? क्रमका उल्लंघन करनेका प्रयोजन क्या है यह कहना चाहिए ?

समाधान—उत्कृष्ट और जघन्य पंडितत्वके मध्यमें रहनेवाला पण्डितत्व है यह कहनेके लिए दोनों अवधियोंको बतलाया है। अथवा पण्डितमरणके सम्बन्धमें बहुत कहना है इसलिए उसे अलग रखकर थोड़ा कथन होनेके कारण बालपण्डितमरण को ही पहले कहा है ॥२७॥

पण्डितमरणके कितने भेद हैं और वह किसके होता है, यह कहते हैं—

गाथा—पादोपगमन मरण भक्तप्रतिज्ञा और इंगिणीमरण इस प्रकार पण्डितमरण तीन प्रकार का है। वह शास्त्रमें कहे अनुसार आचरण करनेवाले साधु के होता है ॥२८॥

टी०—पाद अर्थात् पैरो से, उपगमन पूर्वक होनेवालेको पादोपगमन मरण कहते हैं।

शंका—शेष दोनों मरणोमें भी पैरोंसे उपगमन होता है अतः तीन भेद नहीं बनते ?

समाधान—यह पादोपगमन रुढ़िरूपसे मरण विशेषमें प्रवृत्त होता है, इसका लक्षण आगे कहेंगे। रूढ शब्दोमें ग्रहण की गई क्रिया शब्दकी व्युत्पत्तिके लिए ही होती है। जैसे, जो चलती है वह गौ है। इस प्रकार गौ शब्दकी व्युत्पत्ति करने पर भी यद्यपि यह व्युत्पत्ति गमन क्रियाको

सं० टि०—सब प्रतियोंमें इसके पश्चात् एक नीचे लिखी गाथा आती है उसका नम्बर भी २८ है। हमने गाथा २७ की जो उत्थानिका दी है वह भी इस २८ नम्बरकी उत्थानिका है। तथा ऊपर टीकामें विरताविरत परिणामसे जीव द्रव्यका ज्ञान हो जाता है आदि जो शङ्का प्रारम्भ होती है वहाँसे टीकाका भाग इस गाथा २८ की टीकाके रूपमें दिया है। गाथा इस प्रकार है—

पडिदपंडिदमरणं च पंडिदं बालपंडिदं चेव।
एदाणि तिण्णि मरणाणि जिणा णिच्चं पसंसंति ॥

अर्थ—पण्डित पण्डित मरण, पण्डित मरण और बाल पण्डित मरण इन तीन मरणोंकी जिनदेव सदा प्रशसा करते हैं ॥

इस गाथाके साथ न तो उत्थानिकाका कोई सम्बन्ध है और न टीकाका कोई सम्बन्ध है। अतः यह गाथा प्रक्षिप्त है। पं० आशाधरने गाथा २६ की अपनी टीकामें लिखा भी है—'तथा चान्यस्मादानीय सूत्रे पठन्ति' अर्थात् अन्यत्रसे लेकर पढ़ते हैं इसके पश्चात् ही उन्होंने उक्त गाथा दी है। इसलिये हमने इसे मूलमें नहीं रखा।

गोशब्देन न महिष्यादयो भण्यंते। अथवा **पाउग्गगमणमरणं** इति पाठः। भवांतकरणप्रायोग्यं संहननं संस्थानं च इह प्रायोग्यशब्देनोच्यते। अस्य गमनं प्राप्तिः, तेन कारणभूतेन यन्निर्वर्त्यं मरणं तदुच्यते **पाउग्गगमण-मरणमिति**। भज्यते सेव्यते इति भक्तं, तस्य पइण्णा त्यागो भत्तपइण्णा। इतरयोरपि भक्तप्रत्याख्यानसंभवेऽपि रूढिवशान्मरणविशेषे एव शब्दोऽयं प्रवर्तते। इंगिणीशब्देन इंगितमात्मनो भण्यते स्वाभिप्रायानुसारेण स्थित्वा प्रवर्त्यमानं मरणं इंगिणीमरणं। **तिविहं** त्रिविधं त्रिप्रकारं। पंडितमरणं कस्य तद्भवति ? **'साधुस्स'** साधोः **'जधुत्तचारस्स'** यथा येन प्रकारेण उक्तं श्रुते तथा चरितुं शीलं यस्य साधोस्तस्येति यावत्। सदाचारः सर्व एव जनः संयतोऽसयतश्च लोके साधुशब्दवाच्यः, इति सयतपरिग्रहार्थं यथोक्तचारित्वविशेषणं कृतम्।

इतरयोर्बालमरणबालबालयोरित्यनयोः स्वामित्वसूचनार्थंगाथा—

अविरदसम्मादिट्ठी मरंति बालमरणे चउत्थम्मि।
मिच्छादिट्ठी य पुणो पंचमए बालबालम्मि ॥२९॥

अविरसदम्मादिट्ठी इति प्रसिद्धार्थत्वान्न व्याख्येयं। अत्रावसरे इदं चोद्यमाशंक्यते। **बोच्छं आराधणं कमसो** इति प्रतिज्ञातं। सा च द्विप्रकारा दर्शनाराधना चारित्राराधना चेति। तद्व्याख्यानमकृत्वा मरणविकल्पा-

---

लेकर है किन्तु गो शब्दसे भैंस आदि नहीं कहे जा सकते। अथवा 'पाउग्गगमणमरणं' पाठ है। यहाँ प्रायोग्य शब्दसे संसारका अन्त करनेके योग्य संहनन और संस्थान कहे जाते हैं। उसके गमन अर्थात् प्राप्तिको प्रायोग्यगमन कहते हैं। उसके कारण होनेवाले मरणको प्रायोग्यगमन मरण कहते हैं। 'भज्यते' अर्थात् जो सेवन किया जाये वह भक्त है। उसकी 'पइण्णा' अर्थात् त्याग भत्त-पइण्णा है। भोजनका त्याग शेष दोनों मरणोंमें भी सम्भव है। फिर भी रूढ़िवश भत्तपइण्णा शब्द मरण विशेषका ही बोधक होता है। इंगिणी शब्दसे आत्माका इंगित अर्थात् संकेत कहा जाता है। अपने अभिप्रायके अनुसार रहकर होनेवाला मरण इंगिणीमरण है। इस तरह पण्डितमरण तीन प्रकार का है। पण्डितमरण किसके होता है ? श्रुतमें जिस प्रकारसे कहा है उसी प्रकारसे आचरणशील साधुके होता है। सभी सदाचार वाले मनुष्य, वे संयमी हो या असंयमी, लोकमें साधु शब्दसे कहे जाते हैं। इसलिये संयमीका ग्रहण करनेके लिए 'यथोक्तचारी' विशेषण दिया है ॥२८॥

विशेषार्थ—अपने पैरोंसे चलकर अर्थात् संघसे निकल कर योग्य देशमें आश्रय लेना पादोपगमन है। इसमें न स्वयं अपनी सेवा करता है और न दूसरेसे कराता है। भक्त प्रतिज्ञा-मरणमें स्वयं भी अपनी वैयावृत्य करता है और दूसरेसे भी कराता है। इंगिणीमरणमें अपनी वैयावृत्य स्वयं ही करता है दूसरेसे नहीं कराता। पादोपगमनको प्रायोपगमन भी कहते हैं और प्रायोपवेशन भी कहते हैं। 'प्राय' का अर्थ संन्यास है॥

अब शेष बालमरण और बालबालमरणके स्वामियोंको कहते हैं—

गाथा—अविरत सम्यग्दृष्टि चतुर्थ बालमरणमें मरते हैं। मिथ्यादृष्टि पाँचवें बालबाल-मरणमें मरते हैं ॥२९॥

टी०—इस गाथाका अर्थ प्रसिद्ध होनेसे इसकी व्याख्या नहीं करते।

शंका—यहाँ यह शंका करते हैं। ग्रन्थकारने 'क्रमसे आराधना को कहूँगा' ऐसी प्रतिज्ञा की है। वह आराधना दो प्रकार की है—दर्शनाराधना और चारित्राराधना। उनका व्याख्यान

प्रकरणाभिसंबंध कस्मान्निर्दिश्यंते। प्रस्तुतपरित्यागमप्रस्तुताभिधानं च न क्षमंते विद्वांसः। अत्रोच्यते—न अप्रस्तुतं अंतरनिर्दिष्टं मरणं। आराधनानुगतमरणस्यैवेह शास्त्रेऽभिधेयत्वेनेष्टत्वात्। आराधनायाश्च आराधकमंतरेणासंभवात्। स्वामी च निर्देष्टव्य एवेति सूरेरभिप्रायः॥

अत एव प्रस्तुतां प्राथमिकीं दर्शनाराधनां आचष्टे—

तत्थोवसमियसमत्तं खइयं खओवसमियं वा।
आराहंतस्स हवे सम्मत्ताराहणा पढमा ॥३०॥

तत्थोवसमियसम्मत्तमित्यादिना। अथवा अंतरसूत्रनिर्दिष्टं बालमरणव्याख्यानं प्रस्तुतां प्राथमिकीं सम्यक्त्वाराधनां पुरस्कृत्य प्रवर्तते इत्यत आह—तत्थोवसमियसमत्तं। अथवा सम्यग्दर्शनविशेषस्य कस्यचिदेव आराधना उत सर्वस्येत्याशंका। कुतः संदेहः? आचार्यमतभेदेन पदानामर्थद्वैविध्यात्सामान्यं पदानामभिधेयं। 'पदाच्छ्रुतार्थसामान्यनिर्भासप्रतीत्युत्पत्तेर्न हि गामित्यतः पदाच्छुक्लां कृष्णां शबलामिति वा प्रतीतिः, खंडां मुंडां इति वा जायते। यच्च पदोपलब्धिकार्यभूतायां बुद्धौ न प्रतिभाति तत्कथं शब्दस्याभिधेयतां गंतुमुत्सहते। अप्रतीयमानस्याप्यर्थत्वे अयमेवास्यार्थो नान्य इतीयं व्यवस्था न स्यात्। तेन सामान्यमेवार्थ इति। अन्ये तु मन्यते त्यागोपादानोपेक्षारूपा हि लोकव्यवहृतिस्तत्र पुमांसं प्रवर्तयितुं शब्दाः प्रयुज्यंते। दुःखसाधनं यत्तस्य-

---

न करके मरणके भेद और उनके स्वामियोंका कथन क्यों किया गया? विद्वान् गण प्रस्तुतके परित्याग और अप्रस्तुतके कथनको सहन नहीं करते?

समाधान—बीचमें जो मरणका कथन किया है वह अप्रस्तुत नहीं है। आराधना पूर्वक होनेवाले मरणका ही इस शास्त्रमें कथन करना इष्ट है। वही इसका अभिधेय—प्रतिपाद्य विषय है। और आराधकके बिना आराधना होना असम्भव है। अतः स्वामीका भी कथन करना ही चाहिए। यह आचार्यका अभिप्राय है ॥२९॥

इसीलिए प्रस्तुत प्रथम दर्शनाराधना को कहते हैं—

गाथा—उन सम्यक्त्वोंमें औपशमिक सम्यक्त्व, क्षायिक सम्यक्त्व अथवा क्षायोपशमिक सम्यक्त्वकी आराधना करने वालेके प्रथम सम्यग्दर्शन आराधना होती है ॥३०॥

टी०—अथवा इसके पूर्वकी गाथामें कहा बालमरणका व्याख्यान प्रस्तुत प्रथम सम्यक्त्वाराधनाको लेकर ही किया है अतः यहाँ उसका कथन करते हैं।

शंका—यहाँ शंका होती है कि किसी सम्यग्दर्शन विशेषकी आराधना होती है या सबकी होती है? इस सन्देहका कारण यह है। आचार्योंके मतभेदसे पदोंका अर्थ दो प्रकारका माना जाता है। एक मत है पदोंका अभिधेय सामान्य है क्योंकि पदसे सामान्य अर्थका बोध होता है। 'गौ' इस पदसे सफेद, काली या चितकबरी गौ की अथवा खण्डी या मुण्डी गौ की प्रतीति नहीं होती और पदकी उपलब्धिकी कार्यभूत बुद्धिमें जिसका प्रतिभास नहीं होता उसे शब्दका वाच्य कैसे माना जा सकता है। शब्द सुनकर जिस अर्थकी प्रतीति नहीं होती उसे भी यदि उसका अर्थ माना जाता है तो इस पदका यही अर्थ है, अन्य नहीं, यह व्यवस्था नहीं बनेगी। इसलिए सामान्य ही पदका अर्थ है।

अन्य आचार्य मानते हैं कि लोक व्यवहार, त्याग, ग्रहण और उपेक्षा रूप है। उस व्यवहारमें पुरुषोंको प्रवृत्त करनेके लिए शब्दोंका प्रयोग किया जाता है। जो दुःखका साधन होता है

ज्यते । सुखसाधनमुपादीयते । तदुभयस्यासंपादकमुपेक्ष्यते । विशिष्टमेव च वस्तु सुखादीनां संपादकं । तथाहि—स्त्रीवस्त्रगंधमाल्यादिकं अतिशयितमेवादातुं उत्सहन्ते । दुःखसाधनं चात्मनिकटवर्त्येव कंटकादिकं परिजिहीर्षन्ति । तेन शब्देनापि तदर्थिनां तथाभूतमेव वस्तु प्रतिपाद्यमित्यभ्युपगन्तव्यं । अतो विशेषः पदानामर्थः इति । साकल्यानामनेकविशेषवर्तिनां पदानामेकपदप्रयोगाद्यदि नाम विशेषो न प्रतीयते नैतावता विशेषस्याभिधेयताहानिः पदांतरसमवधाने विशेषप्रतीतेरनुभवसिद्धत्वात् इति । जैनानामुभयं पदार्थः पदानामुभयत्र प्रतीत्युत्पत्तेः । तथाहि—न हिंस्याः प्राणिनः प्राणिसामान्यं परिहार्यत्वेन प्रतीयते । देवदत्तमानयेत्युक्ते पुरुषविशेषमवगच्छन्ति । ततो न ज्ञायते 'सम्मत्तम्मि य' इत्यत्र सामान्यं सम्यक्त्वं गृहीतं उत तद्विशेष इति तेन तत्संदेहनिवृत्तिः क्रियते । 'तत्थ' तेषु सम्यक्त्वेषु । 'उवसमियसम्मत्तं' अनंतानुबंधिक्रोधमानमायालोभानां सम्यक्त्वमिथ्यात्वसम्यङ्मिथ्यात्वानां च सप्तानामुपशमादुपजातं तत्त्वश्रद्धानं औपशमिकं सम्यक्त्वं । तासामेव सप्तप्रकृतीनां क्षयादुपजातवस्तुयाथात्म्यगोचरा श्रद्धा क्षायिकं दर्शनं । तासामेव कासांचिदुपशमात् अन्यासां च क्षयादुपजातं श्रद्धानं क्षायोपशमिकं । वा शब्दः प्रत्येकं संबध्यते । औपशमिकं वेत्यादिना क्रमेण । 'आराधंतस्स' आराधयतः । 'हवे' भवेत् । 'सम्मत्ताराहणा' सम्यक्त्वाराधना । 'पढमा' प्रथमा । "अविरदसम्मादिट्ठी मरंति बालमरणे" इत्युक्तं । तत्राविरतग्रहणं सम्यग्दृष्टेर्विशेषणत्वेनोपात्तं । प्रतीतेन हि

उसको त्याग दिया जाता है। सुखके साधनको ग्रहण किया जाता है। जो न दुःखका साधन होता है, न सुख का, उसकी उपेक्षा की जाती है। तथा विशिष्ट वस्तु ही सुखादिका साधक होती है। जैसे स्त्री, वस्त्र, गंध, माला आदि जो उत्तम होती है उसे ही ग्रहण करनेके लिए उत्साहित होते हैं। दुःखके साधन कण्टक आदि अपने निकटवर्ती भी हों तो उन्हें छोड़ देते हैं अतः शब्दके द्वारा भी सुखादिके अर्थी पुरुषोंको विशिष्ट वस्तु ही प्रतिपाद्य है ऐसा स्वीकार करना चाहिए। अतः पदोंका अर्थ विशेष है। समानाकार अनेक विशेषोंमें रहनेवाले पदोंका एक पदके प्रयोगसे यदि विशेषका अर्थ प्रतीत नहीं होता तो इससे विशेषके शब्दार्थ होनेको कोई हानि नहीं पहुँचती, क्योंकि उसके साथ अन्य पदका सम्बन्ध होनेपर विशेषकी प्रतीति अनुभवसे सिद्ध है।

समाधान—जैनोंके मतमें पदोंका अर्थ सामान्य भी है और विशेष भी है। दोनों की ही प्रतीति होती है। वही दिखलाते हैं—

'प्रणियोंकी हिंसा नहीं करनी चाहिए' ऐसा कहनेपर प्राणी सामान्य अर्थात् प्राणिमात्रकी हिंसा नहीं करनी चाहिए यही प्रतीति होती है। और 'देवदत्तको लाओ' ऐसा कहनेपर पुरुष विशेषका बोध होता है। इस तरह पदका अर्थ दोनों होनेसे यह ज्ञात नहीं होता कि 'सम्मत्तम्मि' पदसे सामान्य सम्यक्त्व ग्रहण किया है या विशेष सम्यक्त्व ग्रहण किया है? इसलिए सन्देहकी निवृत्तिके लिए औपशमिक आदि सम्यक्त्व कहा है।

अनन्तानुबन्धी क्रोध मान माया लोभ, सम्यक्त्व, मिथ्यात्व और सम्यक्मिथ्यात्व इन सात प्रकृतियोंके उपशमसे उत्पन्न हुआ तत्त्वश्रद्धान औपशमिक सम्यक्त्व है। उन्हीं सात प्रकृतियोंके क्षयसे उत्पन्न हुई श्रद्धा, जो वस्तुओंके यथार्थस्वरूपको विषय करती है, क्षायिक सम्यग्दर्शन है। उन्हींमेंसे किन्हींके उपशम और अन्य प्रकृतियोंके क्षयसे उत्पन्न श्रद्धान क्षायोपशमिक दर्शन है। 'वा' शब्द प्रत्येकके साथ लगता है। 'अविरदसम्यग्दृष्टी बालमरणसे मरता है' ऐसा जो पहले कहा है उसमें 'अविरत' पदका ग्रहण सम्यग्दृष्टीके विशेषणके रूपमें किया है। जो प्रतीत

विशेष्येण भाव्यम् । तथाचाभाणि—प्रतीतपदार्थयोर्विशेषणविशेष्यभावः इति ।

तस्मात्कीदृग्जीवोऽभिधेयः सम्यग्दृष्टिशब्दस्येति प्रश्नस्योत्तरमाह—

सम्माद्दिट्ठी जीवो उवइट्ठं पवयणं तु सद्दहइ ॥
सद्दहइ असब्भावं अयाणमाणो गुरुणियोगा ॥३१॥

सम्मादिट्ठी जीवो इत्यनया । अत्रैवं पदघटना 'उवइट्ठं पवयणं तु सद्दहदि यो जीवो सो सम्मादिट्ठी' इति । उवइट्ठं[1] उपदिष्टं कथितं । ननु उपपूर्वो दिशिरुच्चारणक्रियः । तथा हि प्रयोगः— उपदिष्टा वर्णा उच्चारिताः वर्णा इति । सत्यम्, समुच्चारणक्रियस्तत्रैव वर्तते नान्यत्र इत्यत्र न निबंधनं किंचित् । यथा गां दोग्धि इत्यादिषु सास्नादिमति दृष्टप्रयोगोऽपि गोशब्दो वागादिषु अपि वर्तते एवमिहापीति किं न गृह्यते ? उपदिष्टमपि न वेत्ति इत्यादौ कथितमिति प्रतीतिरुपजायते सा कथमपास्यते । प्रयोगव्यवृत्तिसमधिगम्यो हि शब्दार्थः । प्रोच्यन्ते जीवादयः पदार्था अनेनास्मिन्निति वा प्रवचनं जिनागमः । प्रकर्षप्रोक्तः दृष्टेष्टप्रमाणाविरोधिता वस्तुयाथात्म्यानुसारिता च । प्रवचनवाच्योऽर्थः साहचर्यात्प्रवचनमिति संगृह्यते । तु शब्दः एवकारार्थः । स च क्रियापदात्परतो द्रष्टव्य. । व्याख्यातं जैनागमार्थं यः श्रद्दधात्येव न तु श्रद्दधाति (?) इत्ययोगव्यवच्छेदः । स जीवः सम्मादिट्ठी सम्यग्दृष्टिशब्दवाच्य इति प्रतीतपदार्थकत्वमादर्शितं । 'सद्दहदि' श्रद्धानं

होता है वह विशेष्य होता है । कहा भी है—प्रतीत पदार्थोंमें विशेषण विशेष्यभाव होता है ॥३०॥

सम्यग्दृष्टी शब्दका वाच्य किस प्रकारका जीव होता है ? इस प्रश्नका उत्तर देते हैं—

गा०—उपदिष्ट अर्थात् कथित जिनागममें श्रद्धान करता ही है जो जीव वह सम्यग्दृष्टी है । किन्तु नहीं जानते हुए गुरुके नियोगसे असत्य भी अर्थका श्रद्धान करता है ॥३१॥

टी०—शंका—उपपूर्वक दिशि धातुका अर्थ उच्चारण करना है । जैसे 'उपदिष्टवर्ण' का अर्थ उच्चारित वर्ण है । आपने उपदिष्टका अर्थ कथित कैसे किया है ?

समाधान—आपका कथन सत्य है किन्तु समुच्चारण क्रिया अर्थ वाली धातु उसी अर्थमें है, अन्य अर्थमें नहीं है इसमें हम कोई निबन्धन नही देखते । जैसे 'गौ दुहता है' इत्यादि वाक्योंमें गौ शब्दका प्रयोग गलकम्बलवाले पशुके अर्थमें देखा जाता है । फिर भी गौ शब्द वाणी आदि अर्थोंमें भी देखा जाता है । इसी प्रकार यहाँ भी क्यों नहीं स्वीकार करते । 'उपदिष्टको भी नहीं जानता' इत्यादिमें 'कथित' अर्थकी प्रतीति होती है उसे कैसे छोड़ा जा सकता है ? शब्दका अर्थ उसके प्रयोगसे जाना जाता है ।

जिसके द्वारा अथवा जिसमें जीवादि पदार्थ कहे हैं वह प्रवचन है उसका अर्थ जिनागम है । प्रवचनमें, 'प्र' का अर्थ प्रकृष्ट है । प्रत्यक्ष और अनुमान प्रमाणसे अविरुद्ध और वस्तुके यथार्थ स्वरूपका अनुसारी होना वचनकी प्रकृष्टता है यह पहले कहा है । साहचर्यसे प्रवचनके द्वारा कहे गये अर्थको भी प्रवचन कहते हैं । 'तु' शब्दका अर्थ 'ही' है । उसे क्रियापद के आगे रखना चाहिये । अतः जो व्याख्यात जैनागम के अर्थका श्रद्धान करता ही है वह जीव सम्यग्दृष्टी शब्दके द्वारा कहा जाता है, इस प्रकार दिखलाया है । गुरु अर्थात् व्याख्याताके नियोगसे इसका यह अर्थ है

१. तथाभाविप्र—आ० मु० ।

करोति । 'असब्भावमवि' असत्यमप्यर्थं । 'अजाणमाणो' अजानानः । किं ? विपरीतमनेनोपदिष्टमिति । गुरोर्नियोगाद्गुरुरयमर्थं इति कथनान्नियुज्यते प्रतिपत्ता श्रोता अनेन वचनेन इति नियोगः कथनं । सर्वज्ञ-प्रणीतस्यागमस्यार्थः आचार्यपरंपरया अविपरीतः श्रुतोऽवधृतश्चानेन सूरिणा उपदिष्टो ममेति सर्वज्ञाज्ञाया रुचिरस्यास्तीति । आज्ञारुचितया सम्यग्दृष्टिर्भवत्येवेति भावः ।

किमेवं विपरीतं प्रतिपद्यमानोऽपि सर्वदा सम्यग्दृष्टिरेव ? नेत्याह—

सुत्तादो तं सम्मं दरसिज्जंतं जदा ण सद्दहदि ॥
सो चेव हवइ मिच्छादिट्ठी जीवो तदो पहुदि ॥३२॥

सुत्तादो इति । 'सुत्तादो' सूत्रात् । 'तं' आत्मना विपरीतं गृहीतमर्थं । 'सम्मं' सम्यक् अविपरीतरूपेण । 'दरसिज्जंतं दर्श्यमानं प्ररूप्यमाणं अन्येन आचार्येण । 'जदा' यदा यस्मिन्काले । 'ण सद्दहदि' न श्रद्दधाति । 'सो चेव' स एव सम्यग्दृष्टितयोक्तः । 'मिच्छादिट्ठी हवइ' मिथ्यादृष्टिर्भवति । आप्ताज्ञाश्रद्धानवैकल्यात् अर्थयाथात्म्याश्रद्धानाच्च । 'तदो' ततः । 'पहुदि' प्रभृति आरभ्य । असंदिग्धसूत्रांतरदर्शितार्थाश्रद्धानादारभ्येति यावत् ।

'सुत्तादो तं सम्मं दरसिज्जंतं' इत्युक्तं केन रचितानि सूत्राणि प्रमाणभूतानीत्यत आह—

सुत्तं गणधरगधिदं तहेव पत्तेयबुद्धकहियं च ॥
सुदकेवलिणा कहियं अभिण्णदसपुव्विगधिदं च ॥३३॥

ऐसा कहनेसे श्रोता इस वचनके द्वारा नियुक्त किया जाता है इस लिये उसे नियोग कहा है, गुरुने विपरीत कथन किया है यह न जानते हुए असत्य भी अर्थका श्रद्धान करता है । सर्वज्ञके द्वारा प्रणीत आगमका अर्थ आचार्य परम्परासे जो ठीक-ठीक सुना और अवधारित किया है वही आचार्यने मुझे कहा है इस प्रकार सर्वज्ञकी आज्ञामें उसकी रुचि है और आज्ञामें रुचि होनेसे वह सम्यग्दृष्टी ही है यह उक्त कथनका भाव है ॥३१॥

क्या वह इस प्रकार विपरीत श्रद्धा करते हुए भी सर्वदा सम्यग्दृष्टि ही रहता है ? इसका उत्तर देते हैं कि नहीं—

गा०—सूत्रसे प्रथम गुरुके उपदेशसे विपरीत रूपसे ग्रहण किये अर्थको सम्यक् अविपरीत रूपसे अन्य आचार्यके द्वारा दिखलाने पर जब श्रद्धा नहीं करता । वही सम्यग्दृष्टी उस समय से मिथ्यादृष्टि होता है ॥३२॥

टी०—प्रथम गुरुके निर्देशसे विपरीत अर्थका श्रद्धान करने वाले उस सम्यग्दृष्टीको जब कोई दूसरे आचार्य गणधर आदिके द्वारा रचे गये आगम प्रमाणका आश्रय लेकर यथार्थ अर्थ बतलावें और वह उसपर श्रद्धा न करके अपने विपरीत अर्थको ठीक समझे तो सन्देह रहित अन्य शास्त्रोंमें दिखलाये गये अर्थपर श्रद्धान न करनेके समयसे लेकर वह मिथ्यादृष्टी होता है क्योंकि वह आप्तकी आज्ञाका श्रद्धान नहीं करता तथा वस्तुके यथार्थ स्वरूपकी उसे श्रद्धा नहीं है ॥३२॥

ऊपर 'सूत्रसे सम्यक् दिखलाने पर' ऐसा कहा है तो किसके द्वारा रचित सूत्र प्रमाण होते हैं यह कहते हैं—

गा०—जो गणधरके द्वारा रचा हुआ हो, प्रत्येक बुद्धके द्वारा कहा हुआ हो, या श्रुतकेवली के द्वारा कहा हुआ हो या अभिन्न दशपूर्वीके द्वारा रचा गया हो वह सूत्र है ॥३३॥

'सुत्तं गणधरगथिदं' इति । सुत्तं सूत्रं । गणशब्देन द्वादशगणा उच्यंते । तान्धारयन्ति इति गणधराः । दुर्गतिप्रस्थिता हि तेन रत्नत्रयोपदेशेन धार्यन्ते ते सप्तविधर्द्धिमुपगताः । उक्तं च—

बुद्धितवविउव्वणोसधिरसबलं च अक्खीणं ॥
सत्तविध इड्ढिपत्ता गणधरदेवा णमो तेसिं ॥ [ ]

इति । तैः 'गथिदं' ग्रथितं संदृब्धं । केवलिभिरुपदिष्टं अर्थं ते हि ग्रथ्नन्ति । तथाप्युक्तं[1]—'अत्थं कहंति अरहा गंथं गंथंति गणधरा तेसिं । 'तहेव' तथैव । 'पत्तेयबुद्धगथिदं' च प्रत्येकबुद्धग्रथितं च । श्रुतज्ञानावरणक्षयोपशमात् परोपदेशमंतरेणाधिगतज्ञानातिशयाः प्रत्येकबुद्धाः । 'सुदकेवलिणा' समस्तश्रुतधारिणा कथितं चेति । अभिण्णदसपुव्विकथिदं च । दशपूर्वाण्यधीयमानस्य विद्यानुप्रवादस्थाः क्षुल्लकविद्या महाविद्याश्च अंगुष्ठप्रसेनाद्याः प्रज्ञप्त्यादयश्च तैरागत्य रूपं प्रदर्श्य, सामर्थ्यं स्वकमभिधाय पुरः स्थित्वा आज्ञाप्यतां किमस्माभिः कर्तव्यमिति तिष्ठंति । तद्वचः श्रुत्वा न भवतीभिरस्माकं साध्यमस्तीति ये वदन्ति अचलितचित्तास्ते अभिन्नदशपूर्विणः । एतेषामन्यतमेन ग्रथितं सूत्रं प्रमाणं । प्रमाणेन केवलेन श्रुतेन वा गृहीतमर्थं अरक्तद्विष्टाः संतो यदुपदिशंति ततस्तद्वचसां प्रामाण्यं इति भावः । प्रमाणपरिदृष्टार्थगोचरं अरक्तद्विष्टवक्तृप्रभवं वचः प्रमाणं । यथा पितुररक्तद्विष्टस्य स्वप्रत्यक्षगोचरं वचः घटोऽयं[2] रक्त इति । तथा च गणधरादीनां वचः प्रमाणं परिदृष्टार्थगोचरं अरक्तद्विष्टवक्तृप्रभवम् ।

टी०—गण शब्दसे बारहगण कहे जाते हैं। जो उन्हे धारण करते हैं वे गणधर हैं। अर्थात् दुर्गतिके मार्ग पर चलते हुए गणोंको रत्नत्रयके उपदेश द्वारा धारण करते हैं उन्हे सम्यग्दर्शनादिमें स्थापित करते हैं। वे गणधर सात प्रकारकी ऋद्धियोंको प्राप्त होते हैं। कहा है—बुद्धिऋद्धि, तपऋद्धि, विक्रियाऋद्धि, औषधिऋद्धि, रसऋद्धि, बलऋद्धि, और अक्षीणऋद्धि इन सात प्रकारकी ऋद्धियोंको प्राप्त गणधरदेव होते हैं। उन्हें नमस्कार हो ॥

वे गणधर केवलियोंके द्वारा उपदिष्ट अर्थको ग्रन्थरूप गूंथते है। कहा है—अरहन्त अर्थको कहते हैं और उनके गणधर उसे ग्रन्थका रूप देते हैं। श्रुतज्ञानावरणके क्षयोपशमसे परोपदेशके बिना जो ज्ञानातिशयको प्राप्त होते हैं वे प्रत्येकबुद्ध हैं। जो समस्त श्रुतके धारी होते हैं वे श्रुतकेवली हैं। दश पूर्वोका अध्ययन करते हुए दसवें पूर्व विद्यानुवादमें स्थित अंगुष्ट प्रसेना आदि क्षुल्लक विद्याएँ और प्रज्ञप्ति आदि महाविद्याएँ आकर अपना रूप दिखाकर और अपनी शक्ति कहकर सामने खड़ी होकर निवेदन करती हैं कि हमारे योग्य कार्य बतायें। उनके वचन सुनकर जो कहते हैं कि हमें आपसे कोई काम नही है, वे अचल चित्त वाले अभिन्न दसपूर्वी होते हैं। इनमेंसे किसी भी एकके द्वारा रचा गया सूत्र प्रमाण है। केवल ज्ञानरूप अथवा श्रुतज्ञानरूप प्रमाणसे द्वारा गृहीत अर्थको रागद्वेषसे रहित होकर कहते हैं इस लिये इनके वचन प्रमाण हैं। जो वचन प्रमाणके द्वारा देखे गये अर्थको कहते हैं और रागद्वेषसे रहित वक्तासे उत्पन्न होते हैं वे प्रमाण हैं। जैसे रागद्वेषसे रहित पिताके द्वारा स्वयं प्रत्यक्षसे जानकर कहे गये वचन 'यह घड़ा लाल है' प्रमाण है। उसी तरह गणधर आदिके वचन प्रमाण हैं क्योंकि अच्छी तरहसे देखे गये अर्थको कहते हैं और रागद्वेषसे रहित वक्तासे उत्पन्न हुए हैं ॥३३॥

---

१. अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं ।—आव० नि० ९२ ।

२. रक्त इति आ० मु० ।

भवतु भावीनां अन्यतमेन प्रणीतं सूत्रं प्रमाणं तदर्थकथनं तु को विपरीतं करोति को वाऽविपरीत-मित्यारेकायां अविपरीतार्थकथनकारिणो लक्षणमाहोत्तरगाथया—

णिहिदत्थो संविग्गो सुत्तुवदेसे ण संकणिज्जो हु ।
सो चेव मंदधम्मो सुत्तुवदेसम्मि भजणिज्जो ॥३४॥

'णिहिदत्थो संविग्गो' गृहीत आत्मसात्कृतोऽवधारितोऽर्थः सूत्रस्य येन सः गृहीतार्थः अवगतसूत्रार्थ इति यावत्। 'संविग्गो' संसाराद् द्रव्यभावरूपात् परिवर्तनात् भयमुपगतः। विपरीतोपदेशे रागात्कोपाद्वा अनंतकालं संसारपरिभ्रमणं मम मिथ्यादृष्टेः सतो भविष्यतीति यः सभयः। 'सुत्तुवदेसे' अर्थस्याभिधेयस्य सूत्राणामुपदेशे। 'ण संकणिज्जो' नैवाशंक्यः। हु शब्द एवकारार्थः। 'सो चेव' स एव च गृहीतार्थः। 'मंदधम्मो' धर्मशब्दश्चारित्रवाची "चारित्तं खलु धम्मो धम्मो जो सो समोत्ति णिद्दिट्ठो" [प्रवच० १।७] इति वचनात्। ततो मंदचारित्र इत्यर्थः। 'सुत्तुवदेसम्हि' सूत्रार्थव्याख्याने ? 'भयणिज्जो' भाज्यः। यदि सूत्रानुसारि युक्त्यनुगतं वा तद्व्याख्यानं ग्राह्यमन्यथा नेति यावत्।

किमधिगतसप्रपंचवचनार्थो भूत्वा श्रद्धानवान्यः स एव च सम्यग्दृष्टिः, स एव सम्यक्त्वाराधक इत्यारेकायामाह अन्योऽप्यस्तीति—

धम्माधम्मागासाणि पोग्गला कालदव्व जीवे य ।
आणाए सद्दहन्तो समत्ताराहओ भणिदो ॥३५॥

इनमेंसे किसी एकके द्वारा रचा गया सूत्र प्रमाण रहो। किन्तु उसके अर्थका कथन कौन विपरीत करता है और कौन अविपरीत करता है ? ऐसी शङ्का होनेपर अविपरीत अर्थका कथन करने वालेका लक्षण आगेकी गाथासे कहते हैं—

गा०—जिसने सूत्रके अर्थको ग्रहण किया है, संसारसे भयभीत है वह सूत्रोंके उपदेशमें शङ्का करनेके योग्य नहीं ही है। वही गृहीतार्थ मंद चरित्र वाला हो तो सूत्रके व्याख्यानमें भाज्य है ॥३४॥

टी०—जिसने सूत्रका अर्थ अच्छी तरह ग्रहण करके उसे अपने मनमें अवधारित किया है और द्रव्य भाव परिवर्तन रूप संसारसे डरता है, राग या द्वेषसे विपरीत उपदेश करने पर मुझे मिथ्यादृष्टी होकर अनन्तकाल संसारका परिभ्रमण करना होगा इस प्रकारका जिसे भय है वह तो सूत्रोंके अर्थका उपदेश करनेमें शङ्का करने योग्य बिल्कुल नहीं है। गाथामें आये हुए खु शब्दका अर्थ 'ही' है। किन्तु वही गृहीतार्थ यदि मन्दधर्मी है, यहाँ धर्मशब्द चरित्रका वाचक है क्योंकि कहा है—चारित्र ही धर्म है और जो धर्म है उसे सम कहा है। अतः मन्द धर्मका अर्थ मन्द चारित्र लेना चाहिये। तो उसका व्याख्यान यदि सूत्रके अनुसार अथवा युक्तिके अनुकूल हो तब तो ग्रहण करने योग्य है अन्यथा नहीं है ॥३४॥

क्या जो विस्तार पूर्वक सूत्रके अर्थको जानकर श्रद्धान करता है वही सम्यग्दृष्टी है, वही सम्यक्त्वका आराधक है ? ऐसी शङ्का करनेपर आचार्य कहते हैं कि अन्य भी सम्यग्दृष्टी होता है—

गा०—धर्मद्रव्य, अधर्मद्रव्य, आकाशद्रव्य, पुद्गलद्रव्य, कालद्रव्य और जीवद्रव्यको आज्ञासे श्रद्धान करने वाला सम्यक्त्वका आराधक होता है ॥३५॥

'धम्माधम्मागासाणि त्ति'—जीवपुद्‌गलयोः स्वावस्थिताकाशदेशाद्देशान्तरं प्रति गतिः परिस्पंदपर्यायैः परप्रयोगतः स्वभावतो वा विद्यते । अन्येषां निष्क्रियतेति न गतिरस्ति । अनयोर्गतिपर्यायस्य बाह्यं गतिहेतुत्व-संज्ञितं गुणं धारयतीति धर्मः । तं न धारयतीत्यधर्मः । यद्यपि जीवादिष्वपि अस्ति गतिहेतुतायाः साधारणं तथापि न तत्र धर्मशब्दस्य वृत्तिः । प्रतिनियतविषया रूढयः इत्युक्तमेव । अथवा स्थितेरुदासीनहेतुत्वादधर्मः । न च जीवादीनां स्थितेरुदासीनहेतुत्वमस्ति । तावेतावुभावपि असंख्यातप्रदेशौ एकतामेवोद्वहन्तौ सूक्ष्मौ निःक्रियौ रूपादिरहितौ । आकाशं अनंतप्रदेशाध्यासितं सर्वेषां अवकाशदानसामर्थ्योपेतं । पुद्‌गलास्तु रूपरसगंधस्पर्शवंतः अणुस्कंधरूपभेदाद्‌द्विविधाः । कालो निश्चयेतरविकल्पः । जीवा उपयोगात्मकाः । एतानर्थान् । 'आणाए' आज्ञया आप्तानां । सावधारणं चेदं । आज्ञयैव षड् द्रव्याणि सन्तीति श्रद्धातव्यं भवतीति आप्तवचनबलेनैव श्रद्धां तत्र करोति न निक्षेपनयादिमुखेन, प्रवृत्तयाधिगत्या सोऽपि सम्यक्त्वस्याराधकः ।

जीवद्रव्यविषयं नियोगतः श्रद्धानं कर्तव्य इत्येतदाख्यानायोत्तरगाथा—

संसारसमावण्णा य छव्विहा सिद्धिमस्सिदा जीवा ।
जीवणिकाया एदे सद्दहिदव्वा हु आणाए ॥३६॥

'संसारं' चतुर्गतिपरिभ्रमणं । 'समावण्णा' सम्प्राप्ताः शोभनाशोभनशरीरग्रहणमोचनाभ्युद्यताः, स्वयोग-त्रयानीतपुण्यपापोदयजनितसुखदुःखानुभवनिरताः । त्रसस्थावरकर्मोदयापादितत्रसस्थावरभावाः, विचित्रमति-

---

टी०—जीव और पुद्‌गलमें अपने रहनेके आकाशसे अन्य देशमें गमन हलन चलन रूप पर्यायोंके द्वारा परके प्रयोगसे अथवा स्वभावसे होता है । अतः गतिमान ये दो ही द्रव्य हैं । क्रिया रहित होनेसे अन्य द्रव्योंमें गति नहीं है । इन दोनों द्रव्योंकी गतिपर्यायका बाह्य गति हेतुत्व नामक गुण जो धारण करता है वह धर्म है । और जो उस गुणको धारण नहीं करता वह अधर्म है । यद्यपि जीवादिमें भी गतिहेतुताका साधारण धर्म रहता हैं तथापि उनमें धर्म शब्दकी प्रवृत्ति नहीं है, उन्हें धर्मके नामसे नही कहते, क्योंकि रूढ़ि शब्द प्रतिनियत विषयोंमें रहते हैं यह पहले कहा ही है । अथवा जो स्थितिका उदासीन हेतु है वह अधर्मद्रव्य है । जीवादि द्रव्य स्थितिके उदासीन हेतु नहीं हैं । ये दोनों धर्म और अधर्म द्रव्य असंख्यात प्रदेशी है, एक एक हैं, सूक्ष्म और निष्क्रिय हैं तथा इसमें रूप रस आदि गुण नही रहते । आकाश द्रव्य अनन्त प्रदेश वाला है और सब द्रव्योंको अवकाश देनेकी शक्तिसे युक्त है । पुद्‌गल तो रूप रस गन्ध और स्पर्श गुण वाले हैं । उनके अणु और स्कन्धके भेदसे दो भेद हैं । कालके निश्चयकाल और व्यवहारकाल भेद हैं । जीव उपयोगगुण वाले हैं । इन द्रव्योंका जो आप्तकी आज्ञासे ही श्रद्धान करता है कि छह द्रव्य है, निक्षेप नय आदिके द्वारा जानकर श्रद्धान नहीं करता, वह भी सम्यक्त्वका आराधक होता है ॥३५॥

जीव द्रव्य विषयक श्रद्धान नियमसे करना चाहिये, यह कहनेके लिए आगेकी गाथा—

गा०—संसार अवस्थाको प्राप्त छह प्रकारके और सिद्धिको प्राप्त जीव होते है । ये जीव-निकाय आप्त की आज्ञाके बलसे श्रद्धान करनेके योग्य हैं ही ॥३६॥

टी०—चतुर्गतिमें परिभ्रमणको संसार कहते हैं । उसे जो प्राप्त हैं वे संसारी हैं । संसारी जीव अच्छा बुरा शरीर ग्रहण करने और त्यागनेमें लगे रहते हैं । अपने मन वचन काय योगके द्वारा बाँधे गये पुण्य पाप कर्मके उदयसे होने वाले सुख दुःख को भोगनेमें लीन रहते हैं । त्रसनाम

ज्ञानावरणोदयेन तत्क्षयोपशमविशेषेण च एकेन्द्रियाः, विकलेन्द्रियाः, समग्रेन्द्रियाः पर्याप्त्यपर्याप्तिकर्मोदयनिर्वर्तित-षड्विधपर्याप्तयस्तदितरे च, पृथिव्यादिशरीरभारोद्वहनचतुराः, आयुराख्यप्रकृतिघनशृंखलागाढबंधनपराधीनवृत्तयः। नवविकल्पयोनिसमाश्रयोपात्ततनुष्वासक्तबुद्धयः। जराडाकिनीपीतरूपरक्ताः, मृत्युदुर्वारक्रूरावलिसंपातचकितचेतसः संसारिणः 'छज्जीवा' षट्प्रकाराः पृथिव्यादिशरीरसंबंधतः। 'सिद्धिं' सम्यक्त्वकेवलज्ञानदर्शनवीर्याव्याबाधत्वपरमसूक्ष्मत्वावगाहनादिस्वरूपनिष्पत्तिम्। 'अस्सिदा' आश्रिताः। 'जीवा' जीवाः। ननु जीव प्राणधारणे इति वचनात् जीवति प्राणान्धारयति इति जीवः। प्राणाश्चेन्द्रियादयः कर्मनिर्वर्त्याः पुद्गलस्कंधधारणभूतेषु कर्मस्वसत्सु न विद्यन्ते। ततः कथं सिद्धानां जीवतेति ? नैष दोषः, द्विविधाः प्राणाः द्रव्यप्राणा भावप्राणाश्चेति। द्रव्यप्राणा इंद्रियादयः कर्महेतुकाः। भावप्राणास्तु ज्ञानदर्शनादयः। न ते कर्मनिमित्तकाः। कर्माभावे प्रसूतेः। तेन भावप्राणधारणात् जीवता न्याय्या सिद्धानां। अथवा यदेव कृतप्राणधारणं वस्तु तदेवेदमिति प्रत्यभिज्ञोपदर्शितमेकत्वमाश्रित्य जीवव्यपदेशः सिद्धानाम्। अथवा जीवशब्दश्चेतनावति रूढिशब्दः। रूढौ च क्रिया व्युत्पत्त्यर्थैव तदसंभवेऽपि तदुपलक्षणगृहीतं सामान्यमाश्रित्य वर्तत एव। यथा गच्छतीति गौरिति व्युत्पादितोऽपि गोशब्दोऽसत्यामपि गतौ स्थिरता गौर्निषण्णेत्यत्र वर्तते। गमनेनाध्रुवेणोपलक्षितस्य गोत्वस्य सद्भावात्। एवं प्राणधारणोपलक्षितचैतन्याश्रयाज्जीवशब्दस्य सिद्धेषु वृत्तिः। 'जीवणिकाया' जीव-

---

कर्मके उदयसे त्रस और स्थावर नाम कर्मके उदयसे स्थावर भावको प्राप्त होते हैं। अनेक प्रकारके मतिज्ञानावरणके उदयसे और उसके क्षयोपशमके विशेषसे एकेन्द्रिय, विकलेन्द्रिय और पञ्चेन्द्रिय होते हैं। पर्याप्ति नाम कर्मके उदयसे बनी छह पर्याप्तियोंसे यथायोग्य युक्त होते हैं और अपर्याप्ति नाम कर्मके उदयसे अपर्याप्त होते हैं। पृथिवी आदि कायके शरीरके भारको धारण करने वाले होते हैं। आयुनामक कर्मकी मजबूत सांकलसे कसकर बन्धनके कारण पराधीन होते हैं। नौ प्रकारकी योनिके आश्रयसे उत्पन्न हुए शरीरोंमें उनकी अति आसक्ति होती है। उनके रूप और रक्तको जरा रूपी चुड़ैल पी जाती है। मृत्युरूपी क्रूर वज्रपातसे, जिसे टालना अशक्य है उनके चित्त भयभीत रहते हैं। ये संसारी जीव पृथिवीकाय आदिके भेदसे छह प्रकारके हैं।

सम्यक्त्व, केवलज्ञान, केवलदर्शन, वीर्य, अव्याबाधत्व, परमसूक्ष्मत्व, अवगाहना आदि स्वरूपकी प्राप्तिको सिद्धि कहते हैं। उसे प्राप्त सिद्ध जीव हैं।

शंका—जीव शब्द प्राणधारणके अर्थमें है ऐसा वचन है। 'जीवति' अर्थात् प्राणोंको धारण करता है वह जीव है। और प्राण इन्द्रिय आदि कर्मजन्य हैं। सिद्धोंके पुद्गलस्कन्ध रूप कर्म नहीं हैं तब सिद्धोंमें जीवपना कैसे है ?

समाधान—यह दोष नहीं है क्योंकि प्राणोंके दो भेद हैं—द्रव्य प्राण और भाव प्राण। द्रव्य प्राण इन्द्रिय आदि कर्मके उदयसे होते हैं। किन्तु भाव प्राण ज्ञानदर्शन आदि कर्मके निमित्तसे नहीं होते, कर्मोंके अभावमें प्रकट होते हैं। अतः भाव प्राण धारण करनेसे सिद्धोंमें जीवपना न्याय्य है। अथवा जिसने पहले प्राणोंको धारण किया था वही यह है, इस प्रकार प्रत्यभिज्ञानके द्वारा एकत्वको लेकर सिद्धोंको जीव कहा जाता है। अथवा जीव शब्द चेतनावानके अर्थमें रूढ़ है। और रूढ़िमें क्रिया केवल व्युत्पत्तिके लिये होती है। अतः उसके न होनेपर भी उसके उपलक्षणसे गृहीत सामान्यका आश्रय लेकर उस शब्दकी प्रवृत्ति होती है। जैसे जो चले वह गौ है इस प्रकारसे व्युत्पत्ति करनेपर भी गौ शब्द नहीं चलनेपर भी गौके अर्थमें व्यवहृत होता है जैसे बैठी हुई गौ। गमन तो अध्रुव है फिर भी उसमें गोपना वर्तमान है। इसी तरह प्राणधारणसे

समूहाः । 'सद्दहिदव्वा' तु श्रद्धातव्याः एव । 'आणाए' आप्तानामाज्ञाबलात् ।

जीवाश्रद्धाने मुक्तिसंसारविषयपरिप्राप्तित्यागार्थप्रयासानुपपत्तिरिति भावः । यदि नाम धर्मादिद्रव्या-परिज्ञानात् परिज्ञानसहचारिश्रद्धानं नोत्पन्नं तथापि नासौ मिथ्यादृष्टिर्दर्शनमोहोदयस्य अश्रद्धानपरिणामस्या-ज्ञानविषयस्याभावात् । न हि श्रद्धानस्यानुत्पत्तिरश्रद्धानं इति गृहीतं । श्रद्धानादन्यदश्रद्धानं इदमित्थमिति श्रुतनिरूपितेऽरुचिः ।

श्रद्धातव्यं प्रकारांतरेणापि निर्देष्टुं उत्तरगाथा—पूर्वं सर्वद्रव्यविषयश्रद्धानमुक्तं, पश्चादतिशयप्रति-पादनार्थं जीवद्रव्यविषया श्रद्धा निरूपिता अनंतरगाथया । इदं तु आस्रवादयोऽपि श्रद्धातव्या इति सूच्यते—

आसवसंवरणिज्जरबंधो मुक्खो य पुण्णपावं च ।।
तह एव जिणाणाए सद्दहिदव्वा अपरिसेसा ।।३७।।

'आसवसंवरणिज्जर' । आस्रवत्यनेनेत्यास्रवः । आस्रवत्यागच्छति जायते कर्मत्वपर्यायः पुद्गलानां येन कारणभूतेनात्मपरिणामेन स परिणाम आस्रवः । ननु कर्मपुद्गलानां नान्यतः आगमनमस्ति यमाकाश-प्रदेशमाश्रित आत्मा तत्रैवावस्थिताः पुद्गलाः अनंतप्रदेशिनः कर्मपर्यायं भजन्ते 'एयक्खेत्तोगाढं' मिति वचनात् । तत् किमुच्यते आगच्छतीति ? न दोषः । आगच्छन्ति ढौकन्ते ज्ञानावरणादिपर्यायमित्येवं ग्रहीतव्यं ।

उपलक्षित चैतन्यके आश्रयसे सिद्धोंमें जीव शब्दका व्यवहार होता है ।

आप्तकी आज्ञाके बलसे जीवके इन समूहोंका श्रद्धान करना चाहिये, क्योंकि जीवका श्रद्धान न होनेपर मुक्तिकी प्राप्ति और संसारके विषयोंके त्यागके लिये प्रयास नही हो सकेगा। यदि धर्मादि द्रव्योंका ज्ञान न होनेसे ज्ञानके साथ रहनेवाला श्रद्धान नही उत्पन्न हुआ। तो भी वह मिथ्यादृष्टि नही है क्योंकि दर्शन मोहके उदयसे होनेवाला श्रद्धानरूप परिणाम, जिसका विषय अज्ञान है, उसका अभाव है। अश्रद्धानका अर्थ श्रद्धानका न होना नही लिया है किन्तु श्रद्धानसे जो अन्य है वह अश्रद्धान है अर्थात् श्रुतमें कहे हुए तत्त्वमें अरुचि अश्रद्धान है ।।३६।।

प्रकारान्तरसे श्रद्धा करने योग्यका कथन करनेके लिए आगेकी गाथा है। पहले सब द्रव्योंके श्रद्धान करनेको कहा। पीछे अतिशय प्रतिपादन करनेके लिये जीव द्रव्य विषयक श्रद्धाका कथन इसके पूर्ववर्ती गाथाके द्वारा किया। इस गाथामे आस्रव आदिकी भी श्रद्धा करना चाहिये, यह सूचित करते हैं—

गा०—आस्रव, संवर, निर्जरा, बन्ध और मोक्ष और पुण्य, पाप ये सब सातों पदार्थ उसी प्रकार जिनदेवकी आज्ञासे श्रद्धान करने चाहिये ।।३७।।

टी०—जिसके द्वारा आना होता है वह आस्रव है। जिस कारणभूत आत्मपरिणामसे पुद्गलोंका कर्म पर्यायरूपसे आगमन होता है वह परिणाम आस्रव है।

शंका—कर्म पुद्गलोंका आगमन अन्य देशसे नहीं होता। जिस आकाश प्रदेशमें आत्मा ठहरा होता है वहीं पर स्थित अनन्तप्रदेशी पुद्गल कर्मपर्याय रूप होते हैं, क्योंकि आगममें 'एकक्षेत्रावगाढ़' कहा है। तब आप कैसे कहते हैं कि आते हैं ?

समाधान—इसमें दोष नहीं है, आगमनका अर्थ ज्ञानावरणादि पर्याय रूपको प्राप्त होना

न देशान्तरपरिस्पंद इहागमनं विवक्षितं । तेन तत्प्रदोषनिह्नवमात्सर्यान्तरायासादनोपघातादय जीवपरिणामा: कर्मत्वपरिणते. पुद्गलानां साधकतमतया विवक्षिता: आस्रवशब्देनोच्यंते । अथवा आस्रवण कर्मतापरिणति: पुद्गलानां आस्रव इत्युच्यते । संव्रियते संरुध्यते मिथ्यादर्शनादि: परिणामो येन परिणामांतरेण सम्यग्दर्शनादिना, गुप्त्यादिना वा स संवर: । निर्जीर्यंते निरस्यते यया, निर्जरणं वा निर्जरा । आत्मप्रदेशस्थं कर्म निरस्यते यया परिणत्या सा निर्जरा । निर्जरणं पृथग्भवनं विश्लेषणं वा कर्मणा निर्जरा । मोक्ष्यतेऽस्यते येन मोक्षणमात्रं वा मोक्ष: । निरवशेषाणि कर्माणि येन परिणामेन क्षायिकज्ञानदर्शनयथाख्यातचारित्रसंज्ञितेन अस्यते स मोक्ष: । विश्लेषो वा समस्तानां कर्मणां । बध्यते अस्वतंत्रीक्रियन्ते कार्मणद्रव्याणि येन परिणामेन आत्मन. स बन्ध: । अथवा बध्यते परवशतामापद्यते आत्मा येन स्थितिपरिणतेन कर्मणा तत्कर्म बंध: । पुण्य नाम अभिमतस्य प्रापकं । पापं नाम अनभिमतस्य प्रापकं । इह बंधशब्देन जीवपरिणाम एव गृहीत: न कर्म एव, पृथक् पुण्यपापग्रहणात् । ननूक्तेन परिणामेन जीवपुद्गलयोरेवांतर्भाव आस्रवादीनां जीवपुद्गलत्वश्रद्धानस्य पूर्वमुपन्यस्तत्वात् किमर्थमिदं सूत्रमिति नैष दोष: । विनेयाशयवैचित्र्याद्देशनाभेद आगमवाक्येषु । तत: श्रद्धा तत्र सर्वत्र कार्येति चोदित भवति । अश्रद्धानं न मनागपि कार्यम् ।

लेना चाहिये। यहाँ आगमनसे देशान्तरसे चलकर आना विवक्षित नही है। अत: आस्रव शब्दसे प्रदोष, निह्नव, मात्सर्य, अन्तराय, आसादन, उपघात आदि जीव परिणामोंको पुद्गलोके कर्मरूप परिणमनमें साधकतम रूपसे विवक्षित किया है। अथवा 'आस्रवण' अर्थात् पुद्गलोंकी कर्मरूप परिणतिको आस्रव कहा है।

जिस सम्यग्दर्शनादि या गुप्ति आदि रूप अन्य परिणामसे मिथ्यादर्शन आदि परिणाम 'संव्रियते' रोका जाता है वह संवर है। जिसके द्वारा 'निर्जीर्यंते' निरसन किया जाता है अथवा निर्जरणको निर्जरा कहते हैं। जिस परिणतिसे आत्माके प्रदेशोंमे स्थित कर्म हटाये जाते हैं वह निर्जरा है। कर्मोंके 'निर्जरण' अर्थात् पृथक् होनेको अथवा विश्लेषणको निर्जरा कहते है। जिसके द्वारा 'मोक्ष्यते' अर्थात् छूटते हैं अथवा मोक्षण मात्रको मोक्ष कहते हैं। क्षायिक ज्ञान, क्षायिक दर्शन और यथाख्यात चारित्र नामक जिस परिणामसे समस्त कर्म छूटते है वह मोक्ष है। अथवा समस्त कर्मोंका आत्मासे अलग हो जाना मोक्ष है। आत्माके जिस परिणामसे कार्मणद्रव्य 'बध्यन्ते' परतंत्र किया जाता है वह बन्ध है, अथवा जिस स्थिति रूप परिणत हुए कर्मके द्वारा आत्मा 'बध्यते' अर्थात् पराधीनताको प्राप्त होता है वह कर्म बन्ध है। इष्टको प्राप्त करानेवालेको पुण्य कहते हैं और अनिष्टको प्राप्त करानेवालेको पाप कहते हैं। यहाँ बन्ध शब्दसे जीवके परिणामका ही ग्रहण किया है, कर्मका नही, क्योंकि पुण्य पापका पृथक् ग्रहण किया है।

शंका—उक्त परिणामसे तो आस्रव आदिका अन्तर्भाव जीव और पुद्गलमे ही होता है। तथा जीव और पुद्गलके श्रद्धानका पहले कथन किया ही है तब इस गाथा सूत्रके कहनेकी क्या आवश्यकता थी ?

समाधान—यह दोष ठीक नहीं है। आगमके वचनोंमें शिष्योंके अभिप्राय नाना होनेसे उपदेशमें भेद होता है। अत: इन सबमें श्रद्धा करना चाहिये यह प्रेरणा की गई है, किञ्चित् भी अश्रद्धान नहीं होना चाहिये ॥३७॥

दृष्टेर्मरणं बालबालमरणं तत्किमुच्यते बालमरणानीति। बालत्व नाम सामान्यं बालबालेऽपि विद्यते इति बालमरणानीत्युक्तं।

कीदृशी तर्हि मति कार्या संसारभीरुणा—

णिग्गंथं[1] पव्वयणं इणमेव अणुत्तरं सुपरिसुद्धं ॥
इणमेव मोक्खमग्गोत्ति मदी कायव्विया तम्हा ॥४२॥

णिग्गंथं पव्वयणं'। ग्रथ्नन्ति रचयन्ति दीर्घीकुर्वन्ति संसारमिति ग्रथा। मिथ्यादर्शन मिथ्याज्ञान, असयम, कषाया, अशुभयोगत्रय चेत्यमी परिणामाः। मिथ्यादर्शनान्निष्क्रान्तं किं सम्यग्दर्शन। मिथ्याज्ञानान्निष्क्रात सम्यग्ज्ञानम्। असयमात्कषायेभ्योऽशुभयोगत्रयाच्च निष्क्रान्तं सुचारित्र। तेन रत्नत्रयमिह निर्ग्रंथशब्देन भण्यते। '**पव्वयणं**' प्रवचनस्येद अभिधेयं। '**इणमेव**' इदमेव, '**अणुत्तरं**' न विद्यते उत्तरं उत्कृष्टमस्मादिति अनुत्तरम्। '**सुपरिशुद्धं**' सुष्ठु परिशुद्ध। '**इणमेव**' इदमेव। '**मोक्खमग्गोत्ति**' कर्मणा निरवशेषापायस्योपाय इति। '**मदी**' बुद्धि। '**कायव्विया**' कर्तव्या। '**तम्हा**' तस्मात्। यस्मादेवंभूतायामसत्या मत्या दुःखमरणप्राप्तिरतीतकाल इव भविष्यत्यपि काले भविष्यतीति ॥४२॥

शङ्का—मिथ्यादृष्टि का मरण बालबालमरण है। तब यहाँ बालमरण क्यों कहा है ?

समाधान—बालपना सामान्य है वह बाल-बालमे भी रहता है इसलिये 'बालमरण' ऐसा कहा है।

विशेषार्थ—प० आशाधर जी ने अपनी टीकामे लिखा है कि कुछ 'सुविहिद' ऐसा पढ़ते है और उसका व्याख्यान वे 'हेतुचारित्र' ऐसा करते है। अर्थात् 'सुविहिद' को प्रवचनका विशेषण न करके सम्बोधनके रूपमे लेते हैं ॥४२॥

तब ससारसे डरने वालेको कैसी मति करनी चाहिये, यह कहते है—

गा०—इसलिये रत्नत्रयरूप जो प्रवचनका अभिधेय है यही सर्वोत्कृष्ट और पूर्णरूपसे निर्दोष है। यही मोक्षका मार्ग है ऐसी मति करनी चाहिये ॥४२॥

टी०—जो संसारको 'ग्रथ्नन्ति' रचते हैं उसे दीर्घ करते है उन्हे ग्रन्थ कहते है। ये ग्रन्थ है मिथ्यादर्शन, मिथ्याज्ञान, असंयम, कषाय और तीन अशुभ योगरूप परिणाम। मिथ्यादर्शनके हटनेसे सम्यग्दर्शन होता है। मिथ्याज्ञानके हटनेसे सम्यग् ज्ञान होता है। असंयम, कषाय और तीन अशुभयोगोके हटनेसे सम्यक्चारित्र होता है। अत यहाँ निर्ग्रन्थ शब्दसे रत्नत्रय कहा है। और 'पव्वयण' का अर्थ प्रवचनमें कहा गया विषय है। जो प्रवचनमे कहा रत्नत्रय है वही अनुत्तर है अर्थात् उससे उत्कृष्ट कोई नही है और वही पूर्ण शुद्ध है, वही मोक्षमार्ग अर्थात् समस्त बुराइयों का उपाय है। ऐसी मति करना चाहिये, क्योकि इस प्रकारकी मतिके न होनेपर दुःखदायक मरणोंकी प्राप्ति अतीतकालकी तरह भविष्यकालमें भी होगी ॥४२॥

---

१. अन्ये तु निःसम प्रवचनमिति प्राधान्येन व्याचक्षते—मूलारा०।

तच्च सम्यक्त्वं निरतिचारं [1]गुणोज्ज्वलितं भावनीयं इत्येतदाचष्टे उत्तरप्रबंधेन । तत्रातिचारनिवेदनार्थोत्तरगाथा—

सम्मत्तादीचारा संका कंखा तहेव विदिगिंछा ॥
परदिठ्ठीण पसंसा अणायदणसेवणा चेव ॥ ४३ ॥

'सम्मत्तादीचारा' श्रद्धानस्य दोषाः । 'संका' शंका, संशयप्रत्ययः किंस्विदित्यनवधारणात्मकः । स च निश्चयप्रत्ययाश्रयं दर्शनं मलिनयति । ननु सति सम्यक्त्वे तदतिचारो युज्यते । संशयश्च मिथ्यात्वमावहति । तथाहि मिथ्यात्वभेदेषु संशयोऽपि गणितः । 'संसइदमभिग्गहिदं अणभिग्गहिदं च तं तिविधं' इति । सत्यपि संशये सम्यग्दर्शनमस्त्येवेति अतिचारता युक्ता । कथं ? श्रुतज्ञानावरणक्षयोपशमविशेषाभावात्, उपदेष्टुरभावात्, तस्य वा वचननिपुणता नास्ति तन्निर्णयकारिश्रुत[2]वचनानुपलब्धेः, काललब्धेरभावाद्वा यदि नाम निर्णयो नोपजायते । तथापि तु इद यथा सर्वविदा उपलब्धं तथैवेति श्रद्धधेहमिति भावयतः कथं सम्यक्त्वहानिः ? एवंभूतश्रद्धारहितस्य को वेत्ति किमत्र तत्त्वमिति अदृष्टेषु कपिलादिषु सर्वज्ञतैव दुरवधारा, अयमेव सर्वविन्नेतर इति आगमशरणताया को वस्तुयाथात्म्यानुसारी को वा नेति संशय एवेति । यत्तत्त्वाश्रद्धानं संशयप्रत्ययोपनीतत्वात्त-

---

अनिचाररहित और गुणोंसे उज्ज्वल वह सम्यक्त्व भावनीय है यह आगे कहते हैं। उसके अतिचारोंका कथन आगेकी गाथासे करते हैं—

गा०—शङ्का, आसक्ति, उसी तरह विचिकित्सा या ग्लानि अतत्त्वदृष्टिजनोंकी प्रशंसा और अनायतनोंकी सेवा, ये सम्यक्त्वके अतिचार हैं ॥४३॥

टी०—शङ्का आदि सम्यक्त्वके अतीचार अर्थात् श्रद्धानके दोष हैं। शंका संशयज्ञानको कहते है जो 'यह क्या है' इस प्रकार अनवधारणरूप होता है। वह निश्चयात्मकज्ञानके आश्रयसे होनेवाले सम्यग्दर्शनको मलिन करता है।

शङ्का—सम्यक्त्व होनेपर उसमें अतिचार लगना उचित है। किन्तु संशय तो मिथ्यात्वरूप है। मिथ्यात्वके भेदोमे संशयको भी गिना है। कहा है—संशयित, अभिगृहीत और अनभिगृहीत तीन प्रकारका मिथ्यात्व है।

समाधान—संशयके होनेपर भी सम्यग्दर्शन रहता है अतः उसका अतिचारपना उचित है। श्रुतज्ञानावरणका क्षयोपशम विशेष न होनेसे, उपदेष्टाके अभावसे अथवा उससे वचनोंकी निपुणता न होनेसे, या निर्णयकारी शास्त्रवचनके प्राप्त न होनेसे अथवा काललब्धिके अभावसे यदि किसी विषयका निर्णय नहीं होता, तथापि जैसा इसे सर्वज्ञ भगवान्ने देखा है वैसा ही मैं श्रद्धान करता हूँ' ऐसी भावना करनेवालेके सम्यक्त्वका अभाव कैसे हो सकता है ? जिसके इस प्रकारकी श्रद्धा नही है, तथा कौन जानता है तत्त्व क्या है, कपिल आदिको जब देखा नहीं तो उनकी सर्वज्ञताका निर्णय कैसे हो सकता है, यही सर्वज्ञ है, दूसरा नहीं है इसमे आगमका आश्रय लेनेपर कौन आगम यथार्थ वस्तुको कहता है, कौन नहीं कहता इस प्रकारका संशय ही होता है। इस प्रकारके संशयपूर्वक जो तत्त्वका अश्रद्धान है वह संशयज्ञानके द्वारा उत्पन्न होनेके कारण

---

१ गुणोपोद्वलित अ० । गुणोपोद्वजितं आ० । २. वचनाभावात् वा का–आ० ।–लब्धेः अभावाद्वाका–मु० ।

संशयमिथ्यात्वमित्युच्यते । अश्रद्धानरूपतैव लक्षणं मिथ्यात्वस्य । यथा वक्ष्यति 'तं मिच्छत्तं जमसद्दहणं तच्चाण होदि अत्थाणं' मिति । अन्यथा मिथ्याज्ञानस्य मिथ्यादर्शनस्य च भेदो न भवेद्, भेदश्च स्फुटो वाक्यांतरे 'मिच्छणाणमिच्छादंसणमिच्छाचारित्तादो पडिविरदोमीति' । किं च छद्मस्थानां रज्जूरगस्थाणुपुरुषादिषु किमियं रज्जुरुरगः स्थाणुः पुरुषो वा किमित्यनेकः संशयप्रत्ययो जायते इति[1] ते न सम्यग्दृष्टयः स्युः ।

कांक्षा गार्ध्यं आसक्तिः, सा च दर्शनस्य मलं । यद्येवं आहारे कांक्षा, स्त्रीवस्त्रगंधमाल्यालंकारादिषु वाऽसंयतसम्यग्दृष्टेर्विरताविरतस्य वा भवति । यथा प्रमत्तसंयतस्य परीषहाकुलस्य भक्ष्यपानादिषु कांक्षा संभवतीति सातिचारदर्शनता स्यात् । तथा भव्याना मुक्तिसुखकांक्षा अस्त्येव । इत्यत्रोच्यते न कांक्षामात्रमतीचारः किंतु दर्शनाद्व्रताद्दानाद्देवपूजायास्तपसश्च जातेन पुण्येन ममेदं कुलं, रूपं, वित्तं, स्त्री-पुत्रादिकं, शत्रुमर्दनं, स्त्रीत्वं, पुंस्त्वं वा सातिशयं स्यादिति कांक्षा इह गृहीता एषा अतिचारो दर्शनस्य ।

'विचिकित्सा जुगुप्सा' मिथ्यात्वासंयमादिषु जुगुप्सायाः प्रवृत्तिरतिचारः स्यादिति चेत् इहापि नियतविषया जुगुप्सेति मतातिचारत्वेन । रत्नत्रयाणामन्यतमे तद्वति वा कोपादिनिमित्ता जुगुप्सा इह गृहीता । ततस्तस्य दर्शनं, ज्ञानं, चरणं वाऽशोभनमिति । यस्य हि यत्र इदं भद्रं इति श्रद्धानं स तस्य जुगुप्सा करोति । ततो रत्नत्रयमाहात्म्यारुचिर्युज्यतेऽतिचारः ।

संशय मिथ्यात्व कहलाता है। मिथ्यात्वका लक्षण अश्रद्धानरूपता ही है। आगे कहेंगे—'तत्त्वार्थका जो अश्रद्धान है वही मिथ्यात्व है'। यदि ऐसा न हो तो मिथ्याज्ञान और मिथ्यादर्शनमें भेद ही न हो। किन्तु अन्यत्र वचनमें स्पष्ट भेद कहा है। यथा—'मैं मिथ्याज्ञान, मिथ्यादर्शन और मिथ्याचारित्रसे विरत होता है।' तथा छद्मस्थ जीवोंको रस्सी, सर्प, और स्थाणु पुरुष आदिमें, यह रस्सी है या साँप, अथवा स्थाणु है या पुरुष, इस प्रकार अनेक संशयज्ञान होते हैं। तब वे सम्यग्दृष्टी नहीं हो सकेंगे?

कांक्षा गृद्धि या आसक्तिको कहते हैं। वह भी सम्यग्दर्शनका मल है।

शंका—यदि ऐसा है तो असंयतसम्यग्दृष्टी अथवा विरताविरत श्रावकको आहारकी या स्त्री, वस्त्र, गन्ध, माला अलंकार आदिकी कांक्षा होती है। तथा परीषहसे व्याकुल प्रमत्तसंयत मुनिके खान-पान आदिकी कांक्षा होती है वह भी सम्यग्दर्शनका अतीचार कहलायेगी। तथा भव्य जीवोको मुक्ति सुखकी कांक्षा रहती ही है?

समाधान—कांक्षामात्र अतीचार नहीं है। किन्तु सम्यग्दर्शनसे, व्रतधारणसे, देवपूजासे और तपसे उत्पन्न हुए पुण्यसे मुझे अमुक कुल, रूप, धन, स्त्री-पुत्रादि, शत्रु विनाश, अथवा सातिशय स्त्रीपना, पुरुषपना प्राप्त हो इस प्रकारकी कांक्षा यहाँ ग्रहण की है। वह सम्यग्दर्शनका अतीचार है।

विचिकित्सा जुगुप्साको कहते हैं।

शंका—तब तो मिथ्यात्व असंयम आदिमें जुगुप्सा करना भी अतीचार हो जायेगा।

समाधान—यहाँ भी नियत विषयमें जुगुप्साको अतिचाररूपसे माना है। रत्नत्रयमें किसी एकमें अथवा रत्नत्रयके धारीमें कोप आदिके निमित्तसे होनेवाली जुगुप्साका यहाँ ग्रहण किया है। जिसका जिसमे यह श्रद्धान है कि यह श्रेष्ठ है वह उसकी जुगुप्सा करता है। अतः रत्नत्रयके महत्त्वमें अरुचिका होना अतिचार होता है।

१ ति ते सम्य—आ० मु०।

'परदिट्ठीण पसंसा' परशब्दोऽनेकार्थवाची । क्वचिद् व्यवस्थावाची । नापरो ग्रामः पाटलिपुत्रादि-त्यादौ । तथा क्वचिदन्यार्थे परे आचार्या अन्ये इत्यर्थः । तथा इष्टार्थे, परं धाम गतः इष्टमिति यावत् । इह तु अन्यवाची । दृष्टिः श्रद्धा रुचिः । परा अन्या दृष्टिः श्रद्धा येषां ते परदृष्टयः । तत्त्वदृष्टयपेक्षया अतत्त्व-दृष्टिरन्या तेषां प्रशंसा स्तुतिः ।

'अणायदणसेवणा चेव'—अनायतनं षड्विधं मिथ्यात्वं, मिथ्यादृष्टयः, मिथ्याज्ञानं, तद्वन्तः, मिथ्याचारित्रं मिथ्याचारित्रवन्तः इति । तत्र मिथ्यात्वमश्रद्धानं तत्सेवायां मिथ्यादृष्टिरेवासौ नातिचारता । मिथ्यादृष्टीनां तु सेवा बहुमननं तेषां । मिथ्याज्ञानसेवा नाम निरपेक्षनयदर्शनोपदेश इदमेव तत्त्वमिति श्रद्धानमुत्पादयामि श्रोतृणामिति क्रियमाणो मिथ्याज्ञानिभिः सह संवासः तत्र अनुरागो वा तदनुवृत्तिर्वा तत्सेवा । मिथ्याचारित्रं नाम मिथ्याज्ञानिनामाचरणं तत्रानुवृत्तिर्द्रव्यलोभाद्यपेक्षया तेषु वा सांगत्यादिकं । एतेषां सम्यक्त्वातिचाराणां वर्जनम् ॥४३॥

गुणान्दर्शनविशुद्धिकारिणो निरूपयति उवगूहणमित्यनया—

उवगूहणठिदिकरणं वच्छल्लपभावणा गुणा भणिदा ॥
सम्मत्तविसोधीए उवगूहणकारया चउरो ॥४४॥

उपबृंहणं नाम वर्द्धनं । बृह बृहि वृद्धाविति वचनात् । धात्वर्थानुवादी चोपसर्गः उप इति । स्पष्टे-

---

'परदिट्ठीण' में पर शब्दके अनेक अर्थ हैं । कहीं पर शब्द व्यवस्थाका वाची होता है । जैसे पाटलिपुत्रसे अपर गाँव नहीं है । कहीं परका अर्थ अन्य है । जैसे पर आचार्य अर्थात् अन्य आचार्य । कहीं परका अर्थ इष्ट है । जैसे परं धामको गया अर्थात् इष्ट धामको गया । यहाँ पर शब्द अन्यवाची है । दृष्टिका अर्थ श्रद्धा या रुचि है । जिनकी दृष्टि अर्थात् श्रद्धा पर अर्थात् अन्य है वे परदृष्टि हैं । अर्थात् तत्त्वदृष्टिकी अपेक्षा अतत्त्वदृष्टि अन्य है । उनकी प्रशंसा-स्तुति सम्यग्-दर्शनका अतीचार है ।

अनायतनके छह भेद हैं—मिथ्यात्व, मिथ्यादृष्टि, मिथ्याज्ञान, मिथ्याज्ञानी, मिथ्याचारित्र और मिथ्याचारित्रके धारक । उनमेंसे मिथ्यात्व तो अश्रद्धान ही है । उसकी सेवा करनेपर तो यह मिथ्यादृष्टि ही हुआ । अतः मिथ्यात्व सेवा अतीचार नहीं है । मिथ्यादृष्टियोंकी सेवाका अर्थ है उन्हें बहुत मानना । मिथ्याज्ञानकी सेवाका मतलब है निरपेक्ष नयोंका उपदेश देना या 'यही तत्त्व है' इस प्रकारका श्रद्धान श्रोताओंको उत्पन्न कराऊँ, इस रूपमें मिथ्याज्ञानियोंके साथ संवास करना, उनसे अनुराग होना अथवा उनकी अनुकूलता । मिथ्याज्ञानियोंके आचरणको मिथ्याचारित्र कहते हैं । द्रव्यलोभ आदिकी अपेक्षासे उनका अनुवर्तन अथवा उनकी संगति । इन सम्यक्त्वके अतिचारोंको छोड़ना चाहिए ॥४३॥

सम्यग्दर्शनकी विशुद्धि करनेवाले गुणोंको कहते हैं—

गाथा—उपगूहन, स्थितिकरण, वात्सल्य, प्रभावना ये चार गुण सम्यक्त्वकी विशुद्धिकी वृद्धि करनेवाले कहे हैं ॥४४॥

टी०—उपगूहण अर्थात् उपबृंहण नाम बढ़ाने का है । क्योंकि 'बृह और बृहि धातुका अर्थ वृद्धि है' ऐसा कहा है । धातुके अर्थ के ही अनुकूल 'उप' उपसर्ग है । स्पष्ट और अग्राम्य

नाबाम्येण श्रोत्रमनःप्रीतिदायिना वस्तुयाथात्म्यप्रकाशनप्रवणेन धर्मोपदेशेन परस्य तत्त्वश्रद्धानवर्द्धनं तदुपबृंहणं[1]। सर्वजनविस्मयकारिणीं शतमखप्रमुखगीर्वाणसमितिविरचितोपचितितदृशी पूजां संपाद्य दुर्धरतपोयोगानुष्ठानेन वा आत्मनि श्रद्धा स्थिरीकरणम्।

जीवादीनि द्रव्याणि तत्सामान्यविशेषरूपाध्यासितानि उत्पादव्ययध्रौव्यात्मकानि प्रतिसमयमिति जिनैः सम्यगभाणि एवमेव नान्यथा श्रद्दधे जिनाना मत। न हि जिना वीतरागा विदिताखिलवेद्यतया याथात्म्याः कृपापरिगताः विपरीतमुपदिशतीति भावनया स्थिरीकरण, अस्थिरस्य रत्नत्रये स्थिरतापादनं। मिथ्यात्वाभिमुखस्य सम्यग्दृष्टेरस्थिरस्य मिथ्यात्वं मूलमेव तदनुभवत कर्मादानं, मिथ्यादर्शनाविरतिप्रमादकषाया हि बंधहेतवः। तद्बंधहेतुक चानतससारपरिभ्रमण चतुरशीतियोनिशतसहस्रेषु। सद्दर्शनं तु विचित्रयातनासकटभयप्रदायिन्योर्नरकतिर्यग्गतिवर्तिन्योर्वज्रार्गलाभूत शतमखमनुष्यलोकयोरन्यूनमान्यरूपभोगादिसपत्संपादनचतुरं क्रमेण निर्वाणमपि प्रयच्छति। ततो दुःखजलवाहिनीं मिथ्यादृष्टिकुल्यामुल्लंघय, प्रतिपद्यस्व जैनी दृष्टिमिति तत्र स्थिरताकरणम्। तथा सम्यग्ज्ञानभावनाया च प्रमादिनमलस दृष्ट्वा एवमसौ वक्तव्यः ज्ञान हिताहितप्रकाशनपटु, तदतरेण हितमजानतः कथ तत्र वृत्तिरहितपरिहारो वा। हिताहितप्राप्तिपरिहारौ विना न सुखाधिगमदुःखविश्लेषौ। तदर्थमेव चायं प्राज्ञो जन क्लिश्यति। तत पचविधस्वाध्यायत्याग मा कृथाः इति ज्ञाने स्थिरीकरण। अथवा अनधिगतसूत्रार्थनिश्चयस्य तत्र निश्चयसपादन असकृद्भावनात्मन स्थिरीकरण।

(शिष्टजनोचित) कानो और मनको प्रसन्नता देनेवाले तथा वस्तुका यथार्थस्वरूप प्रकाशन करनेमे समर्थ धर्मोपदेशके द्वारा दूसरेके श्रद्धानको बढाना उपबृंहण है। अथवा सर्व जनोको आश्चर्य पैदा करनेवाली, इन्द्रादि प्रमुख देवगणोके द्वारा की जानेवाली पूजाके समान पूजा रचाकर अथवा दुर्धर तप और ध्यानका अनुष्ठान करके आत्मामे श्रद्धाको स्थिर करना उपबृंहण है।

जीवादि द्रव्य अपने सामान्य और विशेष रूपोंसे युक्त होकर प्रतिसमय उत्पाद व्यय ध्रौव्यात्मक हैं ऐसा जिनदेवने सत्य ही कहा है। ऐसा ही है, अन्यथा नही है। जिनदेवके मतका मै श्रद्धान करता हूँ। वीतराग, समस्त पदार्थोके यथार्थ रूपको जाननेवाले दयालु जिनदेव विपरीत उपदेश नही देते' इस प्रकारकी भावनासे रत्नत्रयमे अस्थिरको स्थिर करना स्थितिकरण है। मिथ्यात्वके अभिमुख सम्यग्दृष्टिकी अस्थिरताका मूल मिथ्यात्व ही है। मिथ्यात्वका अनुभवन करनेवालेके कर्मोका ग्रहण होता है क्योंकि मिथ्यादर्शन, अविरति, प्रमाद और कषाय बन्धके कारण है। और उस बन्धके कारण चौरासी लाख योनियोमे अनन्तकाल तक संसार भ्रमण करना होता है। किन्तु सम्यग्दर्शन विचित्र कष्ट, संकट और भय देनेवाली नरक गति और तिर्यञ्च गतिके लिए वज्रमयी अर्गला है, इन्द्र लोक और मनुष्य लोकमें पूर्ण मान्य भोगादि सम्पदाको प्राप्त करानेमे चतुर है, क्रमसे मोक्ष भी प्राप्त कराता है। इसलिए दुःख रूपी जल जिसमे बहता है उस मिथ्यादृष्टि रूपी नदीको पार करके जैनी दृष्टि प्राप्त करो। इस प्रकार उसमे स्थिर करना स्थितिकरण है। तथा सम्यग्ज्ञानकी भावनामे प्रमादी आलसीको देखकर उससे ऐसा कहना चाहिए—ज्ञान हित और अहितको प्रकाशित करनेमें चतुर होता है। उसके बिना जो हितको नही जानता वह कैसे हितमें प्रवृत्ति और अहितका परिहार कर सकेगा और हितकी प्राप्ति तथा अहितके त्यागके बिना सुखकी प्राप्ति और दुःखसे छुटकारा नही हो सकता। उसीके लिए तो यह बुद्धिमान मनुष्य कष्ट उठाता है। अतः पाँच प्रकारको स्वाध्यायका त्याग मत करो। इस प्रकार ज्ञानमें स्थिरीकरण है। अथवा

---

१. वर्तन अ० आ०।

चारित्रात् प्रच्यवमानं दृष्ट्वा हिंसादिसावद्यक्रियायां प्रवर्तमाना इहैव दुःखभाजो दृश्यन्ते, तथा परं हन्तुमुद्यतः स्वयं तेनैव हन्यते प्राक्तनमित्रैर्बंधुभिर्वोदीर्णवैरैः। परत्र चाशुभां गतिमुपैति। दुःखदाम्यसद्वेद्यं च बध्नाति। अलीकं ब्रुवन्निहैव बंधुजनस्यापि विद्वेष्योऽविश्वास्यश्च भवति किं पुनरन्यस्य। जिह्वां चोत्पाटयंति क्रुद्धा बलिनः। परत्र च मूकतां यास्यति इत्येवमाद्यसंयमगतदोषं प्रख्याप्य नीरोगतां, दीर्घजीवनं, सौरूप्यं, प्रियवचनादिकं गुणमुपदिश्य अहिंसादिव्रताचरणफलं चारित्रे स्थिरीकरणम्। असंयतदोषं संयमगुणं वा पुनः पुनः स्मृत्वात्मनः स्थिरीकरणम्।

धर्मस्थेषु मातरि भ्रातरि वानुरागो वात्सल्य, रत्नत्रयादरो वात्मनः। प्रभावना माहात्म्यप्रकाशनं रत्नत्रयस्य तद्वतां वा ॥४४॥

दर्शनविनयप्रतिपादनार्थं गाथाद्वयमुत्तरम्—

अरहंतसिद्धचेइय सुदे य धम्मे य साधुवग्गे य।
आयरिय उवज्झाए सुपवयणे दंसणे चावि ॥ ४५ ॥

'अरहंत इत्यादिकं'। अरिहननाद्रजोहननाद्रहस्याभावादतिशयपूजार्हत्वाच्चाविचलार्हद्व्यपदेशा नोआगमभावार्हन्त इह गृहीताः। न नामार्हन्, निमित्ताभावेऽपि पुरुषकारान्नियुक्तार्हद्व्यपदेशः। अर्हतां प्रतिबिंबानि

सूत्रके अर्थका निश्चय जिसे नहीं है उसे निश्चय कराना। तथा वारम्बार भावना करना आत्माका स्थिरीकरण है।

चारित्रसे गिरते हुए को देखकर कहना—जो हिंसा आदि पाप कार्योंमें लगते हैं वे इसी जन्ममें दुःख भोगते देखे जाते हैं। जो दूसरेको मारनेके लिए तैयार होता है वह स्वयं अथवा उसी दूसरेके द्वारा मारा जाता है। अथवा उसके मित्रों और बन्धुओंके द्वारा पूर्व वैरके उदीर्ण होनेसे मारा जाता है। मरकर दुर्गतिमें जाता है। दुःखदायी असातावेदनीय कर्मको बाँधता है। असत्य बोलने वाला इसी लोकमें बन्धुजनोंके द्वारा द्वेषका भाजन होता है तथा उसका वे विश्वास नहीं करते। फिर दूसरों की तो बात ही क्या है? बलवान पुरुष क्रुद्ध होकर झूठ बोलने वालेकी जिह्वा उखाड़ देते हैं। मरकर वह परलोकमें गूँगा होता है। इस प्रकारसे असंयमके दोष कहकर और नीरोगता, दीर्घ जीवन, सौन्दर्य, प्रियवचन आदि संयमके गुणोंका उपदेश देकर चारित्रमें स्थिर करना अहिंसा आदि व्रतोंके आचरणका फल है। अथवा असंयमके दोष और संयमके गुण बार-बार स्मरण करके अपनेको चारित्रमें स्थिर करना स्थितीकरण है।

धर्मात्माओंमें माता-पिता वा भाईमें अनुराग करना वात्सल्य है। अथवा अपने रत्नत्रयमें आदरभाव रखना वात्सल्य है। रत्नत्रयका अथवा रत्नत्रयके धारकोंका माहात्म्य प्रकट करना प्रभावना है ॥४४॥

दर्शन विनयका कथन करनेके लिए आगे दो गाथा कहते है—

गा०—अरहन्त, सिद्ध और प्रतिबिम्बोंमें श्रुतमें और धर्ममें और साधुवर्गमें आचार्यमें उपाध्यायमें और सुप्रवचनमें दर्शनमें भी ॥४५॥

टी०—'अरि' अर्थात् मोहनीयकर्मका नाश कर देनेसे, 'रज' अर्थात् ज्ञानावरण और दर्शनावरणकर्मको नष्ट कर देनेसे, 'रहस्य' अर्थात् अन्तरायकर्मका अभाव कर देनेसे, और सातिशय पूजाके योग्य होनेसे अर्हत् कहे जानेवाले नो आगमभावरूप अर्हन्तोंका यहाँ ग्रहण किया है।

सोऽयमित्यभिसंबंधादर्हद्व्यपदेशवन्तोऽपि पूजातिशयार्हत्वेऽपि अरिहननादिगुणासंभवान्नेह गृह्यन्ते । आगमद्रव्यार्हन्न-र्हत्स्वरूपव्यावर्णनपरप्राभृतज्ञोऽनुपयुक्तस्तदर्थेऽन्यत्र व्यापृतः । ज्ञायकशरीरार्हन्नाम तत्प्राभृतज्ञस्य त्रिकालगोचरं शरीरं । यस्मिन्नात्मनि अरिहननादयो भविष्यंति गुणाः स भाव्यर्हन् । तीर्थंकरनामकर्म तद्व्यतिरिक्तद्रव्यार्हन् । अर्हद्गुणवर्णनपरप्राभृतप्रत्ययोऽर्हन्निभासो बोध आगमभावार्हन् । एतेषु अरिहननादिगुणानामभावात् नेहार्हच्छब्देन ग्रहणम् ।

एवं नामसिद्धः अलब्धसकलात्मस्वरूपे सिद्धशब्दः । यस्य वा निमित्तनिरपेक्षा सिद्धसंज्ञा । स्थापनासिद्धा इति तत्प्रतिबिंबानि उच्यन्ते । ननु सशरीरस्यात्मनः प्रतिबिंबं युज्यते, अशरीराणां तु शुद्धात्मनां सिद्धानां कथं प्रतिबिंबसंभवः ? पूर्वभावप्रज्ञापननयापेक्षया शरीरमनुगतो य आत्मा सयोगकेवलीतरो वा न शरीरान्निर्भक्तुं शक्यते । विभागे हि शरीरात्संसारिता न स्यात् । अशरीरः संसारी चेति विरुद्धमेतत् । ततः शरीरसंस्थान-वच्चिदात्मापि संस्थानवानेव संस्थानवतोऽव्यतिरिक्तत्वाच्छरीरस्थात्मवत् । स एव चायं प्रतिपन्नसम्यक्त्वाद्यष्ट-गुण इति स्थापनासंभवः । आगमद्रव्यसिद्धः सिद्धप्राभृतज्ञः सिद्धशब्देनोच्यते अनुपयुक्तः । सिद्धप्राभृतज्ञस्य

नामसे जो अर्हन्त हैं उनका यहाँ ग्रहण नहीं है। अर्हन्त संज्ञाके जो निमित्त कहे हैं उनके अभावमें भी जबरदस्तीसे जो अर्हत् नाम रख दिया जाता है उसे नाम अर्हत् कहते हैं। अर्हन्तोंके प्रतिबिम्ब 'वे अर्हन्त यही हैं। इस प्रकारकी स्थापनाके सम्बन्धसे अर्हन्त कहे जाते हैं और वे सातिशय पूजाके योग्य भी हैं फिर भी उनमें मोहनीय कर्मका विनाश आदि गुण न होनेसे यहाँ उनका ग्रहण नहीं किया है। अर्हन्तके स्वरूपका वर्णन करनेवाले शास्त्रका ज्ञाता, जो उसमें उपयोग नहीं लगा रहा किसी अन्य कार्यमें लगा है वह आगम द्रव्यअर्हन्त है। उस अर्हन्तविषयक शास्त्रके ज्ञाताका जो भूत वर्तमान और भावि शरीर है वह ज्ञायक शरीर अर्हन्त है। जिस आत्मामें अरिहनन आदि गुण भविष्यमें होंगे वह भाविअर्हन्त है। तीर्थङ्करनामकर्म तद्व्यतिरिक्त द्रव्य-अर्हन्त है। अर्हन्तके वर्णनमें तत्पर शास्त्रका जो ज्ञान है—अर्थात् अर्हन्तविषयक जो ज्ञान है वह आगमभाव अर्हन्त है। इन सबमें अरिहनन आदि गुणोंका अभाव होनेसे यहाँ अर्हत् शब्दसे उनका ग्रहण नहीं किया है।

इसी प्रकार जिसने सम्पूर्ण आत्मस्वरूपको प्राप्त नहीं किया उसमें सिद्ध शब्दका व्यवहार नाम सिद्ध है। अथवा सिद्ध शब्दकी प्रवृत्तिमें निमित्त आठ कर्मोंके विनाशकी अपेक्षा न करके जिसका नाम सिद्ध रखा गया है वह नामसिद्ध है। सिद्धोंके प्रतिबिम्बोंको स्थापनासिद्ध कहते हैं।

शंका—शरीरसहित आत्माका प्रतिबिम्ब तो युक्त है। शरीर रहित शुद्ध आत्माओंका प्रतिबिम्ब कैसे सम्भव है ?

समाधान—पूर्वभाव प्रज्ञापननयकी अपेक्षा जो आत्मा शरीरमें था, वह सयोगकेवली हो या अन्य हो, उसे शरीरसे अलग नहीं किया जा सकता। यदि उसे शरीरसे पृथक् ही सर्वथा कर दिया जाये तो उसका संसारीपना नहीं बनता; क्योंकि शरीरसे रहित हो और संसारी हो यह तो परस्पर विरुद्ध है। अतः शरीरके आकारकी तरह चेतन आत्मा भी आकारवान ही है क्योंकि वह आकारवानसे अभिन्न है, जैसे शरीरमें रहनेवाला आत्मा। वही यह सम्यक्त्व आदि आठ-गुणोंसे सहित है इस प्रकार सिद्धकी स्थापना सम्भव है। जो सिद्ध विषयक शास्त्रका ज्ञाता उसमें उपयुक्त नहीं है और उसे सिद्ध शब्दोंसे कहा जाता है तो वह आगमद्रव्य सिद्ध है। सिद्धविषयक

शरीरं ज्ञायकशरीरं । भविष्यत्सिद्धत्वपर्यायो भाविसिद्धः । व्यतिरिक्तसिद्धो न संभवति । सिद्धत्वं न कर्मकारणम् इति सकलकर्मापायहेतुका सिद्धता । पुद्गलद्रव्यस्य तदुपकारिणोऽसंभवान्नोकर्मसिद्धाभावः । सिद्धप्राभृतानुसारिसिद्धज्ञानपरिणत आगमभावसिद्धः । निरस्तभावद्रव्यकर्ममलकलङ्कः परिप्राप्तसकलक्षायिकभावः नोआगमभावसिद्धः । स इह गृहीतो न इतरे सकलात्मस्वरूपप्राप्त्यभावात् ।

'चेदिय' चैत्यं प्रतिबिंबं इति यावत् । कस्य ? प्रत्यासत्तेः श्रुतयोरेवार्हत्सिद्धयोः प्रतिबिंबग्रहणं । अथवा मध्यप्रक्षेपः पूर्वोत्तरगोचरस्थापनापरिग्रहार्थस्तेन साध्वादिस्थापनापि गृह्यते ।

श्रुतज्ञानावरणक्षयोपशमाज्जातं वस्तुयाथात्म्यग्राहि श्रद्धानानुगतं श्रुतं अंगपूर्वप्रकीर्णकभेदभिन्नं, तीर्थंकर श्रुतकेवल्यादिभिरारचितो वचनसंदर्भो वा, लिप्यक्षरश्रुतं वा ।

धर्मशब्देन चारित्रं समीचीनमुच्यते । ज्ञानदर्शनाभ्यामनुगतं सामायिकादि पंचविकल्पम् । दुर्गतिप्रस्थित जीवधारणात्, शुभे स्थाने वा दधाति इति धर्मशब्देनोच्यते । अथवा

'खंती मद्दव अज्जव लाघव तव संजमो आकिंचणदा ।
तह होदि बम्हचेरं सच्चं चागो य दस धम्मा ॥ —[मूलाचार ८।६२]

इति सूत्रांतरनिर्दिष्टधर्मपरिग्रहः । क्रोधनिमित्तसान्निध्येऽपि कालुष्याभावः क्षमा स्नेहकार्याद्यनपेक्षः । जात्याद्यभिमानाभावो मान[1]दोषापेक्षस्य दृष्टकार्यानपाश्रयो मार्दवम् । आकृष्टान्तद्वयसूत्रवद्वक्रताभावः आर्जव-

---

शास्त्रके ज्ञाताओंका शरीर ज्ञायकशरीर है। भविष्यमें जिसे सिद्धपर्याय प्राप्त होगी वह भाविसिद्ध है। तद्व्यतिरिक्त सिद्ध सम्भव नहीं है क्योंकि सिद्धत्वपर्यायका कारण कर्म नहीं है। सिद्धता तो समस्त कर्मोंके विनाशसे प्राप्त होती है। उस सिद्धत्वपर्यायका उपकारी पुद्गलद्रव्य नहीं है इसलिए नोकर्मसिद्ध भी नहीं हैं। सिद्ध विषयक शास्त्रके अनुसार सिद्धोंके ज्ञानरूप जो परिणत है वह आगम भाव सिद्ध है। जिसने भावकर्म और द्रव्यकर्ममलरूप कलंकको नष्ट करके सकलक्षायिकभावोंको प्राप्त कर लिया है वह नो आगम भावसिद्ध है। उसीका यहाँ ग्रहण किया है अन्यका नहीं; क्योंकि उन्होंने पूर्ण आत्मस्वरूपको प्राप्त नहीं किया है।

चैत्य प्रतिबिम्बको कहते हैं। चैत्य शब्द अर्हन्त और सिद्धके समीप है अतः सिद्ध और अर्हन्तके ही प्रतिबिम्ब ग्रहण करना। अथवा उससे पूर्वकी और उत्तरकी स्थापनाका ग्रहण करनेके लिए चैत्य शब्दको मध्यमें रखा है। उससे साधु आदिकी स्थापनाका भी ग्रहण होता है।

श्रुतज्ञानावरणके क्षयोपशमसे उत्पन्न हुआ तथा वस्तुके यथार्थ स्वरूपको ग्रहण करनेवाला श्रद्धान सहित ज्ञान श्रुत है। उसके भेद ग्यारह अंग, चौदह पूर्व और अंगबाह्य हैं। अथवा तीर्थंकर और श्रुतकेवली आदिके द्वारा रचा गया वचन सन्दर्भ श्रुत है। अथवा जो लिपि रूप अक्षरश्रुत है वह श्रुत है। धर्म शब्दसे समीचीन चारित्र कहा जाता है। ज्ञान और सम्यग्दर्शनसे अनुगत वह चारित्र सामायिक आदिके भेदसे पाँच प्रकार का है। दुर्गतिमें पड़े हुए जीवको धारण करनेसे अथवा शुभ स्थानमें धरनेसे उसे धर्म शब्दसे कहते हैं अथवा धर्म शब्दसे शास्त्रमें कहे गये क्षमा, मार्दव, आर्जव, लाघव, तप, संयम, आकिञ्चन्य, ब्रह्मचर्य, सत्य, त्याग ये दस धर्म ग्रहण किये हैं। क्रोधके निमित्तोंके रहते हुए भी कलुषताके अभावको क्षमा कहते हैं। यह क्षमा किसी स्नेह सम्बन्धी कार्य आदिकी अपेक्षाके बिना होती है। मानकी बुराइयोंकी अपेक्षा न करके तथा लौकिक

---

१. दोषानपेक्षस्य दृ–आ० मु०।

मित्युच्यते । द्रव्येषु ममेदं भावमूलो व्यसनोपनिपातः सकल इति ततः परित्यागो लाघवं । अशनादित्यागरूपा-त्मिका क्रिया अनपेक्षितदृष्टफला द्वादशविधा तपः । इंद्रियविषयरागद्वेषाभ्यां निवृत्तिरिंद्रियसंयमः । षड्जीव-निकायबाधाऽकरणतत्परः प्राणिसंयमः । अकिंचणदा सकलग्रंथत्यागः । ब्रह्मचर्यं नवविधब्रह्मपालनं । सतां साधूनां हितभाषणं सत्यम् । संयतप्रायोग्याहारादिदानं त्यागः । एते दशधर्माः ।

साधयन्ति रत्नत्रयमिति साधवस्तेषां वर्गः समूहः । तस्मिन्वस्तुयाथात्म्यग्राहिज्ञाने परिणतिर्ज्ञानाचारः । तत्त्वश्रद्धानपरिणामो दर्शनाचारः । पापक्रियानिवृत्तिपरिणतिश्चारित्राचारः । अनशनादिक्रियासु वृत्तिस्तप आचारः । स्वशक्त्यनिगूहनरूपा वृत्तिर्ज्ञानादौ वीर्याचारः । एतेषु पंचस्वाचारेषु ये वर्तन्ते परांश्च प्रवर्तयन्ति ते आचार्याः । रत्नत्रयेषु उद्यता जिनागमार्थं सम्यगुपदिशंति ये ते उपाध्यायाः उपेत्य विनयेन ढौकित्वा अधीयते श्रुतमस्मादित्युपाध्यायः ।

'पवयणे' प्रवचने । ननु श्रुतशब्दः प्रवचनवाची ततः पुनरुक्तता ? रत्नत्रयं प्रवचनशब्देनोच्यते । तथा चोक्तम्—'णाणदंसणचरित्तमेगं पवयणमिति' । अथवा श्रुतज्ञानं श्रुतमित्युक्तं पूर्वमिह तु प्रोच्यन्ते जीवादयः पदार्था इति शब्दश्रुतमुच्यते । 'दंसणे' सम्यग्दर्शने च ॥ ४५ ॥

कार्योंके प्रयोजनके विना जाति आदिका अभिमान नहीं होना मार्दव है। एक ऐसे धागेकी तरह जिसके दोनों छोर खींचे हुए है, कुटिलताके अभावको आर्जव कहते है। द्रव्योमे 'यह मेरा है' यह भाव समस्त विपत्तियोके आनेका मूल है अतः उसका त्याग लाघव है। लौकिकफलकी अपेक्षा न करके भोजन आदिके त्यागरूप क्रियाका नाम तप है उसके बारह भेद है। इन्द्रियोके विषयोमे रागद्वेष न करना इन्द्रियसंयम है। छह कायके जीवोंको बाधा न पहुचाना दूसरा प्राणिसयम है। समस्त परिग्रहका त्याग आकिञ्चन्य धर्म है। नौ प्रकारसे ब्रह्मका पालन ब्रह्मचर्य है। सज्जन साधु पुरुषोंके हितकारी भाषणको सत्य कहते हैं। सयमियोंके योग्य आहार आदि देना त्याग है। ये दस धर्म हैं।

जो रत्नत्रयका साधन करते हैं वे साधु हैं। उनके समूहको साधुवर्ग कहते हैं। वस्तुके यथार्थस्वरूपको ग्रहण करनेवाले ज्ञानमे लगना ज्ञानाचार है। तत्त्वश्रद्धानरूप परिणाम दर्शनाचार है। पाप कार्योंसे निवृत्तिरूप परिणति चारित्राचार है। अनशन आदि क्रियाओंमें लगना तप आचार है। ज्ञानादिमें अपनी शक्तिको न छिपाकर प्रवृत्ति करना वीर्याचार है। इन पाँच आचारोंमें जो स्वयं प्रवृत्त होते हैं और दूसरोंको प्रवृत्त करते हैं वे आचार्य है। जो रत्नत्रयमे तत्पर हैं और जिनागमके अर्थका सम्यक् उपदेश करते हैं वे उपाध्याय हैं। विनय पूर्वक जाकर जिनसे श्रुतका अध्ययन किया जाता है वे उपाध्याय हैं। पवयणका अर्थ प्रवचन है।

शङ्का—श्रुत शब्दका अर्थ भी प्रवचन है। वह आ चुका है। फिर प्रवचन कहनेसे पुनरुक्तता दोष होता है।

समाधान—प्रवचन शब्दसे रत्नत्रयको कहते हैं। कहा है—ज्ञान, दर्शन और चारित्र ये प्रवचन हैं।' अथवा पूर्वमें श्रुतसे श्रुतज्ञान कहा है। यहाँ प्रवचन शब्दसे शब्दरूप श्रुत कहा है। जिसके द्वारा जीवादि पदार्थ 'प्रोच्यन्ते' प्रकर्षरूपसे कहे जाते हैं वह प्रवचन है इस व्युत्पत्तिके अनुसार प्रवचनका अर्थ शब्दरूप श्रुत होता है। दर्शनसे सम्यग्दर्शन जानना ॥४५॥

भत्ती पूया वण्णजणणं च णासणमवण्णवादस्स ॥
आसादणपरिहारो दंसणविणओ समासेण ॥४६॥

का भत्ती पूजा ? अर्हदादिगुणानुरागो भक्तिः । पूजा द्विप्रकारा द्रव्यपूजा भावपूजा चेति । गन्धपुष्पधूपाक्षतादिदानं अर्हदाद्युद्दिश्य द्रव्यपूजा अभ्युत्थानप्रदक्षिणीकरणप्रणमनादिका कायक्रिया च, वाचा गुणसंस्तवनं च । भावपूजा मनसा तद्गुणानुस्मरणं ।

'वण्णजणणं' वर्णशब्दः क्वचिद्रूपवाची शुक्लवर्णमानय शुक्लरूपमिति । अक्षरवाची क्वचिद्यथा 'सिद्धो वर्णसमाम्नायः' इति । क्वचित् ब्राह्मणादौ यथात्रैव वर्णानामधिकार इति । क्वचिद्यशसि वर्णार्थी ददाति । तथा इहाप्यनंतरार्थो गृहीतः । तेन अर्हदादीनां यशोजननं विदुषां परिषदि । अन्येषामविश्ववेदिनां दृष्टेष्टविरुद्धवचनताप्रदर्शनेन निवेद्य तत्संवादवचनतया महत्ताप्रख्यापनं भगवतां वर्णजननम् ।

चैतन्यमात्रसमवस्थानरूपे निर्वाणे नापूर्वातिशयप्राप्तिरस्ति । यत्नमंतरेण सर्वात्मसु चैतन्यस्य सदा स्थितेः । विशेषरूपरहितत्वादसच्चैतन्यं खपुष्पवत् । प्रकृतेरचेतनाया मुक्तिरनुपयोगिनी । किं तया बद्धया मुक्तया वा फलमात्मनः ? अनया दिशा कापिलमते सिद्धता दुरुपपादा । बुद्ध्यादिविशेषगुणरहितता सिद्धताऽन्येषां । आत्मनोऽचेतनता कः सचेतनोऽभिलषति । विशेषरूपशून्यं वा कथमात्मनः सत्ता ? नैव चासावात्मा

गा०—भक्ति, पूजा, वर्णजनन और अवर्णवादका नाश करना तथा आसादनाका दूर करना संक्षेपसे दर्शन विनय है ॥४६॥

टी०—भक्ति और पूजा किसे कहते हैं ? अर्हन्त आदिके गुणोंमें अनुराग भक्ति है । पूजाके दो प्रकार हैं—द्रव्यपूजा और भावपूजा । अर्हन्त आदिका उद्देश करके गन्ध, पुष्प, धूप, अक्षत आदि अर्पित करना द्रव्यपूजा है । तथा उनके आदरमें खडे होना, प्रदक्षिणा करना, प्रणाम आदि करना रूप शारीरिक क्रिया और वचनसे गुणोंका स्तवन भी द्रव्यपूजा है । मनसे उनके गुणोका स्मरण भाव पूजा है ।

"वर्णजनन' में वर्णशब्द कही तो रूपका वाचक है जैसे 'शुक्लवर्ण लाओ' यहाँ उसका अर्थ शुक्लरूप है । कही 'वर्ण' अक्षरका वाचक है । जैसे 'सिद्धो वर्णसमाम्नायः' यहाँ वर्णका अर्थ अक्षर है । कहीं वर्णशब्द ब्राह्मण आदिका वाचक है । जैसे 'यहाँ वर्णोंका ही अधिकार है । यहाँ वर्णसे ब्राह्मण आदि लिये गये है । कहीपर वर्णका अर्थ यश है । जैसे वर्णार्थी दान करता है । यहाँ वर्णका अर्थ यश है । यहाँ भी वर्णसे यश अर्थ लिया है । अतः विद्वानोंकी सभामे अर्हन्त आदिका यश फैलाना, दूसरे असर्वज्ञोंकी प्रत्यक्ष और अनुमान प्रमाणसे विरुद्धता दिखलाकर उनके वचनोंके सवादि होनेसे महत्ताका ख्यापन करना अर्हन्तोंका वर्णजनन है ।

चैतन्यमात्रमें स्थितिरूप निर्वाणको माननेपर अपूर्व अतिशयकी प्राप्ति नही होती । बिना प्रयत्नके ही सभी आत्माओंमे चैतन्य सदा रहता है । तथा विशेषरूपसे रहित चैतन्य आकाशके फूलके समान असत् होता है । अचेतन प्रकृतिकी मुक्ति मानना व्यर्थ है । उसके बँधने या मुक्त होनेसे आत्माको क्या ? इस प्रकार सांख्यके मतमें सिद्धता नही बनती ।

वैशेषिक आदि दूसरे दार्शनिक सिद्ध अवस्थामें बुद्धि आदि विशेष गुणोंका अभाव मानते हैं । इस तरह कौन सचेतन आत्माको अचेतन बनाना पसन्द करेगा । तथा विशेष धर्मोंसे शून्य

पराभ्युपगतः बुद्ध्यादिगुणरहितत्वाद्भस्मवत् । रागादिक्लेशवासनारहितं चित्तमेव मुक्तिशब्देनोच्यते इत्यत्रापि चित्तमत्यंतासाधारणरूपं । यदेकं चिद्रूपं नेतरदिति तस्य स्वभावोऽनिरूप्यः । असाधारणस्वरूपशून्यं यदसत्तद्यथा—नभस्तामरसं । असाधारणरूपशून्यं च विवक्षिताच्चित्तादन्यदिति । एवं मतान्तरे निरूपितानां सिद्धानामघटमानत्वाद्बाधाकारिसकलकर्मलेपनिर्दहनसमुपजातात्मलस्वास्थ्यसमवस्थिताः अनंतज्ञानात्मकेन सुखेन संतृप्ताः सिद्धा इति तन्माहात्म्यकथनं सिद्धानां वर्णजननम् ।

यथा वीतरागद्वेषास्त्रिलोकचूडामणयोऽर्हदादयो भव्यानां शुभोपयोगकारणतामुपयान्ति तद्वदेतान्यपि तदीयानि प्रतिबिंबानि । बाह्यद्रव्यालंबनो हि शुभोऽशुभो वा परिणामो जायते । यथात्मनि मनोज्ञामनोज्ञविषयसान्निध्याद्रागद्वेषौ यथा स्वपुत्रसदृशं सुदर्शनं पुत्रस्मृतेरालंबनं । एवमर्हदादिगुणानुस्मरणनिबंधनं प्रतिबिंबम् । तदनुस्मरणं अभिनवाशुभप्रकृतेः संवरणे, प्रत्यग्रशुभकर्मादाने, गृहीतशुभप्रकृत्यनुभवस्फारीकरणे, पूर्वोपात्ताशुभप्रकृतिपटलरसापहासे च क्षममिति सकलाभिमतपुरुषार्थसिद्धिहेतुतया उपासनीयानीति चैत्यमहत्ताप्रकाशनं चैत्यवर्णजननमिति ।

केवलज्ञानवदशेषजीवादिद्रव्ययाथात्म्यप्रकाशनपटु, कर्मघर्मनिर्मूलनोद्यतशुभध्यानचंदनमलयायमानं स्वपरसमुद्धरणनिरतविनेयजनताचित्तप्रार्थनीय, प्रतिबद्धाशुभास्रवं, अप्रमत्ततायाः संपादक सकलविकलप्रत्यक्षज्ञान-

---

आत्माकी सत्ता कैसे रहेगी। तथा दूसरोंके द्वारा माना गया आत्मा बुद्धि आदि गुणोंसे रहित होनेसे भस्मके समान है।

बौद्धमतमें रागादि क्लेशवासनासे रहित चित्त ही मुक्ति शब्दसे कहा जाता है। उनके मतमें भी चित्त अत्यन्त असाधारणरूपको लिये हुए हैं। यदि चिद्रूप एक ही है अन्य नहीं है तो उसका स्वरूप निरूपण करनेके योग्य नहीं है। जो असाधारण स्वरूपसे शून्य होता है वह असत् होता है जैसे आकाशका कमल। और विवक्षित चित्तसे अन्य चित्त असाधारण स्वरूपसे शून्य है। इस प्रकार अन्य मतोंमें कहे गये सिद्धोंका स्वरूप नहीं बनता। अतः बाधा पैदा करनेवाले समस्त कर्मरूपी लेपको जला डालनेसे उत्पन्न हुए निश्चल स्वास्थ्यसे युक्त और अनन्तज्ञानरूप सुखसे सन्तृप्त सिद्ध होते हैं। इस प्रकार उनके माहात्म्यको कहना सिद्धोंका वर्णजनन है।

जैसे राग-द्वेषसे रहित और तीनों लोकोंके चूडामणि अर्हन्त आदि भव्यजीवोंके शुभोपयोगमें निमित्त होते हैं, उन्हींकी तरह उनके ये प्रतिबिम्ब भी शुभोपयोगमें निमित्त होते हैं। क्योंकि बाह्य द्रव्यका आलम्बन लेकर शुभ अथवा अशुभ परिणाम होते हैं। जैसे मनोज्ञ और अमनोज्ञ विषयोंकी समीपतासे आत्मामें राग-द्वेष होते हैं। या जैसे अपने पुत्रके समान व्यक्तिका दर्शन पुत्रकी स्मृतिका आलम्बन होता है। इसी तरह प्रतिबिम्ब अर्हन्त आदिके गुणोंके स्मरणमें निमित्त होता है। यह गुणस्मरण नवीन अशुभ प्रकृतिके आस्रवको रोकनेमें, नवीन शुभकर्मके बन्धमें, बन्धे हुए शुभकर्मके अनुभागको बढ़ानेमें और पूर्वबद्ध अशुभ प्रकृति समूहके अनुभागको कम करनेमें समर्थ होता है। इस तरह समस्त इष्ट पुरुषार्थकी सिद्धिमें कारण होनेसे प्रतिबिम्बोंकी उपासना करना चाहिए। इस रूपसे प्रतिबिम्बकी महत्ताका प्रकाशन चैत्यवर्ण जनन है। श्रुतज्ञान केवलज्ञानकी तरह समस्त जीवादि द्रव्योंके यथार्थस्वरूपको प्रकाशित करनेमें दक्ष होता है, कर्मरूपी घामको मूलसे नष्ट करनेमें उद्यत शुभध्यानरूपी चन्दनके लिए मलयपर्वतके समान है। अपना और दूसरोंका उद्धार करनेमें लगे हुए शिष्यजनोंके द्वारा अन्तःकरणसे प्रार्थनीय है

बीजं, दर्शनचरणयोः समीचीनयोः प्रवर्तकं इति निरूपणा श्रुतवर्णजननम् ।

दुःखात् त्रातुं, सुखं दातुं, निधीनां रत्नानां चाधिपत्ये स्थापयितुं, स्वचक्रविक्रमाभिभूतसकलभूपालखेचरमणबद्धमकुटचक्रवर्तिचक्रलांछनाम्बुजयोः पातयितुं, सुरविलासिनीचेतःसंमोहावहं, तदीयविलुठत्पाठीनलोचनरागमभिवर्धयंती, हर्षभरपरवशोद्भिन्नसान्द्ररोमांचकंचुकमाचरितुमुद्यतां, रूपशोभामन्दिरं संपादयितुमतिशयिताणिमादिगुणप्रसाधनां, सामानिकादिसुरसहस्रानुयानोपनीतमहत्तां, सततप्रत्यग्रयुवतालिंगितां सुभगताकल्तारोहयष्टिम्, अनेकसमुद्रबिन्दुगणनागणितायुःस्थितिं, मेरुकुलसुरसरित्कुलाचलादिगोचरस्वेच्छाविहारचतुरां, सुरांगनापृथुलनितम्बबिम्बाधरकठिननिबिड—समुन्नतकुचतटक्रीडालोकनस्पर्शनादिक्रियोपयोगामितप्रीतिविस्मितां, शतमखतामखेदेन झटिति घटयितुं, विरूपताजननीजराडाकिनीनामगोचरां शोकवृकानुल्लंघितां, विपद्दावानलशिखाभिरनुपप्लुतां, रोगोरगैरदष्टव्यां, यममहिषखुरासंडितां, भीतिदराहसमितिभिरनुल्लिखितां, संक्लेशशतशरभैरनध्यासितां, प्रियवियोगचण्डपुंडरीकैरसेवितां, अनर्घ्यसुखरत्नप्रभवभूमिं निर्वृतिं प्रापयितुं समर्थो जिनप्रणीतो धर्म इति धर्मस्वरूपकथनं धर्मवर्णनजननम् ॥

अर्थात् वे श्रुतज्ञानके लिए प्रयत्नशील रहते हैं। अशुभ आश्रवको रोकता है। अप्रमादपना लाता है, सकल प्रत्यक्ष और विकल प्रत्यक्षरूप ज्ञानका बीज है अर्थात् श्रुतज्ञानसे ही अन्यज्ञान पैदा होते हैं, सम्यग्दर्शन और सम्यग्ज्ञानमें प्रवृत्त करानेवाला है। इस प्रकार कथन करना श्रुतज्ञानका वर्णजनन है।

धर्म दुःखसे रक्षा करता है, सुख देता है, नवनिधि और चौदह रत्नोंका स्वामी बनाता है, अपने चक्ररत्नके पराक्रमसे समस्त राजाओं, विद्याधरोंको विनम्र करने वाले तथा देवगणोंको भी बाँधने वाले चक्रवर्तियोंको चरणोंमें गिराता है, धर्मके प्रभावसे बिना किसी खेदके तत्काल इन्द्रपदवी प्राप्त होती है जो इन्द्रपदवी देवांगनाओंके चित्तको संमोहित करती है, उनके चंचल मीनके तुल्य लोचनोंमें अनुरागको बढ़ाती है, हर्षके भारसे प्रकट हुए सघन रोमांचरूपी कन्चुकको उत्पन्न करनेमें तत्पर होती है, रूपकी शोभा बढ़ानेके लिये सातिशय अणिमा आदि ऋद्धियोंका सम्पादन करती है, सामानिक आदि हजारों देवता अनुगमन करके उसका महत्त्व स्थापन करते हैं, निरन्तर नवीन तारुण्य उसका आलिंगन करता है, सौभाग्यरूपी बेलके चढ़नेके लिये वह लकड़ीके तुल्य है, उसकी आयुकी स्थिति अनेक समुद्रोंके जल बिन्दुओंके द्वारा गिनी जाती है अर्थात् अनेक सागर प्रमाण आयु होती है, वह इन्द्रपद सुमेरु, देवकुरु, उत्तरकुरु, नदी, कुलाचल आदिमें स्वेच्छापूर्वक विहार करनेमें प्रवीण होता है और देवांगनाओंके स्थूल नितम्ब, ओष्ठ, कठिन उन्नत कुचोंके साथ क्रीड़ा, आलोकन, स्पर्शन आदि क्रियाके द्वारा अपरिमित प्रीतिको उत्पन्न कराता है। ऐसा इन्द्रपद धर्मके प्रभावसे प्राप्त होता है। तथा जिनदेवके द्वारा कहा गया धर्म मोक्षको भी प्राप्त करनेमें समर्थ है। जो मोक्ष शरीरको विरूप करने वाली जरारूपी डाकिनियोंके लिये अत्यन्त दूर है। अर्थात् वहाँ बुढ़ापा नहीं है, शोकरूपी भेड़िये वहाँ नहीं पहुँच सकते, विपत्तिरूपी बनकी आगकी शिखा वहाँ नहीं है, रोग रूपी सर्प वहाँ नहीं डसते, यमराजका भैंसा अपने खुरोंसे उसे खंडित नहीं करता, भयरूपी सूकरोंका समूह वहाँ नहीं पहुंचता, सैकड़ों संक्लेशरूपी शरभ वहाँ नहीं रहते, प्रियजनोंका वियोगरूपी प्रचण्ड आघात नहीं है और जो मोक्ष अमूल्य सुख रूपी रत्नोंका उत्पत्ति स्थान है वह धर्मसे प्राप्त होता है इस प्रकार धर्मके स्वरूपका कथन धर्मका वर्णजनन है।

१. स्तवपूर्व–आ० मु० ।

उत्त्रोटितप्रियवचनमुखरदुर्भेदबन्धुसमितिशृंखलाः, दुस्तरतरसंसारावर्तचिरपरिभ्रमणचकितचेतोमृदु-हृदयाः, अनित्यताभावनाहितचेतस्तया निरस्तशरीरद्रविणादिगोचराः, दुःखसंहतिसंपातरक्षाक्षमस्यापरस्य जिनप्रणीताद्धर्मादभावात् तमेव शरणमित्युपगताः, ज्ञानरत्नप्रदीपप्रभाप्रकरनिर्मूलितभुवनभवनान्तर्लीनाज्ञान-ध्वान्तसंततयः, कर्मणामादाने, तत्फलानुभवने, तन्निर्मूलने च वयमेकका एवेति कृतविनिश्चितयः असाधारण-चैतन्यादिलक्षणोपनीतभेदापेक्षयाऽन्ये वयमितरद्रव्यकलापादित्यन्यत्वभावनायामासक्ताः, सुखदुःखयोरकृतादर-द्वेषाः, सद्वसद्वेद्योदयकर्मनिमित्तत्वेन ममादृतिमनभिमतं चापेक्षते इति उपकारापकारयोरहमेव प्रणेता, आत्मनः शुभाशुभकर्म[1]णो निर्मापणे। ममैव स्वातंत्र्यात्तदु[2]पचितत्वात्, अनुग्रहनिग्रहयोः परे बराकाः किं कुर्वन्तीति मत्वा स्वजनपरजनविवेकनिरुत्सुकाः, समंतादुपसर्गमहोरगैरवार्यवीर्यैरवष्टब्धा अप्यविचलवृत्तयः, क्षुत्पि-पासादिपरीषहमहारातिसरभससंपातेऽप्यदीनासंक्लिष्टचेतोवृत्तयः, त्रिगुप्तिगुप्तिमुपाश्रिताः, अनशनादितपोराज्य-पालनोद्युक्तमतयः, कृतानूनव्रतकवचाः, गृहीतशीलखेटाः उदीर्णध्यानातिनिशितमंडलाग्राः, कर्मारिपृतनासाध-नोद्यताः साधव इति साधुमाहात्म्यप्रकाशनं साधुवर्गवर्णजननं।

मुक्ताहारपयोधरनिशाकरवासराधीश्वरकल्पमहीरुहादय इव प्रत्युपकारानपेक्षानुग्रहव्यापृताः, निर्वाणपुर-

---

प्रियवचन बोलनेमें वाचाल बन्धुजन कठिनतासे टूटने वाली सांकलके समान है किन्तु साधुगण इस सांकलको तोड़ डालते हैं, उनका हृदय अत्यन्त दुस्तर संसाररूपी भवरमें चिरकाल तक भ्रमण करनेसे भयभीत रहता है, चित्तके अनित्य भावनाके भानेमें लगे रहनेसे शरीर धन-सम्पत्ति आदिमें उनका आदरभाव नहीं होता, जिन भगवान्‌के द्वारा कहे गये धर्मके सिवाय अन्य किसीके दुःखोंके समूहसे रक्षा करनेमे समर्थ न होनेसे वे उसी धर्मकी शरणमें रहते हैं, ज्ञानरूपी रत्नमयी दीपककी प्रभाके समूहसे उन साधुओंने लोक रूपी भवनमें रहने वाले अज्ञान रूपी अन्ध-कारकी परम्पराको नष्ट कर दिया है, उनका यह निश्चय है कि कर्मोंके बाँधनेमे, उनका फल भोगनेमें और उन्हें नष्ट करनेमें हम अकेले ही हैं, चैतन्य आदि असाधारण लक्षणके भेदसे हम अन्य सब द्रव्योंके समूहसे भिन्न हैं इस प्रकार वे अन्यत्व भावनामे आसक्त रहते हैं। न सुखमें आदरभाव रखते हैं और न दुःखसे द्वेष करते हैं। साता और असाता वेदनीय कर्मके उदयके निमित्तसे मेरा आदर या निरादर होता है, अतः अपने उपकार और अपकारका कर्ता मैं ही हू, अपने शुभ अशुभ कर्मोंके निर्माणमे में स्वतन्त्र हूँ—उसीके द्वारा मेरा अनुग्रह या निग्रह होता है, दूसरे बेचारे इसमें क्या करते हैं ? ऐसा मानकर वे स्वजन और परजनमें भेद बुद्धि करनेमें उदा-सीन होते हैं। चहुओरसे शक्तिशाली उपसर्गरूपी भयानक सर्पोंसे घिरे होनेपर भी वे अविचल रहते हैं। भूख प्यास आदि परीषह रूपी महान् शत्रुओंका अचानक आक्रमण होनेपर भी उनकी चित्त-वृत्ति दीनता और संक्लेशसे रहित होती है। तीन गुप्ति रूपी गुप्तिका आश्रय लेते हैं, अनशन आदि तप रूपी राज्यका पालन करनेमें उनकी बुद्धि लगी रहती है, पूर्णव्रत रूपी कवच धारण करते हैं। शील रूपी खेटमें बसते हैं, ध्यानरूपी अत्यन्त तीक्ष्ण तलवार रखते है, उसके द्वारा कर्मरूपी शत्रुओं-की सेनाको वशमें करनेके लिये तत्पर रहते हैं। इस प्रकार साधुओंके माहात्म्यको प्रकट करना साधुवर्गका वर्णजनन है।

आचार्य मोतीका हार, मेघ, चंद्रमा, सूर्य और कल्पवृक्ष आदिकी तरह प्रत्युपकारकी

---

१. कर्मारोपणे—आ० मु०। २. दुपचरित—आ० मु०।

परिप्रापणक्षमे मार्गे निर्मले स्थिताः, परानपि विनताञ्छिष्यान्प्रवर्तयन्तः आयतातिधवलज्ञानपृथुलदर्शनपक्ष्म-लेक्षणाः, कुलीना, विनता, विभया, विमाना, विरागा, विशल्या, विमोहा, वचसि तपसि महसि चाऽद्वितीया[1] इति भाषणं सूरिवर्णजननम् ।

अधिगतश्रुतार्थयाथात्म्यात्मवाच्य[2]वाचकानुरूपव्याख्यानाः, निरस्तनिद्रातंद्रीप्रमादाः, सुचरिताः, सुशीलाः, सुमेधसः, इत्याध्यापकवर्णजननम् ।

रत्नत्रयालाभादनंतकालं अयमनादिनिधनोऽपि भव्यजीवराशिर्न निर्वाणपुरमुपैति तल्लाभे च सकलाः संपदः सुलभाः इति मार्गवर्णजननम् ।

मिथ्यात्वपटलविपाटनपटीयसी, ज्ञाननैर्मल्यकारिणी, अशुभगतिगमनप्रतिबंधविधायिनी, मिथ्यादर्शन-विरोधिनीति निगदनं समीचीनदृष्टेर्वर्णजननम् ।

सर्वज्ञतावीतरागते नार्हति विद्येते रागादिभिरविद्यया च अनुगताः समस्ता एव प्राणभृतः इत्यादिर-र्हतामवर्णवादः ।

स्त्रीवस्त्रगंधमाल्यालंकारादिविरहितानां सिद्धानां सुखं न किंचिदतीन्द्रियाणां तेषां समधिगतौ च निबंधनमस्ति किंचिदिति सिद्धावर्णवादः ।

स्वकल्पनाभिरयमर्हन्नेष सिद्धादिः इत्यचेतनस्य व्यवस्थापनायामपि दारिकाणां कृत्रिमपुत्रकव्यवहृतिरिव

अपेक्षा न करके कल्याणमें लगे रहते हैं, मोक्षपुरीको प्राप्त करानेमें समर्थ निर्मल मार्गमें स्थित होते हैं, दूसरे भी विनम्र शिष्योंको मोक्ष मार्गमे लगाते हैं, विस्तृत और अतिधवल ज्ञान और महान् दर्शनरूपी उनके नेत्र होते हैं। वे कुलीन, विनीत, निर्भय, मानरहित, रागरहित, शल्यरहित, मोहरहित होते हैं। वचनमें और तप तथा तेजमें अद्वितीय होते हैं इस प्रकार कहना आचार्यका वर्णजनन है।

उपाध्याय श्रुतके अर्थके ज्ञाता होनेसे वाच्य और वाचकके अनुरूप अर्थात् जिस शब्दका जो अर्थ है वही यथार्थ रूपसे व्याख्यान करते हैं। निद्रा, आलस्य और प्रमादसे दूर रहते हैं, वे अच्छे चरित, अच्छे शील और उत्तम मेधासे सम्पन्न होते हैं, ऐसा कहना उपाध्यायका वर्णजनन है। रत्नत्रयकी प्राप्ति न होनेसे यह अनादि निधन भी भव्य जीवराशि अनन्तकालसे मोक्षपुरीको नहीं जा पाती। उसके प्राप्त होनेपर सम्पूर्ण सम्पदाएँ सुलभ है इस प्रकार मोक्षमार्गकी प्रशंसा करना मार्ग वर्णजनन है।

सम्यग्दर्शन मिथ्यात्व पटलको उखाड फेकनेमें समर्थ है, ज्ञानको निर्मल करता है, अशुभ गतिमें गमनको रोकता है, मिथ्यादर्शनका विरोधी है ऐसा कथन समीचीन दृष्टिका वर्णजनन है। अर्हन्त भगवान्में सर्वज्ञता और वीतरागता नहीं होती, सभी प्राणी रागादि और अज्ञानसे युक्त होते हैं इत्यादि कहना अर्हन्तोंका अवर्णवाद है अर्थात् यह मिथ्यादोष लगाना है।

स्त्री, वस्त्र, गन्ध, माला अलंकार आदिसे रहित सिद्धोको कुछ भी सुख नही है। वे तो अतीन्द्रिय हैं उनको जाननेका कोई साधन नहीं है, ऐसा कहना सिद्धोंका अवर्णवाद है। अपनी कल्पनासे यही अर्हन्त है और ये सिद्ध आदि हैं इस प्रकार अचेतन पदार्थमें अर्हन्त आदिकी स्थापना करने पर भी जैसे बालिकाएँ खेलमें गुड्डा गुड्डी आदिमें पुत्रादिका काल्पनिक व्यवहार

---

१. या इव भूषणं सूरय इति सूरि–आ० मु० । २. वाच्यमध्यस्यमु–आ० ।

न मुख्यवस्तूपसेवनोद्भव फलमुपलभ्यते । न प्रतिबिंबादिस्था अर्हदादय. तद्गुणवैकल्यान्न प्रतिबिंबानामर्हदादित्वमिति चैत्यावर्णवादः ।

पुरुषकृतत्वाद्दशदाडिमादिवाक्यवदयथार्थता नातीद्रिय वस्तु पुंसो ज्ञानगोचरं, अज्ञातं चोपदिशतो वच: कथं सत्यं ? तदुद्गतं च ज्ञानं कथ समीचीनमिति श्रुतावर्णवाद. ।

दुर्गतिप्रतिबंधं स्वर्गादिकं च फल विधत्ते धर्म इति कथमदृष्टं श्रद्धीयते ? न हि सन्निहितकारणस्य कार्यस्यानुद्भवोऽस्ति यथाङ्कुरस्य । सुखप्रदायी चेद्धर्म. स्वनिष्पत्त्यनंतर सुखमात्मनः किं न करोति इति धर्मावर्णवादः ।

अहिंसादिव्रतपालनोद्यता साधव , सूरयोऽध्यापकाश्चेष्यन्ते । अहिंसाव्रतमेवैषा न युज्यते षड्जीवनिकायाकुले लोके वर्तमानाः कथमहिंसका स्यु ? केशोल्लुचनादिभि. पीडयतां च कथं नात्मवधः ? अदृष्टमात्मनो विषयं, धर्म, पाप, तत्फलं च गदता कथ सत्यव्रतम् ? इति साध्ववर्णवाद । एवमितरयोरपि ।

विरुद्धाना एकत्र धर्माणामसंभवात् विरुद्धाभिमतधर्माधिकरणैकवस्तुज्ञापन न सम्यक् । तदभिरुचेर्न समीचीनता विपर्ययज्ञानानुगतत्वान्मृगतृष्णोदकश्रद्धेव, मिथ्याज्ञानानुगतत्वाच्चरणमपि न सम्यक् । उरगप्रत्ययबलाद्रज्जुपरिहार इवेति प्रवचनावर्णवादः ।

करती है उस तरह मुख्य अर्हन्त आदिकी सेवासे होने वाला फल प्राप्त नही होता । तथा प्रतिबिंब आदिमे स्थापित अर्हन्त नही है क्योंकि उनमे उनके गुण नही है इसलिये प्रतिबिम्ब आदि अर्हन्त आदि नही है ऐसा कहना चैत्यका अवर्णवाद है ।

अर्हन्तके द्वारा कहा गया श्रुत पुरुषके द्वारा कहा होनेसे 'दस अनार' जैसे वचनोंकी तरह यथार्थ नही है । अतीन्द्रिय वस्तु पुरुषके ज्ञानका विषय नहीं हो सकती । और बिना जाने उपदेश देने वालेके वचन कैसे सत्य हो सकते है । तथा उनसे होने वाला ज्ञान कैसे सच्चा हो सकता है इस प्रकार कहना श्रुतका अवर्णवाद है ।

धर्म दुर्गतिको रोकता है और स्वर्गादि फल देता हैं, बिना देखे इसपर कैसे श्रद्धा की जा सकती है । जिस कार्यके कारण वर्तमान हों वह कैसे उत्पन्न नही होगा जैसे अंकुर । यदि धर्म सुखदाता है तो अपनी उत्पत्तिके पश्चात् ही आत्माको सुख क्यों नही करता । ऐसा कथन धर्मका अवर्णवाद है ।

अहिंसा आदि व्रतोंका पालन करनेमें जो तत्पर हैं उन्हे साधु, आचार्य और उपाध्याय कहते हैं । किन्तु अहिंसा व्रत ही इनके नही है । जो छह प्रकारके जीवोंसे भरे संसारमें रहता है वह अहिंसक कैसे हो सकता है ? तथा केशलोच आदिसे जो आत्माको पीड़ा पहुँचाते हैं वे आत्मघातके दोषी क्यों नही हैं ? जिन्हे देखा नही है ऐसे आत्माके विषय धर्म, पाप, उनका फल कहनेवालोंके सत्यव्रत कैसे हैं, ऐसा कहना साधुका अवर्णवाद है । इसी प्रकार आचार्य और उपाध्यायका भी अवर्णवाद जानना ।

एक वस्तुमें परस्परमें विरुद्ध धर्म असम्भव है । अत: परस्परमें विरुद्ध धर्मोका आधार एक वस्तुको कहना सम्यक् नही है । जो इसमे अभिरुचि रखता है वह सम्यग्दृष्टी नहीं है क्योंकि उसका ज्ञान विपरीत है जैसे मरीचिकामे जलकी श्रद्धा करनेवालेकी श्रद्धा विपरीत है । तथा मिथ्याज्ञानका अनुसारी होनेसे उसका चारित्र भी सम्यक् नही है । जैसे सर्प जानकर रस्सीको हटाना सम्यक् नहीं है । इस प्रकारका कथन प्रवचनका अवर्णवाद है ।

एतेषामवर्णवादानामसंभवप्रदर्शनं । पुरुषत्वाद्रथ्यापुरुषवत् सर्वज्ञो वीतरागो वा न भवत्यर्हन् इति साधनमनुपपन्नं । असर्वज्ञतामवीतरागतां चान्तरेण पुरुषता नोपपद्यते इत्यन्यथानुपपत्तेरभावात् । जैमिन्यादयो न सकलवेदार्थज्ञा पुरुषत्वादविपालवत् इति शक्यं वक्तुम् । सर्वज्ञतावीतरागतासिद्धिश्चान्यत्र निरूपितेति नेह प्रतन्यते । दुःखप्रतिकारार्थेषु वस्तुषु मूढानां सुखसाधनव्यवहार: शरीरायासमात्रत्वान्न कामिनीसमागमसुखं । वैरूप्यनाशनैर्वस्त्रादिभिर्न कृत्यं सिद्धानां । अशरीराणां सकलदुःखापायरूपं सुखं अविकलमनंतज्ञानात्मकं तेष्व-वस्थितं । श्रुतं निबंधनं तदधिगमे । शुभोपयोगनिमित्ततार्हदादीनामिव प्रतिबिंबानामिति न बुद्धयो-त्प्रेक्षितव्या ॥४६॥

एवं दंसणमाराहंतो मरणे असंजदो जदि वि कोवि ॥
सुविसुद्धतिव्वलेस्सो परित्तसंसारिओ होई ॥४७॥

एवमित्यनया गाथया असंयतसम्यग्दृष्टेः सम्यक्त्वमाराधयतः फलमाचष्टे एवमिति पूर्वोक्तपरामर्श. । नैर्ग्रन्थ्यमेव मोक्षमार्ग प्रकृष्ट इति ।

'सद्दहया[1] पत्तियया रोचय फासंतया पवयणस्स ।
सयलस्स जेण एदे सम्मत्ताराहया होंति ॥'

श्रद्दधानाः शंकादिकमपाकुर्वन्ति उपबृंहणादिभिः सम्यक्त्वस्य शुद्धिं वर्धयन्समीचीनं दर्शनविनयं

इन अवर्णवादोंको असम्भव दिखलाते हैं—

पुरुष होनेसे राह चलते पुरुषकी तरह अर्हन्त सर्वज्ञ वीतराग नही हैं। यहाँ पुरुष हेतु ठीक नही है क्योंकि असर्वज्ञता और अवीतरागताके विना पुरुष नही होता ऐसी अन्यथानुपपत्ति नहीं है। इस तरहसे यह भी कहा जा सकता है कि जैमिनि आदि समस्त वेदार्थके ज्ञाता नहीं हैं, पुरुष होनेसे, जैसे भेड़ चरानेवाला व्यक्ति। सर्वज्ञता और वीतरागताकी सिद्धि अन्य ग्रन्थोंमें कही है इसलिए यहाँ उसका विस्तार नहीं करते।

जो वस्तु दुःखका प्रतीकार करनेके लिए हैं, अज्ञानी उन्हे सुखका साधन मान लेते हैं। स्त्री सम्भोग सुख नहीं है वह तो शारीरिक श्रममात्र है। तथा विरूपताको नष्ट करनेवाले वस्त्रों-से सिद्धोंको क्या करना है? वे तो शरीर रहित हैं उनमें समस्त दुःखोंका विनाशरूप अनन्त-ज्ञानात्मक सम्पूर्ण सुख है। इसके जाननेके लिए श्रुत वर्तमान है। तथा जैसे अर्हन्त शुभोपयोगमें निमित्त होते हैं उसी तरह उनके प्रतिबिम्ब भी होते हैं। इसलिए यह बौद्धिक कल्पनामात्र नहीं है ॥४६॥

गा०—इस प्रकार सम्यग्दर्शनकी आराधना करने वाला मरते समय यद्यपि कोई असंयत होता है किन्तु सुविशुद्ध तीव्र लेश्या वाला अल्प संसारी होता है ॥४७॥

टी०—'एवं' इत्यादि गाथाके द्वारा सम्यक्त्वकी आराधना करने वाले असंयत सम्यग्दृष्टिका फल कहते हैं। 'एवं' पद पूर्वोक्त कथनके लिये आया है कि निर्ग्रन्थता ही उत्कृष्ट मोक्ष मार्ग है।

मनसे श्रद्धान करने वाले, यही उत्तम है ऐसा वचनसे प्रीति प्रकट करने वाले, सकेतादि से रुचिको दर्शानेवाले और समस्त प्रवचनका अनुष्ठान करने वाले ये सब सम्यक्त्वके आराधक होते हैं॥

अर्थात् जो श्रद्धान करते हुए शंका आदिको दूर करते हैं और उपबृंहण आदिसे सम्यक्त्वकी

१. संथाचार्य व्याख्यातृभिः सूत्रे पठिता गाथा यथा—मूलारा० ।

संपादयन् । 'दंसणं' श्रद्धानं । 'आराहतो' निष्पादयन्'मरणे' भवपर्ययप्रच्युतिकाले । 'असंजदो अवि वि' यद्यप्यसंयतः । 'सुविसुद्धतिव्वलेस्सो' कषायानुरंजिता योगवृत्तिर्लेश्या, सा षोढा प्रविभक्ता कृष्णनीलकापोततेजःपद्मशुक्ललेश्याभेदेन । तत्राशुभलेश्यानिरासार्थं सुविशुद्धग्रहणं । तीव्रग्रहणं परिणामप्रकर्षोपादानाय । सुविशुद्धा तीव्रा लेश्या यस्य सुविशुद्धतीव्रलेश्य. । 'परित्तसंसारिओ' अल्पचतुर्गतिपरिवर्तः । 'होदि' भवति । अल्पसंसारता सम्यक्त्वाराधनाया. फलत्वेन दर्शिता ।।४७।।

तत्त्वश्रद्धानपरिणामः कतिभेदः किं फलं इत्यस्य प्रतिवचनमुत्तरप्रबंध. । तत्र भेदप्रतिपादनायाह—

तिविहा सम्मत्ताराहणा य उक्कस्समज्झिमजहण्णा ।।
उक्कस्साए सिज्झदि उक्कस्ससुक्कलेस्साए ।।४८।।

'तिविहा' त्रिविधा । 'सम्मत्ताराहणा' सम्यक्त्वाराधना । 'उक्कस्समज्झिमजहण्णा' उत्कृष्टमध्यमजघन्या चेति । तत्र 'उक्कस्साए' उत्कृष्टया सम्यक्त्वाराधनया । 'सिज्झइ' सिध्यति निर्वृतिमुपैति । उत्कृष्टशुक्ललेश्यासहितया ।।४८।।

सेसा य हुंति भवा सत्त मज्झिमाए य सुक्कलेस्साए ।।
संखेज्जाऽसंखेज्जा वा सेसा भवा जहण्णाए ।।४९।।

'सेसा' अवशिष्टाः । 'होंति' भवन्ति । किं 'भवा' मनुष्यत्वादिपर्याया. । कति 'सत्त' सप्त । 'मज्झिमाए य' सम्यक्त्वाराधनया । 'सुक्कलेस्साए' शुक्ललेश्यया मध्यमया वर्तमानस्येत्युभाभ्यां मध्यमशब्दस्य

विशुद्धिको बढ़ाते हुए दर्शन विनय करते हैं वे सम्यक्त्वके आराधक हैं। मरण अर्थात् भवपर्यायके छूटनेके समय यद्यपि असंयत होता है किन्तु जो सम्यग्दर्शनको धारण किये होता है और सुविशुद्ध तीव्रलेश्या वाला होता है। कषायसे रंगी हुई मन वचन कायकी प्रवृत्तिको लेश्या कहते हैं। उसके कृष्ण, नील, कपोत, तेज, पद्म और शुक्लके भेदसे छह भेद हैं। उनमें अशुभ लेश्या का निराकरण करनेके लिये 'सुविशुद्ध' पद ग्रहण किया है। तथा परिणामोंका प्रकर्ष बतलानेके लिए तीव्र पद ग्रहण किया है। जिसके सुविशुद्ध तीव्र लेश्या होती है वह सुविशुद्ध तीव्र लेश्या वाला होता है। वह चतुर्गतिरूप परिवर्तमें अल्पकाल तक भ्रमण करता है। इस प्रकार सम्यक्त्वकी आराधना का फल अल्प संसार बतलाया है ।।४७।।

तत्त्वश्रद्धानरूप परिणामके कितने भेद हैं तथा उसका क्या फल है इसके उत्तरमें आगेका कथन करते हुए पहले भेद कहते हैं—

गा०—सम्यक्त्वकी आराधना तीन प्रकारकी है। उत्कृष्ट, मध्यम और जघन्य। उत्कृष्ट शुक्ल लेश्या सहित, उत्कृष्ट सम्यक्त्व आराधनामें मोक्ष प्राप्त करता है ।।४८।।

टी०—सम्यक्त्व आराधनाके उत्कृष्ट, मध्यम और जघन्य ऐसे तीन भेद हैं। उत्कृष्ट शुक्ल लेश्याके साथ यदि उत्कृष्ट आराधना सम्यक्त्वकी हो तो उससे मोक्ष प्राप्त होता है ।।४८।।

गा०—और मध्यम शुक्ल लेश्याके साथ मध्यम सम्यक्त्वाराधनासे सात मनुष्य आदि पर्याय शेष होती है। जघन्य सम्यक्त्वाराधनासे संख्यात अथवा असंख्यात (भव) भव अवशेष रहते हैं ।।४९।।

टी०—गाथामें आये मध्यम शब्दका सम्बन्ध दोनोंमें लगाकर व्याख्यान करना चाहिये।

संबंधो व्याख्येयः । 'संखेज्जा' संख्याताः 'असंखेज्जा वा' असंख्याता वा 'सेसा' शेषा भवन्ति भवाः । 'जहण्णाए' जघन्यसम्यक्त्वाराधनया मृतिमुपेतस्य ।

उक्तास्तिस्र आराधनाः कस्य भवंति इत्यस्योत्तरमाह गाथया—

उक्कस्सा केवलिणो मज्झिमया सेससम्मदिट्ठीणं ।
अविरदसम्मादिट्ठिस्स संकिलिट्ठस्स हु जहण्णा ॥५०॥

उत्कृष्टा सम्यक्त्वाराधना भवति । कस्य, 'केवलिणो' केवलिनः । केवलमसहायं ज्ञानं । इंद्रियाणि, मनः, प्रकाशोपदेशादिकं चानपेक्ष्य वृत्तेः । प्रत्यक्षस्यावध्यादेः आत्मकारणत्वादसहायतास्तीति केवलत्वप्रसंगः स्यादिति चेन्न रूढेर्निराकृताशेषज्ञानावरणस्योपजायमान[1] एव बोधे केवलशब्दवृत्तेः । केवलिशब्दो यद्यपि सामान्येन केवलिद्वये प्रवृत्तस्तथापीह अयोगिकेवलिग्रहणं इत्यन्यत्र मरणाभावात् ॥

उत्कृष्टता कथं सम्यक्त्वाराधनायां इति चेत् इह द्विविधं सम्यक्त्वं सरागसम्यक्त्वं वीतरागसम्यक्त्वं चेति । रागो द्विविधः प्रशस्तरागः अप्रशस्तराग इति । तत्र प्रशस्तरागो नाम पंचगुरुषु, प्रवचने च वर्तमानस्तद्-

---

अर्थात् मध्यम शुक्ल लेश्यामें वर्तमान मध्यम सम्यक्त्वाराधना वालेके सात भव शेष रहते हैं। और जघन्य सम्यक्त्वाराधनाके साथ मरने वालेके संख्यात अथवा असंख्यात भव शेष होते हैं ॥४९॥

विशेषार्थ—पं० आशाधरने अपनी टीकामें कहा है कि अन्य टीकाकार 'संखेज्जा-संखेज्जा भवाय' ऐसा पढ़कर 'भवाइय' में आये शब्दसे अनन्तका समुच्चय करते हैं किन्तु हम 'वा' शब्दसे करते हैं। परन्तु विजयोदयामें 'च' शब्द या वा शब्दसे अनन्तका ग्रहण नहीं किया है ॥४९॥

उक्त तीन आराधनाएँ किसके होती हैं इसका उत्तर आगेकी गाथासे कहते हैं—

गा०—उत्कृष्ट आराधना केवलीके होती है। मध्यम आराधना शेष सम्यग्दृष्टियोंके होती है। जघन्य आराधना संक्लेश परिणाम वाले अविरत सम्यग्दृष्टिके होती है ॥५०॥

टी०—उत्कृष्ट सम्यक्त्व आराधना केवलीके होती है। केवल अर्थात् असहाय ज्ञान; क्योंकि वह इन्द्रियां, मन, प्रकाश और उपदेश आदिकी अपेक्षाके बिना होता है।

शंका—प्रत्यक्ष अवधि आदि ज्ञान आत्मासे ही होते हैं। वे भी इन्द्रियादिकी सहायताकी अपेक्षा नहीं रखते, अतः उनके भी केवल ज्ञान होनेका प्रसंग आयेगा ?

समाधान—नहीं, क्योंकि रूढिवश जिसका सम्पूर्ण ज्ञानावरण नष्ट हो गया है उसीके उत्पन्न होने वाले ज्ञानमें केवल शब्दका व्यवहार होता है।

यद्यपि केवली शब्द सामान्यसे दोनों प्रकारके केवलियोंमें प्रवृत्त होता है तथापि यहाँ अयोग केवलीका ग्रहण किया है क्योंकि सयोग केवलीका मरण नहीं होता।

शंका—सम्यक्त्व आराधनाकी उत्कृष्टता कैसे होती है ?

समाधान—यहाँ सम्यक्त्वके दो भेद हैं—सरागसम्यक्त्व और वीतराग सम्यक्त्व। रागके दो भेद हैं—प्रशस्तराग और अप्रशस्त राग। उनमेंसे अर्हन्त सिद्ध आदि पाँच परमेष्ठियोंमें और

---

१. मानस्यैव बोधस्य आ० मु० ।

गुणानुरागात्मकः । अप्रशस्तो रागो द्विविधः इंद्रियविषयेषु मनोज्ञेषु जायमानः । आभासेषु, तत्प्रणीते सिद्धांते, तन्निरूपिते मार्गे, तत्स्थेषु वा प्रवर्तमान दृष्टिराग. इति । तत्र प्रशस्तरागसहितानां श्रद्धानं सरागसम्यग्दर्शनं । रागद्वयरहितानां क्षीणमोहावरणानां वीतरागसम्यग्दर्शनं । तस्याराधना उत्कृष्टा रागमलाभावात् अशेष-त्रिकालगोचरवस्तुयाथात्म्यग्राहिसकलज्ञानसहचारित्वाच्च ।

'मज्झिमया' मध्यमिका सम्यक्त्वाराधना भवति । 'सेससम्मादिट्ठीणं' उपयुक्तेतरवचनः शेषशब्दः इति केवलिभ्यो येऽन्येऽसंयतसम्यग्दृष्ट्यादयस्ते परिगृह्यन्ते शेषशब्देन ।

तत्रापवादमाह—'अविरदसम्मादिट्ठिस्स' असंयतसम्यग्दृष्टेः । 'जहण्णा' जघन्या सम्यक्त्वाराधना भवति । किं सर्वस्य ? नेत्याह—''संकिलिट्ठस्स' संक्लिष्टस्य परीषहव्याकुलचेतसः इति यावत् ।

जघन्यसम्यक्त्वाराधनामाहात्म्यं कथयति—

संखेज्जमसंखेज्जगुणं वा संसारमणुसरित्तूणं ।
दुक्खक्खयं करेंति जे सम्मत्तेणणुमरंति ।।५१।।

'संखेज्जमसंखेज्जगुणं वा संसारमणुसरित्तूणं' परिभ्रम्य । 'दुक्खक्खयं' दुःखक्षयं । 'करेंति' कुर्वन्ति । के 'जे सम्मत्तेणणुमरंति' सम्यक्त्वेन सह मृतिमुपयान्ति । नन्वियं जघन्या सम्यक्त्वाराधना तस्याश्च प्रवृत्तस्य संसारकालो निरूपित एव । 'संखेज्जं वा असंखेज्जं वा सेसा जहण्णाए' इति तत्पुनरुक्तता स्यादिति । न,

---

प्रवचनमें. उनके गुणोंमें अनुराग रूप प्रशस्तराग है। अप्रशस्त रागके दो भेद हैं एक तो मनको प्रिय लगने वाले इन्द्रिय विषयोंमें होनेवाला और दूसरा, मिथ्या देवोंमें, उनके द्वारा कहे गये सिद्धान्तमें, उनके द्वारा कहे गये मार्गमें अथवा उस मार्गके अनुयायियोंमें प्रवर्तमान दृष्टिराग। उनमेंसे प्रशस्तराग सहित जीवोंका श्रद्धान सरागसम्यग्दर्शन है और दोनों प्रकारके रागसे रहित तथा जिनका मोह और आवरण क्षीण हो गया है उनका श्रद्धान वीतराग सम्यग्दर्शन है। उसकी आराधना उत्कृष्ट है। क्योंकि राग और मलका अभाव है तथा समस्त त्रिकालवर्ती पदार्थोंके यथार्थ स्वरूपको ग्रहण करनेवाले सम्पूर्ण ज्ञानके साथ होता है।

शेष सम्यग्दृष्टियोंके मध्यम सम्यक्त्वाराधना होती है। यहाँ शेष शब्द जो कहे हैं उससे अन्यका वाचक है, अतः केवलीसे अन्य जो असंयत सम्यग्दृष्टि हैं वे शेष शब्दसे ग्रहण किये जाते हैं। उसमें अपवाद कहते हैं कि अविरत सम्यग्दृष्टिके जघन्य सम्यक्त्वाराधना होती है। क्या सभीके होती है। इसके उत्तरमें कहते है जो संक्लिष्ट है अर्थात् जिसका चित्त परीषहसे व्याकुल है उस अविरत सम्यग्दृष्टीके जघन्य सम्यक्त्वाराधना होती है ।।५०।।

जघन्य सम्यक्त्वाराधनाका माहात्म्य कहते हैं—

गा०—जो सम्यक्त्वके साथ मरते हैं वे असंख्यात अथवा असंख्यातगुणे संसारमें भ्रमण करके दुःखका क्षय करते हैं ।।५१।।

टी०—**शंका**—यह तो जघन्य सम्क्त्वाराधना है। उसे जो करता है उसका संसार काल पहले कहा ही है कि जघन्य सम्यक्त्वाराधनावालेके सख्यात या असंख्यात भव शेष रहते हैं। अतः पुनरुक्तता दोष आता है ?

उक्तस्यार्थस्याविशेषेण भूयोऽभिधानं पुनरुक्तमिति, इह तु विशेषाभिधानमस्ति 'दुक्खक्खयं करेंतित्ति'।

सम्यक्त्वकाळमाहात्म्यनिवेदनाय गाथा—

लद्धूण य सम्मत्तं मुहुत्तकालमवि जे परिवडंति।
तेसिमणंताणंता ण भवदि संसारवासद्धा ॥५२॥

'लद्धूण' लब्ध्वा। 'सम्मत्तं' तत्त्वश्रद्धानं। कियत्कालं? 'मुहुत्तकालमवि' अंतर्मुहूर्तमात्रमपि। 'जे' ये 'परिवडंति' सम्यक्त्वात्प्रच्यवन्ति अनंतानुबंधिनामुदयात्। 'तेसिं' तेषां सम्यक्त्वात्प्रच्युत्य मिथ्यात्वं गतानां। 'संसारवासद्धा' संसारवसनकालोऽनंतो भवत्येवेति, तु शब्द एवकारार्थोऽत्र[1] संबंधनं नेयः। अनंतानंतग्रहणं कुर्वता अनंतकालपरिभ्रमणसद्भावसूचनं कृतम् ॥५२॥ इति बालमरणम् ॥

जे पुण सम्मत्ताओ पब्भट्ठा ते पमाददोसेण।
भामन्ति दु भव्वा वि हु संसारमहण्णवे भीमे ॥५३॥

मिथ्यादृष्टेर्दर्शनस्याभावान्न तस्याराधकः स्यात् ज्ञानचारित्रयोः परिणत इति तयोराराधकः स्यादितीमां शंकामपाकर्तुमाह—

जो पुण मिच्छादिट्ठी दढचरित्तो अदढचरित्तो वा ॥
कालं करेज्ज ण हु सो कस्स हु आराहओ होदि ॥५४॥

समाधान—नहीं, जो बात पूर्वमें कही है उसे बिना किसी विशेषताके पुनः कहनेको पुनरुक्त कहते हैं। किन्तु यहाँ तो विशेष कथन है कि दुःखका क्षय करते हैं ॥५१॥

सम्यक्त्वका माहात्म्य कहनेके लिये गाथा कहते हैं—

गा०—जो अन्तर्मुहूर्त मात्र भी सम्यक्त्वको प्राप्त करके सम्यक्त्वसे गिर जाते हैं उनका संसारमें बसनेका काल अनन्तानन्त नहीं होता ॥५२॥

टी०—एक अन्तर्मुहूर्त कालके लिये भी जो तत्त्वश्रद्धान रूप सम्यक्त्वको प्राप्त करके अनन्तानुबन्धी कषायका उदय होनेसे सम्यक्त्वसे गिर जाते हैं। सम्यक्त्वसे गिरकर मिथ्यात्वमें जाने वाले उन जीवोंका संसारमें बसनेका काल अनन्त ही होता है। 'अनन्तानन्तकाल नहीं होता' ऐसा कहनेसे अनन्तकाल तक भ्रमणके सद्भावकी सूचना की है ॥५२॥

गा०—पुनः जो सम्यक्त्वसे भ्रष्ट हो जाते है। वे प्रमादके दोषसे भव्य होते हुए भी भयंकर संसाररूपी समुद्रमें भ्रमण करते ही हैं ॥५३॥

विशेषार्थ—इस गाथापर विजयोदया टीका नही हैं। आशाधर जी ने भी इसकी टीका नहीं की है। अतः क्षेपक प्रतीत होती है। किन्तु प्रतियोंमें पाई जाती है। तथा गाथा ५२ की विजयोदया टीकामें 'तु शब्दो एवकारार्थोऽत्र संबंधनं नेयः' ऐसा वाक्य है जिसका अर्थ होता है कि यहाँ तु शब्दका अर्थ एवकार लेना। 'आ' प्रतिमें पाठ हैं—'तु शब्दो एवकारार्थो भामत्यनन्तरं नेयः।' तु शब्दका अर्थ एवकार है और उसे 'भामंति' के अनन्तर लेना चाहिये। इस गाथा ५३ में 'भामंति दु' पाठ है। इसी दु या तु का अर्थ एवकार लेनेके लिये कहा है। अतः यह गाथा मूलकी होना संभव है ॥५३॥

मिथ्यादृष्टिके सम्यग्दर्शनका अभाव होनेसे वह उसका आराधक न होवे, किन्तु ज्ञान और

---

१. कारार्थो भामत्यनन्तरं नेयः। —आ०।

'जो पुण मिच्छादिट्ठी' यः पुनर्मिथ्यादृष्टिस्तत्त्वश्रद्धानरहितो । यः पुन'र्दढचरित्तो अदढचरित्तो वा' दृढचारित्रो वा अदृढचारित्रो वा । 'कालं करेज्ज' मृतिमुपेयात् । 'सो' सः । 'ण हु' नैव । 'कस्सइ' कस्यचिदपि । 'आराहओ' आराधको भवति । सम्यक्त्वमंतरेण सम्यग्ज्ञानसम्यक्चारित्रे न स्तः, इति रत्नत्रये कस्यचिदपि नाराधक इति ग्राह्यम् । अन्यथा मिथ्यादर्शनादीनामाराधक एवासौ इति कृत्वा न कस्यचिदपि इत्ययुक्तं स्यात् ॥५४॥

अथ को मिथ्यादृष्टिर्यो मिथ्यात्ववान् । अथ तदेव मिथ्यात्वं नाम किं कतिविधं इत्यत आह—

तं मिच्छत्तं जमसद्दहणं तच्चाण होइ अत्थाणं ।
संसइयमभिग्गहियं अणभिग्गहियं च तं तिविहं ॥५५॥

'तं' तत् । 'मिच्छत्तं' मिथ्यात्वं । 'होदि' भवति । 'जं' यत् 'असद्दहणं' अश्रद्धानं । कस्य ? 'तच्चाणं' 'अत्थाणं' तत्त्वार्थानामनंतद्रव्यपर्यायात्मकानां जीवादीनां । अर्थस्य तत्त्वविशेषणमनर्थकम् । अतत्त्वरूपस्याभावात् इति चेन्न मिथ्याज्ञानोपदर्शितस्य नित्यत्वक्षणिकत्वाद्यन्यतमधर्ममात्रात्मकस्यातत्त्वरूप-संभवात् । तस्य भावस्तत्त्वं तत्त्वशब्दो भाववचन: । भाववत्त्वमर्थशब्दो ब्रवीति । ततोऽनयोर्भिन्नाधिकरणभूतो: कथं समानाधिकरणतेति न दोषः । भावद्व्यतिरेकाद्भावस्य तत्त्वशब्दोऽर्थएव वर्तते इति । तथा च प्रयोग:—

चारित्र तो उसके है अतः वह उनका आराधक हो सकता है ? इस शंकाको दूर करनेके लिए कहते हैं—

गा०—जो पुनः मिथ्यादृष्टि है वह दृढ़ चारित्र वाला अथवा अदृढ़ चारित्र वाला हो और मरण करे तो वह किसीका भी आराधक नहीं ही होता ॥५४॥

टी०—जो मिथ्यादृष्टि अर्थात् तत्त्वार्थश्रद्धानसे रहित है वह दृढ़ चारित्र वाला हो या अदृढ़ चारित्र वाला हो और मरण करे तो वह ज्ञान या चारित्रका भी आराधक नहीं होता; क्योंकि सम्यक्त्वके बिना सम्यग्ज्ञान और सम्यक् चारित्र नहीं होते। इसलिये रत्नत्रयमें से किसी का भी वह आराधक नहीं है ऐसा अर्थ लेना चाहिये। यदि ऐसा अर्थ नहीं लिया जाये तो मिथ्या-दर्शन आदिका वह आराधक ही होनेसे 'किसीका भी आराधक नहीं' ऐसा कहना ठीक नहीं होगा ॥५४॥

जो मिथ्यात्ववान् है वही मिथ्यादृष्टी है। तब वह मिथ्यात्व क्या है और उसके कितने भेद हैं ? यह कहते हैं—

गा०—जो तत्त्वार्थोंका अश्रद्धान है वह मिथ्यात्व है उसके तीन भेद हैं। संशयसे होनेवाला मिथ्यात्व, अभिगृहीत मिथ्यात्व और अनभिगृहीत मिथ्यात्व ॥५५॥

टी०—तत्त्वार्थ अर्थात् अनन्त द्रव्य पर्यायात्मक जीवादिका अश्रद्धान मिथ्यात्व है।

शंका—अर्थका तत्त्व विशेषण देना निरर्थक है क्योंकि अतत्त्वरूप अर्थका अभाव है ?

समाधान—नहीं, क्योंकि मिथ्याज्ञानके द्वारा दिखलाये गये नित्यता क्षणिकता आदिमेंसे किसी एक धर्म वाला अतत्त्वरूप अर्थ संभव है।

शंका—तत्के भावको तत्त्व कहते हैं। तत्त्व शब्द भाव वाचक है और अर्थ शब्द भाववान् को कहता है। अतः ये दोनों भिन्न-भिन्न अधिकरण वाले हैं। इनका सामानाधिकरण्य कैसे हो सकता है ?

समाधान—यह दोष नहीं है क्योंकि भाव भाववान्से अभिन्न होता है अतः तत्त्वशब्द

'तत्त्वार्थश्रद्धानं सम्यग्दर्शनमिति'। अथवाप्यधिकरणत्वैव। अर्थानां जीवादीनां यानि तत्त्वानि अवि-
परीतानि रूपाणि तेषामश्रद्धानं यत्तन्मिथ्यात्वं इति संबंधः क्रियते। 'संसयिदं' संशयितं किंचित्तत्त्वमिति। तत्त्वानवधारणात्मक संशयज्ञानसहचारि अश्रद्धानं संशयितं। न हि संदिहानस्य तत्त्वविषयं श्रद्धानमस्ति इदमित्थमेवेति, निश्चयप्रत्ययसहभावित्वात् श्रद्धानस्य। 'अभिग्गहिदं' परोपदेशाभिमुख्येन गृहीतं स्वीकृतं अश्रद्धानं अभिगृहीतमुच्यते। एतदुक्तं भवति। न संति जीवादीनि द्रव्याणि इति गृहाण संति जीवादीनि नित्यान्येवेति यथा परस्य वचनं श्रुत्वा जीवादीनां सत्त्वे अनेकांतात्मकत्वे वोपजातं अश्रद्धानं अरुचिर्मिथ्यात्वमिति। परोपदेशं विनापि मिथ्यात्वोदयादुपजायते यदश्रद्धानं तदनभिगृहीतं मिथ्यात्वं ॥५५॥

मिथ्यात्वदोषमाहात्म्यख्यापनायाह—

जे वि अहिंसादिगुणा मरणे मिच्छत्तकडुगिदा होंति ॥
ते तस्स कडुगदुद्धियगदं व दुद्धं हवे अफला ॥५६॥

'जे वि' हिंसा नाम प्रमादवतः प्राणेभ्यो वियोगकरणं प्राणिनस्ततो निवृत्तिरहिंसा। असदभिधानाद्विरतिः सत्यम्। अदत्तादानाद्विरतिरस्तेयं मैथुनाद्विरतिर्ब्रह्म[1]। ममेदं भावो मोहोदयजःपरिग्रहः। ततो निवृत्तिरपरिग्रहता। एते अहिंसादयो गुणाः परिणामा धर्म इत्यर्थः।

ननु सहभुवो गुणा इति वचनात् चैतन्यामूर्तत्वादीनामेवात्मनः सहभुवां गुणता। हिंसादिभ्यो विरति-

---

अर्थमें रहता है। ऐसा प्रयोग भी देखा जाता है—जैसे तत्त्वार्थ श्रद्धान सम्यग्दर्शन है। अथवा अन्य प्रकारसे भी अधिकरणता है—'अर्थ' अर्थात् जीवादिके, जो 'तत्त्व' अर्थात् अविपरीत रूप हैं उनका श्रद्धान न करना मिथ्यात्व है ऐसा सम्बन्ध किया जाता है।

तत्त्वका निर्णय न करने वाले संशय ज्ञानका सहचारी जो अश्रद्धान है वह संशयित मिथ्यात्व है। जो संदेहमें है उसके तत्त्वविषयक श्रद्धान नहीं है क्योंकि श्रद्धान 'यह ऐसा ही है' इस प्रकारके निश्चयात्मक ज्ञानके साथ ही रहता है। परोपदेशकी मुख्यतासे गृहीत अर्थात् स्वीकार किया गया अश्रद्धान अभिगृहीत कहा जाता है। इसका अभिप्राय यह है कि 'जीवादि द्रव्य नहीं हैं यह स्वीकार करो। या जीवादि हैं किन्तु नित्य ही हैं' इस प्रकार जब दूसरेके वचनको सुनकर जीवादिके अस्तित्वमें या उनके अनेकान्तात्मक होनेमें जो अश्रद्धान या अरुचि उत्पन्न हो वह अभिगृहीत मिथ्यात्व है और परोपदेशके बिना भी मिथ्यात्वकर्मके उदयसे जो अश्रद्धान उत्पन्न होता है वह अनभिगृहीत मिथ्यात्व है॥५५॥

गा०—जो भी अहिंसा आदि गुण मरते समय मिथ्यात्वके द्वारा दूषित होते हैं, वे उस दूषित गुण वाले आत्माके कडुवी तूंबीमे रखे गये दूधकी तरह निष्फल होते हैं॥ ५६॥

टी०—प्रमादवानके द्वारा प्राणिके प्राणोंका वियोग करना हिंसा है। उस हिंसासे निवृत्तको अहिंसा कहते हैं। असत् कहनेसे निवृत्तिको सत्य कहते हैं। बिना दी हुई वस्तुके ग्रहणसे विरतिको अचौर्य कहते हैं। मैथुन सेवनसे विरतिको ब्रह्मचर्य कहते हैं। मोहके उदयसे होने वाले 'यह मेरा है' इस प्रकारके भावको परिग्रह कहते हैं। उससे निवृत्तिको अपरिग्रह कहते हैं। ये अहिंसा आदि गुण अर्थात् अहिंसादि रूप परिणाम धर्म है।

शङ्का—जो द्रव्यके साथ होते हैं वे गुण हैं ऐसा वचन है। उसके अनुसार चैतन्य अमूर्तत्व

---

१. मंहसा–आ० मु०।

परिणामः पुनः कादाचित्कत्वात् मनुष्यत्वादिक्रोधादिवत्पर्याया, इति चेन्नतु गुणपर्ययवद्द्रव्यमित्यात्रोभयोपादाने अर्थान्तरसंदेोषदर्शनमेतद्यथा 'गोवलीवर्दम्' इत्युभयोरुपादाने पुनरुक्ततापरिहृतये स्त्रीगोशब्दवाच्या इति कथन-मेकस्यैव गुणशब्दस्य ग्रहणे धर्ममात्रवचनता।

अहिंसादयश्च ते गुणाः अहिंसादिगुणा। 'मिच्छत्तकडुगिदा' मिथ्यात्वेन तत्त्वाश्रद्धानेन। कडुगिदा कटूकृताः कटुकता गताः। 'होंति' भवंति। कदा मरणे मरणकाले ते अफला भवंति। कस्य मिथ्यात्वकटू-कृताहिंसादिगुणस्यात्मनः। किमिव ? दुद्धं क्षीरमिव। कीदृग्भूत ? 'कडुगतुंबियगदं' कटुकालाबूगतम् यथा अफल फलरहितं। पित्ताद्युपशमन प्रीतिरित्यादिक यत्फलं क्षीरस्य प्रतीत तेन फलेन अफलं जातम्। यथा क्षीरं भाजनदोषादेवं मिथ्यात्ववत्यात्मनि स्थिता अहिंसादिगुणा स्वसाध्येन फलेन न फलवंतः। पंचानुत्तर-विमानवासित्वं लोकातिकत्वमित्याद्यभ्युदयफलमिह गृहीतं। अहिंसादयो न स्वोचितफलातिशयदायिनः दुष्ट-भाजनस्थितत्वात् कटुकालाबुकगतपयोवदिति सूत्रार्थ. ॥५६॥

न केवल फलातिशयाकारित्वं अहिंसादिगुणाना, अपि तु मिथ्यात्वकटुकिते स्थिता दोषानपि कुर्वन्ति इत्याचष्टे—

जह भेसजं पि दोसं आवहइ विसेण संजुद संत ॥
तह मिच्छत्तविसजुदा गुणा वि दोसावहा होंति ॥५७॥

'यथा भेसजं पि' इति स्पष्टतया न व्याख्यायते। 'मिच्छत्तविसजुदा' मिथ्यात्वेन विषेण संबद्धाः

आदि जो आत्माके साथ रहते हैं वे ही गुण हैं। हिंसादिके त्याग रूप परिणाम तो कभी होते हैं, कभी नही होते। अत. मनुष्यत्वकी तरह या क्रोधादिकी तरह पर्याय हैं, गुण नहीं हैं ?

समाधान—'गुण पर्ययवान्को द्रव्य कहते हैं' इत्यादिमें गुण और पर्याय दोनोंका ग्रहण किया है। जैसे 'गोवलीवर्द' यहाँ गो और बलीवर्द दोनोंको ग्रहण करने पर पुनरुक्तता दोष आता है क्योंकि दोनों शब्दोंका अर्थ एक है। इस पुनरुक्तता दोषको हटानेके लिये 'गो' शब्द गायका वाचक है ऐसा कहा है। एक गुण शब्दका ग्रहण करने पर वह धर्ममात्रको कहता है अतः कोई दोष नहीं है। वे अहिंसादि गुण मरते समय यदि तत्त्वके अश्रद्धान रूप मिथ्यात्वसे दूषित होते हैं तो मिथ्यात्वसे दूषित अहिंसा आदि गुण वाले आत्माके कटुक तूम्बीमें रखे दूधकी तरह निष्फल होते हैं। दूधका फल चित्त आदिको शान्त करना प्रसिद्ध है। किन्तु भाजनमे दोष होनेसे वह दूध फल रहित होता है। इसी तरह मिथ्यात्ववान् आत्मामें रहने वाले अहिंसा आदि गुण अपना साध्य जो फल है उससे फलवान नही हैं। यहाँ पाँच अनुत्तर विमानका वासी देव होना या लौकान्तिकदेव होना इत्यादि अभ्युदयरूप फलका ग्रहण किया है। अतः कटुक तूम्बीमें रखे दूधकी तरह सदोष भाजनमें रहनेके कारण अहिंसा आदि अपने उचित फलातिशयको नही देते, यह गाथा सूत्रका अभिप्राय है ॥ ५६ ॥

अहिंसा आदि गुण केवल फलातिशयकारी ही नहीं हैं, बल्कि मिथ्यात्वसे कलुषित आत्मामें स्थित अहिंसादि दोष भी करते हैं, यह कहते हैं—

गा०—जैसे औषध भी विषसे सम्बद्ध होने पर दोष करती है। उसी प्रकार मिथ्यात्वरूपी विषसे सम्बद्ध अहिंसा आदि गुण भी दोषकारी होते हैं ॥ ५७ ॥

टी०—विष मिश्रित औषधकी तरह मिथ्यात्वरूपी विषसे सम्बद्ध अहिंसा आदि गुण भी

'गुणा वि' गुणा अपि अहिंसादयो गुणा अपि । 'दोसावहा' दोषावहाः संसारे चिरपरिभ्रमणदोषमावहन्तीत्यर्थः । अथवा मिथ्यादृष्टेर्गुणाः पापानुबंधि स्वल्पमिन्द्रियसुखं दत्वा बह्वारम्भपरिग्रहादिषु आसक्तं नरके पातयन्ति इति दोषावहाः । दृष्टान्तप्रदर्शनेन इष्टनिर्वृतिः । प्राप्तिश्च मिथ्यात्वमाहात्म्यान्न भवतीति प्रमाणेन दर्शयितुं गाथाद्वयमायातम् ॥५७॥

> दिवसेण जोयणसयं पि गच्छमाणो सगिच्छिदं देसं ।
> अण्णंतो गच्छंतो जह पुरिसो णेव पाउणदि ॥५८॥

इत्यनेन प्रकृष्टगमनसामर्थ्याद्भ्रमण[1]माख्यातम् । 'अण्णंतो गच्छंतो' इत्यनेन तन्मार्गाप्रवृत्तत्वात् इत्ययं हेत्वर्थो दर्शितः । तेन इष्टं देशं न प्राप्नोतीति साध्यधर्मो दृष्टान्तेनोपदर्शितः । 'सगिच्छदं देसं जह पुरिसो णेव पाउणदि इत्यनेन दृष्टान्त उपदर्शित. ॥५८॥

> धणिदं पि संजमंतो मिच्छादिट्ठी तहा ण पावेई ।
> इट्ठं णिव्वुइमग्गं उग्गेण तवेण जुत्तो वि ॥५९॥

'धणिदं' पि नितरामपि । 'संजमंतो' चारित्रे वर्तमानोऽपि । 'उग्गेण तवेण जुत्तोवि' उग्रेण तपसा युक्तोपि, नैव निर्वृतिं प्राप्नोति इत्यनेन साध्यधर्माख्यानम् । मिच्छादिट्ठी इत्यनेन साध्यधर्मि दर्शितम् । एवं प्रमाणरचना कार्या—

मिथ्यादृष्टिर्नेवेष्टं प्राप्नोति तन्मार्गावृत्तित्वात् । य स्वप्राप्यस्य मार्गे न प्रवर्तते न स तमभिमतं प्राप्नोति । यथा दक्षिणमथुरातः पाटलिपुत्र प्राप्तुमिच्छुः दक्षिणा दिशं गच्छन्निति । 'णिव्वुदि' निवृति ।

दोषावह होते हैं अर्थात् ससारमें चिरकाल तक भ्रमणरूपी दोषको करनेवाले होते है। अथवा मिथ्यादृष्टिके गुण पापका बन्ध करानेवाले थोड़ेसे इन्द्रिय सुखको देकर बहुत आरम्भ और बहुत परिग्रहमें आसक्त उस जीवको नरकमें गिराते हैं यह दोष कारक है। दृष्टान्त द्वारा दिखलानेसे मिथ्यात्वके माहात्म्यसे इष्टकी उत्पत्ति और प्राप्ति नहीं होती, यह प्रमाण द्वारा बतलानेके लिए दो गाथाएँ आई हैं।

गा०—जैसे एक दिनमे सौ योजन भी चलनेवाला यदि अन्य मार्गसे जाता है तो वह पुरुष अपने इच्छित देशको नहीं प्राप्त होता ॥५८॥

टी०—इससे चलनेकी उत्कृष्ट सामर्थ्य होनेसे ससार भ्रमण कहा है। अन्यत्र जानेवाला' इस पदसे 'अपने मार्गपर न चलनेसे' इस हेतु अर्थको दिखलाया है। अपने इच्छित देशमे न पहुचनेमें हेतु है उसका सही मार्गसे न चलना। इष्ट देशको प्राप्त नही होता' यह साध्य धर्म दृष्टान्त द्वारा बतलाया है। अर्थात् प्रतिदिन सौ योजन चलनेवाला मनुष्य अपने इष्ट स्थानको प्राप्त नहीं होता क्योंकि वह सही मार्गसे नही जाता ॥५८॥

गा०—उसी प्रकार अत्यन्त भी चारित्रका पालन करनेवाला उग्र तप करते हुए भी मिथ्यादृष्टि इष्ट प्रधान मोक्ष नहीं पाता ॥५९॥

टी०—मिथ्यादृष्टि इष्टको प्राप्त नहीं करता, क्योंकि इष्टके मार्गपर नहीं चलता। जो अपने इष्टकी प्राप्तिके मार्गपर नहीं चलता, वह अपने इष्टको प्राप्त नहीं करता। जैसे दक्षिण

---

१. भ्रममाख्यातं–अ०।

'अर्थ' अपूर्वा । अथवा निर्वृतिस्तुष्टिर्यथा मनसो निर्वृतिर्मनस्तुष्टिरित्यर्थः । निर्वृतेमार्गमुपायं क्षायिकज्ञान-चारित्राख्यम् । स्पष्टतया न प्रतिपदं व्याख्या कृता ॥५९॥

व्रतेन शीलेन तपसा वा युक्तोऽपि मिथ्यात्वदोषाच्चिरं संसारे परिभ्रमति इतरस्मिन्व्रतादिहीने किं वाच्यमिति वर्णयति—

जस्स पुण मिच्छदिट्ठिस्स णत्थि सीलं वदं गुणो चावि ।
सो मरणे अप्पाणं किह ण कुणई दीहसंसारं ॥६०॥

स्वल्पापि मिथ्यात्वविषकणिका कुत्सितासु योनिषु उत्पादयति किमस्ति वाच्यं सर्वस्य जिनदृष्टस्या-श्रद्धाने इति गाथाया अर्थः ॥६०॥

एक्कं पि अक्खरं जो अरोचमाणो मरेज्ज जिणदिट्ठं ॥
सो वि कुजोणिणिवुड्डो किं पुण सव्वं अरोचंतो ॥६१॥

एकमपीत्यस्य बालबालमरणप्रवृत्तस्य भव्यस्य संख्याता, असंख्याता, अनंता वा भवन्ति भवाः । अभव्यस्य तु अनंतानंताः । मिथ्यादर्शनदोषमाहात्म्यसूचन ससारमहत्ताख्यापनेन क्रियतेऽनया गाथया ॥६१॥

संखेज्जासंखेज्जाणंता वा होंति बालबालम्मि ॥
सेसा भव्वस्स भवा णंताणंता अभव्वस्स ॥६२॥

मथुरासे पाटलीपुत्र जानेका इच्छुक यदि दक्षिण दिशामें जाता है तो वह पाटलीपुत्र नही पहुँच सकता । उसी तरह मिथ्यादृष्टि भी प्रधानभूत मोक्षको नहीं प्राप्त करता; क्योंकि निर्वृत्ति अर्थात् मोक्षका मार्ग या उपाय क्षायिकज्ञान और क्षायिकचारित्र है अथवा निर्वृत्तिका अर्थ तुष्टि है । जैसे मनकी निर्वृत्तिका अर्थ मनकी तुष्टि है । अर्थात् उसे अनन्तसुख प्राप्त नही होता । स्पष्टरूप-से प्रत्येक पदकी व्याख्या नहीं की है ॥५९॥

आगे कहते हैं कि जब व्रत, शील और तपसे युक्त होनेपर भी मिथ्यात्व दोषके कारण चिरकाल तक संसारमें भ्रमण करता है तब जो व्रतादिसे हीन है उसका तो कहना ही क्या है—

गा०—जिस मिथ्यादृष्टिके शील व्रत अथवा ज्ञानादि भी नहीं है वह मरनेपर कैसे अनन्त संसार नहीं करता है ॥६०॥

टी०—यदि मिथ्यात्वरूपी विषकी छोटी-सी भी कणिका कुत्सित योनियोंमें उत्पन्न कराती है तो जिन भगवान्के द्वारा देखे गये समस्त तत्त्वोंका श्रद्धान न होनेपर, तो कहना ही क्या है ? ॥६०॥

गा०—जिन भगवान्के द्वारा देखा गया एक भी अक्षर जिसे रुचता नहीं है वह मरे तो वह भी कुयोनियोमें डूबता है, तब जिसे सब ही नहीं रुचता उसके सम्बन्धमें तो कहना ही क्या है ॥६१॥

टी०—बालबालमरणसे मरनेवाले भव्यके संख्यात, असंख्यात अथवा अनन्त भव होते हैं और अभव्यके तो अनन्तानन्त भव होते हैं । इस गाथासे संसारकी महत्ताका कथन करनेके द्वारा मिथ्यादर्शन दोषके माहात्म्यका सूचन किया है ॥६१॥

अनन्तानन्तं वा संसरेद्वा इत्यर्थः ।

सप्तदशमरणविकल्पेषु पंचमरणान्यभिधास्यंते इति प्रतिज्ञातं । तत्र यत्पंडितमरणं तत्प्रायोपगमनमरणं इंगिनीमरणं भक्तप्रत्याख्यानमिति त्रिविकल्पं सूचितं । तत्र भक्तप्रत्याख्यानं प्राग्वर्णनीयमिति दर्शयति सूत्रकारः स्वयमेव सम्बन्धमुत्तरप्रबंधस्य—

पुव्वं ता वण्णेसिं भत्तपइण्णं पसत्थमरणेसु ॥
उस्सण्णं सा चेव हु सेसाणं वण्णणा पच्छा ॥६३॥

'पुव्वं' पूर्वं प्रथमं तावत् । 'वण्णेसिं' वर्णयिष्यामि । 'भत्तपइण्णं' भक्तप्रत्याख्यानम् । 'पसत्थमरणेसु' प्रशस्तमरणेषु व्याख्येयेषु निर्धारणलक्षणा चेयं सप्तमी । यथा—कृष्णा गोषु संपन्नक्षीरतमेति समुदायादेकदेशस्य पृथक्करणं निर्धारणं । प्रशस्तमरणसमुदायात् त्र्यवयविकात् भक्तप्रत्याख्यानं पृथग्व्यवस्थाप्यते । पूर्वव्याख्येयत्वेन एतत्कालप्रयोग्यत्वेन गुणेनेति मन्यते । उस्सण्णं नितरां बाहुल्येन यावदित्यर्थः । मरणं सा चैव भक्तप्रत्याख्यानमृतिरेव । साध्याहारत्वात्सर्वसूत्रपदानां । एतर्हि काले इति वाक्यशेषः कार्यः ।

संहननविशेषसमन्वितानां इतरमरणद्वयं । न च संहननविशेषाः । वज्रऋषभनाराचादयः अद्यत्वेऽस्मिन्क्षेत्रे संति गणिनां । 'सेसाणं' शेषयोः प्रायोपगमनस्य इंगिनीमरणस्य च । वण्णणा कथनं । 'पच्छा' इति शेषः ।

गा०—बाल-बाल मरणसे मरनेपर भव्य जीवके संख्यात, असंख्यात अथवा अनन्त भव शेष होते हैं । अभव्यके अनन्तानन्त भव होते हैं ।।६२।।

टी०—इस गाथाके साथ बाल-बालमरणका कथन समाप्त हुआ । मरणके सतरह भेदोंमेंसे यहाँ पाँच मरणका कथन करते हैं ऐसी प्रतिज्ञाकी थी । उनमेंसे जो पंडित मरण है उसके प्रायोपगमन मरण, इंगिनी मरण और भक्त प्रत्याख्यान ये तीन भेद सूचित किये थे । उनमेंसे प्रथम भक्त प्रत्याख्यानका वर्णन करनेकी सूचना ग्रन्थकार आगेकी गाथासे स्वयं करते हैं—

गा०—प्रशस्त मरणोंमे पहले भक्त प्रत्याख्यानको कहूँगा । क्योंकि वह भक्त प्रत्याख्यान ही बहुतायतसे प्रचलित है । शेष मरणोंका वर्णन पीछे करेंगे ।।६३।।

टी०—जिनका यहाँ व्याख्यान किया जाना है उन प्रशस्त मरणोमेंसे भक्त प्रत्याख्यानको पहले कहूँगा । यहाँ यह सप्तमी विभक्ति निर्धारण करनेके अर्थमें है, जैसे गौओंमें काली गाय बहुत अधिक दूध देती है । समुदायसे उसके एक देशको पृथक् करनेको निर्धारण कहते हैं । तीन भेद वाले प्रशस्त मरणके समुदायसे भक्त प्रत्याख्यानको पृथक् करते हैं । इस कालमें भक्त प्रत्याख्यान ही पालन करनेके योग्य है इस गुणके कारण उसका प्रथम कथन करना योग्य है । समस्त सूत्रपद अध्याहार सहित होते हैं इसलिये इस कालमें भक्त प्रत्याख्यान मरण ही 'उस्सण्ण' बाहुल्यसे प्रवर्तित है । शेष दो मरण विशेष सहननके धारकोंके होते है । और आजके समयमें गणियोंके वज्रऋषभनाराच आदि संहनन विशेष इस क्षेत्रमें नहीं होते । इसीसे शेष प्रायोपगमन और इंगिनीमरणका कथन पीछे करेंगे ।

शंका—यदि आजके मनुष्योंमें उन मरणोंको करनेकी शक्ति नहीं है तो उनका कथन क्यों करते हैं ?

यदि ते वर्तयितुं इदानीतनानामसामर्थ्यं किं तदुपदेशेनेति चेत् तत्स्वरूपपरिज्ञानात्सम्यग्ज्ञानं । तच्च मुमुक्षूणामुपयोग्येवेति मन्यते ॥६३॥

कतिविकल्पं भक्तप्रत्याख्यानमित्यारेकायामाह—

दुविहं तु भत्तपच्चक्खाणं सविचारमध अविचारं ॥
सविचारमणागाढे मरणे सपरक्कमस्स हवे ॥६४॥

'दुविधं तु भत्तपच्चक्खाणं' द्विविधमेव भक्तप्रत्याख्यानं । 'सविचारमध अविचारं' इति । विचरणं नानागमनं विचार । विचारेण वर्तते इति सविचारं । एतदुक्तं भवति । वक्ष्यमाणार्हलिंगादिविकल्पेन सहितं भक्तप्रत्याख्यान इति । अविचार वक्ष्यमाणार्हादिनानाप्रकाररहितं । भवतु द्विविधं । सविचारभक्तप्रत्याख्यानं कस्य भवति इत्यस्योत्तरं । सविचारं भक्तप्रत्याख्यानं 'अणागाढे' सहसा अनुपस्थिते मरणे चिरकालभाविनि मरणे इति यावत् । 'सपरक्कमस्स' सह पराक्रमेण वर्तते इति सपराक्रमस्तस्य हवे भवेत् । पराक्रमः उत्साहः एतेनैव सहसोपस्थिते मरणे पराक्रमरहितस्य अविचारभक्तप्रत्याख्यानं भवतीति लभ्यते 'मत्तो' विचारभक्तप्रत्याख्यानं अस्य अस्मिन्काले इति सूत्रे नोक्तं ॥६४॥

तयोः कस्य भक्तप्रत्याख्यानस्य अनेन शास्त्रेण निरूपणेत्याशंकायां आह—

सविचारभत्तपच्चक्खाणस्सिणमो उवक्कमो होइ ।
तत्थ य सुत्तपदाइं चत्तालं होंति णेयाइं ॥६५॥

समाधान—उनके स्वरूपको जाननेसे सम्यग्ज्ञान होता है और वह मुमुक्षुओंके लिए उपयोगी ही है ॥६३॥

भक्त प्रत्याख्यानके भेद कहते हैं—

गा०—भक्त प्रत्याख्यान दो प्रकारका ही है। सविचार और अविचार। सविचार भक्त प्रत्याख्यान सहसा मरणके उपस्थित न होनेपर पराक्रम अर्थात् साहस और बलसे युक्त साधुके होता है ॥६४॥

टी०—भक्त प्रत्याख्यान मरणके दो भेद हैं सविचार और अविचार। विचरण या नाना गमनको विचार कहते हैं और विचारसे सहितको सविचार कहते हैं। इसका यह अभिप्राय है कि आगे कहे जाने वाले अर्हलिंग आदि भेद सहित भक्त प्रत्याख्यान सविचार है और उनसे रहित अविचार है। सविचार प्रत्याख्यान किसके होता है ? तो कहते हैं कि यदि मरण सहसा उपस्थित न हो, चिरकाल भावी हो तो पराक्रमसे उत्साहसे सहितके होता है। इसीसे वह भी प्राप्त होता है कि सहसा मरण उपस्थित होनेपर पराक्रमसे रहितके अविचार भक्त प्रत्याख्यान होता है। गाथामें अविचार भक्त प्रत्याख्यान इस कालमे इसके होता है, ऐसा नहीं कहा है ॥६४॥

उन दोनोंमेंसे किस भक्त प्रत्याख्यानका इस शास्त्रके द्वारा कथन किया जायेगा ? इस शंका का उत्तर देते हैं—

गा०—सविचार भक्त प्रत्याख्यानका यह उपक्रम अर्थात् प्रारम्भ होता है। और उस भक्त प्रत्याख्यानमें सूत्र और पद चालीस जानने योग्य हैं ॥६५॥

'सविचारभत्तपच्चक्खाणस्स' इति सविचारभक्तप्रत्याख्यानस्य । 'इणमो' अयं । 'उवक्कमो' व्याख्यान-प्रारंभः । 'होदि' भवति । 'तत्थ य' तत्र च भक्तप्रत्याख्याने । 'सुत्तपदाइं' सूत्रपदानि । सूतेऽर्थं सूचयतीति वा सूत्रं । सूत्राणि च तानि पदानि च सूत्रपदानि । 'चत्तालं' चत्वारिंशत् । 'होंति' भवन्ति । 'णेयाइं' ज्ञातव्यानि ॥६५॥

तानि सूत्रपदानि गाथाचतुष्टयनिबद्धानि—

अरिहे लिंगे सिक्खा विणय समाधी य अणियदविहारे ।
परिणामोवधिजहणा सिदी य तह भावणाओ य ॥६६॥

'अरिहे' अर्हः योग्यः । सविचारभक्तप्रत्याख्यानस्यायं योग्योऽयं नेति प्रथमोऽधिकारः कर्तृव्यापारः । लिंगादयः कर्तृपुरःसरा भवंतीति प्रागेव लिंगशिक्षादिभ्यो योग्यकर्तृनिर्देशः सूत्रे कृतः अरिह इति । शिक्षादि-क्रियाया भक्तप्रत्याख्यानक्रियांगभूताया योग्यपरिकरमादर्शयितुं लिंगोपादानं कृतम् । कृतपरिकरो हि कर्ता क्रियासाधनायोद्योगं करोति लोके । तथा हि घटादिकरणे प्रवर्तमाना दृढबद्धकक्षाः कुलाला दृश्यंते । ज्ञानमंतरेण न विनयादयः कर्तुं शक्यन्ते इति तेभ्यः प्राक् निर्देशमर्हति शिक्षा । यथावसरमितरक्रममादर्शयिष्यामः । लिंगशब्दश्चिह्नवाची । तथाहि वक्ष्यति । 'चिह्नं करणं' इति । 'सिक्खा' शिक्षा श्रुतस्य अध्ययनमिह शिक्षा-शब्देनोच्यते । तथा च वक्ष्यति—'जिणवयणं कलुसहरं अहो य रत्ती य पढिदव्वमिति' । विनयः मर्यादा । तथा हि—ज्ञानादिभावनाव्यवस्था हि ज्ञानादिविनयतया वक्ष्यते । समेकीभावे वर्तते तथा च प्रयोगः—संगतं

टी०—सविचार भक्त प्रत्याख्यानका व्याख्यान प्रारम्भ होता है उसमें चालीस सूत्रपद हैं ॥६५॥

उन सूत्रपदोंको चार गाथाओंसे कहते हैं—

गा०—अर्ह अर्थात् योग्य, लिंग अर्थात् चिह्न, शिक्षा अर्थात् शास्त्राध्ययन विनय और मनका एकाग्र करना, अनियत क्षेत्रमें विहार, परिणाम, परिग्रह त्याग और शुभ परिणामोंकी श्रेणिपर आरोहण तथा अभ्यास ॥६६॥

टी०—अर्हका अर्थ योग्य है । सविचार भक्त प्रत्याख्यानके यह योग्य है और यह योग्य नहीं है यह प्रथम अधिकार है जो कर्ताके व्यापारसे सम्बद्ध है । लिंग आदि कर्ताके होनेपर ही होते हैं इसलिये लिंग शिक्षा आदिसे पहले गाथामें 'अरिह' से योग्य कर्ताका निर्देश किया है । भक्त प्रत्याख्यान क्रियाके अंगभूत शिक्षा आदि क्रियाके योग्य परिकर दिखलानेके लिये लिंगका ग्रहण किया है । क्योंकि साधन सामग्री जुटा लेनेपर ही कर्ता लोकमें क्रियाको साधनाके लिये उद्योग करता है । घट आदि बनानेमें लगे कुम्भकार साधन सामग्री कर लेनेपर ही कमर बाँधकर तैयार देखे जाते हैं । ज्ञानके बिना विनय आदि नहीं किये जा सकते, इसलिये उनसे पहले शिक्षाका निर्देश योग्य है । अन्य क्रम अवसरके अनुसार कहेंगे ।

लिंग शब्द चिह्नवाची है । आगे कहेंगे 'चिह्नं करणं' । यहाँ शिक्षा शब्दसे श्रुतका अध्ययन कहा है । आगे कहेंगे—'जिन वचन कालिमाको दूर करता है उसे रात दिन पढ़ना चाहिये । विनयका अर्थ मर्यादा है । आगे ज्ञानादि भावनाकी व्यवस्था ज्ञानादिकी विनयके रूपमें कहेंगे ।

घृतमित्यत्र एकीभूतं तैलं एकीभूतं घृतमित्यर्थः। समाधानं मनसः एकताकरणं शुभोपयोगे शुद्धे वा। अनियतक्षेत्रवासः अनियतविहारः। तद्भावः परिणामः [त. सू. ५।४२] इति वचनात्तस्य जीवादेर्द्रव्यस्य क्रोधादिना दर्शनादिना वा भवनं परिणाम इति। यद्यपि सामान्येनोक्तं तथापि यतेः स्वेन कर्तव्यस्य कार्यस्यालोचनमिह परिणाम इति गृहीतम्। उपधिः परिग्रहः। तस्य 'जहणा' त्यागः। 'सिदी य' श्रितिः[1] श्रेणिः सोपानमिति यावत्। भावनाभ्यास तत्र असकृत्प्रवृत्तिः ॥६६॥

सल्लेहणा दिसा खामणा य असासिट्ठि परगणे चरिया।
मग्गण सुट्ठिय उवसंपया य पडिछा य पडिलेहा ॥६७॥

'सल्लेहणा' सम्यक्तनूकरणं। 'दिसा' परलोकदिगुपदर्शनपरः सूरिणा स्थापितः भवतां दिशं मोक्ष-[2]वर्तनीमयमुपदिशति यः सूरिः स दिशा इत्युच्यते। 'खमावणा' क्षमाग्रहणं। 'अणुसिट्ठि' सूत्रानुसारेण शासनम्। 'परगणे' अन्यस्मिन्गणे 'चरिया' चर्या प्रवृत्तिः। 'मग्गण'मात्मनो रत्नत्रयविशुद्धि समाधिमरणं वा संपादयितु क्षमस्य सूरेरन्वेषण। 'सुट्ठिदो' सुस्थितः परोपकरणे स्वप्रयोजने च सम्यक् स्थितः सुस्थितः आचार्यः। 'उवसंपया' आचार्यस्य ढौकन। 'पडिछा' परीक्षा। गणस्य, परिचारकस्य, आराधकस्य, उत्साहशक्तेश्च आहारगताभिलाषं त्यक्तुमयं क्षमा नेति। 'पडिलेहा' आराधनाया व्याक्षेपेण विना सिद्धिर्भवति न

समका अर्थ एकीभाव है। जैसे 'संगत घृत' का अर्थ एकमेक हुआ ही है। समाधानका अर्थ है शुभोपयोग अथवा शुद्धोपयोगमे मनका एक रूप करना। अनियत विहारका अर्थ है अनियत क्षेत्रमें रहना। तत्वार्थ सूत्रमें 'तद्भाव' को परिणाम कहा है। अत. जीवादि द्रव्यके क्रोधादि या दर्शन आदि रूपसे होनेको परिणाम कहते हैं। यद्यपि सामान्य परिणाम गाथामें कहा है तथापि यहाँ साधुके द्वारा अपने कर्तव्यको आलोचनाको परिणाम शब्दसे ग्रहण किया है। उपधिका अर्थ परिग्रह है। उसका त्याग उपधिजहणाका अर्थ है। 'सिदी' या श्रितिका अर्थ श्रेणियां सोपान है। भावनाका अर्थ अभ्यास उसमें बार-बार प्रवृत्ति करना है ॥६६॥

गा०—सल्लेखना, दिशा, क्षमाग्रहण, शिक्षा ग्रहण, अन्य गणमें प्रवृत्ति, आचार्यकी खोज सुस्थित उपसपदा, परीक्षा, प्रतिलेखना ॥६७॥

टी०—कषाय और शरीरको सम्यक् रीतिसे कृश करना सल्लेखना है। आचार्य अपने स्थानपर जिसे स्थापित करते है कि यह आपको परलोककी दिशा दिखलाते हुए मोक्ष मार्गका उपदेश देगा वह आचार्य दिशा कहलाता है। क्षमा ग्रहण करनेको खामणा कहते हैं। शास्त्रानुसार शिक्षा देनेको अणुसिट्ठि कहते हैं। परगण अर्थात् दूसरे संघमें जानेका परगण चरिया कहते हैं। अपनी रत्नत्रय विशुद्धि अथवा समाधिमरण करानेमे समर्थ आचार्यके खोजनेका मार्गण कहते हैं। परका उपकार करनेमे और अपने प्रयोजनमें सम्यक् रूपसे स्थित आचार्यको सुस्थित कहते हैं। आचार्यके पास जानेको उपसंपदा कहते हैं। गण, परिचारक, आराधक और उत्साह शक्ति की और यह आराधक आहारको अभिलाषा छोड़नेमें समर्थ है या नहीं इन सबकी परीक्षा करना

---

१ श्रितिः श्रेणि. निश्रेणिः मो. आ. मु०।
२. वर्तन्या अयमु०–अ०। वर्तन्याश्चयमु–मु०

वा राज्यस्य तस्य देशस्य ग्रामनगरादेस्तत्र प्रधानस्य वा शोभनं वा नेति एवं निरूपणम् ॥६७॥

आपुच्छा य पडिच्छणमेगस्सालोयणा य गुणदोसा ।
सेज्जा संथारो वि य णिज्जवग पयासणा हाणी ॥६८॥

'**आपुच्छा**' प्रतिप्रश्नः । किमयमस्माभिरनुगृहीतव्यो न वेति संघप्रश्नः । '**पडिच्छणमेगस्स**' प्रतिचारकैरभ्यनुज्ञातस्यैकस्य संग्रह आराधकस्य । '**आलोयणा य**' स्वापराधनिवेदनं गुरूणामालोचना । '**गुणदोसा**' तस्या गुणदोषाः । '**सेज्जा** शय्या वसतिरित्यर्थः । आराधकावासगृहमिति यावत् । **संथारो वि य**' संस्तरश्च । '**णिज्जावगा**' निर्यापका आराधकस्य समाधिसहायाः । **पयासणा** चरमाहारप्रकाशनम् । '**हाणी**' क्रमेणाहारत्यागः हानिः ॥६८॥

पच्चक्खाणं खामणं खमणं अणुसट्ठिसारणाकवचे ॥
समदाज्झाणे लेस्सा फलं विजहणा य णेयाइं ॥ ६९ ॥

'**पच्चक्खाणं**' प्रत्याख्यानं त्रिविधाहारस्य । '**खामणं**' आचार्यादीनां क्षमाग्रहणं । '**खमणं**' स्वस्यान्यभूतापराधे क्षमा । '**अणुसट्ठि**' अनुशासनं शिक्षणं निर्यापकस्याचार्यस्य । '**सारणा**' दुःखाभिभवान्मोहमुपगतस्य निश्चेतनस्य चेतनाप्रवर्तना सारणा । '**कवचे**' यथा कवचस्य शरशतनिपातदुःखनिवारणक्षमता एवमाचार्येण

'पडिछा' है। आराधनाकी सिद्धि विना बाधाके होगी या नहीं, तथा राज्य, देश, ग्राम नगर आदि वहांका प्रधान ये सब आराधनाके योग्य हैं या नहीं, इस प्रकारके निरूपणको पडिलेहा कहते है ॥६७॥

गा०—पूछना एक क्षपकको स्वीकार करना, और आलोचना, आलोचनाके गुण दोष, शय्या अर्थात् वसति, और संस्तर, निर्यापक, अन्तिम आहारका प्रकाशन क्रमसे आहारका त्याग ॥६८॥

टी०—जब कोई आराधक समाधिमरणके लिये आवे तो आचार्यका संघसे पूछना कि हम इसे स्वीकार करें या नहीं आपृच्छा है। आराधककी सेवा करने वाले मुनियोंकी स्वीकृति मिलने पर एक आराधकको लेना 'एकका पडिच्छण है। गुरुके सामने अपने अपराधका निवेदन आलोचना है। आलोचनाके गुण और दोष 'गुणदोस' हैं। आराधकके रहनेका स्थान शय्या है उसे वसति भी कहते है संस्तरको संथार कहते हैं। आराधककी समाधिमे जो सहायक मुनि होते हैं उन्हे निर्यापक कहते हैं। आराधकके सामने अन्तिम आहारका प्रकाशन 'पगासणा' है। और क्रम से आहारके त्यागको हानि कहते हैं ॥६८॥

गा०—प्रत्याख्यान, क्षमा ग्रहण, दूसरोंके अपराधको क्षमा करना। शिक्षण, सारणा, कवच, समभाव, लेश्या, आराधनाका फल (य) और (विजहणा) शरीर त्याग ये अधिकार जानना ॥६९॥

टी०—तीनों प्रकारके आहारका त्याग करना प्रत्याख्यान है। आचार्य आदिसे क्षमा मांगना खामण है। दूसरेसे हुए अपराधको क्षमा करना खमण है। निर्यापकाचार्य जो शिक्षा देते हैं वह अनुशिष्टि है। दुःखसे पीड़ित होकर बेहोश हुए चेतना रहित आराधकको सचेत करना सारणा है। जैसे कवचमें सैकड़ों बाणोंके लगनेसे होनेवाले दुःखको दूर करनेकी सामर्थ्य है। वैसे ही

निर्यापकेन धर्मोपदेशश्चतुर्गतिपरिभ्रमणे दुःसहानि दुःखानि ननु कर्मपरवशतया भुक्तानि निष्फलानि । इदं पुनर्दुःखसहनं निर्जरार्थं प्रवर्त्यमानं सकलदुःखान्तं सुखमप्यतीन्द्रियमचलमनुपममव्याबाधात्मकं संपादयिष्यतीति क्रियमाणो दुःखनिवारणगुणसामान्यात् कवच शब्देनोच्यते । यथा शौर्यप्रचिख्यापयिषया माणवके सिंहशब्दः प्रयुज्यमानः शौर्यादिगुणाध्यासितं देवदत्तमवगमयति । 'समदा' समभाव जीवितमरणलाभालाभसयोगविप्रयोगसुखदुःखादिषु रागद्वेषयोरकरणं । 'ज्झाणे' ध्यानं एकाग्रचिंतानिरोध । 'लेस्सा' लेश्या कषायानुरंजिता योगप्रवृत्तिर्लेश्या । 'फलं' साध्यं परिप्राप्यं आराधनायाः । 'विजहणा' आराधकस्य शरीरत्याग. ॥६९॥

वाहिव्व दुप्पसज्झा जरा य सामण्णजोग्गहाणिकरी ॥
उवसग्गा वा देवियमाणुसतेरिच्छया जस्स ॥ ७० ॥

'वाहिव्व' । अत्र चैवं पदघटना । 'वाहिव्व दुप्पसज्झा सो अरिहो होइ भत्तपविण्णाए' इति । व्याधिर्वा दुःप्रसाध्यः क्लेशेन महता संयमप्रचयावहेन चिकित्स्य. यस्य विद्यते सोर्हो भक्तप्रत्याख्यान कर्तु । जीर्यंति विनश्यंति रूपवयोबलप्रभृतयो गुणा यस्यामवस्थाया प्राणिन सा जरा । 'सामण्णजोग्गहाणिकरो' श्राम्यति तपस्यतीति श्रमण ; तस्य भावः श्रामण्यं । श्रमणशब्दस्य पुंसि प्रवृत्तिनिमित्त तपःक्रिया श्रामण्यं, तेन योगः संबंधः साध्यसाधनलक्षणस्तस्य हानिं विनाशं करोति या सा जरा यस्य सोर्हति भक्तप्रत्याख्यानं विधातु ।

निर्यापकाचार्य जो धर्मोपदेश देते हैं—तूने चार गतियोंमें भ्रमण करते हुए दुःसह दुःख सहे और कर्मोंके अधीन होकर भोगे जिनसे कोई लाभ नही। किन्तु इस समयका दुःख सहन निर्जराके लिए हैं, सब दुःखोंका अन्त करनेवाला है और अतीन्द्रिय, अचल, अनुपम तथा बाधारहित सुखको भी देगा। इस प्रकार दुःखको दूर करनेके गुणकी समानतासे उसे कवच शब्दसे कहा है। जैसे शौर्यका बखान करनेकी इच्छासे बालकमें प्रयुक्त सिंह शब्द शौर्य आदि गुणोसे युक्त देवदत्तका बोध कराता है। वैसे ही यहाँ भी जानना।

जीवन, मरण, लाभ, हानि, संयोग, वियोग, सुख दुःख आदिमें रागद्वेष न करना समता है। एक विषयमें चिन्ताके निरोधको ध्यान कहते हैं। कषायसे अनुरक्त मन-वचनकायको प्रवृत्तिको लेश्या कहते हैं। आराधनाके द्वारा प्राप्त साध्यको फल कहते हैं। और अन्तमें आराधकके शरीर त्यागको विजहणा कहते हैं। इतने अधिकारोंसे भक्त प्रत्याख्यान मरणका कथन करेंगे ॥६९॥

उनमेंसे 'अर्ह' का कथन आगेकी गाथाके द्वारा करते हैं—

गा०—जिसके दुष्प्रसाध्य व्याधि हो, अथवा श्रामण्यके सम्बन्धको हानि पहुँचानेवाली वृद्धावस्था हो अथवा देवकृत मनुष्यकृत और तिर्यञ्चकृत उपसर्ग हो वह भक्त प्रत्याख्यान करनेके योग्य है ॥७०॥

टी०--दुःप्रसाध्य व्याधि हो, अर्थात् बड़े कष्टसे संयमके समूहका घात करके जिसका इलाज सम्भव हो वह भक्त प्रत्याख्यान करनेके योग्य होता है। जिस अवस्थामे प्राणीके रूप, वय, बल आदि गुण नष्ट हो जाते है उसे जरा कहते हैं। 'श्राम्यति' अर्थात् जो तपस्या करता है वह श्रमण है। श्रमणके भावको श्रामण्य कहते हैं। पुरुषमें श्रमण शब्दकी प्रवृत्तिमें निमित्त तपश्चरण श्रामण्य है। उससे योग अर्थात् साध्यसाधनरूप सम्बन्धकी हानि जो करती है अर्थात् जिसके होनेपर तपश्चरणकी साधना करना कठिन होता है वह वृद्धावस्था जिसके आ गई हो वह भक्त प्रत्याख्यान करनेके योग्य होता है। जिसका शारीरिक बल बुढ़ापेके कारण क्षीण हो

जरापहारितशरीरबलः शरीरबलसाध्येषु कायक्लेशेषु न वर्तितुमुत्सहते । अथवा सममणो 'समणो' समणस्स भावो सामण्णं । क्वचिदप्यननुगतरागद्वेषता समता सामण्णशब्देनोच्यते । वस्तुयाथात्म्यावहितचेतस्तया योगः संबंधो ध्यानयोग इति यावत् । वस्तुयाथात्म्यावबोधो निश्चलो यः स ध्यानमिष्यते । जरापरिप्लुतबोधस्य ध्यानं विनश्यति । ततो ध्यानयोगविनाशकारिणी जरा यस्य सोर्हति भक्तं त्यक्तुम् । अथवा सामण्णं समता, युज्यतेऽनेन निर्जरार्थिन इति योगः, तपः । योगशब्दस्तपसि कायक्लेशाख्ये रूढः सोऽत्र गृहीतः । 'आदावणादिजोगधारिणो अणगारा' इत्युक्तेः आतापनादितपोधारिणः इति प्रतीयते ।

द्वंद्वे अल्पाच्तरत्वाद्योगशब्दस्य पूर्वनिपातप्रसंग इति चेत् न अभ्यर्हितत्वात्समतायाः सामण्ण इत्यस्य पूर्वनिपात इति मन्यते, पूर्वतोऽभ्यर्हितमिति वचनात् । न हि समताशून्यात्तपसो विपुला निर्जरा भवति । सत्यां तु समतायां निर्जरा भवति । ततस्तपसो निर्जराहेतुता समतापरवशेति प्रधानं समता ।

उवसग्गा वा उपद्रवा वा 'देवियमाणुसतेरिच्छिगा' देवैर्नरैस्तिर्यग्भिश्च प्रवर्तिता यस्य सोर्हति भक्तप्रत्याख्यानं इति संबंधः । चतुर्विधत्वादुपसर्गस्य [1]त्रैविध्योपदेशः कथमिति ? अत्रोच्यते—उपसर्गा वा इति वा शब्दः समुच्चयार्थोऽसौ 'देवियमाणुसतेरिच्छिगा वा इति संबधनीयस्तेनाचेतनोपसर्गसमुच्चयः क्रियते ॥७०॥

आता है वह शरीरमें रहते बलके द्वारा करने योग्य कायक्लेशोंमें प्रवृत्त होनेके लिए उत्साहित नहीं होता। अथवा जिसका मन सम है वह समण है। समणका भाव सामण्ण है। किसी भी वस्तुमें रागद्वेष न करनेरूप समता 'सामण्ण' शब्दसे कही जाती है। वस्तुके यथार्थस्वरूपमें चित्तका लगना, उसके साथ योग-सम्बन्ध अर्थात् ध्यान योग। वस्तुके यथार्थस्वरूपका जो ज्ञान निश्चल होता है उसे ध्यान कहते हैं। बुढ़ापेसे ज्ञानके व्याप्त हो जानेपर ध्यान नष्ट हो जाता है। अतः ध्यानयोगका विनाश करनेवाली जरा जिसके है वह भोजनका त्याग करनेके योग्य है। अथवा समताको सामण्ण कहते हैं। और निर्जराके इच्छुक जिससे युक्त होते हैं वह योग अर्थात् तप है। योग शब्द कायक्लेश नामक तपमें रूढ़ है। वही यहाँ योग शब्दसे लिया है, क्योंकि 'आदावणादि जोगधारिणो अणगारा' इस कथनसे 'आतपन आदि तपको धारण करनेवाले' ऐसा अर्थ प्रतीत होता है।

शंका—'योग' शब्द अल्प अच्वाला है। अत द्वन्द्व समासमें सामण्णसे पहले 'जोग' शब्द रखना चाहिए ?

समाधान—नहीं, क्योंकि समता पूज्य है अतः सामण्णको पहले रखना उचित है क्योंकि जो पूज्य होता है उसे पहले स्थान दिया जाता है ऐसा शास्त्रका वचन है। समताशून्य तपसे बहुत निर्जरा नहीं होती। किन्तु समताके होनेपर होती है। अतः तप समताके परवश होकर निर्जरामें कारण होता है इसलिए समता प्रधान है।

अथवा देव, मनुष्य और तिर्यञ्चोंके द्वारा जिसपर उपसर्ग किया गया हो वह भक्त प्रत्याख्यानके योग्य होता है।

शंका—उपसर्ग तो चार प्रकारका होता है। यहाँ तीन प्रकारका क्यों कहा ?

समाधान—'उपसर्गा वा' में 'वा' शब्दका अर्थ समुच्चय है। उससे अचेतनकृत उपसर्गका समुच्चय होता है ॥७०॥

---

१. चिच्छिगो—अ० गु० ।

अणुलोमा वा सत्तू चारित्तविणासया हवे जस्स ॥
दुब्भिक्खे वा गाढे अडवीए विप्पणट्ठो वा ॥७१॥

'**अणुलोमा वा**' अनुकूला वा शत्रव । '**चारित्तविणासगा**' चारित्र पापक्रियान्निवृत्ति. तस्य विनाशकाः । बंधवो हि स्नेहान्मिथ्यात्वदोषात् स्वपोषणलोभाद्वा यस्य चारित्रं विनाशयितुं उद्यता । अनुलोमत्वं शत्रुत्वविरोधि प्रातिकूल्ये समवस्थिता हि भवन्ति शत्रवस्तत्किमुच्यते 'अणुलोमा वा सत्तू' इति ? प्रियवचनमात्रभाषणादनुलोमता । अहितेऽसंयमे प्रवर्तनाद्धितस्य सयमधनस्य विनाशनात् शत्रवो भवन्ति । अथवा अनुलोमा बंधवः सत्तू वा शत्रवश्चेति समुच्चयः वा शब्दसमुच्चयार्थत्वात् । 'देविगमाणुसतेरिच्छगा उवसग्गा जस्स' इतिवचनात् अनुकूलशत्रुकृतोऽप्युपसर्ग सगृहीतः एव किमर्थं पुनरुच्यते 'अणुलोमा वा' इति पुनरुक्तता । तत्र हि सूत्रे मनुष्योपसर्गो नाम बंधनताडनविलंबनादिकः शरीरोपद्रव. परकृतो गृहीतः । इह तु जिव्होत्पाटनादिकं कुर्मो यदि श्रामण्यं न त्यजसीति खलीकरण वक्तुमिष्टम् ।

'**दुब्भिक्खे वा**' दुर्भिक्षे वा । '**आगाढे**' दुरुत्तरे महति अशनिपातमिव सर्वजनगोचरे अर्हति प्रत्याख्यातु ।

'**अडवीए**' अटव्या महत्या व्यालमृगाकुलायां मार्गोपदेशिजनरहितायां दिङ्मूढ. पाषाणकंटकबहुलतया दुःप्रचारायां । '**विप्पणट्ठो वा**' विप्रनष्टो वा अर्हतीति संबध ॥७१॥

गा०—अनुकूल बन्धु मित्र शत्रु हो जो चारित्रका विनाश करनेवाले हो। अथवा अनुकूल बन्धु और शत्रु जिसके चारित्रका विनाश करनेवाले हो। भयंकर दुर्भिक्ष हो अथवा भयंकर जंगलमें भटक गया हो तो भक्त प्रत्याख्यानके योग्य होता है ॥७१॥

टी०—अनुकूल ही शत्रु हो। पापक्रियासे निवृत्तिरूप चारित्रका विनाश करनेवाले हों। बन्धु स्नेहसे या मिथ्यात्व दोषसे या अपने भरण-पोषणके लोभसे जिसके चारित्रका विनाश करनेके लिए तत्पर हो वह भक्त प्रत्याख्यानके योग्य है।

शंका—अनुलोमता शत्रुताकी विरोधी है। जो प्रतिकूल होते हैं वे शत्रु होते हैं तब 'अणुलोमा वा सत्तु' कैसे कहा ?

समाधान—प्रियवचनमात्र बोलनेसे अनुलोमता है और असंयमरूप अहितमें प्रवृत्ति करानेसे तथा सयमधनरूप हितका विनाश करनेसे शत्रु होते हैं।

अथवा अनुलोम अर्थात् बन्धु और शत्रु इस प्रकार 'वा' शब्दको समुच्चयार्थक लेना चाहिए।

शंका—पहले कहा है कि जिसपर देवकृत मनुष्यकृत उपसर्ग हो, तो इससे अनुकूल कृत और शत्रुकृत उपसर्गका ग्रहणकर ही लिया है यहाँ पुन· 'अणुलोमा वा सत्तु' क्यों कहा ? इससे पुनरुक्तता दोषका प्रसंग आता है।

समाधान—उक्त गाथामें मनुष्योपसर्गसे परके द्वारा किया गया बाँधना, मारना, रोकना आदि शारीरिक उपद्रव लिया गया है। और यहाँ 'यदि मुनिपद नही छोड़ता तो हम तेरी जीभ उखाड़ लेंगे' इस प्रकारकी शत्रुता ली गई है।

वज्रपातके समान भयंकर दुर्भिक्ष होनेपर भक्त प्रत्याख्यानके योग्य है। सर्प, मृग आदिसे भरे हुए भयंकर वनमे, जहाँ कोई रास्ता बतलानेवाला नही है, कंकर पत्थरोंके कारण चलना भी दुष्कर है, फँस जानेपर भक्त प्रत्याख्यानके योग्य होता है ॥७१॥

चक्खुं व दुब्बलं जस्स होज्ज सोदं व दुब्बलं जस्स ॥
जंघाबलपरिहीणो जो ण समत्थो विहरिदुं वा ॥७२॥

'चक्खुं व' चक्षुर्वा। चष्टेऽर्थान्दर्शयतीति चक्षुः। 'दुब्बलं' दुर्बलं अल्पशक्तिकं सूक्ष्मवस्तुदर्शनाक्षमं। 'जस्स' यस्य। 'होज्ज' भवेत्। 'सोदं' व श्रोत्रं वा श्रूयते शब्द उपलभ्यते येन तत् श्रोत्रम्। 'दुब्बलं' शब्दोपलब्धिजननसामर्थ्यविकलं। सोप्यर्हति। 'जंघाबलपरिहीणो' 'जो' य.। 'ण समत्थो' न शक्तो। 'विहरिदुं वा' गंतुं वा सोप्यर्हति ॥७२॥

अण्णम्मि चावि एदारिसंमि आगाढकारणे जादे ॥
अरिहो भत्तपइण्णाए होदि विरदो अविरदो वा ॥७३॥

'अण्णंमि चावि' अन्यस्मिन्नपि उक्तादस्मात्। 'आगाढकारणे' आगाढे कारणे 'जादे' जाते। 'एदारिसम्मि' उक्तकारणसदृशे। 'भत्तपविण्णाए' अरिहो होदि विरदो अविरदो वा इति पदघटना। भक्तप्रत्याख्यानस्यार्हो भवति विरतः अविरतो वा ॥७३॥

अनर्हसूचनायोत्तरगाथा—

उस्सरइ जस्स चिरमवि सुहेण सामण्णमणदिचारं वा ॥
णिज्जावया य सुलहा दुब्भिक्खभयं च जदि णत्थि ॥७४॥

'उस्सरदि' नितरां प्रवर्तते। 'जस्स' यस्य। 'चिरमवि' चिरकालमपि। किं 'सामण्णं' चारित्रं। 'सुहेण' अक्लेशेन। 'अणदिचारं वा' निरतिचारं। चारित्रविनाशभयादय अतीतेषु कारणेषु सत्सु प्रत्याख्यानायोद्योगं

गा०—जिसकी चक्षु दुर्बल हो अथवा जिसके श्रोत्र दुर्बल हों। जो जंघाबलमें हीन हो (वा) अथवा विहार करनेमें समर्थ न हो ॥७२॥

टी०—'चष्टे' अर्थोको जो दिखलाती है वह चक्षु है। 'श्रूयते' जिसके द्वारा शब्दको जाना जाता है वह श्रोत्र है। जिसकी चक्षु अल्पशक्तिवाली हो, सूक्ष्म वस्तुको न देख सकती हो। जिसकी कर्णेन्द्रिय दुर्बल हो, शब्दका ज्ञान करानेमें अशक्त हो, जिसमे जंघाबल न हो, जो विहार करनेमें अशक्त हो, वे सब भक्तप्रत्याख्यानके योग्य हैं ॥७२॥

गा०—उक्तकारणके समान अन्य भी प्रबल कारण उपस्थित होनेपर विरत अथवा अविरत भक्तप्रत्याख्यानके योग्य होता है ॥७३॥

टी०—उक्त कारणोंके समान अन्य भी ऐसे कारण हों तो मुनि हो या श्रावक हो वह भक्तप्रत्याख्यानके योग्य होता है ॥७३॥

जो भक्तप्रत्याख्यानके अयोग्य हैं उन्हें आगेकी गाथासे कहते है—

गा०—जिसका चारित्र चिरकाल भी विना किसी क्लेशके अतिचार रहित अच्छी तरह पालित हो रहा है। अथवा समाधिमरण करानेमें सहायक निर्यापक (सुलहा) सुलभ हैं। (च) और (जदि) यदि दुर्भिक्षका भय नहीं है ॥७४॥

टी०—पहले जो भक्तप्रत्याख्यान करनेके कारण कहे हैं उनके रहते हुए यह चारित्र विनाशके भयसे भक्तप्रत्याख्यानके लिए उद्योग करता है। किन्तु यदि चारित्र विना क्लेशके निरतिचार

करोति । तच्चेत्प्रवर्तते निरतिचारमक्लेशेन नैव भक्तप्रत्याख्यानमर्हति । इदानीमहं यदि न त्यागं कुर्यां निर्यापकाः पुनर्न लप्स्यन्ते सूरयस्तदभावे नाहं पंडितमरणमाराधयितुं शक्नोमि इति यदि भयमस्ति भक्तप्रत्याख्यानार्ह एव ॥७४॥

यदि च सुलभा निर्यापका अनागतदुर्भिक्षभयं च यदि न स्यान्न भवत्यर्हः इति कथयति—

तस्स ण कप्पदि भत्तपइण्णं अणुवट्ठिदे भये पुरदो ॥
सो मरणं पच्छिंतो होदि हु सामण्णणिव्विण्णो ॥७५॥

'तस्स' तस्य । 'ण' 'कप्पदि भत्तपइण्णं' न योग्यं प्रत्याख्यानं भक्तस्य । 'भये पुरदो अणुवट्ठिदे' भये पुरस्तादनुपस्थिते । 'सो' सः । निरतिचारश्रामण्य सुलभनिर्यापकः अनुपस्थितदुर्भिक्षभयः । 'मरणं' मृतिं । 'पेच्छंतो' प्रार्थयमानः । खुशब्द एवकारार्थः । एवमसौ संभावनीयः 'सामण्णणिव्विण्ण एव होदित्ति' श्रामण्यान्निर्विण्ण एव संभवतीति । ननु च अरिहेति अर्ह एव सूचितो नानर्हः, तत्किमर्थमसूत्रितव्याख्या क्रियते, सूत्रकारेण ? अर्हप्रसंगादायातमिति केचित् । अनर्हमपि लक्षणतया अनर्हत्वं सूचितं इति वा न दोषः । स्वपर-[1]भावाभावोभयाधीनात्मलाभत्वात्सर्ववस्तूनां इति मन्यते ॥ अरिहोत्ति गदम् ॥७५॥

पलता है तो वह भक्तप्रत्याख्यानके योग्य नही है उसे भक्तप्रत्याख्यान मरण नहीं करना चाहिए। तथा यदि इस समय मैं भक्तप्रत्याख्यान नही करता तो फिर मुझे समाधिमरण करानेवाले निर्यापकाचार्य नहीं मिलेंगे। उनके अभावमें मैं पण्डितमरणकी आराधना नही कर सकता। ऐसा यदि भय है तो भक्तप्रत्याख्यानके योग्य ही है। अर्थात् यदि ऐसा भय न हो और आराधनामें सहायक उस कालमें और आगे भी सुलभ हों तो उक्त भयसे तत्काल भक्तप्रत्याख्यान करना योग्य नही है। इसी तरह यदि दुर्भिक्षका भय हो कि आगे धान्यका विनाश होनेसे भिक्षाके विना मेरे चारित्रकी हानि होगी तो भक्तप्रत्याख्यान करना योग्य है, नही तो अयोग्य है ॥७४॥

यदि निर्यापक सुलभ हों और आगे दुर्भिक्षका भय न हो तो भक्तप्रत्याख्यान करना योग्य नहीं है, ऐसा कहते हैं—

गा०—आगे भयके अनुपस्थित होते हुए उसका भक्तप्रत्याख्यान योग्य नहीं है। वह यदि मरणकी प्रार्थना करता है तो मुनिधर्मसे विरक्त ही होता है ॥७५॥

टी०—जिसका चारित्र निरतिचार पलता है, निर्यापक भी सुलभ हैं और दुर्भिक्षका भय भी नहीं है फिर भी यदि वह मरना चाहता है तो ऐसी सम्भावना होती है कि वह मुनिपदसे विरक्त हो गया है।

शंका—'अरिह' इस पदसे 'अर्ह' ही सूचित होता है 'अनर्ह' अयोग्य नहीं। तब ग्रन्थकारने सूत्र विरुद्ध व्याख्या क्यों की ?

समाधान—'अर्ह' के प्रसगसे 'अनर्ह' आया है ऐसा कोई कहते हैं अथवा लक्षणासे 'अर्ह' भी 'अनर्ह' को सूचित करता है इसलिए कोई दोष नहीं है। क्योंकि सब वस्तुएँ स्वका भाव और परका अभाव, दोनोंके होनेसे ही आत्म लाभ करती हैं ऐसा माना जाता है ॥७५॥

इस प्रकार 'अरिह' अधिकार समाप्त हुआ।

---

१. वो नया–आ० मु०।

भक्तप्रत्याख्यानार्हस्य तत्प्रत्याख्यानपरिकरभूतलिंगनिरूपणं उत्तराभिर्गाथाभिः क्रियते—

उस्सग्गियलिंगकदस्स लिंगमुस्सग्गियं तयं चेव ॥
अववादियलिंगस्स वि पसत्थमुवसग्गियं लिंगं ॥७६॥

उस्सग्गियलिंगकदस्स उत्कर्षेण सर्जनं त्यागः सकलपरिग्रहस्य उत्सर्गः। उत्सर्गे सकलग्रंथपरित्यागे भवं लिंगं औत्सर्गिकं किं करोति क्रियासामान्यवचनोऽत्र सृज्यर्थो ग्राह्यः. धातूनामनेकार्थत्वादिति वचनात्। तेनायमर्थः औत्सर्गिकलिंगस्थितस्य भक्तप्रत्याख्यानाभिलाषवतः। **'तं चेव उस्सग्गियं लिंगं'** तदेव प्राक् गृहीतं लिंगं औत्सर्गिकम्। **'अववादियलिंगस्स वि'** यतीनामपवादकारणत्वात् परिग्रहोऽपवादः, अपवादो यस्य विद्यते इत्यपवादिकं परिग्रहसहितं लिंगं अस्येत्यपवादिकलिंगं भवति। वाक्यशेषं कृत्वा एवं पदसंबंधः कार्यः। **'जइ पसत्थलिंगं'** यदि प्रशस्तं शोभनं लिंग मेहनं भवति। चर्मरहितत्व, अतिदीर्घत्व, स्थूलत्व, असकृदुत्थानशीलतेत्येवमादिदोषरहितं यदि भवेत्। पुंस्त्वलिंगता इह गृहीतेति बीजयोरपि लिंगशब्देन ग्रहणं। अतिलम्बमानतादिदोषरहितता प्रशस्ततापि तयोर्गृहीता ॥७६॥

अप्रशस्तलिङ्गस्य औत्सर्गिकं लिंगं न भवत्येवंत्यस्यापवादमाह—

जस्स वि अव्वभिचारी दोसो तिट्ठाणिगो विहारम्मि ॥
सो वि हु संथारगदो गेण्हेज्जोस्सुग्गियं लिंगं ॥७७॥

जो भक्तप्रत्याख्यान करनेके योग्य है उसके भक्तप्रत्याख्यानका परिकर जो लिंग है, उस लिंगका कथन आगेकी गाथाओंसे करते हैं—

गा०—जो औत्सर्गिक लिंगमें स्थित है उसका जो पूर्वगृहीत है वही औत्सर्गिक लिंग होता है। आपवादिक लिंगवालेका भी औत्सर्गिक लिंग होता है यदि उसका पुरुष चिह्न दोष रहित हो ॥७६॥

टी०—उत्कृष्टसे 'सर्जन' अर्थात् सकलपरिग्रहके त्यागको उत्सर्ग कहते हैं। 'उत्सर्ग' अर्थात् सकल परिग्रहके त्यागसे होनेवाले लिंगको औत्सर्गिक लिंग कहते हैं। यहाँ सृज् धातुका अर्थ क्रिया सामान्यवाची लेना चाहिए। क्योंकि ऐसा कहा है कि धातुओंके अनेक अर्थ होते हैं। तब ऐसा अर्थ होता है कि जो औत्सर्गिक लिंगमे स्थित है और भक्तप्रत्याख्यानकी अभिलाषा रखता है उसका वही लिंग रहता है जो उसने पूर्वमें ग्रहण किया है अर्थात् औत्सर्गिक लिंग ही रहता है। मुनियोंके अपवादका कारण होनेसे परिग्रहको अपवाद कहते हैं। जिसके अपवाद हो वह अपवादिक है अर्थात् परिग्रह सहित लिंगवाला आपवादिक लिंगी होता है। वह यदि भक्तप्रत्याख्यान करना चाहता है तो उसे परिग्रहको त्यागकर औत्सर्गिक लिंग धारण करना होता है। इस लिंग धारण करनेपर नग्न होना पड़ता है। किन्तु उसके सम्बन्धमें यह नियम है कि उसका लिंग-पुरुष चिह्न प्रशस्त होना चाहिए। लिंगका चर्मरहित होना, अतिदीर्घ होना, स्थूल होना, और बार-बार उत्तेजित होना ये दोष है। इन दोषोंसे रहित होनेपर ही औत्सर्गिक लिंग दिया जाता है। यहाँ लिंग शब्दसे पुरुष चिह्नका ग्रहण किया है। तथा उससे अण्डकोष भी ग्रहण होता है। वे भी अति लटकते हुए लम्बे नहीं होना चाहिए ॥७६॥

आगे 'अप्रशस्त लिंगवालेके औत्सर्गिक लिंग नहीं होता है, इस कथनका अपवाद कहते हैं—

'**जस्स वि**' यस्यापि । '**अव्वभिचारी**' अनिराकार्यो । '**दोसो**' दोष: । '**तिट्ठाणिगो**' स्थानत्रयभव: मेहने वृषणयोश्च भव: औषधादिनानपसार्य: । '**सोऽवि**' खु शब्द एवकारार्थ: स च '**गेण्हेज्ज**' इत्यनेन संबंधनीय: । गृह्णीयादेव किं ? '**उस्सग्गियं लिंगं**' औत्सर्गिकं अचेलतालक्षणं । क्व '**विहारम्मि**' विहारे वसतौ, '**संथारगदे**' संस्तराब्ढ: संस्तरारोहणकाले । एवं संस्तराब्ढस्यैव औत्सर्गिक नान्यत्रेत्याख्यातं भवति ॥७७॥

अपवादलिंगस्थानां प्रशस्तलिंगाना सर्वेषामेव किमौत्सर्गिकलिंगतेत्यस्यामारेकायां आह—

आवसधे वा अप्पाउग्गे जो वा महड्ढिओ हिरिमं ॥
मिच्छजणे सजणे वा तस्स होज्ज अववादियं लिंगं ॥ ७८ ॥

'**आवसधे वा**' निवासस्थाने । '**अप्पाउग्गे**' अप्रायोग्ये अविविक्ते । '**अपवादिकलिंगं**' इत्यविदिति' शेष: । '**जो वा महड्ढिगो**' महर्द्धिक: । '**हिरिमं**' ह्रीमान् लज्जावान् । तस्यापि '**होज्ज**' भवेत् अपवादिकं लिंगं । '**मिच्छे**' वा मिथ्यादृष्टौ । '**सजणे**' स्वजनो बंधुवर्गो । '**होज्ज**' भवेत् । अपवादिकलिंग सचेललिंगं ॥७८॥

पूर्वनिर्दिष्टोत्सर्गलिंगस्वरूपनिरूपणार्थोत्तरगाथा—

अच्चेलक्कं लोचो वोसट्ठसरीरदा य पडिलिहणं ॥
एसो हु लिंगकप्पो चदुव्विहो होदि उस्सग्गे ॥७९॥

गा०—जिसके भी लिंग और दोनों अण्डकोष इन तीन स्थानोंमें ऐसा दोष है जिसे औषध आदिसे भी दूर नहीं किया जा सकता । वह भी वसतिकामें सस्तरेपर आरूढ़ होनेपर औत्सर्गिक लिंगको अवश्य ग्रहण करे ॥७७॥

टी०—जिसके तीनों स्थानोंमें ऐसा दोष है जिसे चिकित्सासे भी नहीं दूर किया जा सकता । वह भी जब भक्त प्रत्याख्यान करना है तो उसे वसतिमें संथरे पर रहना होता है अत: उस समय उसे भी औत्सर्गिक लिंग ग्रहण करना आवश्यक है । इस प्रकार वह संस्तर पर आरूढ होते हुए भी औत्सर्गिक लिंगका पात्र होता है उससे पहले नही (क्योंकि सदोष लिंग वाला नग्नता का पात्र नहीं होता) ॥७७॥

क्या प्रशस्त लिंग वाले सभी अपवाद लिंगके धारकोंको औत्सर्गिक लिंग लेना आवश्यक है इस शङ्काका उत्तर देते हैं—

गा०—जो महान सम्पत्तिशाली है अथवा लज्जालु है अथवा जिसके स्वजन बन्धुवर्ग मिथ्यादृष्टि विधर्मी है । उसके लोगोंके आवागमनके कारण अयोग्य निवास स्थानमे आपवादिक लिंग होता है ॥ ७८ ॥

टी०—जो प्रतिष्ठित धन सम्पन्न है या जिन्हे सबके सामने लज्जा लगती है या जिनका परिवार विधर्मी है उन्हें सार्वजनिक स्थानमें नग्न लिंग नहीं देना चाहिये । सवस्त्र लिंग ही उनके योग्य है ॥ ७८ ॥

पहले कहे औत्सर्गिक लिंगका स्वरूप कहते हैं—

गा०—अचेलता, हाथसे केश उखाड़ना, शरीरसे ममत्व त्याग और प्रतिलेखन यह चार प्रकारका लिंगभेद औत्सर्गिक लिंगमें होता है ॥ ७९ ॥

अच्चेलक्कमिति । अच्चेलक्कं अचेलता । लोचो केशोत्पाटनं हस्तेन । वोसट्ठसरीरदा च व्युत्सृष्टशरीरता च । पडिलिहणं प्रतिलेखनं । एसो हु एषः । लिंगकप्पो लिंगविकल्पः । चदुव्विहो चतुर्विधः भवति । उस्सग्गे औत्सर्गिकसंज्ञिते लिंगे ।

अतीताभिर्गाथाभिः पुरुषाणां भक्तप्रत्याख्यानाभिलाषिणां लिंगविकल्पोऽभिदृष्टनिश्चयः । अधुना स्त्रीणां तद्वर्तिनीनां लिंगमुत्तरया गाथया निरूप्यते—

इत्थीवि य जं लिंगं दिट्ठं उस्सग्गियं व इदरं वा ॥
तं तत्थ होदि हु लिंगं परित्तमुवधिं करेंतीए ॥८०॥

'इत्थीवि य' स्त्रियोऽपि । 'जं लिंगं' यल्लिंगं । 'दिट्ठं' दृष्टं आगमेऽभिहितं । 'उस्सग्गियं व' औत्सर्गिकं तपस्विनीनां । 'इदरं वा' श्राविकाणां । 'तं' तदेव । 'तत्थ' भक्तप्रत्याख्याने । 'होदि' भवति । लिंगं तपस्विनीनां प्राक्तनम् । इतरासां पुंसामिव योज्यम् । यदि महर्द्धिका लज्जावती मिथ्यादृष्टिस्वजना च तस्याः प्राक्तनं लिंगं विविक्ते त्वावसथे, उत्सर्गलिंगं वा सकलपरिग्रहत्यागरूपं । उत्सर्गलिंगं कथं निरूप्यते स्त्रीणामित्यत आह—'तं' तत् उत्सर्गं लिंगं । 'तत्थ' स्त्रीणां 'होदि' भवति । 'परित्तं' अल्पं । 'उवधिं' परिग्रहं । 'करेंतीए' 'कुर्वंत्याः' ।

टी०—अचेलक अर्थात् वस्त्रादिका अभाव, केश लोच, शरीरका संस्कार आदि न करना और पीछी यह चार औत्सर्गिक लिंगके प्रकार हैं। औत्सर्गिक लिंगमें ये चार बातें होना आवश्यक हैं ॥ ७९ ॥

पिछली गाथाओंसे भक्त प्रत्याख्यानके अभिलाषी पुरुषोंके लिंगका निश्चय किया। अब उसकी अभिलाषी स्त्रियोंका लिंग कहते हैं—

गा०—स्त्रियोंके भी जो. लिंग औत्सर्गिक अथवा अन्य आगममें कहा है। वही लिंग अल्प परिग्रह करती हुईके भक्त प्रत्याख्यानमें होता है ॥ ८० ॥

टी०—स्त्रियोंके आगममें जो लिंग कहा है तपस्विनी स्त्रियोंके औत्सर्गिक और श्राविकाओंके आपवादिक। वही लिंग उनके भक्त प्रत्याख्यानमे भी होता है। अर्थात् तपस्विनी स्त्रियोंके औत्सर्गिक लिंग होता है और शेषके पुरुषोंकी तरह जानना। अर्थात् यदि स्त्री किसी ऐश्वर्यशाली परिवारसे सम्बद्ध है या लज्जाशील है अथवा उसके परिवार वाले विधर्मी हैं तो उसे एकान्त स्थानमें सकल परिग्रहके त्यागरूप उत्सर्ग लिंग दिया जा सकता है। प्रश्न होता है कि स्त्रियोंके उत्सर्ग लिंग कैसे सम्भव है? तो उसका उत्तर यह है कि परिग्रह अल्प कर देनेसे स्त्रीके उत्सर्ग लिंग होता है ॥ ८० ॥

विशेषार्थ—तपस्विनी स्त्रियाँ एक साड़ी मात्र परिग्रह रखती है किन्तु उसमें भी ममत्व त्यागनेसे उपचारसे निर्ग्रन्थताका व्यवहार होता है। किन्तु श्राविकाओंके उस प्रकारके ममत्वका त्याग न होनेसे उपचार से भी निर्ग्रन्थताका व्यवहार नही होता। भक्त प्रत्याख्यानमे तपस्विनियोंके अयोग्य स्थानमें तो पूर्व लिंग ही होता है। शेषके पुरुषोंकी तरह जानना। साराश यह है कि तपस्विनी स्त्री मृत्युके समय वस्त्र मात्रको भी छोड़ देती है। अन्य स्त्री यदि योग्य स्थान होता है तो वस्त्र त्याग करती है। यदि वह धन सम्पन्न, या लज्जाशील या मिथ्यादृष्टि परिवारसे सम्बद्ध

ननु अर्हस्य रत्नत्रयभावनाप्रकर्षेण मृतिरुपयुज्यते किममुना लिंगविकल्पोपादानेनेत्यस्योत्तरमाह—

जत्तासाधणचिह्नकरणं खु जगपच्चयादठिदिकरणं ॥
गिहभावविवेगो वि य लिंगग्गहणे गुणा होंति ॥ ८१ ॥

'**जत्तासाधणचिह्नकरणं**' यात्रा शरीरस्थितिहेतुभूता भुजिक्रिया। तस्याः साधनं यल्लिंगजातं चिह्नजातं तस्य करणं। न हि गृहस्थवेषेण स्थितो गुणीति सर्वजनताधिगम्यो भवति। अज्ञातगुणविशेषाश्च दानं न प्रयच्छति। ततो न स्याच्छरीरस्थितिः। असत्यां तस्यां रत्नत्रयभावनाप्रकर्षः क्रमेणोपचीयमानो न स्यात्। विना तं न मुक्तिरित्यभिलषितकार्यसिद्धिरेव न स्यात्। गुणवत्तायाः सूचनं लिंगं भवति। ततो दानादिपरंपरया कार्यसिद्धिर्भवतीति भावः। अथवा यात्राशब्दो गतिवचनः। यथा देवदत्तस्य यात्राकालोऽयम्। गतिसामान्यवचनादप्ययं शिवगतावेव वर्तते, दारकं पश्यसीति यथा। यात्रायाः शिवगतेः साधनं रत्नत्रयं तस्य चिह्नकरणं ध्वजकरणं।

'**जगपच्चयादठिदिकरणं**' जगच्छब्दोऽन्यत्र चेतनाचेतनद्रव्यसंहृतिवचनो '**जगदेकावस्थं युगपदस्तिकानंतविषयम्**' इत्येवमादौ। इह प्राणिविशेषवृत्तिः। यथा—'**अर्हंतस्त्रिजगद्वन्द्याम्**' इति। प्रत्ययशब्दोऽनेकार्थः। क्वचिज्ज्ञाने वर्तते यथा 'घटस्य प्रत्ययो' घटज्ञान इति यावत्। तथा कारणवचनोऽपि 'मिथ्यात्वप्रत्ययोऽनंतः संसार' इति गदिते मिथ्यात्वहेतुक इति प्रतीयते। तथा श्रद्धावचनोऽपि 'अयं अत्रास्य प्रत्यय' श्रद्धेति गम्यते। इहापि श्रद्धावृत्तिः। जगतः श्रद्धेति। ननु श्रद्धा प्राणिधर्मः अचेलतादिकं शरीरधर्मो लिंगम्। तत्किमुच्यते '**लिंगं**

है तो पुरुषोंकी तरह वस्त्र त्याग नही करती ॥८०॥

जो योग्य होता है उसके रत्नत्रयकी भावनाका प्रकर्ष होने पर मरण हो जाता है तब लिंग का कथन करनेकी क्या आवश्यकता है। इसका उत्तर देते हैं—

गा०—यात्राके साधन चिह्नका करना, जगतकी श्रद्धा, अपनेको स्थिर करना और गृहस्थतासे भिन्नता, ये चार लिंग ग्रहण करनेमे गुण होते है ॥ ८१ ॥

टी०—यात्राका अर्थ है शरीरकी स्थितिमे कारण भोजन करना। उसका साधन जो लिंग है उसका करना लिंग धारण करनेका पहला गुण है; क्योंकि जो ग्रहस्थके वेषमे रहता है उसे सारी जनता गुणी नही मानती और उसके बिना भोजन नही मिलता। और ऐसी स्थितिमें इच्छित कार्यकी सिद्धि नही होती। अत लिंग गुणवत्ताका सूचक होता है। और उससे दान आदिकी परम्परासे कार्यकी सिद्धि होती है। अथवा यात्रा शब्द गतिवाचक है। जैसे देवदत्तका यह यात्राकाल है। इस गति सामान्यका वाचक होनेपर भी यहाँ यात्रा शब्द मोक्ष गतिमे ही लिया गया है। अत यात्रा अर्थात् मुक्ति गतिका साधन जो रत्नत्रय है उसका चिह्नकरण अर्थात् ध्वजा फहराने रूप लिंग होता है। अन्यत्र जगत शब्द चेतन और अचेतन द्रव्योंके समुदायका वाचक है। जैसे 'एक साथ अनन्त विषयोंको लिये हुए जगत एक अवस्था वाला नही है' इत्यादि वाक्यमें जगतका उक्त अर्थ लिया गया है। किन्तु यहाँ जगतका अर्थ प्राणि विशेष है। जैसे 'तीनों जगतके द्वारा वन्दनीय अर्हन्त' इस वाक्यमे जगतका अर्थ प्राणि विशेष है। प्रत्यय शब्दके अनेक अर्थ हैं। कहीं ज्ञानके अर्थमें है जैसे घटका प्रत्यय अर्थात् घटका ज्ञान। तथा प्रत्यय शब्द कारण वाचक भी है। जैसे अनन्त संसारका प्रत्यय मिथ्यात्व है' ऐसा कहने पर मिथ्यात्व हेतुक अनन्त संसार है ऐसा ज्ञान होता है। तथा प्रत्यय शब्द श्रद्धावाचक भी है। जैसे 'इसका इसमें प्रत्यय है', यहाँ

जगत्प्रत्यय' इति । सकलसंगपरिहारो मार्गो मुक्तेः इत्यत्र भव्यानां श्रद्धां जनयति लिंगमिति जगत्प्रत्यय इत्यभिहितं । न चेत्सकलपरिग्रहत्यागो मुक्तिर्लिंगं किमिति नियोगतोऽनुष्ठीयते इति ।

'आदट्ठिदिकरणं' आत्मनः स्वस्य अस्थिरस्य स्थिरतापादनं । क्व ? मुक्तिवर्त्मनि व्रजने । किं मम परित्यक्तवसनस्य रागेण, रोषेण, मानेन, मायया, लोभेन वा । वसनाग्रेसराः सर्वा लोकेऽलंक्रियाः तच्च निरस्तं । को मम रागस्यावसर इति । तथा परिग्रहो निबंधनं कोपस्य । तथा हि—पित्रा सुतो युध्यते धनार्थितया ममेदं भवति तवेदमिति । तत्किमनेन स्वजनवैरिणा रिक्थेन, [1]लोभं, मायां संपाद्य, दुर्गतिं च वर्द्धयता इति सकलः परित्यक्तो वसनपुरःसरः परिग्रहो रोषविजितये । हसंति च मां परे साधवो रोषमुपयातं । क्वेयमवसनता मुमुक्षोः क्वायमस्य कोपहुताशनः ज्ञानजलसेकपरिवृद्धतपोवनविनाशनबद्धविभ्रमः इति । तथा च माया धनार्थिभिः प्रयुज्यते सा च तिर्यग्गतिं प्रापयतीति भीत्वा मायोन्मूलनार्थमेवमनुष्ठितं । 'गिहिभावविवेगोवि' य गृहित्वात्पृथग्भावो दर्शितो भवति ॥८१॥

गंथच्चाओ लाघवमप्पडिलिहणं च गदभयत्तं च ।
संसज्जणपरिहारो परिकम्मविवज्जणा चेव ॥८२॥

'गंथच्चागो' परिग्रहत्यागः । 'लाघवं' हृदयसमारोपितशैल इव भवति परिग्रहवान् । कथमिदमन्येभ्यश्चौरादिभ्यः पालयामि इति दुर्धरचित्तखेदविगमाल्लघुता भवति ।

प्रत्ययसे श्रद्धाका बोध होता है । यहाँ भी प्रत्ययका अर्थ श्रद्धा है । जगतकी श्रद्धा ।

शङ्का—श्रद्धा प्राणिका धर्म है । और अचेलता आदि लिंग शरीरका धर्म है । तब आप कैसे कहते हैं—लिंग जगत प्रत्यय है ?

समाधान—'समस्त परिग्रहका त्याग मुक्तिका मार्ग है' इसमें लिंग भव्यजीवोंकी श्रद्धा उत्पन्न करता है इसलिये लिंगको जगत प्रत्यय कहा है । यदि सकल परिग्रहका त्याग मुक्तिका लिंग न हो तो क्यों उसे नियमपूर्वक किया जायगा । 'आदठिदिकरण' का अर्थ है अपनी अस्थिर आत्माको स्थिर करना । किसमें ? मुक्तिके मार्गमें चलनेमें । जब मैंने वस्त्र ही त्याग दिया तो मुझे राग, रोष, मान, माया, लोभसे क्या प्रयोजन ? लोकमें सब अलंकरण वस्त्रमूलक होते हैं । वह मैंने त्याग दिया तो मुझे रागसे क्या प्रयोजन । तथा परिग्रह क्रोधका कारण है । देखो, धनकी अभिलाषासे पुत्र पितासे लड़ता है यह मेरा है यह तेरा है । तब अपने परिवारके वैरी इस धनसे क्या ? यह लोभ और मायाको उत्पन्न करके दुर्गतिको बढ़ाता है । इसीसे रोषको जीतनेके लिये मैंने वस्त्रपूर्वक सब परिग्रहका त्याग कर दिया । जब मुझे रोष होता है तो दूसरे साधु मुझपर हँसते हैं । कहाँ मुमुक्षुकी यह नग्नता और कहाँ क्रोधरूपी अग्नि । यह तो ज्ञानरूपी जलके सिंचनसे फले-फूले तपोवनको नष्ट करने वाला है । तथा धनके इच्छुक मायाचार करते हैं । वह तिर्यञ्च गतिमें ले जाता है इस भयसे मायाका उन्मूलन करनेके लिये ही मैंने यह लिंग धारण किया है । तथा लिंग ग्रहण करनेसे गृहस्थपनेसे भिन्नता दीखती है ॥ ८१ ॥

गा०—परिग्रहत्याग लाघव अप्रतिलेखन और भय रहितपना, सम्मूर्छन जीवोंका बचाव और परिकर्मका त्याग ये गुण लिंगमें होते हैं ॥८२॥

---

१. लोभं आयासं पापं दुर्गति—आ० मु० ।

'अप्पडिलिहणं' वसनसहितलिंगधारिणो हि वस्त्रखंडादिकं शोधनीयं महत्। इतरस्य पिच्छादिमात्रं।

'परिकम्मविवज्जणा चेव' याचनसीवनशोषणप्रक्षालनादिरनेको हि व्यापारः स्वाध्यायध्यानविघ्नकारी अचेलस्य तन्न तथेति परिकर्मविर्जनं।

'गयभयत्तं' भयरहितता। भयव्याकुलितचित्तस्य न हि रत्नत्रयघटनायामुद्योगो भवति। सवसनो यतिर्वस्त्रेषु यूकालिक्षादिसम्मूर्छनजजीवपरिहारं न विधातु अर्हः।[1] अचेलस्तु तं परिहरतीत्याह— 'संसज्जणं परिहारो' इति।

'परिसहअधिवासणा चेव'। शीतोष्णदंशमशकादिपरीषहजयो युज्यते नग्नस्य। वसनाच्छादनवतो न शीतादिबाधा येन तत्सहनपरीषहजयः स्यात्। पूर्वोपात्तकर्मनिर्जरार्थं परिषोढव्याः परीषहाः इति वचनान्निर्जरा-र्थिभिः परिषोढव्याः परीषहाः ॥८२॥

विस्सासकरं रूवं अणादरो विसयदेहसुक्खेसु।
सव्वत्थ अप्पवसदा परिसह अधिवासणा चेव ॥८३॥

'विस्सासकरं रूवं' विश्वासकारि जनाना रूप अचेलतात्मक। एवं असंगा नैतेऽन्यद्गृह्णन्ति नापि परोपघातकारि शस्त्रग्रहणं प्रच्छन्नमात्र सभाव्यते। विरूपेषु वामीषु नास्मदीयाः स्त्रियो रागमनुबध्नंतीति विश्वास.॥

टी०—लिंग ग्रहणका एक गुण परिग्रहका त्याग है। दूसरा गुण लाघव है क्योकि परिग्रह-वान ऐसा होता है मानो छाती पर पहाड रखा है। कैसे अन्य चोर आदिसे इस परिग्रहकी रक्षा करू इस प्रकार चित्तसे बडे भारी खेदके चले जानेसे लाघव होता है। जो वस्त्र सहित मुनि लिंग धारण करते है उन्हे वस्त्रों आदिका शोधन करना पड़ता है किन्तु वस्त्र रहित साधुको तो केवल पीछी आदिका ही शोधन करना होता है अत: अप्रतिलेखना भी एक गुण है। वस्त्रधारीको मागना, सीना, धोना, सुखाना आदि अनेक काम करना होते हैं जिनसे स्वाध्याय और ध्यानमे विघ्न होता है। किन्तु वस्त्र रहित साधुके ये सब नही होता अत: परिकर्मका न होना भी एक गुण है। जिसका चित्त भयसे व्याकुल रहता है वह रत्नत्रयके साधनमे उद्योग नही करता। अत परिग्रहके त्यागसे भय नहीं रहता। तथा वस्त्र सहित साधु वस्त्रोंमे जूँ लीख आदि सम्मूर्छन जीवोंका बचाव नही कर सकता। किन्तु वस्त्र रहित साधु इनसे बचा रहता है अत: संसज्जण परिहार भी एक गुण है। तथा नग्न मुनि शीत, उष्ण, डासमच्छर आदि की परीषहको जीतता है। जो वस्त्र ओढे हैं उसे शीतादिकी बाधा नही होती। तब उसको सहना रूप परीषहजय कैसे सभव है? तत्वार्थ सूत्रमे कहा है कि पूर्वग्रहीत कर्मोंकी निर्जराके लिये परीषहोको सहना चाहिये ॥८२॥

गा०—वस्त्र रहित रूप जनतामे विश्वास पैदा करने वाला होता है विषयसे होने वाले शारीरिक सुखमें अनादर भाव होता है। सर्वत्र स्वाधीनता रहती है और परीषहको सहना होता है ॥८३॥

---

१. अर्हति आ० मु०।

'**अणादरो विसयदेहसुक्खेसु**' विषयजनितेषु शरीरसुखेषु प्रेताकारस्य किं मम वामलोचनाविलोकितेन, तासां कलगीतश्रवणेन, ताभिर्जुगुप्सनीयशरीरस्य का वा रतिक्रीडेति भावना चैवानादरः। अथवा शरीरसुखे विषयसुखे चानादरः। विषयसुखव्यतिरेकेण न शरीरसुखं, नाम किंचिदिति चेद्—शारीरदुःखाभावः शरीरसुखं, इंद्रियविषयसन्निधानजनिता प्रीतिर्विषयसुखमिति महाननयोर्भेदः।

'**सव्वत्थ**' सर्वस्मिन्देशे। '**अप्पवसदा**' आत्मवशता। स्वेच्छया आस्ते, गच्छति; शेते वा। इहासनादिकरणे इदं मम विनश्यति वस्त्विति तदनुरोधकृता परतन्त्रता नास्ति संयतस्य। परिग्रहविनाशभीरुरात्मनोऽयोग्येऽपि स्थाने उद्गमादिदोषोपहते प्राणिसंयमविनाशकारिणि वा आसनस्थानशयनादिकं सपादयति। त्रसस्थावरबाधाभावहेतुना वर्त्मना वा व्रजति। एतद्दोषपरिहारोऽसंगस्य भवति॥

'**परिसह अधिवासणा चेव**' पूर्वोपात्तकर्मनिर्जरार्थिना यतिना सोढव्या परीषहा. नियोगेन क्षुधादयो बाधाविशेषाः द्वाविंशतिप्रकाराः। तत्रायं सामान्यवचनोऽपि परीषहशब्दः प्रकरणादचेलाख्यात्तदनुरूपपरीषहवृत्तिर्ग्राह्य.। तेन नाग्न्यशीतोष्णदंशमशकपरीषहसहनमिह कथितं भवति। सचेलस्य हि सप्रावरणस्य न तादृशी शीतोष्णदंशमशकजनिता पीडा यथा अचेलस्येति मन्यते॥८३॥

अचेलताया गुणान्तरसूचनाय गाथा—

जिणपडिरूवं विरियायारो रागादिदोसपरिहरणं।
इच्चेवमादिबहुगा अच्चेलक्के गुणा होंति ॥८४॥

टी०—नग्न मुनिको देखकर लोग सोचते हैं—ये तो परिग्रह रहित है, ये कुछ ग्रहण नहीं करते। ये परका घात करने वाले शास्त्र आदि भी छिपाकर नही रख सकते। ये तो विरूप है इनमें हमारी स्त्रियाँ भी राग नही कर सकती। इस प्रकारका विश्वास पैदा होता है। मेरा रूप तो प्रेतके समान है मुझे स्त्रियोको ताकने, और उनके मनोहर गीतोंको सुननेसे क्या प्रयोजन ? अथवा इस ग्लानिभरे शरीरका उनके साथ कैसी रति क्रीडा। इस प्रकारकी भावना शारीरिक सुखमें अनादर है। अथवा शरीर सुख और विषय सुखमे अनादर ऐसा अर्थ भी होता है।

शङ्का—विषयसुखसे भिन्न शारीरिक सुख नही है ?

समाधान—शारीरिक दुःखके अभावको शरीर सुख कहते हैं और इन्द्रियोके विषयोंके सम्बन्धसे उत्पन्न हुई प्रीति विषय सुख है। इन दोनोंमें महान् अन्तर है।

सब देशमें आत्माधीनता रहती है। अपनी इच्छानुसार बैठता है, जाता है, सोता है। यहाँ आसन आदि करनेपर मेरा यह नुकसान होगा, इस प्रकार की परतंत्रता साधुके नहीं होती। परिग्रहके नाशके भयसे परिग्रही साधु उद्गम आदि दोषोंसे युक्त और प्राणिसंयमका विनाश करने वाले अयोग्य स्थानमें भी आसन, स्थान, शयन आदि करता है। अथवा त्रस और स्थावर जीवोंको बाधा पहुँचाने वाले मार्गसे गमन करता है। किन्तु परिग्रह रहित साधु इन दोषोंसे बचा रहता है। साधुको पूर्व संचित कर्मोंके निर्जराके लिये नियमसे भूख प्यासकी बाधा आदि रूप बाईस परीषहोंको सहना चाहिये। यहाँ यह परीषह शब्द यद्यपि सामान्यवाची है फिर भी प्रकरणवश अचेलताका प्रकरण होनेसे उसके अनुरूप परीषह ग्रहण करना चाहिये। अतः यहाँ नाग्न्य, शीत, उष्ण, और दंशमशक परीषहोंका सहन कहा है। जो साधु सवस्त्र है कपड़ा ओढ़े हुए हैं उन्हे शीत उष्ण और डासमच्छरसे होने वाली वैसी पीड़ा नहीं होती जैसी वस्त्र रहितको होती है॥८३॥

'**जिणपडिरूवं**' जिनानां प्रतिबिंबं चेदं अचेललिंगं । ते हि मुमुक्षवो मुक्त्युपायज्ञा यद्‌गृहीतवन्तो लिंगं तदेव तदर्थिनां योग्यमित्यभिप्रायः । यो हि यदर्थी विवेकवान् नासौ तदनुपायमादत्ते यथा घटार्थी [1]तुरिवेमादी-न्मुक्त्यर्थी च यतिर्न चेलं गृह्णाति मुक्तेरनुपायत्वात् । यच्चात्मनोऽभिप्रेतस्योपायस्तन्नियोगत उपादत्ते यथा चक्रादिकं तथा यतिरपि अचेलता । तदुपायता च अचेलताया जिनाचरणादेव ज्ञानदर्शनयोरिव ।

'**विरियायारो**' वीर्यांतरायक्षयोपशमजनितसामर्थ्यपरिणामो वीर्यं, तदविगूहनेन रत्नत्रयवृत्तिर्वीर्याचारः । स च पंचविधेष्वाचारेष्वेक. स च प्रवर्तितो भवति । अचेलतामुद्वहताऽशक्यचेलपरित्यागस्य कृतत्वात् । परिग्रहत्यागो हि पंचमं व्रतं तन्नाचरितं भवेत् शक्तोऽपि यदि न परिहरेत् ।

'**रागादिदोसपरिहरणं**' । लाभे रागोऽलाभे कोपः । लब्धे ममेदंभावलक्षणो मोहः । अथवा मृदुत्वं दार्ढ्यमित्येवमादिषु वसनाच्छादनगुणेषु रागोऽमृदुस्पर्शनादिषु द्वेष इत्येषां परिहारः । '**इच्चेवमादि**' इत्येव-मादयः '**बहुगा**' महान्तः महाफलतया अच्चेलक्के अचेलतायां सत्यां '**गुणा होंति**' गुणा भवन्ति । याचादीनता रक्षा संक्लेशादिपरिहाराः आदिशब्देन गृहीताः ॥८४॥

अचेलताके अन्य गुणोंका सूचन करते हैं—

गा०—यह अचेलता जिन भगवानका प्रतिरूप है । वीर्याचारका प्रवर्तक है । रागादि दोषोंको दूर करती है । इत्यादि बहुतसे गुण अचेलतामें होते हैं ॥८४॥

टी०—जिण पडिरूव—यह अचेलिंग जिन देवोंका प्रतिबिम्ब है अर्थात् जिन देवोंने जो लिंग ग्रहण किया था मुक्तिके लिये वही लिंग मुक्तिके अभिलाषियोंके योग्य है । क्योंकि जिनदेव मुमुक्षु थे मुक्तिका उपाय जानते थे । जो जिस वस्तुका प्रार्थी होता है और विवेकशील होता है वह उस वस्तुके जो उपाय नहीं है उन्हें ग्रहण नहीं करता । जैसे घट बनानेका इच्छुक कपड़ा बुननेके साधन तुरि आदिको ग्रहण नहीं करता । इसी तरह मुक्तिका इच्छुक साधु वस्त्र ग्रहण नहीं करता क्योंकि । वस्त्र मुक्तिका उपाय नहीं है । और जो अपनेको इष्ट वस्तुका उपाय होता है उसे नियमसे ग्रहण करता है । जैसे घटका अर्थी चाक आदिको अवश्य ग्रहण करता है । उसी तरह साधु भी अचेलताको ग्रहण करता है और अचेलता ज्ञान और दर्शनकी तरह मुक्तिका उपाय है यह जिन भगवानके आचरणसे सिद्ध है ! वीरियायारो—वीर्यान्तरायके क्षयोपशमसे उत्पन्न हुए सामर्थ्यरूप परिणामको वीर्य कहते है । उसको न छिपाते हुए रत्नत्रयके पालन करनेको वीर्याचार कहते हैं । पाँच प्रकारके आचारोंमेंसे एक वीर्याचार है उसका पालन होता है क्योंकि अचेलताके धारणसे जो वस्त्रत्याग अशक्य है वह हो जाता है । परिग्रहका त्याग पाँचवा व्रत है । शक्ति होते हुए भी यदि परिग्रहका त्याग न करे तो वह पाँचवाँ व्रत नहीं रहता ।

रागदिदोस परिहरण—लाभमें राग होता है, लाभ न होने पर क्रोध आता है । जो प्राप्त होता है उसमें 'यह मेरा है' इस प्रकारका मोह होता है । अथवा ओढ़ने पहिरनेके वस्त्रोंके कोमलता मजबूती आदि गुणोंमें राग होता है और कठोर स्पर्शन आदिमें द्वेष होता है । वस्त्र त्याग देनेपर ये रागादि दोष नही होते । इस प्रकार अचेलतामें महाफलदायक महान गुण होते हैं । आदि शब्दसे मागना, दीनता, आदिसे रक्षा होती है और संक्लेश आदि नहीं होते ॥८४॥

---

१. तंतुरित्येवमा–आ० मु० ।

पुनरप्यचेलतामाहात्म्यं सूचयत्युत्तरगाथा—

इय सव्वसमिदकरणो ठाणासणसयणगमणकिरियासु ।
णिगिणं गुत्तिमुवगदो पग्गहिददरं परक्कमदि ॥ ८५ ॥

'इय' एवं अवसनतया । 'सव्वसमिदकरणो' सम्यगितानि प्रवृत्तानि समितानि, क्रियते रूपाद्युपयोग एभिरिति करणानि इंद्रियाणि, समितानि च तानि करणानि च समितकरणानि, सर्वाणि च तानि समितकरणानि च सर्वसामंतकरणानि, सर्वसमितकरणान्यस्येति सर्वसमितकरण. । रागद्वेषरहिता भावेन्द्रियाणां प्रवृत्तिः समीचीना तस्याश्च अ ेलता निबंधनं । रागादिविजयाय गृहितासंगस्वात्कथमिव रागादौ प्रेक्षावान्यतते ॥८५॥

'ठाणासणसयणगमणकिरियासु' एकपादसमपादादिका स्थानक्रिया, उत्कटासनादिका आसनक्रिया, दंडायतशयनादिका शयनक्रिया । सूर्याभिमुखगमनादिका गमनक्रिया । एतासु । 'पग्गहिददरं' प्रगृहीततरं । 'परक्कमदि' चेष्टते । कः ? निगिणं नग्नतां । 'गुत्तिं' गुप्तिं । 'उवगदो' उपगतः प्रतिपन्नः । कृतवसनत्यागस्य शरीरे निःस्पृहस्य मम किं शरीरतर्पणेन तपसा निर्जरामेव कर्तु मुत्सहते इति तपसि यतते इति भाव ॥८५॥

अपवादलिंगमुपगत किमु न शुद्धयत्येवेत्याशंकायां तस्यापि शुद्धिरनेन क्रमेण भवतीत्याचष्टे—

अववादियलिंगकदो विसयासत्तिं अगूहमाणो य ।
णिंदणगरहणजुत्तो सुज्झदि उवधिं परिहरंतो ॥ ८६ ॥

आगेकी गाथासे फिर भी अचेलताका माहात्म्य सूचित करते हैं—

गा०—इस प्रकार, नग्नता और गुप्तिको धारण करनेवाला सब इष्ट अनिष्ट विषयोंमें अपनी इन्द्रियोंको रागद्वेषसे रहित करता है। और स्थान, आसन, शयन, गमन आदि क्रियाओंमें प्रग्रहीततर अर्थात् सुदृढ़रूपसे चेष्टा करता है ॥८५॥

टी०—सव्वसमिदकरणानि–सम्यक्‌रूपसे 'इत' अर्थात् प्रवृत्तको समित कहते हैं। और जिनसे रूपादिका जानना देखना किया जाये उसे करण कहते है। करणका अर्थ इन्द्रिय है। जिसकी सब इन्द्रियां समित हैं वह सर्वसमितकरण है। भावेन्द्रियोंकी रागद्वेषसे रहित समीचीन प्रवृत्तिमें कारण अचेलता है। जिस विचारशील बुद्धिमान व्यक्तिने रागादिको जीतनेके लिए असगताको स्वीकार किया है वह रागादिमें कैसे यत्नशील हो सकता है।

एक पैरसे या दोनों पैरोको सम करके खड़े होना स्थान क्रिया है उत्कटासन आदि आसन क्रिया है। दण्डके समान एकदम सीधा सोना आदि शयन क्रिया है। सूर्यकी ओर अभिमुख होकर चलना गमन क्रिया है। जिसने वस्त्र त्याग दिया है और शरीरसे निस्पृह है वह 'मुझे शरीरके पोषणसे क्या' ऐसा विचारकर तपके द्वारा निर्जरा करनेमें ही उत्साहित होता है। यह उक्त कथनका भाव है ॥८५॥

अचेल समाप्त हुआ।

क्या अपवादलिंगका धारी शुद्ध नहीं ही होता ? इस शंकाके उत्तरमें कहते हैं कि उसकी शुद्धि भी इस क्रमसे होती है—

गा०—अपवादलिंगमें स्थित होते हुए भी अपनी शक्तिको न छिपाते हुए और निन्दा गर्हा करते हुए परिग्रहका त्याग करनेपर शुद्ध होता है ॥८६॥

'अववादियलिंगकदो वि' अपवादलिंगस्थोऽपि । करोति स्थानार्थवृत्तिरिह परिगृहीतः । तथा च प्रयोगः एवं च कृत्वा एवं च स्थित्वेत्यर्थः । 'सुज्झदि' शुध्यति च । कर्ममलापायेन शुद्धयति । कीदृक् सन् यः स्वां 'सत्तिं' शक्ति । 'अगूहमाणो' अगूहमानः सन् । 'उवधिं' परिग्रहं । 'परिहरंतो' परित्यजन् योगत्रयेण । 'णिंदणगरहणजुत्तो' सकलपरिग्रहत्यागो मुक्तेर्मार्गो मया तु पातकेन वस्त्रपात्रादिकः परिग्रहः परीषहभीरुणा गृहीत इत्यंतःसंतापो निंदा । गर्हा परेषां एवं कथनं । ताभ्यां युक्तः निंदागर्हाक्रियापरिणतः इति यावत् । एवमचेलता व्यावर्णितगुणा मूलतया गृहीता ॥८६॥

केशलोचाकरणे के दोषा यान्परिहर्तुं लोचोऽनुष्ठीयते इत्यारेकायां दोषप्रतिपादनायोत्तरं गाथाद्वयम्—

केसा संसज्जंति हु णिप्पडिकारस्स दुपरिहारा य ।
सयणादिसु ते जीवा दिट्ठा आगंतुया य तहा ॥ ८७ ॥

'केसा' केशाः । 'संसज्जंति खु' खुशब्द एवकारार्थः । यूकालिक्षोत्पत्तेराधारभावमुपव्रजन्त्येव कस्य केशाः ? 'णिप्पडियारस्स' निष्क्रान्त प्रतीकारात् निष्प्रतीकार । प्रतीकारशब्दः सामान्यवचनोऽपि संसजनस्य प्रकृतत्वात् ससजनप्रतिकार एव वृत्तो गृह्यते । तैलाभ्यंगगंधादिप्रक्षेपजलप्रक्षालनादिक्रियामकुर्वत इत्यर्थः । ते च सम्मूर्छनामुपगताजीवा यूकादय. । 'दुःपरिहारा य' दुःखेन परिह्रियन्ते । क्व ? 'सयणादिसु' शयनं[1]आतपगमनं, शिरसा कस्यचिदवष्टंभन । निद्रामुद्रितलोचनस्य पतन परवशस्य सतः आदिशब्देन गृह्यते । बाधा

टी०—'अववादियलिंगकदो' मे 'कद' जिस 'करोति' धातुसे बना है उसका अर्थ यहाँ स्थान लिया है । जैसे 'ऐसा करके' का अर्थ इस प्रकार स्थिर करके होता है । अतः अपवादलिंगमे स्थित भी कर्ममलको दूर करके शुद्ध होता है । किस प्रकार होता है ? अपनी शक्तिको न छिपाकर मन-वचनकायसे परिग्रहका त्याग करनेपर होता है । तथा, समस्त परिग्रहका त्याग मुक्तिका मार्ग है, मुझ पापीने परीषहसे डरकर वस्त्र पात्र आदि परिग्रह स्वीकार किया । इस प्रकारके अन्तःसन्तापको निन्दा कहते हैं । दूसरोसे ऐसा कहना गर्हा है । उनसे युक्त होनेपर अर्थात् अपनी निन्दा गर्हा करनेपर शुद्ध होता है । इस प्रकार जिस अचेलताके गुणोंका वर्णन ऊपर किया गया है उसे मूलरूपमे स्वीकार किया है ॥८६॥

केशलोच न करनेमें क्या दोष है जिन्हे दूर करनेके लिए लोच किया जाता है ? इस शङ्काके उत्तरमें दो गाथाओंसे दोषोंको कहते हैं—

गा०—प्रतीकार न करनेवालेके केश जूँ आदि सम्मूर्छन जीवोंके आधार होते हैं । और वे सम्मूर्छन जीव शयन आदिमे दुष्परिहार होते हैं । तथा अन्यत्रसे आते हुए भी कीट आदि देखे गये हैं ॥८७॥

टी०—'संसज्जति खु' में खु शब्दका अर्थ एवकार है । अतः निष्प्रतीकारके केश जूं लीख आदिकी उत्पत्तिके आधार होते ही है । जो प्रतीकारसे रहित है वह निष्प्रतीकार है । यद्यपि प्रतीकार शब्द सामान्य प्रतीकारका वाचक है । फिर भी संसजनका प्रकरण होनेसे संसजन सम्बन्धी प्रतिकार लिया जाता है । उसका अर्थ होता है कि जो बालोंमें तेल मर्दन नहीं करता, सुगन्धित वस्तु नही लगाता, उन्हें पानीसे नहीं धोता उसके केशोंमें सम्मूर्छन जूं आदि उत्पन्न हो जाते हैं और साधुके सोनेपर, धूपमें जानेपर, सिरसे किसीके टकरानेपर उन जीवोंको बाधा

१. शय्योपगमनं आ० मु० ।

जीवेभ्यः कथंचिदन्यदेशकालस्वभावभेदात्। ततः बाधायां दुष्परिहारायां जीवा एव दुष्परिहारा एव भवंतीति मन्यते। अन्यथा हस्तेनापनेतुं शक्याः कथं दुष्परिहाराः स्युः। न केवलं तत्रोत्पन्ना एव दुष्परिहारास्तथा तेनैव प्रकारेण जीवाः 'आगंतुका य' अन्यत आगताश्च कीटादयश्च। एतेन हिंसादोष आख्यातः ॥८७॥

जूगाहि य लिक्खाहि य बाधिज्जंतस्स संकिलेसो य।
संघट्टिज्जंति य ते कंडुयणे तेण सो लोचो ॥ ८८ ॥

जूगाहि य यूकाभिश्च। **लिक्खाहि य** लिक्षाभिश्च। **'बाधिज्जंतस्स'** बाध्यमानस्य यते **संकिलेसो य** संक्लेशश्च जायते इति शेषः। स च क्लेशोऽशुभपरिणाम. पापास्रव. पूर्वोपात्तकर्मपुद्गलरसाभिवर्द्धननिपुणः। अथवा **बाधिज्जंतस्स** भक्ष्यमाणस्य **संकिलेसो य** दुःखं वा। तथा चोक्त—क्लिशू विबाधने इति। एतेनात्मविराधनादोषः सूचितः। अथ तद्भक्षणे असहमान कंडूयति तत्र दोषमाह—**'संघट्टिज्जंति य'** संघट्यंते ते यूकादय। आगंतुकाश्च **'कंडुयणे'** कंडूकरणे। **'तेण'** तेन दोषेण हेतुनासौ आगमदृष्ट. **'लोचो'** लोच क्रियते इति शेषः। प्रदक्षिणावर्त. केशश्मश्रुविषयः हस्तांगुलीभिरेव सपादः द्वित्रिचतुर्मासगोचर ॥८८॥

एव लोचाकरणे दोषानुद्भाव्य लोचे गुणख्यापनाय गाथात्रयमुत्तरम्—

लोचकदे मुंडत्तं मुंडत्ते होइ णिव्वियारत्तं।
तो णिव्वियारकरणो पग्गहिददरं परक्कमदि ॥८९॥

पहुँचती है। बाधाका मतलब है कि भिन्न देश, भिन्नकाल और भिन्न स्वभाव होनेसे जीवोंसे जीवोंको बाधा पहुँचती है। उस बाधाको दूर करना अशक्य जैसा है। जब बाधा ही दुष्परिहार है तो उन जीवोको दूर करना भी दुष्परिहार है, क्योंकि यदि बाधा पहुँचनेकी बात न होती तो उन्हे हाथसे निकाला जा सकता था। तथा जो जीव केशोंमें उत्पन्न होते है वे ही दुष्परिहार नही है, अन्यत्रसे आकर भी कीटादि बालोंमे घुस जाते है उन्हे भी दूर करना कठिन होता है। इस तरहसे केशलोच न करनेमे हिंसादि दोष कहे है ॥८७॥

गा०—जुं से और लीखोंसे पीड़ित साधुके सक्लेश उत्पन्न होता है। खुजाने पर वे जू आदि पीड़ित होते हैं इस कारणसे वह केशलोच किया जाता है ॥ ८८ ॥

टी०—जू और लीख जब साधूको बाधा पहुँचाती है तो साधुको सक्लेश होता है। वह संक्लेश अशुभ परिणाम रूप होनेसे पापास्रवका कारण है। उससे पूर्वबद्ध कर्म पुद्गलोंके अनुभाग रसमें वृद्धि होती है। अथवा 'बाधिज्जंत'का अर्थ खाना या काटना है' उनके काटने पर यदि साधु खुजाता है तो वे जू आदि पीडित होते हैं इस दोषके कारण आगममे कहा लोच करते हैं। यह लोच सिर और दाढीके बालोंका हाथकी अँगुलियोंके द्वारा दो, तीन या चार मासमें प्रदक्षिणा के रूपमें अर्थात् दाहिनी ओरसे बायी ओर किया जाता है ॥ ८८ ॥

इस प्रकार लोचके न करनेमें दोष बतलाकर लोचमे गुणोका कथन तीन गाथाओं द्वारा करते हैं—

गा०—लोच करने पर सिर मुण्डा हो जाता है। मुण्डताके होने पर निर्विकारता होती है। उससे विकार रहित क्रियाशील होनेसे प्रगृहीततर चेष्टा करता है ॥ ८९ ॥

'लोचकदो' लोचे कृतः स्थितः लोचकृतः सप्तमीति योगविभागात्समासः। तस्मिन् लोचे कृते। लोच-स्थिते इति केचित्। अन्ये तु वदन्ति लोचगदे इति पठंतः लोचं गतः प्राप्तः लोचगतः तस्मिन्निति। अथवा कृतशब्दो भावसाधनः तत सल्लक्षणा सप्तमी लोच एव कृतं तस्मिन्। लोचक्रियायां सत्यां। 'मुंडत्तं' मुंड-शिरस्कता नाम भवति। न मुंडशिरस्कता मुक्त्युपायो गुणोऽरत्नत्रयत्वादसत्याभिधानवत् तत्किमुक्तेनानेनानुप-योगिना गुणेनेत्याशंकायां आह—'मुंडत्ते होदि णिव्वियारत्तं' इति। 'मुंडत्ते' मुंडनायां सत्यां। 'होदि' भवति। 'णिव्वियारत्तं' निर्विकारता। विकारो विक्रिया सलीलगमनशृंगारकथाकटाक्षेक्षणादिकः। तस्मान्निष्क्रान्तः तत्राप्रवृत्तः निर्विकारः तस्य भावः निर्विकारता। निर्विकारो भवति इति यावत्। 'तो' ततः 'णिव्वियारकर-णो विकाररहितक्रियः। 'पग्गहिददरं' प्रगृहीततरं। 'परक्कमदि' चेष्टते करणत्रये इति शेषः। रत्नत्रयोद्योगे परंपरया लोचस्योपयोग समाख्यातोऽनया गाथया। नग्नस्य मुंडस्य मम सविभ्रमं गमनादिकं जनो दृष्ट्वा हसति, शोभते तरामियमस्य विलासिता षंडकस्य वामलोचनाविलास इवेति मन्यमानो निरस्तविकारो मुक्तये केवल घटते इत्यभिप्रायः ॥८९॥

अप्पा दमिदो लोएण होइ ण सुहे य संगमुवयादि।
साधीणदा य णिद्दोसदा य देहे य णिम्ममदा ॥९०॥

'अप्पा' आत्मा। 'दमिदो होदि' वशीकृतो भवति। कस्य? आत्मन एव। केन करणेन? 'लोएण' केशोत्पाटनेन। दुःखभावनया निगृहीतदर्प सर्व एव शान्तो भवति यथा बलीवर्दादिरिति मन्यते।

टी०—लोचमें कृत अर्थात् स्थित लोचकृत है। दोनोंका योगविभाग करके सप्तमी समासमें अर्थ होता है—लोच करने पर। कोई 'लोचमे स्थित होने पर' ऐसा अर्थ करते हैं। अन्य 'लोय-गदे' ऐसा पाठ रखते हैं। वे अर्थ करते हैं लोचको प्राप्त होने पर। अथवा कृत शब्द भावसाधन है। तब सप्तमीका अर्थ सत् होता है अर्थात् लोच क्रिया होने पर। मुण्डित होता है—सिर मुंड जाता है।

शङ्का—सिर मुण्डन मुक्तिका उपाय नही है क्योंकि वह रत्नत्रय रूप नही है जैसे असत्य बोलना। तब इस अनुपयोगी गुणके कहनेसे क्या लाभ?

समाधान—इसके उत्तरमें कहते हैं कि मुण्डन होने पर निर्विकारता होती है। लीला सहित गमन, शृंगार कथा, कटाक्ष द्वारा निरीक्षण ये सब विकार है जो ये सब नही करता वह निर्वि-कार होता है। और जिसकी चेष्टाएँ विकार रहित होती हैं वह रत्नत्रयमें उद्योग करता है।

इस गाथासे परम्परासे लोचका उपयोग कहा है। मैं नग्न और मुण्डे सिर हूँ मेरा विलास-पूर्ण गमन आदि देखकर लोग हँसते हैं कि नपुंसकके स्त्री विलासकी तरह इसकी विलासिता कैसी शोभती है? ऐसा मान, विकारको दूरकर वह केवल मुक्तिके लिये प्रयत्न करता है, यह इस गाथा-का अभिप्राय है ॥ ८९ ॥

गा०—केशलोचसे आत्मा दमित होता है और सुखमें आसक्त नहीं होता है। और स्वाधीनता निर्दोषता और निर्ममत्व होता है ॥ ९० ॥

टी०—केश उपाड़नेसे आत्मा आत्माके वशमें होता है। जैसे बैल वगैरह दुःख देनेसे शान्त हो जाते हैं वैसे ही दुःख भावनासे मदका निग्रह होने पर सभी शान्त हो जाते हैं। सुखमें आसक्त

'सुखे य' सुखे च । 'संगं' आसक्ततां गोपयाति । सुखमेव सुखलंपट करोति जनं । दुःखेऽन्तर्भाव्यमाने सुखासक्तिर्हन्यते[1] सुखोपयोगमूलास्तदभावात् । बीजाभावेऽङ्कुर इव । इन्द्रियसुखं वाऽत्र सुखशब्देनोच्यते तथासक्तो हिंसादिषु प्रवर्तते । तेन परिग्रहारंभमूलात्सुखासंगाद्व्यावृत्ति संवर एवेति मुक्तेर्भवत्युपायः । अभिनवास्रवनिरोधमंतरेण का नाम निर्जरा ? तस्यां वाऽसत्यां का मुक्तिरिति भावः ।

'साधीणदा य' स्ववशता च । केशासक्तो हि जनोऽवश्यं शिरोम्रक्षणे, सम्मर्दने; प्रक्षालने, तच्छोषणे च प्रयतते । स चायं व्यापारो विघ्नमावहति स्वाध्यायादेः ।

'णिद्दोसदा य' निर्दोषता च । या सदोषक्रिया सा न कार्या यथा स्तेयादिका । निर्दोषा त्वनुष्ठीयते यथानशनादिका । तथा चेयमदोषा लोचक्रिया ।

'देहे य' देहे च । 'णिम्ममदा' ममेदंबुद्धिरहितता । अनेन शौचाख्यो धर्मो भावितो भवतीत्युक्तं भवति । 'प्रकृष्टा लोभनिवृत्तिः शौचं शरीरलोभनिवृत्तिः शौचं । शरीरलोभनिवृत्ति सकललोभनिराक्रियाया मूलं । शरीरोपकृतये बन्धुधनादिष्वस्य लोभः । धर्मश्च संवरहेतुः, गुप्तिसमितिधर्मानुप्रेक्षापरिषहजयैरिति वचनात् ॥९०॥

आणक्खिदा य लोचेण अप्पणो होदि धम्मसद्धा य ।
उग्गो तवो य लोचो तहेव दुक्खस्स सहणं च ॥ ९१ ॥

'आणक्खिदा य होदि' आदर्शिता भवति । 'लोचेण' लोचेन । का ? 'धम्मसद्धा' धर्मे चारित्रे

नहीं होता । सुख ही मनुष्यको सुखलम्पट बनाता है । अन्तरंगमें दुःखकी भावना भाने पर सुखकी आसक्ति कम होती है सुखकी आसक्तिका मूल है सुखका उपभोग । उसका अभाव होनेसे सुखकी आसक्ति नहीं होती । जैसे बीजके अभावमें अंकुर उत्पन्न नहीं होता । अथवा यहाँ सुख शब्दसे इन्द्रिय सुख लिया है । जो इन्द्रिय सुखमें आसक्त होता है वह हिंसा आदि करता है । अतः जो सुखासक्ति परिग्रह और आरम्भका मूल है उससे निवृत्त होना संवर ही है । अतः वह मुक्तिका उपाय है । नवीन कर्मोंका आना रुके बिना निर्जरा कैसी ? और उसके अभावमें मुक्ति कैसी ? यह अभिप्राय है । तथा केशलोचसे स्वाधीनता आती है क्योंकि जो मनुष्य केशोंसे अनुराग रखता है वह अवश्य सिरको साफ करने, उसकी मालिश करने धोने तथा सुखानेमें लगा रहता है और ये सब काम स्वाध्याय आदिमें विघ्न डालते हैं । तथा निर्दोषता होती है । जो क्रिया सदोष है वह नहीं करना चाहिए जैसे चोरी आदि । किन्तु निर्दोष क्रिया की जाती है जैसे उपवास वगैरह । उसी तरह लोच क्रिया भी निर्दोष है । शरीरमें 'यह मेरा है' ऐसी बुद्धि नहीं होती । इससे शौच धर्म पलता है यह कहा है । लोभसे अत्यन्त निवृत्तिको शौच कहते हैं । शरीरमें लोभकी निवृत्ति भी शौच है । शरीरमें लोभकी निवृत्ति सब प्रकारके लोभोंको दूर करनेका मूल है । शरीरके उपकारके लिए ही मनुष्य परिवार और धन आदिका लोभ करता है और शौच धर्म संवरका कारण है क्योंकि तत्त्वार्थ सूत्रमें गुप्ति, समिति, धर्म, अनुप्रेक्षा और परीषह जयसे संवर कहा है ॥९०॥

गा०—और केशलोच करनेसे आत्माकी धर्ममें श्रद्धा प्रदर्शित होती है । उसी प्रकार लोच उग्र तप है और दुःखका सहन है ॥ ९१ ॥

टी०—लोच करनेसे आत्माकी धर्म अर्थात् चारित्रमें श्रद्धा प्रदर्शित होती है । अर्थात्

---

1. निर्हन्यते–आ० मु० ।

श्रद्धा। कस्य ? 'अप्पणो' आत्मनः। महती धर्मस्य श्रद्धाऽन्यथा कथमिदं दुःसहं क्लेशमारभते इति। आत्मनो धर्मश्रद्धाप्रकाशनेन परस्यापि धर्मश्रद्धाजननोपबृंहणं कृतं भवति। सोऽयमुपबृंहणाख्यो गुणो भावितो भवति। 'उग्गो तवो य' उग्रं च तपः कायक्लेशाख्य दुःखातराणि च सहते ॥ 'लोचः तथैव' व्यावर्णितगुणश्च। 'दुक्खस्स' दुःखस्य 'सहणं च' सहनं च दुःख भावयन् दुःखान्तराणि च सहते। दुःखसहनान्निर्जरा भवत्यशुभकर्मणां ॥९१॥ लोचोत्ति गदं ॥

व्युत्सृष्टशरीरताभिधानायोत्तरः प्रबंध —

सिण्हाणब्भंगुव्वट्टणाणि णहकेसमंसुसंठप्पं ।
दंतोट्ठकण्णमुहणासियच्छिभमुहाइंसंठप्पं ॥ ९२ ॥

सिण्हाणब्भंगुव्वट्टणाणि वज्जेंति पदघटना स्नानाभ्यंजनोद्वर्तनानि ॥ णहकेसमंसुसंठप्पं नखकेशश्मश्रुसंस्कारं च वर्जयन्ति। अन्तरेणापि चशब्द समुच्चयार्थप्रतीति 'पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मनः इति द्रव्याणि' इत्यत्र यथा ॥ दन्तोट्ठकण्णमुहणासियच्छिभमुहादि संठप्पं वज्जेंति पदरचना ॥ दंतानामोष्ट्यो., कर्णयोर्मुखस्य, नासिकाया, अक्ष्णोर्भ्रुवोरादिग्रहणात्पाणिपादादीना च संस्कृतिं परिहरति ॥

स्नानमनेकप्रकारं शिरोमात्रप्रक्षालन, शिरो मुक्त्वा अन्यस्य वा गात्रस्य, समस्तस्य वा। तन्न शीतोदकेन क्रियते स्थावराणां त्रसाना च बाधा माभूदिति। कर्दमवालुकाविमर्दनाज्जलक्षोभणात्तच्छरीराणां च वनस्पतीना पीडात मत्स्यदर्दुर सूक्ष्मत्रसाना च स्नान निवार्यते। उष्णोदकेन स्नात्विति[1] चेन्न, तत्र त्रस-स्थावर-

इसकी धर्मश्रद्धा महान है, यदि न होती तो इतना दुःसह कष्ट क्यों उठाता ? अपनी धर्मश्रद्धा प्रकाशित करनेसे दूसरेकी भी धर्मश्रद्धा उत्पन्न होती है और उसमें वृद्धि होती है। इस तरह उपबृंहण नामक गुण भी भावित होता है। तथा लोचसे कायक्लेश नामक उग्र तप होता है। तथा दुःख सहन करनेसे, अन्य दुःखोंको भी सहन करनेमे समर्थ होता है। दुःख सहन करनेसे अशुभ कर्मोंकी निर्जरा होती है ॥ इस प्रकार लोचका कथन समाप्त हुआ ॥९१॥

व्युत्सृष्ट शरीरता अर्थात् शरीरसे ममत्वके त्यागका कथन करनेके लिए आगेकी गाथा कहते हैं—

गा०—स्नान, तेलमर्दन, उबटन और नख, केश, दाढी-मूँछोंका संस्कार छोड़ देते हैं। दाँत, ओष्ठ, कान, मुख, नाक, भौं आदिका संस्कार छोड़ देते हैं ॥९२॥

टी०—'छोडते हैं' यह पद लगा लेना चाहिए। 'च' शब्दके विना भी समुच्चयरूप अर्थका बोध होता है। जैसे पृथिवी जल तेज वायु आकाश काल दिशा आत्मा मन ये द्रव्य हैं। यहाँ 'च' शब्द न होनेपर भी समुच्चयरूप अर्थका बोध होता है। अतः स्नान, अभ्यंजन, और उबटन नहीं लगाता है नख, केश, दाढ़ीका संस्कार और दाँत, ओष्ठ, कान, मुख, नाक, भौ आदिसे हाथ पैर आदिका संस्कार छोड़ देते हैं।

स्नानके अनेक प्रकार हैं—सिरमात्र धोना, सिरको छोड़कर शेष शरीरको धोना अथवा समस्त शरीरको धोना। स्थावर और त्रसजीवोंको बाधा न हो, इसलिए स्नान ठण्डे जलसे नहीं करते। कीचड़ रेत आदिके मर्दनसे पानीमें क्षोभ पैदा होता है और जिसके होनेसे उनमें रहनेवाले वनस्पति कायिक जीवोंको तथा मछली मेढक और सूक्ष्म त्रसजीवोंको पीड़ा होती है। इस-

१. स्नायादिति—आ० मु०।

बाधा स्थितैव। भूमिदरीविवरस्थितानां पिपीलिकादीनां मृतेः, तरुणतृणपल्लवानां चोष्णांबुभिस्तप्तानां दुःखा-सिका महती जायते, तथा क्षारतया धान्यरसादीनां। न चास्ति प्रयोजनं स्नानेन सप्तधातुमयस्य देहस्य न शुचिता शक्या कर्तुं। ततो न शौचप्रयोजनं। न रोगापहृतये रोगपरीषहसहनाभावप्रसंगात्, न हि भूषार्थं विरागत्वात्।

घृततैलादिभिरभ्यंजनमपि न करोति प्रयोजनाभावादुक्तेन प्रकारेण घृतादिना क्षारेण स्पृष्टा भूम्यादि-शरीरादि जंतवो बाध्यंते। त्रसाश्च तत्रावलग्नाः। उद्वर्तने इतस्ततः पततां व्याघातः। मूलत्वक्फलपत्रादेः पेषणे, दलने च महानसंयमः। निर्वर्तनविलेखनघर्षणरंजनादिको नखसंस्कारः। केशसंस्कारो हस्तघर्षणेन मसृणतासंपादनं, तथा श्मश्रूणामपि। दंतमलापकर्षणं तद्रंजनं वा दंतसंस्कारः। ओष्ठमलापकर्षणं तद्रागकरणं वा ओष्ठसंस्कारः। ह्रस्वयोर्लंबतापादनं दीर्घयोर्वा ह्रस्वकरणं तन्मलनिरासोऽलंकारग्रहणं कर्णसंस्कारः। मुखस्य तेजःसंपादनं लेपेन मंत्रेण वा मुखसंस्कारः। अक्ष्णोः प्रक्षालनं अंजन अक्षिसंस्कारः। विकटोत्थितानां रोम्णां उत्पाटनं आनुलोम्यापादनं लंबयोरुन्नतीकरणं, भ्रूसंस्कारः। शोभार्थं हस्तपादादिप्रक्षालनं, औषधविलेपादिर्वा-संस्कार आदिशब्देन गृहीतः ॥९२॥

वज्जेदि बंभचारी गंधं मल्लं च धूववासं वा।
संवाहणपरिमद्दणपिणिद्धणादीणि य विमुत्ती ॥ ९३ ॥

लिए शीतल जलसे स्नान नहीं करते।

शंका—तब गर्म जलसे स्नान करना चाहिए ?

समाधान—उसमें भी त्रस और स्थावर जीवोंको बाधा रहती ही है। पृथिवी तथा पहाड़के बिलोंमें रहनेवाली चींटी आदिके मरनेसे और उष्णजलके तापसे कोमल तृण पत्ते आदिके झुलसनेसे बड़ा दुःख होता है। तथा जलके खारपनेसे धान्यके रसको भी हानि पहुँचती है। तथा स्नानकी कोई आवश्यकता भी नहीं है क्योंकि सप्तसाधुओंसे युक्त शरीरको पवित्र नही किया जा सकता। अतः पवित्रताकी दृष्टिसे स्नानका कोई प्रयोजन नही है। रोगको दूर करनेके लिए भी स्नान आवश्यक नहीं है क्योंकि तब साधु रोगपरीषह सहन नहीं कर सकेंगे। और शरीरकी शोभाके लिए भी स्नान आवश्यक नही है क्योंकि साधु तो विरागी होते हैं।

साधु प्रयोजन होनेसे घी तेल आदिसे शरीरका अभ्यंजन भी नही करते। क्योंकि कहे हुए अनुसार घी आदिसे तथा क्षारसे भूमि आदि तथा शरीर आदिमें चिपटे जीवोंको बाधा पहुँचती है। उद्वर्तन अर्थात् उबटन लगानेसे शरीरसे चिपटे त्रसजीव यहाँ वहाँ गिरकर मर जाते हैं। तथा उबटन तैयार करनेके लिये वृक्षकी जड़, छाल, फल पत्ते आदिको पीसने या दलनेमें महान असंयम होता है। काटना, छाटना, रगड़ना, रंगना आदि नखका संस्कार है। हाथसे घर्षणके द्वारा चिकनापना लाना केश तथा दाढी मूछोंका संस्कार है। दाँतका मैल दूर करना अथवा दाँतोंको रंगना दाँतका संस्कार है। ओठोंका मल दूर करना अथवा उनको रंगना ओष्ठ संस्कार है। यदि छोटे हो तो बड़ा करना और बड़े हों तो छोटा करना, मेल निकालना अथवा आभूषण धारण करना कानका संस्कार है। लेप या मंत्र द्वारा मुखको तेजस्वी बनाना मुखका सस्कार है। आँखों-को धोना, अंजन लगाना आँखका संस्कार हैं। विकट रूपसे उठे हुए रोमोंको उखाड़ना और उन्हें व्यवस्थित करना तथा लटकती हुईको ऊँचा करना भौंका संस्कार है। आदि शब्दसे शोभाके लिये हाथ पैर धोना, अथवा औषध आदिका लेप करना, ग्रहण किये गये हैं॥ ९२॥

'गंधं' कस्तूरिकादिकं । 'मल्लं' माल्यं चतुष्प्रकारं । 'धूववासं वा' धूपं कालागुर्वादिकं । वासं मुखवासं च जातिफलादिकं । अनेकसुरभिद्रव्यमिश्रं वा । 'संवाहणं' हस्ताभ्या मलनं । चरणावमर्दनं परितः 'परिमद्दणं' । अंगकुट्टनं उन्नतिं दार्ढ्यं च कर्तुं यत्तत्पिणिद्धमित्युच्यते । एतत्सर्वं वर्जयति प्रयोजनाभावाद्धिंसाप्रवृत्तेश्च । कः ? ब्रह्मचारी अब्रह्म निवृत्तिपरो यतिः ॥९३॥

किं ब्रह्मव्रतस्य कुर्वन्ति स्नानादिपरित्यागा येन तद्व्रताचरणप्रियस्तदनुष्ठाने यतते इत्यारेकायामाह—

जल्लविलित्तो देहो लुक्खो लोयकदवियडबीभत्थो ।
जो रूढणक्खलोमो सा गुत्ती बंभचेरस्स ॥९४॥

'जल्लविलित्तो देह' इति । 'देहो गुत्ती बंभचेरस्स' इति पदघटना । 'देहः' शरीरं । 'गुत्ती' गुप्तिः रक्षा । कीदृक् ? 'जल्लविलित्तो' घनीभूतमुपर्युपरि प्रचित शरीरमलं जल्लशब्देनोच्यते । तेन विलित्तो विलिप्तः देह. । स्नानादित्यागात् 'लुक्खो' रूक्षस्पर्श. स्नानादिविरहादेव 'लोयकदवियडबीभत्थो' लोचकरणविकृत-बीभत्स. । 'जो' यो देह 'रूढणक्खलोमो' दीर्घीभूतनखप्रच्छाद्यदेशलोमान्वित । सेति गुप्ति. ॥ सामानाधि-करण्यात् स्त्रीलिंगत्वात् ॥ कस्य ? 'बंभचेरस्स' ब्रह्मचर्यस्य ॥

इति व्युत्सृष्टदेहता ॥

गा०—ब्रह्मचारी निर्ग्रन्थ गन्ध, माल्य और धूप और मुखवास संवाहन, परिमर्दन और पिणिद्धण आदिको छोड देता है ॥ ९३ ॥

टी०—ब्रह्मचारी अर्थात् अब्रह्मके त्यागमें तत्पर साधु कस्तूरी आदि गंध, चार प्रकारकी माला (पुष्पमाला, रत्नमाला, मोतीमाला और सुवर्णमाला) कालागुरु आदि धूप, मुखको सुवासित करने वाले जाति फल आदि, अथवा अनेक सुगन्धित द्रव्योंका मिश्रण, हाथोसे शरीरकी मालिश, पैरोंसे शरीरको दबवाना, और पिणिद्ध, इन सबको प्रयोजन न होनेसे और हिंसापरक होनेसे छोड़ देता है । कन्धोको उन्नत औ दृढ़ बनानेके लिये जो उनको कूटा जाता है उसे 'पिणिद्धण' कहते हैं ॥ ९३ ॥

ब्रह्मचर्यव्रतका पालन करने वालेको स्नान आदिके त्यागसे क्या लाभ होता है जिससे ब्रह्मव्रतके आचरणका प्रेमी स्नान आदिके त्यागको अपनाता है, इस शङ्काका उत्तर देते हैं—

गा०—जल्लसे लिप्त, रूक्ष, लोच करनेसे विकृत और बीभत्स बढे हुए नख और रोमोंसे युक्त जो शरीर होता है, ब्रह्मचर्यकी वह गुप्ति है ॥९४॥

टी०—शरीरपर चढ़ा हुआ मैलपर मैल जल्ल कहाता है । स्नान आदिका त्याग करनेसे यतिका शरीर मैलसे लिपता जाता है । तथा स्नान आदि न करनेसे रूखा हो जाता है । केश लोच करनेसे भद्दा और ग्लानि युक्त होता है उसे देखकर लोगोंको ग्लानि होती है । नख बढ़े हुए होते हैं । गुप्त अंग आदिके बाल बढ़ जाते हैं । ऐसा शरीर ब्रह्मचर्यकी गुप्ति है । उससे यतिके ब्रह्मचर्यकी रक्षा होती है । 'गुप्ति' शब्द स्त्रीलिंग होनेसे सामानाधिकरण्यके लिये 'सा' शब्दका प्रयोग किया है ॥९४॥

व्युत्सृष्ट शरीरताका प्रकरण समाप्त हुआ ॥

प्रतिलेखनसाध्यप्रयोजनाख्यानायोत्तरगाथाद्वयम्—

इरियादाणणिखेवे विवेगठाणे णिसीयणे सयणे।
उव्वत्तणपरियत्तण पसारणाउंटणामरसे ॥९५॥

'**यस्य येन हि संबन्धो दूरस्थस्यापि तस्य सः**' इत्यनेन क्रमेण संबन्धः—'**इरियादाणे**' **पडिलेहणेण पडिलिहिज्जदित्ति** एवं सर्वत्र। ईर्यायां गमने यद्यतः स्वपादनिक्षेपदेशे दुष्परिहाराः यदि स्युः पिपीलिकादयोऽथवा प्राक् पादावलग्नरजसो विरुद्धयोनिर्वा भूमिरुत्तरा जलं प्रवेष्टव्यं यदि '**पडिलेहणेण**' प्रतिलेखनेन '**पडिलेहिज्जदि**' निराक्रियते त्रसादिक। '**आदाणे**' ग्रहणे ज्ञानचारित्रसाधनाना। '**णिखेवे विवेगे**'। ज्ञानसंयमोपकरणानां निक्षेपे स्थापनाया। यन्निक्षिप्यते यत्र च तदुभयप्रमार्जनं कार्यं। शरीरमलानां उच्चारादीनां '**विवेगे**' उत्सर्जने वा कर्तरि प्रदेश.। सा च भूर्यद्ययोग्या प्रमार्जनीया। '**ठाणे णिसीयणे सयणे**' स्थाने आसने च शयनक्रियायां। '**उव्वत्तणपरियत्तणपसारणाउंटणामरसे**'। '**उव्वत्तणं**' उत्तानशयनं। '**परियत्तणं**' पार्श्वान्तरसंचारं, '**पसारणं**' प्रसारणं हस्तपादादीना। आउंटणं संकोचनं। स्पर्शनक्रिया 'आमरसशब्देनोच्यते'॥

पडिलेहणेण पडिलेहिज्जइ चिण्हं च होइ सगपक्खे।
विस्सासियं च लिंगं संजदपडिरूवदा चेव ॥९६॥

'**चिण्हं च होदि**' चिह्नता भजते। '**सगपक्खे**' स्वप्रतिज्ञाया। सर्वजीवदया हि यते. पक्ष'। **विस्सासियं च**' विश्वासकारि च जनानां। '**लिंगं**' प्रतिलेखनाख्यं कथमयमतिसूक्ष्मान्कुंथ्वादीनपि परिहर्तुं गृहीतप्रति-

---

अब प्रतिलेखनका प्रयोजन बतलानेके लिये दो गाथा कहते हैं—

गा०—गमनमें, ग्रहणमें, रखनेमें मल त्यागमें स्थानमें बैठनेमें शयनमें ऊपरको मुख करके सोनेमें करवट लेनेमें हाथ पैर फैलानेमें संकोचनमें और स्पर्शनमें पीछीसे परिमार्जन करना चाहिये ॥९५॥

टी०—जिसका जिसके साथ सम्बन्ध होता है दूर होते हुए भी वह उसका होता है, इस क्रमके अनुसार प्रतिलेखनके दूर होते हुए भी यहाँ उसके साथ सम्बन्ध लगाना चाहिये। ईर्या अर्थात् गमन करते हुए, यदि अपने पैर रखनेके देशमें चींटी आदिको दूर करना अशक्य हो, अथवा अपने पैरोंमें लगी हुई धूलसे आगेकी भूमि विरुद्ध योनि वाली हो या यदि जलमें प्रवेश करना हो तो पीछीसे त्रसादि जीवोंको दूर करना चाहिये। अर्थात् पीछीसे उस देशका पैर आदि का परिमार्जन करके चलना चाहिये। ज्ञान और चारित्रके साधन पुस्तक कमण्डलु आदिको ग्रहण करते समय, या उन्हें रखते समय, जो वस्तु रखें और जहाँ रखे उन दोनोंका प्रमार्जन करना चाहिये—पीछीके द्वारा उन्हें झाड़ना चाहिये। शरीरके मल मूत्रादिका त्याग करते समय यदि भूमि अयोग्य हो तो उसका प्रमार्जन करना चाहिये। स्थान, आसन और सोते समय मुख ऊपर करके सोते हुए या करवट लेते समय या हाथ पैर फैलाते और संकोचते समय, किसी वस्तु को छूते समय पीछेसे प्रमार्जन करना चाहिये। यहाँ आमरस शब्दसे स्पर्शन क्रियाको कहा है ॥९५॥

गा०—उक्त क्रिया करते समय पीछेके द्वारा प्रतिलेखना करना चाहिये, इस प्रकार पूर्व

लेखनोऽस्मान्महतो जीवान्कथमिव बाधितुं उत्सहते इति । 'संजदपडिरूवदा चेव' । संयतानां [1]प्राक्तनाना प्रतिबिंबता च प्रतिलेखना ग्रहणेन भवति ॥९६॥

प्रतिलेखनलक्षणाख्यानायाह—

रयसेयाणमगहणं मद्दव सुकुमालदा लघुत्तं च ।
जत्थेदे पंच गुणा तं पडिलिहणं पसंसंति ॥९७॥

'**रजसेदाणमगहणं**' रजसः सचित्तस्य अचित्तस्य वा स्वेदस्य अग्राहक । अचित्तरजोग्राहिणा सचित्तरजो प्रतिलेखने तद्विराधना सचित्तरजोग्राहिणा चेतरस्य । स्वेदग्राहिणि रजसामुपहतिः । '**मद्दवसुकुमालदा**' मृदुस्पर्शता मार्दवं, सुकुमालदा सौकुमार्यं । '**लघुत्तं च**' लघुत्व च । एते पंच गुणा यत्रैते पंच प्रकारगुणाः संति '**तं**' तत् '**पडिलिहणं**' प्रतिलेखनं '**पसंसंति**' स्तुवंति दयाविधिज्ञा । अमृदुना, असुकुमारेण, गुरुणा च प्रतिलेखनेन जीवानामुपघात एव कृतो न दयेति भावः । एव चतुर्गुणयुक्त लिंगं व्याख्यातं गृहीतलिंगस्य यते. ॥९७॥

शिक्षानंतरेति तन्निरूपणार्थं उत्तरप्रबंधः—

णिउणं विउलं सुद्धं णिकाचिदमणुत्तरं च सव्वहिदं ।
जिणवयणं कलुसहरं अहो य रत्ती य पढिदव्वं ॥९८॥

गाथासे सम्बन्ध है । अपनी प्रतिज्ञामे पीछी चिह्न होती है । और प्रतिलेखना रूप लिंग मनुष्योंको विश्वास करानेवाला है । और प्राचीन मुनियोंका प्रतिबिम्ब रूप है ॥९६॥

टी०—मुनिका पक्ष या प्रतिज्ञा सब जीवोंपर दया करना है । अतः पीछी उसका चिह्न है । तथा यह चिह्न मनुष्योंमें विश्वास उत्पन्न कराता है कि जब यह व्यक्ति अतिसूक्ष्म कीट आदि जीवोंकी भी रक्षाके लिये पीछी लिये हुए है तो हमारे जैसे बड़े जीवोंको कैसे बाधा पहुँचा सकता है । तथा पीछी धारण करनेसे प्राचीन मुनियोंका जो रूप था उसीकी छाया वर्तमान मुनियोंमे आ जाती है ॥९६॥

प्रतिलेखनाके लक्षण कहते हैं—

गा०—धूलि और पसीनेको पकडती न हो, कोमल स्पर्शवाली हो, सुकुमार हो, और हल्की हो । जिसमें ये पाँच गुण होते हैं उस प्रतिलेखनाकी प्रशंसा करते हैं ॥९७॥

टी०—सचित्त या अचित्त रज और पसीनेको ग्रहण न करती हो; क्योंकि अचित्त रजको ग्रहण करनेवाली पीछीसे सचित्त रजकी प्रति लेखना करनेपर उनमें रहनेवाले जीवोका घात होता है और सचित्त रजको ग्रहण करनेवाली पीछीसे अचित्त रजकी प्रतिलेखना करने पर भी घात होता है । पसीनेको पकड़नेवाली पीछीसे रजमें रहनेवाले जीवोंका घात होता है । तथा पीछी कोमल स्पर्शवाली, सुकुमार और हल्की होनी चाहिये । जिस प्रतिलेखनमें ये पाँच गुण होते हैं, दयाकी विधिको जाननेवाले उसकी प्रशंसा करते हैं । इसका भाव यह है कि कठोर, असुकुमार और भारी प्रतिलेखनासे जीवोंका घात ही होता है, दया नहीं । इस प्रकार लिंगको स्वीकार करनेवाले साधुके चार गुणोंसे युक्त लिंगका कथन किया ॥९७॥

---

१. प्रधानानां-आ० मु० ।

जिणवयणं जिनवचनं । 'अहो य रत्ती य' नक्तं दिवं । 'पढिदव्वं' अध्येतव्यं । कीदृग्भूतं जिनप्रवचनमत आह—'णिउणं' जीवादीनर्थान्प्रमाणनयानुगतं निरूपयतीति निपुणं । 'सुद्धं' पूर्वापरविरोधपुनरुक्तादिद्वात्रिंशद्दोषवर्जितत्वात् शुद्धं । 'विपुलं' निक्षेप:, 'एकार्थः,' निरुक्तिः अनुयोगद्वार, नयश्चेति अनेकविकल्पेन जीवादीनर्थान्सप्रपंचं निरूपयतीति विपुलं । अर्थगाढत्वान्निकाचितं अर्थनिचित । 'अणुत्तरं च' न विद्यते उत्तरं उत्कृष्टमस्मादित्यनुत्तरं । परेषां वचनानि पुनरुक्तानि, अनर्थकानि, व्याहतानि, प्रमाणविरुद्धानि च तेभ्य इदमुत्तरं तदसंभविगुणत्वात् । 'सव्वहिदं' सर्व प्राणहित । अन्येषां मतानि केषांचिदेव रक्षां सूचयंति । 'जिघांसन्तं जिघांसीयात् न तेन ब्रह्महा भवेत्' इत्युपदेशात्[2] ।

कलुसहरं द्रव्यकर्मणां ज्ञानावरणादीनां अज्ञानादेर्भावमलस्य च विनाशनात् कलुषहरं । 'अहो य रत्तीय पढिदव्वमित्यनेन' अनारतं अध्ययनं सूचितं ॥९८॥

अब शिक्षाका कथन करते हैं—

गा०—निपुण विपुल, शुद्ध, अर्थसे पूर्ण, सर्वोत्कृष्ट और सब प्राणियोंका हित करनेवाला द्रव्यकर्म भाव कर्मरूपी मलका नाशक जिनवचन रात-दिन पढ़ना चाहिये ॥९८॥

टी०—जिनवचन रात-दिन पढना चाहिये । किस प्रकार जिनवचन पढना चाहिये ? इसके उत्तरमे कहते हैं—जो निपुण हो अर्थात् जीवादि पदार्थोंका प्रमाण और नयके अनुसार निरूपण करनेवाला हो । पूर्वापर विरोध पुनरुक्तता आदि बत्तीस दोषोसे रहित होनेसे शुद्ध हो । विपुल हो अर्थात् निक्षेप, निरुक्ति अनुयोगद्वार और नय इन अनेक विकल्पोंसे जो जीवादि पदार्थोंका विस्तार से निरूपण करता हो । निकाचित अर्थात् अर्थसे भरपूर हो । अनुत्तर अर्थात् जिससे कोई उत्तर यानी उत्कृष्ट न हो । दूसरोंके वचन पुनरुक्त, निरर्थक, बाधित और प्रमाण विरुद्ध हैं अतः उनसे जिनवचन उत्कृष्ट हैं क्योंकि जो गुण उनमें सम्भव नहीं है उन गुणोंसे युक्त है । सब प्राणियोंका हितकारी है । दूसरोंके मत तो किन्ही की ही रक्षा सूचित करते है । कहा है—वेदका जाननेवाला भी ब्राह्मण यदि किसीको मारता हो तो उसे मार डालना चाहिये । उससे ब्रह्म हत्याका पाप नहीं लगता । तथा ज्ञानावरण आदि द्रव्यकर्म और अज्ञानादिभावमलका विनाश करनेसे जिनवचन पापका हरनेवाला है । उसे 'रात-दिन पढ़ना चाहिये' इससे निरन्तर अध्ययन करना सूचित किया है ॥९८॥

---

१. पक्षार्थः —आ० मु० ।

२ आ० मु० प्रत्योअधोलिखिताश्लोकाः स ।

"यज्ञार्थं पशवः सृष्टा स्वयमेव स्वयंभुवा ॥
यज्ञो हि भूत्यै सर्वेषा तस्माद्यज्ञे वधोऽवधः ॥ १ ॥
"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ॥
क्षेत्रदारहरश्चेति षडेते आततायिन ॥"
"आततायिनमायान्तमपि वेदान्तविद् द्विजम् ॥
जिघांसंतं जिघांसीयान्न तेन ब्रह्महा भवेत् ॥"

जिनवचनशिक्षाया गुणान्संहृत्य कथयति—

आदहिदपइण्णा भावसंवरो णवणवो या संवेगो ॥
णिक्कंपदा तवो भावणा य परदेसिगत्तं च ॥९९॥

आदहिदपइण्णा आत्महितपरिज्ञानं । इंदियसुखं अहितं परिहितमिति गृह्णन्ति जना । दुःखप्रतीकारमात्रं तत् ? अल्पकालिक, पराधीन, रागानुबधकारि, दुर्लभं, भयावह, शरीरायासमात्र, अशुचिशरीरासंस्पर्शजं । तत्रास्य बालस्य सुखबुद्धि । निःशेषदुःखापायजनितं स्वास्थ्यं अचलं सुखमिति न वेत्ति । जिनवचोऽभ्यासात्तदधिगच्छति । 'भावसंवरो' भावः परिणामः तस्य संवरो निरोधः । ननु परिणाममन्तरेण न द्रव्यस्यास्ति क्षणमात्रमप्यवस्थानं तत्किमुच्यते भावसंवर इति । परिणामविशेषवृत्तिरिह भावशब्द इति मन्यते । तथा वक्ष्यति—

'सज्झायं कुव्वंतो पंचेंदियसंवुडो इति' अशुभकर्मादाननिमित्तपरिणामग्रहणमिह सरागापेक्षया । वीतरागाणा तु केषांचिच्छुद्धोपयोगनिमित्ततया पुण्यास्रवपरिणामसंवरोऽपि ग्राह्यः । 'णवणवो य' प्रत्यग्रः प्रत्यग्रः । 'संवेगो' धर्मे श्रद्धा जिनवचनाभ्यासादुपजायते । 'णिक्कंपदा' निश्चलता । क्व ? रत्नत्रये । 'तवो' स्वाध्यायाख्यं तपश्च । 'भावणाय' भावना च गुप्तीनां । 'परदेसिगत्तं च' परेषामुपदेशकता च ॥

जिनवचनकी शिक्षामें जो गुण हैं उन्हे कहते है—

गा०—आत्महितका ज्ञान होता है। भाव संवर होता है। नवीन-नवीन संवेग होता है रत्नत्रयमे निश्चलता होती है। स्वाध्याय तप होता है और भावना होती है। और दूसरोंको उपदेश करनेकी क्षमता होती है ॥९९॥

टी०—जिनवचनके पढ़नेसे आत्महितका परिज्ञान होता है—इन्द्रिय सुख अहितकर है उसे लोग हितकर ग्रहण करते हैं। इन्द्रिय सुख दुःखका प्रतीकार मात्र है, अल्पकाल तक रहता है। पराधीन है, रागका सहचारी है, दुर्लभ है (?), भयकारी है, शरीरका आयासमात्र है, अपवित्र शरीरके स्पर्शसे उत्पन्न होता है। उसको यह अज्ञानी सुख मानता है। समस्त दुःखोंके विनाशसे उत्पन्न हुआ स्वास्थ्य-आत्मामें स्थितिरूप भाव-स्थायी सुख है यह नहीं जानता। वह सुख जिनवचनके अभ्याससे प्राप्त होता है। भाव अर्थात् परिणामका, संवर अर्थात् निरोध भाव-संवर है।

शंका—परिणामके विना द्रव्य एक क्षण भी नहीं रह सकता। तब आप कैसे भावसंवर कहते हैं ?

समाधान—यहाँ भाव शब्द परिणाम विशेषका वाचक लिया गया है। आगे कहेंगे—स्वाध्याय करनेवाला पाँचों इन्द्रियोंसे संवृत होता है। अतः यहां सरागकी अपेक्षासे अशुभ कर्मों के ग्रहणमें निमित्त परिणामका ग्रहण किया है। वीतरागोंमेंसे तो किन्हींके जिनवचन शुद्धोपयोग में निमित्त होता है इसलिये भावसंवरसे पुण्यास्रवमें निमित्त परिणामोका संवर भी ग्राह्य है। जिनवचनके अभ्याससे नित नया 'संवेग' अर्थात् धर्ममें श्रद्धा उत्पन्न होती है। रत्नत्रयमें निश्चलता आती है। स्वाध्यायनामक तप होता है, गुप्तियोंकी भावना होती है तथा दूसरोंको उपदेश देनेकी सामर्थ्य आती है ॥९९॥

आदहिदपरिण्णा इत्यस्य व्याख्यानं गाथोत्तरा—

णाणेण सव्वभावा जीवाजीवासवादिया तधिगा ।
णज्जदि इह परलोए अहिदं च तहा हियं चेव ॥ १०० ॥

'णाणेण' ज्ञानेन । **'सव्वभावा'** सर्वे पदार्थाः । **'जीवाजीवादिया'** जीवाजीवास्रवबन्धसंवरनिर्जरा-मोक्षाः । **'तधिगा'** तथ्यभूताः । **'णज्जंति'** ज्ञायन्ते । **'तधा'** तेनैव प्रकारेण । **'इहपरलोए'** इह परस्मिश्च लोके । **'अहिदं'** अहितं । **'हिदं'** हितं चैव । ननु च **आदहिदपरिण्णा** इत्यत्र हितस्यैव हि सूचितत्वात् जीवादिपरिज्ञानं असूचितं कथं व्याख्यायते पूर्वमभिहितं हितमनुक्त्वा ? अत्रोच्यते—आत्मा च हितं च आत्महिते तयोः परिज्ञानं इति गृहीतं । न चात्मनो हितमिति । ततो युक्तं व्याख्यातं । एवमपि जीव एव निर्दिष्ट इत्यजीवाद्युपन्यासः कथं ? आत्मशब्दस्योपलक्षणत्वाददोषः । **जीवाजीवास्रवबंधसंवरनिर्जरामोक्षास्तत्त्वं** [त०सू० १।८) इत्यत्र सूत्रे आदौ निर्दिष्टो जीवः प्रसिद्धस्तेनोत्तरोपलक्षणं क्रियते । अथवा आत्मन्यज्ञाते हितमेव दुर्ज्ञातं आत्म-परिणामो हि हितं तच्च स्वास्थ्यं । तच्च स्वःथे आविदिते स्वास्थ्यं सुज्ञातं भवति । तत आत्मा ज्ञातव्यः ।

जादं सयं समत्तं णाणमणंतत्थवित्थिदं विमलं । रहिदं तु उग्गहादिहिं सुहंति एयंतियं भणिदं" [प्र० व० १।५] । इति वचनात् अनंतज्ञानरूपं सुखं यदि हितमिति गृहीतं, तथापि चेतनाया जीवत्वाच्चैतन्यावस्था-स्वरूपत्वात् केवलस्यावस्थानात् आत्मा ज्ञातव्य एव । मोक्षस्तु कर्मणा तदपायतयाधिगतव्यः । तत्परिज्ञानम-जीवेऽनिर्ज्ञाते न भवति । पुद्गलानामेव द्रव्यकर्मत्वात्, तद्वियोगस्य मोक्षत्वात् । स च मोक्षो बंधपुरस्सरः । न

आगे आत्महित परिज्ञानका व्याख्यान करते है—

गा०—ज्ञानके द्वारा जीव अजीव आस्रव आदि सब पदार्थ तथ्यभूत जाने जाते हैं । उसी प्रकारसे इस लोक और परलोकमें अहित और हित जाना जाता है ॥१००॥

टी०-शंका—'आत्महित परिज्ञा' इस पदमें तो हितको ही सूचित किया है, जीवादिके परिज्ञानको तो सूचित नहीं किया है तब पहले कहे गये हितका कथन न करके जीवादि परिज्ञान-का व्याख्यान क्यों किया है ?

समाधान—आत्महित परिज्ञानका अर्थ आत्मा और हितका परिज्ञान लिया है । 'आत्माका हित' अर्थ नहीं लिया है । अतः जीवादिका व्याख्यान करना युक्त है ।

शंका—ऐसा अर्थ करनेपर भी जीवका ही निर्देश किया है । तब अजीव आदिका उपन्यास क्यों किया ?

समाधान—आत्म शब्द अजीवादिका उपलक्षणरूप होनेसे कोई दोष नही है । क्योंकि 'जीवाजीवा' इत्यादि सूत्रमें जीवका प्रथम निर्देश प्रसिद्ध है उससे आगेके अजीवादिका उपलक्षण किया है । अथवा, आत्माका ज्ञान हुए विना उसके हितको जानना कठिन है । आत्माका परिणाम हित है और वह स्वास्थ्य है । अतः स्वस्थका ठीक ज्ञान होनेपर स्वास्थ्यका सम्यग्ज्ञान होता है । अतः आत्मा ज्ञातव्य है । अथवा ऐसा कहा है—अनन्त पदार्थोंमें व्याप्त और अवग्रह आदिके क्रमसे रहित निर्मल सम्पूर्णज्ञान जो परकी सहायताके विना स्वयं होता है उसे एकान्तसे सुखरूप कहा है ।' इस कथनसे यद्यपि अनन्तज्ञानरूप सुखको हित स्वीकार किया है तथापि चेतना जीव है और केवलज्ञान चैतन्य अवस्था स्वरूप है अतः आत्मा ज्ञातव्य ही है और मोक्ष कर्मोंके विनाश-रूप होनेसे जानने योग्य है । कर्मोका ज्ञान अजीवको जाने विना नहीं होता, क्योंकि पुद्गल ही

ह्यसेति बंधे मोक्षोऽस्ति । स च बंधो नासत्यास्रवे । मोक्षस्य चोपायौ संवरनिर्जरे । अहितं इति यदि दुःखं गृह्यते तदैहलौकिकमनुभवसिद्धमेव । किं तत्र जिनवचनेन ? अहितकारणं यद्यहितमुच्यते तत्कर्म तच्चात्रा-जीववचनेन आक्षिप्तं । अथ हिंसादय परपराकारणत्वेन दुःखस्यावस्थिता. अहितशब्देनोच्यन्ते । तथाप्ययुक्तं आस्रवेऽन्तर्भूतत्वात् । अत्रोच्यते—अनुभूतमपि दुःख अस्मिञ्जन्मनि अज्ञतयो विस्मरन्त्यत एव सन्मार्गे न ढौकंते । तेषां स्मृतिर्जन्यते जिनवचनेन मनुजभवापदा प्रकटनेन । जुगुप्सिते कुले प्रादुर्भूतिर्विचित्रास्तत्र रोगोर-गदशनजनिता विपद । निर्द्रविणता, दुर्भगता, अबंधुता, अनाथता, प्रार्थितद्रविणपरांगनालाभधूमध्वजनिर्दग्ध-चित्तता, द्रविणवतां कुत्सितप्रेषणकरणं, तथापि तेषां आक्रोशननिर्भर्त्सनताडनादीनि, परवशतामरणादीन्येव-माविना, इह लोके हितं दानतपःप्रभृतिकं हितकारणं हित इति यदा गृह्यते 'हितमारण्यमौषधं' इति यथा । यतो दानादिके कुशलकर्मणि वर्तमाना जनैः स्तूयते वद्यन्ते । उक्तं च—

> दानेन तिष्ठन्ति यशांसि लोके दानेन वैराण्यपि यान्ति नाशम् ।
> परोऽपि बंधुत्वमुपैति दानात्तस्मात्सुदानं सततं प्रदेयम् ॥" इति ।—[वरांग० ७।३६]

इंद्रचक्रधरादयोऽपि प्रणतिमायान्ति तपोद्रविणानाम् । परलोके अहित भवान्तरभाविदुःख नरकगतौ हि, तिर्यक्त्वे च, परलोके हितं निवृतिसुखं, तदेतत्सकलं अवबोधयति जैनी भगवती भारती ।

द्रव्यकर्मरूप होते हैं और उनका विनाश मोक्ष है। वह मोक्ष बन्धपूर्वक होता है। क्योंकि बन्धके अभावमें मोक्ष नहीं होता। तथा बन्ध आस्रवके विना नहीं होता। और मोक्षके उपाय संवर और निर्जरा हैं।

शंका—यदि अहितसे दुःख लेते है तो इस लोकमे होनेवाला दुःख अनुभवसे सिद्ध है। उसमे जिनवचनकी क्या आवश्यकता ? यदि अहितके कारणको अहित कहते हैं तो वह कर्म है और अजीव शब्दसे उसका ग्रहण होता है। यदि परम्परासे दुःखका कारण होनेसे हिंसा आदिको अहित शब्दसे लेते हैं तो भी अहितका पृथक् कथन अयुक्त है क्योंकि आस्रवमें उनका अन्तर्भाव होता है।

समाधान—इस जन्ममें अनुभूत भी दुःखको अज्ञानी भूल जाते है इसीसे वे सन्मार्गमे नही लगते। जिनवचनके द्वारा मनुष्य भवमे होनेवाली विपत्तियोको बतलानेमे उनका स्मरण होता है। निन्दनीय कुलमें जन्म होनेपर वहाँ रोगरूपी साँपके डसनेसे उत्पन्न हुई विपत्तियाँ आती हैं। दरिद्रता, भाग्यहीनता, अबन्धुता, अनाथता, इच्छित धन और पर स्त्रीकी प्राप्ति न होने रूप अग्निसे चित्तका जलते रहना, धनिकोंकी निन्दनीय आज्ञाका पालन करनेपर भी उनके गाली; गलौज, डाँट फटकार, मारपीट, परवश मरण आदिको सहना पड़ता है।

जब हितका अर्थ हितका कारण लिया जाता है तो इस लोकमें दान, तप आदि हित है। जैसे जंगली औषधी हितका कारण होनेसे हित कही जाती है क्योंकि जो दान आदि सत्कार्य करते हैं लोग उनकी स्तुति और वन्दना करते हैं। कहा भी है—'दानसे लोकमें चिरस्थायी यश होता है। दानसे वैर भी नष्ट हो जाते हैं। दानसे पराये भी बन्धु हो जाते हैं। अतः सुदान सदा देना चाहिए ॥' तपोधनोंको इन्द्र चक्रवर्ती आदि भी नमस्कार करते हैं। परलोकमें अहितसे मतलब है आगामी नरकगति और तिर्यञ्चगतिके भवमें होनेवाला दुःख। और परलोकमें हितसे मतलब है मोक्षसुख। जिन भगवान्‌के द्वारा उपदिष्ट भारती इन सबका ज्ञान कराती है ॥१००॥

आत्महितापरिज्ञाने दोषमाचष्टे—

आदहिदमयाणंतो मुज्झदि मूढो समादियदि कम्मं ।
कम्मणिमित्तं जीवो परीदि भवसायरमणंतं ॥१०१॥

'**आदहिदमयाणंतो**' आत्महितमबुध्यमान. । '**मुज्झदि**' मुह्यति अहितं हितमिति प्रतिपद्यते । मोहे को दोष इत्यत आह—'**मूढो**' मोहवान् '**समादियदि**' समादत्ते । '**कम्मं**' कर्मसामान्यवाच्योप्ययं अशुभकर्मवृत्ति-र्ग्राह्यः । कर्मग्रहणे को दोष इत्यत आह—'**कम्मणिमित्तं**' कर्महेतुकं, जीवः '**परीदि**' परिभ्रमति । किं '**भवसायरम्**' भवसमुद्रं '**अणंतं**' अनन्तम् ॥१०१॥

आत्महितपरस्योपयोगमादर्शयति—

जाणंतस्सादहिदं अहिदणियत्ती य हिदपवत्ती य ।
होदि य तो से तम्हा आदहिदं आगमेदव्वं ॥१०२॥

'**जाणंतस्स**' जानत । '**आदहिदं**' आत्महित । '**अहिदणियत्ती य**' अहितनिवृत्तिश्च । '**हिदपवत्ती य**' हिते प्रवृत्तिश्च । '**होदि य**' भवति च । '**सो**' ततः हितज्ञानात्पश्चात् । '**तम्हा**' तस्मात् '**आदहिदं**' आत्म-हितं । '**आगमेदव्वं**' शिक्षितव्यम् । अत्र चोद्यते—ननु आत्महितज्ञस्य हिते प्रवृत्तिर्भवतु, अहितान्निवृत्तिः कथं ? अहितज्ञोऽहितान्निवर्तते, हितमहित च भिन्नमेव । यद्यतो भिन्नं न तस्मिन्नवगते तदन्यदवगत भवति । यथा—वानरेऽवगते न मकरः, भिन्नं च हितादहितं तस्माद्धितज्ञोऽहितं अजानन् कथमहितान्नियोगतो निवर्तेत ? अत्रो-

---

आत्महितका ज्ञान न होनेके दोष कहते हैं—

गा०—आत्माके हितको न जाननेवाला मोहित होता है । मोहित हुआ कर्मको ग्रहण करता है । और कर्मका निमित्त पाकर जीव (अणतं) अनन्त भवसागरमे भ्रमण करता है ॥१०१॥

टी०—आत्महित या आत्मा और हितको जाननेवाला अहितको हित मानता है । यही मोह है । इस मोहमें क्या दोष है ? इसके उत्तरमे कहते है कि मोही जीव कर्मको ग्रहण करता है । यहांपर यद्यपि कर्म सामान्य कहा है तथापि अशुभकर्म ग्रहण करना चाहिए । कर्मोंके ग्रहणमें क्या दोष है ? इसके उत्तरमें कहते है कि कर्मके कारण जीव भव समुद्रमें अनन्तकाल तक भ्रमण करता है ॥१०१॥

आत्महितके ज्ञानका उपयोग दिखलाते हैं—

गा०—आत्महितको जाननेवालेके अहितमे निवृत्ति और हितमें प्रवृत्ति होती है । हिता-हितके ज्ञानके पश्चात् उसका हिताहित भी जानता ही है । इसलिए (आदहिदं) आत्महितको आगमसे सीखना चाहिए ॥१०२॥

टी०—शका—आत्महितको जाननेवालेकी हितमें प्रवृत्ति होओ, किन्तु अहितसे निवृत्ति कैसे ? जो अहितको जानता है वह अहितसे निवृत्त होता है । तथा हित और अहित भिन्न हैं । जो जिससे भिन्न होता है उसके जाननेपर उससे भिन्नका ज्ञान नहीं होता । जैसे बन्दरको जानने-पर मगरका ज्ञान नहीं होता । और हितसे अहित भिन्न है अत हितको जाननेवाला अहितको नही जानता । तब वह कैसे नियमसे अहितसे निवृत्त होगा ?

च्यते—सर्वमेव वस्तु स्वपरभावाभावोभयाधीनात्मलाभं यथा घटः पृथु[1]लोदराद्याकारात्मकः पटादिरूपतया-अग्राह्यः, अन्यथा विपर्यस्तं तज्ज्ञानं भवेत्। एवमिहापि हितविलक्षणमहितं अजानता तद्विलक्षणता हितस्य ज्ञाता भवेत्। अतो हितज्ञोऽहितमपि वेत्तीति युक्ता निवृत्तिस्ततः ॥१०२॥

शिक्षाया अशुभभावसंवरहेतुता प्रतिपादनायाह—

सज्झायं कुव्वंतो पंचिंदियसुंवुडो तिगुत्तो य ॥
हवदि य एयग्गमणो विणएण समाहिदो भिक्खू ॥१०३॥

"सज्झायं" स्वाध्यायं पंचविध वाचनाप्रश्नानुप्रेक्षाम्नायधर्मोपदेशभेदेन। तत्र निरवद्यस्य ग्रन्थस्या ध्यापनं तदर्थाभिधानपुरोगं वाचना। संदेहनिवृत्तये निश्चितबलाधानाय वा सूत्रार्थविषयः प्रश्नः। अवगतार्था-नुप्रेक्षणं अनुप्रेक्षा। आम्नायो गुणना। आक्षेपणी, विक्षेपणी, संवेजनी, निर्वेदनीति चतस्रः कथास्तासां कथनं धर्मोपदेशः। तं स्वाध्यायं कुर्वन्। 'पंचिंदियसंवुडो होदि' पंचेन्द्रियसंवृतो भवति। ननु पञ्चेन्द्रिय शब्दः निष्ठांतस्य पूर्वनिपातात्संवृतपंचेन्द्रिय इति भवितव्यम्? सत्यं। 'जातिकालसुखादिभ्यः परवचनम्' इत्यनेन बहुव्रीहौ पंचेन्द्रियस्वजातिवृत्तिरिति जातिवचन। ततो निष्ठांतं परतःप्रयुज्यते इति मन्यते। इन्द्रियमनेक-प्रकारं द्रव्येन्द्रियं भावेन्द्रियं इति। इह तु रूपाद्युपयोगा इन्द्रियशब्देनोच्यन्ते। तेनायमर्थः स्वाध्या[2]यं कुर्वन्निन्द्र-

---

समाधान—प्रत्येक वस्तुका जन्म स्वके भाव और परके अभाव, इन दोनोंके अधीन है। जैसे घट बड़े पेट आदि आकारवाला होता है, पटादिरूपसे उसका ग्रहण नहीं होता। यदि घटका पटरूपसे ग्रहण हो तो वह ज्ञान विपरीत कहलायेगा। इसी तरह यहाँ भी जो हितसे विलक्षण अहितको नहीं जानता वह उससे विलक्षण हितका भी ज्ञाता नहीं हो सकता। अतः जो हितको जानता है वह अहितको भी जानता है। इसलिए उसको अहितसे निवृत्ति उचित ही है ॥१०२॥

शिक्षा अशुभभावके संवरमें हेतु है, यह कहते हैं—

गा०—विनयसे युक्त होकर स्वाध्याय करता हुआ साधु पाँचों इन्द्रियोंके विषयोंसे संवृत और तीन गुप्तियोंसे गुप्त एकाग्रमन होता है ॥ १०३ ॥

टी०—वाचना, प्रश्न, अनुप्रेक्षा, आम्नाय और धर्मोपदेशके भेदसे स्वाध्यायके पाँच भेद हैं। उसके अर्थका कथन करने पूर्वक निर्दोष ग्रन्थके पढ़ानेको वाचना कहते हैं। सन्देहको दूर करनेके लिये अथवा निश्चितको दृढ करनेके लिये सूत्र और अर्थके विषयमे पूछना प्रश्न है। जाने हुए अर्थ-का चिन्तन करना अनुप्रेक्षा है। कण्ठस्थ करना आम्नाय है। कथाके चार प्रकार हैं—आक्षेपणी, विक्षेपणी, संवेजनी और निर्वेदनी। उनके करनेको धर्मोपदेश कहते हैं। उस स्वाध्यायको करने वाला पञ्चेन्द्रिय संवृत होता है।

शङ्का—बहुव्रीहि समासमे निष्ठान्तका पूर्वनिपात होनेसे 'संवृत पञ्चेन्द्रिय' होना चाहिये।

समाधान—आपका कथन सत्य है। 'जातिकाल सुखादिभ्य' परवचनम्' इस सूत्रसे पञ्चे-न्द्रिय शब्द पञ्चेन्द्रिय जातिवृत्ति होनेसे जातिवाचक है। इसलिये निष्ठान्तका प्रयोग पञ्चेन्द्रिय-के आगे किया है।

इन्द्रियके अनेक भेद हैं—द्रव्येन्द्रिय भावेन्द्रिय। किन्तु यहाँ इन्द्रियशब्दसे रूपादि विषयक

१. पृथुतलाद्या—अ०। पृथुलाद्या—आ०। २. यान्नि—आ० मु०।

रूपाद्युपयोगो भवति इति । रूपाद्युपयोगनिरोधे किं फलं ? रागाद्यप्रवृत्तिः । मनोज्ञामनोज्ञरूपाद्युपयोगाव-लंबनौ रागद्वेषौ । न ह्यनवबुध्यमानो विषयः स्वसत्तामात्रेण तौ करोति । सुप्तेऽन्यमनस्के वा रागादीनां विषयसन्निधावप्यदर्शनात् ।

"गदिमधिगदस्स देहो देहादो इंदियाणि जायंते ।
तेहिं दु विसयग्गहणं तत्तो रागो व दोसो वा ॥" [पञ्चास्ति० १२९]

इति वचनाच्च । कथं स्वाध्याये प्रवर्तमानः 'विणयेण समाहिदो' ज्ञानविनयेन समन्वितो भूत्वा यः स्वाध्यायं करोति 'तिगुत्तो य होदि' तिसृभिर्गुप्तिभिश्च भवति । मनसोऽप्रशस्तरागाद्यनवलेपात्, अनृतरूक्षपरुषकर्कशात्मस्तवपरदूषणादावव्यापृतेः, हिंसादौ शरीरेणाप्रवृत्तेश्च, "एयग्गमणो य होदि भिक्खू" इति पदघटना—एकमुखान्तःकरणश्च भवति भिक्षुः स्वाध्याये रतः । एतदुक्तं भवति—ध्याने प्रवृत्तिमप्यासादयतीति । न ह्यकृतश्रुतपरिचयस्य धर्मशुक्लध्याने भवितुमर्हतः । अपायोपायभवविपाकलोकविचयादयो धर्मध्यानभेदाः । अपायादिस्वरूपज्ञानं जिनवचनबलादेव 'शुक्ले चाद्ये पूर्वविदः' [त—सू० ९।३७] इत्यभिहितत्वाच्च ॥१०३॥

प्रत्यग्रसंवेगप्रभवक्रममाचष्टे—

जह जह सुदमोग्गाहदि अदिसयरसपसरमसुदपुव्वं तु ।
तह तह पल्हादिज्जदि नवनवसंवेगसड्ढाए ॥ १०४ ॥

उपयोग कहा गया है। अतः यह अर्थ होता है कि स्वाध्यायको करने वालेका रूपादि विषयक उपयोग रुक जाता है।

शङ्का—रूपादि विषयक उपयोगको रोकनेका क्या फल है ?

समाधान—रागादिकी प्रवृत्ति नहीं होती। राग द्वेष मनोज्ञ और अमनोज्ञ रूपादि विषयक उपयोगका आश्रय पाकर होते हैं। जिस विषयको जाना नहीं वह विषय केवल अपने अस्तित्वमात्रसे राग द्वेषको पैदा नहीं करता। क्योंकि सोते हुए या जिसका मन अन्य ओर है. उस मनुष्यमें विषयके पासमें होते हुए भी राग द्वेष नहीं देखे जाते। कहा है—'गतिमें जाने पर शरीर बनता है। शरीरसे इन्द्रियाँ बनती हैं। इन्द्रियोंसे विषयोंका ग्रहण होता है और उससे राग और द्वेष होते हैं। जो विनय वंक स्वाध्याय करता है वह पञ्चेन्द्रिय संवृत और तीन गुप्तियोंसे गुप्त होता है क्योंकि उसका मन अप्रशस्त रागादिके विकारसे रहित होता है, झूंठ, रूक्ष, कठोर, कर्कश, अपनी प्रशंसा, परनिन्दा आदि वचन नहीं बोलता, तथा शरीरके द्वारा हिंसा आदिमें प्रवृत्ति नहीं करता। तथा स्वाध्यायमें लीन साधु एकाग्रमन होता है। अर्थात् ध्यानमें भी प्रवृत्ति करता है। जिसका श्रुतसे परिचय नहीं है उसके धर्मध्यान शुक्लध्यान नहीं होते। अपायविचय, उपायविचय, विपाकविचय, लोकविचय आदि धर्मध्यानके भेद हैं। अपाय आदिके स्वरूपका ज्ञान जिनागमके बलसे ही होता है। कहा भी है—आदिके दो शुक्लध्यान और धर्मध्यान पूर्ववित् श्रुतकेवलीके होते हैं ॥ १०३ ॥

नवीन संवेगके उत्पन्न होनेका क्रम कहते हैं—

गा०—जैसे-जैसे अतिशय अभिधेयसे भरा, जिसे पहले कभी नहीं सुना ऐसे श्रुतको अवगाहन करता है, तैसे-तैसे नई नई धर्मश्रद्धासे आह्लाद युक्त होता है ॥ १०४ ॥

'**जह जह**' यथा यथा। '**सुदं**' श्रुतं '**ओग्गाहदि**' अवगाहते शब्दश्रुताभिधेयमधिगच्छतीति यावत्। '**अदिसयरसपसरं अतिशयरसप्रसरं**' समयांतरेषु अनुपलब्धोऽर्थोऽतिशयितो रसः। शब्दस्य हि रसोऽर्थः तस्य सारत्वात् आम्रफलादिरस इव। प्रसरशब्देन प्राचुर्यमतिशयितार्थस्य सूचयति। ततोऽयमर्थोऽस्य—अतिशयाभिधेयबहुलं श्रुतमिति। ननु प्रवादिनोऽपरेऽपि स्वसमयमेव प्रशंसन्ति। प्रत्यक्षेणानुमानेन च विरुद्धमर्थस्वरूपं केवलं नित्यत्वमनित्यतां वा निरूपयतामागमानां नातिशयार्थप्रसरता। प्रमाणांतरसंबाधागमार्थोऽतिशयितो भवति नापरः। '**असुदपुव्वं तु**' अश्रुतपूर्वमेव। ननु भव्यानामभव्याना च कर्णगोचरतामायात्येव श्रुतं किमुच्यतेऽश्रुतपूर्वमिति ? अथ श्रुताभिधेयापरिज्ञानाच्छब्दमात्रं श्रुतमप्यश्रुतं इति गृह्यते तदप्ययुक्तं, अर्थोपयोगस्यापि असकृत् ज्ञातत्वात्। अयमभिप्रायः श्रद्धानसहचारिबोधाभावाच्छ्रुतमप्यश्रुतमिति। '**तह तह पल्हादिज्जदि**' तथा तथा प्रल्हादमुपैति। '**नवनवसंवेगसड्ढाए**' प्रत्यग्रतरधर्मश्रद्धया। ननु च संसाराद्भीरुता संवेगः ततोऽयमर्थः स्यादसंबंधः न दोषः। संसारभीरुताहेतुको धर्मपरिणामः। आयुधनिपातभीरुताहेतुककवचग्रहणवत्। तेन संवेगशब्दः कार्ये धर्मे वर्तते ॥१०४॥

निष्कंपताख्यानायाह—

आयापायविदण्हू दंसणणाणतवसंजमे ठिच्चा।
विहरदि विसुज्झमाणो जावज्जीवं दु णिक्कंपो ॥१०५॥

टी०—जैसे-जैसे श्रुतका अवगाहन करता है अर्थात् शब्द रूप श्रुतके अर्थको जानता है। वह श्रुत 'अतिशयरस प्रसर' होना चाहिये। अन्य धर्मोंमें जो अर्थ नही पाया जाता उसे 'अतिशयरस' कहा है। क्योंकि शब्दका रस उसका अर्थ है वही उसका सार है। जैसे आम्रफलादिका रस। प्रसर शब्दसे अतिशयित अर्थकी बहुलता सूचित होती है। अतः 'अतिशयितरस प्रसर' का अर्थ है—अतिशय अभिधेयसे भरा हुआ श्रुत।

शङ्का—अन्य मतावलम्बी भी अपने सिद्धान्तकी प्रशंसा करते हैं ?

समाधान—प्रत्यक्ष और अनुमानसे विरुद्ध अर्थके स्वरूप केवल नित्यता या केवल अनित्यता का कथन करने वाले आगम अतिशय अर्थबहुल नहीं हैं। जिस आगमका अर्थ अन्य प्रमाणोंसे प्रमाणित होता है वही आगमार्थ अतिशयित होता है, अन्य नहीं। तथा वह अश्रुतपूर्व जो पहले नहीं सुना, होना चाहिये।

शङ्का—भव्य और अभव्य जीवोके कानोंमें श्रुत सुननेमे आता ही है तब आप अश्रुत पूर्व कैसे कहते हैं ? यदि श्रुतके अर्थका ज्ञान न होनेसे शब्दमात्र श्रुतको अश्रुत कहते हैं तो यह भी ठीक नहीं है क्योंकि अर्थके उपयोगका भी अनेक बार ज्ञान हो जाता है ?

समाधान—अभिप्राय यह है कि श्रद्धान पूर्वक ज्ञान न होनेसे श्रुत भी अश्रुत होता है। तो जैसे श्रुतका अवगाहन करता है वेसे वैसे नई नई धर्मश्रद्धासे युक्त होता है।

शङ्का—संसारसे भीरुताको संवेग कहते हैं। तब आपका अर्थ धर्म ठीक नही हैं।

समाधान—इसमे कोई दोष नही है। ससारसे भीरुता धर्म परिणामका कारण है। जैसे शस्त्रके आघातके भयसे कवच ग्रहण करते हैं इससे संवेग शब्द संवेगका कार्य जो धर्म है उसको कहता है ॥ १०४ ॥

आयापायविदण्हू वृद्धिहानिक्रमज्ञः । प्रवचनाभ्यासादेवं रत्नत्रयाभिवृद्धिः एवं तथा हानिरिति यो जानाति असौ । 'दंसणणाणतवसंजमे' श्रद्धाने, ज्ञाने, तपसि, संयमे वा । 'ठिच्चा' स्थित्वा । 'विहरदि' प्रवर्तते । 'विसुज्झमाणो' शुद्धिमुपयान् । 'जावज्जीवं' जीवितकालावधि । तु शब्दोऽन्ते नेयः । 'णिक्कंपो दु' विनिष्प्रकंपो निश्चल एवेति यावत् । निःशंकितत्वादिना दर्शनस्य वृद्धि', शंकादिना हानिः । अर्थव्यंजनतदुभयशुद्धया स्वाध्याये चोपयोगात् ज्ञानवृद्धिः । अनुपयोगादपूर्वार्थाग्रहणाच्च ज्ञानहानिः । यथा चोक्तम्—"पुव्वगहिदं पि णाणं [1]संकुडदिअणुवजोगिस्स" इति । तपसो द्वादशविधस्य वृद्धिः संयमभावनया वीर्याविनिगूहनात् ज्ञानोपयोगात् । हानि' पुनस्तद्विपर्ययादैहिककार्यासंगाद्वा । सम्यक् पापक्रियाभ्य उपरमः संयमः । पापक्रियाश्चाशुभमनोवाक्काययोगाः तेन चारित्रं संयमः । 'पापक्रियानिवृत्तिश्चारित्रं' इति वचनात् । तस्य संयमस्य वृद्धिः पंचविंशतिभावनाभिर्हानि तासां भावनानां अभावेन । श्रुताद्विना ज्ञानादीनां गुणदोषं वा न वेत्ति । [2]अनिर्ज्ञातगुणः कथं गुणानुपबृंहयेत्, अविदितदोषो वा तांस्त्यजेत् । तेन शिक्षायामादरः कार्यः ॥१०५॥

जिनवचनशिक्षा तपः इत्येतदुच्यते—

बारसविहम्मि य तवे सब्भंतरबाहिरे कुसलदिट्ठे ।
ण वि अत्थि ण वि य होहिदि सज्झायसमं तवो कम्मं ॥१०६॥

निष्कम्पताका कथन करते हैं—

गा०—वृद्धि और हानिके क्रमको जानने वाला श्रद्धान, ज्ञान, तप और संयममें स्थित होकर शुद्धिको प्राप्त होता हुआ जीवन पर्यन्त विहार करता है वह निश्चल ही है ॥ १०५ ॥

टी०—प्रवचनके अभ्याससे जो यह जानता है कि ऐसा करनेसे रत्नत्रयकी वृद्धि होती है और ऐसा करनेसे हानि होती है वह श्रद्धान, ज्ञान, तप, और संयममे स्थित होकर शुद्धिको प्राप्त करता हुआ जीवन पर्यन्त विहार करता है निष्कम्प अर्थात् निश्चल ही है ।

निःशंकित आदि गुणोंसे सम्यग्दर्शनकी वृद्धि होती है और शंका आदिसे हानि होती है । अर्थशुद्धि, व्यजनशुद्धि और उभयशुद्धिसे तथा स्वाध्यायमें उपयोग लगानेसे ज्ञानकी वृद्धि होती है । उपयोग न लगानेसे तथा नवीन अपूर्व अर्थको ग्रहण न करनेसे ज्ञानकी हानि होती है । कहा है—'पूर्वमें ग्रहण किया हुआ भी ज्ञान, जो उसमे उपयोग नही लगाता उसका घट जाता है ।' संयमकी भावनासे व अपनी शक्तिको न छिपाकर ज्ञानमे उपयोग लगानेसे बारह प्रकारके तपकी वृद्धि होती है । उससे विपरीत करनेसे और लौकिक कार्योंमे फँसे रहनेसे तपकी हानि होती है । पाप क्रियाओंसे सम्यक् रीतिसे विरत होनेको संयम कहते है । अशुभ मनोयोग, अशुभ वचन योग और अशुभकाय योग पापक्रिया है । अतः चारित्र संयम है । कहा भी है—'पाप क्रियाओंसे निवृत्ति चारित्र है ।' उस संयमकी वृद्धि पच्चीस भावनाओंसे होती है और उन भावनाओंके अभावसे संयमको हानि होती है । शास्त्राभ्यासके विना ज्ञान आदिके गुण अथवा दोषको नही जानता । जो गुणोंको नही जानता वह कैसे गुणोको बता सकता है । और जो दोषोंको नहीं जानता वह कैसे उन्हें छोड़ सकता है ? अतः शिक्षामें आदर करना चाहिये ॥ १०५ ॥

जिनवचनकी शिक्षा तप है, यह कहते हैं—

---

१. सकुडइविजु–मु० । २. अज्ञात–आ० मु० ।

'बारसविहम्मि य' द्वादशप्रकारे। 'तवे' तपसि। 'सब्भंतरबाहिरे' सहाभ्यन्तरबाह्याभ्यां वर्तते इति साभ्यंतरबाह्यं। बाह्यमभ्यंतरं वा तपो मुक्त्वा किमन्यत्तपो नाम यत्ताभ्यां सह वर्तते इत्युच्यते ? तपःसामान्यं विशेषैः सह वर्तते इत्युच्यते। अजाद्यंतत्वात् अभ्यर्हितत्वाच्च अभ्यन्तरशब्दस्य पूर्वनिपातोऽल्पस्वरादपि बाह्यशब्दात्। 'कुसलदिट्ठे' ससारः, संसारकारणं, बधो, बंधकारण, मोक्षस्तदुपायः इत्यत्र वस्तुनि ये कुशलाः सर्वविदस्तैरुपदिष्टे। 'सज्झायसमं' स्वाध्यायेन सदृशं। 'तवोकम्मं' तप.क्रिया। 'ण वि अत्थि' नैवास्ति। 'ण वि य' नैव। 'होहिदि' भविष्यति। नाप्यासीदिति कालत्रयेऽपि स्वाध्यायसदृशस्यान्यस्य तपसोऽभावः कथ्यते। अत्र चोद्यते—स्वाध्यायोऽपि तपो अनशनाद्यपि तपो बुद्धेरविशेषात् कर्मतपनसामर्थ्यस्याविशेषात्। किमुच्यते स्वाध्यायसदृशं तपो नेति ? कर्मनिर्जराहेतुत्वातिशयापेक्षया सदृशमन्यत्तपो नैवास्तीत्यभिप्रायः। तपो नाम किमात्मपरिणामो भवेत् न वा ? आत्मपरिणामत्वे कथं कस्यचिद्बाह्यता ? अनात्मपरिणामत्वे न निर्जरा कुर्यात् घटादिवदित्यत्रोच्यते—आत्मपरिणाम एव तपः। कथं तर्हि बाह्यता ? बाह्याः सद्धर्ममार्गाद्वे जनाः तैरप्यवगम्यत्वात् बाह्यमित्युच्यतेऽनशनादि बाह्यैर्वाचरणात्। सन्मार्गज्ञा अभ्यन्तराः। तदवगम्यत्वा[1]त्तैराचरितत्वाद्वा बाह्याभ्यन्तरमिति सूरेरभिप्रायः॥

गा०—सर्वज्ञके द्वारा उपदिष्ट अभ्यन्तर और बाह्यभेद सहित बारह प्रकारके तपमें स्वाध्यायके समान तपक्रिया नहीं है और न होगी ही ॥ १०६ ॥

टी०—शंका—बाह्य और अभ्यंतर तपको छोड़कर अन्य तप क्या है जो बाह्य अभ्यन्तर सहित बारह प्रकारका तप कहते हो ?

समाधान—सामान्य तप विशेषोंके साथ रहता है यह कहनेका अभिप्राय है। यद्यपि बाह्य शब्दमें अल्प स्वर हैं फिर भी अभ्यन्तर शब्दके आदिमें अच् होनेसे तथा पूज्य होनेसे अभ्यन्तर शब्दको प्रथम स्थान दिया है। संसार और संसारके कारण, बन्ध और बन्धके कारण तथा मोक्ष और उसके उपाय इन वस्तुओंमें जो कुशल सर्वज्ञ हैं उनके द्वारा उपदिष्ट तपोंमें स्वाध्यायके समान तप न है, न होगा और न था, इस प्रकार तीनों कालोमें स्वाध्यायके समान अन्य तपका अभाव कहा है।

शंका- स्वाध्याय भी तप है और अनशन आदि भी तप है। दोनोंमें ही कर्मको तपनेकी शक्ति समान है। फिर कैसे कहते है कि स्वाध्यायके समान तप नहीं है ?

समाधान—कर्मोकी निर्जरामें हेतु जितना स्वाध्याय है उतना अन्य तप नहीं है इस अपेक्षासे उक्त कथन किया है।

शंका—तप, क्या आत्माका परिणाम है अथवा नहीं है ? यदि आत्माका परिणाम तप है तो वह कैसे हुआ ? यदि तप आत्माका परिणाम नही है तो वह कर्मोकी निर्जरा नहीं कर सकता जैसे घट।

समाधान—आत्माका परिणाम ही तप है। तब आप कहेंगे कि वह बाह्य कैसे है ? समीचीन धर्ममार्गसे जो लोग बाह्य हैं वे भी उन्हे जानते हैं इसलिए अनशन आदिको बाह्य तप कहा है, क्योंकि बाह्य लोग भी उन्हे करते हैं। जो सन्मार्गको जानते हैं वे अभ्यन्तर हैं। उनके द्वारा ज्ञात होनेसे अथवा उनके द्वारा पालन किये जानेसे अभ्यन्तर कहे जाते हैं। इस प्रकार तप

---

१. त्वात् घटादिवत्तै–आ० मु०।

प्रतिज्ञामात्रेण स्वाध्यायस्यान्यतपोभ्योऽतिशयितता न सिद्धयतीति मन्यमान प्रति अतिशयसाधनायाह—

जं अण्णाणी कम्मं खवेदि भवसयसहस्सकोडीहिं ।
तं णाणी तिहिं गुत्तो खवेदि अंतोमुहुत्तेण ॥१०७॥
छट्ठट्ठमदसमदुवालसेहिं अण्णाणियस्स जा सोही ।
तत्तो बहुगुणदरिया होज्ज हु जिमिदस्स णाणिस्स ॥१०८॥

'जं' यत् । 'अण्णाणी' सम्यग्ज्ञानरहितः । 'कम्मं' कर्म । 'खवेदि' क्षपयति । 'भवसयसहस्सकोडीहिं' भवशतसहस्रकोटिभिः । 'तं' तत् कर्म । 'णाणी' सम्यग्ज्ञानवान् । 'तिहिं गुत्तो' त्रिगुप्तियुक्तः । 'खवेदि' क्षपयति । 'अंतोमुहुत्तेण' अन्तर्मुहूर्तमात्रेण । झटिति कर्मशातनसामर्थ्यं तपसोऽन्यस्य न विद्यते इत्ययमतिशय स्वाध्यायस्य ॥१०७॥

स्वाध्याये उद्यतो गुप्तिभावनाया प्रवृत्तो भवति । तत्र च वृत्तस्य रत्नत्रयाराधनं सुखेन भवति इत्युत्तरगाथया कथ्यते—

सज्झायभावणाए य भाविदा होंति सव्वगुत्तीओ ।
गुत्तीहिं भाविदाहिं य मरणे आराधओ होदि ॥१०९॥

मनोवाक्कायव्यापारा. कर्मादानहेतव. सर्व एव व्यावर्तते स्वाध्याये सति, ततो भाविता भवन्ति गुप्तयः । कृताभिमतादियोगत्रयनिरोधश्च रत्नत्रय एव घटते इति सुखसाध्यता । अनतकालाभ्यस्ताशुभ-

---

बाह्य और अभ्यन्तर कहे गये है ऐसा आचार्यका अभिप्राय है ॥१०६॥

जो कहता है कि केवल कहने मात्रसे स्वाध्यायकी अन्य तपोंसे श्रेष्ठता सिद्ध नही हो सकती, उसके प्रति श्रेष्ठता सिद्ध करते हैं—

गा०—सम्यग्ज्ञानसे रहित अज्ञानी जिस कर्मको लाख करोड़ भवोंमें नष्ट करता है, उस कर्मको सम्यग्ज्ञानी तीन गुप्तियोंसे युक्त हुआ अन्तर्मुहूर्तमात्रमें क्षय करता है ॥१०७॥

गा०—अज्ञानीके दो, तीन, चार, पाँच आदि उपवास करनेसे जितनी विशुद्धि होती है उससे बहुत गुणी शुद्धि जीमते हुए ज्ञानीके होती है ॥१०८॥

टी०—इतनी शीघ्रतासे कर्मोंको काटनेकी शक्ति अन्य तपमें नहीं है, यह स्वाध्यायका अतिशय है ॥१०८॥

जो स्वाध्यायमें तत्पर होता है वह गुप्ति भावनामें प्रवृत्त होता है । और जो गुप्ति भावनामें प्रवृत्त होता है वह रत्नत्रयकी आराधना सुख पूर्वक करता है वह आगेकी गाथासे कहते है—

गा०—स्वाध्याय भावनासे सब गुप्तियाँ भावित होती है । और गुप्तियोंकी भावनासे मरते समय रत्नत्रय रूप परिणामोंकी आराधनामें तत्पर होता है ॥१०९॥

टी०—स्वाध्याय करनेपर मन वचन कायके सब ही व्यापार, जो कर्मोंके लानेमें कारण हैं रुके जाते हैं । ऐसा होनेसे गुप्तियाँ भावित होती हैं । और तीनों योगोका निरोध करने वाला मुनि रत्नत्रयमें ही रमता है । अतः रत्नत्रय सुख पूर्वक साध्य होता है, इसका भाव यह है कि

योगत्रयस्य कर्मोदयसहायस्य व्यावर्तनमतिदुष्करं स्वाध्यायभावनैव क्षमा कर्तुमिति भाव. । 'सज्झायभावणाए य' स्वाध्यायभावनया वा । 'भाविदा' भाविताः । 'होंति' भवन्ति । 'सव्वगुत्तीओ' सर्वगुप्तयः । 'गुत्तीहिं' गुप्तिभिः । 'भाविदाहिं' भाविताभिः । 'मरणे' मरणकाले । 'आराधगो' रत्नत्रयपरिणामाराधनपरः । 'होदि' भवति । स्वाध्यायभावनारतः परस्योपदेशको भवन् इतरोऽज्ञ. कमुपकारं परस्य सपादयेदभव्यस्य ।१०९ ॥

परस्योपदेशकत्वे किमस्यायातमित्यत्राह—

आदपरसमुद्धारो आणा वच्छल्लदीवणा भत्ती ।
होदि परदेसगत्ते अव्वोच्छित्ती य तित्थस्स ॥११०॥

'आदपरसमुद्धारो' आत्मनः परस्य वा उद्धरणमुद्दिश्य व्यापृतः स्वाध्याये स्वकर्माण्यपि साधयति परेषामप्युपयुक्तानां । 'आणा' "श्रेयोर्थिना हि जिनशासनवत्सलेन कर्तव्य एव नियमेन हितोपदेशः" (वरांगच० १।१३।) इत्याज्ञा सर्वविदा, सा परिपालिता भवतीति शेष. । 'वच्छल्लदीवणा' वात्सल्यप्रभावना परेषामुपदेशकत्वे कृता भवति । 'भत्ती' भक्तिश्च कृता भवति जिनवचने तदभ्यासात् । 'होदि' भवति । 'परदेसगत्ते' परेषामुपदेष्टृकत्वे सति । 'अव्वोच्छित्ती य' अव्युच्छित्तिश्च । 'तित्थस्स' तिसु चिट्ठदित्ति तित्थं मोक्षमार्गः श्रुतं वां । श्रुतमपि रत्नत्रयनिरूपणे व्यापृतत्वात् तत्रस्थ भवति । ततोऽय अर्थः—श्रुतस्य मोक्षमार्गस्य वा अव्युच्छित्तिरिति ॥ ११०॥ सिक्खा गदा ॥

लिंगग्रहणानंतरं ज्ञानसंपत्तिः कार्या, ज्ञानसपदि वर्तमानेन विनयोऽनुष्ठातव्य । स च पंचप्रकार इत्याह—

विणओ पुण पंचविहो णिद्दिट्ठो णाणदंसणचरित्ते ।
तवविणओ य चउत्थो चरिमो उवयारिओ विणओ ॥१११॥

अनन्तकालसे जिन तीन अशुभयोगोंका इस जीवने अभ्यास किया हुआ है और कर्मका उदय जिसका सहायक है उससे अलग होना अत्यन्त कठिन है । स्वाध्यायकी भावना ही इसे करनेमें समर्थ है ॥१०९॥

जो स्वाध्यायकी भावनामे लीन रहता है वह दूसरोंको भी उपदेश करता है किन्तु जो स्वयं अज्ञानी है वह किसी अन्य भव्यका भी क्या उपकार कर सकता है ? ऐसी स्थितिमें परको उपदेश देनेपर इसे क्या लाभ है, यह कहते है—

गा०—टी०-अपने और दूसरोके उद्धारके उद्देशसे जो स्वाध्यायमें लगता है वह अपने भी कर्मोंको काटता है और उसमें उपयुक्त दूसरोंके भी कर्मोंको काटता है । सर्वज्ञ भगवानकी जो आज्ञा है कि कल्याणके इच्छुक जिन शासनके प्रेमीको नियमसे धर्मोपदेश करना चाहिये, उसका भी पालन होता है । दूसरोंको उपदेश करने पर वात्सल्य और प्रभावना होती है । जिन वचनके अभ्याससे जिन वचनमें भक्ति प्रदर्शित होती है । दूसरोंको उपदेश करनेपर मोक्षमार्ग अथवा श्रुतरूप तीर्थकी अव्युच्छित्ती—परम्पराका अविनाश होता है । श्रुत भी रत्नत्रयके कथनमें संलग्न होनेसे तीर्थ है । अतः स्वाध्याय पूर्वक परोपदेश करनेसे श्रुत और मोक्षमार्गका विच्छेद नहीं होता । वे सदा प्रवर्तित रहते हैं ॥११०॥

लिंग स्वीकार करनेके पश्चात् ज्ञानरूप सम्पदाका संचय करना चाहिये । और ज्ञान सम्पदाका संचय करते हुए विनय करनी चाहिये । उसके पाँच भेद हैं—उन्हें कहते हैं—

विनयत्यपनयति यत्कर्माशुभं तद्विनयः । तथा चोक्तं—"जह्मा विणेदि कम्मं अट्ठविहं चाउरंग मोक्खो य" (मूलाचार ७।८१) इति । 'पुण' पश्चात् जिनवचनाभ्यासोत्तरकालं । 'पंचविहो' पंचप्रकारः । 'णिद्दिट्ठो' निर्दिष्टः । 'णाणदंसणचरित्ते' विषयलक्षणेयं सप्तमी । ज्ञानदर्शनचारित्रविषयः ।। 'तवविणओ य' तपसि विनयश्च ।। 'चउत्थो' चतुर्थः । 'चरमो' अन्त्यः ।। 'उवयारिओ विणयो' उपचारविनयश्चेति ।।

ज्ञानविनयभेदानाचष्टे—

काले विणये उवधाणे बहुमाणे तहेव णिण्हवणे ।
वंजण अत्थ तदुभये विणओ णाणम्मि अठ्ठविहो ।।११२।।

[1]'काले' स्वाध्यायवाचनकालाविह कालशब्देन गृह्येते । अन्यथा कालमन्तरेण कस्यचिदपि वृत्त्यभावात् कालग्रहणमनर्थकं स्यात् । भवतु नाम कालविशेषः कालशब्दवाच्यः तथापि नासौ विनयो न कर्म व्यपनयतीति, यदि व्यपनयेत्सर्वस्याकर्मता प्राप्नुयात् । 'काले' इति सप्तम्यंत पदं । तेन वाक्यशेषपुरस्सरोऽयं सूत्रार्थो जायते । साध्याहारत्वात् सर्वं सूत्राणां । काले अध्ययनमिति । परिवर्जनीयत्वेन निर्दिष्टं कालं संध्यापर्व-दिग्दाहोल्कापातादिकं परिहृत्याध्ययनं कर्म विनयति इति विणए इति प्रथमान्तः । विनयः श्रुतश्रुतधर-माहात्म्यस्तवनं श्रुतश्रुतधरभक्तिरिति यावत् ।

गा०—जिनवचनके अभ्यासके पश्चात् विनय पाँच प्रकारकी कही है । ज्ञानविनय दर्शन-विनय चारित्रविनय और चतुर्थ तपविनय और अन्तिम उपचार विनय है ।।१११।।

टी०—'विनयति' जो अशुभ कर्मको दूर करती है वह विनय है । कहा है—यतः आठ प्रकारके कर्मोंको दूर करती है अतः विनय है ।।१११।।

ज्ञान विनयके भेदोंको कहते हैं—

गा०—काल, विनय, उपधान, बहुमान, तथा निह्नव, व्यंजनशुद्धि, अर्थशुद्धि, उभयशुद्धि ये ज्ञानके विषयमें आठ प्रकारकी विनय है ।।११२।।

टी०—यहाँ काल शब्दसे स्वाध्यायकाल और वाचन काल ग्रहण किये जाते हैं । अन्यथा कालके बिना किसीका भी अस्तित्व संभव न होनेसे कालका ग्रहण व्यर्थ हो जायेगा ।

शंका—काल शब्दका वाच्य काल विशेष रहो । किन्तु काल विनय नहीं है क्योंकि काल कर्मको नष्ट नहीं करता । यदि करे तो सब ही जीव कर्म रहित हो जायेंगे ?

समाधान—'काले' यह सप्तमी विभक्तिसे युक्त पद है अतः इसके साथमें शेष वाक्य जोड़नेसे सूत्रार्थ होता है; क्योंकि सभी सूत्र अध्याहार सहित होते हैं । उनमें ऊपरसे कुछ वाक्य जोड़ना होता है । अतः 'कालमें अध्ययन' यह उसका अर्थ होता है । सन्ध्या, पर्व, किसी, दिशामें आग लगना, उल्कापात आदि जो काल छोड़ने योग्य कहे हैं उन कालोंको छोड़कर किया गया अध्ययन कर्मको नष्ट करता है । 'विणए' यह प्रथमान्त शब्द है । श्रुत और श्रुतके धारकोंके माहात्म्यका स्तवन अर्थात् श्रुत और श्रुतके धारकोंकी भक्ति विनय है ।

---

१ 'काले·······प्राप्नुयात्' इत्येतद् प्रतिषु उत्थानिकारूपेण लिखितम् ।

'उवहाणे' अवग्रहः । यावदिदमनुयोगद्वारं निष्ठामुपैति तावदिदं मया न भोक्तव्यं, इदं अनशनं चतुर्थषष्ठादिकं करिष्यामीति संकल्पः । स च कर्म अपनयतीति विनयः ।

'बहुमाणे' सन्मानं । शुचेः कृतांजलिपुटस्य अनाक्षिप्तमनसः सादरमध्ययनं । 'तह' तथा ।

'अणिण्हवणे' अनिह्नवश्च निह्नवोऽपलापः । कस्यचित्सकाशे श्रुतमधीत्यान्यो गुरुरित्यभिधानमपलापः । 'वंजण अत्थ तदुभये' व्यंजनं शब्दप्रकाशनं, अर्थः शब्दवाच्यः, तदुभयशब्देन व्यंजनमर्थश्च निर्दिश्यते । वंजण अत्थतदुभये व्यंजनं च अर्थश्च तदुभयं चेति द्वंद्वे कृते सर्वो द्वंद्वो विभाषया एकवद् भवतीति एकवद्भावार्थस्य एकवचनं कृतं । अर्थशब्दस्य अजाद्यदंतत्वादल्पाच्तरत्वाच्च पूर्वनिपातप्रसंग इति चेन्न, सर्वतोऽभ्यर्हितं पूर्वं निपततीति इति व्यंजनशब्दः पूर्वं प्रयुज्यते । कथमभ्यर्हितं ? स्वयं परप्रत्ययहेतुत्वात्स्वयं च शब्दश्रुतादेवार्थयाथात्म्यमवैति परं चावबोधयति । अत्र च 'वंजणअत्थतदुभये सुद्धी' इति शेषः ।

तत्र व्यंजनशुद्धिर्नाम यथा गणधरादिभिर्द्वात्रिंशद्दोषवर्जितानि सूत्राणि कृतानि तेषां तथैव पाठः । शब्दश्रुतस्यापि व्यज्यते ज्ञायते अनेनेति विग्रहे ज्ञानशब्देन गृहीतत्वात् तन्मूलं हि श्रुतज्ञानं ।

उपधानका अर्थ अवग्रह है । जब तक आगमका यह अनुयोगद्वार समाप्त नहीं होता तब तक मैं अमुक वस्तु नहीं खाऊँगा । या यह अनशन या चतुर्थ अथवा षष्ठम उपवास करूँगा इस प्रकारका संकल्प अवग्रह है । वह भी कर्मको दूर करता है अतः विनय है ।

बहुमाणका अर्थ सन्मान है । पवित्र हो, दोनो हाथ जोड़ और मनको निश्चल करके सादर अध्ययन बहुमान है ।

निह्नव अपलापको कहते हैं । किसीके पासमें अध्ययन करके उससे अन्यको गुरु कहना है अपलाप है ।

व्यंजन शब्दके प्रकाशनको कहते हैं । शब्दके वाच्यको अर्थ कहते हैं । 'तदुभय शब्दसे व्यंजन और अर्थ कहे जाते हैं । 'व्यंजन और अर्थ और तदुभय' इस प्रकार द्वन्द्व समास करनेपर सब द्वन्द्वोंमें विकल्पसे एकवद्भाव होता है इसलिये एक वचन किया है ।

शंका—अर्थ शब्दके आदिमें अच् होनेसे और अल्प अच्वाला होनेसे पूर्व निपातका अर्थात् प्रथम रखनेका प्रसंग आता है ?

समाधान—नहीं, क्योंकि जो सबसे पूज्य होता है वह प्रथम रखा जाता है इसलिये व्यंजन शब्दका प्रयोग पहले किया है ।

शंका—व्यंजन सबसे पूज्य क्यों है ?

समाधान—व्यंजन अर्थात् शब्द स्वयं दूसरोंको ज्ञान करानेमें हेतु है, और स्वयं शब्द श्रुतसे ही वस्तुके यथार्थ स्वरूपको जानता है तथा दूसरोंको ज्ञान कराता है।

यहाँ व्यंजन अर्थ और तदुभयके साथ शुद्धि शब्द लगाना चाहिये । गणधर आदिने जैसे बत्तीस दोषोंसे रहित सूत्र रचे हैं उनका वैसा ही पाठ व्यंजन शुद्धि है । 'व्यज्यते' अर्थात् जिसके द्वारा जाना जाता है ऐसा विग्रह करनेपर ज्ञान शब्दसे शब्दश्रुतका भी ग्रहण होता है क्योंकि श्रुतज्ञानका मूल शब्द है ।

अथ अर्थशब्देन किमुच्यते ? व्यंजनशब्दस्य[1] सांनिध्यादर्थशब्दः शब्दाभिधेये वर्तते, तेन सूत्रार्थोऽर्थ इति गृह्यते। तस्य का शुद्धिः ? [2]अविपरीतरूपेण सूत्रार्थनिरूपणायां अर्थाधारत्वान्निरूपणाया अवैपरीत्यस्य अर्थशुद्धिरित्युच्यते। सूत्रार्थनिरूपणायाः शब्दश्रुतत्वादविपरीतनिरूपणापि व्यंजनशुद्धिरेव भवतीति नार्थशुद्धिः कदाचिदिति चेत्, न परकृतं शब्दश्रुता[3]विपरीतपाठे। व्यंजनशुद्धिस्तदर्थनिरूपणाया अवैपरीत्यं अर्थशुद्धिः। ज्ञानश्रुते तु अर्थयाथात्म्यप्रतिभासोऽर्थशुद्धिः॥

तदुभयशुद्धिर्नाम तस्य व्यंजनस्य अर्थस्य च शुद्धिः।

ननु व्यंजनार्थशुद्ध्योः प्रतिपादितयोः तदुभयशुद्धिर्गृहीता न तद्व्यतिरेकेण तदुभयशुद्धिर्नामास्ति ततः कथमष्टविधता ? अत्रोच्यते-पुरुषभेदापेक्षयेयं निरूपणा—

कश्चिदविपरीतं सूत्रार्थं व्याचष्टे सूत्रं तु विपरीतं पठति। तत्तथा न कार्यमिति व्यंजनशुद्धिरुक्ता। अन्यस्तु सूत्रमविपरीतं पठन्नपि निरूपयत्यन्यथा सूत्रार्थं इति तन्निराकृतयेऽर्थशुद्धिरुदाहृता। अपरस्तु सूत्रं विपरीतमधीते सूत्रार्थं च कथयितुकामो विपरीतं व्याचष्टे तदुभयापाकृतये उभयशुद्धिरुपन्यस्ता। अयमष्टप्रकारो ज्ञानाभासपरिकरोऽष्टविधं कर्म विनयति व्यपनयति विनयशब्दवाच्यो भवतीति सूरेरभिप्रायः॥११२॥

व्यंजन शब्दकी समीपतासे अर्थशब्द शब्दके वाच्यको कहता है अतः अर्थसे सूत्रार्थका ग्रहण होता है। अविपरीत रूपसे सूत्रके अर्थकी निरूपणामें निरूपणाका आधार अर्थ होता है। अतः निरूपणाकी अविपरीतताको अर्थ शुद्धि कहते हैं अर्थात् सूत्रके अर्थका यथार्थ कथन अर्थ शुद्धि है।

शंका—सूत्रके अर्थकी निरूपणा शब्दश्रुत रूप होती है अतः अविपरीत निरूपणा भी व्यंजन शुद्धि ही हुई, अर्थ शुद्धि कभी भी नहीं है ?

समाधान—नहीं, क्योंकि दूसरेके द्वारा किया गया शब्दश्रुतका अविपरीत पाठ व्यंजन शुद्धि है। और उसके अर्थका अविपरीत निरूपण अर्थ शुद्धि है। किन्तु ज्ञानरूप श्रुतमें अर्थका ठीक-ठीक ज्ञान अर्थ शुद्धि है। व्यंजन और अर्थकी शुद्धिको तदुभय शुद्धि कहते हैं।

शंका—व्यंजन शुद्धि और अर्थशुद्धिके कहनेपर तदुभय शुद्धि आ जाती है क्योंकि उन दोनों शुद्धियोंके बिना तदुभय शुद्धि नहीं होती। तब आठ भेद कैसे रहे ?

समाधान—यह निरूपणा पुरुष भेदकी अपेक्षासे है। कोई व्यक्ति सूत्रका अर्थ तो ठीक कहता है किन्तु सूत्रको विपरीत पढ़ता है। ऐसा नहीं करना चाहिये इसके लिए व्यंजन शुद्धि कही है। दूसरा व्यक्ति सूत्र तो ठीक पढ़ता है किन्तु सूत्रका अर्थ अन्यथा कहता है उसके निराकरणके लिये अर्थ शुद्धि कही। तीसरा व्यक्ति सूत्रको ठीक नहीं पढ़ता और सूत्रका अर्थ भी विपरीत करता है। इन दोनोंको दूर करनेके लिये उभय शुद्धि कही है। यह आठ प्रकारका ज्ञानाभ्यासका परिकर आठ प्रकारके कर्मोंका विनयन करता है उन्हें दूर करता है इसलिये उसे विनय शब्दसे कहते हैं यह आचार्यका अभिप्राय है॥११२॥

---

१. कस्य सां—आ० मु०। २. विपरीत—आ० मु०। ३. श्रुतवि०—अ०।

दर्शनविनयसूचनपरोत्तरगाथा—

उवगूहणादिया[1] पुव्वुत्ता तह भत्तिया[2]दिया य गुणा।
संकादिवज्जणं पि णेओ सम्मत्तविणओ सो ॥११३॥

उवगूहणादिया उपबृंहणादिकाः। उपबृंहणं, स्थितिकरणं, वात्सल्यं, प्रभावना चेत्येते। 'पुव्वुत्ता' पूर्वाचार्यैरुक्ताः पूर्वोक्ताः। अस्मात् सूत्रात्पूर्वेण च सूत्रेण "उवगूहणठिदिकरणं वच्छल्लपभावणा भणिदा" इत्यनेनोक्ताः पूर्वमुक्ताः। पूर्वोक्तो वा सम्मत्तविणओ सम्यक्त्वविनय इति सबध्नीयं। 'तह भत्तियादिया य गुणा' तथा भक्त्यादिकाश्च गुणाः विनयस्तथा ते तत्प्रकारेण अवस्थिताः इति। अर्हदादिविषया भक्त्यादिगुणा इति यावत्। 'संकादिवज्जणं पि य' शंकादिवर्जनं च। चशब्दः पादपूरणः। 'णेओ' ज्ञेयः॥ 'सम्मत्तविणओ' सम्यक्त्वविनय इति॥ उपबृंहणादीनां भक्त्यादीनां च गुणानां बहुत्वात् तेषामेव च विनयत्वात् सम्मत्तविणया इति वाच्यमिति चेत्, विनयसामान्यापेक्षया तस्यैकत्वादेकवचनेन पदसंस्कारः कृतो न निवर्तते। न च पदांतर-वाच्यापेक्षया बहुत्वमस्तीत्येतावता अप्रातिपदिकात् सुबुत्पद्यते। तथा च प्रयोगः वृक्षा वनमिति ॥११३॥

चारित्रविनयनिरूपणापरा गाथा—

इंदियकसायपणिधाणं पि य गुत्तीओ चेव समिदीओ।
एसो चरित्तविणओ समासदो होइ णायव्वो ॥११४॥

आगे दर्शनविनयका कथन करते हैं—

गा०—पूर्वोक्त उपगूहण या उपवृंहण आदि तथा भक्ति आदि गुण, शंका आदिका त्याग यह सम्यक्त्वविनय जानो ॥११३॥

टी०—पूर्वोक्त अर्थात् पूर्वाचार्योंके द्वारा कहे गये, या इससे पहलेके गाथा सूत्र 'उवगूहण ट्ठिदिकरणं वच्छल्ल पभावणा भणिदा' के द्वारा कहे गये उपवृंहण, स्थितिकरण, वात्सल्य और प्रभावना ये गुण सम्यक्त्वविनय है। तथा अर्हन्त आदि विषयक भक्ति आदि गुण सम्यक्त्वविनय है और शंका आदि दोषोका त्याग सम्यक्त्व विनय है।

शंका—उपवृंहण आदि और भक्ति आदि गुण बहुत हैं और वे गुण ही सम्यक्त्वकी विनय रूप है। इस लियें गाथामें 'सम्मत्तविणया' इस प्रकार बहुवचनका प्रयोग करना चाहिये ?

समाधान—विनय सामान्यकी अपेक्षा सम्यक्त्व विनय एक है अतः एक वचन पदका प्रयोग किया है। विनय पदके वाच्य बहुत होनेसे बहुपना संभव नहीं है क्योंकि 'वृक्षा वनम्' ऐसा प्रयोग होता है अर्थात् वृक्ष बहुत होनेसे 'वन' में बहुवचनका प्रयोग जैसे नही हुआ वैसे ही यहाँ भी जानना ॥११३॥

अब चारित्र विनयका कथन करते है—

गा०—इन्द्रिय और कषायरूपसे आत्माकी परिणति न होना, और गुप्तियाँ और समितियां, यह संक्षेपसे चारित्र विनय ज्ञातव्य है ॥११४॥

---

१ णमादीया अ०। २. भत्तियादि गुणा अ०।

इंदियकसायपणिधाणं पि य । इंद्र आत्मा तस्य लिङ्गमिन्द्रियं । यत्करणं तत्कर्तृमद्यथा—परशुः । करणं च चक्षुरादिकं । तेनास्य कर्त्रा केनचिद्भाव्यमिति । तच्च द्विविधं द्रव्येंद्रियं भावेन्द्रियमिति । तत्र द्रव्येन्द्रियं नाम निर्वृत्त्युपकरणे । मसूरिकादिसंस्थानो यः शरीरावयवः कर्मणा निर्वर्त्यते इति निर्वृतिः । उपक्रियतेऽनुगृह्यते ज्ञानसाधनमिन्द्रियमनेनेत्युपकरणं अक्षिपत्रशुक्लकृष्णतारकादिकं । भावेंद्रियं नाम ज्ञानावरणक्षयोपशमविशेषोपलब्धिः, द्रव्येंद्रियनिमित्तरूपाद्युपलब्धिश्च । इह इंद्रियशब्देन मनोज्ञामनोज्ञरूपादिसांन्निध्ये रागकोपानुगरूपादिनिर्भासाः प्रतीतयो गृहीताः ।

[1]कषयंति हिंसंति आत्मक्षेत्रमिति कषायाः । अथवा तरूणां [2]वल्कलरसः कषायः, कषाय इव कषाय इत्युपमाद्वारेण क्रोधादौ वर्तते कषायशब्द उपमार्थः । यथा कषायो वस्त्रादेः शौक्ल्यशुद्धिमपनयति, निराकर्तुं चाशक्यस्तद्वदात्मनो ज्ञानदर्शनशुद्धिं विनाशयति, आत्मावलग्नश्च दुःखेनापोह्यते इति । यथा वा पटादेः स्थैर्यं करोति कषायस्तद्वदेव कर्मणां स्थितिप्रकर्षमात्मनि निदधाति क्रोधादिः । इन्द्रियाणि च कषायाश्च इन्द्रियकषायाः । इन्द्रियकषाययोः अप्रणिधानं अनाक्षेपः आत्मनो व्यावर्णितेंद्रियकषायापरिणतिः । 'गुत्ती ओ चेव' गुप्तयश्च । संसारकारणादात्मनो गोपनं गुप्तिः ।

संसारस्य द्रव्यक्षेत्रकालभावभवपरिवर्तनस्य कारणं कर्म ज्ञानावरणादि । तस्मात्संसारकारणादात्मनो

टी०—इन्द्र आत्माको कहते हैं। उसका लिंग इन्द्रिय है। जो करण होता है वह कर्तावाला है जैसे परशु। चक्षु आदि करण है। अतः उनका कोई कर्ता होना चाहिये। वह इन्द्रिय दो प्रकार की है—भावेन्द्रिय और द्रव्येन्द्रिय। उनमेंसे निर्वृत्ति और उपकरण द्रव्येन्द्रिय है। कर्मकेद्वारा जो मसूर आदिके आकाररूप शरीरका अवयव रचा जाता है वह निर्वृत्ति है। और जिसके द्वारा ज्ञानकी साधन इन्द्रिय उपकृत होती है वह उपकरण है। जैसे आँखके पलक, आँखकी काली सफेद तारिका। ज्ञानावरणके क्षयोपशम विशेषकी प्राप्तिको भावेन्द्रिय कहते हैं। और द्रव्येन्द्रियके निमित्तसे जो रूपादिका बोध होता है वह भी भावेन्द्रिय है। यहाँ इन्द्रिय शब्दसे मनोज्ञ और अमनोज्ञ रूपादिके प्राप्त होनेपर जो राग और कोपको लिये हुए रूपादिकी प्रतीति होती है उनको ग्रहण किया है।

जो 'कषयन्ति' आत्माका घात करती है वे कषाय है। अथवा वृक्षोंकी छालके रसको कषाय कहते हैं। कषायके समान जो है वह कषाय है। इस उपमाके द्वारा क्रोधादिको कषाय शब्दसे कहते है। यह उपमा रूप अर्थ है। जैसे कषाय—वृक्षकी छालका रस यदि वस्त्रपर लग जाता है तो उसकी सफेदीको हर लेता है और उसे दूर करना अशक्य होता है। उसी तरह क्रोधादि आत्माकी ज्ञान दर्शन रूप शुद्धिको नष्ट कर देता है। और आत्मासे सम्बद्ध होनेपर बड़े कष्टसे छूटता है। तथा जैसे कषाय वस्त्रादिको टिकाऊ करती है वैसे ही क्रोधादि आत्मामें कर्मों की स्थितिको बढ़ाते हैं। इन इन्द्रिय और कषायमें अप्रणिधान अर्थात् आत्माका कहे गये इन्द्रिय और कषाय रूपसे परिणत न होना चारित्र विनय है।

संसारके कारणोसे आत्माके गोपनको गुप्ति कहते हैं। द्रव्य परिवर्तन, क्षेत्र परिवर्तन, काल परिवर्तन भाव परिवर्तन और भव परिवर्तन रूप संसारके कारण ज्ञानावरण आदि कर्म हैं।

---

१. का [illegible] मु० । २. वाल्क—आ० मु० ।

गोपनं रक्षा गुप्तिरित्याख्यायते । भावे क्तिः, अपादानसाधनो वा, यतो गोपनं सा गुप्तिः । गोपयतीति कर्तृसाधनो वा क्तिन् । शब्दार्थव्यवस्थेयम् । किं स्वरूपं तस्या इति चेत् । सम्यग्योगनिग्रहो गुप्तिः । कायवाङ्मनःकर्मणां प्राकाम्याभावो निग्रहः, यथेष्टचारिताभावो गुप्तिः । सम्यगिति विशेषणात्पूजापुरस्सरां क्रियां संयतो महानयमिति यशस्त्वानपेक्ष्य पारलौकिकमिन्द्रियसुखं वा क्रियमाणा गुप्तिरिति कथ्यते । इति सूरयो व्यवस्थिताः । रागकोपाद्या अनुपप्लुता नोइंद्रियमतिः मनोगुप्तिरिति ब्रूमहे । एवं चायं वक्ष्यति सूत्रकारो 'जा रागादिणियत्ती मणस्स जाणाहि त मणोगुत्ति' मिति । अनृतपरुषकर्कशमिथ्यात्वासंयमनिमित्तवचनानां अवक्तृता वाग्गुप्तिः । अप्रमत्ततया यदप्रत्यवेक्षिताप्रमार्जितभूभागेऽचंक्रमणं, द्रव्यांतरादाननिक्षेपशयनासनक्रियाणां अकरणं कायगुप्तिः कायोत्सर्गो वा ।

'समिदीओ' समितयः । प्राणिपीडापरिहारादरवतः सम्यगयनं प्रवृत्तिः समितिः । सम्यग्विशेषणात् जीवनिकायस्वरूपज्ञानश्रद्धानपुरस्सरा प्रवृत्तिर्गृहीता । ईर्याभाषैषणादाननिक्षेपोत्सर्गाः पंचसमितयः । ईर्यादिसमितीनां वाक्कायगुप्तिभ्यां अविशेषस्ततो भेदेनोपादानमनर्थकं, प्राणिपीडाकारिण्याः कायक्रियाया निवृत्तिः कायगुप्तिः, ईर्यादिसमितयश्च तथाभूतकायक्रियानिवृत्तिरूपा । अत्रोच्यते—निवृत्तिरूपा गुप्तयः प्रवृत्तिरूपाः समितयः इति भेदः विशिष्टा गमनभाषणाभ्यवहरणग्रहणनिक्षेपणोत्सर्गक्रियाः समितय इति उच्यन्ते । 'एसो'

उन संसारके कारणोंसे आत्माका गोपन अर्थात् रक्षा गुप्ति कही जाती है। यहाँ भाव साधनमें क्ति प्रत्यय हुआ है। अथवा अपादान साधन कर लेना। जिससे गोपन हो वह गुप्ति है। अथवा जो रक्षा करता है वह गुप्ति है इस कर्तृसाधनमें क्तिन् प्रत्यय करनेसे गुप्ति शब्द बनता है, यह शब्दार्थ व्यवस्था है। गुप्तिका स्वरूप दूसरा है योगके सम्यक् निग्रहको गुप्ति कहते हैं। काय, वचन और मनकी क्रियाओंकी स्वेच्छारिताके अभावको निग्रह कहते हैं। स्वेच्छाचारिताका अभाव गुप्ति है। सम्यक् विशेषणसे पूजा पूर्वक क्रियाकी और यह महान संयमी है इस यशकी अपेक्षाके बिना तथा पारलौकिक इन्द्रिय सुखकी इच्छाके बिना जो योग निग्रह किया जाता है वह गुप्ति कही जाती है। ऐसा आचार्योंने कहा है।

मनका राग और क्रोध आदिसे अप्रभावित होना मनोगुप्ति है। आगे ग्रन्थकार कहेंगे—मनका रागादिसे निवृत्त होना मनोगुप्ति है। असत्य, कठोर और कर्कश वचनोंको तथा मिथ्यात्व और असंयममें निमित्त वचनोंको न बोलना वचनगुप्ति है। अप्रमादी होनेसे बिना देखी और बिना बुहारी हुई भूमिमें गमन न करना तथा किसी वस्तुका उठाना, रखना, सोना बैठना आदि क्रियाओंका न करना कायगुप्ति है। अथवा कायसे ममत्वका त्याग कायगुप्ति है।

प्राणियोंको पीड़ा न हो, इस भावसे सम्यक् रूपसे प्रवृत्ति करना समिति है। सम्यक् विशेषणसे जीवके समूहोंके स्वरूपका ज्ञान और श्रद्धान पूर्वक प्रवृत्ति ली गई है। समिति पाँच हैं—ईर्या, भाषा, एषणा, आदाननिक्षेप और उत्सर्ग।

शंका—ईर्या आदि समितियाँ वचन गुप्ति और काय गुप्तिसे भिन्न नहीं है। अतः उनका अलगसे कथन व्यर्थ है, क्योंकि प्राणियोंको पीड़ा पहुँचाने वाली शारीरिक क्रियासे निवृत्तिको काय गुप्ति कहते हैं। ईर्या आदि समितियाँ भी उसी प्रकारकी कायक्रियाको निवृत्ति रूप हैं।

समाधान—गुप्तियाँ निवृत्ति रूप हैं और समितियाँ प्रवृत्ति रूप हैं, यह इन दोनोंमें भेद है।

---

१. यथोक्त—आ० ।

एषः । 'चरित्तविणओ' चारित्रविनयः । 'समासदो' संक्षेपतः । 'णादव्वो' ज्ञातव्य । 'होदि' भवति ।

इंद्रियकषायाप्रणिधानं मनोगुप्तिरेव किमर्थं पृथगुच्यते ? सत्यम् । वाक्कायगुप्त्योरेव गुत्तीओ इत्यनेन परिग्रहः । अथवा रागद्वेषमिथ्यात्वाद्यशुभपरिणामविरहो मनोगुप्तिः सामान्यभूता । इंद्रियकषायाप्रणिधानं तद्विशेषः । सामान्यविशेषयोश्च कथंचिद्भेदान्न पौनरुक्त्यं । मनोगुप्तावन्तर्भूतस्यापि इन्द्रियकषायाप्रणिधानस्य भेदेनोपादानं चारित्रार्थिनोऽवश्यं परिहार्यत्वख्यापनार्थं वा ।

ननु त्रयोदशविधं चारित्रं पंच महाव्रतानि, पंच समितयः, तिस्रो गुप्तयः इति । ततः समितीनां गुप्तीनां चारित्रत्वे चारित्रस्य विनय इति कथं भेदेनाभिधानं ? व्रतान्येवात्र चारित्रशब्देनोच्यते । तेषां परिकरत्वेनावस्थिताः गुप्तयः समितयश्चेति सूत्रकारस्याभिप्रायः । तथा चोक्तमन्यैः 'कर्मादाननिमित्तक्रियाभ्यश्च विरतिः अहिंसाभेदेन पंचप्रकारा गुप्तिसमितिविस्तारः'[1] संक्षेपो भवति । कश्चारित्रविनयव्यास[2] इति चेत् पंचविंशतिभावनाः । 'तत्स्थैर्यार्थं भावनाः पंच पंचेति' (त० सू० ७।९) निरूपिता ॥११४॥

गमन, भाषण, भोजन, ग्रहणनिक्षेप और मल मूत्र त्याग रूप क्रियाको समिति कहते हैं। ये सब संक्षेपसे चारित्र विनय है।

शंका—इन्द्रिय और कषायमे उपयोग न लगाना तो मनोगुप्ति ही है, उसे पृथक् क्यो कहा ?

समाधान—आपका कहना सत्य है। यहाँ 'गुत्तीओ' से वचन गुप्ति और कायगुप्तिका ही ग्रहण किया है।

अथवा रागद्वेष मिथ्यात्व आदि अशुभ परिणामोंका अभाव सामान्य मनोगुप्ति है। और इन्द्रिय तथा कषायमें उपयोगका न होना विशेष मनोगुप्ति है। और सामान्य तथा विशेषमें कथंचित् भेद होनेसे पुनरुक्तता दोष नहीं है। अथवा इन्द्रिय और कषायका अप्रणिधान यद्यपि मनोगुप्तिमें आ जाता है फिर भी उसका पृथक् ग्रहण चारित्रके इच्छुकोंको उसका त्याग अवश्य करना चाहिये, यह बतलानेके लिये किया है।

शंका—चारित्रके तेरह भेद हैं—पाँच महाव्रत, पाँच समिति और तीन गुप्ति। अतः समिति और गुप्ति चारित्र हैं। तब इन्हे चारित्रकी विनयके रूपमें भिन्न क्यों कहा है ?

समाधान—यहाँ चारित्र शब्दसे व्रत ही कहे गये हैं। गुप्ति और समितियाँ उन व्रतोंके परिकर रूपसे स्थित हैं यह ग्रन्थकारका अभिप्राय है। अन्य आचार्योंने भी कहा है—कर्मोंको लानेमें निमित्त क्रियाओंसे विरति अहिंसा आदिके भेदसे पाँच प्रकारकी है। गुप्ति समिति उनका विस्तार है।

शंका—चारित्र विनयका विस्तार क्या है ?

समाधान—पाँच व्रतोंकी पच्चीस भावना विस्तार है। तत्त्वार्थ सूत्रमें कहा है—उन व्रतों-की स्थिरताके लिये पाँच-पाँच भावना है ॥११४॥

---

१. स्तारसं–आ० मु० । २. यन्यास–आ० मु० ।

पणिधाणं पि य दुविहं इंदिय णोइंदियं च बोधव्वं।
सद्दादि इंदियं पुण कोधाईयं भवे इदरं ॥११५॥

सद्दरसरूवगंधे फासे य मणोहरे य इयरे य।
जं रागदोसगमणं पंचविहं होदि पणिधाणं ॥११६॥

णोइंदियपणिधाणं कोधो माणो तधेव माया य।
लोभो य णोकसाया मणपणिधाणं तु तं वज्जे ॥११७॥

तपोनिरूपणार्थं गाथाद्वयमुत्तरम्—

उत्तरगुणउज्जमणे सम्मं अधिआसणं च सद्दहाए।
आवासयाणमुचिदाण अपरिहाणी अणुस्सेओ ॥११८॥

सम्यग्दर्शनज्ञानाभ्यामुत्तरकालभावित्वात्संयम· उत्तरगुणशब्देनोच्यते। न हि श्रद्धानं ज्ञानं चातरेण संयमः प्रवर्तते। अजानत· श्रद्धानरहितस्य वाऽसयमपरिहारो न सभाव्यते। तेनायमर्थ·—सयमोद्योग[1] इति तपसो निर्जराहेतुता सति संयमे, नान्यथेति तपस सयम परिकर। तथा चाहु '**संजमहीणं च तवं जो कुणइ णिरत्थयं कुणइ**' इति। '**सम्मं**' सम्यक्। मंक्लेशं दैन्यं चातरेण '**अधियासणं**' सहनं क्षुधादे।

गा०—प्रणिधानके भी दो भेद हैं इन्द्रिय और नोइन्द्रिय। शब्द आदि इन्द्रिय और क्रोधादिक नोइन्द्रिय प्रणिधान है ऐसा जानना॥ ११५॥

गा०—मनोहर और अमनोहर शब्द, रस, रूप गन्ध और स्पर्शमें जो राग द्वेष होता है वह पाँच प्रकारका इन्द्रिय प्रणिधान होता है॥ ११६॥

गा०—नो इन्द्रिय प्रणिधान क्रोध मान तथा माया लोभ और नोकषाय है। ये तो मन प्रणिधान छोड़ना चाहिये[2]॥ ११७॥

तपका कथन करनेके लिये आगे दो गाथा कहते है—

गा०—उत्तर गुण अर्थात् संयममे उद्यम सम्यक् रीतिसे भूख प्यास आदिको सहन करना, तपमें अनुराग पहले कहे गये छह आवश्यकोंकी न्यूनता न होना आधिक्य न होना॥ ११८॥

टी०—सम्यग्दर्शन और सम्यग्ज्ञानके उत्तर कालमें होनेसे संयमको उत्तरगुण कहते हैं। श्रद्धान और ज्ञानके बिना संयम नही होता। अथवा जो जानता नहीं है और न जिसे श्रद्धा है वह असंयमका त्याग नहीं कर सकता। इससे यह अर्थ हुआ कि संयमके होने पर तप निर्जराका कारण होता है, अन्यथा नहीं होता। इन प्रकार संयम तपका परिकर है। कहा भी है—'जो

---

१ द्योततपसो—आ० मु०। २. गा० ११४, ११५, ११६ पर टीका नहीं है। आशाधरजीने अपनी टीकामें कहा है कि टीकाकार इन्हें स्वीकार नहीं करता।—सं०।

अनशनावमौदर्यवृत्तिपरिसंख्यानेषु क्षुत्तृड्जनितवेदनया अव्याकुलता, कथमिदमुद्वहामीति वा अदीनता, भक्तपानयोर्मनसोऽप्रणिधानं, अद्मि पिबामीति वा भक्तकथापरित्यागः, तत्कथनानादरः इतस्ततश्चापरिवर्तनं क्षुधा तृषा वा बाधितोऽस्मीति एवं वचनं सहनं, अथवा भोजनदिवसे याचाया अकरणं, श्रान्तोऽस्म्युपवासेन रूक्षं भोक्तुं न शक्नोमि क्षीरघृतशर्करादिकं दातव्यमिति वचनेन यांचाया अकरणं, मनसा वा यदीदं लभ्यते भद्रं स्यात् इति वाऽप्रार्थना, कायसंज्ञया वा क्षीरादीनामप्रदर्शनं क्षीरादिदाने वाऽप्रहसितायमानमुखता, शीतरूक्षाद्याहारदाने वा अकुपिताननता, अलाभेऽपि लाभादलाभो मे परं तपोवृद्धिरिति संकल्पेनालाभपरीषहसहनं वा, अथवा लौकिकानां धर्मस्थानां वा सत्कारपुरस्काराकरणे तपसि महति वर्तमानोऽप्यहमेतेषां न पूजितः इति कोपसंक्लेशाकरणं । सत्कारपुरस्कारपरीषहसहनं वा ।

रसपरित्यागं कृतवतः रसवदाहारकथादर्शनोपजायमानतदादरनिवारणं रसपरित्यागजातशरीरसंतापक्षमा वा सहनं । आतापयोगधारिणो घर्माद्युपनिपाते असंक्लिष्टचित्तता तत्प्रतीकारवस्तुषु अनादरश्च सहनं । जनविविक्तदेशे वसतः पिशाचव्यालमृगाद्यवलोकनादिकृतभीतिव्युदासोऽरतिविजयश्च सहनं । प्रायश्चित्तसमाचरतोऽपि महदिदं दत्तं गुरुणा बलाबलं ममानिरूप्येति कोपाकरणं, प्रायश्चित्तकरणजनितश्रमेण वा असंक्लिष्टतासहनं । ज्ञानविनये वर्तमानस्य क्षेत्रकालशुद्धिकरणे मामेव नियोजयति इति कोपनिरासो वा, तद्गतश्रमे असंक्लेशश्च सहनं । दर्शनविनये अभ्युद्यतस्य सन्मार्गात्प्रच्यवमानस्य स्थिरीकरणं महानायासः,

---

सयमके बिना तप करता है वह निरर्थक करता है ।' 'सम्मं' का अर्थ सम्यक् है अर्थात् संक्लेश और दीनताके बिना भूख आदिका सहन करना । अनशन, अवमौदर्य और वृत्ति परिसंख्यान नामक तपोंमें भूख प्याससे होने वाली वेदनासे व्याकुल न होना कि कैसे इसे सहूँगा । अथवा अदीनता, खान-पानमें मनको न लगाना, मैं खाता हूँ पीता हूँ इस रूपमें भोजनकी कथा न करना, उसकी कथामें आदर भाव न रखना, इधर उधर नहीं घूमना, मैं भूख या प्याससे पीडित हूँ इस प्रकारके वचनको सहन करना, अथवा भोजनके दिन माँगना नहीं, मैं उपवासमें कमजोर हो गया हूँ, रूखा भोजन नहीं कर सकता, दूध घी शक्कर आदि देना चाहिये । इस प्रकारके वचनसे याचना नहीं करना अथवा यदि अमुक वस्तु प्राप्त हो तो उत्तम है ऐसी मनसे प्रार्थना न करना अथवा शरीरके संकेतसे दूध आदिको न दिखलाना, अथवा दाता दूध आदि दे तो मुखको प्रफुल्लित न करना और ठंडा रूखा आहारादि दे तो मुख पर क्रोध न लाना अथवा भोजन न मिलने पर लाभसे अलाभमें मेरे तपकी परम वृद्धि है ऐसा संकल्प करके अलाभ परीषहको सहना, अथवा लौकिक या धर्मात्मा पुरुषोंके द्वारा आदर सम्मान न करने पर 'मैं महान् तपस्वी हूँ फिर भी इन्होंने मेरी पूजा नहीं की' इस प्रकारका कोप और संक्लेश न करना, अथवा सत्कार पुरस्कार परीषहको सहना ।

यदि रसका त्याग किया है तो रस युक्त आहारकी कथा अथवा रस युक्त आहारको देखनेसे उसके प्रति उत्पन्न हुए आदर भावका निवारण करना, रसको त्यागनेसे शरीरमें उत्पन्न हुए संतापको सहना । यदि आताप योग धारण किया है तो धूप आदि आने पर चित्तमें संक्लेश न करना, और उसका प्रतीकार करने वाली वस्तुओंमें आदर भाव न करना, मनुष्योंसे शून्य देशमें निवास करते हुए पिशाच, सर्प, मृग आदिको देखने आदिसे उत्पन्न हुए भयको रोकना तथा अरति परीषहको जीतना । प्रायश्चित करते हुए भी 'गुरुने मुझे मेरा बलाबल न देखकर महान् प्रायश्चित दे दिया' इस प्रकार कोप न करना अथवा प्रायश्चित करनेसे उत्पन्न हुए श्रमसे मनमें संक्लेश न करना । ज्ञान विनय करते समय 'क्षेत्र शुद्धि काल शुद्धि करनेमें मुझे ही लगाते हैं' इस

स्वचेतसोपि ऋजुतापादनमतिदुष्करं किमंग पुनः परस्येत्यसंकल्पः सहनं । पुरस्कृतचारित्रविनयस्य ईर्यासमितयो दुष्कराः । जीवनिकायाकुले जगति कियंतः परिहर्तुं शक्यते ? निपुणतरं प्रतिपदन्यासं जीवावलोकने तत्परिहृती च कियद्गन्तु शक्यते ? तथा प्रवर्तमानं बाधन्तेतरामातपादयः । नवकोटिपरिशुद्धा भिक्षा क्व लप्स्यते, खलेषु कृतज्ञता चेति मनसोऽप्यप्रणिधानं चारित्रविनयः । तपोविनयमुपगतस्यानशनादितपोऽनुष्ठानातिशयस्य मम स्वल्पमसंयमं अप्रासुकोदकपानेन, अशुद्धभिक्षाग्रहणेन वा जातं तप एवोन्मूलयतीति असंकल्पं सहनं । असकृदभ्युत्थानं, अनुगमनं प्रेषणकरणं, उपकरणशोधनादिकं वा कः कर्तुं शक्नोति प्रतिदिनमित्यनभिसंचिन्त्य चारविनयसहनं ।

'सद्धा य' श्रद्धा च । क्व तपसि । तपसा सपायमुपकारमात्मनोऽवलोक्य बुद्ध्या तपो हि प्रत्यग्रं कर्म संवृणोति, चिरार्जितानां कर्मणां निर्जरामापादयति, इंद्रचक्रलांछनादिसंपदोऽप्यानयति । समीचीनस्य तपसोऽलाभादेव जननमरणावर्तसहनं, असुखाकुले भवांभोधौ पर्यटनं ममासीद् भविष्यति च तथैव इति तपस्यनुरागः कार्यः ।

'आवासगाणं' आवश्यकाना । ण वसो अवसो अवसस्स कम्ममावासगं इति व्युत्पत्तावपि सामायिकादिष्वेवायं शब्दो वर्तते । व्याधिदौर्बल्यादिना व्याकुलो भण्यते अवश. परवश इति यावत् । तेनापि कर्तव्यं कर्मेति । यथा आशु गच्छतीत्यश्व इति व्युत्पत्तावपि न व्याघ्रादौ वर्तते अश्वशब्दोऽपि तु प्रसिद्धिवशात् तुरग एव । एवमिहापि अवश्यं यत्किचन कर्म इतस्ततः परावृत्तिराक्रंदनं, पूत्करणं वा न तद्गृह्यते अथवा आवास-

---

प्रकारका कोप न करना अथवा उससे होने वाले श्रमसे संक्लेश भाव न करना, उसे सहना । दर्शन विनय करते हुए 'सन्मार्गसे गिरते हुएको स्थिर करना बड़ा कठिन है अपने चित्तको भी सरल करना कठिन है फिर दूसरेका तो कहना क्या । इस प्रकार संकल्प न करना उसे सहना । चारित्र विनय करने वालेको, 'ईर्या आदि समितियाँ दुष्कर हैं, यह जगत जीवोंसे भरा है कहाँ तक उन्हें बचाया जा सकता है ? अत्यन्त कुशलता पूर्वक पदको रखते हुए जीवोंको देखकर उन्हें बचाते हुए चलनेमें कौन समर्थ है ? इस प्रकारसे चलने पर आतप आदिकी अत्यन्त बाधा होती है । दुर्जनोंमें कृतज्ञताकी तरह नौ कोटिसे शुद्ध भिक्षा कहाँ मिलती है' इस प्रकार मनमें न सोचना चारित्र विनय है । तप विनय करने वालेके 'अनशन आदि तपके अनुष्ठानमें लगे मेरे अप्रासुक जल पीने अथवा अशुद्ध भिक्षाके ग्रहणसे हुआ थोड़ा सा असंयम तपसे नष्ट हो जाता है' इस प्रकारका संकल्प न करना सहना है । 'बार-बार उठना, पीछे जाना, आज्ञा पालना, उपकरण आदि शुद्धि, कौन प्रतिदिन कर सकता है' इस प्रकारका संकल्प न करना उपचार विनय सहन है । तप नवीन कर्मोंका आना रोकता है । चिरकालसे संचित कर्मोंकी निर्जरा करता है । इन्द्र, चक्रवर्ती आदिकी संपदा भी लाता है । सम्यक् तपके अलाभसे ही जन्म मरणके चक्र और दुःखसे भरे संसार समुद्रमें भ्रमण मुझे करना पड़ा है तथा करना पड़ेगा, इस प्रकार तपके द्वारा होने वाले उपकारोंको अपनेमें देखकर तपमे अनुराग करना चाहिये ।

न वश, अवश और अवशका कर्म आवश्यक है । ऐसी व्युत्पत्ति होने पर भी सामायिक आदिको ही आवश्यक कहते हैं । व्याधि, दुर्बलता आदिसे पीड़ितको भी अवश या परवश कहते हैं, और उसके द्वारा किया गया कर्म आवश्यक है ।. किन्तु जैसे जो 'आशु' शीघ्र चलता है वह अश्व (घोडा) है ऐसी व्युत्पत्ति होने पर भी व्याघ्र आदिको अश्व नहीं कहते, बल्कि प्रसिद्धिवश घोडेको ही अश्व कहते हैं । वैसे ही यहाँ भी जो अवश्य कर्म हैं—यहाँ-वहाँ घूमना, रोना, चिल्लाना

कानां इत्ययमर्थः । आवासयन्ति रत्नत्रयमात्मनीति कृत्वा सामायिकं, चतुर्विंशतिस्तवो, वंदना, प्रतिक्रमणं, प्रत्याख्यानं, व्युत्सर्ग इत्यमीषां ।

तत्र सामायिकं नाम चतुर्विधं नामस्थापनाद्रव्यभावभेदेन । निमित्तनिरपेक्षा कस्यचिज्जीवादेरध्याहिता संज्ञा सामायिकमिति नामसामायिकम् । सर्वसावद्यनिवृत्तिपरिणामवता आत्मना एकीभूतं शरीरं यत्तदाकारसादृश्यात्तदेवेदमिति स्थाप्यते यच्चित्रपुस्तादिकं तत्स्थापनासामायिकम् । आगमद्रव्यसामायिकं नाम 'श्रुतस्याद्यं सामायिकं नाम ग्रंथः, तदर्थज्ञो यः सामायिकाख्यात्मपरिणामप्रत्यवभासः प्रत्ययरूपेण सांप्रतमपरिणतः आत्मा । नो आगमद्रव्यसामायिकं नाम यत्त्रिविकल्पं ज्ञायकशरीरभावितद्व्यतिरिक्तभेदेन । सामायिकज्ञस्य यच्छरीरं तदपि सामायिकज्ञानकारणं, आत्मेव शरीरमंतरेण तस्याभावात् । यस्य हि भावाभावौ नियोगतो यदनुकरोति तत्तस्य कारणमिति हेतुफलव्यवस्था वस्तुषु । ततः प्रत्ययसामायिकस्य कारणत्वाच्छरीरं त्रिकालगोचरं सामायिकशब्दवाच्यं भवति । चारित्रमोहनीयक्षयोपशमविशेषसहायो य आत्मा भविष्यत्सर्वसावद्ययोगनिवृत्तिपरिणामः सोऽभिधीयते भाविसामायिकशब्देन । चारित्रमोहनीयाख्यं कर्म परिप्राप्तक्षयोपशमावस्थं नो आगमद्रव्यतद्व्यतिरिक्तकर्म सामायिकमिति ग्राह्यं । आगमभावसामायिकं नाम प्रत्ययसामायिकं । नो आगमभावसामायिकं नाम सर्वसावद्ययोगनिवृत्तिपरिणामः । अयमिह गृहीतः ।

चतुर्विंशतिसंख्यानां तीर्थकृतामत्र भारते प्रवृत्तानां वृषभादीनां जिनवरत्वादिगुणज्ञानश्रद्धानपुरस्सरा

आदि, उन्हें आवश्यक नहीं कहते । अथवा 'आवासयाण' का अर्थ आवासक है । जो आत्मामें रत्नत्रयका आवास कराते हैं—सामायिक, चतुर्विंशतिस्तव, वन्दना, प्रतिक्रमण, प्रत्याख्यान और व्युत्सर्ग ।

उनमेंसे नाम, स्थापना, द्रव्य और भावके भेदसे सामायिकके चार भेद है । निमित्तकी अपेक्षाके बिना किसी जीव आदिका नाम सामायिक रखना नाम सामायिक है । सर्व सावद्यके त्याग रूप परिणाम वाले आत्माके द्वारा एकीभूत शरीरका जो आकार सामायिक करते समय होता है उस आकारके समान होनेसे 'यह वही है' इस प्रकार जो चित्र, पुस्त आदिमें स्थापना की जाती है वह स्थापना सामायिक है । द्वादशांग श्रुतका आद्य ग्रन्थका नाम सामायिक है । उसके अर्थका जो ज्ञाता है जिसे सामायिक नामक आत्म परिणामका बोध है किन्तु जो वर्तमानमें उस ज्ञानरूपसे परिणत नहीं है अर्थात् उसका उपयोग उसमें नहीं है वह आगम द्रव्य सामायिक है । नो आगम द्रव्य सामायिक ज्ञायक शरीर, भावि और तद्व्यतिरिक्तके भेदसे तीन प्रकार है । सामायिकके ज्ञाता का जो शरीर है वह भी सामायिकके ज्ञानमें कारण है क्योंकि आत्माकी तरह शरीरके बिना भी ज्ञान नहीं होता । जिसके होने पर जो नियमसे होता है और अभावमें जो नहीं होता, वह उसका कारण है । ऐसी वस्तुओंमें कार्य कारणभावकी व्यवस्था है । अतः ज्ञान सामायिकका कारण होनेसे त्रिकालवर्ती शरीर सामायिक शब्दसे कहा जाता है । चारित्र मोहनीय कर्मके क्षयोपशम विशेषकी सहायतासे जो आत्मा भविष्यमें सर्वसावद्ययोगके त्यागरूप परिणाम वाला होगा उसे भावि सामायिक शब्दसे कहा जाता है । जो चारित्र मोहनीय नामक कर्म क्षयोपशम अवस्थाको प्राप्त है वह नोआगमद्रव्य तद्व्यतिरिक्त सामायिक है । प्रत्यय रूप सामयिक आगमभाव सामायिक है । और सर्वसावद्य योगके त्यागरूप परिणाम नोआगमभाव सामायिक है । यहाँ इसीको ग्रहण किया है ।

इस भारतमें हुए वृषभ आदि चौबीस तीर्थंकरोंके जिनवरत्व आदि गुणोंके ज्ञान और श्रद्धान

चतुर्विंशतिस्तवनपठनक्रिया नोआगमभावचतुर्विंशतिस्तव इह गृह्यते ।

वंदना नाम रत्नत्रयसमन्वितानां यतीनां आचार्योपाध्यायप्रवर्तकस्थविराणां गुणातिशयं विज्ञाय श्रद्धापुरःसरेण अभ्युत्थानप्रयोगभेदेन द्विविधे विनये प्रवृत्तिः । प्रत्येकं तयोरनेकभेदता कर्तव्यं केन, कस्य, कदा, कस्मिन्कतिवारानिति । अभ्युत्थानं केनोपदिष्टं, किंवा फलमुद्दिश्य कर्तव्यं ? पूर्वमेव विनयः कर्तव्यतयोपदिष्टः सर्वैर्जिनैः कर्मभूमिषु सदा मानकषायभंगः । गुरुजने बहुमानं, तीर्थंकराणां आज्ञासंपादनं श्रुतधर्माराधनाक्रिया भावशुद्धिरार्जवं, तुष्टिं च फलमपेक्ष्य[1] केन तत् क्रियते । अमानिना, संविग्नेन, अनलसेनाशठेनानुग्रहकारणार्थिना, परगुणप्रकाशनोद्यतेन संघवत्सलेन । असंयतस्य संयतासंयतस्य वा नाभ्युत्थानं कुर्यात्, पार्श्वस्थपंचकस्य वा । रत्नत्रये तपसि च नित्यमभ्युद्यतानां अभ्युत्थानं कर्तव्यं कुर्यात् । सुखशीलजनेऽभ्युत्थानं कर्मबन्धनिमित्तं प्रमादस्थापनोपबृंहणकरणात् । संविग्नजनं प्रति क्रियमाणमभ्युत्थानं निर्जरानिमित्तं विरतिस्थापनोपबृंहणकरणात् । वाचनामनुयोगं वा शिक्षयतः अवमरत्नत्रयस्याभ्युत्थातव्यं तन्मूलेऽध्ययनं कुर्वद्भिः सर्वैरेव । वसतेः, कायभूमितः, भिक्षातः, चैत्यात्, गुरुसकाशात्, ग्रामांतराद्वा आगमनकालेऽभ्युत्थातव्यं । गुरुजनश्च यदा निष्क्रामति निष्क्राम्य प्रविशति वा तदा तदा अभ्युत्थानं कार्यं । अनया दिशा यथागमर्मितरदप्यनुगंतव्यम् ।

दुओणदं जहाजादं बारसावत्तमेव य ।
चदुस्सिरं तिसुद्धं च किदिकम्मं पउंजए ॥ [मूलाचार–७।१०४]

पूर्वक चौबीस स्तवनोंको पढ़ना नोआगमभाव चतुर्विंशतिस्तव है। उसीका यहाँ ग्रहण है।

रत्नत्रयसे सहित आचार्य, उपाध्याय, प्रवर्तक और स्थविर मुनियोंके गुणातिशयको जानकर श्रद्धापूर्वक अभ्युत्थान और प्रयोगके भेदसे दो प्रकारकी विनयमें प्रवृत्तिको वन्दना कहते हैं। उन अभ्युत्थान विनय और प्रयोग विनयके अनेक भेद हैं कि किसको किसका कब, कितनी बार करना चाहिये।

शंका—अभ्युत्थानका उपदेश किसने दिया है और किस फलके उद्देशसे करना चाहिए ?

समाधान—सब जिनदेवोंने कर्मभूमियोंमें सदा प्रथम ही कर्तव्यरूपसे विनयका उपदेश दिया है। विनयसे मानकषायका विनाश होता है। गुरुजनोंमें बहुमान, तीर्थङ्करोंकी आज्ञाका पालन, श्रुतमें कहे गये धर्मकी आराधना, परिणाम विशुद्धि, आर्जव और सन्तोषरूप फलकी अपेक्षा करके विनय की जाती है। यह विनय कौन करता है ? जो मान रहित, संसारसे विरक्त, निरालसी, सरल अनुग्रह करनेका इच्छुक, दूसरोंके गुणोंको प्रकट करनेमें तत्पर और संघका प्रेमी होता है वह विनय करता है। असंयमी और संयमासंयमी तथा पार्श्वस्थ आदि पाँच प्रकारके भ्रष्ट मुनियोंके सन्मानमें उठना नहीं चाहिए। जो रत्नत्रय और तपमें नित्य तत्पर रहते हैं उनके प्रति उठना चाहिए। जो सुखशील साधु हैं उनके सन्मानमें उठना कर्मबन्धका कारण है क्योंकि वह प्रमादको बढ़ानेमें कारण होता है। जो वाचना देता है अथवा अनुयोगका शिक्षण देता है वह अपनेसे रत्नत्रयमें न्यून भी हो तब भी उनके पासमें सब अध्ययन करनेवालोंको उनके सन्मानमें उठकर खड़ा होना चाहिए। वसतिसे, कायभूमिसे, भिक्षासे, जिन मन्दिरसे, गुरुके पाससे अथवा ग्रामान्तरसे आनेके समय उठना चाहिए। जब-जब गुरुजन निकलते हैं अथवा निकलकर प्रवेश करते हैं तब तब अभ्युत्थान करना चाहिए। इसी प्रकार आगमसे अन्य भी जानना चाहिए।

१. क्ष्यत्केन तत्–आ० मु० ।

इत्यादिकः प्रयोगविनयः ।

प्रतिक्रमणं प्रतिनिवृत्तिः षोढा भिद्यते-नामस्थापनाद्रव्यक्षेत्रकालभावविकल्पेन । अयोग्यनाम्नामनुच्चारणं नामप्रतिक्रमणं भट्टि दारिगा सामिणी इत्यादिकमयोग्यं नाम । आप्ताभासानामर्च्चा, त्रसस्थावराणां रूपाणि लिखितान्युत्कीर्णानि वा स्थापनाशब्देनेह गृह्यन्ते । तत्राप्ताभासप्रतिमायां पुरःस्थितायां यदभिमुखतया कृतांजलिपुटता, शिरोवनतिः, गंधादिभिरभ्यर्च्चनं च न कर्तव्यम् । एवं सा स्थापना परिहृता भवति । त्रसस्थावरादिस्थापनानामविनाशनं, अमर्द्दनं, अताडनं वा परिहारः प्रतिक्रमणं । वास्तुक्षेत्रादीनां दशप्रकाराणां उद्गमोत्पादनैषणादोषदुष्टानां वसतीनां, उपकरणानां, भिक्षाणां च परिहरणं, अयोग्यानां चाहारादीनां, गृद्धेर्दर्पस्य च कारणानां संक्लेशहेतूनां वा निरसनं द्रव्यप्रतिक्रमणं । उदककर्द्दमत्रसस्थावरनिचितेषु क्षेत्रेषु गमनादिवर्जनं क्षेत्रप्रतिक्रमणं । यस्मिन्वा क्षेत्रे वसतो रत्नत्रयहानिर्भवति तस्य वा परिहारः, तच्च किं ? ज्ञानतपोवृद्धैरनाध्यासितं । रात्रिसंध्यात्रयस्वाध्यायावश्यककालेषु गमनागमनादिव्यापाराकरणात् कालप्रति-

---

मूलाचारमें कहा है—क्रियाकर्ममें दो अवनति, बारह आवर्त, चार शिरोनति, और तीन शुद्धियाँ होती हैं। पंचनमस्कारके आदिमें एक नमस्कार और चौबीस तीर्थंकरोंके स्तवनके आदिमें दूसरा नमस्कार इस प्रकार दो नमस्कार होते हैं—पंचनमस्कारका उच्चारण करनेके प्रारम्भमे मनवचनकायके संयमनरूप तीन शुभयोगोंके सूचक तीन आवर्त होते हैं। पंचनमस्कारकी समाप्ति होनेपर भी उसी प्रकार तीन आवर्त होते हैं। इसी प्रकार चौबीस तीर्थङ्करोंके स्तवनके आदि और अन्तमे तीन-तीन आवर्त होते हैं। इस प्रकार बारह आवर्त होते हैं। अथवा एकबार प्रदक्षिणा करनेपर चारो दिशाओंमे चार प्रणाम होते हैं। इस प्रकार तीन प्रदक्षिणाओंमे बारह प्रणाम होते हैं। पंचनमस्कार और चतुर्विशति स्तवके आदि और अन्तमें दोनों हाथ मुकुलितकर मस्तकसे लगाना, इस तरह चार सिर होते है। इस प्रकार मनवचनकायकी शुद्धिपूर्वक क्रियाकर्म होता है यह सब प्रयोग विनय है।

दोषोसे निवृत्तिको प्रतिक्रमण कहते है। उसके छह भेद हैं—नामप्रतिक्रमण, स्थापना प्रतिक्रमण, द्रव्यप्रतिक्रमण, क्षेत्रप्रतिक्रमण, कालप्रतिक्रमण और भावप्रतिक्रमण। अयोग्य नामोंका उच्चारण न करना नाम प्रतिक्रमण है। भट्टिनी, दारिका, स्वामिनी इत्यादि अयोग्य नाम है। स्थापना शब्दसे यहाँ आप्ताभासोकी मूर्ति, त्रस और स्थावरोंकी आकृतियाँ लिखित या खोदी हुई, ग्रहण की गई हैं। उनमेसे आप्ताभासोकी प्रतिमाओंके सन्मुख हाथ जोड़ना, सिर नमाना और गन्ध आदिसे पूजन नहीं करना चाहिए। इस प्रकार करनेसे उस स्थापनाका परिहार हो जाता है यह स्थापना प्रतिक्रमण है।

त्रस स्थावर आदिकी स्थापनाओको नष्ट न करना अथवा तोड़ना-फोड़ना आदि न करना स्थापना प्रतिक्रमण है। मकान खेत आदि दस प्रकारकी परिग्रहोंका, उद्गम उत्पादन और एषणा दोषोंसे दूषित वसतिकाओंका, उपकरणोंका, और भिक्षाओंका, अयोग्य आहार आदिका और जो तृष्णा और मदके तथा संक्लेशके कारण है उन द्रव्योंका त्याग द्रव्य प्रतिक्रमण है। जल, कीचड़ और त्रस स्थावर जीवोंसे भरे क्षेत्रोंमें आने जानेका त्याग क्षेत्र प्रतिक्रमण है। अथवा जिस क्षेत्रमें रहनेसे रत्नत्रयकी हानि हो उसका त्याग क्षेत्र प्रतिक्रमण है। ऐसे क्षेत्रोमें ज्ञान और तपसे वृद्ध मुनिगण नहीं रहते, इसलिए उनमें रहना वर्जित है। रात, तीनों सन्ध्या, स्वाध्याय

क्रमणं। कालस्य दुष्परिहार्यत्वात्कालाधिकरणव्यापारविशेषाः कालशब्देनपर्यात्कालशब्देन गृहीताः। मिथ्यात्वमसंयमः, कषायः, रागः, द्वेषः, संज्ञा, निदान, आर्तरौद्रमित्यादयोऽशुभपरिणामाः, पुण्यास्रवभूताश्च शुभपरिणामाः इह भावशब्देन गृहीता गृह्यन्ते, तेभ्यो निवृत्तिर्भावप्रतिक्रमणं इति केषांचिद्व्याख्यानं। चतुर्विधमित्यपरे। निमित्तनिरपेक्षं कस्यचिन्नामत्वेन नियुज्यमानं प्रतिक्रमणमित्यभिधानं नामप्रतिक्रमणं। अशुभपरिणामानां विशिष्टजीवद्रव्यानुगतशरीराकारसादृश्यापेक्षया चित्रादिरूपं स्थापितं स्थापनाप्रतिक्रमणं। प्रमाणनयनिक्षेपादिभिः प्रतिक्रमणावश्यकस्वरूपज्ञ[1]स्तत्रानुपयुक्तः प्रत्ययप्रतिक्रमणकारणत्वात् आगमद्रव्यप्रतिक्रमणशब्देनोच्यते। नो आगमद्रव्यप्रतिक्रमणं त्रिविधं ज्ञायकशरीरभावितद्व्यतिरिक्तभेदैः। यथात्मा कारणं प्रतिक्रमणपर्यायस्य, तथा तदीयमपि शरीरं त्रिकालगोचरमिति प्रतिक्रमणशब्दवाच्यं भवति। चारित्रमोहक्षयोपशमसांनिध्ये भविष्यत्प्रतिक्रमणपर्याय आत्मा भाविप्रतिक्रमणं। क्षयोपशमावस्थामुपगतः चारित्रमोहः नो आगमद्रव्यव्यतिरिक्तकर्म प्रतिक्रमणं। प्रतिक्रमणप्रत्यय आगमभावप्रतिक्रमणं। मिच्छाणाणमिच्छादंसणमिच्छाचारित्तादो पडिविरदोमित्ति एवं स्वरूपज्ञानं। अशुभपरिणामदोषमवबुध्य श्रद्धाय तत्प्रतिपक्षपरिणामवृत्तिर्नोआगमभावप्रतिक्रमण।

सामायिकात्[2] प्रतिक्रमणस्य को भेदः? सावद्ययोगनिवृत्तिः सामायिकं। प्रतिक्रमणमपि अशुभमनोवाक्कायनिवृत्तिरेव तत्कथं षडावश्यकव्यवस्था?

और षडावश्यकोंके कालमें गमन आगमन आदि व्यापार न करना काल प्रतिक्रमण है। कालका त्याग तो अशक्य जैसा है अतः कालमें होनेवाले कार्य विशेषोंको कालके सम्बन्धसे काल शब्दसे ग्रहण किया है। मिथ्यात्व, असंयम, कषाय, राग, द्वेष, आहारादि संज्ञा, निदान, आर्त रौद्र इत्यादि अशुभ परिणाम और पुण्यास्रवभूत शुभ परिणाम यहाँ भाव शब्दसे ग्रहण किये हैं। उनसे निवृत्ति भाव प्रतिक्रमण है। ऐसा किन्हीं आचार्योंका व्याख्यान है।

अन्य आचार्य प्रतिक्रमणके चार भेद कहते हैं। निमित्तकी अपेक्षा न करके किसीका प्रतिक्रमण नाम रखना नामप्रतिक्रमण है। अशुभ परिणामवाले जीवोंके शरीरका जैसा आकार होता है उस आकारके सादृश्यकी अपेक्षासे चित्रमें अशुभ परिणामोंकी स्थापना स्थापना प्रतिक्रमण है? प्रमाण नय-निक्षेप आदिके द्वारा प्रतिक्रमण नामक आवश्यकके स्वरूपका जो ज्ञाता उसमें उपयुक्त नहीं है वह प्रतिक्रमण विषयक ज्ञानका कारण होनेसे आगम द्रव्य प्रतिक्रमण शब्दसे कहा जाता है। नो आगम द्रव्य प्रतिक्रमणके तीन भेद हैं—ज्ञायकशरीर, भावि और तद्व्यतिरिक्त। जैसे प्रतिक्रमण पर्यायका कारण आत्मा है वैसे उसका त्रिकालवर्ती शरीर भी कारण है इसलिए वह प्रतिक्रमण शब्दसे कहा जाता है। चारित्रमोहके क्षयोपशमके होनेपर जो आत्मा भविष्यमें प्रतिक्रमण पर्यायरूप होगा वह भावि प्रतिक्रमण है। क्षयोपशम अवस्थाको प्राप्त चारित्रमोह कर्म नोआगमद्रव्य व्यतिरिक्त कर्म प्रतिक्रमण है। प्रतिक्रमणरूप ज्ञान आगम भाव प्रतिक्रमण है। अर्थात् मिथ्याज्ञान, मिथ्यादर्शन और मिथ्याचारित्रसे मैं विरत हूँ इस प्रकारका स्वरूपज्ञान आगमभाव प्रतिक्रमण है। अशुभ परिणामके दोषको जानकर और उसपर श्रद्धा करके उसके प्रतिपक्षी शुभपरिणामोंमें प्रवृत्ति नोआगमभाव प्रतिक्रमण है।

शंका—सामायिक और प्रतिक्रमणमें क्या भेद है? सावद्ययोगसे निवृत्ति सामायिक है और अशुभ मनवचनकायसे निवृत्ति प्रतिक्रमण है तब छह आवश्यककी व्यवस्था कैसे सम्भव है?

१. ज्ञसूत्रा–आ० मु०। २. कस्य प्र–आ० मु०।

अत्रोच्यते—सर्वं सावद्ययोगं प्रत्याख्यामीति वचनाद्धिंसादिभेदमनुपादाय सामान्येन सर्वसावद्ययोगनिवृत्तिः सामायिकं । हिंसादिभेदेन सावद्ययोगविकल्पं कृत्वा ततो निवृत्तिः प्रतिक्रमणं ।

"मिच्छत्तपडिक्कमणं, तहेव असंजमपडिक्कमणं ।
कसाएसु पडिक्कमणं, जोगेसु अप्पसत्थेसु" ॥ [मूलाचा० ७।१२०]

इति वचनादिति केचित्परिहरन्ति ।

इदं त्वत्राभ्यं प्रतिविधानं । योगशब्देन वीर्यपरिणाम उच्यते । स च वीर्यान्तरायक्षयोपशमजनितत्वात् क्षायोपशमिको भावस्ततो निवृत्तिरशुभकर्मादाननिमित्तयोगरूपेण अपरिणतिरात्मनः सामायिकं । मिथ्यात्व[1]मसंयमःकषायाश्च दर्शनचारित्रमोहोदयजा औदयिकाः । मिथ्यात्वं तत्त्वाश्रद्धानरूपं, असंयमो हि हिंसादिरूपः, क्रोधादयस्तु परस्परतो मिथ्यात्वादसंयमाच्चानुभवसिद्धवैलक्षण्यरूपाः । ये भिन्नहेतुस्वरूपास्ते नैक्यमापद्यन्ते यथा शालियवगोधूमादिधान्यं । भिन्नहेतुस्वरूपाश्च मिथ्यात्वासंयमकषायाः । तेभ्यो विरतिर्व्यावृत्तिः प्रतिक्रमणं । सावद्ययोगमात्रनिवृत्तिः सामायिकमिति भेदो महाननयोः । भेदमेवाश्रित्यामीषां परिणामानां चदुपच्चय[2]गो बंधो इति सूत्रमवस्थितं । अन्यथा योगविकल्पत्वे मिथ्यात्वादीनां चतुःसंख्या न न्याय्या योगेन सह ।

प्रत्याख्यानं नाम अनागतकालविषया क्रियां न करिष्यामि इति संकल्पः । तच्च नामस्थापनाद्रव्यक्षेत्रकाल भावविकल्पेन षड्विधं । अयोग्यं नाम नोच्चारयिष्यामीति चिन्ता नामप्रत्याख्यानं । आप्ताभासानां

समाधान—'सर्व सावद्ययोगको त्यागता हूँ' इस प्रकार हिंसा आदिका भेद न करके सामान्यसे सर्व सावद्ययोगसे निवृत्ति सामायिक है। और हिंसा आदिके भेदसे सावद्ययोगके भेद करके उससे निवृत्ति प्रतिक्रमण है। सूत्रमें कहा है—'मिथ्यात्व प्रतिक्रमण' असंयम प्रतिक्रमण, कषाय प्रतिक्रमण और अप्रशस्त योग प्रतिक्रमण होता है।

उक्त शंकाका कोई आचार्य ऐसा उत्तर देते हैं किन्तु वह उचित नहीं है। योग शब्दसे वीर्यपरिणाम कहा जाता है। वह वीर्यपरिणाम वीर्यान्तरायके क्षयोपशमसे उत्पन्न होनेके कारण क्षायोपशमिक भाव है। उससे निवृत्ति अर्थात् अशुभकर्मको लानेमें निमित्त योगरूपसे आत्माका परिणमन न करना सामायिक है। मिथ्यात्व, असंयम और कषाय दर्शनमोह और चारित्रमोहके उदयसे उत्पन्न होनेके कारण औदयिक हैं। मिथ्यात्व तत्त्वोंके अश्रद्धानरूप है। असंयम हिंसादिरूप है और क्रोधादि तो मिथ्यात्व और असंयमसे विलक्षण हैं यह अनुभवसिद्ध है। जिनका हेतु और स्वरूप भिन्न होता है वे एक नहीं हो सकते जैसे शालि, जौ, गेहूँ आदि धान्य। मिथ्यात्व, असंयम और कषायके हेतु और स्वरूप भिन्न-भिन्न हैं उनसे निवृत्ति प्रतिक्रमण है। और सावद्य योगमात्रसे निवृत्ति सामायिक है। अतः दोनोंमें महान् भेद है इन परिणामोंके भेदको ही लेकर 'चदुपच्चयगो बन्धो'—बन्धके चार कारण है, यह सूत्र अवस्थित है। अन्यथा यदि मिथ्यात्व आदि योगके भेद हों तो फिर योगके साथ चारकी संख्या नहीं बन सकती।

आगामी कालमें मैं यह काम नहीं करूँगा, इस प्रकारके संकल्पका नाम प्रत्याख्यान है। नाम, स्थापना, द्रव्य, क्षेत्र, काल और भावके भेदसे उसके छह भेद हैं। मैं अयोग्य नामका

---

१. त्वासंयमक-आ० मु०। २. पच्चयाण बधो-आ० मु०।

प्रतिमा न पूजयिष्यामीति, योगत्रयेण त्रसस्थावरस्थापनापीडां न करिष्यामीति प्रणिधानं मनसः स्थापनाप्रत्याख्यानं। अथवा अर्हदादीनां स्थापना न विनाशयिष्यामि नैवानादरं तत्र करिष्यामि इति वा। अयोग्याहारोपकरणद्रव्याणि न ग्रहीष्यामीति चिंताप्रबंधो द्रव्यप्रत्याख्यान योग्यानि वा निष्ठितप्रयोजनानि। संयमहानिं संक्लेशं वा संपादयंति यानि क्षेत्राणि तानि त्यक्ष्यामि इति क्षेत्रप्रत्याख्यानं। कालस्य तु परिहार्यत्वात् कालसाध्याया क्रियायां परिहृताया काल एव प्रत्याख्यातो भवतीति ग्राह्य। तेन सध्याकालादिष्वध्ययनगमनादिक न संपादयिष्यामीति चेत. कालप्रत्याख्यानं। भावोऽशुभपरिणाम तन्न निर्वर्तयिष्यामि इति संकल्पकरणं भावप्रत्याख्यानं। तद्द्विविध मूलगुणप्रत्याख्यानमुत्तरगुणप्रत्याख्यानमिति। ननु च मूलगुणा व्रतानि तेषां प्रत्याख्यान निरासो भविष्यत्कालविषयश्चेन्न स संवरार्थिना कार्य., सवरार्थमवश्यमनुष्ठीयते इति। उत्तरगुणानां कारणत्वान्मूलगुणव्यपदेशो व्रतेषु वर्तते मूलगुणशब्द मूलगुणश्च सः प्रत्याख्यानं च तत् इति मूलगुणप्रत्याख्यान। व्रतोत्तरकालभावित्वादनशनादिकं उत्तरगुण इति उच्यते। उत्तरगुणश्च स प्रत्याख्यान च तदिति उत्तरगुणप्रत्याख्यान। तत्र संयताना जीवितावधिकं मूलगुणप्रत्याख्यान। सयतासंयताना अणुव्रतानि मूलगुणव्रतव्यपदेशभाजि भवंति। तेषां द्विविधं प्रत्याख्यान अल्पकालिकं, जीवितावधिकं चेति। पक्षमासषण्मासादिरूपेण भविष्यत्काल सावधिक कृत्वा तत्र स्थूलहिंसानृतस्तेयाब्रह्मपरिग्रहान्नाचरिष्यामि इति प्रत्याख्यानमल्पकालिकम्।

उच्चारण नहीं करूँगा. इस प्रकारका विचार नाम प्रत्याख्यान है। मैं आप्ताभासोंकी प्रतिमाको नही पूजूँगा, मनवचनकायसे त्रस और स्थावरोंकी स्थापनाको पीड़ा नहीं पहुँचाऊँगा, इस प्रकारका मनका संकल्प स्थापना प्रत्याख्यान है। अथवा मै अर्हन्त आदिकी स्थापनाको नष्ट नही करूँगा, न उसका अनादर ही करूँगा, इस प्रकारका मनका संकल्प स्थापना प्रत्याख्यान है।

अयोग्य आहार तथा उपकरण द्रव्योंको मै ग्रहण नही करूँगा, इस प्रकारके चिन्ता प्रबन्धको द्रव्य प्रत्याख्यान कहते है। जो क्षेत्र संयमको हानि पहुँचाते है अथवा संक्लेश उत्पन्न करते हैं। उन्हे मै छोडूँगा इस प्रकारके संकल्पको क्षेत्र प्रत्याख्यान कहते हैं। कालको छोड़ना तो अशक्य जैसा है अतः काल साध्य क्रियाका त्याग करने पर कालका ही प्रत्याख्यान होता है ऐसा लेना चाहिये। अतः सन्ध्याकाल आदिमे अध्ययन गमन आदि नही करूँगा इस प्रकारके चित्तको काल प्रत्याख्यान कहते है। भावसे अशुभ परिणाम लेना। मैं अशुभ परिणाम नहीं करूँगा, इस प्रकारका संकल्प करना भाव प्रत्याख्यान है। उसके दो भेद हैं—मूलगुण प्रत्याख्यान और उत्तरगुण प्रत्याख्यान।

शङ्का—मूलगुण व्रतोको कहते हैं। उनका प्रत्याख्यान अर्थात् त्याग भविष्यत् कालमे यदि किया जायेगा तो सवरके इच्छुक यतिको उसे नही करना चाहिये, उसे तो संवरके लिये व्रत अवश्य पालनीय होते है ?

समाधान—उत्तर गुणोंका कारण होनेसे व्रतोंको मूलगुण कहते हैं अतः मूलगुण रूप प्रत्याख्यान मूलगुण प्रत्याख्यान है। व्रतोके उत्तर कालमें अनशन आदि होते है इसलिये उन्हे उत्तर गुण कहते हैं। यहाँ भी उत्तर गुणरूप प्रत्याख्यान उत्तरगुण प्रत्याख्यान है। उनमेंसे संयमियोंके जीवनपर्यन्त मूलगुण प्रत्याख्यान होता है। और सयमासंयमी श्रावकोंके अणुव्रत मूलगुणव्रत कहलाते हैं। उनके दो प्रकारका प्रत्याख्यान होता है—एक अल्पकालिक और दूसरा जीवनपर्यन्त। पक्ष, मास, छहमास आदि रूपसे भविष्यतकालकी मर्यादा करके 'इतने काल तक मैं स्थूल हिंसा,

---

१. अयोग्यानि वानिष्ट—मु०।

आमरणमवधिं कृत्वा न करिष्यामि स्थूलहिंसादीनि इति प्रत्याख्यानं जीवितावधिकं। उत्तरगुणप्रत्याख्यानं संयतसंयतासंयतयोरपि अल्पकालिकं जीवितावधिकं वा। परिगृहीतसंयमस्य सामायिकादिकं अनशनादिकं च वर्तते इति उत्तरगुणत्वं सामायिकादेस्तपसश्च। भविष्यत्कालगोचराशनादित्यागात्मकत्वात्प्रत्याख्यानत्वं। सति सम्यक्त्वे चैतद्द्वयं प्रत्याख्यानं। जीवनिकायं हिंसादिस्वरूपं च ज्ञात्वा श्रद्धाय सर्वतो देशतो वा हिंसादिविरतिर्व्रतं। तथा चोक्तं—'निःशल्यो व्रती' (त० सू० ७।१८) इति।

मिथ्यादर्शनशल्यं, मायाशल्यं, निदानशल्यं चेति त्रिविधं शल्यं तेभ्यो निष्क्रांत निःशल्यः। सावधारणं चेदं निःशल्य एव व्रतीति। तेन सशल्यस्यव्रतिता निरस्ता भवति। न च असति श्रद्धाने मिथ्यात्वशल्यनिवृत्तिः। न च जीवाद्यर्थपरिज्ञानमंतरेण श्रद्धानस्यास्ति संभव इति ज्ञानदर्शनवत एव व्रतिता सूत्रकारेणाख्याता। तथावश्यकेऽप्युक्तम्—

"पंचवदाणि जदीणं अणुव्वदाइं च देसविरदाणं।
ण हु सम्मत्तेण विणा तो सम्मत्तं पढमदाए॥" [ ]

इति हिंसादिप्रवर्तनपरं भाषितमिति क्रिया पचापि सरात्रिभोजना. प्रत्याचष्टे यतिस्त्रिधा मनोवाक्कायविकल्पेन कृतकारितानुमतैर्यावज्जीवं।

सम्यग्दृष्टिस्स्वगारी मूलगुणं उत्तरगुणं वा स्वशक्त्या गृह्णाति परिमितकालं यावज्जीवं वा। आत्मना प्राक्कृत हिंसादिकं हा दुष्टं कृतं, हा दुष्टं संकल्पितं, वचो वा हिंसादिप्रवर्तनपरं भाषितं इति निंदागर्हाभ्या

स्थूल झूँठ, स्थूल चोरी, स्थूल अब्रह्म और परिग्रहका आचरण नही करूँगा, इस प्रकारका प्रत्याख्यान अल्पकालिक है। मरणपर्यन्त मैं स्थूल हिंसादि नहीं करूँगा, इस प्रकारका प्रत्याख्यान जीवितावधि है।

उत्तरगुण प्रत्याख्यान संयत और संयतासंयतके भी अल्पकालिक अथवा जीवनपर्यन्त होता है। जिसने संयम ग्रहण किया है उसके सामायिक आदि और अनशन आदि होते है इसलिये सामायिक आदि और तप उत्तरगुण हैं। और भविष्यत्कालमें अनशन आदिके त्यागरूप होनेसे प्रत्याख्यान रूप भी है। सम्यक्त्वके होने पर ही ये दोनों प्रत्याख्यान होते है।

जीवनिकाय और हिंसा आदिके स्वरूपको जानकर तथा श्रद्धा करके सर्वदेश अथवा एक देशसे हिंसा आदिके त्यागको व्रत कहते हैं। कहा भी है—जो निःशल्य है वही व्रती है। मिथ्यादर्शन शल्य, मायाशल्य और निदानशल्य, इस प्रकार तीन शल्य हैं। उनसे जो रहित है वह निशल्य है। यह निशल्य शब्द अवधारण सहित है। निःशल्य ही व्रती होता है। इससे जो शल्य सहित है उसके व्रतीपनेका निषेध किया है। श्रद्धानके अभावमें मिथ्यात्वशल्यसे निवृत्ति नही होती। और जीवादि पदार्थोंके ज्ञानके बिना श्रद्धान संभव नही है। अतः ज्ञानदर्शनवान्को ही सूत्रकारने व्रती कहा है। तथा आवश्यकमें भी कहा है—'सम्यक्त्वके बिना न तो यतियोंके पाँच व्रत होते हैं और न देशविरत श्रावकोके अणुव्रत होते हैं। अतः सम्यक्त्वको प्रथमता है।'

इस प्रकार यति मन वचन काय और कृत कारित अनुमोदनासे रात्रिभोजनके साथ हिंसा आदि पाँचों पापोंका त्याग जीवनपर्यन्तके लिये करता है। गृहस्थ सम्यग्दृष्टि मूलगुण अथवा उत्तरगुणको अपनी शक्तिके अनुसार कुछ काल या जीवनपर्यन्तके लिये ग्रहण करता है। अपने द्वारा पहले किये गये हिंसा आदिको 'हा, मैंने बुरा किया, हा, मैंने बुरा संकल्प किया, हिंसा

स्वपरविषयाभ्यां पूर्वमन्वर्तमानं चासंयमं कृतं क्रियमाणासंयमसदृशं न करिष्यामि इति मनसि कुर्वन्प्रत्याख्याता भवति।

अगारिणां विरतिपरिणामविकल्पो निरूप्यते। स्थूलकृतप्राणातिपातादिकं कृतकारितानुमतविकल्पात् त्रिविधं मनोवाक्कायविकल्पैर्न त्यजति। मनसा स्थूलकृतप्राणातिपातादिकं न करोमि, तथा वचसा कायेनेति त्रिविधं कृतम्। मनसा स्थूलकृतं प्राणातिपातादिकं न कारयामि तथा वचसा कायेन चेति त्रिविकल्पं कारितं। तथा मनसा स्थूलकृतप्राणातिपातादिकं नानुजानामि, तथा वचसा कायेन चेति त्रिभेदमनुमननं। एवं नवविधं स्थूलकृतप्राणवधादिकं त्यक्तुमशक्तोऽगारी।

तथा मनोवाग्भ्यां स्थूलकृतप्राणातिपातादिकं कृतकारितानुमतिविकल्पात्त्रिविधं च कर्तुमशक्तो मनसा न करोमि, न कारयामि, नानुजानामि। वचसा न करोमि, न कारयामि नानुजानामि इति। कायेन कृतकारितानुमतविकल्पान् हिंसादींश्च न समर्थो विहातुं। तथा च सूत्रं—

'ण दु तिविध तिविधेण व दुविधेक्कविधेण वापि विरमेज्ज इति॥' [ ]

कथं तर्ह्यगारी विरतिमुपैति? अत्रोच्यते कृतकारितविकल्पाद्द्विप्रकार हिंसादिकं मनोवाक्कायैस्त्यजति। वाचा कायेन वा हिंसादिविषयं कृतकारितं त्यजति। कायेन एकेन वा कृत कारितं त्यजति। अत एवोक्तं 'दुविधं पुण तिविधेण व दुविधेक्कविधेण वा विरमेज्ज' इति। अथवा हिंसाया स्वयं करणं एकं मनोवाक्कायैस्त्यजति। नाहं मनसा वाचा कायेन स्थूलकृतप्राणातिपातादिक पञ्चकं करोमीति अभिसंधिपूर्वक विरमणं

आदिमें प्रवर्तन करने वाला बचन बोला,' इस प्रकार स्व और परविषयक निन्दा गर्हाके द्वारा दोषयुक्त बतलाते हुए, तथा वर्तमानमें मैं जो असंयम करता हूँ और पूर्वमें जैसा असंयम किया है वैसा मैं भविष्यमें नहीं करूँगा, ऐसा मनमें संकल्प करके त्याग करता है।

अब गृहस्थोंके विरतिरूप परिणामोंके भेद कहते हैं—कृत, कारित और अनुमतके भेदसे तीन भेदरूप स्थूल हिंसा आदिको ग्रहस्थ मन वचन कायसे नहीं त्यागता है। मनसे स्थूल हिंसा आदिको नहीं करता हूँ तथा वचनसे और कायसे नहीं करता हूँ, ये तीन भेद कृत है। मनसे स्थूल हिंसा आदिको न कराता हूँ तथा वचनसे और कायसे नहीं कराता हूँ। ये तीन भेद कारितके हैं। तथा मनसे स्थूल हिंसा आदिमें अनुमति नहीं देता हूँ तथा वचनसे और कायसे अनुमति नहीं देता हूँ ये तीन भेद अनुमतके हैं। इस प्रकार नौ प्रकारकी स्थूल हिंसा आदिका त्याग करनेमें गृहस्थ असमर्थ होता है। तथा कृत कारित अनुमतके भेदसे तीन भेदरूप स्थूल हिंसा आदिको मन और वचनसे करनेमें असमर्थ होता है। मनसे न करता हूँ, न कराता हूँ और न अनुमति देता हूँ। वचनसे न करता हूँ, न कराता हूँ और न अनुमति देता हूँ। कायसे कृत कारित अनुमतरूप हिंसा आदिको छोडनेमें समर्थ नहीं हूँ। सूत्रमें कहा है—कृतकारित अनुमतके भेदसे तीन भेद रूप हिंसा आदिको मन वचन कायसे अथवा मन वचनसे अथवा कायसे त्याग नहीं करता है।

तब गृहस्थ कैसे त्याग करता है यह बतलाते हैं—

कृत और कारितके भेदसे दो भेदरूप हिंसा आदिको मन वचन कायसे छोड़ता है। कृत कारित रूप हिंसादिको वचन और कायसे छोड़ता है। अथवा कृत कारित रूप हिंसा आदिको एक कायसे छोड़ता है। इसीसे कहा है—'कृत कारित रूप हिंसा आदिको तीन रूपसे, दो रूपसे या एक रूपसे छोड़ता है।' अथवा हिंसाके एक स्वयं करनेको मन वचन कायसे त्यागता है। 'मैं मनसे वचनसे कायसे स्थूल हिंसादि पाँच पापोंको नहीं करता हूँ' इस प्रकार संकल्प पूर्वक त्याग

करोति। वाक्कायाभ्यां वा स्वयं करणं त्यजति कायेनैकेन वा। तथा चोक्तम्—'एकविधं त्रिविधेन वापि विरोधेन्ध' इति। एवमेते व्रतविकल्पाः भविष्यत्कालविषयतायां युज्यमानाः प्रत्याख्यानविकल्पाः भवन्तीत्य-भ्रोपन्यासः कृतः।

कायोत्सर्गो निरूप्यते—कायः शरीरं तस्य उत्सर्गस्त्यागः कायोत्सर्गः। उपलब्ध्यधिष्ठानेन्द्रियावयवकः कर्मनिर्वर्तितः पुद्गलप्रचयविशेष औदारिकाख्य इह कायशब्देन गृहीतः इतरत्र उत्सर्गस्यासं त् वक्ष्यमाणस्य।

ननु च आयुषो निरवशेषगलने आत्मा शरीरमुत्सृजति नान्यदा तत्किमुच्यते कायोत्सर्गं इति।

आत्मशरीरयोरन्योऽन्यस्य प्रवेशानुप्रवेशिनोरायुर्वशात् अनपायित्वेऽपि शरीरे अशुचित्वं सप्तधातुरूप-तया अशुचितमं शुक्रशोणितबीजत्वाच्च, तथा अनित्यत्वं, अपायित्वं, दुर्वहत्वं, असारत्वं, दुःखहेतुत्वं, शरीरगतममताहेतुकमनंतसंसारपरिभ्रमणं इत्यादिकान्संप्रधार्य दोषान्नेदं मम नाहमस्येति संकल्पवतस्तदादरा-भावात्कायस्य त्यागो घटत एव। यथा प्राणेभ्योऽपि प्रियतमा कृतापराधावस्थिता ह्येकस्मिन्मंदिरे त्यक्ते-त्युच्यते तस्यामनुरागाभावान्ममेदं भावव्यावृत्तिमपेक्ष्य एवमिहापि। किं च कायापायसन्निपातेऽपि अपाय-निराकरणाभिलाषस्याभावात्। यो यदपायनिराकरणानुत्सुकस्तेन तत्परित्यक्तं यथा वसनादिकं परिहृतं। शरीरा-पायनिराकरणानुत्सुकश्च यतिस्तस्मादुच्यते कायस्य त्यागः।

करता है। अथवा स्वयं करनेको वचन और कायसे त्यागता है या एक कायसे त्यागता है। कहा है—'एक कृतको तीन प्रकारसे त्यागता है। इन व्रतके भेदोंको भविष्य कालके साथ जोड़ने पर कि मैं भविष्यमें ऐसा नहीं करूँगा, ये प्रत्याख्यानके भेद होते हैं।

अब कायोत्सर्गको कहते हैं—काय अर्थात् शरीरके, उत्सर्ग अर्थात् त्यागको कायोत्सर्ग कहते हैं। पदार्थोंको जाननेका आधार इन्द्रियाँ जिसकी अवयव है, और कर्मके द्वारा जिसकी रचना हुई तथा जो पुद्गलोंका एक समूह विशेष है उस औदारिक नामक शरीरको यहाँ काय शब्दसे ग्रहण किया है क्योंकि आगे कहे जानेवाला उत्सर्ग अन्य शरीरोंमें सम्भव नहीं है।

शंका—आयुकर्म जब पूर्णरूपसे समाप्त हो जाता है तब आत्मा शरीरको छोड़ता है अन्य कालमें नहीं छोड़ता। तब कैसे आप कायोत्सर्गकी बात करते हैं?

समाधान—आत्मा और शरीरके प्रदेश परस्परमें मिलनेसे आयुकर्मके कारण यद्यपि शरीर ठहरा रहता है तथापि शरीर सात धातु रूप होनेसे अपवित्र है, रज और वीर्यसे उत्पन्न होनेसे विशेष अपवित्र है। तथा अनित्य है, नष्ट होनेवाला है, दुःखसे धारण करने योग्य है, असार है, दुःखका कारण है, इस शरीरसे ममत्व करनेसे अनन्त संसारमें भ्रमण करना होता है, इत्यादि दोषोंको जानकर 'न यह मेरा है, न मैं इसका हूँ' ऐसा संकल्प करनेवालेके शरीरमें आदरका अभाव होनेसे कायका त्याग घटित होता ही है। जैसे प्राणोंसे भी प्यारी पत्नी अपराध करनेपर उसमें अनुराग न रहनेसे 'यह मेरी है' इस प्रकारका भाव न होनेसे एक ही घरमें रहते हुए भी 'त्यागी हुई' कही जाती है, उसी प्रकार यहाँ भी जानना। दूसरे, शरीरके विनाशके कारण उपस्थित होनेपर भी कायोत्सर्ग करनेवालेके विनाशके कारणको दूर करनेकी इच्छा नहीं होती। जो जिसके विनाशके कारणोंको दूर करनेमें उत्सुक नहीं है उसने उसे त्याग दिया है, जैसे त्यागा हुआ वस्त्रादि। और यति शरीरके विनाशके कारणको दूर करनेमें उत्सुक नहीं होता। अतः उसके

'स च शरीरनि:स्पृहः, स्थाणुरिवोर्ध्वकायः, प्रलंबितभुजः, प्रशस्तध्यानपरिणतोऽनुन्नमितानतकायः, परीषहानुपसर्गांश्च सहमानः, तिष्ठन्निर्जन्तुके कर्मापायाभिलाषी विविक्ते देशे।

अन्तर्मुहूर्तः कायोत्सर्गस्य जघन्यः कालः, वर्षमुत्कृष्टः। अतिचारनिवृत्तये कायोत्सर्गा बहुप्रकारा भवन्ति रात्रिदिनपक्षमासचतुष्टयसंवत्सरादिकालगोचरातिचारभेदापेक्षया। सायाह्नोच्छ्वास शतकं, प्रत्यूषसि पंचाशत्, पक्षे त्रिशतानि, चतुर्षु मासेषु चतुःशतानि, पंचशतानि संवत्सरे उच्छ्वासानां[2]। प्रत्युषसि प्राणिवधादिषु पंचस्वतीचारेषु अष्टशतोच्छ्वासमात्रः कालः कायोत्सर्गः कार्यः। कायोत्सर्गे कृते यदि शक्यते उच्छ्वासस्य स्खलनं वा परिणामस्य उच्छ्वासाष्टकमधिकं स्थातव्यम्।

उत्थितोत्थित, उत्थितनिविष्टम्, उपविष्टोत्थितं, उपविष्टनिविष्ट इति चत्वारो विकल्पाः। धर्मे शुक्ले वा परिणतो यस्तिष्ठति तस्य कायोत्सर्गः उत्थितोत्थितो नाम। द्रव्यभावोत्थानसमन्वितत्वादुत्थानप्रकर्षः उत्थितोत्थितशब्देनोच्यते। तत्र द्रव्योत्थानं शरीरं स्थाणुवदूर्ध्वं अविचलमवस्थानं। ध्येयैकवस्तुनिष्ठता ज्ञानाख्यस्य भावस्य भावोत्थानं। आर्तरौद्रयो परिणतो यस्तिष्ठति तस्य उत्थितनिषण्णो नाम कायोत्सर्गः। शरीरोत्थानादुत्थितत्वं शुभपरिणामोद्गतिरूपस्योत्थानस्याभावान्निषण्ण इत्युच्यते। अत एव विरोधाभावो भिन्न-

---

कायत्याग उचित है। तथा वह शरीरसे निस्पृह होकर, स्थाणुकी तरह शरीरको सीधा करके, दोनों हाथोंको लटकाकर, प्रशस्त ध्यानमें लीन हो, शरीरको ऊँचा-नीचा न करके परीषहों और उपसर्गोंको सहन करता हुआ, कर्मोंको नष्ट करनेकी अभिलाषासे जन्तुरहित एकान्त देशमे ठहरता है।

कायोत्सर्गका जघन्यकाल अन्तर्मुहूर्त और उत्कृष्टकाल एक वर्ष है। अतिचारोंको दूर करनेके लिए कायोत्सर्गके रात, दिन, पक्ष, मास, चार मास, वर्ष आदिकालमें होनेवाले अतिचारोंकी अपेक्षा अनेक भेद हैं। सायंकालमें सौ उच्छ्वास प्रमाण, प्रातःकालमे पचास उच्छ्वास प्रमाण, पाक्षिक अतिचारमें तीन सौ उच्छ्वास प्रमाण, चार मासोंमें चार सौ उच्छ्वास प्रमाण और वार्षिकमें पाँच सौ उच्छ्वास प्रमाण काल कायोत्सर्गका है। हिंसा आदि पाँच अतिचारोंमे एक सौ आठ उच्छ्वास मात्र काल तक कायोत्सर्ग करना चाहिए। कायोत्सर्ग करनेपर यदि उच्छ्वासका अथवा परिणामका स्खलन हो जाये तो आठ उच्छ्वासप्रमाण अधिक काल तक कायोत्सर्ग करना चाहिए।

कायोत्सर्गके चार भेद है—उत्थितोत्थित, उत्थितनिविष्ट, उपविष्टउत्थित, और उपविष्टनिविष्ट। जो धर्मध्यान या शुक्लध्यान सहित कायोत्सर्ग करता है उसके उत्थितोत्थित नामक कायोत्सर्ग है। यहाँ द्रव्य और भाव दोनोंके ही उत्थानसे युक्त होनेसे उत्थितोत्थित शब्दसे उत्थानका प्रकर्ष कहा है। स्थाणुकी तरह शरीरका उन्नत और निश्चल रहना द्रव्योत्थान है। ज्ञानरूप भावका ध्यान करने योग्य एक ही वस्तुमें स्थिर रहना भावोत्थान है। जो आर्त रौद्रध्यानके साथ कायोत्सर्ग करता है उसके उत्थितनिविष्ट नामक कायोत्सर्ग होता है। शरीरके खड़े होनेसे इसे उत्थित और शुभपरिणामकी उद्गतिरूप उत्थानका अभाव होनेसे निविष्ट या निषण्ण कहते हैं। इसीसे एक कालमें एक क्षेत्रमें उत्थान—खड़े होना और निविष्ट—बैठना इन दोनों आसनोंमें कोई विरोध नहीं है क्योंकि दोनोंके निमित्त भिन्न हैं। जो बैठकर ही धर्म और शुक्लध्यान करता है उसके उत्थितनिषण्ण कायोत्सर्ग होता है क्योंकि उसके परिणाम तो उत्थित

---

१. तत्र शरीर—आ० मु०। २. ना प्रत्युषसि प्राणि—आ० मु०।

निमित्तत्वादुत्थानासनयोः एकत्र एकदा । यस्त्वासीन एव धर्मशुक्लध्यानपरिणतिमुपैति तस्य उत्थितनिषण्णो भवति परिणामोत्थानात्कायानुत्थानाच्च । यस्तु निषण्णोऽशुभध्यानपरस्तस्य निषण्णनिषण्णकः कायशुभपरिणामाभ्यां अनुत्थानात् ।

दैवसिकाद्यतीचार रत्नत्रयगतं मनसा विमृश्य इदं मया[1] न सुष्ठु कृतं प्रमादिनेति संचिन्त्य पश्चाद्धर्मे शुक्ले वा ध्याने प्रयतितव्यम् ।

कायोत्सर्गप्रपन्नः स्थानदोषान्परिहरेत् । के ते इति चेदुच्यते । १ तुरग इव कुंटीकृतपादेन अवस्थानम् २ लतेवेतस्ततश्चलतोऽवस्थानं ३ स्तंभवत्स्तब्धशरीरं कृत्वा स्थानं । ४ स्तंभोपाश्रयेण वा कुड्याश्रयेण वा मालावलम्बशिरसा वावस्थानम् । ५ लंबिताधरतया, स्तनगतदृष्टया वायस इव इतस्ततो नयनोद्वर्तनं कृत्वा । ६ खलीनावपीडितमुखहय इव मुखचालनं संपादयतोऽवस्थानं । ७ युगावष्टब्धबलीवर्द इव शिरोऽधः पातयता । ८ कपित्थफलग्राहीव विकाशिकरतलं, संकुचिताङ्गुलिपंचकं वा कृत्वा ९ शिरश्चालनं कुर्वन् १० मूक इव हुंकारं संपाद्यावस्थानं ११ मूक इव नासिकया वस्तूपदर्शयता वा १२ अंगुलीस्फोटनं १३ भ्रूनर्तनं वा कृत्वा १४ शबरवधूरिव स्वकौपीनदेशाच्छादनपुरोगं १५ शृङ्खलाबद्धपाद इव वावस्थानं १६ पीतमदिर इव परवशगतशरीरो वा भूत्वावस्थानं इत्यमी दोषाः ।।

व्यावर्णितानामावश्यकानां अपरिहाणिर्हानिर्न कार्या । अणुस्सेगो आधिक्येनाकरणं च ।

है किन्तु शरीर बैठा हुआ है । जो बैठे हुए अशुभध्यानमें लीन होता है उसके निषण्ण निषण्ण कायोत्सर्ग होता है । क्योंकि न तो उसका शरीर उत्थित है और न शुभपरिणाम ही हैं । रत्नत्रयमे देवसिक आदि अतीचारोको मनसे विचारकर 'मुझ प्रमादीने यह ठीक नहीं किया' ऐसा सोचकर पीछे धर्मध्यान अथवा शुक्लध्यान करना चाहिये ।

कायोत्सर्ग करने वालेको स्थान सम्बन्धी दोष दूर करना चाहिये । वे दोष इस प्रकार हैं— १ घोड़ेकी तरह पैरको थोड़ा मोड़कर खड़ा होना । २ बेलकी तरह इधर-उधर हिलते हुए खड़े होना । ३. स्तम्भकी तरह शरीरको स्तब्ध करके खड़े होना । ४. स्तम्भ अथवा दीवारके आश्रयसे अथवा ऊपरके तल्लेसे सिरको लगाकर खड़े होना । ५. ओष्ठको लटकाकर दृष्टि अपने स्तनों पर रखकर कौएकी तरह आँखोंको इधर-उधर घुमाना । ६ लगामसे पीड़ित मुख वाले घोड़ेकी तरह मुख चलाते हुए अवस्थित होना । ७. जैसे कन्धे पर जुआ होनेसे बैल अपना सिर नीचे डालता है उस तरह सिरको लटकाकर अवस्थापन करना । ८. कैथके फलको ग्रहण करने वाला मनुष्य जैसे अपनी हथेलीको फैलाता है उस तरह हथेलीको फैलाकर या पाँचों अंगुलियोंको संकुचित करके अवस्थित होना । ९. सिरको चलाते हुए अवस्थान । १० गूँगेकी तरह हुंकार करते हुए अवस्थान । ११. गूँगेकी तरह नाकसे वस्तुको दिखलाते हुए अवस्थान । १२. अंगुली चटकाते हुए अवस्थान । १३. भौंको नचाते हुए अवस्थान । १४. भीलनीकी तरह अपने अग्रभागको हथेलीसे ढाँकते हुए अवस्थान । १५. ऐसे खड़े होना मानों दोनों पैर साँकलसे बँधे हैं । १६ मदिरा पिये हुए की तरह अथवा पराधीन शरीर वालेकी तरह खड़ा होना । ये कायोत्सर्गके दोष हैं ।

जो पहले छह आवश्यक कहे हैं उनमें हानि नही करनी चाहिये और न उनमें आधिक्य करना चाहिये ।। ११८ ।।

---

१. मया दुष्टं कृत—आ० मु० ।

भत्ती तवोधियंमि य तवम्मि य अहीलणा य सेसाणं ।
एसो तवम्मि विणओ जहुत्तचारिस्स साधुस्स ॥११९॥

'भत्ती' भक्तिः। वदननिरीक्षणादिप्रसादेन अभिव्यज्यमानोऽन्तर्गतोऽनुरागः। 'तवोऽधियम्मि' तपो अधिके च 'तवम्मि' य सम्यक्तपसि, तद्वति च, भक्तिरिति यावत्। तच्च सम्यग्ज्ञानदर्शनसंयमानुगतं। 'अहीलणा य' अपरिभवश्च। 'सेसाणं' शेषाणां। तपसा न्यूनानामात्मनः ज्ञानश्रद्धानचरणवतां परिभवे ज्ञानादीन्येव परिभूतानि भवति। ततो बहुमानाभावो ज्ञानातिचारः, वात्सल्याभावो दर्शनातिचारः। सातिचारज्ञानदर्शनस्य चारित्रमशुद्धं इति, महाननर्थ इति भावः। 'एसो' एष व्यावर्णितपरिणामसमूह उत्तरगुणोद्योगादिकः। 'तवम्मि' तपसि तपोविषयः। 'विणओ' विनयः। 'जहुत्तचारिस्स' श्रुतनिरूपितक्रमेणाचरतः। 'साधुस्स' साधोः ॥११९॥

उपचारविनयनिरूपणार्थोत्तरगाथा—

काइयवाइयमाणसिओत्ति तिविधो हु पंचमो विणओ ।
सो पुण सव्वो दुविहो पच्चक्खो चेव पारोक्खो ॥१२०॥

'काइगवाइगमाणसिगोत्ति' पदसंबंधः। पंचमो विनयस्त्रिप्रकारः कायेन, मनसा, वचसा च, निर्वर्त्यते इति। 'सो पुण सव्वो' स पुनस्त्रिप्रकारोऽपि विनयः। 'दुविधो' द्विविधः। 'पच्चक्खो चेव' प्रत्यक्षः। 'पारोक्खो' परोक्षश्चेति ॥१२०॥

गा०—जो तपमें अधिक हैं उनमें और तपमें भक्ति और जो अपनेसे तपमें हीन है उनका अपरिभव यह श्रुतके अनुसार आचरण करने वाले साधुकी तप विनय है ॥११९॥

टी०—मुखकी प्रसन्नतासे प्रकट होनेवाले आन्तरिक अनुरागको भक्ति कहते हैं। तपसे अधिकमें और सम्यक् तपमें भक्ति करना। सम्यग्दर्शन, सम्यग्ज्ञान और संयमके अनुगत तप ही सम्यक् तप है। जो तपमें न्यून है उनका तिरस्कार नहीं करना। जो ज्ञान श्रद्धान और चारित्रसे युक्त होनेपर भी अपनेसे तपमें कम हैं, उनका तिरस्कार करनेपर ज्ञानादिका ही तिरस्कार होता है। और ऐसोंका बहुमान न करना ज्ञानका अतिचार है। उनमें वात्सल्य न रखना सम्यग्दर्शनका अतिचार है। और जिसका ज्ञान और दर्शन सातिचार है उसका चारित्र अशुद्ध है, इस तरह महान् अनर्थ है। यह ऊपर कहा, उत्तरगुणोंमें उद्योग आदि शास्त्रानुसार आचरण करनेवाले साधु की तप विषयक विनय है ॥११९॥

उपचार विनयका निरूपण करते हैं—

गा०—पाँचवीं उपचार विनय तीन प्रकारकी है कायिक, वाचनिक और मानसिक। और वह तीनों प्रकारकी विनय दो प्रकारकी है प्रत्यक्ष विनय और परोक्ष विनय ॥१२०॥

टी०—पाँचवीं विनय तीन प्रकारकी है जो कायसे, मनसे और वचनसे की जाती है। और ये तीनों प्रकारकी भी विनय दो प्रकारकी है—प्रत्यक्ष और परोक्ष ॥१२०॥

तत्र प्रत्यक्षकायिकविनयप्रदर्शनाय गाथाचतुष्टयमुत्तरम्—

अब्भुट्ठाणं किदियम्मं णवसणं अंजली य मुंडाणं ।
पच्चुग्गच्छणमेत्तो पच्छिद अणुसाधणं चेव ॥१२१॥

'अब्भुट्ठाणं' अभ्युत्थानं गुर्वादीनां प्रवेशनिःक्रमणयोः । 'किदियम्मं' णवंसणं, वंदना, शरीरावनतिश्च । 'अंजली य' कृतांजलिपुटता च । 'मुंडाणं' शिरोवनतिश्च । 'पच्चुग्गच्छणं' प्रत्युद्गमनं । आसीने स्थिते वा गुरौ । 'पच्छिद अणुसाधणं चेव' स्वयं गच्छतः दूरात्परिहृत्य निभृतकरचरणस्यावनतगात्रस्य गमनं, सहगमे वा पृष्ठतः स्वशरीरमात्रप्रमाणभूभागेन तं परिहृत्य गमनं ॥१२१॥

णीचं ठाणं णीचं गमणं णीचं च आसणं सयणं ।
आसणदाणं उवगरणदाणमोगासदाणं च ।।१२२॥

णीचं च आसणं नीचैरासनं । पृष्ठतः स्वहस्तपादश्वासादिभिरुपद्रुतो न भवति यथा गुर्वादिस्तथासनं । अग्रतोऽभिमुखात् मनागपसृत्य वामपार्श्वेऽनुद्धतस्येषदवनतोत्तमाङ्गस्य चासनं । आसने गुरावुपविष्टे स्वयं भूमावासनं च । 'सयणं च णीचमिति' पदघटना । नीचैः शयनमिति यावत् । [1]अनुन्नते देशे शयनं, गुरुनाभिप्रमाणमात्रभूभागे वा स्वशिरो भवति यथा तथा शयनं । हस्तपादादिभिर्वा यथा न घट्यते गुर्वादिः । 'आसणदाणं'

उनमेंसे प्रत्यक्षकायिक विनयको चार गाथाओंसे दिखलाते हैं—

टी०—गुरु आदिके प्रवेश करनेपर या बाहर जानेपर अभ्युत्थान—खड़े होना, कृतिकर्म अर्थात् वन्दना करना, णवंसण अर्थात् शरीरको नम्र करना, दोनों हाथोंको जोड़ना, सिरको नवाना, प्रत्युद्गमन अर्थात् गुरुके बैठने अथवा खड़े होनेपर उनके सामने जाना, और जब गुरु जावें तो उनसे दूर रहते हुए अपने हाथ पैरको शान्त और शरीरको नम्र करके गमन करना और गुरु के साथ जानेपर उनके पीछे अपने शरीर प्रमाण भूमिभागका अन्तराल देकर गमन करें ॥१२१॥

विशेषार्थ—पं० आशाधरने अपनी टीकामें लिखा है कि टीकाकार तो 'पच्छिद अणुसाधणं' के स्थानमें 'पच्छिद संसाहणा' पढ़ते हैं और उसकी व्याख्या करते हैं कि—आचार्य उपाध्याय आदिके द्वारा प्रार्थित और मनसे अभिलषितका सम्यक् प्रसाधन करना अर्थात् आज्ञा नहीं देनेपर भी संकेतसे ही जानकर करना। यह टीकाकार कोई दूसरे जान पड़ते हैं क्योंकि विजयोदयामें तो यह पाठ नहीं है।

गा०—नीचा स्थान, नीचा गमन, नीच आसन, नीचे सोना, आसनदान, उपकरणदान और अवकाशदान ये उपचार विनयके प्रकार हैं ॥१२२॥

टी०—नीचा आसन—गुरुके पीछे इस प्रकार बैठे कि अपने हाथ पैर श्वास आदिसे गुरुको किसी प्रकारकी बाधा न पहुँचे। आगे बैठना हो तो सामनेसे थोड़ा हटकर गुरुके वाम भागमें उद्धतता त्यागकर और अपने मस्तकको थोड़ा नवाकर बैठे। आसन पर गुरुके बैठने पर स्वयं भूमिमें बैठे। नीचे सोना—अर्थात् जो ऊँचा नहीं हो ऐसे देशमें सोना, अथवा गुरुके नाभि प्रमाण मात्र भूभागमें अपना सिर रहे इस प्रकार सोना। अथवा अपने हाथ पैर वगैरहसे गुरु आदिका

---

१. अनुन्नते देशे आ० मु० ।

आसितुमिच्छति इत्यवगम्य निरूप्य चक्षुषा प्रमार्जनयोग्यं न वेति, पश्चात्प्रतिलेखनेन लाघवमार्दवादिगुणान्वितेनातिमनकै प्रमार्ज्य भूभागं पीठादिकं च आसनदान । 'उवकरणदानं' ज्ञानसंयमो उपक्रियेते अनुगृह्येते येनतदुपकरणं पुस्तकादि ग्रहीतुमभिप्रेतं तस्य दान । अथवा उद्गमोत्पादनैषणादिदोषैरदुष्टस्य सुप्रतिलेखनस्यात्मना लब्धस्य उपकरणस्य दानं । 'ओगासदाणं च' अवकाशदानं च शीतार्त्तस्यावस्थितनिवातावकाशदानं, उष्णार्दितस्य शीतलस्थानदानं ग्रामनगरादिस्वावासस्थानदानं वा ॥१२२॥

पडिरूवकायसंफासणदा पडिरूवकालकिरिया य ।
पेसणकरणं संथारकरणमुवकरणपडिलिहणं ॥१२३॥

'पडिरूवकायसंफासणदा' कायस्य सस्पर्शनं कायसस्पर्शनं । प्रतिरूपं कायस्य संस्पर्शनं प्रतिरूपकायसस्पर्शनं तस्य भावः प्रतिरूपकायसंस्पर्शनता । गुर्वादिशरीरानुकूल सस्पर्शनमिति यावत् ।

अयं चात्र क्रम —मनागुपसृत्य स्थित्वा तदीयेन पिच्छेन कायं त्रि प्रमृज्य आगंतुकजीवबाधापरिहारोपयुक्तः सादरः स्वबलानुरूपं यावद्यादृग्मर्द् नसहस्तावदेव मर्द् नं कुर्यात् । उष्णाभितप्तस्य यथा शैत्यं भवति तथा स्पृशेच्छीतार्तस्य यथौष्ण्यं तथा ।

'पडिरूवकालकिरिया य' कालकृतोऽवस्थाविशेषो बालत्वादिरिह कालशब्देनोच्यते कालप्रभवत्वात् ।

संघट्टन न हो इस प्रकार शयन करे। आसनदान—गुरु बैठना चाहते हैं ऐसा जानकर चक्षुसे देखे कि प्रमार्जनके योग्य है या नहीं ? पीछं लाघव कोमलता आदि गुणोंसे युक्त पीछीसे अत्यन्त धीरेसे भूभाग और आसन आदिको पोछ देवे। उपकरणदान—जिससे ज्ञान और समय का उपकार हो उसे उपकरण कहते हैं। गुरु पुस्तक आदि चाहते हो तो उन्हे देना। अथवा उद्गम उत्पादन आदि दोषोंसे रहित उपकरण अपनेको मिला हो तो उसे देना उपकरणदान है। अवकाशदान—शीतसे पीड़ितको वायु रहित स्थान देना और गर्मीसे पीड़ितको शीतल स्थान देना, अथवा ग्राम नगर आदिमें अपना आवास स्थान देना ॥१२२॥

विशेषार्थ—नीचा स्थानका मतलब है गुरु जहाँ बैठे या खड़े हों उसके वाम भागमें या पीछे बैठना। और नीचे गमनका मतलब है—गुरुके बैठे रहते या खड़े रहते स्वयं गमन करते शिष्यका गुरुसे दूर रहते हुए अपने हाथ पैरको निश्चल रखते हुए और शरीर को नम्र करके गमन करना।

गा०—गुरु आदिके शरीरके अनुकूल स्पर्शन, बालपने आदि अवस्थाके अनुरूप वैयावृत्य करना, और गुरु आदिकी आज्ञाका पालन करना, तृण आदिका संथरा करना, उपकरणोंकी प्रतिलेखना करना ॥१२३॥

टी०—कायके स्पर्शनको कायस्पर्शन कहते हैं। प्रतिरूप कायका स्पर्शन प्रतिरूप काय स्पर्शन है और उसका भाव प्रतिरूपकाय स्पर्शनता है अर्थात् गुरु आदिके शरीरके अनुकूल स्पर्शन करना। इसका क्रम इस प्रकार है—गुरुसे थोड़ा हटकर बैठे और उनकी पीछीसे तीन बार उनके शरीरका प्रमार्जन करके आगन्तुक जीवको किसी प्रकारकी बाधा न हो इस प्रकार सादर अपने बलके अनुरूप जितने काल तक और जितना मर्दन गुरु सह सके उतना ही मर्दन करे। यदि गुरु गर्मीसे तप्त हों तो शीतपना जिस प्रकार संभव उस प्रकार स्पर्श करे और यदि शीतसे पीड़ित हों तो गर्मी पहुँचाना जैसे हो उस प्रकार स्पर्श करे। तथा 'प्रतिरूपकाल क्रिया' में काल शब्दसे

तेन बालत्वाद्यनुरूपवैयावृत्यक्रियेति यावत् । पेसणकरणं गुर्वादिभिराज्ञप्तस्य । 'संथारकरणं' तृणफलकादिकसंस्तरणक्रिया । 'उवकरणपडिलिहणं' गुर्वादीनां ज्ञानसंयमोपकरणप्रतिलेखनं अस्तमनवेलाया आदित्योद्गमने च ॥१२३॥

इच्चेवमादि विणओ उवयारो कीरदे सरीरेण ।
एसो काइयविणओ जहारिहो साहुवग्गम्मि ॥१२४॥

उपचारिकविनयः । शेषं सुगमं ।

वाचिकविनयनिरूपणार्थं गाथाद्वयम्—

पूयावयणं हिदभासणं च मिदभासणं च महुरं च ।
सुत्ताणुवीचिवयणं अणिट्ठुरमकक्कसं वयणं ॥१२५॥

'पूयावयणं' पूजापुरस्सरं वचनं भट्टारक इदं शृणोमि, भगवन्निदं कर्तुमिच्छामि युष्मदनुज्ञयेत्यादिकं । 'हिदभासणं च' गुर्वादीनां यद्धितं लोकद्वयस्य तस्य भाषणं । 'मिदभासणं' यावता विवक्षितार्थप्रतिपत्तिर्भवति तावदेव वक्तव्यं न प्रसक्तानुप्रसक्तं । 'महुरं' च श्रोत्रप्रियं । 'सुत्ताणुवीचिवयणं' सूत्रानुवीचिवचनं । भाषासमित्यधिकारे यानि वाक्यानि निर्दिष्टानि वचांसि तेषां कथनं । 'अणिट्ठुरं' अनिष्ठुरं परचित्तपीडाकृतावनुद्यतं । 'अकक्कसं वयणं' अकर्कशं वचनं अपरुषमिति यावत् ॥१२५॥

कालकृत अवस्थाविशेष बाल्य अवस्था आदि ग्रहण की है क्योंकि वह कालसे होती है। अतः गुरुकी बाल आदि अवस्थाके अनुसार वैयावृत्य करना चाहिये। उनके लिये तृणोंका या लकड़ीके पटियाका संथरा करना चाहिये। सूर्यके अस्त और उदय होनेके समय उनके ज्ञान और सयमके उपकरण शास्त्र कमण्डलु आदिकी सफाई करना चाहिये ॥१२३॥

गा०—इस प्रकारको आदि लेकर उपचार विनय शरीरके द्वारा साधुवर्गमे यथा योग्य की जाती है। यह कायिक विनय है ॥१२४॥

टी०—यह उपचार विनय है। शेष सुगम है ॥१२४॥

दो गाथाओंसे वाचिक विनयका निरूपण करते हैं—

गा०—पूजा पूर्वक वचन, हितकारी भाषण, मित भाषण, मधुर भाषण, सूत्रानुसार वचन, अनिष्ठुर और अकर्कश वचन वचनविनय है ॥१२५॥

टी०—'हे भट्टारक! मैं सुन रहा हूँ,' 'हे भगवन् आपकी आज्ञा हो तो मै ऐसा करना चाहता हूँ। इस प्रकारसे पूजा पूर्वक वचन बोलना। जो गुरु आदिके लिये इस लोक और परलोक में हितकर हो ऐसा हित भाषण करना। जितना बोलनेसे विवक्षित अर्थका बोध हो उतना ही बोलना, प्रासंगिक या अप्रासंगिक न बोलना। कानोंको प्रिय वचन बोलना, भाषासमिति अधिकार में जो वचन बोलने योग्य कहे हैं उन्हें ही बोलना, तथा दूसरेके चित्तको पीड़ा करने वाले निष्ठुर वचन और कर्कश वचन न बोलना वाचिक विनय है ॥१२५॥

उवसंतवयणमगिहत्थवयणमकिरियमहीलणं वयणं।
एसो वाइयविणओ जहारिहो होदि कादव्वो ॥१२६॥

'उवसंतवयणं' प्रशांतरागकोपः उपशांतः तस्य वचनं उपशांतवचनं। विरागस्य विरोषस्य च यद्वचस्तदेव भाष्यं। 'अगिहत्थवयणं' गृहस्था मिथ्यादृष्टयोऽसंयता अयोग्यवचनविकल्पानभिज्ञास्तेषां यद्वचनं न भवति तस्य अभिधानं। 'अकिरियं' षट्कर्मव्यावर्णनपरं यन्न भवति। 'अहीलणं' परानवज्ञाकारि। 'एसो' व्यावर्णितवचनव्यापारः। 'वाचिगविणओ' वाग्विनयो। 'जधारिहं' यथार्हं। 'होदि कादव्वो' कर्तव्यो भवति ॥१२६॥

मानसिकविनयं निरूपयति—

पापविसोत्तिग परिणामवज्जणं पियहिदे य परिणामो।
णायव्वो संखेवेण एसो माणस्सिओ विणओ ॥१२७॥

'पापविसोत्तिगपरिणामवज्जणं' पापशब्देन अशुभकर्माण्युच्यंते। स्रोतः प्रवाहः। स्रोत इव अविच्छेदेन प्रवृत्तेः कर्माणि अपि पापविस्रोतःशब्देन उच्यंते। पापविस्रोतःप्रयोजनाः परिणामा ये तेषां वर्जनं। इह गुरुविनयस्य प्रस्तुतत्वात् गुरुविषयोऽशुभः परिणामः आत्मनो यथेष्टचारित्वनिवारणजनितः क्रोधः। अविनीततादर्शनादनुग्रहाभावमपेक्ष्य नाध्यापयति पूर्ववन्न मया सह संभाषणं करोति इति वा क्रोधः। गुरुविनये आलस्यं,

---

गा०—उपशान्त वचन, जो वचन गृहस्थों के योग्य नहीं हैं, कृषि आदि आरम्भ से शून्य वचन, दूसरों की अवज्ञा न करने वाला वचन बोलना यह यथा योग्य वाचिकविनय करने योग्य होती है ॥१२६॥

टी०—जिसका राग द्वेष शान्त हो गया है उसे उपशान्त कहते हैं। उसका वचन उपशान्त वचन है। अर्थात् राग रहित और रोष रहितका जो वचन होता है वही बोलना चाहिये। गृहस्थ अर्थात् मिथ्यादृष्टि और असंयमी जो योग्य अयोग्य वचनोंको नहीं जानते, उनका जो वचन हो वह नहीं बोलना जो वचन वे नहीं बोलते वही बोलना चाहिये। जिस वचन में असि, मषी, कृषि, सेवा, वाणिज्य आदि षट्कर्मोंका उपदेश न हो वह बोलना चाहिये। तथा जो वचन दूसरेका निरादर न करता हो वह बोलना चाहिये। ये जो वचन कहे हैं इनका बोलना वचन विनय है। उसको यथायोग्य करना चाहिये ॥१२६॥

मानसिक विनय को कहते हैं—

गा०—पापको लाने वाले परिणामोंको न करना, जो गुरुको प्रिय और हितकर हो उसीमें परिणाम लगाना, यह संक्षेपसे मानसिक विनय जानना ॥१२७॥

टी०—पाप शब्दसे अशुभ कर्मोंको कहा है। स्रोतका अर्थ प्रवाह है। प्रवाहकी तरह लगातार होनेसे कर्मोंको भी पाप विस्रोत शब्दसे कहा है। पापको लाना ही जिनका काम है उन परिणामोंको त्यागना चाहिये। यह गुरु विनयका प्रकरण होनेसे गुरु विषयक अशुभ परिणाम लेना। गुरुके द्वारा अपनी स्वेच्छाचारिताका निवारण करनेसे क्रोध उत्पन्न होना, शिष्यको अविनयी देख उसपर गुरु कृपा न करे तो 'मुझे पहलेकी तरह नहीं पढ़ाते हैं न मेरे साथ पहलेकी तरह वार्तालाप करते हैं इस प्रकार क्रोध करना, गुरुकी विनयमें प्रमाद करना, गुरुकी अवज्ञा

गुरुं प्रत्यवज्ञा, निंदा, संभ्रमः, तत्प्रतिकूलवृत्तितेत्येवमादयः । 'पियहिदे य परिणामो' गुरोर्यत्प्रियं तस्मै यद्धितं आत्मने वा तत्र परिणामः । 'णादव्वो' ज्ञातव्यः । 'संखेवेण' समासेन । 'एसो' एषः । 'माणसिगो' मानसिकः । 'विणओ' विनयः ॥१२७॥

इय एसो पच्चक्खो विणओ पारोक्खिओ वि जं गुरुणो ।
विरहम्मि विवट्टिज्जइ आणाणिद्देसचरियाए ॥१२८॥

'इय' एवं । 'एसो' एषः । 'पच्चक्खो' प्रत्यक्षो विनयः । सन्निहितगुरुविषयत्वात् । 'पारोक्खिओ' वि गुरोः परोक्षे क्रियमाणोऽपि विनयः । कोऽसाविति चेदाह—'गुरुणो विरहम्मि विवट्टिज्जइ' गुरोर्विरहेऽपि यत् क्रियते । 'आणाणिद्देसचरियाए' आज्ञायाम्—इत्थमेव भवता कार्यं मुमुक्षुणा न कदाचनेत्थमिति यन्निर्दिश्यते तदाज्ञानिर्देशः । 'दसणणाणचरणेसु विहारो कादव्वो' इत्येवमादिसदृशः ॥१२८॥

न गुरुष्वेव विनयः कार्य इति ग्रहीतव्यं, एतेष्वपि विनयः कर्तव्य इत्याह—

राइणिय अराइणीएसु अज्जासु चेव गिहिवग्गे ।
विणओ जाहरिहो सो कायव्वो अप्पमत्तेण ॥ १२९॥

'राइणिय अराइणिएसु' यथा रत्नानि दुर्लभानि अभिलषितदानक्षमाणि तथैव सम्यग्दर्शनज्ञानचारित्राणि श्रद्धानादिपरिणामेनोत्कृष्टेन वर्तमानः राइणिय इत्युच्यते । आत्मनो न्यूनरत्नत्रया अराइणिया अथवा 'रादिणिग ऊमरादिणिगेसु' ज्येष्ठकनिष्ठव्रतेषु च शेषं सुगमं ॥१२९॥

करना निन्दा करना, उनके प्रतिकूल चलना इत्यादि पाप परिणामोंको छोड़ना । और गुरुको जो प्रिय हो और हितकर हो उसमें ही परिणाम लगाना । ये संक्षेपसे मानसिक विनय हैं ॥१२७॥

गा०—इस प्रकार यह प्रत्यक्ष विनय है, परोक्ष विनय भी वह है जो गुरुके अभावमें उनकी आज्ञा निर्देशका आचरण करनेमें की जाती है ॥१२८॥

टी०—यह प्रत्यक्ष विनय है क्योंकि गुरुके सामनेकी जाती है और गुरुके अभावमें जो उनकी आज्ञाका पालन किया जाता है वह गुरुके परोक्षमें होनेसे परोक्ष विनय है । 'आप मुमुक्षु हैं आपको ऐसा ही करना चाहिये और कभी भी उसके विपरीत नहीं करना चाहिये' यह आज्ञा निर्देश है । जैसे 'सम्यग्दर्शन सम्यग्ज्ञान सम्यक् चारित्रमें सदा विहार करना चाहिये', इत्यादि ॥१२८॥

'न केवल गुरुकी ही विनय करना चाहिये किन्तु इनकी भी विनय करना चाहिये यह कहते हैं—

गा०—रत्नत्रयमें जो अपनेसे उत्कृष्ट हैं, रत्नत्रयमें जो अपनेसे हीन है उनमें, आर्यिकाओंमें और गृहस्थवर्गमें वह विनय जो जिस योग्य हो, प्रमाद रहित होकर करना ही चाहिये ॥१२९॥

टी०—जिस प्रकार इच्छित वस्तुको देनेमें समर्थ रत्न दुर्लभ हैं उसी तरह सम्यग्दर्शन सम्यग्ज्ञान और सम्यक् चारित्र रत्न शब्दसे कहे गये हैं । अतः जो उत्कृष्ट श्रद्धान आदि परिणामों से युक्त हैं तथा अपनेसे न्यून रत्नत्रयसे युक्त हैं उनकी विनय करना चाहिये । अथवा 'रादिणिग ऊमरादिणिगेसु' ऐसा पाठ होनेपर भी अपनेसे जो व्रतोंमें ज्येष्ठ हैं और कनिष्ट हैं उनकी विनय करना चाहिये । शेष गाथा सुगम है ॥१२९॥

विनयाभावे दोषमाचष्टे—दोषप्रकटनेन भयमुत्पाद्य विनये दृढता कर्तुम्—

विणएण विप्पहूणस्स हवदि सिक्खा णिरत्थिया सव्वा ।
विणओ सिक्खाए फलं विणयफलं सव्वकल्लाणं ॥१३०॥

'विणएण विप्पहूणस्स' विनयरहितस्य यतेः । **'हवइ सिक्खा णिरत्थिया सव्वा'** सर्वशिक्षा निष्फला । किं शिक्षायाः फलं इत्यारेकय आह—**'विणओ सिक्खाए फलं'** व्यावर्णितः पञ्चप्रकारो विनयः शिक्षायाः फलं । तस्य विनयस्य किं फलं ? पुरुषार्थो हि फलमित्यांशंक्याह **'विणयफलं सव्वकल्लाणं'** सर्वमभ्युदयनिःश्रेयसरूपं कल्याणस्थानमानैश्वर्यादिकं इन्द्रियानिन्द्रियसुखं च ॥१३०॥

विणओ मोक्खद्दारं विणयादो संजमो तवो णाणं ।
विणएणाराहिज्जइ आयरिओ सव्वसंघो य ॥१३१॥

'विणओ मोक्खद्दारं' यथा द्वारमभिमतदेशप्राप्तेरुपायस्तद्वत् मोक्षस्य निरवशेषकर्मापायस्य प्राप्तावुपायो विनय इति मोक्षद्वारमित्युच्यते । निरूपिते पञ्चप्रकारे विनये स्यत्येवे (?) कर्मापायो भवतीति **'विणयादो'** विनयाद् हेतोः **'संजमो'** संयमो भवति । ज्ञानादिविनयेषु अनवरतं प्रवर्तमानो ह्यसंयमं परिहर्तुं शक्नोति नापरः । इन्द्रियकषाययोरप्रणिधानं यदि न स्यात् कथमिन्द्रियसंयमः प्राणिसंयमो वा भवति ? **'तवो'** तपः ज्ञाना-

---

विशेषार्थ—पं॰ आशाधरने अपनी टीकामें 'रादिणिग ऊमरादिणिगेसु' पाठ रखा है— 'रादिणिगा' अपनेसे रत्नत्रयसे अधिक या समान साधु । ऊमरादिणिगा—अपनेसे हीन रत्नत्रय वाले, ऐसा अर्थ किया है । और लिखा है कि अन्य टीकाकार इसका अर्थ इस प्रकार करते हैं— रातिका और अवम रातिका अर्थात् जो अपनेसे तपमें एक रात आदि बड़े या छोटे हैं ॥

दोष प्रकट करनेसे भय उत्पन्न कराकर विनयमें दृढ करनेके लिये विनयके अभावमें दोष कहते हैं—

गा॰—विनयसे रहित साधुकी सब शिक्षा निष्फल होती है । शिक्षाका फल विनय है । विनयका फल सब कल्याण है ॥१३०॥

टी॰—विनय रहित साधुकी सब शिक्षा निष्फल है; क्योंकि पूर्वमें कही पाँच प्रकार की विनय शिक्षाका फल है और उस विनयका फल सर्व कल्याण है । सब लौकिक अभ्युदय और मोक्ष रूप कल्याण उसका फल है अर्थात् विनयसे मान, ऐश्वर्य आदि तथा इन्द्रिय जन्य और अतीन्द्रिय सुख मिलता है ॥१३०॥

गा॰—विनय मोक्षका द्वार है । विनयसे संयम, तप और ज्ञानकी प्राप्ति होती है । विनयसे आचार्य और सर्व संघ अपने वशमें किया जाता है ॥१३१॥

टी॰—जैसे द्वार इष्ट देशकी प्राप्तिका उपाय होता है उसी तरह समस्त कर्मोंके विनाश रूप मोक्षकी प्राप्ति का उपाय विनय है इस लिये मोक्षका द्वार कहा है । पूर्वमें कही पाँच प्रकार की विनयके होनेपर ही कर्मोंसे छुटकारा होता है । विनयसे ही संयम होता है । क्योंकि जो पाँच प्रकारकी विनयोंमें सदा लगा रहता है वही असंयमको त्यागनेमें समर्थ होता है, जो विनयोंमें प्रवृत्ति नहीं करता वह असंयमको नहीं छोड़ सकता । यदि इन्द्रियों और कषायोंकी ओरसे विमुखता न हो तो कैसे इन्द्रिय संयम या प्राणिसंयम हो सकता है । तथा ज्ञानादिकी विनयसे

दिविनयशून्यं अनशनादिकं न कर्म तपतीति विनयहेतुकं तपसः तपस्त्वमिति मत्वोच्यते विनयात्तप इति। 'णाणं' ज्ञानं च विनयहेतुकं। अविनीतो हि ज्ञानं न लभते। 'विणएण' विनयेन। 'आराधिज्जदि' आराध्यते स्ववशे स्थाप्यते। 'आयरिओ' आचार्यः। 'सव्वसंघो य' सर्वश्च संघः ॥१३१॥

आयारजीदकप्पगुणदीवणा अत्तसोधि णिज्झंझा।
अज्जव मद्दव लाघव भत्ती पल्हादकरणं च ॥१३२॥

'आयारजीदकप्पगुणदीवणा' रत्नत्रयाचरणनिरूपणपरतया प्रथममङ्गमाचारशब्देनोच्यते। आचारशास्त्र-निर्दिष्टः क्रमः आचारजीदशब्देन उच्यते। कल्प्यते अभिधीयते येन अपराधानुरूपो दण्डः स कल्पस्तस्य गुणः उपकारस्तेन निर्वर्त्यत्वात्। अनयोः प्रकाशनं 'आयारजीदकप्पगुणदीवणा'। एतदुक्तं भवति—कायिको वाचिकश्च विनयः प्रवर्तमानः आचारशास्त्रनिर्दिष्टं क्रमं प्रकाशयति। कल्पोऽपि विनयं विनाशयतो दण्डयतो विनयं निरूप-यति। तद्भयादयं प्रवर्त्यते इति कल्पसंपाद्य उपकारः प्रकटितो भवति इति केषांचिद् व्याख्यानं। अन्ये तु वदन्ति। कल्प्यते इति कल्प्यं योग्यं कल्प्या गुणाः कल्प्यगुणाः आचारक्रमस्य कल्प्यानां च गुणानां प्रकाशनं 'आयारजीदकप्पगुणदीवणाशब्देनोच्यते' श्रुताराधना चारित्राराधना च कृता भवतीत्येतदाख्यातं अनेनेति।

'अत्तसोधिणिज्झंझा' विनयपरिणतिरात्मशुद्धेर्ज्ञानदर्शनवीतरागात्मिकाया निमित्तमिति आत्मशुद्धि-रुच्यते। अथवा ज्ञानादिविनयपरिणतिः कर्ममलापायलभ्यत्वात् शुद्धिरुच्यते आत्मनः पङ्कापायलभ्या जलावि-

---

शून्य अनशन आदि कर्मको नष्ट नहीं कर सकते। इसलिये तपमें तपपनाका कारण विनय है ऐसा मानकर 'विनयसे तप होता है', कहा है। तथा ज्ञानका कारण भी विनय है। अविनीत पुरुष ज्ञान प्राप्त नहीं कर सकता। और विनयसे आचार्य तथा समस्त संघ अपने वशमें हो सकता है ॥१३१॥

गा०—आचारके क्रम तथा कल्प्य गुणोंका प्रकाशन, आत्मशुद्धि, वैमनस्यका अभाव, आर्जव, मार्दव, लघुता, भक्ति और अपने और दूसरोंको प्रसन्न करना, ये विनय के गुण है ॥१३२॥

टी०—रत्नत्रयके आचरणका कथन करनेमें तत्पर होनेसे पहले अंगको आचारांग कहते हैं। और आचार शास्त्रमे कहे गये क्रमको 'आचारजीत' शब्दसे कहते हैं। 'कल्प्यते' अर्थात् जो अपराधके अनुरूप दण्डको कहता है वह कल्प है उसका गुण अर्थात् उपकार। इन दोनोंका प्रकाश 'आचारजीदकप्पगुणदीवणा' है। इसका अभिप्राय यह है कि कायिक और वाचिक विनयके करनेसे आचारशास्त्रमें कहे गये क्रमका प्रकाशन होता है। कल्प भी विनयको न मानने वाले साधुको दण्डका विधान करता है अतः विनयका ही निरूपण करता है। उसके भयसे साधु विनय करता है इस प्रकार कल्पके द्वारा किया जाने वाला उपकार प्रकट होता है। ऐसा किन्ही का व्याख्यान है। अन्य टीकाकार कहते हैं—

'कल्प्यते इति कल्प्यं' अर्थात् योग्य। कल्प्य गुणोंको कल्प्यगुण कहते हैं। आचारके क्रमका और कल्प्य गुणोंका प्रकाशन 'आयारजीद कल्प गुण दोवणा' शब्दका अर्थ है। इससे यह कहा है कि विनय करनेसे श्रुतकी आराधना और चारित्र की आराधना होती है। तथा विनय करना आत्म शुद्धिका अर्थात् ज्ञान दर्शन और वीतराग रूप परिणतिका निमित्त है। अथवा ज्ञानादि विनय रूप परिणति कर्ममलके विनाशसे प्राप्त होती है अतः उसे आत्माकी शुद्धि कहते हैं। जैसे

शुद्धिरिव । वैमनस्याभावो 'णिज्झंझा' विमनस्को भवति विनयहीनो गुर्वादिभिरननुगृह्यमाणः ।

'अज्जवं' आर्जवं नाम ऋजुमार्गवृत्तिः, शास्त्रनिर्दिष्टं वा चरणं ऋजु । 'मद्दव' अभिमानत्यागो मार्दवं परगुणातिशये श्रद्धानेन, तन्माहात्म्यप्रकाशनेन च विनयेन च अभिमाननिरासः कृतो भवति । लाघवं विनीतो हि आचार्यादिषु न्यस्तभरो भवतीति लाघवं विनयमूलं । 'भत्ती' विनीतस्य हि सर्वजनो विनीतो भवति इति विनयहेतुका भक्तिः । 'पल्हादकरणं' च प्रकृष्टं सुखं प्रकृष्टसुखं प्रह्लादस्तस्य करणं क्रिया प्रह्लादकरण-मित्युच्यते । येषां विनयः क्रियते तेषां सुखं संपादितं भवति इति परानुग्रहो गुणः आत्मनो वा प्रह्लादकरणं । कथमविनीतो हि निर्भर्त्सनादिभिरनवरतं दुःखितो भवति । विनीतो हि निर्भर्त्सनाद्यभावात् सुखी भवति । बाधाभावे एव सुखव्यवहारो लोके ॥१३२॥

कित्ती मेत्ती माणस्स भंजणं गुरुजणे य बहुमाणो ।
तित्थयराणं आणा गुणाणुमोदो य विणयगुणा ॥१३३॥

'कित्ती' विनीतोऽयमिति संशब्दनं कीर्तिः । 'मेत्ती' परेषां दुःखानुत्पत्त्यभिलाषो मैत्री । परस्य दुःखं नैवेच्छति विनीत इति । 'माणस्स भंजणं' मानस्य भङ्गः ।

ननु मार्दवशब्देनाभिहित एव मानभङ्गः पूर्वसूत्रे ततः पौनरुक्त्यं इति । उच्यते 'माणस्स भंजणं' 'परस्स' इति शेषः एकस्य विनयदर्शनात् परोऽपि स्वं मानं जहाति । गतानुगतिको हि प्रायेण लोकः ।

कीचड़के दूर होनेसे जलादिकी शुद्धि होती है । 'णिज्झंझा' का अर्थ वैमनस्यका अभाव है । जो विमनस्क होता है अर्थात् जिसका मन स्थिर नही होता वह विनय हीन होता है । गुरु उसपर अनुग्रह नहीं करते । ऋजु मार्ग पर चलनेको आर्जव कहते हैं और शास्त्रमे कहे गये आचरणको ऋजु कहते हैं । मार्दवका अर्थ अभिमानका त्याग है । दूसरेके गुणातिशयमे श्रद्धा करनेसे और उनके माहात्म्यको प्रकट करनेसे तथा विनय करनेसे अभिमानका निरास स्वयं हो जाता है । जो विनीत साधु होता है वह अपना भार आचार्यपर सौंपकर लघु हो जाता है अर्थात् आचार्य स्वयं उसकी चिन्ता करते हैं अतः लाघव का मूल विनय है । जो विनीत होता है सभी मनुष्य उसकी विनय करते है अतः विनय भक्तिका कारण है । प्रकृष्ट सुखको प्रह्लाद कहते हैं उसका करना प्रह्लादकरण है । जिनकी विनय की जाती है उनको सुख होता है इस प्रकार दूसरोंको प्रसन्न करना विनयका गुण है । अपनेको प्रसन्न करना भी विनयका गुण है क्योंकि जो अविनयी होता है सब उसका तिरस्कार आदि करते हैं अतः वह निरन्तर दुखी रहता है । और जो विनयी होता है उसका कोई तिरस्कार आदि नहीं करता, अतः वह सुखी रहता है क्योंकि लोकमें बाधाके अभावको ही सुख कहा जाता है ॥१३२॥

गा०—कीर्ति, मित्रता, मानका विनाश, गुरुजनोंका बहुमान, और तीर्थङ्करोंकी आज्ञाका पालन और गुणोंकी अनुमोदना ये विनयमें गुण हैं, ॥१३३॥

टी०—यह विनयी है ऐसा कहना कीर्ति है । विनयीकी कीर्ति होती है । दूसरोंको दुःख न होनेकी भावना मैत्री है ! जो विनीत होता है वह दूसरोंको दुःख नहीं चाहता । और मानका भंग होता है ।

शङ्का—पूर्व गाथामें मार्दव शब्दसे मानभंगको कहा ही है । पुनः कहनेसे पुनरुक्तता दोष आता है ?

नूनमभिमानत्यागो गुणो अन्यथा किमित्ययं विनयं करोतीति । गुरवो हि बहुमान्याः कृता भवन्ति विनयेनेत्याह—'गुरुजने य बहुमाणो' इति ।

'तित्थयराणं आणा संपादिदा होदित्ति' शेषः । विनयमुपदिशतां तीर्थकृतां आज्ञा संपादिता भवति, अनुष्ठितेन विनयेन । 'गुणाणुमोदोय' गुणिषु विनयं प्रवर्तयता तदीयगुणानुमननं कृतं भवति इति । केचिद् गुणेषु श्रद्धानादिषु हर्षः कृतो भवतीत्येवं वदन्ति । एते विनयगुणाः । गुणशब्द उपकारवचनोऽत्र विनयजन्यत्वाद्विनयस्य गुणा इत्युच्यन्ते ॥१३३॥

विनयव्याख्यानानन्तरं समाधिनिरूपणार्थ उत्तरप्रबंधः । योग्यस्य, गृहीतलिङ्गस्य, ज्ञानभावनोद्यतस्य, ज्ञाननिरूपते विनये वर्तमानस्य, रत्नत्रये मानसं सम्यगाराधनं न्याय्यमित्यधिकारसंबन्धोऽनुगंतव्यः । चेतः समाहितं कीदृक् तस्य वा समाहितस्य किं फलमिति चोद्यद्वयप्रतिविधानार्था[1] गाथा ।

चित्तं समाहिदं जस्स होज्ज वज्जिदविसोत्तियं वसियं ।
सो वहदि णिरदिचारं सामण्णधुरं अपरिसंतो ॥१३४॥

'चित्तं समाहिदं जस्स' जस्स चित्तं वज्जिदविसोत्तिगं वसियं समाहिदं इति पदघटना । यस्य चेतः परित्यक्ताशुभपरिणतिप्रसरं वशवर्ति च यत्र नियुङ्क्ते तत्रैव तिष्ठति, तच्चित्तं समाहितमिति ग्राह्यम् । [2]अत्रैवं

समाधान—यहाँ परके मानभंगको कहा है। एक की विनय देखकर दूसरा भी अपना मान छोड़ देता है, क्योंकि लोग प्रायः गतानुगतिक होते हैं। दूसरोंको जैसा करता देखते हैं स्वयं भी वैसा करते हैं। वे सोचते हैं—निश्चय ही अभिमानका त्याग गुण है, अन्यथा यह विनय क्यों करता। विनयसे गुरुवोका बहुत मान होता है क्योंकि विनयी शिष्य अपने गुरुजनोंका बहुत सम्मान करता है।

तथा तीर्थङ्करोंकी आज्ञाका पालन होता है। अर्थात् विनयका उपदेश देने वाले तीर्थंकरों की आज्ञाका पालन विनय करने से होता है। तथा गुणीजनों की विनय करनेसे उनके गुणोंकी अनुमोदना होती है। कोई कहते हैं कि श्रद्धानादि गुणोंमें हर्ष प्रकट होता है। ये विनयके गुण हैं। यहाँ गुणशब्द उपकारवाची है। विनयसे पैदा होनेके कारण इन्हे विनयके गुण कहते हैं॥१३३॥

विनयका कथन करनेके पश्चात् समाधिका कथन करते हैं। जो योग्य हो, जिसने साधु लिंग स्वीकार किया हो, ज्ञान भावनामें तत्पर हो, शास्त्र निरूपित विनयका पालन करता हो और जिसका मन रत्नत्रय में हो, उसको सम्यक् आराधना करना योग्य है, इस प्रकार अधिकार का सम्बन्ध लगाना चाहिये। अब समाहित चित्त कैसा होता है और उसका क्या फल है? इन दो प्रश्नों का उत्तर गाथा द्वारा देते हैं—

गा०—जिसका चित्त अशुभ परिणामोंके प्रवाहसे रहित और वशवर्ती होता है वह चित्त समाहित होता है। वह समाहित चित्त बिना थके निरतिचार चारित्रके भारको धारण करता है॥१३४॥

टी०—जिसका चित्त अशुभ परिणामोंके प्रवाहको छोड़ देता है और जहाँ उसे लगाया जाय वहीं ठहरा रहता है वह चित्त समाहित जानना। यहाँ यह विचार करते हैं कि यह चित्त

---

१ प्रतिविबोधना आ० मु०। २. अन्यैरेवं आ० मु०।

विचार्यते । किमिदं चित्तं नाम ? मन इति चेद् द्रव्यमनो भावमनश्चेति तद्द्विप्रकारं, कस्येह ग्रहणं ? न तावत् द्रव्यमनः पुद्गलत्वादसंभविनी कर्मादाननिमित्ततया परिणतिरिति । 'वज्जिदविसेसोत्तिगमिति' विशेषणम- संभवीति । न च तद्वशवर्त्यात्मनः । तेन भावमनो गृह्यते । नोइन्द्रियमतिः सा रागादिसहभाविनी तद्रहिता चास्तीति युज्यते 'वज्जिद विसेसोत्तिगं' इति विशेषणं वसिगमिति च तस्यां घटते । नोइन्द्रियमतिज्ञानावरण- क्षयोपशमवत आत्मनो वशेन नोइन्द्रियमतिर्वर्तते । तथा हि रागकोपभयदुःखादयो नटादीनां वशेन परिणामा वर्तंते तत्कार्यपुलकादिदर्शनेनानुमीयमाना । तद्वदेव नोइन्द्रियमतिरपि आत्मेच्छया क्वचिदेवावरुद्धानुभूयते इति । 'सो' सः 'समाहिदचित्तो' वहति वहदि धारयति । तथा च प्रयोग.—विणय वहति धारयति इति गम्यते । 'णिरदिचारं' निरतिचारं निर्दोषं । किं ? सामण्णधुरं रागकोपानुपप्लुतचित्तः समण इत्युच्यते । तथा च नैरुक्तका वदन्ति 'सममणो' समणो इति । समणस्स भावो सामण्णं । तच्च किं ? समानता चारित्रं । तस्य भारं कीदृश निरतिचारं निर्मलं । 'अपरिसंतो' अश्रान्तश्चारित्रभारोद्वहन फल समाहितचित्तस्येत्याख्यातं भवति । अनिभृतमनस्तायां दोषाख्यानव्याजेन निभृतं मन' कार्यमिति द्रढयत्युत्तरगाथया । कश्चित्कंचिदुज्जयिनीस्थ दक्षिणापथाभिमुखमाह अल्पधान्य. क्षुद्रजनबहुलो द्रमिलदेश' इति । स एवमुक्तं प्रत्येति अयं जनपदः सुभिक्षः सुजनाधिवासः इति ॥१३४॥

चालणिगय व उदयं सामण्णं गलइ अणिहुदमणस्स ।
कायेण य वायाए जदि वि जधुत्तं चरदि भिक्खू ॥१३५॥

क्या है ? यदि चित्तसे मतलब मनसे है तो उसके दो भेद है—द्रव्यमन और भावमन । यहाँ किसका ग्रहण किया है ? द्रव्यमनका ग्रहण तो संभव नहीं है क्योंकि पौद्गलिक होनेसे कर्मोंके ग्रहणमें निमित्त रूपसे उसकी परिणति सभव नही है । तथा 'वज्जिदविसेसोत्तिगं' यह विशेषण भी संभव नही है । तथा द्रव्यमन आत्माके वशवर्ती भी नही है । अत चित्तसे भावमनका ग्रहण होता है । वह भावमन नोइन्द्रियमति है और नोइन्द्रियमति रागादि सहित और रागादि रहित होती है । उसमें 'वज्जिद विसेसोत्तिग और 'वसिग' दोनो विशेषण घटित होते हैं । नोइन्द्रिय मतिज्ञानावरण के क्षयोपशम वाले आत्माके नोइन्द्रियमति होती है अतः वह उसके वशवर्ती है । जैसे राग, कोप, भय और दुःख आदि परिणाम नट आदिके अधीन होते है क्योंकि उनका कार्य देखकर दर्शकोंको रागादि होते है । इससे अनुमान किया जाता है कि रागादि परिणाम नट वगैरहके वशवर्ती हैं । उसी तरह नोइन्द्रिय मति भी आत्माकी इच्छासे किसी एक विषयमे रुकी हुई अनुभवमें आती है । अर्थात् आत्माको इच्छानुसार भावमन किसी भी विषयमें लीन हो जाता है । वह समाहित चित्त निर्दोष 'सामण्णधुरा' को धारण करता है । जिसका चित्त राग द्वेषसे अबाधित होता है उसे समण कहते हैं । निरुक्तिकार कहते हैं 'सममणो समणो' समता युक्त मन जिसका है वह समण है और समणके भावको सामण्ण कहते है । वह समानता चारित्र है । उसके निरतिचार अर्थात् निर्मल भारको वह अश्रान्त होकर धारण करता है । इससे यह बतलाया है कि समाहित चित्तका फल चारित्रके भारको धारण करना है । जैसे किसी उज्जयिनीके निवासीको जो दक्षिणापथकी ओर जाता था किसी ने कहा कि द्रमिल देशमें अन्नकी कमी है और क्षुद्र जनोंसे भरा है । उसके ऐसा कहने पर वह जान लेता है कि यह देश सुभिक्षशाली और सुजनोंसे भरा है । उसी तरह चित्तकी चंचलतामें दोष कहनेके बहानेसे ग्रन्थकार उत्तर गाथासे यह दृढ़ करते हैं कि मनको निश्चल करना चाहिये ॥१३४॥

'चालणिगयं व उदयं' उदकमिव चालनीगतं । 'सामण्णं' सामान्यं समानभावो । 'गलइ' गलति । कस्स 'अणिहुदमणस्स' अनिभृतं चेतो यस्य । 'कायेण य वायाए' कायेन च वचसा च । 'अदि वि चरदि' यद्यपि चरति प्रवर्तते भिक्षुः । 'बहुसं' यथाशास्त्रेणोक्तं । तथा वाक्कायाभ्यामाचरतोऽपि मनोनिभृतताभावे श्रामण्यं नश्यतीत्यर्थः । तस्माच्चेतःसमाधानं कार्यमित्युपसंहारः ॥१३५॥

मनसो दुष्टतां प्रपञ्चेनोपदिश्य तदेवंभूतं मनो यो निगृह्णाति तस्य श्रामण्य भवति समानभावो नेतरस्येत्येतदुत्तरप्रबन्धेनोच्यते तद्दौरात्म्यप्रकाशनार्थं गाथापञ्चकम्—

वादुब्भामो व मणो परिधावइ अद्दिठदं तह समंता ।
सिग्घं च जाइ दूरंपि मणो परमाणुदव्वं वा ॥१३६॥

'वादुब्भामो' इत्यादिकं । 'वादुब्भामो व' वात्येव । 'मणो' मन. । 'परिधावइ' धावति परिरलर्थकः प्रलंबित इति यथा । 'अट्ठिदं' इति क्रियाविशेषणं अस्थितं धावति । क्वचिद्विषयेऽनवस्थितिरात्माना मनसः । 'तह समंता' तथा समंतात् । 'दूरं' पि दूरमपि । सिग्घं च जाइ' शीघ्रं याति । 'मणो' मन । 'परमाणुदव्वं वा' परम प्रकृष्टो अणुः सूक्ष्मः परमाणु. स एव द्रव्य गुणपर्यायिगमनात् तदिव । एतेन झटिति दूरस्थितविषयग्रहणं तस्य दौरात्म्यमावेदितं ॥१३६॥

अंधलयबहिरमूवो व्व मणो लहुमेव विप्पणासेइ ।
दुक्खो य पडिणियत्तेदुं जो गिरिसरिदसोदं वा ॥१३७॥

गा०—जिसका चित्त चंचल है उसका समान भाव चालनीमे रखे पानीकी तरह गल जाता है। यद्यपि वह भिक्षु कामसे और वचनसे शास्त्रमें कहे अनुसार आचरण करता है ॥१३५॥

टी०—इसका सार यह है कि वचन और शरीरसे शास्त्रानुसार आचरण करने वाले भी साधुका मन यदि निश्चल नहीं है तो उसका श्रामण्य नष्ट हो जाता है। अतः चित्तको स्थिर करना चाहिये। यह उपसंहार है ॥१३५॥

मनकी दुष्टताका विस्तारसे कथन करके, इस प्रकारके मनको जो वशमें करता है उसके समान भावरूप श्रामण्य होता है, अन्यके नही होता, यह आगे कहते हैं। प्रथम ही पाँच गाथाओं से मनकी दुष्टता प्रकट करते हैं—

गा०—बड़े जोरसे चलने वाली हवाकी तरह मन उसीकी तरह चहुँ ओर अस्थिर रूपसे दौड़ता है। और परमाणु द्रव्यकी तरह मन दूरवर्ती भी वस्तुके पास शीघ्र जाता है ॥१३६॥

टी०—प्रचण्डवायुकी तरह मनके अस्थिर गमनसे यह बतलाया है कि मन किसी भी विषयमें स्थिर नहीं रहता। तथा दूरवर्ती वस्तुके पास परमाणु द्रव्यकी तरह शीघ्र जाता है। परम अर्थात् प्रकृष्ट, अणु अर्थात् सूक्ष्म जो है वह परमाणु है। वह परमाणु द्रव्य है क्योंकि गुण पर्यायों वाला है। इससे मनकी दुष्टता बतलाई है कि वह दूर स्थित विषयको झट ग्रहण कर लेता है (जैसे परमाणु एक समयमें चौदह राजु गमन करता है) ॥१३६॥

गा०—मन अन्धे बहरे और गूँगेके समान है शीघ्र ही नष्ट हो जाता है। और पहाड़ी नदीके प्रवाहकी तरह लौटाना अशक्य है ॥१३७॥

'अंधलयबहिरमूओ व मणो हवइ' इति शेषः। अंधबधिरमूकवच्च भवति मनः। कदाचित्क-चित्क्वचिद्विषये सक्तं मनः सन्निहितमपि विषयं न पश्यति, न शृणोति, न ब्रवीति, इति। ननु चक्षुरादेः कर्तृता दर्शनादौ न मनसस्तत्सर्वदापि न किंचित्पश्यति, न शृणोति वक्ति वा ? उच्यते—मनसः करणस्य कर्तृता परशुश्छिनत्तीति यथा। एतदुक्तं भवति—द्रष्टव्ये जीवादिके, श्रोतव्ये जिनवचनादिके, स्वपरहिते वाक्ये च कदाचिदप्रवृत्तिर्मनसो दुष्टतेति। यथा भृत्यो दुष्ट इत्युच्यते स्वामिना नियुक्ते कर्मण्यप्रवर्तमानः। एवं मनोऽप्यात्मना नियुक्तेऽव्यापृतेर्दुष्टमिति भावः। 'लहुमेव विप्पणासेदि य' आशु विनश्यति च। अनित्यतादोषस्तु वस्तुयाथात्म्यग्राहिणो मनसः नो इन्द्रियमतेः। 'दुक्खो य' दुःख अशक्यं। 'पडिणिवत्तेदुं जं' प्रति-निवर्तयितुं वस्तु[१]न्यभूतरूपग्रहणे भूतरूपनिरासे च प्रवृत्तं ता[२]भ्यां निवर्तयितुं न शक्यं रागादिसहचारित्वात् प्रतिनिवर्तयितुं। किमिव 'गिरिसरिदसोदं व' गिरिनदीप्रवाह इव ॥१३७॥

तत्तो दुक्खे पंथे पाडेदुं दुट्ठओ जहा अस्सो।
बीलणमच्छोव्व मणो णिग्घेत्तुं दुक्करो धणिदं ॥१३८॥

'तत्तो' तस्मात्प्रतिनिवर्तनात। 'दुक्खे' दुष्करे 'पंथे' मार्गे। 'पाडेदुं' पातयितुं। किमिव। 'दुट्ठओ जहा अस्सो' दुष्टोऽतिव्यालो यथैवाश्वः। एतेन दुष्करमार्गविपातित्वदोषः प्रकटितः। 'बीलणमच्छोव्व' मसृणतरदेह-मत्स्य इव। 'धणिदं दुक्करो णिघेत्तुं' नितरां दुष्कर ग्रहीतुं मन.। एतेन दुरवग्रहता ख्याता ॥१३८॥

टी०—मन अंधे, बहरे और गूंगे मनुष्यकी तरह है क्योंकि कभी-कभी किसी विषयमें आसक्त मन निकटवर्ती भी विषयको नहीं देखता, नहीं सुनता, और नहीं बोलता।

शङ्का—देखने आदिका काम तो चक्षु आदि इन्द्रियोंका है, मनका नहीं। मन तो सदा ही न कुछ देखता है, न सुनता है, न बोलता है।

समाधान—मन करण है फिर भी उसे कर्ता कहा है। जैसे परशु लकड़ी काटनेमे करण है फिर भी उसे कर्ता कहा जाता है परशु काटता है। इसका आशय यह है कि देखने योग्य जीवादिमें, सुनने योग्य जिन वचन आदिमें और स्वपरका कल्याण करने वाले वचनोंमें मनका प्रवृत्त न होना उसकी दुष्टता है। जैसे जो सेवक स्वामीके द्वारा कहे गये कार्यमें प्रवृत्त नही होता उसे दुष्ट कहा जाता है। उसी तरह मन भी आत्माके द्वारा नियुक्त कार्यमें प्रवृत्त न होनेमे दुष्ट कहा जाता है। तथा शीघ्र नष्ट हो जाता है। इससे वस्तुके यथार्थ स्वरूपको ग्रहण करने वाले मनकी अनित्यताका दोष बतलाया है। तथा वस्तुके अविद्यमान स्वरूपको ग्रहण करनेमे और विद्यमान स्वरूपका निरास करनेमे प्रवृत्त हुए मनको उससे हटाना वैसे ही अशक्य है जैसे पहाड़ी नदीके प्रवाहको लौटाना अशक्य होता है; क्योंकि मन रागादिभावमें आसक्त होता है ॥१३७॥

गा०—अयोग्य विषयसे हटानेसे मन दुष्कर मार्गमे गिराता है। जैसे दुष्ट घोड़ा गिराता है। अति चिकने मच्छकी तरह पकड़ने में अत्यन्त दुष्कर है ॥१३८॥

टी०—जैसे कुमार्गपर चलते हुए दुष्ट घोड़ेको रोकनेसे वह मार्गमें गिरा देता है वैसे ही मन भी खोटे मार्गमें गिराता है। इससे दुष्कर मार्गमें गिरानेका दोष प्रकट किया। तथा जैसे

---

१. तुं यवन्य आ० मु०। २. द्वाभ्यां आ०।

जस्स य कदेण जीवा संसारमणंतयं परिभमंति ।
भीमासुहगदिबहुलं दुक्खसहस्साणि पावंता ॥१३९॥

'जस्स य' यस्य च । 'कदेण' करोति क्रियासामान्यवाची इह चेष्टावृत्तिर्गृहीतस्तेनायमर्थः यस्य मनसश्चेष्टितेन जीवाः संसारं पञ्चविधं परावर्तं परिभ्रमन्ति । 'अणंतयं' अनन्तप्रमाणावच्छिन्नं । 'भीमासुहगदिबहुलं' भयावहाशुभनरकादिगतिप्रचुरं । 'दुक्खसहस्साणि' शारीरागन्तुकमानसस्वाभाविकाख्यानि प्रत्येकमनेकविकल्पानि । 'पावंता' प्राप्नुवन्तो जीवाः । एतेन चतुर्गतिपरावर्तमूलतादोषः प्रकटितः ॥१३९॥

जम्हि य वारिदमेत्ते सव्वे संसारकारया दोसा ।
णासंति रागदोसादिया हु सज्जो मणुस्सस्स ॥१४०॥

'जम्हि' यस्मिश्च मनसि । 'वारिदमेत्ते' वारित एव मात्रग्रहणं वारणादन्य निराकर्तुमुपात्तं । मनो निवारणादेव 'रागदोसादिया' रागद्वेषादयः । 'णासंति खु' नश्यन्त्येव । 'सज्जो' सद्यः तदानीमेव । 'संसारकारया' परावर्तपञ्चकस्य संपादनोद्यता: ॥१४०॥

इय दुट्ठयं मणं जो वारेदि पडिट्ठवेदि य अकंपं ।
सुहसंकप्पपयारं च कुणदि सज्झायसण्णिहिदं ॥१४१॥

चिकने शरीर वाली मछलीको पकड़ना कठिन है वैसे ही मनको रोकना बहुत कठिन है । इससे 'दुरवग्रहता' नामक दोष कहा ॥१३८॥

गा०—जिस मनकी चेष्टासे जीव हजारों दुःख भोगते हुए भयंकर अशुभ गतियोंसे भरे हुए अनन्त संसारमें भ्रमण करते हैं ॥१३९॥

टी०—गाथामें आया 'कदेण' शब्द करने रूप क्रियासामान्यका वाची है किन्तु यहाँ उसका अर्थ चेष्टा लिया है । अतः ऐसा अर्थ होता है कि जिस मनकी चेष्टासे जीव पाँच परावर्तन रूप संसारमें भ्रमण करते हैं, वह संसार अनन्त प्रमाण वाला है और उसमें भयानक नरक आदि अशुभ गतियोंका बाहुल्य है । तथा वे जीव शारीरिक, आगन्तुक, मानसिक स्वाभाविक आदि अनेक प्रकारके दुःखोको पाते हैं । इससे 'चतुर्गतिमे भ्रमणका मूल' दोष प्रकट किया ॥१३९॥

गा०—जिस मनके निवारण करने मात्रसे मनुष्यके सब संसारके कारक राग द्वेष आदि दोष शीघ्र ही नष्ट हो जाते हैं ॥१४०॥

टी०—'वारिदमेत्ते' में 'मात्र' पदका ग्रहण निवारणसे अन्यका निराकरण करनेके लिये किया है । अर्थात् अन्य कुछ न करके मात्र मनको रोका जाये तो पाँच परावर्तन रूप संसारके कारण सब दोष तत्काल नष्ट हो जाते हैं ॥१४०॥

गा०—उक्त प्रकारसे जो दुष्ट मनको रागादिसे निवारण करता है, और निश्चलरूपसे श्रद्धानरूप परिणामादिमें स्थापित करता है । तथा शुभसंकल्पोंमें मनको प्रवृत्त करता है और स्वाध्यायमें मनको लगाता है उसके सामण्ण-समताभाव होता है ॥१४१॥

'इय' एवं व्यावर्णितरूपेण । 'दुट्ठयं' दुष्टकं दुष्टं । 'मणं' मनो । 'जो वारेदि' यो निवारयति रागादिभ्यः । 'पदिट्ठवेदि य' प्रतिष्ठापयति च श्रद्धानपरिणामादौ । 'अकंपं' निश्चलं । क्रियाविशेषणमेतत् । तस्स सामण्णं होदि वक्ष्यमाणेन संबन्धः । 'सुभसंकप्पपयारं जो कुणदि तस्स सामण्णं होदित्ति' संबंधनीयं । शुभः संकल्पः तस्मिन्प्रकृष्टश्चारो गमनं प्रवृत्तिर्यस्य मनसस्तच्छुभसंकल्पप्रचारं मनो यः करोति । 'सज्झायसण्णिहिदं' च जो कुणदि तस्स सामण्णं इति संबध्यते । सम्यगध्ययनं स्वाध्यायः द्रुतविलंबितादिदोषरहितत्वं अर्थव्यञ्जनशुद्धिश्च सम्यक्त्वं । स पुनः पञ्चप्रकारः वाचनाप्रश्नानुप्रेक्षाम्नायधर्मोपदेशभेदेन ।

प्रश्नस्य कथं स्वाध्यायता ? प्रश्नो हि ग्रन्थेऽर्थे वा संशयच्छेदाय इत्थमेवैतदिति निश्चितार्थबलाधानाय वा प्रच्छनं । न[1] हि यः पृच्छति ग्रन्थमर्थं वा सोऽधीते ? अध्ययनप्रवृत्त्यर्थत्वात् प्रश्नेऽध्ययनव्यपदेशः इन्द्रप्रतिमार्थे दारुणि इन्द्र[2]व्यपदेश इव । अथवा किमिदमेवं पठितव्यमिति अधीत एव ग्रन्थे संदिहानः । अर्थसंदेहेऽपि किमस्य वाक्यस्य पदस्य वायमर्थः इति । यद्वाप्यते एवं निश्चितबलाधानार्थे प्रश्ने योज्यम् ।

अनुप्रेक्षा कथं स्वाध्यायः ? अधिगतार्थस्य मनसाभ्यासोऽनुप्रेक्षा अन्तर्जल्परूपमध्ययनमस्त्येव तत्रापीति मन्यते ।

घोषपरिशुद्धं श्रुतं परावर्त्यमानं आम्नायः स्वाध्यायो भवत्येव ।

आक्षेपणी, विक्षेपणी, संवेजनी, निर्वेदनी चेति कथाश्चतस्रस्तासामुपदेशो धर्मोपदेशः स च स्वाध्यायः । एतस्मिन्स्वाध्याये सम्यक् निहितं निक्षिप्तं मनो य करोति इत्यर्थः ।

टी०—जो ऊपर कहे अनुसार रागादिसे दुष्ट मनको हटाता है और श्रद्धानादिमें निश्चलरूपसे मनको स्थापित करता है उसके सामण्ण होता है इस प्रकार आगेके साथ सम्बन्ध लगाना चाहिए। शुभ संकल्पमें प्रकृष्ट चार प्रचार अर्थात् प्रवृत्ति जिसके मनकी है अर्थात् जो मनको शुभ संकल्पोंमें लगाता है उसके सामण्ण होता है। सम्यक् अध्ययनको स्वाध्याय कहते हैं। जल्दी पढ़ना या देरसे धीरे-धीरे पढ़ना इत्यादि दोषोंसे रहित होना तथा अर्थशुद्धि और वचनशुद्धिका होना सम्यक्पना है। उस स्वाध्यायके पाँच भेद हैं—वाचना, प्रश्न, अनुप्रेक्षा, आम्नाय और धर्मोपदेश। प्रश्न कैसे स्वाध्याय है यह बतलाते हैं—ग्रन्थ अथवा अर्थके सम्बन्धमें संशयको दूर करनेके लिए अथवा निश्चित अर्थको पुष्ट करनेके लिए पूछना प्रश्न है। जो ग्रन्थ या अर्थको पूछता है वह अध्ययन नहीं करता, किन्तु ऐसा करना अध्ययनकी प्रवृत्तिके लिए होता है इससे प्रश्नको अध्ययन कहा है। जैसे इन्द्रकी प्रतिमा बनानेके लिए लाये गये काष्ठको इन्द्र कहा जाता है। अथवा 'क्या इसे इस प्रकार पढ़ना चाहिए' इस तरह पढ़े हुए ही ग्रन्थमें सन्देह करना, तथा अर्थमें सन्देह होनेपर भी 'क्या इस पद अथवा वाक्यका यह अर्थ है' इस प्रकार पूछना स्वाध्यायका कारण होनेसे स्वाध्याय है। इसी प्रकार निश्चित अर्थको दृढ़ करनेके लिए भी प्रश्नकी योजना करनी चाहिए। अनुप्रेक्षा कैसे स्वाध्याय है ? जाने हुए अर्थका मनसे अभ्यास करनेको अनुप्रेक्षा कहते हैं। इसमें भी अन्तर्जल्परूप अर्थात् मन ही मनमें अध्ययन होता ही है। शुद्ध उच्चारणपूर्वक श्रुतका पाठ करना आम्नाय है। यह तो स्वाध्याय है ही। आक्षेपणी, विक्षेपणी, संवेजनी और निर्वेदनी इस प्रकार चार कथाएँ हैं। उनका उपदेश धर्मोपदेश है। यह भी स्वाध्याय है। इस स्वाध्यायमें जो मनको सम्यक्रूपसे लगाता है उसके सामण्ण होता है।

---

१. तर्हि यद्गृच्छावग्रहमर्थं वा–आ० मु०। २. द्रव्यव्य–आ० मु०।

अत्रैवं पदघटना अध्याहृतं कृत्वा 'इय दुट्ठकं मणो तो वारेदि अवंमं वडिट्ठवेदि य जो मणं सुमसंकप्पपयारमेव कुणदि सज्झायसण्णिहिदं काऊण इदि'। एवं दुष्टं मनः स वारयति निश्चलं प्रतिष्ठापयति वा। यो मनः शुभसंकल्पप्रचारमेव करोति। स्वाध्याये सन्निहितं कृत्वेति सूत्रार्थः। तस्येत्थंभूतस्य श्रामण्यं समाप्तता वा भवति ॥१४१॥

जो विय विणिप्पडंतं मणं णियत्तेदि सह विचारेण।
णिग्गहदी य मणं जो करेदि अदिलज्जियं च मणं ॥१४२॥

'जो वि य' यश्चापि। 'विणिप्पडंतं' वि शब्दो नानार्थः, निर् इत्युपसर्गो बहिर्भावे, पडिर्गमनार्थः। ततोऽयमर्थोऽस्य पदस्य विचित्रं बहिर्निर्गच्छन्निवर्तयेदिति। ननु च सत्यभ्यंतरे कस्मिंश्चित्तदपेक्षो भवति बहिर्भावस्ततः किम्? अभ्यन्तरमिह गृहीतं रत्नत्रयं। कथमस्याभ्यन्तरता? आत्मनो निजस्वरूपत्वमिति। रागकोपादयस्तु चारित्रमोहोदयजा भावाः परिणामा बाह्या मिथ्यात्वासंयमकषायादिभेदेन विचित्रास्तदभिमुखतया प्रवृत्तेः। 'णियत्तेदि सह विचारेण जो' इति शेषः

कोऽसौ विचारः? उच्यते—इदं तत्त्वाश्रद्धानं, इयं च हिंसादिपरिणतिरयं वा क्रोधादिको भावो मया परिणामिकारणभूतेन निर्वर्त्यमानो जातिजरामरणपरिणामरूपानन्तसंसारकारणानां कर्मणां मूलोत्तरप्रकृतिभेदेन संख्यात[1]विकल्पानां, स्थितिविशेषमात्मप्रदेशेष्ववस्थानरूपं, तीव्रमध्यममन्दरूपाश्रद्धानासंयमकषायपरि-

इस प्रकार जो दुष्ट मनका निवारण करता है और उसे श्रद्धानादिमें स्थिर करता है तथा जो मनको शुभसंकल्पोंमें ही लगाता है और स्वाध्यायमें प्रवृत्त रहता है उसके श्रामण्य अथवा समता होती है ॥१४१॥

गा०—जो भी रत्नत्रयसे च्युत होकर विचित्र रागादिमें जानेवाले मनको विचारोंके साथ हटाता है, और जो मनको निन्दा गर्हाके द्वारा निगृहीत करता है—उसकी निन्दा करता है, और मनको अति लज्जित करता है उसके सामण्ण होता है ॥१४२॥

टी०—'विणिप्पडंतं' में 'वि' शब्दका अर्थ अनेक है, 'निर' यह उपसर्ग बहिर्भावके अर्थमें है और 'पडि' का अर्थ गमन है। अतः इस पदका अर्थ है अनेक बाह्य विषयोंमें जानेवाले मनको रोके।

शङ्का—किसी अभ्यन्तरके होनेपर उसकी अपेक्षा बहिर्भाव होता है यहाँ वह अभ्यन्तर कौन है?

समाधान—रत्नत्रय है और वह आत्माका निजस्वरूप होनेसे अभ्यन्तर है। राग-कोप आदि तो चारित्रमोहके उदयसे होनेवाले भाव हैं, वे बाह्य हैं। तथा मिथ्यात्व, असंयम और कषाय आदिके भेदसे नाना हैं। उनके अभिमुखरूपसे प्रवृत्तिको जो विचारोंसे रोकता है।

शंका—वह विचार कौन है?

समाधान—यह जो तत्त्वका अश्रद्धान है, अथवा हिंसादिरूप परिणति है, अथवा क्रोधादि भाव है, इन रूप मैं परिणमन करता हूँ तो ये हिंसादिरूप परिणाम जन्म जरा मरण परिणामरूप अनन्त संसारके कारण जो कर्म है, जो मूलप्रकृति और उत्तर प्रकृतिके भेदसे संख्यात भेदवाले हैं,

१. संख्यातासंख्यात-आ० मु०।

भावनिर्वर्तनसामर्थ्यमनुभवाख्यं च निर्वर्तयति । तानि चात्मप्रदेशस्थान्यनन्तप्रदेशपुद्गलस्कन्धद्रव्याणि सन्निहित-द्रव्यक्षेत्रकालभवभावसहायापेक्षया पुनरपि मिथ्यात्वादिपरिणाममापादयन्ति । न हि सन्निहिताविकलकारण-समूहस्य कार्यस्य अनुत्पत्तिर्नाम संभाव्यते । तेन चाश्रद्धानादिपरिणामेन तथैव कर्मणामादानं, आत्तानां स्थितिः, सामर्थ्यातिशयः इत्यादिका परंपरता तयानन्तकालपरिभ्रमणमिति महानयमनर्थो मम भविष्यतीति, एवंभूतेन विचारेण मनो निवर्तयति यस्तस्य श्रामण्यमिति सबन्धः । 'णिग्गहदि य मणं जो' यो मनो निगृह्णाति 'हा दुट्ठं चिंतितमिदमिति' निन्दागर्हाभ्यां तस्य श्रामण्यमिति संबन्धः । 'करेदि अविलज्जिदं च मणं', करोत्यतीव लज्जा-परं यो मनः । कथं संसारमहितं तत्कारणभूतान्परिणामान्मुक्ति तदुपायांश्च भावानधिगच्छतः श्रद्धानस्य तत्परि-णामव्यपोहनार्थमेवं गृहीतनिर्ग्रन्थलिंगस्य चिन्तेयमयुक्तेति, निरूपयति, अतिव्रीडा मनसो जनयति ॥१४२॥

दासं व मणं अवसं सवसं जो कुणदि तस्स सामण्णं ।
होदि समाहिदमविसोत्तियं च जिणसासणाणुगदं ॥१४३॥

'अवसं दासं व मणं सवसं जो कुणदि' इति पदसबन्धः । दासं व चेटिपुत्रं अवशवर्तिनं यथा कश्चि-द्बलात्स्ववशं करोत्येवमधीतजिनवचन आत्मनो मनो निरवग्रहतया प्रवृत्त अशुभपरिणामप्रसरे यदि नाम तथापि बलात्तन्निर्भर्त्स्याभिमतशुभभावपरंपरानुकूलतया यः स्थापयति जैनमतामृतास्वादकाग्नितत्सामर्थ्यातिशयस्तस्य

उनके स्थितिबन्ध और अनुभाग बन्धके कारण होते हैं। आत्माके प्रदेशोंमे कर्मोंके अवस्थानका नाम स्थितिबन्ध है और तीव्र मध्यम मन्दरूप अश्रद्धान, असंयम और कषायरूप परिणामोंको उत्पन्न करनेकी शक्तिको अनुभाग बन्ध कहते हैं। आत्माके प्रदेशोंके साथ बन्धको प्राप्त हुए वे अनन्तप्रदेशी पुद्गलस्कन्ध सम्बद्ध द्रव्य क्षेत्र, काल, भव और भावकी सहायता पाकर पुनः मिथ्या-त्वादिरूप परिणामों की उत्पत्तिमें सहायक होते हैं। क्योंकि जिस कार्यके समस्त कारण पूर्णरूपसे विद्यमान होते हैं वह कार्य अवश्य उत्पन्न होता है। उस उत्पन्न हुए अश्रद्धानादिरूप परिणामसे पुनः उसी प्रकारसे नवीन कर्मोंका बन्ध होता है। उनमें स्थिति और अनुभाग शक्ति पड़ती है। इस प्रकार यह परम्परा चलती है। उस परम्परासे अनन्तकाल तक संसारमें भ्रमण करना पड़ता है। इस प्रकार अश्रद्धान आदिरूप परिणाम करनेसे मेरा महान् अहित होगा। इस प्रकारके विचारसे जिसका मन अश्रद्धान आदिसे हटता है उसके श्रामण्य होता है। तथा जो मैंने बुरा किया, बुरा विचारा इत्यादि निन्दा और गर्हासे मनका निग्रह करता है उसके श्रामण्य होता है। तथा जो मनको अत्यन्त लज्जित करता है—हे आत्मन्! ससार अहित है, उसके कारणभूत परिणामोंको, मुक्तिको और मुक्तिके उपायरूप भावोंको तू जानता है उनकी श्रद्धा करता है। संसारके उन कारणोंको दूर करनेके लिए ही तूने निर्ग्रन्थलिंग धारण किया है, तुझे ऐसी चिन्ता नहीं करनी चाहिए इस प्रकार मनको लज्जित करता है उसके श्रामण्य होता है ॥१४२॥

गा०—वशमें रहनेवाले दासकी तरह वशमें न रहनेवाले मनको जो अपने वशमें करता है, उसके एकमात्र शुद्ध चिद्रूपका अवलम्बन करनेवाला पाप परिणामोसे निवृत्त और जिन शासन-का अनुगामी श्रामण्य होता है ॥१४३॥

टी०—वशमें न आनेवाले दासीपुत्रको जैसे कोई बलपूर्वक अपने वशमें करता है, वैसे ही जो जिनागमका अभ्यासी अशुभपरिणामोंके प्रवाहमें वे रोके प्रवृत्त हुए अपने मनको बलपूर्वक उसकी डाँट फटकार करके इष्ट शुभ भावोंकी परम्पराके अनुकूल बनाता है, उसमें यह विशेष

'सामण्णं' समानता 'होदि' भवति। 'समाहिदं' एकमुखं। 'अविसोत्तियं' दूरापसृतविश्वरूपाशुभपरिणामप्रवाहं। 'जिणसासणाणुगदं' संपादितद्रव्यभावकर्मकरपराभवानां यच्छासनं–शिष्यंते जीवादयः पदार्था अनेनास्मिन्वेति शासनं आगमस्तेनानुगतम् ॥१४३॥

योग्यस्य गृहीतमुक्त्युपायलिङ्गस्य श्रुतशिक्षापरस्य पञ्चविधविनयवृत्तेः स्ववशीकृतमनसः अनियतवासो युक्तः। कस्तत्र गुणः ? इत्यारेकायां समाधिगतस्य अनियतविहारगुणप्रकटनार्थं उत्तरसूत्रं—

दंसणसोधी ठिदिकरणभावणा अदिसयत्तकुसलत्तं।
खेत्तपरिमग्गणावि य अणियदवासे गुणा होंति ॥ ४४॥

'दंसणसोधी' दर्शनशुद्धिः। दृशिर प्रेक्षणे इति पठितोऽपि धातुः श्रद्धानार्थवृत्तिरिह गृहीतः। धातूनामनेकार्थत्वात्। तथा च सूत्रं—'तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्'। [त०सू० १।२] इति जिनागमनिरूपितार्थविषयश्रद्धानमिह दर्शनशब्देन भण्यते। तस्य शुद्धिर्नैर्मल्यं। 'ठिदिकरणं' स्थितिकरणं रत्नत्रयपरिणामस्यात्मनोऽपायः[1]। तस्य करणं स्थितिकरणं। 'भावणा' भावना अभ्यास पुनः पुनर्वृत्तिः। 'अदिसयत्तकुसलत्तं' अतिशयितेष्वर्थेषु निपुणता। 'खेत्तपरिमग्गणावि य क्षियंति[2] निवसन्ति तस्मिन्निति क्षेत्रं। ग्रामनगरादिकं क्षेत्रं। तस्य क्षेत्रस्य अन्वेषणा च। अनियतस्थानवसने गुणा 'होंति' भवन्ति ॥१४४॥

सामर्थ्य जैनमतरूपी अमृतका पान करनेसे आई है। उसके 'सामण्ण' अर्थात् समभावपना होता है। वह श्रामण्य एक मुख होता है, अशुभपरिणाम प्रवाहको, जिन्होंने विश्वको अपने रंगमें रंगा है, दूर करता है, और जिनशासनानुगत होता है। द्रव्य और भावकर्मके द्वारा किये जानेवाले पराभवोंको जिन्होंने नष्ट कर दिया है उन जिनका शासन। जिसके द्वारा या जिसमें जीवादि पदार्थ सिखाये जाते हैं उसे शासन कहते हैं अर्थात् जिनागमका अनुगामी होता है ॥१४३॥

जो योग्य है, जिसने मुक्तिका उपाय जो निर्ग्रन्थलिंग है उसे स्वीकार किया है, श्रुतके अभ्यासमें तत्पर है, पाँच प्रकारकी विनयका पालन करता है, और जिसने मनको अपने वशमें कर लिया है उसके लिए अनियतवास युक्त है। उसमें क्या गुण है ? ऐसी शंका होनेपर समाधि करनेवालेके अनियत विहारके गुण प्रकट करते हैं—

गा०—दर्शन विशुद्धि, स्थितिकरण, भावना, अतिशय अर्थोंमें निपुणता और क्षेत्रका अन्वेषण ये अनियत स्थानमें बसनेमें गुण होते हैं ॥१४४॥

टी०—दर्शन शब्द जिस 'दृशिर' धातुसे बना है यद्यपि उसका अर्थ देखना है फिर भी यहाँ उसका अर्थ श्रद्धान ग्रहण किया है। क्योंकि धातुओंके अनेक अर्थ होते हैं। तत्त्वार्थसूत्रमें कहा भी है—'तत्त्वार्थका श्रद्धान सम्यग्दर्शन है।' अतः यहाँ दर्शन शब्दसे जिनागममें कहे गये अर्थोंका श्रद्धान लिया है। उसकी शुद्धि अर्थात् निर्मलता दर्शनविशुद्धि है। आत्माके रत्नत्रयरूप परिणामका नष्ट न होना स्थिति है। उसका करना स्थितिकरण है। पुनः पुनः अभ्यास करनेको भावना कहते है। ग्राम नगर आदि क्षेत्र हैं। उसकी खोज, ये सब अनियत स्थानमें बसनेके गुण हैं ॥१४४॥

विशेषार्थ—समाधिमरणके इच्छुकको एक स्थानमें नहीं बसना चाहिए। अनियत स्थानमें

---

१. पायपरिणामः तस्य आ० मु०। २. क्षंति आ०। क्षयंति मु०।

दंसणसुद्धी इत्येतत्पदव्याख्यानकारिणी गाथा—

जम्मणअभिणिक्खवणे णाणुप्पत्ती य तित्थचिण्हणिसिहीओ ।
पासंतस्स जिणाणं सुविसुद्धं दंसणं होदि ॥१४५॥

'जम्मण' जन्माभिनवशरीरग्रहणं । तद्यस्मिन्क्षेत्रे जातं तदिह साहचर्याज्जन्मशब्देनोच्यते । गृहीतशरीरस्य वात्मनो जनन्युदराद्यत्र निष्क्रमणं जातं तद्वा । 'अभिणिक्खवणे' रत्नत्रयाभिमुख्येन गृहाद्बहिर्गमनं यस्मिन्क्षेत्रे तदिह निष्क्रमणं । 'णाणुप्पत्ती य' केवलज्ञानावरणक्षयात् सर्वार्थयाथात्म्यग्रहणक्षमं यत्केवलं तदिह ज्ञानमिति गृहीतं । सामान्यशब्दानामपि विशेषवृत्तिः प्रतीतैव । तस्य ज्ञानस्योत्पत्तिर्यस्मिन् क्षेत्रे तदिह साहचर्यात् 'णाणुप्पत्ती य' शब्देनोच्यते । 'तित्थं' चिण्हं । तीर्थमिह समवशरणं गृह्यते । तरन्ति तस्मिन्भव्याः पापविनाशार्थिनः इति । तस्य चिह्नतया स्थिता मानस्तम्भाः । 'णिसिहीओ' निषिधीयोगिवृत्तिर्यस्यां भूमौ सा निषिधी इत्युच्यते । एतज्जन्मादिस्थानं श्रुतेन प्रागवगतं । 'पासंतस्स' पश्यतः । कस्य ? 'जिणाणं' जिनानां 'सुविसुद्धं' सुष्ठु विशुद्धं । 'दंसणं' श्रद्धानं । 'होदि' भवति । एतदुक्तं भवति—

देशान्तरातिथेः जिनानां जन्मादिस्थानदर्शनान्महती श्रद्धोत्पद्यते । यथा कांचिद्वर्ण्यमानरूपां विलासिनी परोक्षामगवत्य परस्य वचनोपजाताभिलाषस्य तस्यां दर्शनपथमुपजाताया श्रद्धातिशयो जायते इति ।

बसनेके उक्त गुण कहे हैं। इन गुणोंका वर्णन ग्रन्थकार आगे स्वयं करते हैं। टीकाकारने भावनाका अर्थ पुनः पुनः अभ्यास किया है और पं० आशाधरने परीषह सहन किया है। आगे ग्रन्थकारने भी यही अर्थ भावनाका किया है। अभ्याससे ही परीषह सहनकी सामर्थ्य होती है। सम्भवतः इसी भावसे भावनाका अर्थ अभ्यास किया है। लोकमें भावनाका यही अर्थ प्रचलित है ॥१४४॥

'दंसणसुद्धी' इस पदका व्याख्यान करनेवाली गाथा कहते हैं—

गा०—जिनदेवोंके जन्मस्थान, दीक्षास्थान, केवलज्ञानकी उत्पत्तिका स्थान और समवसरणके चिह्न मानस्तम्भका स्थान निषीधिका स्थान देखनेवालेके सम्यक्रूपसे निर्मल सम्यग्दर्शन होता है ॥१४५॥

टी०—नये शरीरके ग्रहण करनेको जन्म कहते हैं। वह जन्म जिस क्षेत्रमें हुआ, जन्मके साहचर्यसे यहाँ उस स्थानको जन्म शब्दसे कहा है। अथवा शरीर ग्रहण करनेवाले आत्माका माताके पेटसे निकास जहाँ हुआ वह जन्म है। रत्नत्रय धारण करनेकी भावनासे घरसे बाहर जाना जिस क्षेत्रमें हुआ उसे निष्क्रमण कहा है। केवलज्ञानावरणके क्षयसे सब पदार्थोंके यथार्थस्वरूपको ग्रहण करनेमें समर्थ केवलज्ञानको यहाँ ज्ञान शब्दसे ग्रहण किया है; क्योंकि सामान्यवाची शब्दोंकी भी विशेषमें प्रवृत्ति प्रसिद्ध ही है। यहाँ तीर्थसे समवसरणका ग्रहण किया है। जिसमें पापके विनाशके इच्छुक भव्य जीव तिरते हैं वह तीर्थ है। उस समवसरणके चिह्न मानस्तम्भ हैं। निषिधि अर्थात् योगिवृत्ति जिस भूमिमें हो उसे निषिधी कहते हैं। श्रुतसे पहले जाने हुए जिनदेवके इन जन्मादि स्थानोंको जो देखता है उसका श्रद्धान सुविशुद्ध होता है। देशान्तरमें भ्रमण करनेवालेके जिनदेवोंके जन्मादि स्थानोंको देखनेसे महती श्रद्धा उत्पन्न होती है, जैसे किसी सुन्दर नारीको वर्णनके द्वारा परोक्षरूपसे जानकर दूसरेके कथनसे उसे देखनेकी इच्छा होती है और उसे साक्षात् देखनेपर विशेष श्रद्धा होती है।

अथवा जब तीर्थंकर जन्म लेते हैं तब अनियत विहार करने वाला यति तीन ज्ञानके धारी

अथवा यदा तीर्थंकृतः संभवन्ति तदा अनियतविहारो यतिर्जिनानां ज्ञानत्रयधारिणां अवाप्तस्वर्गावि-तरणकूजासिद्धानां जन्माभिषेककल्याणं भुवनभवनान्तर्लीनतमोवितानापनयनोद्यतं, सुधापानमिव सकलप्राणभृदारोग्यविधायि, सुरविलासिनीनर्तनमिव सकलजगदानंददायि, प्रियवचनमिव मनःप्रसादकारि, पुण्यकर्मेव अगण्यपुण्यवितरणप्रवीणं, लक्ष्मीपरिचारिकाभिः साश्चर्यं ससंभ्रमं ईक्षितं, गुह्यकामरप्रकीर्णानेकसुरभिप्रसूनकरणगन्धानुभ्रमद्भ्रमरकृतकोलाहलं अनारतप्रहतमंगलभेरीझंझाध्वनिभरितभुवनविवरं, सुरवधूनर्तनजिगीषयेव सौधशिखरगतनृत्यत्प्रत्यग्रपञ्चवर्णपताकाविलासिनीकं, हरिविष्टरप्रचलनोपनीतसाध्वसनवसुरवल्लभारभसकण्ठग्रहप्रीतिविकासिमुखशतमखमुखं, संभ्रमोत्थितकृताञ्जलिपुटसुरपरिवारसादराकर्ण्यमानवज्रभृदाज्ञं, भेर्यादिध्वानाहूतप्रमुखसकलगीर्वाणचक्रं, परस्परसंघर्षगृहीतोत्तरवैक्रियिकदेवपृतनाव्याप्तपवनपथदेशं, जन्माभिषेकसमयप्रयाणसंपादानायातपौलोमीनूपुरध्वानचकितहंसीविलासविराजमानराजमन्दिराङ्गणं, ऐरावतावतीर्णप्रसारितवज्रिवज्रघनभुजार्गलं, सुरकरप्रहारप्रसरदुदुम्भिभेरीध्वानसम्मिश्रसिंहनादबधिरितविशालाशामुखं, प्रहतानेकप्रयाणकपटहगम्भीरधीरारावं, असकलशशिकरावदातचमरसमूहविक्षेपदक्षबलभिन्निकुरुंबजिनावलोकनव्यग्रसुराग्रमहिषीक, श्वेतातपत्रजलधरघटावच्छन्ननभोमंडलं, विद्युदायमानपताकाकुलं, इन्द्रनीलमयसोपानप्रयायिसुरपृतनं, सुरगजरदनसरोनलिनदलरंगशोभाविधायिनर्तकीसलीलपदन्यासं, गृहीताष्टमंगलदेवीसहस्रपुरोगानं, देवप्रतीहारदूरापसार्यमाणक्षुद्रामरगणं, आत्म-

---

और स्वर्गसे अवतरित होते समयकी विशिष्ट पूजाको प्राप्त जिनदेवके जन्माभिषेक कल्याणको देखता है। वह जन्मोत्सव लोक रूपी घरमें छिपे हुए अन्धकारके फैलावको दूर करने में तत्पर होता है। अमृतपान की तरह समस्त प्राणियोंको आरोग्य देने वाला है। देवांगनाओंके नृत्यकी तरह समस्त जगत्को आनन्दमयी है, प्रियवचनकी तरह मनको प्रसन्न करता है। पुण्यकर्मकी तरह अगणित पुण्यको देने वाला है। लक्ष्मीरूपी परिचारिकाओं के द्वारा बड़े आश्चर्य और शीघ्रता के साथ इसे देखा जाता है। गुह्यक जाति के देवोंके द्वारा बरसाये गये अनेक प्रकारके सुगन्धित पुष्पोंकी गन्ध पर मंडराने वाले भौंरों की गुंजनके कोलाहलसे पूर्ण होता है। निरन्तर बजने वाली मंगल भेरी और बाजोंकी ध्वनिसे समस्त भुवन भर जाता है। देवागनाओंके नृत्यको जीतनेकी इच्छासे ही मानों महलोंके शिखर पर पाँच वर्णकी पताका रूपी नृत्यांगनाएँ नाचती हैं। भगवान्के जन्मके समय इन्द्रके सिंहासनके कम्पनसे भयभीत हुई नवजन्म वाली देवांगनाएँ जल्दीसे इन्द्रके कण्ठसे लिपट जाती है तब इन्द्रका मुख प्रेमसे खिल उठता है। तब देव परिवार जल्दीसे उठकर बड़े आदरसे इन्द्रकी आज्ञा सुनता है। भेरीके शब्दको सुनकर इन्द्रादि प्रमुख सब देवगण एकत्र होते हैं. परस्परके संघर्षसे उत्तर वैक्रियिक शरीरको धारण करने वाले देवोंकी सेनासे आकाश मार्ग व्याप्त हो जाता है। जन्माभिषेकके समय जिन बालकको लानेके लिये आई हुई इन्द्राणीके नूपुरोंके शब्दसे चकित हुई हँसीके विलाससे राजमन्दिरका आँगन शोभित होता है। ऐरावतसे उतरकर इन्द्र अपनी वज्रमयी भुजायें फैला देता है। देवताओंके हाथोंके प्रहारसे ढोल और भेरीके शब्दके साथ मिला सिंहनाद विशाल दिशाओंको बधिर कर देता है। गमन करते समय बजाये जाने वाले अनेक नगारोंका गम्भीर शब्द होता है। इन्द्रोंका समूह अपूर्ण चन्द्रमाकी किरणोंके समान शुभ्र चमरोंको दक्षतापूर्वक ढोरता है। इन्द्राणियां बालक जिनका मुख देखनेके लिये उत्कण्ठित होती हैं। श्वेत छत्ररूपी मेघोंकी घटाओंसे आकाश ढक जाता है। पताकायें बिजुलीकी तरह प्रतीत होती हैं। इन्द्रनीलमय सीढ़ियोंकी तरह देवसेना गमन करती है। ऐरावतके दांतों पर बने सरोवरोंमें खिले कमलके पत्रों पर नर्तकियां लीलाके साथ पद निक्षेप करती हुई नृत्य करती

रक्षावेक्षसहस्रसंपाद्यमानरक्षाविधानं, नर्तनव्यग्राद्भुतविग्रहामरपुरोगं, प्रदक्षिणीकृतसुराचलं, आरूढसुरगिरिशिखराचलगर्भसिंहासनं, तद्देवकुमारपरंपरानीतक्षीरवारिधिजलभरितरत्नकलशकृताभिषेकं, पौलोमीरचितबालानुरूपमण्डनं, गुणस्तवव्यापृतेन्द्रवैतालिकसहस्रं, सुराधिपरचितजन्मोत्सवनर्तनं, जन्माभिषेककल्याणं पश्यति तस्य दर्शनं।

अभिनिष्क्रमणं वा जिनानामीदृक् तदिति वर्ण्यंते। सर्व एव जिना. समधिगतोदीरितजन्माभिषेककल्याणाः, शतमखशासनस्थसादरधनदोपनीयमानदिव्योचिताङ्गरागवसनभोजनवाहनालंकारसंपत्संदोहा . मनोनुकूलक्रीडासंपादनचतुरदेवकुमारपरिवाराः, केचित्पुरातनपुण्यपरिपाकोदयाचलोद्गतविराजमानारकसहस्रचक्रविसहायेन अमेयभुजविक्रमेण वशीभूताशेषमागधप्रभासादिदेवविद्याधरभूमिपालसंहतयः, सुरकुमारीरूपयौवनविभ्रमापहसनचतुरानेकद्वात्रिंशद्देवीसहस्राननारविंदविकासनोद्यताः; पाकशासनप्रहितनर्तकीनृत्तावलोकनविनोदाः, सादराकर्णितकिन्नरादिदेवगान्धर्वगीताः, कालमहाकालादिनवनिधिप्रभवः, प्रत्येकदेवसहस्रपरिपाल्यमानचक्रादिचतुर्दशरत्नानुयाताः, द्वात्रिंशत्सहस्रमुकुटबद्धशातकुम्भघटितमौलि[1]तटमकरिकास्थितरत्नप्रदीपाली-

---

हुई नृत्य करती हैं। हजारों देवियाँ हाथोंमें अष्ट मंगल लिये हुए आगे गमन करती है। देवोंके द्वारपाल क्षुद्र देवगणोंको वहाँसे दूर कर देते हैं। हजारों आत्मरक्ष जातिके देव रक्षा करनेमे तत्पर रहते हैं। नाचनेमे मग्न अद्भुत शरीरधारी देव आगे रहते हैं। सब सुमेरुकी प्रदक्षिणा करते हैं। सुमेरुके शिखरके समान सिंहासन पर भगवान्‌को विराजमान करते हैं। देवकुमारोंकी परम्परासे लाये गये क्षीर समुद्रके जलसे भरे रत्नमयी कलशोसे जिन भगवान्‌का अभिषेक करते हैं। इन्द्राणी बालकका उनके अनुरूप शृंगार करती है। सहस्रों इन्द्र वैतालिक भगवान्‌के गुणोंका स्तवन करते हैं। जन्मोत्सवके अवसर पर इन्द्र नृत्य करता है। ऐसे जन्माभिषेक कल्याणको जो देखता है उसका सम्यग्दर्शन अति निर्मल होता है।

जिन भगवान्‌का अभिनिष्क्रमण इस प्रकारका होता है। उसका वर्णन करते है—

सभी जिनदेवोंका जन्माभिषेक कल्याणक बड़ी विभूतिके साथ मनाया जाता है। इन्द्रकी आज्ञासे कुबेर उनके लिये दिव्य अंगराग, वस्त्र, भोजन, वाहन, अलंकार आदि संपत्ति प्रस्तुत करता है। मनके अनुकूल क्रीड़ा करनेमे चतुर देवकुमारोंका परिवार रहता है। उनमेंसे कोई-कोई जिनदेव पूर्वसंचित पुण्यकर्मके उदयरूपी उदयाचल पर प्रकट हुए एक हजार आरोंसे युक्त चक्ररूपी सूर्यकी सहायतासे और अपने अपरिमित भुज पराक्रमसे समस्त मागध प्रभास आदि देव, विद्याधर और राजाओंके समूहको अपने अधीन कर लेते है, देवांगनाओंके रूप, यौवन और विलासको तिरस्कृत करनेमे चतुर बत्तीस हजार पट्टरानियोंके मुखरूपी कमलोंको विकसित करनेमें तत्पर रहते हैं। इन्द्रके द्वारा भेजी गई नर्तकियोंके नृत्यका अवलोकन करते हुए मनोविनोद करते हैं। किन्नर आदि देवगन्धर्वोंके गीतोंको बड़े आदरसे सुनते हैं। काल महाकाल आदि नौ निधियाँ उनके राजकोषमें उत्पन्न होती हैं। चक्ररत्न आदि चौदह रत्न होते हैं। प्रत्येक रत्नकी एक हजार देव रक्षा करते हैं। बत्तीस हजार मुकुट बद्ध राजाओंके स्वर्ण निर्मित मुकुटोंके ऊपरकी मकरिकामें लगे रत्नदीपोंकी पंक्तिके द्वारा उनके पादपीठ निरन्तर पूजे जाते हैं अर्थात् बत्तीस हजार राजा उन्हें नित्य नमस्कार करते हैं। देवकुमार भेटे ले लेकर उनकी सेवामें सदा उपस्थित होते हैं। इस

---

१ मौलिरत्नमुकुटिका–अ०।

प्रकरेणानवरतमर्च्यमानपादपीठाः, देवकुमारोपनीयमानोपायनविलोकनैकव्यग्राः, मनुजभोगाग्रेसरं सुखमखेदेनानुभवन्ति । अपरेऽपि मण्डलीकमहामण्डलीकपदमुपगताः ।

पुनस्तीर्थकरनामकर्मोदयात् चारित्रमोहक्षयोपशमप्रकर्षानुगतादनादिकालावलग्नस्वपरकर्मरजोविधूननावबद्धकक्ष्या इत्थं मनः प्रणि[1]दधति—केयं[2] मोहस्य महत्ता येनास्मानप्यध्यक्षीक्रियमाणदुरन्तसंसारसरिद्विपद्‌दुःखावर्तान् प्रवर्तयत्यारम्भपरिग्रहयो: । अणिमाद्यष्टगुणसपत्कं, अपदमापदा, अभिलाषस्याप्यविषयम्, अपरामराणां कुशाग्रीयबुद्धीनामपि बलभिदामगोचरं, वचसामप्रत्यूहं, अपराधीनं, अनास्वादितान्यूनतारसं, अहमिंद्रसुखं चिरतरमनुभूतवतामस्माकं केयमुत्कण्ठा मनुजभोगसंपदि, खलजनमैत्रीव विचित्रदुःखानुबंधविधानोद्यतायां चलायां विपुण्यसमितिरिव परायत्तवृत्तौ, कुकविकृतिरिवाल्पार्थसंग्रहायां, दूरभव्यस्य मुक्तिपदवीगतिरिव अनेकप्रत्यूहप्रतिहताया अनन्तकालपरिभुक्तायां इति ।

तदैव च ब्रह्मलोकान्तावासादधिगतलौकान्तिकव्यपदेशाः, शङ्खावदाततनवः, स्वावधिज्ञानलोचनेनावलोक्य स्वपरोत्तारणाबद्धपरिकरता जिनाना, महदिदं कार्यं अनेकभव्यानुग्रहकरं भगवता प्रारब्ध, अस्माभिरपि एतदनुमन्तव्य । पूज्यपूजाव्यतिक्रमश्च स्वार्थभ्रंशकारीति सुरपथादवतीर्य स्वामिनः पुरस्तात्सबहुमानमवस्थिता एवं विज्ञापयंति—

तरह वे मनुष्योंको प्राप्त भोगोसे होने वाले सर्वोत्कृष्ट सुखको बिना किसी खेदके भोगते हैं, अन्य कुछ जिनदेव मण्डलीक, महामण्डलीक आदि राजपदोंको प्राप्त होते हैं ।

पुन: तीर्थंकर नामकर्मके उदयसे और चारित्र मोहके क्षयोपशमके प्रकर्षसे अनादिकालसे लगी हुई अपनी और दूसरोंकी कर्मरूपी धूलिको दूर करनेमें कमर कसकर वे इस प्रकार मनमें विचारते है—यह मोहकी कैसी महत्ता है कि दुरन्त संसार समुद्रके दु:खरूपी भँवरोंको प्रत्यक्ष अनुभव करने वाले हम जैसोंको भी आरम्भ और परिग्रहमें फँसाता है । हमने चिरकाल तक अहमिन्द्रका सुख भोगा है जो अणिमा आदि आठ ऋद्धियोंसे सम्पन्न होता है, जिसमें कभी कोई आपत्ति नही आती, जिसकी कोई कल्पना भी नही कर सकता, अन्य देव और कुशाग्र बुद्धिशाली इन्द्रोंको भी वह सुख प्राप्त नही है, वचनके अगोचर है, अपराधीन है, उसमें कभी कमी नहीं होती । ऐसा अहमिन्द्र पदका सुख चिरकाल तक भोग चुकनेपर हमारी यह मनुष्यकी भोगसम्पदामें उत्कण्ठा कैसी ? यह भोग सम्पदा दुष्टजनकी मैत्रीकी तरह अनेक दु:खोंकी परम्पराको उत्पन्न करने वाली है, चंचल है, पाप पुण्यकर्मके समान पराधीन है, जैसे कुकविकी रचनामे अल्पसार होता है वैसे ही इस भोगसम्पदामे भी सार नही है । जैसे दूर भव्यके मोक्ष गमनमे अनेक बाधाएँ रहती हैं वैसे ही इस भोगसम्पदामे अनेक बाधाएँ रहती है और हमने इसे अनन्तकाल भोगा है ।

उसी समय ब्रह्मलोक स्वर्गके अन्तमें रहनेसे लौकान्तिक नामधारी देव, जिनका शरीर शंखके समान श्वेत होता है, अपने अवधिज्ञान रूपी चक्षुसे देखते हैं कि जिनदेव स्वयंको और दूसरोंको संसार समुद्रसे पार उतारनेके लिये एकदम तत्पर हैं तो विचारते है—भगवान्‌ने अनेक भव्य जीवों पर अनुग्रह करने वाला यह महान् कार्य करनेका बीड़ा उठाया है, हमे भी इसकी अनुमोदना करनी चाहिए । तथा पूज्य पुरुषोंकी पूजा न करना भी स्वार्थका घातक है । ऐसा विचार स्वर्गसे उतरकर भगवान्‌के सम्मुख बडे आदरके साथ उपस्थित हो, इस प्रकार निवेदन करते हैं—

---

१. प्रतिदधति–आ० मु० । २. कथं मोहस्य बलवत्ता–आ० मु० ।

भट्टारकाः ! उचित एवायमुद्योगो भवतां कल्पमहीरुहा इव प्रत्युपकारनिरपेक्षा, जगदनुग्रहकारिणो हि महान्तः, मिथ्यात्वतिमिरावगुंठितज्ञानलोचनतया विनेयजनराशिरुत्पथप्रस्थानोऽसकृत्कुगतिगर्तपतितो निःसर्तुमभिलषन्नपि असमर्थः क्लिश्यति । स च भवत्पातितावततदृढसमीचीनदृष्टिरज्ज्वावकृष्टः युष्मदुपदर्शितातिप्रगुणविशालमुक्तिमार्गढौकनादनन्तज्ञानात्मकेन सुखेन सुखी भवत्वित्यभिधाय गतेषु सारस्वतादिषु ।

जिननिर्वेदसमीरणान्दोलितहरिविष्टरो हरिः प्रणिधानप्रवर्तितावधिलोचनाधिगतगुरुप्रारभ्यमाणकार्यः, सिंहासनतः ससंभ्रममुत्थाय, स्वामिसमवस्थितदिगभिमुखं गत्वा सप्तपदमात्रं, ललाटतटविन्यस्तेन प्रबुद्धनलिनदलच्छायापहासिना, अंकुशकुलिशकलशादिलक्षणोद्भासिना दक्षिणेन करेणालंकृतमौलिरत्नप्रभाभासुरमवनम्य शिरः सलीलं नमः सद्धर्मतीर्थप्रवर्तनोद्यतेभ्यः शरणागतविनेयत्राणकारिभ्योऽलौकिकनयनेभ्यो जिनेभ्य इत्यभिधाय, पुरोधावद्भेरीध्वानादिभिर्झटिति विदितकार्येण, समुचितावनतेन, स्वनायकपुरोयायिना, विचित्रातपत्रशस्त्रवस्त्रविभूषणवाहनोज्ज्वलेन गीर्वाणचक्रेणानुगम्यमान. सौधर्मः सह नरामरेन्द्रैः, चमररुहहरिविष्टरश्वेतातपत्रादिपरमेश्वरलांछनमखिलमपहाय प्रतीहारनिवेदितागमनस्तदाज्ञयाशु धर्मचक्रलांछनातिकमवाप्य सबहुमानप्रणाममारभते स्म ।

ततो जिनात्सादरावलोकनप्रसादमात्मोचितमुपलभ्य विज्ञापनं करोति । सकलोऽयमायातोऽच्युताधिपपुरःसरः शक्रलोको भट्टारकाणां परिनिष्क्रमणपरिचर्यामुपपादयितुमना अवगतमुक्तिमार्गोऽप्ययं स्वाधीनज्ञानात्म-

---

भगवन् ! आपका यह उद्योग उचित ही है। महान् पुरुष कल्पवृक्षकी तरह प्रत्युपकारकी अपेक्षा न करके जगत् पर अनुग्रह करते हैं। मिथ्यात्व रूपी अन्धकारसे ज्ञानरूपी दृष्टिके अवरुद्ध हो जानेसे संसारके भव्य जीव कुमार्गमें चल पड़ते हैं। बार-बार कुगतिरूपी गढ़ेमें गिरकर निकलना चाहते हुए भी नहीं निकल पाते और कष्ट भोगते हैं। आपके द्वारा डाली गई विस्तृत दृढ़ समीचीन दृष्टिरूपी रस्सीके द्वारा खीचे गये वे भव्य जीव आपके द्वारा बतलाये गये गुणशाली विशाल मोक्षमार्ग पर चलकर अनन्त ज्ञानात्मक सुखसे सुखी हों। इतना कहकर वे लौकान्तिक देव चले जाते हैं।

भगवान्के वैराग्यरूपी हवाके झकोरोंसे इन्द्रका सिंहासन कम्पित होता है। तब इन्द्र अवधिज्ञान रूपी दृष्टिका उपयोग करके भगवान्के द्वारा प्रारम्भ किये जाने वाले कार्यको जानता है। तत्काल सिंहासनसे उठ, जिस दिशामें भगवान् हैं उस दिशाकी ओर सात पद चलकर, खिले हुए कमलकी पांखुरीकी शोभाको तिरस्कृत करने वाले और अंकुश, वज्र, कलश आदि शुभ लक्षणोंसे शोभित दाहिने हाथको मस्तकसे लगाकर मुकुटके रत्नोंकी प्रभासे भासित सिरको नवाकर कहता है—'समीचीन धर्मरूप तीर्थके प्रवर्तनके लिये उद्यत, शरणागत भव्य जनोंकी रक्षा करने वाले और अलौकिक नेत्रोंसे विशिष्ट जिनदेवको नमस्कार हो। भेरी आदिके शब्दसे सब देवोंको ज्ञात हो जाता है। नाना प्रकारके छत्र, शस्त्र, वस्त्राभूषण और वाहनोंके साथ अपने नायकको आगे करके सब देव सौधर्मके पीछे चलते हैं। सौधर्मेन्द्र अन्य इन्द्रों और राजाओंके साथ राजमहलके द्वार पर पहुँच सिंहासन, चमर छत्र, आदि इन्द्रत्वके सब चिह्नोंको दूर करके द्वारपालसे अपने आनेका समाचार निवेदन कराता है। आज्ञा मिलने पर इन्द्र तत्काल धर्मचक्रके प्रवर्तक भगवान्के समीप जाकर अत्यन्त बहुमान पूर्वक नमस्कार करता है। जिनदेव इन्द्रकी ओर आदरपूर्वक देखते हैं। भगवान्के इस सादर अवलोकनको ही अपने योग्य प्रसाद मानकर इन्द्र निवेदन

कानन्तसुखानुभवलम्पटोऽपि, अवधीरितेन्द्रियसुखखेदोऽपि, अपरिप्राप्तसंयमघातिकर्मक्षयोपशमः, न चारित्रे प्रवर्तते, न परान्प्रवर्तयितुमीहते। सुविशुद्धज्ञानदर्शनोऽपि च विना समीचीनं चारित्रं तपश्च, कर्माणि निरवशेषं क्षपयितुं घटते। अनेकसमुद्रगणनायु:स्थितितया दीर्घसंसारी वराकोऽस्मदादिः क्लिश्यति। उत्थातुमभिलषन्नपि दारको यथा पतत्येवमपि अनवचारित्राभिलाष्यपि तद्वोढुमसमर्थस्तिष्ठति। यूयं पुनर्विदितवेदितव्याः क्षयोपशमपरिप्राप्तनिवृत्तिपरिणामाः, पूज्यतमाः जन्मान्तरेऽस्माकमपीदृशी वीतरागता सकलारम्भपरिग्रहपरित्यागोद्योगो विनेयजनोपकारशक्तिश्च भवत्प्रसादादस्यानुमननाच्च भवतु सज्जीकृतमिदं विमानं मानीतमलंकरोतु देवः इत्युपरतवचसि सुराधिपे हर्षविषादपरवशं ज्ञातिवर्गं अन्तःपुराणि परिवारं चावलोक्य कृपया जिना वदन्ति—

चिरसंवासादल्पकोपकारापेक्षया जनस्यानुरागो भवति तदनुसारी कोपस्ताभ्यां दुरन्तकर्मादानं ततो भवति ममेदंभावः सर्वदुःखाना मूलमपनेतुमर्हति विद्वान्। न हि कस्यचित् किंचिन्मित्रं, धनं, शरीरं वाऽप्यस्ति। पात्रे समिता हि बन्धवः, परिवाराश्च, धनं पुनरर्जने विनाशे च महतीमानयति दुःखासिकां। तदर्थिभिरन्यैश्च सह विरोधं कारयति। तृष्णा प्रकर्षवतीमावधाति लवणजलपीतिमिव। वामलोचनाः पुनः सुरा इव चित्तं मोहयन्ति, व्यलीकरोदनेन हसनेन चाटुभिश्च पुंसामल्पसत्वानां चेतः स्ववशीकुर्वन्ति। चर्ममयपुत्रिकासु, चपलासु, संध्याम्बुदावलीवास्थिररागासु, मायाजननीषु, मृषाचेटीनायिकासु, सुगतिवज्रार्गलयष्टिषु

करता है—अच्युतेन्द्र आदि समस्त इन्द्रगण भगवान्‌के निष्क्रमण कल्याणक सम्बन्धी परिचर्या करनेके अभिलाषी हैं। हम मुक्तिके मार्गको जानते हैं। स्वाधीन ज्ञानात्मक अनन्त सुखका अनुभव करनेके लिये भी आतुर हैं, इन्द्रिय सुखको भी खेद रूप जानकर उसकी उपेक्षा करते है। किन्तु संयमका घात करने वाले कर्मका क्षयोपशम हमें प्राप्त नहीं हैं। इसलिये न हम स्वय चारित्रमें प्रवृत्त होते हैं और न दूसरोंको ही प्रवृत्त करना पसन्द करते हैं। सम्यग्दर्शन और सम्यग्ज्ञानसे युक्त व्यक्ति भी समीचीन चारित्र और तपके बिना समस्त कर्मोंका क्षय नही कर सकता। अनेक सागरो प्रमाण आयु होनेसे दीर्घ संसारी हमलोग कष्ट उठाते हैं। जैसे शिशु उठना चाहते हुए भी गिरता है वैसे ही हम लोग चारित्रके अभिलाषी होते हुए भी उसे धारण करनेमें असमर्थ रहते हैं। आप तो सब कुछ जानते हैं। चारित्रमोहका क्षयोपशम होनेसे आपके निवृत्ति रूप परिणाम हुए हैं। आप पूज्यतम हैं। आपके प्रसादसे तथा आपकी अनुमोदना करनेसे आगामी जन्ममें हमें भी इस प्रकारकी वीतरागता, समस्त आरम्भ और परिग्रहको त्यागनेका उद्योग तथा भव्य जीवोंका उपकार करनेकी शक्ति प्राप्त हो। यह सजाया हुआ विमान तैयार है, देव! इसे सुशोभित करें।

देवेन्द्रके कथनके पश्चात् अन्तःपुर, परिवार और ज्ञातिवर्गको हर्ष और विषादमें देखकर जिनदेव कृपापूर्वक कहते हैं—चिरकाल तक साथ रहनेसे तथा थोड़ा बहुत उपकार करनेसे लोगोंमें अनुराग होता है तथा कोप भी होता है। इस अनुराग और कोपसे दुरन्तकर्मोंका बन्ध होता है। उससे 'यह मेरा है' इस प्रकारका भाव होता है, यह सब दुःखोंका मूल है। विद्वान्‌को इसे दूर करना चाहिए। न किसीका कोई मित्र है और न धन और शरीर ही स्थायी हैं। बन्धु बान्धव और परिवार यानपात्रमें मिले हुए पुरुषोंके समान हैं। धनके कमानेमें और कमाये हुए धनके नष्ट हो जानेपर बहुत दुःख होता है। उस धनके अर्थी अन्यजनोंसे विरोध होता है। जैसे खारा जल पीनेसे प्यास बढ़ती है वैसे ही धन पानेसे धनकी तृष्णा बढ़ती है। स्त्रियाँ मदिराकी तरह चित्तको मोहित करती हैं। बनावटी रोने और हँसने तथा मीठे वचनोंसे कमजोर मनुष्योंके चित्तको अपने वशमें कर लेती हैं। स्त्रियाँ चर्मनिर्मित पुतलियाँ हैं, चंचल होती हैं,

कोऽनुरागः प्रज्ञावताम् ? शरीरं पुनरिदमनेकाशुचिनिधानं, कचारपुञ्जवत्प्राणभृतामनपायी भारः महारोगनागानां वल्मीकीभूतं, जराव्याघ्रीनिवासबिलं, लेपकाष्ठचर्मवेष्टितकोष्ठवदन्तर्नि:सारं बहिर्मनोहरं, गुणः पुनरत्र एक एव धर्मसहायता। गिरिनदीस्रोतांसीवानवस्थितानि यौवनानि। तृणाग्निज्वाला इव संपदः क्षणमात्रं दृष्टनष्टा। इत्यमवगम्य मा कृथा वृथा प्रमादं जननरत्नाकरपारगमनाय कुरुतोद्योगं। मर्षणीयोऽस्माभिः प्रमादात्कृतोपराध इति।

भगवद्भारतीसमनन्तरं सुरकुमारकरप्रहता समन्ततो दुन्दुभयो ध्वनन्ति। सकलं च जगदिन्द्रप्रमुखं जयध्वनिमुखरं जायते। समन्तात्सुरतरुण्यः सविलासं नृत्तमारभन्ते। जगन्नाथाश्च त्रिलोकभूषणा धवलदुकूलपरिधानाः परमशुक्ललेश्यया निर्वृतिसंकल्येव मुक्ताकण्ठिकाव्याजेनोपगतयालंकृतग्रीवाः विरागाणामपि मुखरागकरणे पाटवं नः पश्यतेति दर्शयद्भ्यामिव कुण्डलाभ्यां विराजमानपूर्णमसृणगण्डस्थला। वृत्तं प्रियं एषां चेन्नोवसर इतीवोपगतेन कटकद्वयेनाश्लिष्टप्रकोष्ठाः। यत्रामीषामतिशयरत्नाभिमानः तत्पश्यामः स्थित्वोच्चैरितीवोत्तमाङ्गस्थेन मुकुटरत्नकलापेन शोभमानः निर्वाणपुरमिव विमानं प्रविशन्ति।

ततः शतमखयुग्मबाहुस्कन्धोत्क्षिप्तेन विमानेन सदेवीकचतुर्निकायामरससानीकपरिवृतेन गत्वा अवतीर्य

सन्ध्याकालीन मेघमालाकी तरह उनका राग अस्थिर होता है। वे स्वभावसे मायावी होती हैं, सुगतिके लिए वज्रनिर्मित अर्गला हैं। उनमे बुद्धिमानोंका कैसा अनुराग ? यह शरीर अनेक अपवित्र वस्तुओंकी खान है, कचरेके ढेरकी तरह प्राणियोंका ऐसा भार है जो कभी नष्ट नहीं होता। महारोगरूपी सर्पोंके लिए बामी है और जरारूपी सिहनीके रहनेके लिए बिल है। जैसे लोष्ठको चमड़ेसे मढ़कर उसपर आँखें लगा देनेपर वह बाहरसे सुन्दर और भीतरसे निःसार होता है उसी तरह यह शरीर भी बाहरसे सुन्दर और भीतरसे निःसार है। इसमे केवल एक ही गुण है कि यह धर्ममे सहायक होता है। पहाडी नदीके स्रोतोंकी तरह यौवन स्थायी नही है। तृणोंकी आगकी लपटोंकी तरह सम्पदा क्षणमात्रमे देखते-देखते नष्ट हो जाती है। ये सब जानकर वृथा प्रमाद मत करो, जन्म समुद्रको पार करनेके लिए उद्योग करो। हमसे प्रमादवश जो अपराध हुए उन्हे क्षमा करें।

भगवान्‌की वाणीके पश्चात् देवकुमार दुंदुभियाँ बजाते हैं। इन्द्र आदि सब लोग जय जयकार करते हैं। देवागनाएँ विलासपूर्ण नृत्य आरम्भ करती है। तीनो लोकोंके भूषण और जगत्‌के स्वामी जिनदेव सफेद वस्त्र धारण करते हैं। गलेमे मोतियोंकी माला पहने हैं मानों मुक्तिकी दूतीके समान परमशुक्ल लेश्याने उस मुक्तामालाके व्याजसे भगवान्‌के कण्ठको सुशोभित किया है। दोनों कानोंके कुण्डलोंसे भगवान्‌का स्निग्ध गण्डस्थल शोभित है, मानों दोनो कुण्डल यह दिखला रहे हैं कि विरागीके भी मुखको रागयुक्त (लाल) करनेमें हमारा चातुर्य लोग देखें। दोनों हाथोंमें दो गोल कड़े हैं। वे गोल कड़े मानो यह विचार कर ही आये हैं कि भगवान्‌को वृत्त प्रिय है। वृत्तका अर्थ चारित्र भी है और गोल भी। सिरपर रत्नमयी मुकुट शोभित है। रत्नोंने सोचा—इन्हे रत्नों (रत्नत्रय) का बड़ा अभिमान है जरा इनके साथ रहकर देखें तो। इस प्रकारसे आभूषित भगवान् मोक्षपुरीके द्वारके समान विमानमे प्रवेश करते हैं।

उस विमानको इन्द्र अपने कन्धोंपर उठाते हैं। देवांगनाओंके साथ चारों निकायोंके देव और उनकी सातों सेनाएँ विमानको घेरे होती हैं। उस विमानसे जाकर भगवान् रमणीक स्थानमें

रम्यतमे देशे उत्तराभिमुखाः, कृतसिद्धनमस्कृतयः मुकुटादिकं क्रमेण अलंकारादिकं अपनयन्ति । परित्यक्तोभयसकलग्रंथाः परिगृह्णन्ति योगत्रयेण रत्नत्रयमित्थंभूतं च परिनिष्क्रमणं पश्यतः ।

'णाणुप्पत्तिं' ज्ञानोत्पत्तिर्ज्ञायतेऽवबुध्यते सकलमर्थयाथात्म्यमनेनेति ज्ञानं इति केवलमुच्यते । तस्योत्पत्तिरवतारितमोहनीयभाराणां, योगभास्करदीधितिनिर्मूलितज्ञानदृगावरणतमसां, उत्खातान्तरायविषविटपिनां, अ[1]पनीतक्रममनपेक्षितकरणचेष्टम[2]पास्तसंशीतिकं, दूरीकृतविपर्यासं केवलमुत्पद्यते । तस्य फलस्य दर्शनाज्जिनप्रणीते मार्गे अपनीतशङ्कादिकलङ्का श्रद्धोत्पद्यते । फलार्थी तद्वत्सु रोचते दृष्टसामर्थ्यं इति किं चित्रम् ? ॥१४५॥

एवमनियतविहारे दर्शनशुद्धिस्वार्थमुपवर्ण्य परोपकारं स्थिरीकरणं प्रकटयति—

संविग्गं संविग्गाणं जणयदि सुविहिदो सुविहिदाणं ।
जुत्तो आउत्ताणं विसुद्धलेस्सो सुलेस्साणं ॥१४६॥

'संविग्गं' संसारभीरुता । 'जणयदि' जनयति । कः ? 'सुविहिदो' सुचरितो योऽनियतवासः । केषां ? सुविहिदाणं सुचरितानां । 'संविग्गाणं' संविग्नानां । 'जुत्तो' अनशनादिके तपसि युक्त. । 'आउत्ताणं' योगधाराणां । 'विसुद्धलेस्सो' विशुद्धलेश्यः । 'सुलेस्साणं' सुलेश्यानां च । सम्यक् चारित्रतपसोः शुद्धलेश्यायां च

उतरते हैं। और उत्तरकी ओर मुख करके सिद्धोंको नमस्कार करते हैं। तथा क्रमसे मुकुट आदि अलंकारोंको उतार देते हैं। अन्तरंग बहिरंग सब परिग्रहको त्यागकर मन-वचन-कायसे रत्नत्रयको स्वीकार करते हैं। इस प्रकारके निष्क्रमणको जो देखता है उसका सम्यग्दर्शन विशुद्ध होता है।

अब केवलज्ञानकी उत्पत्तिका वर्णन करते हैं—

जिसके द्वारा समस्त पदार्थोंका यथार्थ स्वरूप ज्ञात होता है उसे ज्ञान कहते हैं। यहाँ ज्ञानसे केवलज्ञान कहा है। उसकी उत्पत्ति इस प्रकार होती है—जो मोहनीयका भार उतार देते हैं, योगरूपी सूर्यसे ज्ञानावरण और दर्शनावरणरूपी अन्धकारको निर्मूल कर देते हैं और अन्तराय कर्मरूपी विषवृक्षको उखाड़ देते हैं उनके क्रमरहित, इन्द्रियोंकी सहायता न लेनेवाला, संशय तथा विपरीततासे दूर केवलज्ञान उत्पन्न होता है। उसके फलके दर्शनसे जिनकथित मार्गमें शंका आदि दोषोंसे रहित श्रद्धा उत्पन्न होती है। जो उस फलके अभिलाषी हैं वे उसकी शक्तिको देखकर यदि उस रत्नत्रयसे युक्त भगवन्तोंमें रुचि करते हैं तो इसमें आश्चर्य क्या है? ॥१४५॥

इस प्रकार अनियत विहारसे दर्शनविशुद्धिरूप स्वार्थको बतलाकर अब स्थिरीकरणरूप परोपकारको प्रकट करते हैं—

गा०—सम्यक् आचार और अनशन आदि तपसे युक्त विशुद्ध लेश्यावाले मुनियोंका अनियतवास सम्यक् आचारवाले, योगके धारी, सम्यक् लेश्यावाले और संसारसे भीत साधुओंमें संसारसे भय उत्पन्न करता है ॥१४६॥

टी०—सम्यक्चारित्र, सम्यक्तप और शुद्धलेश्यामें वर्तमान अनियत विहारी साधुको देखकर सभी सम्यक् चारित्रवाले, सम्यक् तप करनेवाले और शुद्ध लेश्यावाले यतिगण अत्यन्त संसारसे भीत होते हैं। वे मानते हैं कि हम संसारसे वैसे भीत नहीं हैं जैसे यह भगवान् मुनिराज हैं। अत एव हमारा चारित्र और तप सदोष है। अर्थात् सम्यक् आचार, तप और विशुद्ध लेश्या-

---

१. वीतक्र—आ० मु० । २. मत्यस्त—आ० मु० ।

प्रवर्तमानं दृष्ट्वा सर्वेऽपि सुचारित्राः सुतपसः, शुद्धलेश्या यतयः अतिशयवतीं संसारभीरुतां प्रतिपद्यन्ते । न वयमतीव संसारभीरवः, यथायं भगवान् अतएव नश्चारित्रं तपश्च सातिचारं इति मन्यमानाः ॥१४६॥

उत्तरगाथया एतदाचष्टे न केवलं अतिशयितचारित्रतपोगुण एव परं संविग्नं करोति किंतु एवंभूतोऽपि इत्याचष्टे—

पियधम्मवज्जभीरू सुत्तत्थविसारदो असढभावो ।
संवेग्गाविदि य परं साधू णियदं विहरमाणो ॥१४७॥

'पियधम्मवज्जभीरू' प्रिय उत्तमक्षमादिधर्मो यस्य, यश्चावद्यस्य पापस्य भीरुः । 'सुत्तत्थविसारदो' सूत्रार्थयोर्निपुणः । 'असढभावो' शाठ्यरहितः । 'संवेग्गाविदि य' परं संविग्नं करोति । 'साधू' साधुः । 'णियदं' सर्वकालं 'विहरमाणो' देशान्तरातिथिः ॥१४७॥

पूर्वगाथायां परस्थिरीकरणं प्रतिपाद्य उत्तरयात्मानमपि स्थिरयति इत्यभिधत्ते—

संविग्गदरे पासिय पियधम्मदरे अवज्जभीरुदरे ।
सयमवि पियथिरधम्मो साधू विहरंतओ होदि ॥१४८॥

'ठिवियरणं' । 'संविग्गतरं' इत्यादिकया । असकृत्पञ्चविधपरावर्तनिरूपणाहितचेतस्तयोपगततदागमनभयातिशयाः संविग्नतराः । अभिनवकर्मनिरोध चिरतनगलन करोति, अभ्युदयनिःश्रेयससुखानि च प्रयच्छति सुचरितो धर्म इति । धर्मस्य फलमाहात्म्ये अनारतं चेतःसमाधानात्प्रियधर्मतराः, स्वल्पमप्यशुभयोगानामवसरा-

---

वाले अनियत विहारी साधुको देखकर अन्य मुनि जो सम्यक् आचारवान् हैं, तपस्वी हैं, विशुद्ध लेश्यावाले हैं वे भी प्रभावित होकर और भी अधिक आचार, तप और लेश्यामें बढ़नेके लिए प्रयत्नशील होते हैं। यह अनियतवाससे परोपकार होता है। दर्शनविशुद्धिका लाभ तो अपना उपकार है ॥१४६॥

आगेकी गाथासे कहते हैं कि केवल विशिष्ट चारित्र और तप ही दूसरेको संसारसे विरक्त नहीं करता किन्तु········

गा०—जो उत्तम क्षमा आदि धर्मका पालक है और पापसे डरता है, सूत्र और उसके अर्थमें निपुण है, शठतासे रहित है ऐसा सदा देशान्तरमें विहार करनेवाला साधु दूसरोंमें विराग उत्पन्न करता है ॥१४७॥

पूर्वगाथामें दूसरोंके स्थिरीकरणका कथन किया है। आगेकी गाथासे अपने भी स्थिरीकरणको कहते हैं—

गा०—संविग्नतर प्रिय धर्मतर और अवद्य भीरुतर साधुको देखकर विहार करनेवाला साधु स्वयं भी प्रिय स्थिर धर्मतर, संविग्नतर और अवद्य भीरुतर होता है ॥१४८॥

टी०—बार-बार पाँच प्रकारके परावर्तनोंका निरूपण चित्तमें बैठ जानेसे जो उस परावर्तनके आगमनसे अत्यन्त भीत होते हैं वे साधु संविग्नतर होते हैं। अच्छी तरह पालन किया गया धर्म नये कर्मोंके आनेको रोकता है और पुराने कर्मोंकी निर्जरा करता है। तथा इहलौकिक अभ्युदय और मोक्षका सुख देता है। धर्मके फलके इस माहात्म्यमें जिनका चित्त लीन होता है वे

त्वावद्यभीरुतराः । स्वयमात्मना प्रियस्थिरधर्मतराः । अन्तरेणाप्यतिशायिकप्रत्ययमतिशयार्थगतिरत्र 'अभिरूपाय कन्या देयेति' यथा प्रियस्थिरधर्मतरः इति । अपिशब्देन संविग्नतरः अवद्यभीरुतरश्चेति ग्राह्यम् ॥१४८॥

भावनां व्याचष्टे—परिषहसहनमिह भावनेत्युच्यते—

चरिया छुहा य तण्हा सीदं उण्हं च भाविदं होदि ।
सेज्जा वि अपडिबद्धा विहरणेणाधिआसिया होदि ॥१४९॥

'चरिया' चर्याजन्यं दुःखमिह चर्येति गृहीतं । उपानहान्येन वा अकृतपादरक्षस्य, गच्छतो निशितशर्करापाषाणकण्टकादिभिस्तुद्यमानचरणस्य, उष्णरजःसंतप्तपादस्य, वा यद्दुःखं यस्यानुभवनमसंक्लेशेन चर्याभावना । 'छुहा य' अपरिचिते देशे संयतैः पूर्वमनध्यासिते अल्पधान्यसंग्रहे प्रयोग्याया अलाभात् भिक्षायाः समुपजाता क्षुद्वेदना सोढा भवति । चिरमेकत्र वसतो जनः परिचयाद्दाक्षिण्याद्वा भिक्षा प्रयच्छतीति न महान्परिश्रमः । 'सीदं उण्हं च' शीतोष्णस्पर्शजं दुःखं इह गृह्यते । तदनुभवनं संक्लेशरहितभावितं[1] सोढं भवति । 'सेज्जा' य शय्या च वसतिः । 'अपडिबद्धा' ममेदं भावरहिता । 'अधिआसिया' सोढा भवति । 'विहरणेण' विविधदेशगमनेन ॥१४९॥

प्रियधर्मतर होते हैं । और जो थोड़ेसे भी अशुभ योगको नहीं होने देते वे अवद्यभीरुतर होते हैं । उन्हे देखकर सदा विहार करनेवाला साधु स्वय भी प्रियस्थिर धर्मतर होता है । गाथामें 'पियथिरधम्मो' पाठ है उसमे अतिशयको बतलानेवाला 'तर' प्रत्यय नहीं है फिर भी अतिशय अर्थका बोध होता है । जैसे किसीने कहा है 'अभिरूपको कन्या देना', यहाँ अभिरूपसे विशिष्ट रूपवानका बोध होता है । अतः प्रियस्थिर धर्मतर अर्थ लेना । 'अपि' शब्दस संविग्नतर और अवद्यभीरुतर भी ग्रहण करना चाहिए । अर्थात् वह साधु दूसरे इस प्रकारके विशिष्ट साधुओंको देख स्वयं भी वैसा विशिष्ट बन जाता है । यह विहारसे लाभ है ॥१४८॥

अब भावनाको कहते हैं । यहाँ परीषह सहनको भावना कहते हैं—

गा०—अनेक देशोमें विहार करनेसे, चर्या भूख, प्यास शीत और उष्णका दुःख संक्लेशरहित भावसे सहना होता है । वसति भी ममत्वसे रहित सहनेमें आती है ॥१४९॥

टी०—यहाँ 'चर्या' शब्दसे चर्यासे होनेवाले दुःखका ग्रहण किया है । जूता अथवा अन्य किसी वस्तुसे अपने पैरोंकी रक्षा नहीं करनेवाले साधुके चलते हुए तीक्ष्ण कंकर पत्थर कांटे आदिसे पैर छिद जाते हैं, अथवा गर्मधूलिसे पैर झुलस जाते हैं । उसके दुःखको विना संक्लेशके सहना चर्याभावना है । अनजान देशमें, जहाँ पूर्वमें कभी साधुओंका जाना नहीं हुआ, और अनाजका संग्रह भी कम है, वहाँ, योग्य भिक्षाके न मिलनेसे उत्पन्न हुआ भूखका दुःख सहना होता है । बहुत समय तक एक स्थानपर बसनेसे मनुष्य परिचित होनेसे अथवा उदारतावश भिक्षा देते हैं इसलिए भिक्षामें बड़ा श्रम नहीं होता । शीत उष्णसे शीतस्पर्श और उष्णस्पर्शसे होनेवाला दुःख यहाँ लिया है । उसका अनुभवन अर्थात् संक्लेशरहित भावपूर्वक सहना होता है । तथा रहनेके लिए वसतिका जो प्राप्त होती है उसमें भी 'यह मेरी है' ऐसा भाव नहीं रहता । ये सब विहार करनेवाले मुनियोंको सहना होता है ॥१४९॥

---

१. भाविनां आ० मु० ।

णाणादेसे कुसलो णाणादेसे गदाण सत्थाणं ।
अभिलाव अत्थकुसलो होदि य देसप्पवेसेण ॥१५०॥

अतिशयार्थकुशलताख्यं गुणं कथयति—

सुत्तत्थथिरीकरणं अदिसयिदत्थाण होदि उवलद्धी ।
आयरियदंसणेण दु तम्हा सेविज्ज आयरियं ॥१५१॥

'सुत्तत्थथिरीकरणं' अल्पवर्णरचनं, अभिधेयविषयसंशयाकारि सारार्थवदभ्यन्तरीकृतोपपत्तिकं, प्रमाणान्तरदर्शित[2]वस्तुतद्रूपविरुद्धानुपदर्शनेन निर्दोषं इत्येतद्गुणसहितं सूत्रं तस्यार्थो वाच्यो बाह्य आन्तरो वा अर्थः, तयोः सूत्रार्थयोः थिरीकरणं इत्थमेवेदं सूत्रं शब्दतः, अभिधेयं चास्येदमेवेति यत्तत्[3]। 'होदि उवलद्धी' अतिशयेनार्थोपलब्धिर्भवति। 'आयरियदंसणेण' आचार्याणां दर्शनेन। तु शब्दः पादपूरणे अवधारणार्थो वा। आचार्यदर्शनेनैव अथवा सूत्रार्थानां स्थिरीकरणं व्याख्यातॄणामाचार्याणां तत्र दर्शनात्। 'अदिसइदत्थाणं' अतिशयितानां सूत्रार्थानां 'उवलद्धी' उपलब्धिः। 'होदि' भवति। प्रमाणनयनिक्षेपनिरुक्त्या अनुयोगद्वारेण निरूप्यमाणः सूत्रार्थो अतिशयितो भवति। आचार्याणां व्याख्यातॄणां दर्शनेन मतभेदेन। केचिन्निक्षेपमुखेनैव सूत्रार्थमुपपादयन्त्यपरे नैगमादिविचित्रनयानुसारेण अन्ये सदाद्यनुयोगोपन्यासेन। अपरे 'अदिसयसत्थाणं होइ

गा०—देशान्तरमें जानेसे अनेक देशोंके सम्बन्धमें कुशल हो जाता है। अनेक देशोंमे पाये जानेवाले शास्त्रोंके शब्दार्थके विषयमे कुशल होता है ॥१५०॥

अतिशय अर्थकुशलता नामक गुणको कहते हैं—

गा०—आचार्योंके दर्शनसे ही सूत्र और अर्थका स्थिरीकरण और अतिशयित अर्थोंकी उपलब्धि होती है। इसलिये आचार्यकी सेवा करनी चाहिए ॥१५१॥

टी०—थोडे शब्दोंमें रचा गया हो, अर्थके विषयमें संशय उत्पन्न न करता हो, सारसे भरा हो, जिसकी उपपत्ति उसीमे गर्भित हो, और अन्य प्रमाणोंके द्वारा वस्तुका जो स्वरूप बतलाया गया है उसके विरुद्ध कथन न करनेसे निर्दोष हो। जिसमे ये गुण होते हैं वह सूत्र है। उसका अर्थ बाह्य और आन्तर दोनों प्रकारका है। इन सूत्र और उसके अर्थका स्थिरीकरण—यह सूत्र शब्दरूपसे इसी प्रकार है अर्थात् इसके शब्द ठीक हैं और इसका अर्थ भी यही है—यह सूत्रार्थका स्थिरीकरण है। आचार्योंके पास रहनेसे यह लाभ होता है तथा अतिशयित सूत्रार्थकी उपलब्धि होती है।

जो सूत्रका अर्थ प्रमाण नय निक्षेप निरुक्ति और अनुयोगके द्वारा किया गया हो उसे अतिशयित कहते हैं। आचार्य अर्थात् सूत्रके अर्थका व्याख्यान करने वाले व्याख्याताओंमें दर्शन अर्थात् मतभेद देखा जाता है। कोई व्याख्याता निक्षेप द्वारा ही सूत्रके अर्थका उपपादन करते हैं। अन्य व्याख्याता नैगम आदि विभिन्न नयोंके द्वारा सूत्रार्थका कथन करते हैं। कुछ अन्य सत् आदि अनुयोगोंका उपन्यास करके सूत्रार्थका कथन करते हैं। 'तु' शब्द पादपूर्तिके लिये अथवा अवधारणके लिये है। आचार्य दर्शनसे ही सूत्र और अर्थका स्थिरीकरण होता है और अतिशयित अर्थकी प्राप्ति

१. इयं गाथा क्षिप्ता मन्तव्या। २. वस्तुतया विरु—आ० मु०। ३. यत्तेन आ० मु०।

उवसद्धी' इति पठन्ति । तत्रायमर्थः—अतिशयभूतानां शास्त्राणा प्रत्यग्राणामरातीयैः सूरिभिः कृताना चिरंतनानामेवाप्रत्याख्यातानां उपलब्धिर्भवति ।

प्रकारान्तरेण अतिशयार्थकुशलत्वमाख्यातुमीहते—

णिक्खवणपवेसादिसु आयरियाणं बहुप्पयाराणं ।
सामाचारी कुसलो य होदि गणसंपवेसेण ॥१५२॥

'**णिक्खवणपवेसादिसु**' इत्यनया गाथया । '**आयरियाणं**' आचार्याणा । '**बहुप्पयाराणं**' बहुविधाना । केचिदाचार्याः चरणक्रममवगच्छन्ति परैः सहाचरणात् । अपरे पुनः शास्त्रनिगदितमेव । अन्ये तदुभयज्ञा । इति बहुप्रकारता । एवं आचार्याणां अनेकप्रकाराणां **गणसंपवेसेण** गणप्रवेशेन निःक्रमणप्रवेशादिकासु क्रियासु । '**कुसलो य होदि**' कुशलश्च भवति । कः ? सामाचारी । ते यथा आचरन्ति तथा प्रवर्तमान स्वावासदेशान्निर्गन्तुमिच्छता शीतलादुष्णाद्वा[1] देशाच्छरीरप्रमार्जनं कार्यं, तथा प्रविशतापि । किमर्थं ? शीतोष्णजन्तूनामाबाधापरिहारार्थं अथवा श्वेतरक्तकृष्णगुणासु भूमिषु अन्यस्या निःक्रमणे अन्यस्याश्च प्रवेशने प्रमार्जनं कटिप्रदेशादधः कार्यं । अन्यथा विरुद्धयोनिसंक्रमेण पृथिवीकायिकानां तद्भूमिभागोत्पन्नानां त्रसानां चाबाधा स्यात् । तथा जलं प्रविशता सचित्ताचित्तरजसोः पदादिषु लग्नयोर्निरासः । यावच्च पादौ शुष्यतस्तावन्न गच्छेज्जलान्तिक एव तिष्ठेत् । महतीना नदीना उत्तरणे आराद्भागे कृतसिद्धवन्दन यावत्परकूलप्राप्तिस्तावन्मया सर्वं

होती है, कोई 'अदिसयसत्थाण होइ उवसद्धी' ऐसा पढ़ते हैं । उसका यह अर्थ है—अतिशयभूत शास्त्रोंकी जो नवीन बने हैं अथवा प्राचीन आरातीय आचार्योंके द्वारा रचे गये हैं उनकी उपलब्धि होती है—उनको जानना देखना होता है ॥१५१॥

प्रकारान्तरसे अतिशय अर्थकुशलताका कथन करते हैं—

गा०—बहुत प्रकारके आचार्योंके गणमें प्रवेश करनेसे वसति और दाताके घरसे निकलने और प्रवेश करने आदिमे जो उनका सम्यक् आचरण है उसमें प्रवीण होता है ॥१५२॥

टी०—आचार्य बहुत प्रकारके होते हैं । कुछ आचार्य दूसरोंके साथ आचरण करनेसे आचरणका क्रम जानते हैं । दूसरे कोई आचार्य शास्त्रमें जो आचार कहा है उसे ही जानते हैं । अन्य कुछ आचार्य दोनोंको जानते हैं । इस प्रकार आचार्योंके बहुत प्रकार हैं । इस प्रकार अनेक प्रकारके आचार्योंके संघमे प्रवेश करनेसे निष्क्रमण प्रवेश आदिमें सामाचारी कुशल होता है । वे आचार्य जैसा आचरण करते हैं उसी प्रकार जो आचरण करता है उसे सामाचारी कहते हैं । अपने रहनेके स्थानसे यदि बाहर जाना चाहता है वह स्थान शीतल हो अथवा गर्म हो, शरीरका प्रमार्जन करके बाहर जाना चाहिए । इसी प्रकार प्रवेश करते हुए भी प्रमार्जन करना चाहिए । यह प्रमार्जन पीछीसे शरीरकी सफाई शीतकाय और उष्णकायके जीवोंको बाधा न हो, इसलिए किया जाता है । अथवा सफेद, लाल या काले गुणवाली भूमियोंमें एकमेंसे निकलकर दूसरीमें प्रवेश करनेपर कमरसे नीचे प्रमार्जन करना चाहिए । अन्यथा विरुद्ध योनिके संक्रमसे पृथिवीकायिक जीवोंको और उस भूमिमें उत्पन्न हुए त्रसोंको बाधा होती है । तथा जलमें प्रवेश करते समय पैर आदिमें लगी सचित्त और अचित्त धूलीको दूर कर देना चाहिए । जब तक पैर न सूखे तबतक जलसे निकलकर जलके पास ही ठहरना चाहिए, वहाँसे जाना नहीं चाहिए । यदि बड़ी नदीको

---

१. द्वा सकलशरीर-अ० ।

शरीरभोजनमुपकरणं च परित्यक्तमिति गृहीतप्रत्याख्यानः समाहितचित्तो द्रोण्यादिकमारोहेत्, परकूले च कायोत्सर्गेण तिष्ठेत्। तदतिचारव्यपोहार्थं। एवमेव महतः कान्तारस्य प्रवेशनि.क्रमणयो.।

तथा भिक्षानिमित्तं गृहं प्रवेष्टुकाम. अवलोकयेत्किमत्र बलीवर्दा, महिष्य., प्रसूता वा गावः, दुष्टा वा सारमेया, भिक्षाचरा. श्रमणाः वा सन्ति न सन्तीति। सन्ति चेन्न प्रविशेत्। यदि न बिभ्यति ते यत्नेन प्रवेशं कुर्यात्। ते हि भीता यतिं बाधन्ते स्वयं वा पलायमानाः त्रसस्थावरपीडा कुर्युः। क्लिश्यन्ति, महति वा गर्तादौ पतिता मृतिमुपेयुः।

गृहीतभिक्षाणां वा तेषां निर्गमनं गृहस्थैः प्रत्याख्यानं वा दृष्ट्वा श्रुत्वा वा प्रवेष्टव्यं। अन्यथा बहव आयाता इति दातुमशक्ताः कस्मैचिदपि न दद्युः। तथा च आ[1]हारान्तरायः कृत स्यात्। क्रुद्धा परे भिक्षाचराः निर्भर्त्सनादिकं कुर्युरस्माभिराशया प्रविष्ठं गृहं किमयं प्रविशतीति। अन्ये भिक्षाचरा यत्र स्थित्वा अन्वेषन्ते[2] भिक्षां, यत्र वा स्थितानां गृहिणः प्रयच्छन्ति तावन्मात्रमेव भूभागं यतिः प्रविशेन्न गृहाभ्यन्तरं। गृहिभिस्तिष्ठ प्रविशेत्यभिहितोऽपि नान्धकारं प्रविशेत् त्रसस्थावरपीडापरिहृतयं। तद्द्वारकाद्युल्लङ्घने कुप्यन्ति च गृहिणः[3]। एलकं वत्सं वा नातिक्रम्य प्रविशेत्। भीताः पलायनं कुर्युरात्मानं वा पातयेयु।

द्वारमप्यायामविष्कम्भहीनं प्रविशतः गात्रपीडा इति संकुटितागस्य विवृताधोभागस्य वा प्रवेशं दृष्ट्वा

पार करना हो तो इस ओर सिद्धोंकी वन्दना करे और जबतक मै नदीके पार न पहुचूं तबतकके लिए मेरे सब शरीर भोजन और उपकरणका त्याग है इस प्रकार प्रत्याख्यान ग्रहण करे और चित्तको समाहित करके नौका आदिमे चढ़े। तथा दूसरे तटपर पहुचकर कायोत्सर्ग करे। यह कायोत्सर्ग नदी पार करनेमें लगे दोषकी शुद्धिके लिए किया जाता है। इसी प्रकार किसी महान् वनमें प्रवेश करने और निकलनेपर करना चाहिए।

तथा भिक्षाके लिए घरमें प्रवेश करनेसे पूर्व देख ले कि यहाँ, साँड़, भैंस, ब्याई हुई गाय, अथवा दुष्ट कुत्ते और भिक्षाके लिए श्रमण हैं अथवा नही है। यदि हों तो घरमे प्रवेश न करें। यदि वे पशु साधुके प्रवेशसे न डरें तो सावधानतापूर्वक प्रवेश करे। वे पशु डरनेपर यतिको बाधा कर सकते हैं। अथवा स्वयं भागकर त्रस और स्थावर जीवोको पीड़ा पहुँचा सकते हैं। स्वय कष्टमें पड़ सकते हैं। किसी बड़े गड्ढेमें गिरकर मर सकते हैं। अथवा भिक्षा लेकर निकलते हुए साधुओंको देखकर और गृहस्थोके द्वारा उनका प्रत्याख्यान सुनकर घरमें प्रवेश करना चाहिए। अन्यथा 'बहुतसे साधु आ गये, हम इन्हे भिक्षा देनेमें असमर्थ हैं ऐसा सोच गृहस्थ किसीको भी भिक्षा नहीं देंगे। और तब आहारमें अन्तराय हो जायगा। अन्य भिक्षार्थी क्रुद्ध होकर तिरस्कार करेंगे कि जिस घरमें हम भिक्षा लेते हैं उसमें ये क्यों प्रविष्ट हुए। अन्य भिक्षा लेनेवाले जहाँ खड़े होकर भिक्षाकी प्रतीक्षा करते हैं अथवा जहाँपर खड़े हुए भिक्षार्थियोंको गृहस्थ भिक्षा देते हैं, वहीं तक साधुको जाना चाहिए। घरके भीतर प्रवेश नही करना चाहिए। गृहस्थोंके द्वारा 'पधारिये' घरमें प्रवेश कीजिए, ऐसा कहनेपर भी त्रस और स्थावरजीवोको पीड़ा न पहुँचे इसलिए अन्धकारमें प्रवेश नहीं करना चाहिए। उनके द्वार आदिको लाँघनेपर गृहस्थ क्रुद्ध हो सकते हैं। बछड़े आदिको लाँघकर नहीं जाना चाहिए, क्योंकि ऐसा करनेसे वे डरकर भाग सकते हैं अथवा साधुको गिरा सकते हैं। लम्बाई चौड़ाईसे रहित द्वारमें प्रवेश करते हुए अंगोंको

१. भोगान्तरायः–आ० मु०। २. श्रमन्ते–आ० मु०। ३. गृहिण. भीत.–आ०।

कुप्यन्ति हसन्ति वा । आत्मविराधना मिथ्यात्वाराधना च । द्वारपार्श्वस्थजन्तुपीडा स्वगात्रमर्दने च शिक्यावलम्बितभाजनानि वा अनिरूपितप्रवेशी अभिहंति । तस्मादूर्ध्वं तिर्यक्चावलोक्य प्रवेष्टव्यं ।

तदानीमेव लिप्तां, जलसेकार्द्रां, प्रकीर्णहरितकुसुमफलपत्राद्याभिर्निरन्तरां, सचित्तमृत्तिकावतीं, छिद्रबहुला, विचरत्त्रसजीवां, गृहिणां भोजनार्थं कृतमण्डलपरिहारां, देवताध्युषितां निकटभूतना[1]भाजनासनिकस्थासनशयनमासीनशयितपुरुषां, मूत्रपुरीषादिभिरुपहतां भूमिं न प्रविशेत् ।

संयमविराधना आत्मविराधना मिथ्यात्वाराधनां च परिहर्तुं भुक्त्वा निर्गच्छन्नपि शनैरतीवानम्रो वन्दमानं प्रति दत्तयोग्याशीर्वादो निर्गच्छेत् । तथा भिक्षाकालं, बुभुक्षाकालं च ज्ञात्वा गृहीतावग्रहः, ग्रामनगरादिकं प्रविशेदीर्यासमितिसम्पन्नः । भोजनकालपरिमाणं ज्ञात्वा ग्रामादिभ्यो निःसरेत् । जिनायतनं, यतिनिवासं वा प्रविशन्प्रदक्षिणां कुर्यान्निसीधिकाशब्दप्रयोगं च । निर्गच्छन्नासीधिकेति । आदिशब्देन परिगृहीता स्थानभोजनशयनगमनादिक्रिया । तत्रापि यत्नो यतीनां । तं सकलं वेद्मि गुरुकुलवासी सूत्रार्थज्ञोऽहं, न मयाचारक्रमः सूत्रार्थो वान्यसकाशे ज्ञातव्य इत्यभिमानं न वहेत् ॥ १५२॥

शिक्षायामुद्योगपरो भवेदित्याह—

[2]कंठगदेहिं वि पाणेहिं साहुणा आगमो हु कादव्वो ।
सुत्तस्स य अत्थस्स य सामाचारी जध तहेव ॥१५३॥

संकुचित करनेपर शरीरमें पीड़ा होती है। नीचेके भागको फैलाकर प्रवेश करनेपर लंग देखकर कुपित होंगे या हँसेंगे। तथा आत्माकी विराधना और मिथ्यात्वकी आराधना होती है।

अपने शरीरका मर्दन करनेपर द्वारके पार्श्वभागमें स्थित जीवोंको पीड़ा होती है। बिना देखे घरमें प्रवेश करनेवाला साधु छीकेपर रखे बरतनोंसे टकराता है। अतः ऊपर और इधर-उधर देखकर घरमें प्रवेश करना चाहिए। जो भूमि तत्काल लीपी गई हो, जलके सिंचनसे गीली हो, हरे फूल, फल पत्र आदिसे सर्वत्र ढकी हो, सचित्त मिट्टीवाली हो, जिसमें बहुत छिद्र हों, जिसपर त्रसजीव विचरते हों, गृहस्थोंके भोजके लिए मण्डल आदि रचे गये हों, जहाँ देवताका निवास हो, पासमें बहुतसे आदमी बैठे हों, आसन शय्या पासमें हों, पुरुष सोये या बैठे हों, टट्टी पेशाब आदि पड़े हों, उस भूमिसे प्रवेश नहीं करना चाहिए। संयमकी विराधना, आत्माकी विराधना और मिथ्यात्वकी आराधनासे बचनेके लिए भोजन करके निकलते हुए भी धीरेसे अति नम्र हो, वन्दना करनेवालोंको आशीर्वाद देते हुए निकलना चाहिए। तथा भिक्षाका समय और अपनी भूखके समयको जानकर कोई नियम ग्रहण करके ईर्यासमितिपूर्वक ग्राम नगर आदिमें प्रवेश करना चाहिए। और भोजनके कालका परिमाण जानकर ग्रामादिसे निकलना चाहिए। जिन मन्दिरमें अथवा साधु निवासमें प्रवेश करते समय निसिधिका शब्दका प्रयोग करना चाहिए और प्रदक्षिणा करना चाहिए। निकलते समय 'आसीधिका' शब्दका प्रयोग करना चाहिए। आदि शब्दसे स्थान, भोजन, शयन, गमन आदि क्रियाका ग्रहण किया है। उनमें भी यतियोंको सावधानता बरतनी चाहिए। मैं सब जानता हूँ, गुरुकुलका वासी और सूत्रके अर्थका ज्ञाता हूं, मुझे दूसरेसे आचारक्रम और सूत्रार्थ नहीं जानना है' ऐसा अभिमान नहीं करना चाहिए ॥१५२॥

शिक्षामें उद्योग करना चाहिए, ऐसा कहते हैं—

---

१. त भाजना-अ० । २. एषापि गाथा क्षिप्तैव-मूलारा० ।

'कण्ठगदेहिं वि पाणेहिं' । कण्ठगतैः प्राणैः सह वर्तमानेनापि साधुना आगमशिक्षा कर्तव्यैव सूत्रस्यार्थस्य सामाचारस्य च ॥१५३॥

क्षेत्रपरिमार्गणां व्याचष्टे—

संजदजणस्स य जम्हि फासुविहारो य सुलभवुत्ती य ।
तं खेत्तं विहरंतो णाहिदि सल्लेहणाजोग्गं ॥१५४॥

'संजदजण' इत्यादिना । असंयमाम् हिंसादीन्ज्ञात्वा श्रद्धाय च तेभ्य उपरतो व्यावृत्तः सम्यग्यत संयतः इत्युच्यते तस्य संयतजनस्य । 'जम्हि' यस्मिन्क्षेत्रे । 'फासुविहारो य' प्रासुक विहरण जीवबाधारहितं गमनं त्रससहरितबहुलत्वाद्प्रचुरोदककर्दमत्वाच्च क्षेत्रस्य । 'सुलभवुत्ती य' सुखेनाक्लेशेन लभ्यते वृत्तिराहारो यस्मिन्क्षेत्रे । 'तं खेत्तं' तत्क्षेत्रं । 'णाहिदि' ज्ञास्यत्यात्मनः परस्य वा । 'सल्लेहणाजोग्गं' सम्यक्कायकषायतनूकरणं सल्लेखना तस्या योग्यं । कः ? 'विहरंतो' देशान्तराणि भ्रमन् ॥१५४॥

न देशान्तरभ्रमणमात्रादनियतविहारी भवति किन्त्वेवंविध इत्याचष्टे—

वसधीसु य उवधीसु य गामे णयरे गणे य सण्णिजणे ।
सव्वत्थ अपडिबद्धो समासदो अणियदविहारो ॥१५५॥

'वसदीसु य' इत्यादिना—'वसतिषु' उपकरणेषु । ग्रामे नगरे गणे श्रावकजने च । सर्वत्र अप्रतिबद्धः ।

गा०—प्राणोंके कण्ठमें आ जानेपर भी साधुको आगमका अभ्यास अवश्य करना चाहिए। जैसे वह सूत्रका और अर्थका और समाचारीका अभ्यास करता है उसी प्रकार उसे आगमका अभ्यास करना चाहिए ॥१५३॥

टी०—कण्ठगत प्राणोंके होते हुए भी साधुको आगमकी शिक्षा करना ही चाहिए तथा सूत्र, अर्थ और सामाचारीकी भी शिक्षा करना चाहिए ॥१५३॥

विशेष०—आशाधर इस गाथाको प्रक्षिप्त बतलाते हैं।

क्षेत्र परिमार्गणाको कहते हैं—

गा०—जिस क्षेत्रमें संयमीजनका प्रासुक विहार और सुलभ आहार हो, वह क्षेत्र देशान्तरमें भ्रमण करनेवाला सल्लेखनाके योग्य जानता है ॥१५४॥

टी०—असंयमरूप हिंसा आदिको जानकर और श्रद्धान करके जो उनसे अलग होता है अर्थात् उनका त्याग करता है उस सम्यक् यतको संयत कहते हैं। संयमी मनुष्यका जिस क्षेत्रमें प्रासुक विहार अर्थात् जीव बाधारहित गमन होता है; क्योंकि क्षेत्रमें त्रस और हरितकायकी बहुलता और पानी कीचड़की अधिकता नहीं होनी चाहिए। तथा जहाँ वृत्ति अर्थात् आहार सुखपूर्वक विना क्लेशके प्राप्त होता है वह क्षेत्र देशान्तरमें विहार करनेवाला अनियत विहारी साधु सल्लेखनाके योग्य जानता है। सम्यक् रीतिसे शरीर और कषायके कृश करनेको सल्लेखना कहते हैं उसके योग्य वह क्षेत्र होता है ॥१५४॥

आगे कहते हैं कि केवल देशान्तरमें भ्रमण करनेसे अनियत विहारी नहीं होता किन्तु जो ऐसा होता है—

गा०—वसतियोंमें और उपकरणोंमें ग्राममें नगरमें संघमें और श्रावकजनमें सर्वत्र यह मेरा है इस प्रकारके संकल्पसे रहित साधु संक्षेपसे अनियत विहारी होता है ॥१५५॥

टी०—वसति, उपकरण, ग्राम, नगर, गण और श्रावकजनमें जो सर्वत्र अप्रतिबद्ध है, यह

ममेदं वसत्यादिकं अहमस्य स्वामीति संकल्परहितः अनियतविहारी भवति इति संक्षेपतः प्रतिपत्तव्यः। विहारो गदो ॥१५५॥

अनियतवासादनन्तरं परिणामं प्रतिपादयितु उत्तरगाथा—

अणुपालिदो य दीहो परियाओ वायणा य मे दिण्णा।
णिप्पादिदा य सिस्सा सेयं खलु अप्पणो कादुं ॥१५६॥

'अणुपालिदो य' अनुपालितश्च सूत्रानुसारेण रक्षितः। 'दीहो' दीर्घः चिरकालप्रवृत्तिः। 'परियाओ' पर्यायः ज्ञानदर्शनचारित्रतपोरूपः। 'वायणा वि' वाचनापि। 'मे' मया। 'दिण्णा' दत्ता। 'णिप्पादिदा य सिस्सा' निष्पादिताश्च शिष्याः। 'सेयं' श्रेयः हितं। 'अप्पणो काउं' आत्मनः कर्तुं 'जुत्तं' इति शेषः। एतदुक्तं भवति। ज्ञानदर्शनचारित्रेषु चिरकालं परिणतोऽस्मि। सूत्रानुसारेण परेभ्यश्च निरवद्यग्रन्थार्थदानं च कृतं। शिष्याश्च व्युत्पन्नाः संवृत्ताः। एवं स्वपरोपकारक्रियया गतः कालः। इतः प्रभृत्यात्मन एव हितं कर्तुं न्याय्यमिति चेतःप्रणिधानं इह परिणामशब्देनोच्यते। तथा चोक्तम्—

अप्पहियं कायव्वं जइ सक्कइ परहियं च कायव्वं।
अप्पहियपरहियादो अप्पहियं सुट्ठु कायव्वं ॥ [ ]

किण्णु अधालंदविधी भत्तपइण्णेंगिणी य परिहारो।
पादोवगमणजिणकप्पियं च विहरामि पडिवण्णो ॥१५७॥

'किं णु अधालंदविधि'। कोऽसावथालन्दविधिः? उच्यते—परिणाम सामर्थ्यं, गुरुविसर्जनं, प्रमाणं, स्थापना, आचारमार्गणा, अथालन्दमासकल्पश्च। गृहीतार्थाः कृतकरणाः, परीषहोपसर्गजये समर्थाः, अनि-

---

वसति आदि मेरी है और मैं इसका स्वामी हूं इस प्रकारके संकल्पसे रहित है उसे संक्षेपमें अनियत विहारी जानना। इस प्रकार अनियत विहार समाप्त हुआ ॥१५५॥

अनियत वासके अनन्तर परिणामका कथन करनेके लिए गाथा—

गा०—दीर्घकाल तक ज्ञान दर्शन चारित्र और तप रूप पर्यायका मैंने शास्त्रानुसार पालन किया। और मैंने वाचना भी दी और शिष्योंको तैयार किया। अब निश्चयसे अपना कल्याण करना उचित है ॥१५६॥

टीका—इसका अभिप्राय यह है कि ज्ञानदर्शन चारित्रमें मैं चिरकालतक रमा हूँ। तथा दूसरोंको आगमके अनुसार निर्दोष ग्रन्थ और उसके अर्थका दान किया है। शिष्य भी व्युत्पन्न हो गये। इस प्रकार अपना और परका उपकार करनेमें काल बीता। आजसे अपना ही हित करना उचित है। इस प्रकारके मनोभावको यहाँ परिणाम शब्दसे कहा है। कहा भी है—'अपना हित करना चाहिए। यदि शक्ति हो तो परका हित भी करना चाहिए। किन्तु आत्महित और परहित में से आत्महित अच्छे प्रकार करना चाहिए ॥१५६॥

गा०—क्या अथालन्द विधि, भक्त प्रतिज्ञा, इंगिनीमरण, परिहार विशुद्धि चारित्र, पादोपगमन अथवा जिनकल्पको धारण करके मैं विहार करूँ ॥१५७॥

टी०—अथालन्दविधि क्या है, यह कहते हैं—परिणाम, सामर्थ्य, गुरुके द्वारा विसर्जन, प्रमाण, स्थापना, आचार मार्गणा और अथालन्दकमासकल्प यह क्रम है। जो मुनि शास्त्रज्ञ, करने

गूहितबलवीर्या, आत्मानं मनसा तुलयन्ति। किमथालन्दविधिरारभ[1]णीयोऽथवा प्रायोपगमनविधिरिति। परिहारस्यासमर्था अथालन्दविधिमुपगन्तुकामास्त्रयः, पञ्च, सप्त, नव वा ज्ञानदर्शनसंपन्नास्तीव्रसंवेगमापन्नाः, स्थविरमूलनिवासिनः, अवधृतात्मसामर्थ्या विदितायुःस्थितयः स्थविरं विज्ञापयन्ति—भगवन्! किमिच्छामोऽथालन्दकसंयमं प्रतिपत्तुमिति। तच्छ्रुत्वा स्थविरो वारयति धृत्या शरीरेण च दुर्बलान्परिणामातिशयविरहितांश्च कांश्चिदनुजानाति। समग्रगुणास्ते निसृष्टाः स्थविरेण प्रशस्तेऽवकाशे स्थिताः कृतलोचाः, गुरूणामालोचनां कृत्वा कृतव्रतारोपणा अचिरोद्गते आदित्ये कल्पस्थितमेकं गणस्यालोचना श्रोतु शुद्धिं चैव कर्तुं समुद्यतं स्थापयन्ति। स एव प्रमाणं गणस्य। आत्मन सहाया यावन्तो गणान्निर्गतास्तावन्त एव तत्स्थाने स्थापयितव्या गणे।

आचारो निरूप्यते—अथालन्दसंयताना लिङ्गं औत्सर्गिक, देहस्योपकारार्थं आहारं वसतिं च गृह्णन्ति, शेषं सकलं त्यजन्ति। तृणपीठकटफलकादिक उपधिं च न गृह्णन्ति। प्राणिसयमपरिपालनार्थं जिनप्रतिरूपतासपादनार्थं च गृहीतप्रतिलेखना ग्रामान्तरगमने विहारभूमिगमने, भिक्षाचर्यायां, निषद्याया च अप्रतिलेखना एव व्युत्सृष्टशरीरसंस्कारा परीषहान्सहन्ते नो वा धृतिबलहीनाः। अस्ति च मनोबल सयममाचरितुं इति मत्वा त्रय. पञ्च वा सह प्रवर्तन्ते। रोगेणाभिघातेन वा जाताया वेदनाया प्रतिक्रियया वर्ज्या यदा तपसातिश्रान्तास्तदा

योग्य कार्यको कर चुकने वाले, परीषह और उपसर्गको जीतनेमें समर्थ तथा अपने बल और वीर्य-नहीं छिपानेवाले होते हैं, वे अपनी तुलना मनमें करते हैं कि क्या अथालन्दविधि प्रारम्भ करें या प्रायोपगमन विधि? जो परिहार विशुद्धिको धारण करनेमें असमर्थ हैं और अथालन्दविधिको स्वीकार करना चाहते हैं ऐसे पाँच, सात या नौ मुनि, जो ज्ञान और दर्शनसे सम्पन्न है, तीव्र वैराग्यसे सम्पन्न हैं, आचार्यके पादमूलमें रहते हैं, जिन्होंने अपनी सामर्थ्यका निर्णय कर लिया है और जिन्हे अपनी आयुकी स्थिति ज्ञात है वे आचार्यसे निवेदन करते है—भगवन्! हम अथालन्दक संयमको धारण करना चाहते हैं। यह सुनकर आचार्य जो धैर्य ओर शरीरसे दुर्बल है, जिनके परिणाम उन्नत नहीं हैं, उन्हे रोक देते है और कुछको अनुमति देते है। वे सम्पूर्ण गुणशाली गुरुके द्वारा छोड़ दिये जाने पर प्रशस्त स्थानमे लोच करते हैं। और गुरुके सन्मुख आलोचना करके व्रत धारण करते हैं। सूर्यका उदय होते ही कल्पस्थित मुनियोंमें से एकको जो गणको आलोचना सुनते और दोषोंको शुद्धि करनेके लिए तत्पर होता है, स्थापित करते हैं। वही गणके लिए प्रमाण होता है अपने सहायक जितने मुनि गणसे निकले हैं, गणमें उनके स्थानमें उतने ही मुनि स्थापित करना चाहिए।

अब अथालन्दकोंके आचारका निरूपण करते हैं—अथालन्दक मुनियोके औत्सर्गिक लिंग (नग्नता) होता है। शरीरके उपकारके लिए आहार और वसति स्वीकार करते है। शेष सब छोड़ देते हैं। तृणोंका आसन, लकड़ोका तख्त आदि परिग्रह स्वीकार नही करते। प्राणि संयमको पालनेके लिए और जिनदेवका प्रतिरूप रखनेके लिए पीछी रखते हैं। अन्य ग्रामको जाने पर, विहार भूमिमे जाने पर, भिक्षाचर्यामें और बैठते समय प्रतिलेखना नहीं करते। शरीरका संस्कार नहीं करते, परीषहोंको सहते हैं और धैर्यबलसे हीन नहीं होते। संयमका आचरण करनेके लिए हममें मनोबल है ऐसा मानकर तीन या पाँच मुनि एक साथ रहते हैं। रोगसे या चोट आदिसे

1. राधनीयो–आ० मु०।

सहायहस्तावलम्बनं कुर्वन्ति । वाचनादिकां च न कुर्वन्ति याम[1]ष्टकेऽप्यनिद्रा एकचित्ता ध्याने यतन्ते । यदि बलाबायाति निद्रा तथाकृतप्रतिज्ञाः स्वाध्यायकालप्रतिलेखनादिकाश्च क्रियास्तेषां न सन्ति । श्मशानमध्येऽपि तेषां ध्यानमप्रतिषिद्धं आवश्यकेषु च प्रयतन्ते । उपकरणप्रतिलेखनां कालद्वयेऽपि कुर्वन्ति । सस्वामिकेषु देवकुलादिषु तदनुज्ञया वसन्ति । अज्ञायमानस्वामिकेषु यस्येदं सोऽनुज्ञां करोतु इत्यभिधाय वसन्ति । सहसातिचारे जाते अशुभपरिणामे वा मिथ्या मे दुष्कृतमिति निवर्तंते । दशविधे समाचारे प्रवर्तन्ते । दानं, ग्रहणं, अनुपाल[2]ना, विनयः, सह[3]भोजनं च नास्ति संघेन तेषां । कारणमपेक्ष्य केषांचिदेक एव सल्लापः कार्यः । यत्र क्षेत्रे सधर्मा तत्क्षेत्रं न प्रविशन्ति । मौनावग्रहनिरताः पंथानं पृच्छन्ति, शंकितद्रव्यं वा द्रव्यं शय्याधरगृहं वा । एवं तिस्र एव भाषा । ग्रामाद्बहिरागंतुकागारे कल्पस्थितेनानुज्ञाते वसन्ति । पशुपक्षिप्रभृतिभिर्यत्र ध्याने विघ्नो भवति ततः स्थानादपयांति । को भवान्, कुत आयात:, क्व प्रस्थितः, कियत्कालं अत्र भवतो वसनं, कति यूयमिति पृष्टाः श्रमणोऽहमित्येवं प्रतिवचनमेकं प्रयच्छन्ति, इत[4]रत्र कृततूष्णीभावा । अपसरात स्थानादवकाशं मे प्रयच्छ, परिपालय गृहं, इत्यादिको वाग्व्यापारो यत्रान्येषां भवति, तत्र न निवसन्ति । बहिरपि वसतः यदि भवति, ततोऽपयान्ति । स्वावासगृहे प्रज्वलिते न[5] चलन्ति चलन्ति वा गोचर्यायामप्राप्तायां-

---

उत्पन्न हुई वेदनाका प्रतीकार नही करते । जब तपसे अत्यन्त थक जाते हैं तब सहायके रूपमें एक दूसरेका सहारा लेते हैं । वाचना आदि नहीं करते । आठों पहर भी नही सोते और एकाग्र होकर ध्यानमें प्रयत्न करते हैं । यदि अचानक निद्रा आ जाती है तो सो लेते हैं, नहीं सोनेकी प्रतिज्ञा उनके नहीं होती । स्वाध्यायके समय उनके प्रतिलेखना आदि क्रिया नहीं होती । स्मशानके मध्यमें भी वे ध्यान कर सकते हैं उसका उनके लिए निषेध नही है । और आवश्यकोंमे प्रयत्नशील रहते हैं । उपकरणोंकी प्रतिलेखना दोनों समय करते हैं । जिन देवकुलादिके स्वामी होते हैं उनमें उनकी आज्ञा लेकर ही निवास करते हैं । जिन मन्दिरोंके स्वामीका पता नही होता उनमें 'जिनका यह है वह हमें स्वीकृति प्रदान करें' ऐसा कहकर निवास करते हैं । सहसा अतिचार लगने पर अथवा अशुभ परिणाम होने पर 'मेरा दुष्कृत मिथ्या हो' ऐसा कहकर निवृत्त हो जाते हैं । दस प्रकारके समाचारका पालन करते हैं । संघके साथ उनका देन, लेन, अनुपालना, विनय और सहभोजन या वार्तालाप नही होता । आवश्यकता होने पर किसीसे एक ही व्यक्तिको बात करना चाहिए । जिस क्षेत्रमें साधर्मी मुनि हों, उस क्षेत्रमें वे नही जाते । मौनका नियम पालन करते हैं किन्तु, मार्ग या शंका युक्त द्रव्य और वसतिकाके स्वामीका घर पूछ लेते है । इस प्रकार तीन ही उनकी भाषा होती हैं । गाँवसे बाहर आने वालोंके लिए जो मकान होता है उसमें कल्पस्थित मुनिकी अनुज्ञा मिलने पर ठहरते हैं । जिस स्थानमें पशु-पक्षी आदिके द्वारा ध्यानमें विघ्न होता हो वहाँसे चले जाते हैं । कोई पूछे कि आप कौन हैं, कहाँसे आये हैं, कहाँ जाते हैं, कितने समय तक आप यहाँ रहेंगे ? तो 'मैं श्रमण हूं' इस प्रकार एक ही उत्तर देते हैं, शेष प्रश्नोंके संबंधमें चुप रहते हैं । 'यहाँसे जाओ, मुझे स्थान दो, घरको देखना, इत्यादि वचन व्यवहार जहाँ अन्य लोग करते हैं वहाँ निवास नहीं करते । घरके बाहर भी ठहरने पर यदि कोई ऐसा व्यवहार करता है तो वहाँसे भी चले जाते हैं । जिस घरमें वे रहते हैं उसमें आग लगने पर वहाँसे नहीं जाते

---

१. यामके अ० । यामाकष्टके–आ० । २. लनं–आ० मु० । ३. सहजल्पनं–आ० मु० ।
४. इतरेत्र आ० । इतरे कृत–मु० । ५. न चलन्ति वा–अ० ।

तृतीयपौरुष्यां द्विगव्यूतमध्वानं गच्छन्ति । यदि गमनव्याघातो महावातेन वर्षादिना जात. समतीतगमनकाल एव तिष्ठन्ति । व्याघ्रादिका, व्यालमृगा[1] वा पतन्ति ततोऽपसर्पन्ति न वा पादे कण्टकालग्ने, चक्षुषि रज:-प्रवेशे वा, अपनयन्ति न वा । दृढधृतिका: मिथ्यात्वचर्याराधनामात्मविराधनामवस्था दोषान्वा तस्मात्परिहरन्ति न वा । तृतीयपौरुष्यां भिक्षार्थमवतरन्ति । कृपणवनीपकपशुपक्षिगणे अपगते पञ्चमी पिण्डैषणा कुर्वन्ति मौनं च । एका, द्वे तिस्रश्चतस्र: पञ्च वा गोचर्यो यत्र क्षेत्रे तत्रालन्दिकयोग प्रवर्तयन्ति । यस्मात्पाणिपात्रभोजी मिथ्याराधनां न वर्जयति तस्माल्लेपमलेपं वा भुक्त्वा तत्प्रक्षालयन्ति । धर्मोपदेश[2] कुरुत प्रव्रज्यामिच्छामि भगवतां पादमूले इत्युक्तास्यापि न मनसापि वांछन्ति किं पुनर्वचसा कायेन । इतरे तत्सहाया धर्मोपदेशं कृत्वा सशिखं मुण्डितं वा गणाधिपतयेऽर्पयन्ति ।

क्षेत्रतः सप्ततिशतधर्मक्षेत्रेषु भवन्ति । कालत. सर्वदा । चारित्रत सामायिकच्छेदोपस्थापनयो. । तीर्थतः सर्वतीर्थकृतां तीर्थेषु । जन्मन: त्रिंशद्वर्षजीविता:[3] । श्रामण्येन एकोनविंशतिवर्षा । श्रुतेन नवदशपूर्वधराः । वेदत: पुमांसो नपुंसकाश्च । लेश्यात. पद्मशुक्ललेश्या: । ध्यानेन धर्मध्याना. । संस्थानत षड्विधेष्वन्यतरसंस्थाना: देशोनसप्तहस्तादि यावत्पञ्चधनु:शतो[4]च्छ्रया: । कालतो भिन्नमुहूर्तादूनपूर्वकोटिकाल-

---

अथवा जाते हैं। गोचरी नहीं मिलने पर तीसरे पहरमें दो गव्यूति प्रमाण मार्ग चलते हैं। यदि प्रचण्ड वायु या वर्षा आदिसे गमनमें रुकावट आती है तो वहीं ठहर जाते है। व्याघ्र आदि अथवा सर्प मृग आदि आ जाते हैं तो वहाँसे हटते भी हैं और नहीं भी हटते। पैरमें काँटा लगने पर अथवा आँखमें धूल चली जाने पर उसे निकालते हैं, नहीं भी निकालते।

'दृढ़ धैर्यशाली वे मुनि मिथ्यात्वचर्याराधना और आत्मविराधना अवस्थाको अथवा दोषोको दूर करते हैं अथवा नहीं करते (?)। तीसरे पहर भिक्षाके लिए निकलते हैं। कृपण, याचक, पशु-पक्षी गणके चले जाने पर पाँचवीं पिण्डैषणा करते है और मौन रखते हैं। जिस क्षेत्रमें एक, दो, तीन, चार अथवा पाँच गोचरी होती है उस क्षेत्रमें आलन्दिक योग करते हैं। यत: पाणिपात्रमें भोजन करने वाला मिथ्या आराधनाको नहीं छोड़ता, इसलिए वह लेप अथवा अलेपको खाकर उसका प्रक्षालन करते हैं?'

कोई आकर कहे कि धर्मोपदेश करो, मैं आपके चरणोंमें दीक्षा लेना चाहता हूँ तो ऐसा कहने पर भी वे मनसे भी उसकी चाहना नहीं करते, तब वचन और कायका तो कहना ही क्या? अन्य मुनि जो उनके सहायक होते हैं वे उन्हे धर्मोपदेश देकर शिखा सहित अथवा मुण्डन कराकर आचार्यको सौंप देते हैं।

क्षेत्रकी अपेक्षा एक सौ सत्तर कर्मभूमि रूप धर्मक्षेत्रोंमें ये आलन्दक मुनि होते हैं। कालकी अपेक्षा सर्वदा होते हैं। चारित्रकी अपेक्षा सामायिक और छेदोपस्थापना चारित्रमें होते हैं। तीर्थकी अपेक्षा सब तीर्थङ्करोंके तीर्थमें होते हैं। जन्मसे तीस वर्षतक गृहस्थाश्रममें रहकर उन्नीस वर्ष तक मुनि धर्मका पालन करते हैं, श्रुतसे नौ या दस पूर्वके धारी होते हैं। वेदसे पुरुष अथवा नपुंसक होते हैं! लेश्यासे पद्म या शुक्ल लेश्यावाले होते हैं। ध्यानसे धर्मध्यानी होते हैं। संस्थानसे छह प्रकारके संस्थानोंमें से किसी एक संस्थान वाले होते हैं। कुछ कम सात हाथसे लेकर पाँचसौ

---

१. व्यालमृगाद्या यद्याप–आ० मु० । २. कुर्वत: तत्प्र–आ० । कुर्वन्त :तत्प्र० मु० । ३. जीविन:–आ० । ४. शतोत्सेधा–मु० ।

स्थितयः। विक्रिया चारणताक्षीरास्रवित्वादयश्च तेषां जायन्ते। विरागतया न सेवन्ते। गच्छविनिर्गताऽलन्दविधिरेष व्याख्यातः।

गच्छप्रतिबद्धालन्दकविधिरुच्यते—गच्छाद्विनिर्गच्छन्तो बहिः सक्रोशयोजने विहरन्ति। अपराक्रमो गणधरो ददाति क्षेत्राद् बहिर्गत्वार्थपदं। तेऽपि समर्था आगत्य शिक्षां गृह्णन्ति। एको द्वौ त्रयो वा परिज्ञानधारणा गुणसमग्रा गुरुसकाशमायान्ति। कृतप्रतिप्रश्नकार्याः स्वक्षेत्रे भिक्षाग्रहणं कुर्वन्ति। अपराक्रमस्तु गणधरो गच्छे सूत्रार्थपौरुषीं कृत्वा अग्रोद्यानं गत्वा यत्नेन ददात्यर्थपदं। अथवा स्वोपाश्रय एव गणधरो अन्यापसारणं कृत्वा एकस्मै उपदिशति। यदि गच्छेत्क्षेत्रान्तरं गणः अथालन्दिका अपि गुर्वनुज्ञया यान्ति क्षेत्रं। यदा गच्छनिवासिनः क्षेत्रप्रतिलेखनार्थं प्रयतन्ते तदा तत्र मार्गेण द्वौ अथालन्दिकौ यातौ। व्याख्यातोऽयमथालन्दविधिः।

परिहार उच्यते—जिनकल्पस्यासमर्थाः परिहारसंयमभरं वोढुं समर्थाः आत्मनो बलं वीर्यमायुः प्रत्यवायांश्च ज्ञात्वा ततो जिनसकाशं उपगत्य कृतविनयाः प्राञ्जलयः पृच्छन्ति "परिहारसंयमं प्रतिपत्तुमिच्छामो युष्माकमाज्ञया" इति तच्छ्रुत्वा येषां ज्ञानमनुत्तरं उपजायते विघ्नो वा तान्निवारयति। निसृष्टास्तु यतीन्द्रेण संयतानां कृतनिःशल्या. प्रशस्तमवकाशमुपगताः, लोचं कृत्वा सुनिश्चिता गुरूणां कृतालोचना व्रतानि सुविशुद्धानि कुर्वन्ति। परिहारसंयमाभिमुखानां मध्ये एकं सूर्योदये स्थापयन्ति कल्पस्थितं गुरुत्वेन। सच

धनुष ऊँचे होते हैं। कालसे एक अन्तर्मुहूर्तसे लेकर कुछ कम पूर्वकोटिकी स्थितिवाले होते हैं अर्थात् अथालन्दक होनेके कालसे लेकर जघन्य आयु अन्तर्मुहूर्त और उत्कृष्ट आयु बीते वर्षोंसे हीन पूर्व कोटि प्रमाण होती है। उनको विक्रिया, चारण और क्षीरास्रवित्व आदि ऋद्धियाँ उत्पन्न होती हैं किन्तु रागका अभाव होनेसे उनका सेवन नहीं करते। यह गच्छसे निकले हुए आलन्दककी विधिका कथन है। अब गच्छसे प्रतिबद्ध आलन्दककी विधि कहते हैं—ये गच्छसे निकलकर बाहर एक योजन और एक कोस क्षेत्रमें विहार करते हैं। यदि आचार्य पराक्रमी होते हैं तो क्षेत्रसे बाहर आकर उन्हें अर्थपद (शिक्षा) देते हैं। आलन्दकोंमें से भी जो समर्थ होते हैं वे आकर आचार्यसे शिक्षा ग्रहण करते हैं। परिज्ञान और धारणा गुणसे पूर्ण एक दो अथवा तीन अथालन्दक मुनि गुरुके पास आते हैं, और उनसे प्रश्नादि करके अपने क्षेत्रमें आकर भिक्षा ग्रहण करते हैं। (?) यदि आचार्य शक्तिहीन होते हैं तो गच्छमें सूत्रार्थपौरुषी (?) करके··· ·· ··· ······ ।

आगेके उद्यानमें जाकर सावधानतापूर्वक अर्थपद देते हैं। अथवा अपने उपाश्रयमें ही अन्य शिष्योंको दूर करके एकको ही अर्थपद देते हैं। यदि गण अन्य क्षेत्रको जाता है तो अथालन्दक मुनि भी गुरुकी आज्ञासे उस क्षेत्रको जाते हैं। जब गच्छ निवासी मुनि क्षेत्रकी प्रतिलेखना करते हैं तब उस मार्गसे दो अथालन्दक जाते हैं। यह अथालन्दकी विधि कही।

परिहारका कथन करते हैं—जो जिनकल्पको धारण करनेमें असमर्थ होते हैं और परिहार संयमके भारको वहन करनेमें समर्थ होते हैं वे अपना बल, वीर्य, आयु और विघ्नोंको जानकर जिन भगवान्‌के पास आकर हाथ जोड़ विनयपूर्वक पूछते हैं—हम आपकी आज्ञासे परिहार संयम धारण करना चाहते हैं। यह सुनकर जिनका ज्ञान उत्कृष्ट नहीं होता अथवा जिन्हे कोई बाधा होती हैं उनको रोक देते हैं। जिन्हें आज्ञा मिल जाती है वे मुनियोंके पास निःशल्य होकर प्रशस्त स्थानोंमें आकर केशलोच करते हैं। फिर गुरुओंके सन्मुख आलोचना करके अपने व्रतोंको अच्छी तरह विशुद्ध करते हैं। परिहार संयम धारण करनेवालोंमेंसे एक कल्पस्थितको सूर्यका उदय

प्रमाणं तस्य[1]। स आलोचनां श्रुत्वा शुद्धिं करोति। कल्पस्थितमाचार्यं मुक्त्वा शेषाणां[2]मर्द्धा अग्रे परिहार-संयमं गृह्णन्ति इति परिहारका भण्यन्ते। शेषास्तेषामनुपरिहारका। पश्चात्परिहारसंयमग्राहिणः अनुपरिहारका भण्यन्ते। एवं कल्पस्थिते सति ये पश्चात्परिहारसंयमार्थमात्मानमुपसृतास्तानपि स्वगणे प्रक्षिपति गणी। यावन्न्यूनो गणः तावत्प्रमाणं गणं कृत्वा परिहारकाननुपरिहारिकांश्च व्यवस्थापयति। तेन परिहारसंयम निविशमाना अनुपरिहारकाश्च एको द्वौ बहवो वा भवन्ति। जदि तिण्णि, एगो गणी बिदिओ परिहारसंयमं पडिवण्णो, तदिओ अणुपरिहारगो। जदि पंच एको कप्पट्ठिदो, दो परिहारसंजमं पडिवज्जंति। तेसिमणुपरिहारगा पत्तेगं। इतरे अविसस्स एगो कप्पट्ठिदो, तिण्णि परिहारगा, इदरे तिण्णि अणुपरिहारगा। जदि णव एगो कप्पट्ठिदो, चत्तारि परिहारिगा, चत्तारि अणुपरिहारिगा। छहिं मासेहिं परिहारीणिविट्ठाणी हवंति। ततो पच्छा अणुपरिहारी परिहारं पट्ठवेदिदु। तेसिं णिविट्ठपरिहारी हवंतेणुपरिहारगा[3] ते पुणो छहिं मासेहिं णिविट्ठाइं भवन्ति। तु कप्पट्ठिदो पच्छा परिहारं [4]पवज्जदि। तस्सेगो अणुपरिहारी एगो कप्पट्ठिदो वि। असोविअ छहिं मासेहिं णिविट्ठपरिहारगो अट्ठारसमासा ते एव होंति पमाणदो।

होनेपर गुरुके रूपसे स्थापित करते हैं। उस गणके लिए वह प्रमाण होता है। वह आलोचना सुनकर उनकी शुद्धि करता है। कल्पस्थित आचार्यको छोड़कर शेषमेंसे आधे पहले परिहार संयमको ग्रहण करते हैं इसलिए उन्हे परिहारक कहते हैं। शेष उनके अनुपरिहारक होते हैं। जो पीछे परिहारसंयम ग्रहण करते है वे अनुपरिहारक कहे जाते हैं। इस प्रकार कल्पस्थित होनेपर जो पीछे परिहार संयमके लिए अपनेको उपस्थित करते हैं उन्हें भी गणी अपने गणमें मिला लेता है। जितने साधु गणमें कम हुए हैं उतने प्रमाण गणको करके परिहारकों और अनुपरिहारकोंकी व्यवस्था गणी करता है। अतः परिहार संयममे प्रवेश करनेवाले अनुपरिहारक एक दो अथवा बहुत होते हैं। यदि तीन होते हैं तो उनमेंसे एक गणी, दूसरा परिहारसयमका धारी और तीसरा अनुपरिहारक होता है। यदि पाँच होते हैं तो उनमे एक कल्पस्थित गणी, दो परिहारसंयमके धारी और उन दोनोमें प्रत्येकका एक-एक अनुपरिहारक होता है। यदि सात होते हैं तो उनमें एक कल्पस्थित, तीन परिहारक और शेष तीन अनुपरिहारक होते हैं। यदि नौ हों तो एक कल्पस्थित, चार परिहारक और चार अनुपरिहारक होते है। छह महीने तक परिहार संयमी परिहार-संयममें निविष्ट होता है। उसके पश्चात् अनुपरिहारक परिहारसंयममें प्रविष्ट होता है। उनके भी निविष्ट परिहारक होनेपर अन्य अनुपरिहारक परिहार संयममे प्रविष्ट होते हैं। वे भी छह मासमें निविष्ट परिहारक हो जाते है। पीछे कल्पस्थित परिहारमे प्रविष्ट होता है। उसका एक अनुपरिहारक और एक कल्पस्थित होता है। वह भी छह मासमें निविष्टपरिहारक होता है। इस प्रकार प्रमाणसे अठारह मास होते हैं।

विशेषार्थ—इसका खुलासा है कि परिहारविशुद्धि सयममें तीन मुनि धारण करनेवाले हों तो उनमेंसे एक कल्पस्थित होता है जो गणी कहाता है, दूसरा परिहारक होता है और तीसरा अनुपरिहारक है। संयममें प्रवेश करनेके छह मास बीतनेपर परिहारक निविष्ट हो जाता है तब अनुपरिहारक संयममे प्रवेश करता है। छह महीना बीतनेपर वह भी निविष्ट परिहारक हो जाता

---

१. तस्य गणस्य—आ० मु०। २. णा अग्रे—अ०। ३. रगते आ०।—रगे ते मु०। ४. पडिव—मु०।

लिङ्गादिकस्तेषामाचारो निरूप्यते—एकोपधिकं अवसानं लिङ्गं परिहारसंयतानां। वसतिमाहारं च मुक्त्वा नान्यद् गृह्णन्ति तृणफलकपीठकटकादिकं। संयमार्थं प्रतिलेखनं गृह्णन्ति। त्यक्तदेहाश्च चतुर्विधान् उपसर्गान्सहन्ते। दृढधृतयो निरन्तरं ध्यानावहितचित्ताः। अस्ति नो बलवीर्यं सर्वगुणसमग्रता च। एवंभूता अपि यदि गणे वसामो वीर्याचारो न प्रवर्तितः स्यादिति मत्वा त्रयः, पञ्च, सप्त, नव वा निर्यान्ति। रोगेण वेदनयोपहताश्च तत्प्रतिकारं[1] च न कुर्वन्ति। प्रायोग्यमाहारं मुक्त्वा, वाचनां प्रश्नं परिवर्तनां मुक्त्वा सूत्रार्थ-पौरुषीष्वपि सूत्रार्थमेवानुप्रेक्षन्ते। एवं यामाष्टकेऽपि निरस्तनिद्रा ध्यायन्ति। स्वाध्यायकालप्रतिलेखनादिकाश्च क्रिया न सन्ति तेषां। यस्मात्श्मशानमध्येऽपि ध्यानं न प्रतिषिद्धं। आवश्यकानि यथाकालं कुर्वन्ति। काल-द्वये कृतोपकरणशोधना अनुज्ञाप्य देवकुलादिषु वसन्ति। अनिर्ज्ञायमानस्वामिकेषु यस्येदं सोऽनुज्ञानं नः करोतु इति वसन्ति[2]। आसीधिकां च निषीधिकां च निष्क्रमणे प्रवेशे च संपादयन्ति। निर्देशकं मुक्त्वा इतरे दशविधे समाचारे वर्तन्ते। उपकरणादिदान, ग्रहणं, अनुपालन, विनयो, वन्दना सल्लापश्च न तेषामस्ति संघेन सह। गृहस्थैरन्यलिङ्गिभिश्च दीयमानं योग्यं गृह्णन्ति। तैरपि न शेषोऽस्ति संभोगः। तेषां त्रयाणां, पञ्चानां, सप्तानां, नवानां च परस्परेणास्ति संभोगः।

कप्पट्ठिदो कुकप्पी भुंजसंघाडदाणगहणे वि।
सवासवंदणालावणाहि भुंजन्ति अण्णोण्णं॥

है। तब कल्पस्थित परिहारसंयममें प्रवेश करता है। छह माह बीतनेपर वह भी परिहारमे निविष्ट होता है। इस प्रकार परिहारमें निविष्ट होनेमे तीन मुनियोंको अठारह मास लगते हैं। इसी तरह पाँच, सात और नौ का भी अठारह मास काल जानना। इनका कथन अन्यत्र नहीं मिला।

परिहारसंयतोंका लिगादिक आचार कहते हैं—

वसति और आहारके सिवाय अन्य तृणासन, लकड़ीका आसन, चटाई आदि ग्रहण नही करते। संयमके लिए पीछी ग्रहण करते हैं। शरीरसे ममत्व छोड़कर चार प्रकारके उपसर्गोंको सहते हैं। दृढ़ धैर्यशाली तथा निरन्तर ध्यानमें चित्त लगाते हैं। 'हममें बलवीर्य और सब गुणोंकी पूर्णता है। ऐसे होते हुए भी यदि हम संघमें रहते हैं तो वीर्याचारका पालन नहीं होता।' ऐसा मानकर तीन, पाँच, सात अथवा नौ सयमी एक साथ निकलते हैं। रोग और वेदनासे पीड़ित होने पर उसका इलाज नही करते। वाचना, पूछना और परिवर्तनोंको छोड़कर सूत्रार्थ और पौरुषीमें सूत्रार्थका ही चिन्तन करते हैं। आठों पहर निद्रा त्यागकर ध्यान करते हैं। स्वाध्याय काल और प्रतिलेखना आदि क्रिया उनके नहीं होती; क्योंकि श्मशानमें भी उनके लिए ध्यानका निषेध नहीं है। यथासमय आवश्यक करते हैं। दोनों समय उपकरणोंका शोधन करते हैं। आज्ञा लेकर देवा-लय आदिमें रहते हैं। जिन देवालयों आदि स्थानोंके स्वामियोंका पता नहीं होता, 'जिसका यह है वह हमें स्वीकारता दे' ऐसा कहकर निवास करते हैं। निकलते और प्रवेश करते समय आसी-धिका और निषीधिका क्रिया करते हैं। निर्देशकको छोड़कर शेष दस प्रकारके सामाचार करते हैं। उपकरण आदि देना, लेना, अनुपालन, विनय, वन्दना, वार्तालाप आदि व्यवहार उनका संघके साथ नहीं होता। गृहस्थ अथवा अन्य लिंगियोंके द्वारा दी हुई योग्य वस्तुको ग्रहण करते हैं। उनके साथ भी शेष सम्बन्ध नहीं होता। उनमेंसे तीन, पाँच, सात अथवा नौ संयतोंका परस्परमें व्यवहार होता है।

कल्पस्थित आचार्य और परिहारसंयमी परस्परमें संघाटदान संघाटग्रहण (सहायता देना

---

१. कारकं च न अ०—कारकं कथन-आ०। २. विशन्ति मु०।

संवासवंदणोवासणाण अणुपालणाहि परिहारिं ।
अणुपरिहारी भुंजदि णिव्वसमाणो वंदणसंवासालावणाहिं ॥
कप्पट्ठिदं भुंजदि अणुपरिहारिं पि गहणासंवासलावणाहिं तु ।
णिव्विसमाणो णिव्विसमाणं संवासदो य अण्णेण ॥
कप्पट्ठिदो भुंजदि संवासणुपालणगिराहिं ।
कप्पट्ठिदोणुकप्पीव वंदिदा बेंति धम्मलाहोत्ति ॥
णारत्थि अण्णतित्थी अण्णतित्थीहिं णिव्विसंतो ।
[1]पत्तमुणीको सव्वो वि विणयं अण्णोण्णं गणं चावंति ॥
वट्टूण व सोहूण व जत्थ हु साधम्मिगणो वसदि खेत्तो ।
त ण [2]पविसंति खेत्तं कुदो [3]पुणो वंदणादीणं ॥
एवं कल्पोक्तः क्रमः सर्वोऽनुगन्तव्यः ।

मौनाभिग्रहरतास्तिस्रो भाषा मुक्त्वा प्रष्टव्याहृतिमनुज्ञाकरणी प्रश्ने[4] प्रवृत्तां च मार्गस्य शंकितस्य वा योग्यायोग्यत्वेन शय्याधरगृहस्य, वसतिस्वामिनो वा प्रश्नः । ग्रामाद्बहिः श्मशानं, शून्यगृहं, देवकुलं, गुहा वा आगन्तुकगृहं, तरुकोटरं वा अनुज्ञापयन्त्येकवारं । कस्त्वं, कुतो वागच्छसि, गमिष्यसि वा कं देशं, कियच्चिर-मत्र वसतिर्यूयं कतिजना इति प्रश्ने श्रमणोऽहमित्येकमेव प्रतिवचनं प्रयच्छन्ति । इतरत्र तूष्णीभावः । इतोऽव-काशादपसर्पणं कुरु, स्थानमिदं प्रयच्छ, परिपालय त्वमित्येवमादिको वाग्व्यापारो यत्र तत्र न वसन्ति । गोचर्या यद्यपर्याप्ता तृतीययामे गव्यूतिद्वयं यान्ति । वर्षमहावातादिभिर्यदि व्याघातो गमनस्य अतीतगमनकालास्तत्रैव तिष्ठन्ति । व्याघ्रादिव्यालागमने यदि ते भद्रा युगमात्रं अपसर्पन्ति । दुष्टाश्चेत्पदमात्रमपि न चलन्ति । नेत्रयो-

सहायता लेना), निवास, वन्दना, वार्तालाप आदि व्यवहार करते हैं । अनुपरिहार संयमी परिहार-संयमीके साथ संवास, वन्दना, दान, अनुपालना आदिसे व्यवहार करते हैं । कल्पस्थित भी अनु-परिहारसंयमीके साथ व्यवहार करता है । वन्दना करनेपर धर्मलाभ कहता है । एक दूसरेको देखकर सब परस्परमें विनय करते हैं । जहाँ अधार्मिकजन बसते है वहाँ वे प्रवेश नही करते । इस प्रकार सब कल्पोक्त क्रम जानना चाहिए ।[5]

ये तीन भाषाओंको छोड़ सदा मौनसे रहते हैं । वे तीन भाषाएँ है—पूछनेपर उत्तर देना, माँगना और स्वयं पूछना । मार्गमें शंका होनेपर मार्ग पूछना पड़ता है, ये उपकरणादि योग्य हैं या अयोग्य, यह पूछना होता है । शय्याधर, जो वसतिकासे सम्बद्ध होता है उसका घर पूछना होता है. वसतिका स्वामी कौन है यह पूछना होता है । गाँवसे बाहर स्मशान, शून्यघर, देवालय, गुफा, आनेवालोके लिए बना घर, अथवा वृक्षके खोलमें निवास करते समय 'हमे अनुज्ञा दें' ऐसा एकबार कहना होता है । 'तुम कौन हो, कहाँसे आते हो, कहाँ जाओगे, यहाँ कितने समय तक ठहरोगे, तुम कितने जन हो' इस प्रकारके प्रश्न होनेपर 'हम श्रमण है' यह एक ही उत्तर देते हैं । शेषमें चुप रहते हैं । 'इस स्थानसे चले आओ, यह स्थान हमें दो, जरा घर देखना' इत्यादि वचन व्यवहार जहाँ होता है वहाँ नहीं ठहरते । गोचरी यदि नही मिलती तो तीसरे पहर दो गव्यूति जाते हैं । यदि वर्षा, आँधी आदिसे गमनमें बाधा होती है तो जहाँतक गमन किया है वही ठहर जाते हैं । व्याघ्र आदि पशुओंके आनेपर यदि वे भद्र होते हैं तो मुनि चार हाथ चलते हैं और

१. पत्तमुणीको—आ० मु० । २. पसंसन्ति—आ० मु० । ३. कुदो हु णो—आ० मु० ।
४. प्रश्ने प्रवर्तते वा मा—आ० । ५. इन गाथाओंका यथार्थ भाव स्पष्ट नहीं हो सका है—अनुवादक ।

धूलिप्रवेशे सकण्टकादिविद्धे वा स्वयं न निराकुर्वन्ति । परे यदि निराकुर्युस्तूष्णीमवतिष्ठन्ते । तृतीययाम एव भिक्षार्थं भिक्षायां गच्छन्ति । यत्र क्षेत्रे षट्गोचर्यो अपुनरुक्ता भवन्ति तत्क्षेत्रमावासप्रयोग्यं शेषमयोग्यमिति वर्जयन्ति ।

क्षेत्रं, तीर्थं, कालश्चारित्रं, पर्यायं, श्रुतं, वेदः, लेश्या, ध्यानं, संहननं, संस्थानं, आयामो गात्रस्य, आयुः, लब्धयः, अतिशयज्ञानोत्पत्तिः, सिद्धिरित्येतेऽनियोगा इहानुगन्तव्याः । क्षेत्रतः भरतैरावतयोः, प्रथम-पाश्चात्ययोः तीर्थे, उत्सर्पिणी-अवसर्पिण्योः कालतः, छेदोपस्थापनाप्रभवाश्चारित्रतः, प्रथमतीर्थंकरकाले देशोन-पूर्वकोटीकायकालः । विंशतिवर्षाग्रः शतवर्षकालः पाश्चात्यतीर्थे । जन्मतस्त्रिंशद्वर्षाः पर्यायतः एकोनविंशति-वर्षाः । श्रुतेन च दशपूर्विणः, वेदेन पुरुषवेदाः, लेश्यातस्तेजःपद्मशुक्ललेश्याः, धर्मध्यानपरा ध्यानतः, आद्यत्रिक-संहननाः षट्स्वन्यतरसंस्थानाः । सप्तहस्तादिपञ्चधनुःशतायताः अष्टादशमासाः पूर्वकोटी वा आयुः । चारणताहारसिद्धिः, विक्रियाहारर्द्धिश्च लब्धयः । अवधिमनःपर्ययं केवलं वा योगसमाप्तौ प्राप्नुवन्ति । सिद्ध्यन्ति वा परेषां । संक्षेपतः परिहारविधिवर्णना ।

जिनकल्पो निरूप्यते—जितरागद्वेषमोहा, उपसर्गपरिषहारिवेगसहाः, जिना इव विहरन्ति इति जिन-कल्पिका एक एवेत्यतिशयो जिनकल्पिकानां । इतरो लिङ्गादिराचारः प्रायेण व्यावर्णितरूप एव ।

क्षेत्रादिभिर्निरूप्यते—सर्वकर्मक्षेत्रेषु भवन्ति जिनकल्पिकाः । कालः सर्वदा । सामायिकच्छेदोपस्थापने वा

यदि दुष्ट हुए तो एक पग भी नहीं चलते । नेत्रोंमें धूल चले जानेपर या काँटा आदि लग जानेपर स्वयं नहीं निकालते । यदि दूसरे निकालते हैं तो चुप रहते हैं । नियमसे तीसरे पहरमें ही भिक्षाके लिए जाते हैं । जिस क्षेत्रमें छह भिक्षाएँ अपुनरुक्त होती हैं अर्थात् भिन्न-भिन्न घरोसे मिल जाती हैं वह क्षेत्र निवासके योग्य होता है, शेष अयोग्य होता है उसे छोड़ देते हैं ।

क्षेत्र, तीर्थ, काल, चारित्र, पर्याय, श्रुत, वेद, लेश्या, ध्यान, सहनन, संस्थान, शरीरकी लम्बाई, आयु, लब्धि, अतिशय ज्ञानोत्पत्ति, सिद्धि ये अनुयोग यहाँ जानना चाहिए । क्षेत्रकी अपेक्षा भरत और ऐरावत क्षेत्रमें, प्रथम और अन्तिम तीर्थंकरके तीर्थमें, कालकी अपेक्षा उत्सर्पिणी और अवसर्पिणी कालमें, चारित्रकी अपेक्षा छेदोपस्थापना चारित्रसे उत्पन्न होते हैं । प्रथम तीर्थं-करके कालमें उनकी आयु कुछ कम एक पूर्वकोटि और अन्तिम तीर्थंकरके कालमे एक सौ बीस वर्ष होती है । जन्मसे तीस वर्षतक भोग भोगते है और मुनिपर्याय उन्नीस वर्ष होती है । श्रुतसे दस पूर्वके पाठी होते हैं । वेदसे पुरुषवेदी होते हैं । लेश्यासे तेज, पद्म और शुक्ल लेश्यावाले होते है । ध्यानसे धर्मध्यानी होते हैं । आदिके तीन संहननवाले होते हैं और छह सस्थानोंमेसे कोई एक संस्थान होता है । सात हाथसे लेकर पाँच सौ धनुष लम्बे होते हैं । परिहारसंयमके कालसे जघन्य आयु अठारह मास और उत्कृष्ट आयु परिहारसंयम होनेसे पूर्वके वर्षोंसे हीन एक पूर्वकोटी होती है । चारण ऋद्धि, विक्रिया ऋद्धि और आहार ऋद्धियाँ होती हैं ।

परिहारविशुद्धिरूप योगके पूर्ण होनेपर अवधिज्ञान, मनःपर्यय वा केवलज्ञानको प्राप्त होते हैं । मोक्ष भी प्राप्त करते हैं । यह सक्षेपसे परिहारविशुद्धिका वर्णन है ।

अब जिनकल्पको कहते हैं—रागद्वेष मोहको जीतते है, उपसर्ग और परीषहरूपी शत्रुओंके वेगको सहते हैं । जिनके समान एकाकी ही विहार करते है इसलिए जिनकल्पिक होते हैं । यही जिनकल्पिकोंकी विशेषता है । शेष लिंगादि आचार प्रायः उक्त प्रकार ही है ।

क्षेत्र आदिकी अपेक्षा कथन करते हैं—जिनकल्पी समस्त कर्मभूमियोंमें होते है । सर्वदा

चारित्रतः । सर्वतीर्थेषु तीर्थतः । जन्मना त्रिंशद्वर्षाः । श्रामण्यतः एकान्नविंशतिवर्षाः । नवदशपूर्वधारिणः । तेजःपद्मशुक्ललेश्या. । धर्मशुक्लध्यानाः । प्रथमसंहननाः, षट्स्वन्यतरसंस्थाना. । सप्तहस्तादिपञ्चधनुःशता-यामाः । भिन्नमुहूर्तादिन्यूना पूर्वकोटिः कालः । विक्रियाहारकचारणताक्षीरास्रावित्वादिकाश्च तपसा लब्धयो जायन्ते । विरागास्तु न सेवन्ते । अवधिमनःपर्ययं केवलं वा प्राप्नुवन्ति केचित् । ये केवलिनस्ते नियमतः सिध्यन्ति ॥१५७॥

एवमथालन्दादिकं प्रतिपद्य चारित्रविधिं मयोत्साहः कर्तव्यः इति विचारयति—

एवं विचारयित्ता सदिमाहप्पे य आउगे असदि ।
अणिगूहिदबलविरिओ कुणदि मदिं भत्तवोसरणे ॥१५८॥

'एवं विचारयित्ता' एवमुक्तेन प्रकारेण । 'विचारयित्ता' विचार्य । 'सदिमाहप्पे य' स्मृतिमाहात्म्ये च सति । 'आउगे असदि' आयुष्यसति दीर्घे । 'अणिगूहिदबलविरिओ' असंवृतबलसहाय वीर्यं आहारव्यायामाभ्या कृतं बलं । 'कुणइ' करोति । 'मइ' मतिं । 'भत्तवोसरणे' भज्यते सेव्यते इति भक्तं आहार. । तस्य त्यागं आहारेण समयसाधनेन शरीरस्थितिं चिरं कृत्वा स्वपरोपकारः कृत । आयुष्यल्पे न शरीरमवस्थातुमलमाहार-ग्रहणेऽपि । तेन त्याज्यो मयाहार. इति भावोऽस्य । अत एव सूत्रकारेणेदमुक्त 'वीहो परियाओ' इति । अवशिष्टकालाल्पतास्यापनाय न केवलमायुषोऽल्पता एव भक्तत्यागमतेः कारणं, अपि तु अन्यदपीति ॥१५८॥

होते हैं । सामायिक अथवा छेदोपस्थापना चारित्रवाले है । सब तीर्थङ्करोके तीर्थमें होते हैं । जन्मसे तीस वर्ष और मुनिपदसे उन्नीस वर्षके होते हैं । नव-दस पूर्वके धारी होते हैं । तेज, पद्म और शुक्ल लेश्यावाले होते है । धर्मध्यानी और शुक्लध्यानी होते है । प्रथम संहनन होता है और छह संस्थानोंमेसे कोई एक सस्थान होता है । सात हाथसे लेकर पाँच सौ धनुष तक लम्बे होते हैं । अन्तमुहूर्त आदिसे न्यून एक पूर्वकोटिकाल होता है । तपसे विक्रिया, आहारक, चारण और क्षीरास्रवित्व आदि लब्धियाँ उत्पन्न होती हैं किन्तु विरागी होनेसे उनका सेवन नहीं करते । कोई-कोई अवधि, मनःपर्यय और केवलज्ञानको प्राप्त करते हैं । जो केवलज्ञानी होते हैं वे नियमसे मोक्ष जाते हैं ॥१५७॥

इस प्रकार अथालंदिक आदि चारित्रकी विधिको धारण करके मुझे उत्साह करना चाहिए, ऐसा विचार करते हैं—

गा०—उक्त प्रकारसे विचार करके स्मृतिका माहात्म्य होनेपर और आयुके अल्प होने पर अपने बल और वीर्यको न छिपाता हुआ मुनि भक्त प्रत्याख्यानमें मति करता है ॥१५८॥

टी०—उक्त प्रकारसे विचार करके स्मृतिका माहात्म्य होने पर आयुके लम्बा न होने पर बल और वीर्यको न छिपाता हुआ भक्त प्रत्याख्यानमें मति करता है । आहार और व्यायामसे जो शारीरिक शक्ति होती है उसे बल कहते हैं । और बलका सहायक वीर्य होता है । 'भज्यते' अर्थात् जो सेवन किया जाता है उसे भक्त कहते है उसका अर्थ आहार है उसका त्याग भक्त प्रत्याख्यान है। आहारके द्वारा शरीरकी स्थितिको लम्बी करके अपना और परका उपकार किया । आयुके थोड़ा रह जाने पर आहार ग्रहण करने पर भी शरीर नहीं ठहरता । अतः मैं आहारका त्याग करता हूँ यह इसका भाव है । इसीसे ग्रन्थकारने शेष बचे कालकी अल्पता बतलानेके लिए 'वीहो परियाओ'

पुव्वुत्ताणण्णदरे सल्लेहणकारणे समुप्पण्णे ।
तह चेव करिज्ज मदिं भत्तपइण्णाए णिच्छयदो ॥१५९॥

'पुव्वुत्ताणण्णदरे' पूर्वमुक्तानां **'वाहीव दुप्पसज्झा'** इत्यादीनां मध्ये अन्यतरस्मिन् । **'सल्लेहणकारणे'** सम्यक् कायकषायतनूकरणं सल्लेखना तस्या. कारणे वा । **'समुप्पण्णे'** समुपस्थिते । **'तह चेव'** तथैव च । यथाल्प आयुषि करोति भक्तत्यागे मतिं तथैव **'णिच्छयदो भत्तपइण्णाए मदिं करेज्ज'** निश्चयतो भक्तप्रत्याख्याने मतिं कुर्यात् । एतद्गाथाद्वयं सूत्रकारवचनम् ॥१५९॥

आराधकस्य मनःप्रणिधानं प्रदर्शयति—

जाव य सुदी ण णस्सदि जाव य जोगा ण मे पराहीणा ।
जाव य सड्ढा जायदि इंदियजोगा अपरिहीणा ॥१६०॥

'जाव य सुई ण णस्सदि' यावत्स्मृतिर्न नश्यति । रत्नत्रयाराधनगोचरा अनुभूतविषयग्राहिणी तदित्थंभूतमिति प्रवर्तमाना स्मृतिरित्युच्यते मतिविज्ञानविकल्पः । वस्तुयाथात्म्यश्रद्धानं दर्शन, तद्याथात्म्यावगमो ज्ञानं, समता चारित्रमिति । श्रुतेनावगते परिणामत्रये यदुपजायते स्मार्तं ज्ञान तदिह स्मृतिरित्युच्यते । स्मृतिमूलो व्यवहारः, स्मृतौ नष्टाया न स्यादिति, स्मृतिसद्भावकाल एव प्रारभ्या मया सल्लेखनेति चिन्त्यम् । **'जाव य'**

कहा है। भक्त त्यागकी मति होनेका कारण केवल आयुका कम रह जाना ही नहीं हैं किन्तु अन्य भी कारण हैं ॥१५८॥

विशेषार्थ—स्मृति माहात्म्यसे आशय है—जिनागमके रहस्यका उपदेश सुननेसे जो उसका संस्कार रहा, उसके प्रभावसे 'मैं मरते समय अवश्य विधिपूर्वक सल्लेखना करूँगा' ऐसा जो विचार किया था, उसका स्मरण भी भक्त प्रत्याख्यानका कारण होता है।

गा०—पहले कहे गये कारणोंमें से किसी एक सल्लेखनाके कारणके उपस्थित होने पर उसी प्रकार निश्चयसे भक्त प्रत्याख्यानमें मति करे ॥१५९॥

टी०—पहले सल्लेखनाके जो कारण 'असाध्य बीमारी' आदि कहे हैं उनमेंसे किसी एक कारणके उपस्थित होने पर भी वैसे ही भक्त प्रत्याख्यानका विचार करना चाहिए जैसा आयुके अल्प रहने पर किया है ॥१५९॥

आराधकके मनकी दृढता बतलाते हैं—

गा०—जब तक स्मृति नष्ट नहीं होती, जब तक मेरे आतापन आदि योग पराधीन नहीं होते, जब तक श्रद्धा रहती है, इन्द्रियोंका अपने विषयोंसे सम्बन्ध हीन नहीं होता ॥१६०॥

टी०—पहले अनुभवमें आये विषयको ग्रहण करने वाली और 'वह वस्तु' इस प्रकार प्रवृत्ति वाली स्मृति होती है। यह मतिज्ञानका विकल्प है। यहाँ रत्नत्रयकी आराधना विषयक स्मृति ग्रहण की है। वस्तुके यथार्थ स्वरूपके श्रद्धानको सम्यग्दर्शन कहते हैं और उसके यथार्थ स्वरूपके जाननेको ज्ञान कहते हैं। तथा समताको चारित्र कहते है। श्रुतके द्वारा जाने गये रत्नत्रय रूप परिणाममें जो स्मृतिज्ञान होता है उसे यहाँ स्मृति कहा है। व्यवहारका मूल स्मृति है। स्मृतिके नष्ट होने पर व्यवहार नहीं होता। अतः स्मृतिके रहते हुए कालमें ही मुझे सल्लेखना प्रारम्भ

यावच्च । '**जोगा**' योगाः आतापनादयः । '**ण मे पराहीणा**' न मे परायत्ताः शक्तिवैकल्यात् । विचित्रेण तपसा निर्जरां विपुलां कर्तुकामस्य मम तपोऽतिचारे सा न भवतीति यावन्निरतिचारं इदं तपस्तावत्सल्लेखनां करोमीति कार्या चिन्ता । '**जाव य सद्धा जायदि**' यावच्छ्रद्धा जायते रत्नत्रयमाराधयितुं । '**तावखमं मे कादमिति**' वक्ष्यमाणेन सम्बन्धः । उपशमकालकरणलब्धयो हि दुर्लभाः प्राणिनां सुहृदो विद्वान्स इव । मूलं ताः श्रद्धायाः, न च विनष्टा सा पुनर्लभ्यते । न च तामन्तरेणातिशयवतामाहारत्यागः सुखेन संपाद्यते । '**इंदियजोगा**' इन्द्रियाणां चक्षुरादीनां रूपादिभिर्विषयैः सम्बद्धा '**अपरिहीणा**' हीना न भवन्ति । दृक्श्रोत्रेन्द्रियाणामपाटवे दर्शनश्रवणाभ्यां परिहार्योऽसंयमः कथं परिह्रियते । दृष्ट्वा श्रुत्वा स इदमयोग्यमिति वेत्ति नान्यथा ॥१६०॥

जाव य खेमसुभिक्खं आयरिया जाव णिज्जवणजोग्गा ।
अत्थि ति गारवरहिदा णाणचरणदंसणविसुद्धा ॥१६१॥

'**जाव य खेमसुभिक्खं**' यावच्च क्षेमसुभिक्षं, स्वचक्रोपद्रवस्य व्याधेर्मार्याश्चाभावः क्षेम इत्युच्यते । प्रचुरधान्यता सुभिक्षत्वम् । एतदुभयमन्तरेण दुर्लभा निर्यापकाः, तानन्तरेण चतुष्काराधना । '**आयरिया जाव**' आचार्या यावत् '**अत्थि**' सन्ति । कीदृग्भूता '**णिज्जवणजोग्गा**' निर्यापकत्वयोग्याः । '**तिगारवरहिदा**' गारवत्रयरहिताः ऋद्धिरससातगुरुका ये न भवन्ति । ऋद्धिप्रियो ह्यसंयतमपि जनं निर्यापकत्वेन स्थापयति । स्वयं च नासंयमभीरुर्भवति । असंयमकारणं अनुमननं च न परिहरतीति । रसासातगुरुको क्लेशासहो आराध-

---

करनी चाहिए ऐसा विचार करे। जब तक मेरे आतापन आदि योग शक्तिकी कमीसे पराधीन नहीं होते। मैं अनेक प्रकारके तपसे बहुत निर्जरा करना चाहता हूँ किन्तु तपमें दोष लगने पर बहुत निर्जरा नहीं हो सकती। इसलिए जब तक तप निरतिचार है तब तक सल्लेखना कर लेना चाहिए, ऐसी चिन्ता करना उचित है। जब तक श्रद्धा रत्नत्रयकी आराधना करनेकी है 'तब तक मैं करनेमें समर्थ हूँ' ऐसा आगे कहेंगे, उसके साथ सम्बन्ध लगाना चाहिए। जैसे विद्वान् मित्र दुर्लभ हैं वैसे ही प्राणियोंको उपशमलब्धि, काललब्धि और करणलब्धि दुर्लभ हैं। वे लब्धियाँ श्रद्धाका मूल हैं। एक बार उस श्रद्धाके नष्ट हो जाने पर उसका पुनः प्राप्त होना दुर्लभ है। श्रद्धाके बिना अतिशय शालियोंका भी आहारत्याग सुखपूर्वक सम्पन्न नहीं होता। चक्षु आदि इन्द्रियोका रूपादि विषयोंके साथ सम्बन्धको इन्द्रिययोग कहते हैं। वे जब तक हीन नहीं होते, चक्षु और कर्ण इन्द्रियके अपने विषयको ग्रहण करनेमें असमर्थ होने पर देखने और सुननेसे दूर होने वाला असंयम कैसे दूर किया जा सकता है। देख और सुनकर 'यह अयोग्य है' ऐसा ज्ञान होना है, अन्यथा नहीं होता ॥१६०॥

गा०—जब तक क्षेम और सुभिक्ष है, जब तक आचार्य निर्यापकत्वके योग्य तीन गारवोंसे रहित निर्मल ज्ञान चारित्र और दर्शनवाले हैं ॥१६१॥

टी०—जब तक क्षेम और सुभिक्ष है। अपने देश और परदेशकी सेनाके उपद्रव और मारी रोगके अभावको क्षेम कहते हैं। और धान्यकी बहुतायतको सुभिक्ष कहते हैं। इन दोनोंके बिना निर्यापकोंका मिलना दुर्लभ है और उनके बिना चार प्रकारकी आराधना दुर्लभ है। तथा आचार्य निर्यापकत्वके योग्य जब तक हैं तथा ऋद्धिगारव, रसगारव और सातगारवसे जो रहित होते हैं। जो आचार्य ऋद्धिप्रिय होता है वह असंयमी जनको भी निर्यापक बना देता है। और स्वयं भी असंयमसे नहीं डरता। तथा ऐसी अनुमति, जो असंयमम कारण होती है, देनेका त्याग नहीं

कस्य शरीरपरिकर्म कथं कुरुतः ? किं च स्वयं सरागो वैराग्यं परस्य संपादयत्येवेति न नियोगोऽस्ति। 'णाणचरणदंसणविसुद्धा' ज्ञानचारित्रदर्शनेषु विशुद्धाः निर्मलाः। जीवादियाथात्म्यगोचरता ज्ञानस्य शुद्धिः। दर्शनस्यापि समीचीनज्ञानसहभाविता, अरक्तद्विष्टता च चारित्रशुद्धिः। शुद्धज्ञानचरणदर्शनशुद्धा चारित्रशुद्धा भण्यन्ते। यथा प्रकृष्टशुक्लगुणयोगाच्छुक्लतम इत्युच्यते पटादि ॥१६१॥

ताव खमं मे कादुं सरीरणिक्खेवणं विदुपसत्थं।
समयपडायाहरणं भत्तपइण्णं णियमजण्णं ॥१६२॥

'ताव खमं मे काउं' तावद्युक्तं कर्तुं मम। किं ? 'सरीरणिक्खेवणं' शरीरनिक्षेपणं शरीरत्यजनं। 'विदुपसत्थं' विद्वज्जनस्तुतं आत्महितत्वात्। 'समयपडायाहरणं' समयः सिद्धान्तः, तस्मिन् कीर्तिता पताका आराधना पताकेव पताका उपमार्थः। यथा पताका वस्त्रादिरचिता जयादिकं प्रकटयति। एवमियं आराधनापि भवनिर्मुक्तिं प्रकटयति। तस्या हरण ग्रहण। 'भत्तपइण्णं' भक्तप्रत्याख्यानं 'णियमजण्णं' व्रतयज्ञं। ननु शरीरत्यागोऽन्यः, अन्या ज्ञान-श्रद्धान-तपःसु परिणतिरन्यद् भक्तत्यजनं, अन्यानि च व्रतानि तत्कथं समानाधिकरणनिर्देश ? अत्रोच्यते-प्रत्येकमभिसम्बन्ध कार्यः। 'ताव खमं मे काउं' इत्यनेन शरीरनिक्खेवणं इत्यादीनां। ततोऽयमर्थ—शरीरत्यजनं, सम्यग्दर्शनादिपरिणमन, भक्तप्रत्याख्यानं, व्रतयज्ञश्च तावत्कर्तुं मम युक्तमिति ॥१६२॥

करता। जो आचार्य रसप्रेमी और सुख प्रेमी हैं वे सल्लेखना करनेवाले आराधकके शरीरकी सेवा कैसे करेंगे ? दूसरे, जो स्वयं सरागी है वह दूसरेको वैराग्य उत्पन्न कराता ही ऐसा कोई नियम नही है। तथा आचार्य ज्ञान, दर्शन और चारित्रमें विशुद्ध होना चाहिए। जीवादिके यथार्थ स्वरूपको जानना ज्ञानकी शुद्धि है। समीचीन ज्ञानका सहभावी होना दर्शनकी शुद्धि है। और राग-द्वेषका न होना चारित्रकी शुद्धि है। जिनका ज्ञान दर्शन चारित्र शुद्ध होता हैं वे शुद्ध ज्ञान दर्शन चारित्र वाले कहे जाते हैं। जैसे उत्कृष्ट शुक्ल गुणके सम्बन्धसे वस्त्र आदि 'शुक्लतम'—अत्यन्त सफेद कहे जाते हैं ॥१६१॥

गा०—तब तक मुझे शरीरका त्याग, विद्वानोंसे स्तुत, आगममें कही गई आराधना रूपी पताकाका ग्रहण, व्रत यज्ञ तथा भक्त प्रत्याख्यान करना युक्त है ॥१६२॥

टी०—भक्त प्रत्याख्यान तब तक मुझे करना उचित है, यह पूर्व गाथाओसे सम्बद्ध है। यह भक्त प्रत्याख्यान शरीरके त्यागरूप है क्योंकि शरीरको त्यागनेके लिए ही किया जाता हैं। विद्वानोंसे प्रशंसनीय है क्योंकि आत्माके हित रूप है। तथा समय अर्थात् सिद्धान्तमे आराधनाको पताका कहा है। जैसे वस्त्रादिसे बनी पताका जयको प्रकट करती है वैसे ही यह आराधना भी संसारसे निर्मुक्तिको प्रकट करती है। भक्त प्रत्याख्यान उस पताको ग्रहण करने रूप है।

शंका—शरीरका त्याग अन्य है, ज्ञान श्रद्धान और तप करना अन्य है, भोजनका त्याग अन्य है और व्रत अन्य हैं। ये सब भिन्न हैं तब कैसे इनका समानाधिकरण रूपसे निर्देश किया है ?

समाधान--'तब तक मुझे करना युक्त है। इसके साथ शरीर त्याग आदि प्रत्येकका सम्बन्ध करना चाहिए। तब ऐसा अर्थ होता है—शरीरका त्याग, सम्यग्दर्शन आदि रूप परिणमन, भक्त प्रत्याख्यान और व्रतयज्ञ मुझे तब तक करना युक्त है ॥१६२॥

व्यावर्णितस्य परिणामस्य गुणमाहात्म्यकथनायोत्तरगाथा—

एवं सदिपरिणामो जस्स दढो होदि णिच्छिदमदिस्स ।
तिव्वाए वेदणाए वोच्छिज्जदि जीविदासा से ॥१६३॥

एवं सदिपरिणामो व्यावर्णितस्मृतिपरिणामो य [१] स्मार्तज्ञानमेव परिणाम. । **'जस्स दढो होज्ज'** [२]यस्य तैदृढो भवेत् । **'णिच्छिदमदिस्स'** निश्चितमतेः । करिष्याम्येव शरीरनिक्षेपण इति कृतनिश्चयस्य । **'जीविदासा वोच्छिज्जइ'** जीविते आशा व्युच्छिद्यते । **'तिव्वाए वेदणाए'** तीव्रायामपि वेदनायामुदीर्णायां । एतत्प्रतीकारं कृत्वा जीवामीति चिन्ता न भवति । **'से'** तस्येति जीविताशाव्युच्छेदो गुणः सूचित. । परिणामं गद ॥१६३॥

'उवधि जहणा' इति पदं व्याचष्टे प्रबन्धेन—

संजमसाधणमेत्तं उवधिं मोत्तूण सेसयं उवधिं ।
पजहदि विसुद्धलेस्सो साधू मुत्तिं गवेसंतो ॥१६४॥

'संजमसाहणमेत्तं'—सयम. साध्यते येनोपकरणेन तावन्मात्र कमण्डलुपिच्छमात्र । **'उवधिं'** परिग्रहं **'मोत्तूण'** मुक्त्वा । **'सेसयं'** अवशिष्ट । **'उवधिं'** अवशिष्ट उपधिर्नाम पिच्छान्तर कमण्डल्वन्तरं वा तदानी सयमसिद्धौ न कारणमिति संयमसाधनं न भवति । येन साप्रत सयम. साध्यते तदेव सयमसाधन अथवा ज्ञानोपकरण अवशिष्टोपधिरुच्यते ! **'पजहइ'** प्रकर्षेण योगत्रयेण त्यजति । **'विसुद्धलेस्सो'** विशुद्धलेश्य । **'साधू'** साधुः । **'मुत्ति'** मुक्ति कर्मणामपायं । **'गवेसंतो'** मृगयन् । लोभकषायेणाननुरंजिता योगवृत्तिरिह विशुद्धलेश्या

ऊपर कहे परिणामके गुणोका माहात्म्य कहनेके लिए गाथा कहते है –

गा०—ऊपर कहा स्मृति परिणाम 'मै शरीरत्याग करूँगा ही' ऐसा निश्चय करनेवालेके दृढ़ होता है। उसके तीव्र वेदना होनेपर जीवनकी आशा नष्ट हो जाती है ॥१६३॥

टी०—'मै शरीरका त्याग करूँगा ही' ऐसा जो दृढ निश्चय कर लेता है तीव्र भी वेदनाके होनेपर मै उसका प्रतीकार करके जीवित रहूँ ऐसी चिन्ता उसे नही होती। अतः 'जीवनकी आशाका विनाश' उसका गुण सूचित किया है ॥१६३॥

'उवधिजहण' अर्थात् परिग्रहत्यागका विस्तारसे कथन करते हैं—

गा०—मुक्तिको खोजनेवाला विशुद्ध लेश्यासे युक्त साधु सयमके साधनमात्र परिग्रहको छोडकर शेष परिग्रहको प्रकर्ष अर्थात् मन-वचन-कायसे त्याग देता है ॥१६४॥

टी०—जिस उपकरणसे संयमकी साधना की जाती है वह उपकरण कमण्डलु और पीछीमात्र है। उनको छोड़कर जो शेष परिग्रह है—दूसरी पीछी दूसरा कमण्डलु, वह उस समय संयमकी सिद्धिमे कारण न होनेसे संयमका साधन नहीं है। जिससे वर्तमानमे सयमकी साधना होती है वही संयमका साधन है। अथवा शेष परिग्रहमे ज्ञानके उपकरण शास्त्र आदि कहे हैं क्योंकि समाधिके समय उनका उपयोग नहीं रहता। मुक्ति अर्थात् कर्मोंका विनाश करनेका इच्छुक साधु पीछी कमण्डलुमात्र परिग्रहके सिवाय शेष परिग्रहको मन-वचन-कायसे छोड़ता हैं। वह साधु विशुद्धलेश्यासे युक्त होता है। यहाँ लोभकषायसे अननुरंजित (नहीं रंगी हुई अर्थात् लोभरहित)

---

१. यस्मात्तज्ज्ञा–आ० मु० २. यस्य स्मृतेर्दृ–आ० मु० ।

गृहीता। सा हि परिग्रहत्यागे प्रवर्तयत्यात्मानमिति ॥१६४॥

वसत्यादिकं तर्हि त्याज्यतया नोपदिष्टमिति आशङ्किते इति तत्त्यागमुपदिशति—

अप्पपरियम्म उवधिं बहुपरियम्मं च दोवि वज्जेइ।
सेज्जा संथारादी उस्सग्गपदं गवेसंतो ॥१६५॥

'अप्पपरियम्म उवधिं' अल्पपरिकर्म निरीक्षणप्रमार्जनविधूननादिकं यस्मिंस्तं परिग्रहं। 'बहु' महत् परिकर्म यत्र तं च। 'दो वि' द्वावपि 'वज्जेदि' वर्जयति मनोवाक्कायैः। 'सेज्जासंथारादी' वसतिसंस्तरादिकं। 'उस्सग्गपदं' उत्सर्जनं त्यागः तदेव पदं। परिग्रहत्यागपदान्वेषणकारीति यावत्। गाथाद्वयेनातिक्रान्तेन द्रव्योपधित्यागो व्याख्यातः। इयता परिसमाप्तः परिग्रहत्यागः ॥१६५॥

पंचविहं जे सुद्धिं अपाविदूण मरणमुवणमन्ति।
पंचविहं च विवेगं ते खु समाधिं ण पावेन्ति ॥१६६॥

'पंचविहं जे सुद्धिं' इत्यादिना किं प्रतिपाद्यते पूर्वमसूचितमिति। अत्रोच्यते—योग्योपादनमेवायोग्यत्यागस्तत्परिहार इत्युपधित्याग एवाख्यायते उत्तरग्रन्थेनापि। 'पंचविहं' पञ्चप्रकारां। 'सुद्धिं' शुद्धिं। 'अपाविदूण' अप्राप्य। 'जे' ये। 'मरणं' मृतिं। 'उवणमंति' प्राप्नुवन्ति। 'पंचविहं' पञ्चविधं च 'विवेगं' विवेकं, 'परिहरणं' पृथग्भावं, अप्राप्य मृतिमुपयान्ति। खु शब्द एवकारार्थः। स च क्रियापदात्परतो योज्यः।

मन-वचन-कायकी वृत्तिको विशुद्धलेश्या कहा है; क्योंकि वह जीवको परिग्रहके त्यागमें प्रवृत्त करती है ॥१६४॥

यहाँ कोई शंका करता है कि वसति आदिको तो त्याज्य नही कहा? इससे उसके त्यागका उपदेश करते हैं—

गा०—परिग्रहत्याग पदका अन्वेषण करनेवाला साधु अल्पपरिकर्मवाले और बहुत परिकर्मवाले दोनो ही प्रकारके परिग्रहोंको जिनमें वसति संस्तर आदि भी हैं, मन-वचन-कायसे त्याग देता है ॥१६५॥

टी०—जिसमें देखना, साफ करना, झाड़ना आदि कम करना होता है वह परिग्रह अल्पपरिकर्मवाला होता है। और जिसमें यह बहुत करना होता है वह बहुत परिकर्मवाला है। परिग्रहत्यागपदका खोजी साधु दोनोंको ही मन-वचन-कायसे त्यागता है। अतः वसति संस्तर आदि भी त्याग देता है। इन दो गाथाओंसे द्रव्यपरिग्रहके त्यागका कथन किया। यहाँ तक परिग्रहत्यागका प्रकरण समाप्त होता है ॥१६५॥

गा०—जो पाँच प्रकारकी शुद्धियोंको और पाँच प्रकारके विवेकको प्राप्त किये विना मरणको प्राप्त होते हैं, वे समाधिको नहीं ही प्राप्त होते हैं ॥१६६॥

टी०—शंका—'पञ्चविहं जे सुद्धिं' इत्यादिके द्वारा पहले सूचित किये विना क्या कह रहे हैं?

समाधान—योग्यका ग्रहण ही अयोग्यका त्याग है। अतः आगेके ग्रन्थसे भी परिग्रहका त्याग ही कहा है। जो पाँच प्रकारकी शुद्धि और पाँच प्रकारके विवेक अर्थात् भिन्नपनेको प्राप्त किये बिना मरते हैं वे समाधिको प्राप्त नहीं ही होते। गाथामें आये 'खु' शब्दका अर्थ 'ही' है और

समाधिं न प्राप्नुवन्त्येवेति । उपधिपरित्यागाभावे अभिमतसमाध्यभावो दोष आख्यातः ॥१६६॥

पंचविहं जे सुद्धिं पत्ता णिखिलेण णिच्छिदमदीया ।
पंचविहं च विवेगं ते हु समाधिं परमुवेंति ॥१६७॥

के समाधिं प्राप्नुवंतीत्यत्र आह–'**पंचविहं**' पञ्चविधां, '**जे सुद्धिं पत्ता**' ये शुद्धिं प्राप्ताः । '**णिखिलेण**' साकल्येन । '**णिच्छिदमदीया**' निश्चितमतयः । '**पंचविहं**' पञ्चविधं च '**विवेगं**' विवेकं '**ते हु समाहिं परमुवेंति**' ते स्फुटं समाधिं परमुपयान्ति ॥१६७॥

का एषा पंचविधा शुद्धिरित्याह—

आलोयणाए सेज्जासंथारुवहीण भत्तपाणस्स ।
वेज्जावच्चकराण य सुद्धी खलु पंचहा होइ ॥१६८॥

'**आलोयणाए**' आलोचनायाः शुद्धिः, शय्यासंस्तरयोः शुद्धिः, उपकरणशुद्धिः, भक्तपानशुद्धिः, वैयावृत्यकरणशुद्धिरिति पञ्चविधा । मायामृषारहितता आलोचनाशुद्धिः । मनोगतवक्रता माया । व्यलीकता चासौ मृषा । मायाकषाय स चाभ्यन्तरपरिग्रहः '**चत्तारि तह कसाया**' इति वचनात् । मृषा कथं परिग्रह. इति चेत् उपधीयते अनेनेत्युपधिरिति शब्दव्युत्पत्तौ उपधीयते उपादीयते कर्म अनेन व्यलीकेनेत्युपधिरित्युच्यते । यत्र यस्यादरः कर्महेतौ तत्सर्वमुपधिरेवेति भावः । उद्गमोत्पादनैषणादोषरहितता ममेदं इत्यपरिग्राह्यता च वसतिसंस्तरयोः शुद्धिस्तामुपगतेन उद्गमादिदोषोहतयोर्वसतिसंस्तरयोस्त्यागः कृत इति भवत्युपधि-

---

उसे क्रियापद 'पावेंति' के परे लगाना चाहिए। परिग्रहत्यागके अभावमें इष्ट समाधिका अभाव नामक दोष कहा है ॥१६६॥

गा०—पूर्णरूपसे निश्चित मति वाले जो पाँच प्रकारकी शुद्धिको और पाँच प्रकारके विवेक को प्राप्त हुए है, वे निश्चयसे परम समाधिको प्राप्त होते हैं ॥१६७॥

टी०—कौन समाधि प्राप्त करते हैं यह इस गाथामें कहा है ॥१६७॥

पाँच प्रकारकी शुद्धि कहते हैं—

गा०—आलोचना की शुद्धि, शय्याकी, संस्तरकी और परिग्रहकी शुद्धि, भक्तपानकी शुद्धि और वैयावृत्य करने वालोकी शुद्धि, निश्चयसे शुद्धि पाँच प्रकारकी होती है ॥१६८॥

टी०—माया और मृषासे रहित होना आलोचनाकी शुद्धि है। मनमे कुटिलताका होना माया है। असत्य भाषणको मृषा कहते हैं।

माया कषाय है और वह अभ्यन्तर परिग्रह है। 'चार कषाय हैं' ऐसा आगमका वचन है।

शङ्का—मृषा कैसे परिग्रह है ?

समाधान—'उपधीयतेऽनेनेत्युपधिः' इस शब्द व्युत्पत्तिके करने पर 'अनेन' अर्थात् असत्य भाषणके द्वारा 'उपधीयते' कर्मका ग्रहण होता है अतः मृषा उपधि है। जिस कर्मके हेतुमें जिसका आदर है वह सब उपधि ही है यह कहनेका अभिप्राय है।

उद्गम, उत्पादन और एषणा दोषोंसे रहित होना तथा 'यह मेरा है' इस प्रकार परिग्रहका भाव न होना वसति और संस्तरकी शुद्धि है। उस शुद्धिको जिसने स्वीकार किया उसने उद्गम

त्यागः । उपकरणादीनामपि उद्गमादिरहितता शुद्धिस्तस्यां सत्या उद्गमादिदोषदुष्टाना असंयमसाधनानां ममेदं भावमूलाना परिग्रहाणां त्यागोऽस्त्येव । संयतवैयावृत्यक्रमज्ञता वैयावृत्यकारिशुद्धिः सत्या तस्या असंयता अक्रमज्ञाश्च[1] न मम वैयावृत्यकरा इति स्वीक्रियमाणास्त्यक्ता भवन्ति ॥१६८॥

अहवा दंसणणाणचरित्तसुद्धी य विणयसुद्धी य ।
आवासयसुद्धी वि य पंच वियप्पा हवदि सुद्धी ॥१६९॥

'**अहवा**' अथवा । '**दंसणणाणचरित्तसुद्धी य, विनयसुद्धी य, आवासयसुद्धी वि य**' आवश्यकशुद्धिश्चेति '**पंचवियप्पा**' पञ्चविकल्पा '**हवइ सुद्धी**' भवति शुद्धिः । निःशङ्कितत्वादिगुणपरिणतिर्दर्शनशुद्धिः तस्या सत्यां शङ्काकाङ्क्षाविचिकित्सादीना अशुभपरिणामानां परिग्रहाणां त्यागो भवति । काले पठनमित्यादिका ज्ञानशुद्धिः, अस्यां सत्यां अकालपठनाद्या क्रिया ज्ञानावरणमूला परित्यक्ता भवन्ति । पञ्चविंशतिभावनाश्चारित्रशुद्धिः । सत्यां तस्या अनिगृहीतमनःप्रचारादिरशुभपरिणामोऽभ्यन्तरपरिग्रहस्त्यक्तो भवति । दृष्टफलानपेक्षिता विनयशुद्धिः । तस्या सत्यामुपकरणादिलाभलोभो निरस्तो भवति । मनसावद्ययोगनिवृत्तिः जिनगुणानुराग. वन्द्यमानश्रुतादिगुणानुवृत्तिः, कृतापराधविषया निन्दा, मनसा प्रत्याख्यानं, शरीरासारतानुपकारित्वभावना, चेत्यावश्यकशुद्धिरस्या सत्या अशुभयोगो जिनगुणाननुराग श्रुतादिमाहात्म्येऽनादर, अपराधाजुगुप्सा, अप्रत्याख्यानं, शरीरममता चेत्यमी भावदोषा परिग्रहा निराकृता भवन्ति ॥१६९॥

आदि दोषोंसे दूषित वसति और संस्तरका त्याग कर दिया इस प्रकार उपधित्याग होता है। उपकरण आदि की भी शुद्धि उद्गम आदि दोषोंसे रहित होना है। उसके होने पर उद्गम आदि दोषोंसे दूषित, असंयमके साधन और 'यह मेरा है' इस भावके मूलकारण परिग्रहोंका त्याग है ही। संयमी होना और वैयावृत्यके क्रमका ज्ञाता होना वैयावृत्यकारीकी शुद्धि है। उसके होने पर असंयमी और क्रमको न जानने वाले मेरे वैयावृत्य करने वाले नहीं हैं' ऐसा स्वीकार करने पर उनका त्याग होता है ॥१६८॥

गा०—अथवा दर्शन शुद्धि, ज्ञान शुद्धि, चारित्र शुद्धि, विनय शुद्धि और आवश्यक शुद्धि इस प्रकार शुद्धिके पाँच भेद होते हैं ॥१६९॥

टी०—निःशंकित आदि गुणोंका धारण करना दर्शन शुद्धि है। उसके होने पर शका, कांक्षा, विचिकित्सा आदि अशुभ परिणाम रूप परिग्रहोंका त्याग होता है। 'कालमें पढ़ना' आदि ज्ञान शुद्धि है। उसके होने पर अकाल पठन आदि क्रिया, जो ज्ञानावरणके बन्धकी कारण हैं, उनका त्याग होता है। पच्चीस भावनाएँ चारित्र शुद्धि है। उसके होने पर मनकी चचलताको न रोकना आदि अशुभ परिणाम, जो अभ्यन्तर परिग्रह है उनका त्याग होता है। दृष्ट फलकी अपेक्षा न करके विनय करना विनय शुद्धि है। उसके होने पर उपकरण आदिके लाभका लोभ दूर होता है। सावद्य योगका त्याग, जिन देवके गुणोंमे अनुराग, नमस्कार करनेके योग्य श्रुत आदि के गुणोंका पालन करना, किये हुए अपराधकी निन्दा, मनसे प्रत्याख्यान करना, शरीरकी असारता और उसके अनुपकारीपनेका चिन्तन, ये आवश्यक शुद्धि है। उसके होने पर अशुभ योग, जिन देवके गुणोंमें अनुरागका अभाव, श्रुत आदिके महात्म्यमें अनादर, अपराधके प्रति ग्लानिका न होना, प्रत्याख्यानका न होना, और शरीरसे ममता. ये दोष परिग्रह है, इनका निरास होता

---

१. श्च मम-आ० ।

पञ्चविधविवेकप्रख्यापनायोत्तरा गाथा—

इंदियकसायउवधीण भत्तपाणस्स चावि देहस्स ।
एस विवेगो भणिदो पंचविधो दव्वभावगदो ॥१७०॥

'**इंदियकसाय**' इति । इन्द्रियविवेकः, कषायविवेक॰, भक्तपानविवेक., उपधिविवेक., देहविवेकः इति एष विवेकः पञ्चप्रकारो निरूपित॰ पूर्वागमेषु । स पुन. पञ्चप्रकारोऽपि द्विविध॰ । द्रव्यकृतो भावकृत इति । रूपादिविषयेषु चक्षुरादीनामादरेण कोपेन वा अप्रवर्तन । इद पश्यामि शृणोमीति वा । तथा तस्या निविड-कुचनटं पश्यामि, नितम्बरोमराजि वा विलोकयामि, पृथुतर जघन स्पृशामि, कलं गीत सावधान शृणोमि, मुखकमलपरिमलं जिघ्रामि, बिम्बाधरं समास्वादयामि इति वचनानुच्चारणं वा द्रव्यत इन्द्रियविवेक. । भावत इन्द्रियविवेको नाम जातेऽपि विषयविषयिसम्बन्धे रूपादिगोचरस्य विज्ञानस्य भावेन्द्रियाभिधानस्य राग-कोपाख्या विवेचन, रागकोपसहचारिरूपादिविषयमानसज्ञानापरिणतिर्वा । द्रव्यतः कषायविवेको नाम कायेन वाचा चेति द्विविध. । भ्रूलतासङ्कोचन, पाटलेक्षणता, अधरावमर्द्दन, शस्त्रनिकटीकरण, इत्यादिकायव्यापारा-करण । हन्मि, ताडयामि, शूलमारोपयामि इत्यादिवचनाप्रयोगश्च परपरिभवादिनिमित्तचित्तकलङ्काभावो भावतः क्रोधविवेकः । तथा मानकषायविवेकोऽपि वाक्कायाभ्या द्विविध॰ । गात्राणा स्तब्धताकरण, शिरस उन्नमनं, उच्चासनारोहणादिकं च यन्मानसूचनपर तस्य कायव्यापारस्याकरणं । मत्तः को वा श्रुतपारग. सुचरित. सुतपोधनश्चेति वचनाप्रयोगश्च । एवमेवैतेभ्योऽह प्रकृष्ट इति मनसाहङ्कारवर्जनं भावतो

है ॥१६९॥

पाँच प्रकारके विवेकका कथन करते हैं—

गा०—इन्द्रिय विवेक, कषाय विवेक, उपधिविवेक, भक्तपान विवेक और देहका विवेक इस प्रकार यह विवेक पाँच प्रकारका पूर्वागम में कहा है। तथा यह पाँच प्रकारका विवेक द्रव्य और भावके भेदसे दो प्रकार है ॥१७०॥

टी०—रूप आदि विषयोंमें चक्षु आदि इन्द्रियोंका आदर भावसे या क्रोधवश प्रवृत्ति न करना, यह देखता हूँ, अथवा यह सुनता हूँ, उसके घने स्तनोंको देखता हूं, अथवा नितम्ब और रोमपंक्तिको देखता हूँ, स्थूल जघनको स्पर्श करता हूँ, मनोहर गीत सावधानता पूर्वक सुनता हूँ, मुख रूपी कमलकी सुगन्ध सूंघता हूँ, ओष्ठका रसपान करता हूँ, इत्यादि वचनोंका उच्चारण न करना द्रव्य इन्द्रिय विवेक है। विषय और विषयी अर्थात् पदार्थ और इन्द्रियका सम्बन्ध होने पर भी रूपादिका जो ज्ञान होता है जिसे भावेन्द्रिय कहते हैं, उस ज्ञानके होने पर भी राग द्वेष न करना अथवा राग द्वेषके सहचारी रूपादि विषय रूपसे मानसज्ञानका परिणत न होना भाव इन्द्रिय विवेक है। द्रव्य कषाय विवेक के दो भेद हैं शरीरसे और वचन से। भौंको संकोचना, आँखोंका लाल होना, ओठ काटना, शस्त्र उठाना इत्यादि काय व्यापारका न करना काय द्रव्य कषाय विवेक है। मारता हूँ, ताड़न करता हूँ, सूली पर चढ़ाता हूँ इत्यादि वचन न बोलना वचन क्रोध कषाय विवेक है। दूसरे के द्वारा किये गये तिरस्कार आदिके निमित्तसे चित्तमें मलिनताका न होना भावसे क्रोध विवेक है। तथा मान कषाय विवेकके भी वचन और कायकी अपेक्षा दो भेद हैं। शरीरको स्तब्ध करना, सिर को ऊँचा करना, उच्चासन पर बैठना आदि जो मान सूचक काय व्यापार हैं उनका न करना काय मान कषाय विवेक है। मुझसे बड़ा कौन शास्त्रका पंडित है, चारित्रवान और तपस्वी हैं, इस प्रकारके वचन न बोलना वचन मान कषाय विवेक है। इसी

मानकषायविवेकः । वाक्कायाभ्यां मायाविवेको द्विप्रकारः । अन्यत् कुर्वत इवान्यस्य यद्वचनं तस्य त्यागो मायोपदेशस्य वा, मायां करोमि न कारयामि, नाभ्युपगच्छामि इति वा कथनं वाचा मायाविवेकः । अन्यत्कुर्वत इवान्यस्य कायेनाकरणं कायतो मायाविवेकः । लोभकषायविवेकोऽपि द्विविधः । यत्रास्य लोभस्तमुद्दिश्य करप्रसारणं, द्रव्यदेशानपायिता, तदुपादातुकामस्य कायेन निषेधनं हस्तसंज्ञया निवारणं, शिरश्चालनया वा एतस्य कायव्यापारस्य अकरणं कायेन लोभविवेकः शरीरेण वा द्रव्यानुपादानं । एतन्मदीयं वस्तुग्रामादिकं वा अहमस्य स्वामीति वचनानुच्चारणं वा लोभविवेकः । नाहं कस्यचिदीशो न च मम किञ्चिदिति वचनं वा । ममेदंभावरूपमोहजपरिणामापरिणतिर्भावतो लोभविवेकः ॥१७०॥

अहवा सरीरसेज्जा संथारुवहीण भत्तपाणस्स ।
वेज्जावच्चकराण य होइ विवेगो तहा चेव ॥१७१॥

'**अहवा**' अथवेति । विवेकः प्रकारान्तरेणोच्यते । '**सरीरसेज्जासंथारुवहीणभत्तपाणस्स**' शरीरविवेकः वसतिसंस्तरविवेकावुपकरणविवेकः, भक्तपानविवेकः । '**वेज्जावच्चकराण य**' वैयावृत्यकराणां च विवेको भवति । '**तहा चेव**' तथैव द्रव्यभावाभ्यां इति यावत् । तत्र शरीरविवेकः शरीरेण निरूप्यते । संसारिणः शरीराद्विवेकः कथमिति चेत् । शरीरेण स्वशरीरेण स्वशरीरोपद्रवापरिहरणं शरीरविवेकः । शरीरं उपद्रवन्तं नरं तिर्यञ्चं देवं वा न हस्तेन निवारयति । मा कृथा ममोपद्रवमिति दंशमशकवृश्चिकभुजगसारमेयादींश्च हस्तेन, पिच्छाद्युपकरणेन, दण्डादिभिर्वाऽपसारयति । छत्रपिच्छकटकप्रावरणादिना वा न शरीररक्षां करोति ।

प्रकार इनसे मैं उत्कृष्ट हूँ ऐसा मनसे अहंकार न करना भावसे मान कषाय विवेक है। माया विवेक भी वचन और कायकी अपेक्षा दो प्रकार है। दिखाना तो ऐसा मानों कुछ अन्य बोलते हैं और बोलना कुछ अन्य, इसका त्याग अथवा माया पूर्ण उपदेशका त्याग, अथवा न मैं माया करता हूँ, न कराता हूँ, न अनुमोदना करता हूं ऐसा बोलना वचन माया विवेक है। अन्य करते हुए उससे अन्यका कायसे न करना काय माया विवेक है। लोभ कषाय विवेक भी दो प्रकारका है। जिस वस्तुका लोभ हो उसको लक्ष्य करके हाथ पसारना, जो उसे लेना चाहे उसे शरीरसे मना करना या हाथके संकेत से रोकना अथवा सिर हिलाकर मना करना, इस काय व्यापारका न करना काय लोभ विवेक है। अथवा शरीरसे वस्तुका ग्रहण न करना काय लोभ विवेक है। यह वस्तु ग्राम आदि मेरा है, मैं इसका स्वामी हूँ इत्यादि वचनका उच्चारण न करना, अथवा न मैं किसी का स्वामी हूँ और न कुछ मेरा है ऐसा बोलना वचन लोभ विवेक है। यह मेरा है इस भावरूप मोहजन्य परिणामका न होना भाव लोभ विवेक है ॥१७०॥

गा०—अथवा शरीर विवेक, वसति विवेक, संस्तर विवेक, उपधि विवेक, भक्तपान विवेक, और वैयावृत्य करने वालोंका विवेक, द्रव्य और भाव रूप होता है ॥१७१॥

टी०—प्रकारान्तरसे विवेकके भेद कहते हैं। शरीर विवेक शरीर के द्वारा किया जाता है।

शङ्का—संसारी जीवका शरीरसे विवेक कैसे संभव है ?

समाधान—अपने शरीरमें होने वाले उपद्रवोंका दूर न करना, शरीर विवेक है। शरीरपर उपद्रव करने वाले मनुष्य, तिर्यञ्च अथवा देव को हाथसे नहीं रोकता कि मेरे ऊपर उपद्रव मत करो। डांस, मच्छर, बिच्छू, सर्प, कुत्ते आदिको हाथसे, पिच्छी आदि उपकरणसे अथवा दण्ड वगैरहसे दूर नहीं करता। छाता, पीछी, चटाई अथवा अन्य किसी आवरणसे शरीरकी रक्षा

शरीरपीडां मम मा कृथा इत्यवचनं । मां पालयेति वा, शरीरमिदमन्यदचेतनं चैतन्येन सुखदुःखसंवेदनेन वाऽविशिष्टमिति वचनं वाचा विवेकः । वसतिसंस्तरयोर्विवेको नाम कायेन वसतावनासनं प्रागध्युषितायां, संस्तरे वा प्राक्तने अशयनं अनासनं । वाचा त्यजामि वसतिं संस्तरमिति वचनं । कायेनोपकरणानामनादानं, अस्थापनं क्वचिदरक्षा च उपधिविवेकः । वाचा परित्यक्तानीमानि ज्ञानोपकरणादीनि इति वचनं वाचा उपधिविवेकः । भक्तपानयोरनशनं अपानं वा कायेन भक्तपानविवेकः । एवंभूतं भक्तं पानं वा न गृह्णामि इति वचनं वाचा भक्तपानविवेकः । वैयावृत्यकराः स्वशिष्यादयो ये तेषां कायेन विवेकः तैः सहासंवासः । मा कृथा वैयावृत्यं इति वचनं, मया त्यक्ता यूयमिति वचनं । सर्वत्र शरीरादौ अनुरागस्य ममेदं भावस्य वा मनसा अकरणं भावविवेकः ॥१७१॥

परिग्रहपरित्यागक्रमं उपदिशति—

सव्वत्थ दव्वपज्जयममत्तसंगविजडो पणिहिदप्पा ।
णिप्पणयपेमरागो उवेज्ज सव्वत्थ समभावं ॥१७२॥

बत्तीसं किर कवला आहारो कुक्खिपूरणो होइ।
पुरिसस्स महिलियाए अट्ठावीसं हवे कवला ॥२१३॥

अनशन तपके भेद गाथा द्वारा कहते है—

गा०—अद्धानशन और सर्वानिशन इस प्रकार अनशन दो ही प्रकारका कहा है। ग्रहण और प्रतिसेवनाकालमे वर्तमानके अद्धानशन होता है और मरण समय में सर्वानिशन होता है ॥२११॥

टी०—अन्यत्र अद्धाशब्द कालसामान्यका वाचक है। किन्तु यहाँ अद्धानशनमें अद्धाशब्द चतुर्थ आदिसे लेकर छहमास पर्यन्त जितने भेद अनशनके होते हैं उन सबके लिए ग्रहण किया है। उन उपवासोंमें जो अनशन होता है वह अद्धानशन है। सर्वशब्द सब प्रकारोंमें आता है। जैसे सब प्रकारका अन्न खाता हूँ। संन्यास ग्रहण करनेके पश्चात् जबतक जीवन रहे उस सब कालमें जो भोजनका त्याग है वह सर्वानशन है। इस तरह अनशन दो ही प्रकारका है। ये दोनों कब होते हैं इसके लिए कालका भेद किया है। ग्रहण कालमें अर्थात् दीक्षा ग्रहणसे लेकर संन्यास धारण करनेसे पूर्वके कालमें तथा प्रतिसेवना काल अर्थात् दोषोंकी विशुद्धिके लिए अद्धानशन होता है और परिणाम कालके अन्तमें अर्थात् मरण समयमें सर्वानशन होता है ॥२११॥

गा०—चतुर्थ षष्ठ आदिसे छह मासके उपवास पर्यन्त यह अद्धानशनके भेद होते हैं। ये मुनिगण अपनी इच्छाके अनुसार करते हैं ॥२१२॥

अवमौदर्यका निरूपण करनेकी इच्छासे प्राय: प्रचलित आहारका परिमाण बतलाते हैं—

गा०—बत्तीस ग्रास प्रमाण आहार पुरुषके पेटको पूरा भरनेवाला होता है। स्त्रियोंके कुक्षिपूरक आहारका परिमाण अट्ठाइस ग्रास होता है ॥२१३॥

---

१. आत्मेच्छावशेन–आ० मु०। २ आहारप्रवृत्ति दर्शयति आ०। आहारपरिमाणं प्रायो–मु०।

'बत्तीसं किर कवला' पुरुषस्य कुक्षिपूरणो भवत्याहार । द्वात्रिंशत्कवलमात्र 'इत्थिआए' स्त्रियाः कुक्षिपूरणो भवत्याहारः अष्टाविंशतिकवलमात्रानि । 'तत्तो' तस्मादाहारात् ॥२१३॥

एगुत्तरसेढीए जावय कवलो वि होदि परिहीणो ।
ऊमोदरियतवो सो अद्धकवलमेव सिच्छं च ॥२१४॥

'एगुत्तरसेढीए' एककवलोत्तरश्रेण्या 'परिहीणो' परिहीन । 'ऊमोदरियतवो' अवमौदर्याख्यं तप क्रिया यावदेककवलावशेषतया न्यूनं 'अद्धकवलं' अर्धकवल यावदवशिष्टं । समप्रविभक्त कवलमर्धकवलशब्देनोच्यते । यावदेकसिक्थकं वा अवशिष्टं । आहारस्याल्पतोपलक्षणमिद अन्यथा कथमेकसिक्थकमात्रभोजनोद्यतो भवेत् । ननु चाहारो न्यूनः कथ तप इत्युच्यते इति केचित्कथयन्ति । आद्यूनतापरिहारस्य तपसो हेतुत्वात्तप इत्युच्यते अवमोयरियं । तथा च निरुक्ति—अवमं न्यून उदरमस्यावमोदर. । अवमोदरस्य भाव कर्म च अवमौदर्यमिति ॥२१४॥

रसपरित्यागो निरूप्यते—

चत्तारि महावियडीओ होंति णवणीदमज्जमंसमहू ।
कंखापसंगदप्पाऽसंजमकारीओ एदाओ ॥२१५॥

'चत्तारि महावियडीओ' चतस्रो महाविकृतयः । महत्याश्चेतसो विकृतेः कारणत्वात् महाविकृतय इत्युच्यन्ते । 'होंति' भवन्ति । 'णवणीदमज्जमंसमहू' नवनीतं, मद्य, मासं, मधु च । कीदृश्यस्ताः ? 'कंखा-

---

गा०—पुरुष और स्त्रीके उक्त आहारमेसे एक दो आदि ग्रासकी हानिके क्रमसे जब तक एक ग्रास मात्र भी शेष होता है वह अवमौदर्य तप है । जब तक अर्धग्रास ही अवशिष्ट रहे या एक सिक्थ शेष रहे तब तक भी अवमौदर्य तप है ॥२१४॥

टी०—एक ग्रासके बराबर दो भाग करने पर एक भागको अर्धकवल कहते है । एक चावल मात्र जो कहा है वह आहारकी अल्पताका उपलक्षण है । अन्यथा कोई मात्र एक चावलका भोजन करनेके लिए कैसे तत्पर हो सकता है ।

शंका—थोड़ा आहार लेना तप कैसे है ? ऐसा कोई कहते हैं ।

समाधान—पेट भर खानेका त्याग तपका हेतु होनेसे अवमौदर्यको तप कहा जाता है । अवमौदर्यकी निरुक्ति है—'अवम' अर्थात् न्यून (कमभरा) उदर है जिसका वह अवमोदर है और अवमोदरका भाव अथवा कर्म अवमौदर्य है ॥२१४॥

रस परित्याग तपका निरूपण करते है—

गा०—चार महाविकृतियाँ होती हैं, मक्खन, मद्य, मांस और मधु । ये गृद्धि, प्रसंग, दर्प, और असंयमको करते हैं ॥२१५॥

टी०—चित्तमें महान विकार पैदा करनेसे इन्हें महाविकृति कहते हैं । नवनीत कांक्षा अर्थात् गृद्धिको उत्पन्न करता है । मद्य प्रसंग अर्थात् पुनः पुन. अगम्या स्त्रीके साथ भोगविलास कराता है । मांस इन्द्रियोंमें मद पैदा करता है । मधु असंयमको उत्पन्न करता है असंयमके दो भेद

चतुर्गत्यासंयमकारीओ एदाओ । कांक्षा गार्द्ध्यं, प्रसंगः पुनःपुनस्तत्र वृत्तिः, दर्पः दृप्तेन्द्रियता, असंयमः रसविषयानुरागात्मकः इन्द्रियासंयमः, रसजजन्तुपीडा प्राणासंयमः, एतान्दोषानिमाः कुर्वन्ति ॥२१५॥

आणाभिकंखिणावज्जभीरुणा तवसमाधिकामेण ।
ताओ जावज्जीवं णिज्जूढाओ पुरा चेव ॥२१६॥

'**आणाभिकंखिणा**' । अत्रैवं पदघटना-'**ताओ**' ताः महाविकृतयः । '**जावज्जीवं**' जीविताविधिकं । '**णिज्जूढाओ**' परित्यक्ताः । '**पुरा चेव**' सल्लेखनाकालात्पूर्वमेव । केन परित्यक्ता ? '**आणाभिकंखिणा**'—इदमित्थं त्वया कर्तव्यमिति कथन आज्ञा । सर्वविदा आज्ञप्ता भव्याः परित्याज्या नवनीतादय. । तदासेवा असंयमः कर्मबन्धहेतुरिति । अस्यामाज्ञायां कांक्षावता आदरवता सर्वज्ञाज्ञाऽसंपादनादेव दुरन्तससारमध्यपतनं ममासी-द्भविष्यति च तेन तदाज्ञादरः कार्य इत्यभ्युद्यतेन । '**अवज्जभीरुणा**' अवद्यं पाप तेन । अयमर्थः पापभीरुणा । '**तवसमाधिकामेण**' तपस्येकाग्रतामभिलषता । अतो नवनीतादित्यागोऽपि रसत्याग एव ॥२१६॥

इह सल्लेखनाकाले मयैषा त्यागो गृहीत इत्याचष्टे—

खीरदधिसप्पितेल्लगुडाण पत्तेगदो व सव्वेसिं ।
णिज्जूहणमोगाहिम पणकुसणलोणमादीणं ॥२१७॥

'**खीरदधिसप्पितेल्लगुडाणं**' क्षीरस्य, दध्न', घृतस्य, तैलस्य, गुडस्य, च '**णिज्जूहणं**' त्यागः । कथं ? '**पत्तेगदो व**' प्रत्येकं एकैकस्य वा त्याग' । '**सव्वेसिं**' सर्वेषां वा क्षीरादीनां त्यागः रसपरित्याग. । '**ओगाहिम पणकुसण लोणमादीण**' अपूपानां, पत्रशाकानां, सूपस्य, लवणादीना वा त्यागो रसपरित्यागः ॥२१७॥

हैं—इन्द्रिय असंयम और प्राणि असयम । मधुके रसके विषयमे अनुरागकी आतुरता रूप इन्द्रिय असयम होता है और मधुमे उत्पन्न जन्तुओंका घात होनेसे प्राण असंयम होता है ॥२१५॥

गा०—सर्वज्ञकी आज्ञाके प्रति आदरवान, पाप भीरु और तपमें एकाग्रताके अभिलाषीने वे महविकृतियाँ सल्लेखनाके समयसे पूर्व ही जीवन पर्यन्तके लिये (णिज्जूढाओ) त्याग दी है ॥२१६॥

टी०—यह काम इस प्रकार तुम्हें करना चाहिये, ऐसा कहना आज्ञा है । सर्वज्ञकी आज्ञासे भव्य जीवोंके लिये नवनीत आदि छोडने योग्य है। उनका सेवन असंयम हैं जो कर्मबन्धका कारण है । इस आज्ञाका पालन न करनेसे ही मेरा दुरन्त ससारके मध्यमें पतन हुआ और होगा । इसलिये उस आज्ञाका आदर करना चाहिये इस प्रकार जो उद्यत हुआ है और अवद्य अर्थात् पाप से जो डरता है तथा जो तपमें एकाग्रताका अभिलाषी है वह तो पहले ही जीवन पर्यन्तके लिये इन विकृतियोंको त्याग चुका है । अतः नवनीत आदिका त्याग भी रस त्याग ही है ॥२१६॥

अब इस सल्लेखनाके समय मैने इन नीचे कही वस्तुओंका त्याग किया, यह कहते है—

गा०—दूध, दही, घी, तेल, गुडका और घृत पूर, पुवे, पत्रशाक, सूप और लवण आदिका सबका अथवा एक-एकका त्याग रस परित्याग है । अर्थात् सल्लेखना कालमें दूध आदि सबका या उनमेंसे यथायोग्य दो तीन चारका त्याग रस परित्याग है ॥२१७॥

अरसं च अण्णवेलाकदं च सुद्धोदणं च लुक्खं च ।
आयंबिलमायामोदणं च विगडोदणं चेव ॥२१८॥

'अरसं' च स्वादरहितं । **'अण्णवेलाकदं च'** वेलान्तरकृतं च शीतलमिति यावत् । **'सुद्धोदणं च'** सुद्धौदनं च केनचिदप्यमिश्रं । **'लुक्खं च'** रूक्षं च स्निग्धताप्रतिपक्षभूतेन स्पर्शेन विशिष्टमिति यावत् । **'आयंबिलं'** असंस्कृतसौवीरमिश्रं । **'आयामोदणं'** अप्रचुरजल सिक्थाढ्यमिति केचिद्वदन्ति । अव[1]श्रावणसहितमित्यन्ये । **'विगडोदणं'** अतीव[2] पक्वं । उष्णोदकसम्मिश्रं इत्यपरे ॥२१८॥

इच्चेवमादि विविहो णायव्वो हवदि रसपरिच्चाओ ।
एस तवो [3]भजिदव्वो विसेसदो सल्लिहंतेण ॥२१९॥

'इच्चेवमादिविविहो' एवमादिविविधो नानाप्रकारो । **'णादव्वो हवइ रसपरिच्चाओ'** ज्ञातव्यः सर्वेषां रसपरित्यागः । **'एस तवो भजिदव्वो'** एतद्रसपरित्यागाख्य तपः । **'भजिदव्वो'** सेव्य । **विसेसदो'** विशेषेण । **'सल्लिहंतेण'** कायसल्लेखना कुर्वता । **'चाओ रसाणं'** ॥२१९॥

वृत्तिपरिसंख्याननिरूपणाय गाथाचतुष्टयमुत्तरम्—

गत्तापच्चागदं उज्जुवीहि गोमुत्तियं च पेलवियं ।
सम्बूकावट्टंपि पदंगवीधी य गोयरिया ॥२२०॥

गा०—स्वाद रहित अन्य समयमें बनाया गया अर्थात् ठण्डा भोजन, और शुद्ध भात जिसमें कोई अन्य शाक वगैरह न मिला हो, और रूखा भोजन जिसमे घी आदि न हो, आचाम्ल अर्थात् काजी मिश्रित भात, थोडा जल और बहुत चावल वाला भात, और बहुत अधिकपका भात ॥२१८॥

टी०—आयामोदण' का अर्थ कोई तो थोडा जल और चावल बहुत ऐसा भात करते है । अन्य कुछ अवश्रावण सहित (?) कहते है । विगडोदणका अर्थ दूसरे व्याख्याकार गर्मजलसे मिश्रित भात करते है ॥२१८॥

गा०—इत्यादि अनेक प्रकारका रस परित्याग सबको जानने योग्य है । शरीर सल्लेखना करने वालेको यह रस परित्याग नामक तप विशेष रूपसे सेवन करना चाहिये ॥२१९॥

रस परित्याग तपका वर्णन समाप्त हुआ । आगे चार गाथाओंसे वृत्तिपरि संख्यान तपका कथन करते हैं

टी०—'गत्तापच्चागदं'—जिस मार्गसे पहले गया उसीसे लौटते हुए यदि भिक्षा मिलेगी तो ग्रहण करूँगा अन्यथा नहीं ग्रहण करूँगा । 'उज्जुवीहिं'—सीधे मार्गसे जानेपर मिली तो ग्रहण करूँगा अन्यथा नहीं ग्रहण करूँगा । 'गोमूत्तियं' बैलके मूतते हुए जानेसे जैसा आकार बनता है मोड़ेदार, वैसे जाते हुए यदि भिक्षा मिलेगी तो ग्रहण करूँगा अन्यथा नही ग्रहण करूँगा । 'पेल्लवियं'—वस्त्र सुवर्ण आदि रखनेके लिए बांस के पत्ते आदिसे जो सन्दूक बनता है, जिसपर ढकना भी हो, उसके समान चौकोर भ्रमण करते हुए भिक्षा मिली तो ग्रहण करूँगा अन्यथा नहीं । 'संबूकावट्ट'—शंखके आवर्तोके समान गाँवके अन्दर आवर्ताकार भ्रमण करके बाहरकी

---

१ अवसावण आ. मु. । २. अतीवतीव्रपक्वं आ. मु. । ३. कायव्वो अ० आ० ।

'गत्वापच्चागदं' । यया वीथ्या गतः पूर्वं तयैव प्रत्यागमनं कुर्वन्यदि भिक्षां लभते गृह्णाति नान्यथा । 'उज्जुवीहिं' ऋज्व्या वीथ्या यतो यदि लभते गृह्णाति नेतरथा । गोमूत्रिकाकारं भ्रमणं वा संपादयन् । 'पेलवियं' वंशदलादिभिर्निष्पादितं वस्त्रसुवर्णादिनिक्षेपणार्थं पिधानसहितं यत्तद्वच्चतुरस्राकारं भ्रमणं । 'संबूकावट्टं वि य' शंबूकावर्तं इव । 'पदंगवीधी य' पतंगमाला पतङ्गवीथीत्युच्यते । सा यथा भ्रमति तथा भ्रमणं । 'गोयरिया' गोचर्या भिक्षायां भ्रमणं । एवंभूतेन भ्रमणेन लब्धा भिक्षां गृह्णामि नान्यथेति कृतसंकल्प'सा वृत्तिपरिसंख्यानं ॥२२०॥

पाडयणियंसणभिक्खा परिमाणं दत्तिघासपरिमाणं ।
पिंडेसणा य पाणेसणा य जागूय पुग्गलया ॥२२१॥

'पाडयणियंसणभिक्खापरिमाणं' इमं एव पाटकं प्रविश्य लब्धां भिक्षां गृह्णामि नान्यं । एकमेव पाटकं पाटकद्वयमेवेति । अस्य गृहस्य परिकरतया अवस्थितां भूमिं प्रविशामि न गृहमि[1]त्थमभिग्रह. णियंसणमित्युच्यते इति केचिद्वदन्ति । अपरे पाटस्य भूमिमेव प्रविशामि न पाटगृहाणि इति संकल्प' पाडगणिगंमणमित्युच्यते इति कथयन्ति । भिक्षापरिमाणं एकां भिक्षां द्वे एव वा गृह्णामि नाधिकामिति । 'दत्तिघासपरिमाणं' एकेनैव दीयमान द्वाभ्यामेवेति दानक्रियापरिमाणं । आनीतायामपि भिक्षाया इयत एव ग्रासान्गृह्णामि इति वा परिमाण । 'पिंडेसणा' पिण्डभूतमेवाशनं गृह्णामि । 'पाणेसणाओ' द्रवबहुलतया यत्पीयते अशन । जागूय' यवागू । 'पोग्गलिया वा' धान्यान्येव निष्पावचणकमसूरकादीनि भक्षयामि इति ॥२२१॥

संसिट्ठ फलिह परिखा पुप्फोवहिदं व सुद्धगोवहिदं ।
लेवडमलेवडं पाणायं च णिस्सित्थगं ससित्थं ॥२२२॥

और भ्रमण करते हुए भिक्षा मिली तो ग्रहण करूँगा अन्यथा नहीं ।

'पदंगवीधी'—पक्षियोंकी पंक्ति जैसे भ्रमण करती है उस तरह भ्रमण करते हुए यदि भिक्षा मिली तो मैं ग्रहण करूँगा । 'गोयरिया'—गोचरी भिक्षाके अनुसार भ्रमण करते हुए भिक्षा मिलेगी तो ग्रहण करूँगा । इस प्रकारके सकल्प करनेको वृत्ति परिसंख्यान कहते हैं २२०॥

गा०-टी०—'पाडयनियंसण'—इसी ही फाटकमें प्रवेश करके मिली हुई भिक्षाको ग्रहण करूँगा, अन्य फाटकमें नहीं । एक ही फाटकमें प्रवेश करूँगा या दो में ही प्रवेश करूँगा । 'अमुक घरसे लगी हुई भूमिमें प्रवेश करूँगा, घरमें नही जाऊँगा ? इस प्रकारकी प्रतिज्ञाको णियंसण कहते हैं । ऐसा कोई कहते हैं । दूसरोंका कहना है कि पाटकी भूमिमें ही प्रवेश करूँगा, पाटके घरोंमें प्रवेश नहीं करूँगा इस प्रकारके संकल्पको 'पाटकाणियंसण' कहते हैं । 'भिक्षा परिमाण'—एक ही भिक्षा या दो ही भिक्षा ग्रहण करूँगा, अधिक नही । 'दत्तिघास परिमाण'—एक के ही द्वारा देने पर या दो के ही द्वारा देनेपर भिक्षा ग्रहण करूँगा । अथवा दाताके द्वारा लाई गई भिक्षामेंसे भी इतने ही ग्रास ग्रहण करूँगा ऐसा परिमाण करना । पिंडेसणा'—पिण्ड रूप भोजन ही ग्रहण करूँगा । 'पाणेसणा'—जो बहुल द्रव होनेसे पीने योग्य होगा वही ग्रहण करूँगा । 'जागूय' यवागू ही ग्रहण करूँगा । 'पुग्गलया'—चना मसूर आदि धान्य ही ग्रहण करूँगा ॥२२१॥

---

१. त्थना बृ—आ० मु० । २. मित्यवग्रहः ।

'संसिट्ठं' शाककुल्माषादिव्यञ्जनसम्मिश्रं संसृष्टमेव । 'फलिह' समन्तादवस्थितशाकं मध्यावस्थितौदनं । 'परिखा' परितो व्यञ्जन मध्यावस्थितान्नं । 'पुप्फोवहिदं च' व्यञ्जनमध्ये पुष्पबलिरिव अवस्थितसिक्थकं । 'सुद्धगोवहिद' शुद्धेन निष्पावादिभि[1]रमिश्रेणान्नेन 'उवहिदं' ससृष्टं शाकव्यञ्जनादिकं । 'लेवडं' हस्तलेपकारि । 'अलेवडं' यच्च हस्ते न सज्जति । 'पाणगं' यच्च हस्ते न सज्जति । 'पाणगं' पानं च कीदृक् ? 'णिसित्थगसित्थं' सिक्थरहितं पान तत्सहितं च ॥२२२॥

पत्तस्स दायगस्स य अवग्गहो बहुविहो ससत्तीए ।
इच्चेवमादिविविहा णादव्वा वुत्तिपरिसंखा ॥२२३॥

'पत्तस्स' एवंभूतेन भाजनेनैवानीत गृह्णामि सौवर्णेन, कसपात्र्या, राजतेन मृण्मयेन वा । 'दायगस्स य' स्त्रियैव तत्रापि बालया, युवत्या, स्थविरया सालङ्कारया, निरलङ्कारया, ब्राह्मण्या, राजपुत्र्या इत्येवमादि अभिग्रहोऽवग्रहः । 'बहुविहो' बहुविध । 'ससत्तीए' स्वशक्त्या । 'इच्चेवमादि' एवंप्रकारा । 'विविहा' विविधा । 'णादव्वा' ज्ञातव्या । 'वुत्तिपरिसंखा' वृत्तिपरिसंख्या ॥२२३॥

कायक्लेशनिरूपणायोत्तरप्रबन्ध —

अणुसूरी पडिसूरी य उड्ढसूरी य तिरियसूरी य ।
उब्भागेण य गमणं पडिआगमणं च गंतूणं ॥२२४॥

'अणुसूरि' पूर्वस्या दिशः पश्चिमाशागमनं क्रूरातपे दिने । 'पडिसूरि' अपरस्या दिश आदित्याभिमुखं गमनं । 'उड्ढसूरी य' उर्ध्वं गते सूर्ये गमन । 'तिरियसूरी य' तिर्यगवस्थित दिनकर कृत्वा गमनं । 'उब्भागेण गमणं' स्वावस्थितग्रामाद् ग्रामान्तर प्रति भिक्षार्थं गमन । 'पडिआगमणं च गन्तूणं' प्रत्यागमन

गा०-टी०—'संसिट्ठ'—जो शाक कुल्माष आदि व्यंजनसे मिला हुआ हो । 'फलिह'—जिसके चारो ओर शाक रखा हो और बीचमे भात हो । 'परिखा'—चारो ओर व्यंजन हो बीचमे अन्न रखा हो । 'पुप्फोवहिद'—व्यंजनोके मध्यमे पुष्पावलीके समान चावल रखे हो । 'सुद्धगोवहिद'—शुद्ध अर्थात् विना कुछ मिलाये अन्नसे 'उपहित' अर्थात् मिले हुए शाक व्यंजन आदि । 'लेवड' जिससे हाथ लिप जाये । 'अलेवड' जो हाथसे न लिप्त हो । सिक्थ सहित पेय और सिक्थ रहित पेय । ऐसा भोजन मिलेगा तो ग्रहण करूँगा ऐसा संकल्प करना है ॥२२२॥

गा०-टी०—'पत्तस्स'—इसी प्रकार सोने, चाँदी, कांसी या मिट्टीके पात्रसे ही लाया गया भोजन ग्रहण करूँगा । 'दायगस्स'—स्त्रीसे ही, उसमें भी बालिकासे या युवतीसे या वृद्धासे अथवा अलंकार सहित स्त्री या अलंकार रहित स्त्रीसे या ब्राह्मणीसे या राजपुत्रीसे दिया गया आहार ही ग्रहण करूँगा । इस तरह बहुत प्रकार के अभिग्रह अपनी शक्तिके अनुसार होते हैं । ये सब विविध वृत्ति परिसंख्यान जानना चाहिये ॥२२३॥

काय क्लेशका कथन करते हैं—

गा०-टी०—'अणुसूरि'—जिस दिन कड़ी धूप हो सूरजको पीछे करके पूरब दिशासे पश्चिम दिशाकी ओर जाना । 'पडिसूरि'—पश्चिम दिशासे सूरजकी ओर मुख करके गमन करना । 'उड्ढसूरी'—सूरजके ऊपर आ जाने पर गमन करना, 'तिरियसूरी'—सूरजको एक ओर रखते हुए गमन करना । 'उब्भागेण गमण'—जिस ग्राममें मुनि ठहरे हो उस ग्रामसे दूसरे गाँवमे भिक्षाके

---

1. दिभरमि-अ० आ० ।

च [1]गत्वा ॥२२४॥

स्थानयोगनिरूपणा—

साधारणं सवीचारं सणिरुद्धं तहेव वोसट्टं ।
समपादमेगपादं गिद्धोलीणं च ठाणाणि ॥२२५॥

'साधारणं' प्रमृष्टस्तम्भादिकमुपाश्रित्य स्थानं । 'सवीचारं' ससंक्रमं पूर्वावस्थिताद्देशाद्गत्वापि स्थापितस्थानः । 'सणिरुद्धं' निश्चलमवस्थानं । 'तहेव' तथैव । 'वोसट्टं' कायोत्सर्गः । 'समपाद' समौ पादौ कृत्वा स्थान । 'एगपाद' एकेन पादेन अवस्थानं । गिद्धोलीणं गृद्ध्रस्योर्ध्वगमनमिव बाहू प्रसार्यावस्थान ॥२२५॥

आसनयोगनिरूपणा—

समपलियंकणिसेज्जा समपदगोदोहिया य उक्कुडिया ।
मगरमुह हत्थिसुण्डी गोणिसेज्जद्धपलियङ्का ॥२२६॥

'समपलियंकणिसेज्जा' सम्यक्पर्यंकनिषद्या । 'समपद' स्फिक्पिठस[2]मवसरणेनासनं । 'गोदोहिगा' गोदोहने आसनमिवासन । 'उक्कुडिगा' ऊर्ध्वं संकुचितमासनं । 'मगरमुह' मकरस्य मुखमिव कृत्वा पादावस्थानं । 'हत्थिसुण्डी' हस्तिहस्तप्रसारणमिव एकं पादं प्रसार्यासनं । हस्त प्रसार्येत्यपरे । 'गोणिसेज्ज अद्धपलियंकं' गोनिषद्या गवामासनमिव अर्द्धपर्यंङ्क ॥२२६॥

वीरासणं च दण्डायउड्ढसाई य लगडसाई य ।
उत्ताणो मच्छिय एगपाससाई य मडयसाई य ॥२२७॥

लिये जाना । 'गंतूण पडिआगमण'—जाकर लौट आना ये सब काय क्लेश तप है ॥२२४॥

स्थान योगका कथन करते हैं—

गा०-टी०—'साधारण'—चिकने स्तम्भ आदिका आश्रय लेकर खड़े होना । सवीचार—पूर्व स्थानसे दूसरे स्थान पर जाकर कुछ काल तक खडे रहना । 'सणिरुद्ध'—अपने स्थान पर ही निश्चल स्थित होना । 'वोसट्ट'—कायोत्सर्ग करना । समपाद—दोनों पैर बराबर करके खडे होना । 'एगपाद'—एक ही पैर से खडे होना । 'गिद्धोलीण'– जैसे गिद्ध उडते समय अपने दोनो पंख फैलाता है उस तरह दोनों हाथ फैलाकर खड़े होना ॥२२५॥

आसन योगका कथन करते है—

गा०-टी०—'समपलियंकणिसेज्जा'—सम्यक् पर्यंकासनसे बैठना । 'समपद'—जांघे और कटि भागको सम करके बैठना । 'गोदोहिगा' गौ दुहते समय जैसा आसन होता है वैसे आसनसे बैठना । 'उक्कुडिया'—ऊपरको सकुचित आसनसे बैठना अर्थात् दोनों पैरोंको जोड़ भूमिको न छूते हुए बैठना । 'मगरमुह'—मगरके मुखकी तरह पैर करके बैठना । 'हत्थिसुंडी—हाथीके सूँड फैलानेकी तरह एक पैर फैलाकर बैठना । दूसरों का कहना है कि हाथ फैलाकर बैठना हत्थिसूँडी है । 'गोणिसेज्ज' दोनों जंघाओंको संकोच कर गायकी तरह बैठना । और अर्धपर्यंकासन । ये सब कायक्लेश के आसन हैं ॥२२६॥

---

१. कृत्वा अ० । २. समकरणेना–मु० ।

'वीरासणं' जंघे विप्रकृष्टदेशे कृत्वासन । दण्डवदायतं शरीरं कृत्वा शयनं । स्थित्वा शयनं च ऊर्ध्वशायीत्युच्यते । **'लगडसाई'** संकुचितगात्रस्य शयनं । उत्ताणो उत्तानं शयनं । अवमस्तकशयनं एक-पार्श्वशयनं च ॥२२७॥

अब्भावगाससयणं अणिट्ठवणा अकंडुगं चेव ।
तणफलयसिलाभूमी सेज्जा तह केसलोचो य ॥२२८॥

'अब्भावगाससयणं' बहिर्निरावरणदेशे शयन । **'अणिट्ठिवणगं'** निष्ठीवनाकरणं । **'अकंडुवणं च'** अकण्डूयनं । **'तणफलगसिलाभूमीसेज्जा'** तृणादिषु शय्या । **'तहा'** तथा । **'केसलोओ य'** केशलोचश्च ॥२२८॥

अब्भुट्ठणं च रादो अण्हाणमदंतधोवणं चेव ।
कायकिलेसो एसो सीदुण्हादावणादी य ॥२२९॥

'अब्भुट्ठणं च रादो' रात्रावशयनं जागरणमित्यर्थः । **'अण्हाणं'** अस्नानं । **'अदन्तधोवणं चेव'** दन्तानामशोधनं । **'कायकिलेसो'** कायक्लेशः । **'एसो'** एष । **'सीदुण्हादावणादी य'** शीतातपनमुष्णातपनमित्येवमादिकं ॥२२९॥

विविक्तशयनासननिरूपणा—

जत्थ ण विसोत्तिग अत्थि दु सद्दरसरूवगन्धफासेहिं ।
सज्झायज्झाणवाघादो वा वसधी विवित्ता सा ॥२३०॥

'जत्थ ण विसोत्तिग' यस्यां वसतौ न विद्यतेऽशुभपरिणामः । **सद्दरसरूवगन्धफासेहिं** शब्दरसरूपगन्धस्पर्शैः करणभूतैः मनोज्ञैरमनोज्ञैर्वा । **'सा विवित्ता वसधी'** विविक्ता वसतिः । **'सज्झायज्झाणवाघादो'** स्वाध्यायध्यानयोर्व्याघातो वा नास्ति सा विविक्ता भवति ॥२३०॥

गा०-टी०—दोनों जंघाओंको दूर रखकर आसन वीरासन है। आगे शयनके भेद करते है—दण्डेके समान शरीरको लम्बा करके सोना। खडे होकर सोना। इसे ऊर्ध्वशायी कहते हैं। 'लगण साई'—शरीरको संकुचित करके सोना। उताण—ऊपरको मुख करके सोना। ओमच्छिय-मस्तक नीचे करके सोना अर्थात् नीचे मुख करके सोना। एक करवटसे सोना। मडयसाइ—मृतककी तरह निश्चेष्ट सोना ॥२२७॥

गा०-टी०—'अब्भवगास सयणं'—बाहर खुले आकाशमें सोना। 'अणिट्ठिवणगं'—थूकना नहीं। अकंडूतगं—खुजाना नही। तथा तृण, काठका पटिया, शिला, या भूमिपर सोना और केसलोच ॥२२८॥

गा०-टी०—रातमें शयन नहीं करना अर्थात् जागना। स्नान नहीं करना। दाँतोको नही धोना, उनकी सफाई नहीं करना। और शीतकालमें तथा गर्मीमें आतपन योग करना इत्यादि यह कायक्लेश है ॥२२९॥

विविक्त शयनासन तपका कथन करते हैं—

गा०—जिस वसतिमें मनोज्ञ या अमनोज्ञ शब्द, रस, रूप गन्ध और स्पर्शके द्वारा अशुभ परिणाम नहीं होते। अथवा स्वाध्याय और ध्यानमें व्याघात नहीं होता वह विविक्त वसति है ॥२३०॥

वियडाए अवियडाए समविसमाए बहिं च अन्तो वा।
इत्थिणउंसयपसुवज्जिदाए सीदाए उसिणाए ॥२३१॥

'वियडाए' उद्घाटितद्वारायां। 'अवियडाए' अनुद्घाटितद्वारायां वा। 'समविसमाए' समभूमिसमन्वितायां विषमभूमिसमन्वितायां वा। 'बहिं च' बहिर्भागे वा। 'अन्तो वा' अभ्यन्तरे वा। 'इत्थिणउंसयपसुवज्जिदाए' स्त्रीभिर्नपुंसकैः पशुभिश्च वर्जितायां वसतौ। 'सीदाए' शीतायां। 'उसिणाए' उष्णायां ॥२३१॥

उग्गमउप्पादणएसणाविसुद्धाए अकिरियाए दु।
वसति असंसत्ताए णिप्पाहुडियाए सेज्जाए ॥२३२॥

'उग्गमउप्पादणएसणाविसुद्धाए' उद्गमोत्पादनैषणादोषरहितायां। तत्रोद्गमो दोषो निरूप्यते। वृक्षच्छेदस्तदानयनं इष्टकापाकः, भूमिखननं, पाषाणसिकतादिभिः पूरणं, धरायाः कुट्टनं, कर्दमकरणं, कीलानां करणं, अग्निनायसस्तापनं कृत्वा प्रताड्य क्रकचैः काष्ठपाटनं, वासीभिस्तक्षणं, परशुभिश्छेदनं इत्येवमादिव्यापारेण षण्णां जीवनिकायानां बाधां कृत्वा स्वेन वा उत्पादिता, अन्येन वा कारिता वसतिराधाकर्मशब्देनोच्यते। यावन्तो दीनानाथकृपणा आगच्छन्ति लिङ्गिनो वा तेषामियमित्युद्दिश्य कृता, पाषंडिनामेवेति वा श्रमणानामेवेति, निर्ग्रन्थानामेवेति सा उद्देसिगा वसदित्ति भण्यते। आत्मार्थं गृहं कुर्वता अपवरकं संयतानां भवत्विति कृतं अब्भोवब्भमित्युच्यते। आत्मनो गृहार्थमानीतैः काष्ठादिभिः सह बहुभिः श्रमणार्थमानीतैरल्पैन मिश्रिता यत्र गृहे तत्पूतिकमित्युच्यते। पाषण्डिनां गृहस्थानां वा क्रियमाणे गृहे पश्चात्संयतानुद्दिश्य काष्ठादिमिश्रणेन निष्पादितं वेश्म मिश्रम्। स्वार्थमेव कृतं संयतार्थमिति स्थापितं ठविदं इत्युच्यते। संयतः स च यावद्भिर्दि-

---

गा०—वह वसति खुले द्वार वाली हो अथवा बन्द द्वार वाली हो। उसकी भूमि सम हो अथवा ऊँची नीची हो। वह बाहरके भागमें हो अथवा अन्दरके भागमें हो। स्त्री नपुंसक और पशुओंसे रहित हो ठंडी हो या गर्म हो ॥२३१॥

गा० उद्गम उत्पादन और एषणा दोषोंसे रहित, दुःप्रमार्जन, आदि संस्कारसे रहित, जीवोंकी उत्पत्तिसे रहित, शय्यारहित वसतिकामें अन्दर या बाहरमे विविक्त शयनासन तपके धारी मुनि निवास करते हैं ॥२३२॥

टी०—उद्गमदोषको कहते है—वृक्षको काटना, उसको लाना, ईंटे पकाना, भूमि खोदना, उसे पत्थर रेत वगैरहसे भरना, पृथ्वीको कूटना, कीचड़ तैयार करना, कीले बनाना, आगसे लोहा गरम करके उसे पीटकर करोतोंसे लकडी चीरना। विसौलोंसे छीलना, फरसोंसे काटना, इत्यादि व्यापारसे छहकायके जीवोंको बाधा पहुँचाकर अपने द्वारा बनाई या दूसरेसे बनवाई वसति अधःकर्मनामक दोषसे युक्त है। जितने दीन अनाथ दरिद्र अथवा वेषधारी आयेंगे उनके उद्देससे बनाई, अथवा यह पाषंडियोंके ही लिए है, या श्रमणोके ही लिए है या निर्ग्रन्थोंके ही लिए है, ऐसी वसति उद्देसिग दोषसे युक्त होती है। अपने लिए घर बनाते हुए यह कोठरी संयमियों-के लिए रहे ऐसा संकेतपूर्वक बनाई वसतिका अब्भोवब्भ कहलाती है। अपना घर बनानेके लिए लाए गये बहुतसे काष्ठ आदिके साथ थोड़ा-सा सामान श्रमणोंके लिए लाकर दोनोंके मेलसे बनी वसति पूतिक कही जाती है। पाषण्डियों अथवा गृहस्थोंके लिए घर बनवाकर पीछे मुनियोंका उद्देश करके उसमें काष्ठआदि मिलाकर बनवाई वसति मिश्रदोषसे दूषित है। अपने ही लिए

नैराणमिष्यति तत्प्रवेशदिने गृहसंस्कारं सकलं करिष्यामः इति चेतसि कृत्वा यत्संस्कारित वेश्म तत्पाहुडिगमित्युच्यते। तदागमानुरोधेन गृहसंस्कारकालापन्हासं कृत्वा वा संस्कारिता वसति.। यद्गृहं अन्धकारबहुलं तत्र प्रकाशसंपादनाय यतीनां छिद्रीकृतकुड्यं, अपाकृतफलकं, सुविन्यस्तप्रदीपकं वा तत्पादुकारशब्देन भण्यते। द्रव्यक्रीतं भावक्रीतं इति द्विविधं क्रीतं वेश्म, सचित्त गोबलीवर्दादिकं दत्वा संयतार्थक्रीतं, अचित्तं वा घृतगुडखंडादिकं दत्वा क्रीतं द्रव्यक्रीतं। विद्यामन्त्रादिदानेन वा क्रीतं भावक्रीतं। अल्पमृणं कृत्वा वृद्धिसहितं अवृद्धिकं वा गृहीतं संयतेभ्यः पामिच्छं उच्यते। मदीये वेश्मनि तिष्ठतु भवान् युष्मदीयं तावद्गृहं यतिभ्य प्रयच्छेति गृहीत परियट्टमित्युच्यते। कुड्याद्यर्थं कुटीरककटादिकं स्वार्थं निष्पन्नमेव यत्संयतार्थमानीतं तदभ्यहिडमुच्यते। तद्द्विविधमाचरितमनाचरितमिति। दूरदेशाद् ग्रामान्तराद्वानीतमनाचरितं इतरदाचरितं। इष्टकादिभि., मृत्पिडेन, वृत्या, कवाटेनोपलेन वा स्थगित अपनीय दीयते यत्तदुद्भिन्नं। निश्रेण्यादिभिरारुह्य इत आगच्छत युष्माकमिय वसतिरिति या दीयते द्वितीया तृतीया वा भूमिः सा मालारोहमित्युच्यते। राजामात्यादिभिर्भयमुपदर्श्य परकीय यद्दीयते तदुच्यते अच्छेज्जं इति। अनिसृष्टं पुनर्द्विविधं। गृहस्वामिना अनियुक्तेन या दीयते वसति यदस्वामिनापि बालेन परवशवर्तिना दीयते सोभय्यप्यनिसृष्टेति उच्यते। उद्गमदोषा निरूपिताः।

उत्पादनदोषो निरूप्यते—पञ्चविधाना धात्रीकर्मणा अन्यतमेनोत्पादिता वसति। काचिद्दारकं स्नप-

---

बनाये घरको संयमियोंके लिए स्थापित करना ठविद दोष है। अमुक मुनि जितने दिनोमें आवेंगे, उनके प्रवेश करनेके दिन घरकी सब सफाई आदि करायेंगे, ऐसा चित्तमे विचारकर बनवाया घर 'पाहुडिग' कहा जाता है। अथवा मुनिके आनेके अनुरोधसे घरका संस्कार करनेका जो समय नियत किया था उस समयसे पूर्व ससार करना पाडूडिग दोष है। जिस घरमे बहुत अन्धकार रहता है उसमें मुनियोके लिए बहुत प्रकाश लानेके उद्देशसे दीवारमे छेद करना, लकड़ीका पटिया हटाना, दीपक रखना पादुकारदोष है। खरीदा हुआ दो प्रकारका होता है द्रव्यक्रत और भावक्रत। सचेतन गाय बैल वगैरह देकर मुनिके लिए खरीदा गया अथवा अचित्त घी गुड खाँड़ आदि देकर खरीदा गया घर द्रव्यक्रत है। विद्या मंत्र आदि देकर खरीदा गया घर भावक्रत है। बिना व्याजका अथवा व्याज पर थोडा सा ऋण लेकर मुनियोके लिए लिया गया घर पामिच्छ कहा जाता है। आप मेरे घरमें रहे, अपना घर यतियोको देदें इस प्रकार ग्रहण किया घर परियट्ट कहाता है। अपनी दीवार आदिके (?) लिए जो तैयार था उसे मुनिके लिए लाना अभ्यहिड कहाता है। उसके दो भेद हैं आचरित और अनाचरित। जो दूर देशमे या अन्य ग्रामसे लाया गया वह अनाचरित है शेष आचरित है। जो घर इट आदिसे, मिट्टीके ढेलेसे, बाड़से, कपाटसे या पत्थरसे ढका है इनको हटाकर दिया गया वह घर उद्भिन्न दोषसे युक्त है। सीढ़ी वगैरहसे ऊपर चढकर 'यहाँ आओ, आपकी यह वसति है' इस प्रकारसे जो दूसरे या तीसरे खण्डकी भूमि दी जाती है उसे मालारोहण कहते है। राजा मंत्री आदिके द्वारा भय दिखलाकर जो दूसरेकी वसति दी जाती है। वह अच्छेज्ज है। अनिसृष्टके दो भेद है। घरके स्वामीके द्वारा जो नियुक्त नही है ऐसे व्यक्तिके द्वारा जो वसति दी जाये वह अनिसृष्ट है। और जो पराधीन बालक स्वामीके द्वारा दी जाए वह भी अनिसृष्ट है। ये उद्गमदोष कहे।

उत्पादन दोष कहते है—धायके पाँच काम हैं—कोई बालकको नहलाती है। कोई उसे

यति, भूषयति, क्रीडयति, आशयति स्वापयति वा। वसत्यर्थमेवोत्पादिता वसतिर्धात्रीदोषदुष्टा। ग्रामान्तरान्नगरान्तराद्देशाद्देशान्तरात्तो वा संबन्धिना वार्तामभिधायोत्पादिता दूतकर्मोत्पादिता। अंग, स्वरो, व्यञ्जनं, लक्षणं, छिन्नं, भौमं, स्वप्नोऽन्तरिक्षमिति एवंभूतनिमित्तोपदेशेन लब्धा वसतिर्निमित्तदोषदुष्टा। आत्मनो जाति, कुलं, ऐश्वर्यं वाभिधाय स्वमाहात्म्यप्रकटनेनोत्पादिता वसतिराजीवशब्देनोच्यते। भगवन्सर्वेषां आहारदानाद्वसतिदानाच्च पुण्यं किमु महदुपजायते इति पृष्टो न भवतीत्युक्ते गृहिजन प्रतिकूलवचनरुष्टो वसतिं न प्रयच्छेदिति एवमिति तदनुकूलमुक्त्वा योत्पादिता सा वणिगवा शब्देनोच्यते। अष्टविधया चिकित्सया लब्धा चिकित्सोत्पादिता। क्रोधोत्पादिता च। गच्छतामागच्छतां च यतीनां भवदीयमेव गृहमाश्रय इतीय वार्ता दूरादेवास्माभिः श्रुतेति पूर्वं स्तुत्वा या लब्धा, वसनोत्तरकालं च गच्छन्प्रशंसां करोति पुनरपि वसतिं लप्स्ये इति। एवं उत्पादिता सस्तवदोषदुष्टा। विद्यया, मन्त्रेण, चूर्णप्रयोगेण वा गृहिणं वशे स्थापयित्वा लब्धा, मूलकर्मणा वा भिन्नकन्यायोनिसंस्थापना मूलकर्म। विरक्तानां अनुरागजननं वा। उत्पादनाख्योऽभिहितो दोषः षोडशप्रकारः।

अथ एषणादोषान्दश प्राह—

किमियं योग्या वसतिर्नेति शङ्किता। तदानीमेव सिक्ता सत्यालिप्ता सती वा छिद्रस्रुतजलप्रवाहेण वा, जलभाजनलोठनेन वा तदानीमेव लिप्ता वा म्रक्षितेत्युच्यते। सचित्तपृथिव्या अपां, [1]वायो हरितानां, बीजानां

भूषण पहिनाती हैं। कोई खेल खिलाती है, कोई भोजन कराती है, कोई सुलाती है, इनमेंसे कोई एक कर्म करके प्राप्त की गई वसति धात्रीदोषसे दूषित है। अन्य ग्राम, अन्य नगर या देशान्तमें रहनेवाले सम्बन्धियोंकी कुशलवार्ता कहकर प्राप्त की गई वसति दूतकर्मके द्वारा उत्पादित होनेसे दूतकर्म दोषसे दुष्ट है। अंग, स्वर, व्यञ्जन, लक्षण, छिन्न, भौम, स्वप्न और अन्तरिक्ष, इस प्रकार निमित्तोंके उपदेशसे—गृहस्थोंको शुभाशुभ बतलाकर प्राप्त की गई वसति निमित्त नामक दोषसे दुष्ट है। अपनी जाति, कुल अथवा ऐश्वर्यको कहकर अपना बड़प्पन प्रकट करके प्राप्त की गई वसति आजीव शब्दसे कही जाती है। भगवन्! सबको आहार देने और वसति देनेसे क्या महान् पुण्य होता है? ऐसा गृहस्थ पूछे तो, 'नहीं होता' ऐसा कहनेपर गृहस्थ प्रतिकूल वचनसे रुष्ट होकर वसति नहीं देगा' इस विचारसे उनके अनुकूल कहकर प्राप्त की गई वसति 'वणिगवा' शब्दसे कही जाती है। आठ प्रकारकी चिकित्साके द्वारा प्राप्त की गई वसति चिकित्सा दोषसे दुष्ट है। क्रोधादिके द्वारा प्राप्त की गई वसति क्रोध आदि दोषसे दुष्ट है। आने जानेवाले यात्रियोंके लिए आपका ही घर आश्रय है यह बात हमने दूर देशसे ही सुनी है, इस प्रकार पहले स्तुति करके प्राप्त की गई अथवा निवास करनेके पश्चात् जाते समय प्रशंसा करना कि पुनः आनेपर वसति प्राप्त हो तो वह संस्तव दोषसे दुष्ट है। विद्या, मन्त्र या चूर्णके प्रयोगसे गृहस्थको वशमें करके प्राप्त की गई वसति विद्यादोष, मत्रदोष और चूर्णदोषसे दुष्ट है, मूलकर्मके द्वारा प्राप्त की गई अथवा विरागियोंको राग उत्पन्न करके प्राप्त हुई वसति मूलकर्म दोषसे दुष्ट है।

उत्पादन नामक सोलह प्रकारका दोष कहा।

दस एषणा दोष कहते हैं—

यह वसति योग्य है या नहीं, ऐसी शंका करना शंकित दोष है। जो वसति तत्काल ही सींची गई या लीपी गई है अथवा छिद्रसे बहनेवाले जलके प्रवाहसे या जलपात्रके लुढ़कानेसे

१. वाल्या आ०। अपां हरि-मु०।

त्रसानां उपरि स्थापिते पीठफलकादिकं अत्र शय्या कर्तव्येति या दीयते वसति सा निक्षिप्तेत्युच्यते। हरितकंटकसचित्तमृत्तिकापिधानमाकृष्य या दीयते सा पिहिता। काष्ठचेलकण्टकप्रावरणाद्याकर्षणं कुर्वता पुरोयायिनोपदर्शिता वसतिः साहारणशब्देनोच्यते। मृतजातसूतकयुक्तगृहिजनेन, मत्तेन, व्याधितेन, नपुंसकेन, पिशाचगृहीतेन, नग्नया वा दीयमाना वसतिर्दायकदुष्टा। स्थावरैः पृथिव्यादिभिः त्रसैः पिपीलिकामत्कुणादिभिः सहितोन्मिश्रा। वितस्तिमात्राया भूमेरधिकाया अपि भुवो ग्रहणं प्रमाणातिरेकदोषः। शीतवातातपाद्युपद्रवसहिता वसतिरियमिति निन्दां कुर्वतो वसनं धूमदोषः। निर्वाता, विशाला, नात्युष्णा शोभनेयमिति तत्रानुरागः इङ्गाल इत्युच्यते। एवमेतैरुद्गमादिदोषैरनुपहता वसतिः शुद्धा तस्या। 'अपरिकम्माए' दुःप्रमार्जनादिसंस्काररहितायाः। 'असंसत्ताए' जीवसंभवरहितायाः। 'णिप्पाहुडियाए' शय्यारहितायाः। सेज्जाए वसतौ। अन्तर्बहिर्वा वसइ वसति। यतिर्विविक्तशय्यासनरत ॥२३२॥

अथ का विविक्ता वसतिरित्यत्राह—

सुण्णघरगिरिगुहारुक्खमूलआगंतुगारदेवकुले।
अकदप्पब्भारारामघरादीणि य विवित्ताइं ॥२३३॥

शून्य गृहं, गिरेर्गुहा, वृक्षमूलं, आगन्तुकानां वेश्म, देवकुलं, शिक्षागृहं केनचिदकृतं अकृतप्राग्भार-

---

उसी समय लीपी गई है उसे म्रक्षित कहते हैं। सचित पृथिवी, वायु, जल हरे बीज, और त्रसजीवोंके ऊपर स्थापित पीठ, काष्ठफलक आदिको यहाँ शय्या करें ऐसा कहकर जो वसति दी जाती है उसे निक्षिप्त कहते है। हरित काँटे, सचित्त मिट्टीके आवरणको हटाकर जो वसति दी जाती है वह पिहित दोषसे युक्त है। काष्ट, वस्त्र, कण्टकके आवरण आदिका खीचते हुए आगे आनेवाले मनुष्यके द्वारा दिखलाई गई वसति साधारण शब्दसे कही जाती है। जिसे मरण अथवा जननका शौच लगा है ऐसे गृहस्थके द्वारा या मत्त, रोगी, नपुंसक, जिसे पिशाचने पकडा हुआ है या बालिकाके द्वारा दी गई वसत्ति दायक दोषसे दूषित है। स्थावर पृथिवी आदि, त्रस चींटी खटमल आदिसे सहित वसति उन्मिश्रा है। जितने बालिश्त प्रमाणभूमि साधुका चाहिए उससे एक बालिश्त भूमि भी अधिक लेना प्रमाणातिरेक नामक दोप है। यह वसति शीतवायु, धूप आदि उपद्रववाली है ऐसी निन्दा करते हुए भी उसी वसतिमे रहना धूमदोष है। यह वसति विशाल है इसमें हवा नही आती, अधिक गर्म भी नही है, सुन्दर है इस प्रकार उससे अनुराग करना इंगाल दोष है। वसति इन दोषोंसे रहित होनी चाहिए ॥२३२॥

विशेषार्थ—साधुको देने योग्य आहार, औषध, वसति, सस्तर, उपकरण आदि दाताकी जिन मार्गविरुद्ध क्रियाओंसे उत्पन्न होते है वे उद्गम आदि सोलह दोष है। और मार्गविरुद्ध जिन क्रियाओंसे भोजन आदि बनाये जाते हैं वे सोलह उत्पादन दोष है। ये बत्तीस भी आधाकर्मरूप होनेसे दोष कहे जाते हैं। यतिके भोजन आदिके लिए छहकायके जीवोंको बाधा देना अथवा ऐसे कारणसे उत्पन्न भोजन आदि आधाकर्म कहे जाते है। एषणादोष दस है। मूलाचारमें इन दोषोंका कथन है।

विविक्त वसति कौन है यह कहते हैं—

टी०—शून्य घर, पहाड़की गुफा, वृक्षका मूल, आनेवालोंके लिए बनाया घर, देवकुल,

शालेत्युच्यते । आरामगृहं क्रीडार्थमायातानां आवासाय कृतं । एता विविक्ता वसतयः ॥२३३॥

अत्र वसने दोषाभावमाचष्टे—

कलहो बोलो झंझा वामोहो संकरो ममत्तिं च ।
ज्झाणाज्झयणविघादो णत्थि विवित्ताए वसधीए ॥२३४॥

'**कलहो बोलो**' । ममेयं वसतिस्तवेयं वसतिरिति कलहो न केनचित् अन्यजनरहितत्वात् । '**बोलो**' शब्दबहुलता । '**झंझा**' संक्लेशो । '**वामोहो**' वैचित्यं । '**संकरो**' अयोग्यैरसंयतैः सह मिश्रणं । '**ममत्वं च**' ममेदंभावश्च । '**णत्थि**' नास्ति । '**ज्झाणज्झयणविघादो**' ध्यानस्याध्ययनस्य च व्याघातः । उक्तः कलहादिर्न विद्यते । क्व ? '**विवित्ताए वसधीए**' विविक्ताया वसतौ । एकस्मिन्प्रमेये निरुद्धज्ञानसततिर्ध्यानं । अनेकप्रमेयसंचारी स्वाध्यायः ॥२३४॥

इय सल्लीणमुवगदो सुहप्पवत्तेहिं तत्थ जोएहिं ।
पंचसमिदो तिगुत्तो आदट्ठपरायणो होदि ॥२३५॥

'**इय**' एवं । '**सल्लीणं**' एकात्मता '**उवगदो**' उपगतः । केन ? '**जोएहिं**' योगैः तपोभिर्ध्यानैर्वा । **सुहप्पवत्तेहिं** सुखप्रवृत्तैः सुखेनाक्लेशेन प्रवृत्तैः । '**पंचसमिदो**' समितिपंचकोपेतः । '**तिगुत्तो**' कृताशुभमनोवाक्कायनिरोधः । '**आदट्ठपरायणो होदि**' आत्मप्रयोजनपरो भवति । एतेन कथ्यते—विविक्तवसतिस्थायी यतिनिष्प्रतिद्वन्द्वध्यानैः शुभैस्तपोभिर्वा स्वास्थ्यमुपगतः संवरं निर्जरां च स्वप्रयोजनं संपादयति इति ॥२३५॥

संवरपूर्विका निर्जरा स्तोतुमाह—

जं णिज्जरेदि कम्मं असंवुडो सुमहदावि कालेण ।
तं संवुडो तवस्सी खवेदि अंतोमुहुत्तेण ॥२३६॥

शिक्षाघर, किसीके द्वारा न बनाया गया स्थान, आरामघर—क्रीड़ाके लिए आये हुओंके आवासके लिये जो बनाया गया है ये सब विविक्त वसतियाँ हैं ॥२३३॥

इनमे रहनेमे कोई दोष नही है, यह कहते हैं—

गा०—विविक्त वसतिमे कलह, शब्द बहुलता, संक्लेश, चित्तका व्यामोह, अयोग्य असंयमियोंके साथ सम्बन्ध, यह मेरी है ऐसा भाव, तथा ध्यान और अध्ययनमे व्याघात नही है ॥२३४॥

टी०—विविक्त वसतिमें यह मेरी वसति है यह तेरी वसति है इस प्रकार कलह नही होना क्योंकि वहाँ अन्य लोग नही होते । इसीसे ऊपर कहे अन्य दोष भी नहीं होते । ध्यान अध्ययनमे बाधा नही होती । एक पदार्थमें ज्ञानसन्ततिके निरोधको ध्यान कहते है और अनेक पदार्थोंमें संचारको स्वाध्याय कहते हैं ॥२३४॥

गा०—इस प्रकार विविक्त वसतिमे निवास करनेसे विना क्लेशके सुखसे होनेवाले तप अथवा ध्यानके द्वारा बाह्यतपमें एकात्मताको प्राप्त यति पाँच समितियोसे युक्त हुआ अशुभ मन वचनकायका निरोध करके आत्माके कार्यमें तत्पर होता है ॥२३५॥

टी०—यहाँ कहा है कि विविक्त वसतिमें रहनेवाला यति निर्विघ्न ध्यानके द्वारा अथवा शुभतपके द्वारा स्वास्थ्यको प्राप्त होकर संवर और निर्जरारूप अपने प्रयोजनको करता है ॥२३५॥

'जं णिज्जरेदि कम्मं' यत्कर्म निर्जरयति तपसा बाह्येन । कः ? 'असंवुडो' असंवृतः अशुभयोगनिरोधरहितः । 'सुमहदावि कालेण' सुष्ठु महता कालेनापि । 'तं' तत्कर्म 'खवेदि' क्षपयति । 'अंतोमुहुत्तेण' अतिस्वल्पेन कालेन । कः ? 'संवुडो' संवृतः गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयपरिणतः । 'तवस्सी' तपस्वी अनशनादिमान् ॥२३६॥

एवमवलायमाणो भावेमाणो तवेण एदेण ।
दोसेणिग्घादंतो पग्गहिददरं परक्कमदि ॥२३७॥

एवमुक्तेन क्रमेण एतेन । 'तवेण भावेमाणो' तपसा भावयन्नात्मानमुक्ततः । 'अवलायमाणो' अपलायमानः । कुतो दुर्धरात्तपसः । एवमवलोयमाणो इति क्वचित्पाठः । तत्रायमर्थः—किल एवमेदेण तवेण भावेमाणो इति पदसंबन्धः । एवमेतेन तपसा भावयमानः अपलोयमाणो द्रव्यकर्म विनाशयन् इति । तदयुक्तं - अशब्दार्थत्वात् । 'दोसे' दूषयति रत्नत्रयमिति दोषाः अशुभपरिणामाः तान् घातयन् । 'पग्गहिददरं' नितरां । 'परक्कमदि' चेष्टते मुक्तिमार्गे ॥२३७॥

यतिना निर्जरार्थिना एवंभूतं तपोऽनुष्ठेय इति कथयति ।

सो णाम बाहिरतवो जेण मणो दुक्कडं ण उट्ठेदि ।
जेण य सड्ढा जायदि जेण य जोगा ण हायंति ॥२३८॥

'सो णाम बाहिरतवो' तन्नाम बाह्यं तपः । किं ? 'जेण मणो दुक्कडं ण उट्ठेदि' येन तपसा क्रियमाणेन मनो दुष्कृतं प्रति नोत्तिष्ठते । 'जेण य सड्ढा जायदि' येन च क्रियमाणेन तपसा तपस्यभ्यन्तरे श्रद्धा जायते । 'जेण य जोगा ण हायंति' येन च क्रियमाणेन पूर्वगृहीता योगा न हीयन्ते । तत्तथाभूतं तपोऽनुष्ठेयमिति यावत् ॥२३८॥

संवरपूर्वक निर्जराकी प्रशंसा करते हैं—

गा०—असवृत्त अर्थात् अशुभयोगका निरोध न करनेवाला यति महान् कालके द्वारा भी जिस कर्मकी बाह्य तपके द्वारा निर्जरा नही करता उस कर्मको सवृत् अर्थात् गुप्ति, समिति, धर्म, अनुप्रेक्षा और परीषहजयको करनेवाला तपस्वी अति स्वल्पकालमे क्षय करता है ।।२३६॥

गा०—उक्तक्रमसे इस तपसे अपनेको तत्पर करता हुआ दुर्धरतपसे न डरकर रत्नत्रयको दूषित करनेवाले अशुभ परिणामोंको घातता है और अत्यन्त मुक्तिके मार्गमें चेष्टा करता है ॥२३७॥

टी०—कहींपर 'एवमवलोयमाणो' ऐसा पाठ है । 'एदेण तवेण भावेमाणो' पदके साथ उसका सम्बन्ध करके ऐसा अर्थ करते है—इस प्रकार इस तपसे भावना करता हुआ 'अपलोयमाण' अर्थात् द्रव्यकर्मका विनाश करता है । यह युक्त नही है क्योकि यह शब्दार्थ नही है ॥२३७॥

निर्जराके इच्छुक यतिको इस प्रकार तप करना चाहिए, यह कहते हैं—

गा०—उसीका नाम बाह्य तप है, जिस तपके करनेसे मन पापकी ओर नहीं जाता । और जिस तपके करनेसे अभ्यन्तर तपमें श्रद्धा उत्पन्न हो और जिसके करनेसे पूर्वमें गृहीत योग-व्रत विशेष हीन नहीं होते । इस प्रकारका तप करना चाहिए ॥२३८॥

बाहिरतवेण होदि हु सव्वा सुहसीलदा परिच्चत्ता ।
सल्लिहिदं च सरीरं ठविदो अप्पा य संवेगे ॥२३९॥

बाह्यतपोऽनुष्ठाने गुणं कथयत्युत्तरैः सूत्रैः । **'बाहिरतवेण'** बाह्येन तपसा हेतुभूतेन । **'सव्वा सुहसीलदा परिचत्ता होदि'** सर्वा सुखशीलता परित्यक्ता भवति । सुखभावना राग जनयति । रागः स्वयं च कर्मबंधहेतु-दोषं आनयति । बधः कर्मस्थितिहेतु सैवम र्था निरस्ता भवति इति मन्यते । **'सल्लिहिदं च सरीरं'** भवति । शरीरं दुःखनिमित्त तत्त्यक्तुकामस्य तनूकरणमुपायः तदनुष्ठित भवतीति यावत् । **'ठविदो'** स्थापित. । **'आदा य'** स्वयं च, **'संवेगे'** समारभीरुतायां । ननु च संसारभीरुता हेतुस्तपसो न तपो हेतुस्तस्याः, ततोऽयुक्तमभाणि सूत्रकारेण बाह्येन तपसा संवेगे स्थापितः । लोकेनायं संविग्नचित्त इति स्थाप्यते बाह्ये तपसि वर्तमानस्ततो युक्तमुच्यते ॥२३९॥

दंताणि इंदियाणि य समाधिजोगा य फासिदा होंति ।
अणिगूहिदवीरियओ जीविदतण्हा य वोच्छिण्णा ॥२४०॥

दंताणि दान्तानि **'इंदियाणिय'** इन्द्रियाणि च । **होंति'** भवन्ति । अनशनावमोदर्यवृत्तिपरिसंख्यानेन जिह्वा दान्ता भवति इति । विविक्तशय्यासनेन इतराणि इन्द्रियाणि दान्तानि भवन्ति । मनोज्ञेन्द्रियविषयरहि-ताया वसतावस्थानान्नानि निगृहीतानि भवन्ति । **समाधिजोगा य फासिदा होंति** रत्नत्रयैकाग्र्यं समाधि. । समाधिषु योगा समाधियोगा. । योगा. सम्बन्धास्ते च **'फासिदा होंति'** स्पृष्टा भवन्ति । रत्नत्रयसमाधान-सम्बन्धा स्पृष्टा भवन्ति । अशनादिक त्यजता विषयरागो निरस्तो भवति । विषयरागव्याकुलो हि रत्नत्रये न घटते । असति तस्मिन्व्याकुलोऽशुभपरिणामैकमुखो भवति इति मन्यते । **'अणिगूहिदवीरियदा'** अनिगूढवीर्यता

आगेकी गाथासे बाह्यतपको करनेके गुण कहते हैं—

गा०-टी०—बाह्य तपसे सब सुख शीलता छूट जाती है। क्योंकि सुख शीलता रागको उत्पन्न करती है। राग-रागको बढाता है और कर्मबन्धके कारण दोषोको लाता है। बन्ध-कर्मकी स्थितिमें हेतु है। इस तरह बाह्य तपसे अनर्थ करनेवाली यह सुखशीलता नष्ट होती है। शरीर दु:खका कारण है। उसको छोडनेका उपाय है शरीरको कृश करना। बाह्य तपसे शरीर कृश होता है और स्वयं आत्मा ससारसे भीरुतामें स्थापित होती है।

शंका—न तो संसारसे भीरुता तपका हेतु है और न तप संसारसे भीरुताका हेतु है अतः ग्रन्थकारने यह अयुक्त कहा है कि बाह्य तपसे संवेगमें स्थापित होता है ?

समाधान—जो बाह्य तप करता है उसे लोग मानते हैं कि इसका चित संसारसे विरक्त है। अतः ग्रन्थकारका कथन युक्त है ॥२३९॥

गा०-टी०—इन्द्रियाँ दान्त होती हैं। अनशन, अवमौदर्य और वृत्ति परिसंख्यान तप करनेसे जिह्वा दान्त होती है। विविक्त शय्यासन तपसे शेष इन्द्रियाँ दान्त होती हैं। जहाँ इन्द्रियोंको प्रिय लगनेवाले विषय नहीं हैं ऐसी वसतिमें रहनेसे इन्द्रियोंका निग्रह होता है। रत्नत्रयमें एकाग्रताको समाधि कहते हैं। समाधिमें योग अर्थात् सम्बन्ध स्पष्ट होते हैं। भोजन आदिका त्याग करनेसे विषयोंसे राग नहीं रहता। जो विषयरागसे सताया हुआ है वह रत्नत्रयमें नही लगता। रत्न-

---

१. सैवमर्थ नि—आ० । सैवमर्थान्नि—मु० ।

च भवति । वीर्याचारे प्रवृत्तश्च भवति । ' **'जीविदतण्हा य'** या जीविते तृष्णा च **'वोच्छिण्णा'** व्युच्छित्ति गता । न हि जीविताशावान् अशनादिकं त्यक्तुमीहते । जीविते तृष्णावान्यत्किंचित्कृत्वा असंयमादिकं प्राणानेव धारयितुमुद्यतो भवति न रत्नत्रये ॥२४०॥

दुक्खं च भाविदं होदि अप्पडिबद्धो य देहरससुक्खे ।
मुसमूरिदा कसाया विसएसु अणायरो होदि ॥२४१॥

'दुःखं च भावियं होइ' दुःखं च भावितं भवति । दुःखभावना च कथमुपयोगिनी असंक्लेशेन दुःखसहने कर्मनिर्जरा जायते । क्रमेण च आयमाना निर्जरा निरवशेषकर्मापायस्योपाय इत्येवमुपयोगिनी इति मन्यते । अपि चासकृद्भावितदुःखो निश्चलो भवति[1] ध्याने । **'अप्पडिबद्धो य होइ'** अप्रतिबद्धश्च भवति । **'देहरससोक्खे'** शरीररससौख्ये । एतेषु त्रिषु प्रतिबद्धता समाधेर्विघ्न स निरस्तो भवतीति भाव' । **'मुसुमूरिदा कसाया'** उन्मृदिताः कषायाः भवन्ति । कथं अनशनादिना कषायनिग्रहः कृतो भवति ? क्षमामार्दवार्जवसन्तोषभावनादिप्रतिपक्षभूता विनाशयन्ति कषायान्नेतरदिति चेत् अयमभिप्रायः—अशनाद्यलाभे, स्वल्पलाभे, अशोभनाना वा लाभे क्रोधकषाय उत्पद्यते । तथा प्रचुरलाभाद्रमर्वाद्धक्षालाभाच्च लब्धिमानहमेवेति मानकषायः । अस्मदीयभिक्षागृहं यथान्ये न जानन्ति तथा प्रविशामीति चिन्ता मायाकषाय । अशने रसे प्राचुर्यविशिष्टे वासक्तिर्लोभकषाय. । तथा वसत्यप्रदाने कोप , तल्लाभे च मानकषाय. प्राग्वत् । अन्येऽप्यागच्छन्तीति न मम वस[2]तिरस्त्यवकाशो[3]वाऽत्रेति वचनान्मायाकषाय । अहमस्य स्वामीति लोभ । इत्थं

त्रयमें न लगनेसे व्याकुल होकर अशुभ परिणामोंमें ही लगता है । अपनी शक्तिको छिपाता नही है और वीर्याचारमें प्रवृत्त होता है । जीवनकी जो तृष्णा है वह भी नष्ट हो जाती है । जिसे जीनेकी तृष्णा है वह भोजनादिकका त्याग करना नही चाहता । जीवनकी तृष्णावाला जो कुछ भी असंयम आदि करके प्राणधारण करनेमे ही तत्पर रहता है, रत्नत्रयमें नही लगता ॥२४०॥

गा०—टी०—दु खका सहन होता है । बिना किसी सक्लेशके दु ख सहनेसे कर्मोंकी निर्जरा होती है । और क्रमसे होनेवाली निर्जरा समस्त कर्मोंके विनाशका उपाय है इसलिए दु.खभावना उपयोगी है । दूसरे, बार-बार दुःखकी भावना करने वाला ध्यानमे निश्चल होता है । शरीर, रस और सुखमें अप्रतिबद्ध—अनासक्त होता है । इन तीनोंमें आसक्ति समाधिमें विघ्न करती है । अतः उसका निरास होता है । कषायोंका मर्दन होता है ।

शंका—अनशन आदिसे कषायका निग्रह कैसे होता है ? कषायोकी विरोधी क्षमा, मार्दव, आर्जव, सन्तोष भावना आदि कषायोंको नष्ट करते हैं, अन्य नही ।

समाधान—अभिप्राय यह है कि भोजन आदि न मिलने पर, या कम मिलने पर अथवा अरुचिकर मिलने पर क्रोध कषाय उत्पन्न होती है । तथा प्रचुर लाभमे और स्वादयुक्त भिक्षाके लाभसे मैं 'लब्धि सम्पन्न हूँ' ऐसी मान कषाय उत्पन्न होती है । मेरे भिक्षा लेनेके घरको दूसरे न जान सकें इस तरह घरमें प्रवेश करूँ, यह चिन्ता माया कषाय है । रसीले अत्यधिक भोजनमें आसक्ति लोभ कषाय है । तथा वसति नहीं देने पर क्रोध और उसके मिलने पर मानकषाय होती है जैसा पहले भोजनके सम्बन्धमे कह आये हैं । दूसरे भी आने वाले हैं इस वसतिमें स्थान नहीं है

---

१. तीतिध्या—आ० मु० । २. वसतेर—आ० मु० । ३. वाऽत्र—आ० मु० ।

कषायनिमित्तवस्तुत्यागाच्च कषायाणामवसरः इति । 'विसएसु' विषयेषु स्पर्शनादिषु । 'अणादरो होइ' अनादरो भवति औदासीन्यं जायते । तदौदासीन्यात् तदादरनिमित्तकर्मसंवरो भवतीति भाव । अशनस्य हि [1]शुक्लादिरूपे मृदुस्पर्शे, सौगन्ध्ये, रसे चादरस्त्यक्तो भवति अशनं त्यजता । तथा क्षीरादिकमपि त्यजता क्षीरादिरूपेषु ॥२४१॥

कदजोगदादमणं आहारणिरासदा अगिद्धी य ।
लाभालाभे समदा तितिक्खणं बंभचेरस्स ॥२४२॥

'कदजोगदा' सर्वत्यागस्य पश्चाद्भाविन. योगश्च कृतो भवति बाह्येन तपसा । 'आदमणं' आत्मनो दमनं आहारे सुखे च योऽनुरागस्तस्य प्रशमनात् । 'आहारणिरासदा' आहारे नैराश्यं सम्पादितं प्रतिदिनं आहारगताशापरित्यागाभ्यासात् । सर्वत्यागकालेऽपि सुकरा भवत्याहारनिराशतेति भाव. । 'अगिद्धी य' अगृद्धिश्च अलंपटता च । क्व ? आहारे । न ह्याहारे गृद्धिमाल्लब्ध्वा तं त्यजति । लाभालाभे समदा लाभालाभयो समता । लाभे च मन्याहारस्य हर्षाकरणात् अलाभे च तथाऽकोपात् । य. स्वयमेव लब्धमपि त्यजति स कथमिव परेषामदाने दुर्मनीभवति । 'तितिक्खणं बंभचेरस्स' ब्रह्मचर्यं च सोढं भवति । रसवदाहारत्यागादभिनवेऽसति शुक्रसचये अनशने च सञ्चितप्रलये सति न स्त्रीष्वनुरागो भवति इति भावः । तथा गलितशुक्राणां पुंसां वैमुख्यं अगनासु प्रतीतमेव ॥२४२॥

ऐसा कहना माया कषाय है । मै इस वसतिका स्वामी हूँ यह लोभ कषाय है । इस तरह जो वस्तु कषायमे निमित्त हैं उनका त्याग करनेमे कषायका अवसर नही रहता । (विसएसु अणादरो होई) स्पर्शन आदि विषयोमें अनादर होता है अर्थात् उदासीनता होती है । विषयोमें उदासीनतासे विषयोंमें आदर भाव रखनेके निमित्तसे बन्धने वाले कर्मोका संवर होता है यह भाव है । भोजनके त्यागसे भोजनके शुक्ल आदि रूपमे, कोमल स्पर्शमें, सुगन्धमे अथवा रसमें आदरका त्याग हो जाता है । तथा दूध आदिका भी त्याग करनेसे दूध आदिके रूप रस आदिमे आदरका त्याग हो जाता है ॥२४१॥

गा०-टी०—'कद जोगदा'—बाह्य तपसे मरणकालमे जो सर्व आहारका त्याग करना होता है उसका अभ्यास होता है । 'आत्मदमण'—आहार और सुखमें जो अनुराग है उसका प्रशमन होनेसे आत्माका दमन होता है । आहारणिरासदा'—प्रतिदिन आहार सम्बन्धी आशाके त्यागके अभ्यामसे आहारके विषयमे निराशा सम्पन्न होती है । अभिप्राय यह है कि समस्त आहारका त्याग करने के कालमें भी आहार सम्बन्धी इच्छाका विनाश सुकर होता है । 'अगिद्धीय'—और आहारमें लंपटता नही रहती । जिसकी आहारमें गृद्धि है वह आहार पाकर उसे छोड़ नही सकता । 'लाभालामे समदा'—लाभ और अलाभमे समता रहती है । आहारका लाभ होने पर हर्ष नहीं करता और अलाभमें क्रोध नहीं करता । जो स्वयं भी प्राप्त आहारको छोड़ देता है वह दूसरोंके न देने पर अपना मन खराब कैसे कर सकता है । तितिक्खण बंभचेरस्स'—ब्रह्मचर्यको धारण करता है । रसीले आहारके त्यागसे नवीन वीर्यसंचय नही होता और अनशनसे संचितवीर्य क्षय होता है तब स्त्रीमें अनुराग नहीं होता । तथा जिन पुरुषोंमें वीर्यहीनता होती हैं उनके प्रति स्त्रियोंकी विमुखता प्रसिद्ध ही है ॥२४२॥

१. हि भक्तादिरूपे-आ० ।

णिद्दाजओ य दढझाणदा विमुत्ती य दप्पणिग्घादो ।
सज्झायजोगणिव्विग्घदा य सुहदुक्खसमदा य ॥२४३॥

'णिद्दाजओ य' निद्राजयश्च । प्रतिदिनमश्नतः रसवदाहारसेवापरस्य बहुभोजिनश्च निवाते सुखस्पर्शे निरुपद्रवे च देशे शयानस्य निद्रा महती जायते, यया परवशो निश्चेतन इव भवत्यशुभपरिणामप्रवाहे च पतति, न च रत्नत्रयेण घटयति, तस्या जयो । **'दढझाणदा'** दृढध्यानता च दुःखोपनिपाताच्चलति ध्यानाद् भावितदुःखो यतिः । कृततपोभावनस्तु क्षुदादिपरीषहोपनिपातेऽपि सहते । **'विमुत्ती य'** विमुक्तिर्विशिष्ट-त्याग अनशनादावुद्यतेन शरीरमेव त्यक्तं भवति तदेव दुस्त्यजं । **'दप्पणिग्घादो'** असयमकरणो यो दर्पस्तस्य निर्घातश्च कृतो भवति । **'सज्झायजोगणिव्विग्घदा य'** वाचनानुप्रेक्षाम्नायधर्मोपदेशैर्योगः संबन्धो यस्तस्य विघ्नाभावश्च । आहारार्थं भ्रमतः कथं स्वाध्याय क्रियते ? बहुभोजनश्च उत्तान स्वपिति आसितुमप्य-समर्थः । रसवदाहारभोजी आहारोष्मणा दह्यमान इतस्तत परावर्तते । अविविक्तायां वसतौ वर्तमानः परेषा वचः शृण्वस्तैः सह संभाषण कुर्वन्नाधीते । विविक्तदेशस्थायी पुनर्निर्व्याकुल स्वाध्याये घटते । **'सुह-दुःखसमदा य'** सुखेन हृष्यति दुःखेन दुष्यति इति रागद्वेषावन्तरेण सुखदुःखानुभव सुखदुःखसमता । अशन रसाश्च सुखसाधनभूतांस्त्यजता सुखे रागस्त्यक्तो भवति । क्षुदादिजनितवेदनोपनिपाते असंक्लेशात् दुःखे न च द्वेषोऽस्यास्तीति । **'बाहिरतवेण होदि हु'** इत्यनेन पञ्चसूत्र [1]निर्दिष्टानां प्रत्येकं संबन्ध ॥२४३॥

गा०—टी०—'णिद्दाजओय'—निद्राजय होता है। जो प्रतिदिन भोजन करता है, रसीले आहार के सेवनमें तत्पर रहता है, बहुत भोजन करता है, उसे वायुके प्रकोपसे रहित, सुखकारक स्पर्शवाले उपद्रवहीन देशमें सोने पर गहरी नींद आती है, जिसके अधीन होकर वह चेतनाहीन जैसा हो जाता है और अशुभ परिणामोंके प्रवाहमें गिर जाता है। वह रत्नत्रयमें नहीं लगता। उस निद्रा-का जय होता है। 'दढझाणदा' दृढ ध्यान होता है। जिस यतिको दुःख सहनेका अभ्यास नहीं होता, वह दुःख पड़ने पर ध्यानसे विचलित हो जाता है। किन्तु तपका अभ्यासी भूख आदि परी-षह आने पर सहता है। 'विमुत्तीय' विमुक्ति अर्थात् विशिष्ट त्याग करता है क्योंकि जो अनशन आदिमें तत्पर रहता है वह तो शरीर ही को छोड़ देता है और शरीर ही को छोड़ना कठिन होता है। 'दप्पणिघादो' —असयमको करने वाला जो दर्प है उसका भी पूरी तरहसे घात होता है। 'सज्झायजोगणिव्विग्घदाय'—वाचना, पृच्छना, अनुप्रेक्षा, आम्नाय और धर्मोपदेशके साथ जो सम्बन्ध है उसमें कोई विघ्न नहीं होता। आहारके लिए भ्रमण करने वाला साधु कैसे स्वाध्याय कर सकता है। बहुत भोजन करने वाला तो ऊपरको मुख करके सोता है बैठ भी नहीं सकता। रसीला आहार खाने वाला आहारकी ऊष्मासे इधर-उधर करवटे बदलता है। जो बहुजन संकुल वसतिमें रहता है वह दूसरोंकी बातें सुनकर उनके साथ बातचीत करता है, स्वाध्याय नहीं करता। किन्तु एकान्त स्थानमें रहने वाला व्याकुलता रहित होकर स्वाध्याय करता है। 'सुह-दुक्खसमदाय'—सुखसे हर्षित होना और दुःखसे दुःखी होना राग-द्वेष है। उनके बिना सुख-दुःख का अनुभव सुख-दुःख समता है। सुखके साधनभूत भोजन और रसोंको जो त्यागता है वह सुखमें रागको त्यागता है। भूख प्यासका कष्ट होने पर संक्लेश न होनेसे उसे दुःखमें द्वेष नहीं होता।

---

१. त्रीनिर्दि—अ० मु०।

आदा कुलं गणो पवयणं च सोभाविदं हवदि सव्वं ।
अलसत्तणं च विजढं कम्मं च विणिद्धुयं होदि ॥२४४॥

'आदा कुलं गणो पवयणं च सव्वं सोभाविद हवदित्ति' पदघटना । बाह्येन तपसा स्वय कुलमात्मनो, गणं, स्वशिष्यसन्तानस्य शोभामुपनीतो भवति । **'अलसत्तणं च'** अलसत्वं च । **'विजढं'** त्यक्तं भवति । दुर्धरतपःसमुद्योगात् **'कम्मं च विणिद्धुयं'** कर्म च संसारमूलं विशेषेण निर्धूतं भवति ॥२४४॥

बहुगाणं संवेगो जायदि सोमत्तणं च मिच्छाणं ।
मग्गो य दीविदो भगवदो य अणुपालिया आणा ॥२४५॥

'बहुगाणं' बहूना । **'संवेगो जायदि'** ससारभीरुता जायते । यथा सन्नद्धमेकं दृष्ट्वा नूनमत्र भयमस्ति किंचिदहमपि सन्नह्यामीति जन. प्रवर्तते । एव तपस्युद्यतमवलोक्य ससारभयादयमेव क्लिश्यति तदस्माकमप्य-निवारितमेवेति बिभेति । भीतश्च प्रतिक्रिया प्रारभते । **'सोमत्तणं च मिच्छाणं'** मिथ्यादृष्टीना सौम्यता सुमुखता वा जायते । दुर्द्धरमिदं महत्तपो यतीना इति प्रसन्ना भवंतीति यावत् । **'मग्गो य दीविदो'** मार्गश्च मुक्तेः प्रकाशितो भवति यतीना बाह्येन तपसा करणभूतेन । न तपसा विना कर्मणा निर्जराऽस्तीति **'भगवदो य अणुपालिदा आणा'** भगवत आज्ञा चानुपालिता भवति यतिना बाह्येन तपसा करणेन ॥२४५॥

देहस्स लाघवं संवेगो जायदि सोमत्तणं च मिच्छाणं ।
जवणाहारो संतोसदा य जहसंभवेण गुणा ॥२४६॥

'देहस्स लाघवं' शरीरस्य लाघवगुणो बाह्येन तपसा भवति । लघुशरीरस्य आवश्यकक्रिया. सुकरा भवन्ति । स्वाध्यायध्याने चाक्लेशसम्पाद्ये भवत । **'देहस्स लूहणं'** शरीरस्नेहविनाशन च गुण. । शरीरस्नेहादेव

उक्त पाँच गाथामे जो कुछ कहा है उसका सम्बन्ध 'बाह्यतपसे होता है' इस वाक्यके साथ लगाना चाहिए ॥२४३॥

टी०—बाह्य तपसे आत्मा, अपना कुल, गण, अपनी शिष्य परम्परा शोभित होती है । आलस्य छूट जाता है । और दुर्धर तप करनेसे संसारका मूल कर्म विशेषरूपसे नष्ट होता है ॥२४४॥

टी०—यतिके बाह्य तप करनेसे बहुतसे लोगोको ससारसे भय उत्पन्न होता है । अवश्य ही यहाँ कुछ भय है मैं भी तैयारी करता हूँ । इस प्रकार लोग तपमे प्रवृत्त होते है । तपमे उद्यत जनको देखकर 'यह संसारके भयसे इस प्रकारका कष्ट उठाता है । हम भी इससे बच नही सकते ऐसा मान ससारसे डरता है और डरकर उसका प्रतीकार करता है । तपस्वीको देखकर मिथ्या-दृष्टियोंमें भी सौम्यता आ जाती है । यतियोंका यह महान तप दुर्द्धर है इस प्रकार अपनी प्रस-न्नता प्रकट करते हैं । यतियोंके बाह्य तप करनेसे मुक्तिका मार्ग प्रकाशित होता है । क्योकि तपके बिना कर्मोंकी निर्जरा नही होती । और भगवान्की आज्ञाका अनुपालन होता है ॥२४५॥

टी०—बाह्य तपसे शरीरमें हलकापन आता है । जिसका शरीर हल्का होता है वह आवश्यक क्रियाओंको सरलतासे करता है । तथा स्वाध्याय और ध्यान बिना कष्टके होते है ।

मनोऽसंयमे प्रवर्तते। शरीरमेवानर्थहेतुरिति तपोऽपि न करोति। तेनाहितः शरीरस्नेहो विनाशितो भवति। 'उवसमो तहा परमो' तथा चोत्कृष्टस्चोपशमो भवति रागादेर्दुःकरे तपसि वर्तमानस्य। किं च मम रागेण उपद्रवकारिणा। सति रागे हि नवकर्मबन्धो जायते। चिरन्तनकर्मरसोपबृंहणं च। सति चेत्थं मदीयः क्लेशो निष्फलो भवेदिति मनःप्रणिधानादुपशमः। 'जवणाहारो' परिमिताहारता इति केचिदाचक्षते। तत्र च गुणो नीरोगतादिकमिति। तथा चाहुर्मिताशिनः षड्गुणा भजन्ते इति। अपरे शरीरस्थितिमात्रहेतुराहारः जवणाहारशब्द शरीरवाच्यः इति स्थिताः ॥२४६॥

एवमित्यादिनोपसंहरति—

एवं उग्गमउप्पादणेसणासुद्धभत्तपाणेण।
मिदलहुयविरसलुक्खेण य तवमेदं कुणदि णिच्चं ॥२४७॥

'एवमेदं तवो णिच्चं कुणदित्ति' पदघटना। 'एवं' व्यावर्णितरूपेण। 'एदं' एतत् बाह्य तपः। 'कुणदि' करोति। 'णिच्च' नित्यं। 'उग्गमउप्पादणेसणासुद्धभत्तपाणेण' उद्गमोपादनैषणादोषरहितेन, भक्तेन पानेन च। कीदृग्भूतेन ? *"मिदलहुगविरसलुक्खेण' परिमितेन लघुना, विरसेन, रूक्षेण। एवंभूत शुद्धमाहार भुक्त्वा* तपः [1]कुर्यान्नाशुद्धमिति भावः।

उल्लीणोल्लीणेहिं य अहवा एक्कंतवड्ढमाणेहिं।
सल्लिहइ मुणी देहं आहारविधिं पयणुगिंतो ॥२४८॥

'उल्लीणोल्लीणेहिं य' प्रवर्द्धमानेन हीयमानेन च तपसा चतुर्थषष्ठादिक्रमेणानशनतपोवृद्धिः। एकद्वि-

---

शरीरसे स्नेहका विनाश होता है यह भी एक गुण है। शरीरके स्नेहसे ही मनुष्य असंयमका आचरण करता है। शरीर ही अनर्थका कारण है। इसीके स्नेहवश मनुष्य तप नही करता। अतः तपसे अहितकारी शरीरस्नेहका नाश होता है। दुष्कर तप करनेवालेके रागादिका उत्कृष्ट उपशम होता है। वह मनमें विचारता है, इस उपद्रवकारी रागसे मुझे क्या ? रागके होनेपर नवीन कर्मका बन्ध होता है, और पूर्वबद्धकर्मोंमे रसकी वृद्धि होती है। ऐसा होनेपर मेरा कष्ट सहन निष्फल है। ऐसे विचारसे उपशम होता है। 'जवणाहारो'—इसका अर्थ कोई 'परिमित आहार' करते है। उसमे नीरोगता आदि गुण हैं। कहा है 'परिमित भोजनमे छह गुण होते हैं।' अन्य कुछ शरीरकी स्थितिमात्रमे हेतु जो आहार है वह जवणाहार है ऐसा कहते हैं ॥२४६॥

उक्त चर्चाका उपसहार करते है—

गा०—कहे अनुसार उद्गम, उत्पादन और एषणा दोषसे रहित भोजन और पानसे और परिमित, लघु, रसरहित और रूक्ष भाजन पानसे यह बाह्य तप नित्य यति करता है। इसका भाव है कि इस प्रकारका शुद्ध आहार खाकर तप करना चाहिए। अशुद्ध आहार करके नहीं ॥२४७॥

गा०—वर्द्धमान या हीयमान अनशन आदि तपोसे अथवा सर्वथा वर्द्धमान तपोंके द्वारा आहारकी विधिको अल्प करता हुआ मुनि शरीरको कृश करता है ॥२४८॥

टी० —चतुर्थ, षष्ठ आदिके क्रमसे अनशन तपकी वृद्धि होती है। एक दो आदि ग्रास कम

---

1. कुर्यान्नाशुद्ध–अ०। कुर्युः सुशुद्ध–आ०।

कवलादिम्यूनतया अवमोदर्यवृद्धिः । एकस्य रसस्य द्वयोस्त्रयाणामित्यादिना क्रमेण रसपरित्यागवृद्धि । एक-पाटकं, गृहसप्तकं, गृहत्रयं वा प्रविशामीति, भिक्षाग्रासपरिमाणन्यूनताकरणेन वा वृत्तिपरिसंख्यानवृद्धिः । दिवसे आतपनं कृत्वा रात्रौ प्रतिमावग्रहकरणमित्यादिना कायक्लेशवृद्धि । एवं श्रमे महति संजाते क्रमेण अनशनादीनां न्यूनताकरणं । **'अहवा'** अथवा । **'एयंतवड्ढमाणेहिं'** एकान्तेन वर्धमानै. तपोभि । **'सल्लिहइ'** संलिखति । **'मुणी'** मुनिः । **'देहं'** । **आहारविधि'** अशनादिविधि । **'वयणुगितो'** अल्पीकुर्वन् ।।२४८।।

प्रकारान्तरेण सल्लेखनोपायमाचष्टे—

अणुपुव्वेणाहारं संवट्ट तो य सल्लिहइ देहं ।
दिवसुग्गहिएण तवेण चावि सल्लेहणं कुणइ ।।२४९।।

'अणुपुव्वेण' क्रमेण । **आहारं संवट्ट तो य** आहारं न्यूनयित्वा । **सल्लिहइ देहं** तनूकरोति । **दिवसुग्गहिगेण तवेण चावि** एकैकदिन प्रतिगृहीतेन तपसा च, एकस्मिन्दिनेऽनशनं, एकस्मिन्दिने वृत्तिपरिसंख्यानं इति । **सल्लेहणं कुणइ** सल्लेखना करोति ।।२४९।।

विविहाहिं एसणाहिं य अवग्गहेहिं विविहेहिं उग्गेहिं ।
संजममविराहिंतो जहाबल सल्लिहइ देहं ।।२५०।।

'विविहाहिं' नानाप्रकारै । **'एसणाहिं य'** भोजनै रसवर्जितैरल्पै शुष्कैराचाम्लैर्वा । **'अवग्गहेहिं'** नानाप्रकारैरवग्रहै. । **'उग्गेहिं'** उग्रै । **'संजममविराधंतो'** संयम द्विप्रकारं अविनाशयन् । **'जहाबल'** स्वबलानतिवृत्त्या देह तनूकरोति ।।२५०।।

सदि आउगे सदि बले जाओ विविधाओ [1]भिक्खुपडिमाओ ।
ताओ वि ण बाधंते जहाबलं सल्लिहंतस्स ।।२५१।।

करनेसे अवमौदर्यकी वृद्धि होती है। एक रसका, फिर दो रसका, फिर तीन रसका, इत्यादि क्रमसे त्याग करनेसे रसपरित्यागकी वृद्धि होती है। मैं एक पाटकमे या सात घरमे या तीन घरमें प्रवेश करूँगा। अथवा भिक्षाके ग्रासोंका परिमाण कम करनेसे वृत्तिपरिसंख्यान तपकी वृद्धि होती है। दिनमे आतापन योग करके रात्रिमें प्रतिमा योग धारण करने आदिसे कायक्लेशकी वृद्धि होती है। इस प्रकार करनेसे महान् श्रम होनेपर क्रमसे अनशन आदिमे कमी करता है। या फिर बढ़ाता ही जाता है और आहारको कम करके मुनि शरीरको कृश करता है ।।२४८।।

प्रकारान्तरसे सल्लेखनाका उपाय कहते हैं—

गा०—क्रमसे आहारको कम करते हुए शरीरको कृश करता है। और एक एक दिन ग्रहण किये तपसे, एक दिन अनशन, एक दिन वृत्तिपरिसंख्यान इस प्रकार सल्लेखनाको करता है ।।२४९।।

गा०—नाना प्रकारके रस रहित भोजन, अल्प भोजन, सूखा भोजन, आचाम्ल भोजन आदिसे और नाना प्रकारके उग्र नियमोसे दोनों प्रकारके संयमोको नष्ट न करता हुआ यति अपने बलके अनुसार देहको कृश करता है ।।२५०।।

---

१. मासिय दुय तिय चउ पंच मास छम्मास सत्त मासी य ।
तिण्णेव सत्तराइं राइंदिय राइपडिमाओ ।।' —मूलाराधनादर्पणे ।

'सदि आउगे' आयुषि सति । **'सदि बले'** सति बले । **'जाओ'** याः **'विविहाओ'** विचित्राः । **'भिक्खु-पडिमाओ'** भिक्षुप्रतिमाः । **'ताओ वि'** ताश्च । **'ण बाधंते'** न पीडा जनयति महती । कस्य ? **'जहाबलं सल्लिहंतस्स'** यथाबलं तनूकुर्वतः बलमन्तरेण कुर्वतः प्रारब्धमहाक्लेशस्य योगभङ्ग संक्लेशश्च महान् जायते इति भावः ॥२५१॥

शरीरसल्लेखनाहेतुषु उपन्यस्तेषु के उत्कृष्टा इत्यत्राह—

सल्लेहणा सरीरे तवोगुणविधी अणेगहा भणिदा ।
आयंबिलं महेसी तत्थ दु उक्कस्सयं विंति ॥२५२॥

'सल्लेहणा शरीरे' शरीरसल्लेखनानिमित्त शरीरे सल्लेखना इत्युच्यते । **'तवोगुणविधी'** तपःसंज्ञितो गुणविकल्पः । **'अणेगहा भणिदा'** अनेकधा निरूपित. अतीतसूत्रे । **'तत्थ'** तत्र । **'महेसी'** महर्षय. । **'आयं-बिलं दु'** आचाम्लाशनमेव । **'उक्कस्सगं'** उत्कृष्टमिति । **'बेंति'** ब्रुवन्ति ॥२५२॥

टी०—आयुके होते हुए और बलके होते हुए अपनी शक्तिके अनुसार शरीरको कृश करने वाले यतिके जो विविध भिक्षु प्रतिमाएँ है, वे भी महान् कष्ट नही देती । जो शक्तिके बिना करता है उसे प्रारम्भ मे ही महान् क्लेश होनेसे योगका भग तथा महा सक्लेश परिणाम होते है ॥२५१॥

विशेषार्थ—आशाधरजीने एक गाथाके द्वारा उसका अर्थ करते हुए भिक्षु प्रतिमाओका कथन किया है जो इस प्रकार है—

आत्माकी सल्लेखना करने वाला, धैर्यशाली, महासत्त्वसे सम्पन्न, परीषहोका जेता, उत्तम सहननसे विशिष्ट, क्रमसे धर्मध्यान और शुक्ल ध्यानको पूर्ण करता हुआ मुनि जिस देशमे रहता है उस देशके लिये दुर्लभ आहारका व्रत ग्रहण करता है कि यदि एक मासमे ऐसा आहार मिला तो मैं भोजन करूँगा, अन्यथा नहीं करूँगा । उस मासके अन्तिम दिन वह प्रतिमा योग धारण करता है । यह एक भिक्षु प्रतिमा है । इस प्रकार पूर्वोक्त आहारसे सौगुने उत्कृष्ट अन्य-अन्य भोजन सम्बन्धी नियम लेता है । ये नियम दो, तीन, चार, पाँच, छं और सात मासको लेकर होते है । अर्थात् दो या तीन आदि सात मासमें ऐसा आहार मिलेगा तो आहार करूँगा । सर्वत्र नियमोंके अन्तिम दिन प्रतिमा योग धारण करता है । ये सात भिक्षु प्रतिमा है । पुनः पूर्व आहार से सौगुना उत्कृष्ट दुर्लभ अन्य-अन्य आहारका नियम सात-सात दिनका तीन बार ग्रहण करता है । अर्थात् सात दिनमें ऐसा मिला तो ग्रहण करूँगा । ये तीन भिक्षु प्रतिमा हैं । फिर रात दिन प्रतिमायोगसे स्थित रहकर पीछे रात्रि प्रतिमायोग धारण करता है । ये दो भिक्षु प्रतिमा हैं । इनके धारण करनेपर पहले अवधि मनःपर्यय ज्ञानको प्राप्त करनेके पीछे सूर्योदय होनेपर केवलज्ञानको प्राप्त करता है । इस तरह बारह भिक्षु प्रतिमायोगसे स्थित होकर पश्चात् रात्रि प्रतिमायोग धारण करता है ॥२५१॥

ऊपर जो शरीरकी सल्लेखनाके हेतु कहे हैं उनमें कौन उत्कष्ट हैं, यह कहते हैं—

गा०—शरीरकी सल्लेखनाके निमित्त अनेक प्रकार तप नामक गुणके विकल्प पूर्व गाथाओं के द्वारा कहे हैं । उनमेंसे महर्षि आचाम्लको ही उत्कृष्ट कहते हैं ॥२५२॥

---

१. शनाय च आ० । —शनाख्यं च मु० ।

शरीरसल्लेखनोपायोत्कृष्टमाचाम्लाशनमित्युक्तं तत्कीदृगिति चोदिते आह—

छट्ठट्ठमदसमदुवालसेहिं भत्तेहिं विदियअट्ठेहिं ।
मिदलहुग आहारं करेदि आयबिलं बहुसो ॥२५३॥

'**छट्ठट्ठमदसमदुवालसेहिं भत्तेहिं विदियअट्ठेहिं**' द्वित्रिचतुःपञ्चदिनोपवासैः उत्कृष्टैः । '**मिदलहुगं आहारं करेदि**' परिमितं लघ्वाहारं करोति । '**आयंबिलं**' आचाम्लं । '**बहुसो**' बहुशः ॥२५३॥

भक्तप्रत्याख्यानस्यास्य वर्ण्यमानस्य कियत्कालं इत्यत्रोत्तर—

उक्कस्सएण भत्तपइण्णाकालो जिणेहिं णिद्दिट्ठो ।
कालम्मि संपहुत्ते बारसवरिसाणि पुण्णाणि ॥२५४॥

'**उक्कस्सएण**' उत्कर्षेण । **भत्तपइण्णाकालो**' भक्तप्रत्याख्यानकाल. । '**जिणेहिं णिद्दिट्ठो**' जिनैर्निर्दिष्टः । '**कालम्मि**' काले । '**संपहुत्ते**' महति सति । '**बारसवरिसाणि**' सम्पूर्णद्वादशवर्षमात्रान् ॥२५४॥

उक्तेषु द्वादशवर्षेषु एवं कर्तव्यमिति क्रमं सल्लेखनाय दर्शयति—

जोगेहिं विचित्तेहिं दु खवेइ संवच्छराणि चत्तारि ।
वियडी णिज्जूहित्ता चत्तारि पुणो वि [1]सोसेदि ॥२५५॥

'**जोगेहिं**' कायक्लेशैः । '**विचित्तेहिं दु**' विचित्रैरनियतैः । '**खवेदि**' क्षपयति । '**संवच्छराणि चत्तारि**' वर्षचतुष्टयं । यत्किंचिद्भुक्त्वा । '**वियडी णिज्जूहित्ता**' रसादीन्क्षीरादीन्परित्यज्य । '**चत्तारि**' वर्षचतुष्टयं । '**पुणो वि**' पुनरपि । [2]'**सोसेदि**' तनूकरोति तनुम् ॥२५५॥

शरीरकी सल्लेखनाके उपायोंमे आचाम्लको उत्कृष्ट कहा, वह कैसा होता है, यह कहते हैं—

गा०—उत्कृष्ट दो दिन, तीन दिन, चार दिन और पाँच दिनके उपवासके बाद अधिकतर परिमित और लघु आहार आचाम्लको करते हैं ॥२५३॥

विशेषार्थ—'अदिविकट्ठेहि' के स्थानमे वियदि अट्ठेहि' पाठ भी मिलता है। उसका अर्थ 'विशेष अतिकष्ट' ऐसा होता है। इस गाथाका तात्पर्य यह है षष्ठ आदि उपवासोंसे सक्लेशको न प्राप्त होता यति मित और लघु कांजी का आहार प्रायः करता है। उसे सलेखनाके हेतुओमे उत्कृष्ट कहते हैं ॥२५३॥

जिस भक्त प्रत्याख्यानका वर्णन चल रहा है उसका काल कितना है ? इसका उत्तर देते है—

गा०—यदि आयुका काल अधिक शेष हो तो जिन भगवान्‌ने उत्कृष्टसे भक्त प्रत्याख्यानका काल पूर्ण बारह वर्ष कहा है ॥२५४॥

उक्त बारह वर्षमें ऐसा करना चाहिये, इस प्रकार सल्लेखनाका क्रम बतलाते है—

गा०—नाना प्रकारके कायक्लेशोंके द्वारा चार वर्ष बिताता है। दूध आदि रसोंको त्यागकर फिर भी चार वर्ष तक शरीरको सुखाता है ॥२५५॥

---

१. मोमेइ अ० । २. मोसेदि अ० ।

आयंबिलणिव्वियडीहिं दोण्णि आयबिलेण एक्कं च ।
अद्धं णादिविगट्ठेहिं अदो अद्धं विगट्ठेहिं ॥२५६॥

'**आयबिलणिव्वियडीहिं**' आचाम्लेन निर्विकृत्या च । '**दोण्णि**' वर्षद्वयं क्षपयति । '**आयंबिलेण**' आचाम्लेनैव । '**एक्कं च**' एकं वर्षं । '**अद्धं**' अवशिष्टस्य वर्षस्य षण्मासान् । '**णादिविगट्ठेहिं**' अत्यनुत्कृष्टैस्तपोभिः क्षपयति । '**अदो अद्धं विकट्ठेहिं**' अतः परं षण्मासान् उत्कृष्टैस्तपोभिः ॥२५६॥

व्यावर्णितेनैव क्रमेण आचरितव्यमिति नियोगो न विद्यते इत्याचष्टे—

भत्तं खेत्तं कालं धादुं च पडुच्च तह तवं कुज्जा ।
वादो पित्तो सिंभो व जहा खोभं ण उवयंति ॥२५७॥

'**भत्तं**' आहारं शाकबहुलं, रसबहुलं, कुल्माषप्रायं, निष्पावचणकादिमिश्रं, शाकव्यञ्जनादिरहितं वा । '**खेत्तं**' अनूपजाङ्गलसाधारणविकल्पं । '**कालं**' घर्मशीतसाधारणभेदं । धातुमात्मनः शरीरप्रकृतिं च । '**पडुच्च**' आश्रित्य । '**तह**' तथा । '**तवं कुज्जा**' तपः कुर्यात् '**जहा खोभं ण उवयंति**' । यथा क्षोभं नोपयान्ति । '**वादो पित्तो सिंभो वा**' वातपित्तश्लेष्मत्रिकं ॥२५७॥

शरीरसल्लेखनाक्रममभिधायाभ्यन्तरसल्लेखनाक्रममभिधातुं अभ्यन्तरसल्लेखनया सह सम्बन्धं कथयन्ति—

एव सरीरसल्लेहणाविहिं बहुविहा व फासेंतो ।
अज्झवसाणविसुद्धिं खणमवि खवओ ण मुंचेज्ज ॥२५८॥

'**एव**'मुक्तेन क्रमेण । '**शरीरसल्लेहणाविहिं**' नानाप्रकारं । '**फासेंतो वि**' स्पृशन्नपि । '**अज्झवसाण-**

गा०—आचाम्ल और निर्विकृतिके द्वारा दो वर्ष बिताता है। आचाम्लके द्वारा एक वर्ष बिताता है। मध्यम तपके द्वारा शेष वर्षके छह माह और उत्कृष्ट तपके द्वारा शेष छह मास बिताता है ॥२५६॥

विशेषार्थ—शेष चार वर्षोंमे से दो वर्ष काजी और रस व्यंजन आदिसे रहित भात वगैरह खाकर बिताता है। एक वर्ष केवल कांजी आहार लेता है। अन्तिम बारहवें वर्षके प्रथम छह महीनोंमे मध्यम तप करता है। अन्तिम छह महीनोमें उत्कृष्ट तप करता है ॥२५६॥

आगे कहते हैं कि ऊपर कहे क्रमके अनुसार ही आचरण करनेका नियम नही है—

गा०—आहार, क्षेत्र, काल अपनी शारीरिक प्रकृतिको विचार कर इस प्रकार तप करना चाहिये जिस प्रकार वात पित्त और कफ क्षोभको प्राप्त न हों ॥२५७॥

टी०—आहारके अनेक प्रकार है—शाक बहुल—जिसमे शाक ज्यादा है, रस बहुल—जिसमें घी दूध आदि रस अधिक हैं। कुल्माषप्राय—जिसमें कुलथी अधिक है। कच्चे चने आदि से मिला आहार और शाक व्यंजन आदिसे रहित आहार। क्षेत्र भी अनेक प्रकारके हैं जिसमे पानीकी प्रचुरता है, वर्षा अधिक होती है, कही वर्षा कम होती है। काल गर्मी सर्दी और साधारण होता है। इन सबका तथा अपनी प्रकृतिका विचार करके तप करना चाहिये जिससे स्वास्थ्य खराब न हो ॥२५७॥

शरीरकी सल्लेखनाका क्रम कहकर अभ्यन्तर सल्लेखनाका क्रम कहनेके लिये अभ्यन्तर सल्लेखनाके साथ सम्बन्ध कहते है—

गा०—उक्त क्रमसे नाना प्रकारकी शरीर सल्लेखनाकी विधिको करते हुए भी परिणामों

'विसुद्धिं' परिणामविशुद्धि । 'खवगो खणमवि ण मुंचेज्ज' क्षपक: क्षणमपि न त्यजेत् ॥२५८॥

अभ्यन्तरशुद्ध्यभावे दोषं कथयति—

अज्झवसाणविसुद्धीए वज्जिदा जे तवं विगट्ठंपि ।
कुव्वंति बहिल्लेस्सा ण होइ सा केवला सुद्धी ॥२५९॥

'अज्झवसाणविसुद्धीए वज्जिदा' अध्यवसानविशुद्धया वर्जिता: । 'जे' ये । 'तवं' तप: । 'विगट्ठंपि कुव्वंति' उत्कृष्टमपि कुर्वन्ति । 'बहिल्लेस्सा' बहिर्लेश्या: पूजासत्काराद्याहितचित्तवृत्तय: । 'ण होदि तेसिं केवला सुद्धी' दोषोन्मिश्रका भवतीति शुद्धिरिति यावत् ॥२५९॥

केवला शुद्धि: कस्य तर्हि भवतीत्याह—

अविगट्ठ पि तव जो करेइ सुविसुद्धसुक्कलेस्साओ ।
अज्झवसाणविसुद्धो सो पावदि केवल सुद्धिं ॥२६०॥

'अविकट्ठं वि' अनुत्कृष्टमपि तपो य करोति । सुविशुद्धशुक्ललेश्यासमन्वित: विशुद्धपरिणाम: स केवला शुद्धि प्राप्नोति इति गाथार्थ ॥२६०॥

प्रस्तुता द्वितीयां कषायसल्लेखनामुक्तयाध्यवसायविशुद्धया योजयति—

अज्झवसाणविसुद्धी कसायकलुसीकदस्स णत्थित्ति ।
अज्झवसाणविसुद्धी कसायसल्लेहणा भणिदा ॥२६१॥

'अज्झवसाणविसुद्धी' परिणामविशुद्धि । 'कसायकलुसीकदस्स' कषायै: कलुषीकृतस्य । 'णत्थि' नास्ति यस्मात् इति तस्मात् । 'अज्झवसाणविसुद्धी' परिणामविसुद्धि । 'कसायसल्लेहणा भणिया' कषायसल्लेखनेति गदिता ॥२६१॥

की विशुद्धिको क्षपक एक क्षणके लिये भी न छोडे ॥२५८॥

अभ्यन्तर शुद्धिके अभावमे दोष कहते है—

गा०—परिणामोकी विशुद्धिको छोडकर जो उत्कृष्ट भी तप करते हैं उनकी चित्तवृत्ति पूजा सत्कार आदिमे ही लगी होती है। उनके अशुभ कर्मके आस्रवसे रहित शुद्धि नही होती। अर्थात् दोषोसे मिली हुई शुद्धि होती है ॥२५९॥

तब केवल शुद्धि किसके होती है, यह कहते है—

गा०—जो अतिविशुद्ध शुक्ललेश्यासे युक्त और विशुद्ध परिणामवाला अनुत्कृष्ट भी तप करता है वह केवल शुद्धिको पाता है। यह गाथाका अर्थ है ॥२६०॥

प्रस्तुत दूसरी कषाय सल्लेखनाको उक्त अध्यवसान विशुद्धिसे जोड़ते है—

गा०—जिसका चित्त कषायसे दूषित है उसके परिणाम विशुद्धि नही होती। इसलिये परिणाम विशुद्धिको कषाय सल्लेखना कहा है ॥२६१॥

विशेषार्थ—जिस मुनिका चित्त क्रोधाग्निके द्वारा कलुषित है उस मुनिके परिणाम विशुद्ध नहीं हैं। अत: उसके कषाय सल्लेखना नही है। कषायके कृश करनेको कषाय सल्लेखना कहते हैं। और कषायके कृश हुए बिना परिणाम विशुद्ध नही होते। अत: परिणाम विशुद्धिके साथ कषाय सल्लेखना का साध्य साधन भाव सम्बन्ध है ॥२६१॥

शुभपरिणामप्रवाहवृत्तेन चतुष्कषायसल्लेखना कृता भवति इत्यभिधाय सामान्येन चतुर्णामपि कषायाणां तनूकरणे उपायं प्रतिपक्षपरिणामचतुष्कं कथयति—

कोध खमाए माणं च मद्दवेणाज्जवेण मायं च।
संतोसेण य लोहं जिणदु खु चत्तारि वि कसाए ॥२६२॥

कोधं क्षमयेत्यादिना कषायविनाशने उपायस्तदुत्पत्तित्यागः ॥२६२॥

उत्पद्यमानो हि कषायो वृद्धिमुपैतीति कथयति—

कोहस्स य माणस्स य मायालोभाण सो ण एदि वसं।
जो ताण कसायाणं उप्पत्तिं चेव वज्जेइ ॥२६३॥

'कोहस्स य' अत्रैवं पदघटना। **'जो तेसिं कसायाणमुप्पत्तिं चेव वज्जेदि'** यस्तेषां कषायाणामुत्पत्तिं एव परिहरति। **'कोहस्स य माणस्स य मायालोभाण सो ण एदि वसं'** क्रोधमानमायालोभानां स नोपैति वशं। यस्तेषामुत्पत्तिमपेक्षते स तद्वशगः कथं कषायसल्लेखना कुर्यादिति भावः ॥२६३॥

कषायोत्पत्तिं परिहर्तुमिच्छता किं कर्तव्यमित्यत आह—

तं वत्थुं मोत्तव्वं जं पडि उप्पज्जदे कसायग्गि।
तं वत्थुमल्लिएज्जो जत्थोवसमो कसायाणं ॥२६४॥

'तं वत्थुं मोत्तव्वं' तद्वस्तु मोक्तव्यं। **'जं पडि उप्पज्जदे'** यन्निमित्तं उत्पद्यते **'कसायग्गी'** कषायाग्निः। **'तं वत्थुमल्लिएज्जो'** तद्वस्तूपाश्रयणं कुर्यात्। **'जत्थ'** यत्रोपाश्रयणे। **'उवसमो कसायाणं'** कषायाणामुपशमो भवति ॥२६४॥

जइ कहवि कसायग्गी समुट्ठिदो होज्ज विज्झवेदव्वो।
रागद्दोसुप्पत्ती विज्झादि हु परिहरंतस्स ॥२६५॥

'जइ कहवि कसायग्गी' यदि कथंचित्कषायाग्निः। **'समुट्ठिदो होज्ज'** समुत्थितो भवेत्। **'विज्झवे-**

जो शुभ परिणामोंके प्रवाहमें बहता है वही चार कषायोंकी सल्लेखना करता है यह कहकर, सामान्य से चारों कषायों को कृश करनेका उपाय उनके प्रतिपक्षी चार प्रकारके परिणाम हैं, यह कहते हैं—

टी०—क्रोधको क्षमासे, मानको मार्दवसे माया को आर्जवसे और लोभको सन्तोषसे, इस प्रकार चारों ही कषायोंको जीतो ॥२६२॥

आगे कहते हैं कि उत्पन्न हुई कषाय बढती है—

टी०—जो उन कषायोंकी उत्पत्तिको ही रोक देता है वह मुनि क्रोध, मान, माया, लोभके वशमें नही होता ॥२६३॥

जो कषायकी उत्पत्तिसे बचना चाहता है उसे क्या करना चाहिए यह कहते हैं—

गा०—उस वस्तुको छोड़ देना चाहिए जिसको लेकर कषायरूपी आग उत्पन्न होती है। और उस वस्तुको अपनाना चाहिए जिसके अपनानेसे कषायोंका उपशम हो ॥२६४॥

गा०—यदि थोड़ी भी कसायरूप आग उठती हो तो उसे बुझा दे। जो कषायको दूर करता है उसके राग-द्वेषकी उत्पत्ति शान्त हो जाती है ॥२६५॥

टी०—नीच जनकी संगतिकी तरह कषाय हृदयको जलाती है। अशुभ अंगोपांग नामकर्म-

दव्वो' विध्यापयितव्यः । **'रागद्दोसुप्पत्ती'** रागद्वेषयोरुत्पत्तिं । **'विज्झादि हु'**[1] शाम्यत्येव । **'परिहरंतस्स'** परिहरतः । कषायाग्निः प्रशान्तिं नीयते । तद्दोषापेक्षणेन नीचजनसाङ्गत्यमिव हृदयं दहति, अशुभाङ्गोपाङ्ग-नामकर्मवद्विरूपाननं करोति । रज इव चक्षुषो रागमानयति । महासमीरण इव तनुं कम्पयति । सुरापानमिव यत्किंचिज्जिगदयति[2] । समीचीनज्ञानलोचनं मलिनयति । दर्शनवनमुत्पाटयति । चारित्रसरः शोषयति । तपः-पल्लवं भस्मयति । अशुभप्रकृतिलतां स्थिरयति । शुभकर्मफलं विरसयति । प्रत्यग्रमनोमलं ढौकयति । हृदयं कठिनयति । प्राणभृतो घातयति । भारतीमसत्यां प्रवर्तयति । गुरूनपि गुणान्लङ्घयति । यशोधनं नाशयति । परानपवादयति । महतोऽपि गुणान्स्थगयति । मैत्रीमुन्मूलयति । कृतमप्युपकारं विस्मारयति । अपकारमध्या-पयति । महति नरकगर्ते पातयति । दुःखावर्ते निमज्जयतीत्यनेकानर्थाविहत्वभावनया ॥२६५॥

रागद्वेषप्रशान्त्युपायकथनाय गाथा[3]—

जावंति केइ संगा उदीरया होंति रागदोसाणं ।
ते वज्जंतो जिणदि हु रागं दोसं च णिस्संगो ॥२६६॥

'जावंति केइ संगा' यावन्त केचन परिग्रहा । **'उदीरगा होंति रागदोसाणं'** उत्पादका भवन्ति राग-द्वेषयोः । **'ते वज्जंतो'** तान्परिग्रहान्निराकुर्वन् । **'जिणदि खु'** जयत्येव । **'रागं दोसं च'** रागद्वेषौ । **'णिस्संगो'** निःपरिग्रह. ॥२६६॥

के उदयसे जो मुख विरूप होता है वैसे ही कषायके उदयमें मनुष्यका मुख क्रोधसे विरूप हो जाता है। जैसे धूल पडनेसे आँख लाल हो जाती है उसी तरह क्रोधसे आँख लाल हो जाती है। जैसे महावायुसे शरीर काँपने लगता है वैसे ही क्रोधसे मनुष्य काँपने लगता है। जैसे शराबी शराब पीकर जो चाहे बकता है वैसे ही क्रोधमें मनुष्य जो चाहे बोल देता है। जैसे जिसपर भूतका प्रकोप होता है वह कुछ भी करता है वैसे ही क्रोधी मनुष्य जो चाहे करता है। कषाय समीचीन ज्ञानरूपी दृष्टिको मलिन कर देती है। सम्यग्दर्शनरूपी वनको उजाड देती है। चारित्र-रूपी सरोवरको सुखा देती है। तपरूपी पत्रोंको जला देती है। अशुभकर्मरूपी बेलकी जड़ जमा देती है। शुभकर्मके फलको रसहीन कर देती है। अच्छे मनको मलिन करती है। हृदयको कठोर बनाती है। प्राणियोंका घात करती है। वाणीको असत्यकी ओर ले जाती है। महान् गुणोका भी निरादर करती है। यशरूपी धनको नष्ट करती है। दूसरोंको दोष लगाती है। महापुरुषोंके भी गुणोंको ढाँकती है, मित्रताकी जड खोदती है। किये हुए भी उपकारको भुलाती है। महान् नरकके गढेमें गिराती है। दुःखोके भँवरमे फँसाती है। इस प्रकार कषाय अनेक अनर्थ करती है। ऐसी भावनासे कषायको शान्त करना चाहिए ॥२६५॥

आगे गाथाके द्वारा रागद्वेषकी शान्तिके उपाय कहते हैं—

गा०—जितने भी परिग्रह रागद्वेषको उत्पन्न करते हैं, उन परिग्रहोंको छोड़नेवाला अपरि-ग्रही साधु राग और द्वेषको निश्चयसे जीतता है ॥२६६॥

---

१. विज्झादिषु अ० । विज्झादिसु आ० । २. यति । आविष्टग्रह इव यत्किंचन कारयति समी—मु० ।
३. गाथार्थः, अ० ।

एवमुदयमुपयाति कषायाग्निः स चैवमपकारं करोत्येवं प्रशान्ति नेतव्य इत्येतद्गाथात्रयोदाहरणेनोच्यते—

पडिचोदणासहणवायखुभिदपडिवयणइंधणाइद्धो ।
चंडो हु कसायग्गी सहसा संपज्जलेज्जाहि ॥२६७॥

'पडिचोदणा' प्रतिचोदनायाः असहनमेव वातः तेन क्षुभितः, प्रतिवचनेन्धनैरिद्धः क्रूरः कषायाग्निः सहसा प्रज्वलति ॥२६७॥

जलिदो हु कसायग्गी चरित्तसारं डहेज्ज कसिणं पि ।
सम्मत्तं[1] पि विराधिय अणंतसंसारियं कुज्जा ॥२६८॥

'जलिदो हि कसायग्गी' ज्वलितश्च कषायाग्निः । 'चरित्तसारं' चारित्राख्यं सारं दहत्येव । सम्यक्त्वं विनाश्यानन्तससारपरिभ्रमणे रतं कुर्यादेव ॥२६८॥

तम्हा हु कसायग्गी पावं उप्पज्जमाणयं चेव ।
इच्छामिच्छादुक्कडवंदणसलिलेण विज्झाहि ॥२६९॥

'तम्हा खु' तस्मात्खलु कषायाग्निं पापमुत्पद्यमानमेव प्रशमयेत् । केन "इच्छामि भगवतः शिक्षां, मिथ्या भवतु मम दुष्कृतं, नमस्तुभ्यं" इत्येवंभूतेन सलिलेन ॥२२९॥

तह चेव णोकसाया सल्लिहियव्वा परेणुवसमेण ।
सण्णाओ गारवाणि य तह लेस्साओ य असुहाओ ॥२७०॥

इस प्रकार कषायरूपी अग्निका उदय होता है और वह इस प्रकार अपकार करती है, तथा इस प्रकारसे उसे शान्त करना चाहिए, यह तीन गाथाओंसे कहते हैं—

टी०—शिष्यकी अयोग्य प्रवृत्तिको रोकनेके लिए गुरुके द्वारा शिक्षा दिये जानेपर शिष्यने जो प्रतिकूल वचन कहे वह गुरुको सहन नहीं हुए। वही हुई वायु। उस वायुसे गुरुके मनमे आग भडक उठी। उसके पश्चात् गुरुने शिष्यको पुन समझाया तो शिष्यने पुनः प्रतिकूल वचन कहे। उसने गुरुकी कोपाग्निमें ईंधनका काम किया तो आग भड़क उठी। अथवा गुरुने शिष्यको शिक्षा दी। शिष्य उससे क्रुद्ध हुआ। शिष्यकी क्रोधरूप वायुसे क्षुब्ध होकर गुरुने पुनः उसे शिक्षा दी। उस शिक्षाने शिष्यकी क्रोधाग्निको भडकानेमें ईंधनका काम किया। ऐसे भयानक कषायाग्नि सहसा भड़कती है ॥२६७॥

गा०—जलती हुई कषायरूप आग समस्त चारित्र नामक सारको जला देती है। सम्यक्त्व-को भी नष्ट करके अनन्त संसारके परिभ्रमणमे लगा देती है ॥२६८॥

टी०—इसलिए पापरूप कषायाग्निको उत्पन्न होते ही बुझा देना चाहिए उसको बुझानेका जल है—मैं भगवान् जिनेन्द्रदेवकी शिक्षाकी इच्छा करता हूँ। मेरा खोटा कर्म मिथ्या हो, मैं नमस्कार करता हूँ ॥२६९॥

---

१. 'सम्मत्तम्मि विराधिद'–अ० ।

'तह चेव णोकसाया' तथैव नोकषायाः तनूकर्तव्याः । 'परेणुवसमेण' परेणोपशमेन । संज्ञा, गारवाणि, अशुभाश्च लेश्याः, हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुरुषनपुंसकवेदाः नोकषाया इत्युच्यन्ते । आहारभयमैथुनपरिग्रहाभिलाषाः संज्ञाः । ऋद्धौ तीव्राभिलाषो, रसेषु, सुखे च गा[1]रवशब्देन उच्यते ॥२७०॥

कषायवत्स्वार्थभ्रंशकरत्वाविशेषान्नोकषायादीनामपि मुमुक्षोः सल्लेखनीयत्वमाख्याति—

परिवड्ढिदोवधाणो विगडसिराण्हारुपासुलिकडाहो ।
सल्लिहिदतणुसरीरो अज्झप्परदो हवदि णिच्चं ॥२७१॥

'परिवड्ढिदोवधाणो' परिवर्द्धितावग्रहः । अन्येषां पाठः [2]परिवड्ढिदोवधाणो परिवर्धितावधानः । "विगडसिराण्हारुपासुलिकडाहो' प्रकटीभूता महत्यः अल्पाश्च सिराः पार्श्वास्थिसहतयः कटाक्षदेशाश्च यस्य । 'सल्लिहिदतणुसरीरो' सम्यक्तनूकृत शरीरं यस्य सः । 'अज्झप्परदो' अध्यात्मं ध्यानं तत्र रतः । 'होइ' भवति । 'णिच्चं' नित्यं ॥२७१॥

एवं कदपरियम्मो सब्भंतरबाहिरम्मि सल्लिहणे ।
संसारमोक्खबुद्धी सव्वुवरिल्लं तवं कुणदि ॥२७२॥

'एवं कदपरियम्मो' एवमुक्तेन क्रमेण कृतपरिकर. । 'सब्भंतरबाहिरम्मि सल्लिहणे' अभ्यन्तरसल्लेखनासहिताया बाह्यसल्लेखनाया । 'संसारमोक्खबुद्धी' ससारत्यागे कृतबुद्धिः 'सव्वुवरिल्लं तवं' सर्वेभ्यस्तपोभ्यः उत्कृष्ट तपश्च[3]रति । सल्लेहणा सम्मत्ता ॥२७२॥

सल्लेखनानन्तरं कार्यमुपदिशति—

वोढुं गिलादि देह पच्चोढव्वमिणसुचिभारोत्ति ।
तो दुक्खभारभीदो कदपरियम्मो गणमुवेदि ॥२७३॥

गा०–टी०—इसी तरह उत्कृष्ट उपशमभावके द्वारा नोकषाय, संज्ञा, गारव और अशुभ लेश्याओंका घटाना चाहिए। हास्य, रति, अरति, शोक, भय, जुगुप्सा, स्त्रीवेद पुरुषवेद, नपुंसक वेद इन्हे नोकषाय कहते है। आहार, भय, मैथुन और परिग्रहकी चाहका नाम सज्ञा है। ऋद्धिकी तीव्र अभिलाषा, रस और सुखकी चाहको गारव कहते है ॥२७०॥

गा०–टी०—जो प्रतिदिन अपने नियमोंको बढाता है, जिसकी बड़ी और छोटी सिरायें, दोनों ओरकी हड्डियां और नेत्रोकी हड्डियां स्पष्ट दिखाई देती हैं—शरीरको सम्यक्रूपसे कृश करनेवाला वह यति नित्य आत्मामें लीन रहता है ॥२७१॥

गा०–टी०—उक्त क्रमके अनुसार अभ्यास करनेवाला अभ्यन्तर सल्लेखना सहित बाह्य सल्लेखना करनेपर संसारके त्यागका दृढ़ निश्चय करके सब तपोंसे उत्कृष्ट तप करता है ॥२७२॥

सल्लेखना समाप्त हुई।

सल्लेखनाके अनन्तर होनेवाले कार्यका उपदेश देते है—

---

१. गौरव–अ०, आ० । २. परिवधाणो–अ० । ३. श्चरइ चरति–अ० ।

'वोढुं गिलादि देहं' शरीरोद्वहनहर्षरहितः। **'पच्चोढव्वं इणमसुइमारोत्ति'** परित्यागार्हमिव अशुचि-भारभूतं शरीरमिति कृतचित्तः। **'तो'** पश्चाद् **'दुःखभारभीदो'** दुःखभाजनाच्छरीराद्भीतः। **'कदपरिकम्मो'** कृतसमाधिमरणपरिकरः। **'गणं'** शिष्यवृन्दं। **'उवेदि'** ढौकते। अन्येषा पाठ. **'वोढुं गिलामि देहं'** इति। ते व्याख्यानयन्ति—शरीरं वोढुं अकृतादरोऽस्मि। **पच्चोढव्वमिणमसुइभारोत्ति** परित्याज्यमिदं अशुचिभारभूतं शरीरमिति कृतनिश्चय· ॥२७३॥

सल्लेहणं करेंतो जदि आयरिओ हवेज्ज तो तेण।
ताए वि अवत्थाए चिंतेदव्वं गणस्स हियं ॥२७४॥

'सल्लेहणं करेंतो' सल्लेखना कर्तुमुद्यतः। **'जइ'** यदि **'आयरिओ हवेज्ज'** आचार्यो भवेत्। **'तो'** ततः। **'तेण'** तेन। **'ताए वि'** तस्यामपि। **'अवत्थाए'** अवस्थायां। **'चिंतेदव्वं'** चिन्तनीय। **'गणस्स'** गणस्य। **'हियं'** हितं ॥२७४॥

कालं संभाविता सव्वगणमणुदिसं च वाहरिय।
सोमतिहिकरणणक्खत्तविलग्गे मंगलोगासे ॥२७५॥

'कालं संभाविता' आत्मन· आयु स्थिति विचार्य। **'सव्वगणं'** सर्वगणं। **'अणुदिसं च'** बालाचार्यं च। **'वाहरिय'** व्याहृत्य। **'सोमतिहिकरणणक्खत्तविलग्गे'** सौम्ये दिने, करणे, नक्षत्रे, विलग्ने **'मंगलोगासे'** शुभे देशे ॥२७५॥

गच्छाणुपालणत्थं आहोइय अत्तगुणसमं भिक्खू।
तो तम्मि गणविसग्गं अप्पकहाए कुणदि धीरो ॥२७६॥

गा०—टी०—यह अपवित्र और भाररूप शरीर त्यागने योग्य है ऐसा निश्चय करके जो शरीरको धारण करनेसे ग्लानि करता है उसे शरीरके धारण करनेमे कोई हर्ष नही होता। पीछे दुःखके घर इस शरीरसे डरकर समाधिमरणकी तैयारी करता हुआ अपने शिष्योके पास जाता है।

दूसरे आचार्य 'वोढुं गिलामि देह' ऐसा पाठ पढते हैं वे उसकी व्याख्या इस प्रकार करते हैं—मुझे शरीर धारण करनेमें कोई रुचि नहीं है यह अशुचि और भारभूत शरीर छोडने योग्य है ऐसा मैंने निश्चय किया है ॥२७३॥

गा०—टी०—सल्लेखना करनेवाले दो प्रकारके होते हैं—एक आचार्य, दूसरे साधु। यदि आचार्य हो तो उसे उस अवस्थामें भी गणका हित विचारना चाहिए। अर्थात् आचार्य यदि सल्लेखना धारण करनेका निश्चय करे तो उसे अपने संघके सम्बन्धमे भी विचार करना चाहिए कि उसकी क्या व्यवस्था की जाये ॥२७४॥

गा०—टी०—अपनी आयुकी स्थिति-विचारकर समस्त संघको और बालाचार्यको बुलाकर शुभ दिन, शुभकरण, शुभनक्षत्र और शुभलग्नमें तथा शुभ देशमें ॥२७५॥

गा०—टी०—गच्छका अनुपालन करनेके लिए गुणोंसे अपने समान भिक्षुका विचार करके

---

१. तो तह मं—अ०।

'गच्छाणुपालणत्थं' गच्छानुपालनार्थं। 'आहोइय' विचार्य। 'अत्तगुणसमं' आत्मनो गुणैः समानं। 'भिक्खु' भिक्षुं। 'तो' ततः। 'तम्मि' तस्मिन्। 'गणविसग्गं' गणत्यागं। 'अप्पकहाए' अल्पया कथया। 'कुणइ धीर' करोति धीरः। अन्ये तु वदन्ति 'अप्पणो' कथयेति ॥२७६॥

किमर्थमेवं प्रयतते सूरिः ?

अव्वोच्छित्तिणिमित्तं सव्वगुणसमोयरं तयं णच्चा।
अणुजाणेदि दिसं सो एस दिसा वोत्ति बोधित्ता ॥२७७॥

'अव्वोच्छित्तिणिमित्तं' धर्मतीर्थस्य ज्ञानदर्शनचारित्रात्मकस्य व्युच्छित्तिर्मा भूदित्येवमर्थं। 'सव्वगुणसमोयरं' सर्वगुणसमन्वितं। 'तगं' तकं 'णच्चा' ज्ञात्वा, 'अणुजाणेदि' अनुज्ञां करोति। 'दिसं' आचार्यः 'सो' सः एषः। दिसा आचार्य 'वोत्ति' युष्माकमिति। 'बोधित्ता' बोधयित्वा। दिसा समत्ता' ॥२७७॥

क्षमाग्रहणक्रमं निरूपयति—

आमंतेऊण गणिं गच्छम्मि य तं गणिं ठवेदूण।
तिविहेण खमावेदि हु स बालउड्ढाउलं गच्छं ॥२७८॥

'आमंतेऊण गणिं' आमन्त्र्य आचार्यं। 'गच्छम्मि य' गणे। 'तं गणिं ठवेदूण' तं आत्मनानुज्ञातं स्थापयित्वा, स्वयं पृथग्भूत्वा। 'तिविधेण खमावेदि खु स बालउड्ढाउलं गच्छं' मनोवाक्कायैर्ग्राहयति क्षमां स बालवृद्ध संकीर्णं गणं ॥२७८॥

जं दीहकालसंवासदाए ममकारणेहरागेण।
कडुगपरुसं च भणिया तमहं सव्वं खमावेमि ॥२७९॥

'जं दीहकालसंवासदाए' दीर्घकाल सह संवासेन यज्जातं ममत्वं, स्नेहो, द्वेषो, रागश्च तेन। 'जं' यत् 'कडुगपरुसं च भणिया' कटुक परुष वा वच भणिता 'तं' तत् युष्मान्। 'सव्वं खमावेमि' सर्वान् क्षमा ग्राहयामि ॥२७९॥

पश्चात् वह धीर आचार्य थोड़ीसी बातचीत पूर्वक उस पर गणका त्याग करता है ॥२७६॥

आचार्य ऐसा क्यों करते है ? यह कहते हैं—

गा०–टी०—ज्ञानदर्शन चारित्रात्मक धर्मतीर्थकी व्युच्छित्ति न हो, इसलिए उसे सब गुणोसे युक्त जानकर यह तुम्हारा आचार्य है ऐसा शिष्योंको समझाकर आप इस गणका पालन करे ऐसा उस नवीन आचार्यको अनुज्ञा करते है ॥२७७॥

दिसा प्रकरण समाप्त हुआ।

अब क्षमाग्रहणका क्रम कहते हैं—

गा०–टी०—आचार्यको बुलाकर गणके मध्यमे उस अपने द्वारा स्वीकृत गणीको स्थापित करके और स्वयं अलग होकर बाल और वृद्ध मुनियोसे भरे उस गणसे वह पुराने आचार्य मन वचन कायसे क्षमा माँगते है ॥२७८॥

गा०–टी०—दीर्घकाल तक साथ रहनेसे उत्पन्न हुए ममता, स्नेह, द्वेष और रागसे जो कटुक

गणेन संपाद्य क्रममाचष्टे—

वंदिय णिसुढिय पडिदो तादारं सव्ववच्छलं तादिं ।
धम्मायरियं णिययं खामेदि गणो वि तिविहेण ॥२८०॥

'**वंदिय णिसुढिय पडिदो**' अभिवद्य संकुचितपतितः । '**तादारं**' संसारदुःखात्त्रातारं । '**सव्ववच्छलं**' सर्वेषां वत्सलं । '**तादिं**' यतिं । '**धम्मायरियं**' दशविधे उत्तमक्षमादिके धर्मे, स्वयं प्रवृत्तं अन्येषां प्रवर्तकं । '**णिययं**' आत्मीयं । '**खामेदि गणो वि तिविहेण**' क्षमा ग्राहयति गणस्त्रिविधेन । **क्षमापणा समत्ता** ॥२८०॥

अनुशासननिरूपणार्थं उत्तरप्रबन्धः—

संवेगजणियहासो सुत्तत्थविसारदो सुदरहस्सो ।
आदट्ठचिंतओ वि हु चिंतेदि गणं जिणाणाए ॥२८१॥

'**संवेगजणिदहासो**' संसारभीरुतया करणभूतया उत्पादितहासः । परिग्रहेऽस्मिस्त्यक्ते अभ्यन्तराश्च रागादयः निमित्तापायादपयान्ति । तदपगमात्तन्मूलस्थितीनि कर्माणि प्रलयमुपव्रजन्ति । तेषु नष्टेष्वेव चतुर्गतिभ्रमणं नंक्ष्यति[1] इति जात हर्षः । '**सुत्तत्थविसारदो**' सूत्रे जिनप्रणीते तदर्थे च विसारदो निपुणः. '**सुदरहस्सो**' श्रुतप्रायश्चित्तग्रंथः । '**आदट्ठचिंतओ वि हु**' आत्मप्रयोजनचिंतापरोऽपि । '**चितेदि गणं जिणाणाए**' जिनानामाज्ञया गणचिन्तां करोति ॥२८१॥

और कठोर वचन कहे गये आपसे मैं उन सबकी क्षमा माँगता हूँ ॥२७९॥

गणके द्वारा किये जाने वाले कार्यको कहते है—

गा०-टी०—वन्दना करके, पृथ्वीपर पाँचों अंगोंको स्थापित करके अर्थात् पञ्चांग नमस्कार करके संसारके दुःखोंसे रक्षा करने वाले सबको प्रिय अपने दश प्रकारके उत्तम क्षमादिरूप धर्ममें स्वयं प्रवृत्त और दूसरोंको प्रवृत्त करने वाले आचार्यसे गण भी मन वचन कायसे क्षमा माँगता है ॥२८०॥

क्षमाका प्रकरण समाप्त हुआ ।

आगे अनुशासनका कथन करते हैं—

गा०-टी०—संसारसे डरनेके कारण जिसे हर्ष प्रकट हुआ है अर्थात् इस परिग्रहका त्याग करने पर अभ्यन्तर रागादि अपने निमित्तका विनाश होनेसे चले जायेंगे क्योंकि बाह्य परिग्रह रागादिके उत्पत्तिमें निमित्त हैं अतः निमित्तके न रहनेसे नैमित्तिक रागादि भी नही रहेंगे । और रागादिके न रहनेसे रागादिके कारण बन्धने वाले कर्म नष्ट हो जायेंगे । उनके नष्ट होने पर चार गतियोंमें भ्रमण नष्ट हो जायेगा, इसलिए जिसे हर्ष उत्पन्न हुआ है, और जिन भगवान्के द्वारा कहे गये सूत्र और उसके अर्थमें जो निपुण है, जिसने प्रायश्चित्त शास्त्र सुना है वह आचार्य अपने प्रयोजनकी चिन्ता करते हुए भी जिन भगवान्की आज्ञासे गणकी चिन्ता करता है । अर्थात् यद्यपि आचार्य संल्लेखना धारण करनेके लिए अपना गण त्यागकर दूसरे गणमें जानेके लिए तत्पर है फिर भी गणकी चिन्ता करके उसे उपदेश देते हैं ॥२८१॥

---

१. इति विचित्त हर्षः आ० मु० ।

णिद्धमहुरगंभीरं गाहुगपल्हादणिज्जपत्थं च ।
अणुसिट्ठिं देइ तहिं गणाहिवइणो गणस्स वि य ॥२८२॥

'णिद्ध' स्नेहसहिता । 'महुरं' माधुर्यसमन्विता । 'गभीरं' सारार्थवत्तया गृहीतगाम्भीर्यां । 'गाहुगं' ग्राहिका सुखावबोधा । 'पल्हादणिज्जपत्थं च' चेतःप्रल्हादविधायिनी । 'पत्थं' पथ्या हितां । 'अणुसिट्ठि देइ' अनुशिष्टिं ददाति । 'तहिं' तस्मिन्पूर्वोक्ते काले देशे च । 'गणाहिवइणो गणस्स वि य' गणाधिपतये गणाय च ॥२८२॥

वड्ढंतओ विहारो दंसणणाणचरणेसु कायव्वो ।
कप्पाकप्पठिदाणं सव्वेसिमणागदे मग्गे ॥२८३॥

'वड्ढंतगो विहारो कायव्वो' वर्धमानविहार कार्य । क्व ? 'सव्वेसिं कप्पाकप्पट्ठियाणं अणागदे मग्गे' सर्वेषा प्रवृत्तिनिवृत्तिस्थिनाना मुक्तिमार्गे । प्रमत्तसयतादिगुणस्थानापेक्षया विचित्रो यतिधर्म दंसणवद-सामायिकादिविकल्पेन प्रवृत्तिधर्मोऽपि विचित्ररूप । तस्य सकलस्योपादान सर्वेषामित्यनेन । कोऽसौ मार्ग इत्याशंकायामाह—सामान्येन 'दंसणणाणचरणेसु' सम्यग्दर्शनज्ञानचारित्रेषु । चतुर्विकल्पगणोद्देशेनायमुपदेशः ॥२८३॥

सूरये कथयन्ति—

संखित्ता वि य पवहे जह वच्चइ वित्थरेण वड्ढंती ।
उदधिंतेण वरणदी तह सीलगुणेहिं वड्ढाहि ॥२८४॥

'संखित्ता वि य' सक्षिप्तापि च 'पवहे' प्रवाहे प्रवहत्यस्मादिति प्रवाहः उत्पत्तिस्थान तत्र संक्षिप्तापि सती वरनदी । 'जह वच्चइ' यथा व्रजति । 'वित्थरेण' पृथुलतया । 'वड्ढंती' वर्द्धमाना । 'उदधिंतेण' यावत्समुद्रं । 'तह सीलगुणेहिं वड्ढाहिं' तथा शीलगुणैस्त्वं वर्धस्व ॥२८४॥

मज्जाररसिदसरिसोवमं तुमं मा हु काहिसि विहारं ।
मा णासेहिसि दोण्णि वि अप्पाणं चेव गच्छं च ॥२८५॥

गा०–टी०—उस पूर्वोक्त शुभ तिथि आदिसे युक्त काल और देशमें गणाधिपति और गणको भी स्नेह सहित, माधुर्यसे युक्त, सारवान होनेसे गम्भीर सुखसे समझमे आने वाली, चित्तको आनन्द दायक और हितकारी शिक्षा देते है ॥२८२॥

गा०–टी०—सब प्रवृत्ति और निवृत्ति मे स्थित मुनियों और गृहस्थोको मुक्तिके मार्गमें सम्यग्दर्शन सम्यक् ज्ञान और सम्यक् चारित्रमें वर्धमान विहार उत्तरोत्तर उन्नत अनुष्ठान करना चाहिए। यति धर्म प्रमत्त संयत आदि गुणस्थानोंकी अपेक्षा अनेक प्रकार है। प्रवृति रूप गृहस्थ धर्म भी दर्शन, व्रत सामायिकके भेदसे अनेक प्रकार है। उस सबका ग्रहण यहाँ 'सब' शब्दसे किया है। यह चारों प्रकारके संघको लक्ष्य करके आचार्य उपदेश देते है ॥२८३॥

नये आचार्यको कहते है—

गा०टी०—उत्पत्ति स्थानमे छोटी सी भी उत्तम नदी जैसे विस्तारके साथ बढ़ती हुई समुद्र तक जाती है उसी प्रकार तुम शील और गुणोंसे बढ़ो ॥२८४॥

'मज्जाररसिदसरिसोवमं' मार्जारस्य रसितं रटनं मार्जाररसितं तेन सह सादृश्यं उपमा परिच्छेदो यस्य विहारस्य तन्मार्जाररसितसदृशोपमं विहारं चरणं। 'तुमं' भवान्। 'मा हु काहिसि' मा कार्षीः। मार्जारस्य रसितं प्राङ्महत् क्रमेणापचीयते तद्वद्रत्नत्रयभावनातिशयवती प्राक् क्रमेण मन्दायमाना न कर्तव्येति यावत्। 'मा णासेहिसी दोण्णि वि अत्ताणं चेव गच्छं च'—आत्मनो गणस्य च विनाशं मा कृथाः। प्रथममेवातिदुर्धरचारित्रतपोभावनायां प्रवृत्तो भवान् गणं च तथा प्रवर्त्यमानो दुश्चरतया नश्यति ॥२८५॥

जो सघरं पि पलित्तं णेच्छदि विज्झविदुमलसदोसेण।
किह सो सद्दहिदव्वो परघरदाहं पसामेदुं ॥२८६॥

'जो सघरं पि' य स्वगृहं अपि। दह्यमानमालस्यान्न वाञ्छति विध्यापयितुं कथमसौ श्रद्धातव्यः परकीयगृहदाहं प्रशमयितुं उद्योगं करोतीति ॥२८६॥

तस्माद्भवतैवं प्रवर्तितव्यमित्याचष्टे—

वज्जेहि चयणकप्पं सगपरपक्खे तहा विरोधं च।
वादं असमाहिकरं विसग्गिभूदे कसाए य ॥२८७॥

'वज्जेहि चयणकप्पं' वर्जय अतिचारप्रकारं ज्ञानदर्शनचारित्रविषयं। अवाचनाकाले अस्वाध्यायकाले वा पठनं। क्षेत्रशुद्धिं, द्रव्यशुद्धिं, भावशुद्धिं वा विना। निह्नवः, ग्रन्थार्थयोरशुद्धिः, अबहुमानं इत्यादिको ज्ञानातिचारः। शङ्काकाङ्क्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवाः सम्यग्दर्शनातिचाराः। समितिभावनारहितता चारित्रातिचारः। एते च्यवनकल्पेनोच्यन्ते। 'सगपरपक्खे तहा विरोहं च' धर्मस्थेषु, मिथ्यादृष्टिषु च विरोधं वर्जयेत्। चेतः समाधानविनाशकारणं वादं च वर्जनीयं। वादे प्रवृत्तो यथात्मनो जयः पराजयः परस्य वा

गा०-टी०—तुम बिलावके शब्दके समान आचरण मत करना। बिलावका शब्द पहले जोरका होता है फिर क्रमसे मन्द हो जाता है उसी तरह रत्नत्रयकी भावनाको पहले बड़े उत्साहसे करके पीछे धीरे-धीरे मन्द मत करना। और इस तरह अपना और संघ दोनोका विनाश न करना। प्रारम्भमें ही कठोर तपकी भावनामें लगकर आप और गणको भी उसीमें लगाकर दुश्चर होनेसे विनाशको प्राप्त होंगे ॥२८५॥

गा०-टी०—जो जलते हुए अपने घरको भी आलस्यवश बचाना नहीं चाहता। उसपर कैसे विश्वास किया जा सकता है कि वह दूसरेके जलते घरको बचायेगा ॥२८६॥

इसलिए आपको ऐसा करना चाहिए, यह कहते हैं—

गा०-टी०—ज्ञान दर्शन और चारित्रके विषयमें अतिचारोंको दूर करो। जो वाचना और स्वाध्यायका काल नहीं है उसमें क्षेत्र शुद्धि, द्रव्य शुद्धि, और भाव शुद्धिके बिना वाचना आदि करना, निह्नव, ग्रन्थ और अर्थकी अशुद्धि, आदरका अभाव इत्यादि ज्ञान विषयक अतिचार हैं। शंका, कांक्षा, विचिकित्सा, मिथ्यादृष्टिकी प्रशंसा और संस्तव ये सम्यग्दर्शनके अतिचार हैं। समितिकी भावना न होना चारित्रका अतीचार है। ये सब 'च्यवनकल्प' कहे जाते हैं। धार्मिको और मिथ्यादृष्टियोंके साथ विरोध नहीं करना चाहिए। चित्तकी शान्तिको भंग करने वाला वाद भी नहीं करना चाहिए। वाद करने वाला जिस प्रकार अपनी जय और दूसरेकी पराजय हो यही

भवति तदेवान्वेषते न तत्त्वसमाधानवान् । 'विसग्गिभूदे कसाये य' कषाया हि क्रोधादय स्वस्य परस्य च मृत्युं उपानयन्ति इति विषभूता., हृदयं दहन्तीति दहनभूतास्ताश्च वर्जय ।

तथा चोक्तं— त्रिलोकमल्लाः कुलशीलशत्रवो, मलानि दुर्मार्ज्यतमानि चापि ते ।
यशोहरा हानिकरास्तपस्विनां, भवन्ति दौर्भाग्यकरा हि देहिनाम् ॥ १ ॥—[ ]
न केवलं ते परलोकलोपिनः, इमं च लोकं क्षपयन्ति दारुणाः ।
न धर्ममात्रस्य च विघ्नहेतवो, धनस्य कामस्य च ते विघातकाः ॥ २ ॥ इति—[ ]

णाणम्मि दंसणम्मि य चरणम्मि य तीसु समयसारेसु ।
ण चएदि जो ठवेदुं गणमप्पाणं गणधणी सो ॥२८८॥

'णाणम्मि दंसणम्मि य' रत्नत्रये गणमात्मानं च यो न स्थापयितु समर्थो नैवासौ गणधर । ण च एदि न समर्थ । बहवो मम वशवर्तिन. सन्ति एतावता भवतो गणित्वगर्वो माभूदिति भाव ॥२८८॥

कीदृक्तर्हि गणधरो भवतीति चेदेवंभूत इत्याचष्टे—

[1]णाणम्मि दंसणम्मि य चरणम्मि य तीसु समयसारेसु ।
चाएदि जो ठवेदुं गणमप्पाणं गणधरो सो ॥२८९॥

स्पष्टार्था गाथा ॥२८९॥

पिंडं उवहिं सेज्जं अविसोहिय जो हु भुंजमाणो हु ।
मूलट्ठाणं पत्तो मूलोत्ति य समणपेल्लो सो ॥२९०॥

प्रयत्न करता है तत्त्वका समाधान नहीं करता। क्रोधादि कषाय अपनी और दूसरेकी मृत्युमे कारण होती है इसलिए वे विषरूप है और हृदयको जलाती है इसलिए आगके समान हैं। उन्हे छोडना चाहिए। कहा भी है—

ये कषाये तीन लोकमे मल्लके समान हैं। कुल और शीलके शत्रु है। वे ऐसे मल है जिनको दूर करना सबसे कठिन है। ये कषायें तपस्वियोकी हानि करने वाली और उनके यशको हरने वाली हैं तथा प्राणियोके दुर्भाग्यको करने वाली है। 'वे कषाये केवल परलोकको ही नष्ट नही करतीं, किन्तु इस लोकको भी हीन करती हैं। वे केवल धर्ममें ही विघ्न नही डालती किन्तु अर्थ और काम की भी घातक है' ॥२८७॥

टी०—आगमके सारभूत तीन दर्शन ज्ञान और चारित्र रत्नत्रयमे जो गणको और अपनेको स्थापन करनेमें समर्थ नही है वह गणधर नही है। मेरे अधीन बहुतसे मुनि है इसलिए आपमे गणी होनेका घमण्ड नही होना चाहिए ॥२८८॥

तब गणधर कैसा होता है यह कहते हैं—

गा०—आगमके सारभूत तीन सम्यग्ज्ञान, सम्यग्दर्शन और सम्यक् चारित्रमें अपनेको और गणको स्थापित करनेमें जो समर्थ होता है वह गणधर है ॥२८९॥

---

१. वतो न ग—अ० । २. अ० आ० प्रत्योः इयं गाथा 'णाणम्मि दंसणम्मि इति लिखिता, न सर्वा ।

पिंडं उवहिं सेज्जं उग्गमउप्पादणेसणादीहिं ।
चारित्तरक्खणट्ठं सोधिंतो होदि सुचरित्तो ॥२९१॥

'**पिंडं**' आहारं, '**उवहिं**' उपकरणं, '**सेज्जं**' वसतिं । **सोधिंतो** शोधयन् । '**उग्गमउप्पादणेसणादीहिं**' उद्गमोत्पादनैषणाविभिर्दोषैः । किमर्थं शोधयति ? '**चारित्तरक्खणट्ठं**' चारित्ररक्षणार्थं उद्गमादिदोषं परिहरति । सुसंयत इति लोके यशो मे भविष्यतीति वा, स्वसमयप्रकाशने लाभो ममेत्थं भवतीति वा चेतस्यकृत्वेति भाव.। एवंभूतः सुचरित्रो भवतीति यतिः ॥२९१॥

एसा गणधरमेरा आयारत्थाण वण्णिया सुत्ते ।
लोगसुहाणुरदाणं अप्पच्छंदो जहिच्छाए ॥२९२॥

'**एसा गणधरमेरा**' एषा गणधरमर्यादा । '**सुत्ते वण्णिदा**' सूत्रे निरूपिता । केषा ? '**आयारत्थाणं**' आचारस्थाना । पञ्चविधे आचारे ये स्थितास्तेषा गणिना व्यवस्था सूत्रे वर्णिता । '**लोगसुहाणुरदाणं**' लोकानुवर्तिनां सुखेप्सूनां च । यथेच्छया असंयतजनसंसर्गं सुखादरश्च शास्त्रे निषिद्ध.। तत्र ये वर्तन्ते स्वेच्छया तेषा '**अप्पच्छंदो**' आत्मेच्छा एव केवला न तेषा गणधरमर्यादा सूत्रे [1]वर्णिता । अथवा लोकसुखं नाम मृष्टाहारभोजनं, यथाकामं, मृदुशय्यासनं, मनोज्ञे वेश्मनि वसनं च तत्र रताना विषयातुराणामित्यर्थं ॥२९२॥

सीदावेइ विहारं सुहसीलगुणेहिं जो अबुद्धीओ ।
सो णवरि लिंगधारी संजमसारेण णिस्सारो ॥२९३॥

'**सीदावेदि**' मदं करोति । '**विहारं**' चारित्रं रत्नत्रये प्रवृत्ति । '**सुहसीलगुणेहिं**' सुखसमाधानाभ्यासैः । '**जो अबुद्धिओ**' यो बुद्धिरहितः । '**सो**[2] **णवरि लिंगधारी**' स वृथालिंगी भवति, द्रव्यलिंगं धारयति । '**संजमसारेण णिस्सारो**' संयमाख्येन इंद्रियप्राणसंयमविकल्पेन सारेण निःसार. केवलनग्न. स इति ।[3] एतदुक्तं भवति ॥२९३॥

गा०—आहार, उपकरण और वसतिका शोधन किये बिना जो उसका सेवन करता है वह साधु मूल स्थान नामक दोषको प्राप्त होता है और वह भ्रष्टश्रमण[4] है ॥२९०॥

आहार, उपकरण और वसतिका जो उद्गम, उत्पादन और एषणा आदि दोषोंसे चारित्रकी रक्षाके लिए शोधन करता है वह सम्यक् संयमी है। मेरा लोकमें यश होगा कि यह सुसंयमी है अथवा अपने आगमका प्रकाश करनेसे मुझे लाभ होगा ऐसा वह अपने मनमें नही सोचता। ऐसा यति ही सम्यक् चारित्र वाला होता है ॥२९१॥

गा०-टी०—पाँच प्रकारके आचारमें स्थित जो गणी है उन गणियोंकी यह गणधर मर्यादा सूत्रमेंकही है। जो लोकके अनुसार चलने वाले सासारिक सुखके इच्छुक है अथवा लोकसुख यानी मिष्टाहारका यथेच्छ भोजन, कोमल शय्या पर शयन, मनोहर घरमें निवास, इनमें जो रत हैं अर्थात् जो स्वेच्छाचारी है उनकी गणधर मर्यादा सूत्रमें नही कही है ॥२९२॥

गा०-टी०—जो बुद्धिहीन साधु सुखशील गुणोंके कारण रत्नत्रयमें प्रवृत्तिरूप चारित्रमें उदासीन रहता है वह केवल द्रव्यलिंगका धारी है और इन्द्रिय संयम तथा प्राणसंयमसे शून्य है ॥२९३॥

---

१ व्यावर्णिता—आ० मु० । २. सो नवरिलिंगी भवति द्रव्य—अ० । ३. निःसारः एत—आ० मु० । ४. इस गाथा पर टीका नहीं है ।

पिंडं उवधिं सेज्जामविसोधिय जो खु भुंजमाणोदु ।
मूलट्ठाणं पत्तो बालोत्तिय णो समणबालो ॥२९४॥

य उद्गमादिदोषोपहृतमाहारं, उपकरणं, वसतिं वा गृह्णाति तस्य नेन्द्रियसंयमः, नैव प्राणसंयमः, न यतिर्न गणधर इति निगद्यते ॥२९४॥

कुलगामणयररज्जं पयहिय तेसु कुणइ ममत्तिं जो ।
सो णवरि लिंगधारी संजमसारेण णिस्सारो ॥२९५॥

'कुलगामणयररज्जं' कुलं, ग्रामं, नगरं, राज्यं च । 'पयहिय' परित्यज्य । 'तेसु कुणदि ममत्तिं जो' ग्रामादिषु पुनः यः करोति ममतां । मदीयं कुलं, अस्मदीयो ग्रामः, नगरं, राज्यं चेति । यो हि यत्र ममतां करोति तस्य यदि शोभनं जातं तुष्यति अन्यथा द्वेष्टि, संक्लिश्यति वा । ततो रागद्वेषयोर्लाभे च वर्तमानः [1]असंयतेष्वादरवात् (वत्त्वात्) कथमिव संयतो भवतीति भावः ॥२९५॥

[2]अपरिस्साई सम्मं समपासी होहि सव्वकज्जेसु ।
संरक्ख सचक्खुंपि व सबालउड्ढाउलं गच्छं ॥२९६॥

'अपरिस्साई' गुरुरयमिति शंका विहाय निगदितानामपराधानां प्रकटनं मा कृथा । 'समपासी चेव होहि कज्जेसु' कार्येषु सम्यक् समदर्श्येव च भव । 'संरक्ख सचक्खुं पि व' परिपालय स्वनेत्रं इव । किं? 'सबालउड्ढाउलं गच्छ' सबालैर्वृद्धैराकीर्णं गणं ॥२९६॥

णिवदिविहूणं खेत्तं णिवदी वा जत्थ दुट्ठओ होज्ज ।
पव्वज्जा च ण लब्भदि संजमघादो व तं वज्जो ॥२९७॥

'णिवदि विहूणं खेत्तं परिहर' नृपतिरहित क्षेत्रं त्यज । 'णिवदि वा जत्थ दुट्ठओ होज्ज' नृपतिर्वा यस्मिन् देशे दुष्टो भवेत्तच्च क्षेत्रं परित्यज । 'पव्वज्जा च ण लब्भदि जत्थ' प्रव्रज्या च न लभ्यते यत्र क्षेत्रे ।

गा०-टी०—जो उद्गम आदि दोषोंसे सहित आहार, उपकरण अथवा वसतिको स्वीकार करता है उसके न प्राणिसंयम है और न इन्द्रिय संयम है। वह केवल नग्न है। न वह यति है और न गणधर है ॥२९४॥

गा०-टी०—जो कुल, ग्राम, नगर और राज्यको छोड़कर भी उससे ममत्व करता है कि मेरा कुल है, हमारा गाँव है या नगर है राज्य है, वह भी केवल नग्न है। जो जिससे ममता करता है उसका यदि अच्छा होता तो उसे सन्तोष होता है अन्यथा द्वेष करता है अथवा संक्लेश करता है। इस तरह राग-द्वेष करने पर असंयतोंमें आदरवान होनेसे वह कैसे संयमी हो सकता है ॥२९५॥

गा०-टी०—'हमारा यह गुरु आलोचित दोषोको दूसरेसे नही कहता। ऐसा मानकर शिष्योंके द्वारा प्रकट किये अपराधोंको किसी अन्यसे मत कहो। कार्योंमें समदर्शी ही रहो। और बाल और वृद्ध यतियोंसे भरे गणकी अपनी आँखकी तरह रक्षा करो ॥२९६॥

गा०-टी०—जिस क्षेत्रमें कोई राजा न हो उस क्षेत्रको त्याग दो। अथवा जिस क्षेत्रका राजा

---

१. असंयतो भवतीति—आ० मु०। २. गाथा २९५-२९६ म०।

शिष्या यत्र न जायंते तच्च । 'संजमघादो व जत्थं' संयमस्य चोपघातो यत्र क्षेत्रे 'तं वज्जो' त्यजेति गणिशिक्षा ॥ गणिसिक्खा ॥२९७॥

गणं शिक्षयत्युत्तरप्रबंधेन—

कुणह अपमादमावासएसु संजमतवोवधाणेसु ।
णिस्सारे माणुस्से दुल्लहबोहिं वियाणित्ता ॥२९८॥

'कुणह अपमादमावासगेसु' कुरुताप्रमादमावश्यकेषु । 'संजमतवोवधाणेसु' संयमस्य, तपसश्चाश्रयेषु । अभ्यर्हितः संयम इति पूर्वनिपातः । संयमं बिना न तप शक्नोति कर्तुं मुक्तिमिति सामायिकादौ प्रवर्तमानस्य संयमो भवति । असंयमं त्यजतीति, सावद्यक्रियानिवृत्तौ सत्या कर्माणि तपतीति तपो भवति । नान्यथेति तपसोऽप्याश्रयः । 'णिस्सारे माणुस्से' साररहिते मानुष्ये अनित्यतया अशुचितया मनुजाना असारं । तत्र 'दुर्लभां बोधिं' दुर्लभां दीक्षाभिमुखा बुद्धि । 'वियाणित्ता ज्ञात्वा ॥२९८॥

समिदा पंचसु समिदीसु सव्वदा जिणवयणमणुगदमदीया ।
तिहिं गारवेहिं रहिदा होइ तिगुत्ता य दंडेसु ॥२९९॥

सम्यक्प्रवृत्ताः 'होह' भवत । 'पचसु समिदिसु' पञ्चसु समितिषु । 'सव्वदा' सर्वदा । 'जिणवयणमणुगदमदीया' जिनवचनमनुगतबुद्धय. । 'तिहि गारवेहि रहिया' गारवत्रयरहिता 'तिगुत्ता य' गुप्तित्रयसमन्विताः भवत । 'च दंडेसु' अशुभमनोवाक्कायेषु ॥२९९॥

सण्णाउ कसाए वि य अट्टं रुद्दं च परिहरह णिच्चं ।
दुट्ठाणि इंदियाणि य जुत्ता सव्वप्पणो जिणह ॥३००॥

दुष्ट हो उस क्षेत्रको त्याग दो । जिस क्षेत्रमें प्रव्रज्या प्राप्त न हो अर्थात् शिष्य न बने, अथवा जिस क्षेत्रमें संयमका घात हो उस क्षेत्रको त्याग दो ॥२९७॥

आचार्य शिक्षा समाप्त हुई ।

आगे गण (संघ) को शिक्षा देते हैं—

गा०-टी०—मनुष्य जन्म अनित्य और अशुचि होनेसे सार रहित है । उसमे दीक्षा धारण करनेकी बुद्धि होना दुर्लभ है ऐसा जानकर आवश्यकोंमें, जो संयम और तपके आश्रय है, प्रमाद मत करो । यहाँ पूज्य होनेसे संयमको तपसे पहले रखा है क्योंकि सयमके बिना अकेला तप मुक्ति नहीं प्राप्त करा सकता । सामायिक आदिमें प्रवर्तमान मुनिके संयम होता है । असंयमको वह त्यागता है । सावद्य क्रियाकी निवृत्ति होने पर कर्मोंको तपनेसे तप होता है । सयमके बिना तप नहीं होता । अतः आवश्यक कर्म तपके भी आश्रय हैं । इसलिए साधुको उनमें प्रमाद नहीं करना चाहिए ॥२९८॥

गा०—हे मुनिगण ! आप सर्वदा पाँच समितियोंके पालनमें तत्पर रहे । अपनी बुद्धिको जिनागमकी अनुगामिनी बनाओ । तीन गारव मत करो और अशुभ मन वचन कायके विषयमें तीन गुप्तियोंका पालन करो ॥२९९॥

गा०—नित्य आहारादि विषयक संज्ञाओंको, कषायोंको और आर्त तथा रौद्रध्यानको दूर करो । तथा ज्ञान और तपसे युक्त होकर अपनी सर्वशक्तिसे दुष्ट इन्द्रियोंको जीतो ॥३००॥

'सण्णाओ' संज्ञा आहारादिविषया. । **'कसाए वि'** कषायानपि । **'अट्टं रुद्दं च'** आर्तं रौद्रं च ध्यानं । **'परिहरत'** निराकुरुत । **'णिच्चं'** नित्यं । **'दुट्ठाइं इंदियाइं'** दुष्टानीन्द्रियाणि च । **'जुत्ता'** युक्ता ज्ञानेन तपसा च । **'सव्वप्पणा जिणह'** सर्वशक्त्या इन्द्रियजयं कुरुत ॥३००॥

धण्णा हु ते मणुस्सा जे ते विसयाउलम्मि लोयम्मि ।
विहरंति विगदसंगा णिराउला णाणचरणजुदा ॥३०१॥

'धण्णा हु ते मणुस्सा' धन्यास्ते मनुष्या. । के ? **'जे विसयाउलम्मि लोयम्मि'** ये शब्दादिभिराकीर्णे जगति । **'विगदसंगा'** निःसंगाः क्वचिदपि विषये स्पर्शादौ । **'णिराउला'** । **'णाणचरणजुदा'** ज्ञानेन चारित्रेण च युताः । ज्ञानचारित्रयुतानां प्रशंसा तत्रादरज[1]ननार्था गणस्य ॥३०१॥

सुस्सूसया गुरूणं चेदियभत्ता य विणयजुत्ता य ।
सज्झाए आउत्ता गुरुपवयणवच्छला होह ॥३०२॥

'सुस्सूसया गुरूणं' सम्यग्दर्शनज्ञानचारित्रैः गुणैर्गुरुतया गुरव इत्युच्यन्ते आचार्योपाध्यायसाधव. । तेषां शुश्रूषाकारिणो भवत । शुश्रूषापरेण भाव्यं । लाभादिकमनपेक्ष्य तेषां गुणेष्वनुराग कृतो भवति । गुणानुरागाद्दर्शनशुद्धिस्तदीयरत्नत्रयानुमनन च भवति । सुकरो ह्युपायः पुण्यार्जने अनुमनन नाम । **'चेदियभत्ता य'** चैत्यानि जिनसिद्धप्रतिबिंबानि कृत्रिमाकृत्रिमाणि तेषु भक्ता. । यथा शत्रूणा मित्राणां वा प्रतिकृतिदर्शनाद्द्वेषो रागश्च जायते । यदि नाम उपकारोऽनुपकारो वा न कृतस्तया प्रतिकृत्या तत्कृतापकारस्योपकारस्य वा अनुस्मरणे निमित्ततास्ति तद्वज्जिनसिद्धगुणा अनन्तज्ञानदर्शनसम्यक्त्ववीतरागत्वादयस्तत्र यद्यपि न सन्ति, तथापि तद्गुणानुस्मरणं संपादयन्ति सादृश्यात्तच्च गुणानुस्मरण अनुरागात्मकं ज्ञानदर्शने सन्निधापयति । ते च

गा०—वे मनुष्य धन्य हैं जो शब्दादि विषयोसे व्याप्त जगत्में किसी भी स्पर्शादि विषयमें आसक्ति नही रखते और निराकुल होकर ज्ञान और चारित्रसे युक्त होते हैं। जो ज्ञान और चारित्रसे युक्त होते हैं उनकी प्रशंसा करनेसे संघका उनके विषयमें आदरभाव उत्पन्न होता है ॥३०१॥

गा०टी०—सम्यग्दर्शन सम्यग्ज्ञान और सम्यक् चारित्र नामक गुणोंसे महान् होनेसे आचार्य उपाध्याय और साधुको गुरु कहते हैं। उनकी सेवामें तत्पर रहना चाहिए। लाभ आदिकी अपेक्षा न करके उनके गुणोंमें अनुराग करना चाहिए। गुणोंमें अनुराग करनेसे सम्यग्दर्शनकी विशुद्धि होती है और उनके रत्नत्रयकी अनुमोदना होती है। अनुमोदना पुण्य उपार्जन करनेका सरल उपाय है। चैत्य अर्थात् जिन और सिद्धोंकी कृत्रिम और अकृत्रिम प्रतिबिम्बोंमें भक्ति करना चाहिए। जैसे शत्रुओं और मित्रोंकी प्रतिकृति देखनेसे द्वेष और राग उत्पन्न होता है। यद्यपि वे प्रतिकृतियाँ कोई अपकार या उपकार नही करती, तथापि उन शत्रुओ और मित्रोंने जो अपकार या उपकार किये होते हैं उनके स्मरणमें उनकी प्रतिकृतियां निमित्त होती है। उसी तरह यद्यपि प्रतिबिम्बोंमें जिन और सिद्धोंके गुण अनन्त ज्ञान, अनन्त दर्शन, सम्यक्त्व वीतरागता आदि नही होते, तथापि उनके समान होनेसे उनके गुणोंका स्मरण कराती हैं। और वह गुणोंका स्मरण जो

---

१. जननार्थं गणस्य—आ० । जननसमर्थां गणस्य मु० ।

संवरनिर्जरे महत्यौ संपादयतः। तस्माच्चैत्यभक्तिमुपयोगिनीं कुरुत। 'विणयजुत्ता य' विलयं नयति कर्ममलमिति विनयः। ज्ञानदर्शनतपश्चारित्रविनया उपचारविनयश्चेति पञ्च[1]प्रकारेण विनये युक्ता भवत। शास्त्रोक्तवाचनास्वाध्यायकालयोरध्ययनं श्रुतस्य श्रुतं प्रयच्छतश्च भक्तिपूर्वं कृत्वा, अवग्रहं परिगृह्य, बहुमानं कृत्वा, निह्नवं निराकृत्य, अर्थव्यञ्जनतदुभयशुद्धिं संपाद्य एवं भाव्यमानं श्रुतज्ञानं संवरं निर्जरां च करोति। अन्यथा ज्ञानावरणस्य कारणं भवेत्।

शंकाकांक्षाविनिरासो दर्शनविनयः।

स च प्रयत्नेन भवद्भिः संपाद्योऽन्यथा शंकादिपरिणामा मिथ्यात्वमानयन्ति। दर्शनमोहनीयस्य चास्रवा भवन्ति। ततो मिथ्यादर्शननिमित्तकर्मवशादनन्तसंसारपरिभ्रमणं दुःखभीरूणा भवता जायते। रूपरसगंधस्पर्शशब्देषु मनोज्ञामनोज्ञेषु सन्निहितेषु अनन्तकालाभ्यासाद्रागोऽप्रीतिश्च जायते। तथा कषायाश्च बाह्यमभ्यन्तरं च निमित्तमाश्रित्य प्रादुर्भवन्ति। ते चोत्पद्यमानाश्चारित्रं विनाशयन्ति। कर्मादाननिमित्तक्रियोपरमो हि चारित्रं। रागादयश्च कर्मादाननिमित्तक्रियास्तथा अशुभमनोवाक्कायक्रियाश्च कर्मादाननिमित्ताः। तथा षड्जीवनिकायबाधापरिहारमन्तरेण गमनं। मिथ्यात्वेऽसंयमे वा प्रवर्तकं वचनं साक्षात्पारंपर्येण वा जीवबाधाकरणं भोजनं अप्रत्यवेक्षिताप्रमार्जितादाननिक्षेपौ शरीरमलोत्सर्गो जीवपीडाहेतुरेता कर्मपरिग्रहनिमित्ताः

अनुरागात्मक होता है, ज्ञान और दर्शनमें लगाता है। और वे ज्ञान और दर्शन महान् संवर और निर्जरा करते हैं। इसलिए उपयोगी चैत्य भक्ति करना चाहिए। कर्ममलको जो विलय करती है वह विनय है। ज्ञान विनय, दर्शन विनय, चारित्र विनय, तपविनय और उपचार विनय, इन पांच प्रकारकी विनयमें संलग्न रहो। शास्त्रमें जो वाचना और स्वाध्याय काल कहा है, उन कालोंमें श्रुतका अध्ययन, और श्रुतका दान भक्तिपूर्वक करके अवग्रह स्वीकार करके, बहुमान करके, निह्नवको दूर करके, अर्थशुद्धि, व्यंजन शुद्धि और अर्थ व्यंजन दोनोंकी शुद्धि करके। इस प्रकार आठ अंगोंके साथ भाया गया श्रुत ज्ञान संवर और निर्जरा करता है। ऐसा नही करनेसे ज्ञानावरणका कारण होता है।

शङ्का कांक्षा आदिको दूर करना दर्शन विनय है। आपको प्रयत्नपूर्वक शंका आदिको दूर करना चाहिए। ऐसा न करनेसे शंका आदि परिणाम मिथ्यात्वको लाते है और दर्शनमोहनीयकर्मके आस्रवमें कारण होते हैं। उससे मिथ्यादर्शनमें निमित्त मिथ्यात्वकर्मके कारण आप जैसे दुःख भीरुजनोंको अनन्त संसारमें परिभ्रमण करना पड़ता है। मनोज्ञ और अमनोज्ञ रूप रस गन्ध स्पर्श और शब्दके मिलनेपर अनन्तकालके अभ्यासवश राग और द्वेष उत्पन्न होते हैं। तथा बाह्य और अभ्यन्तर निमित्तका आश्रय पाकर कषायें उत्पन्न होती हैं। और वे उत्पन्न होकर चारित्रको नष्ट करती हैं। कर्मोके ग्रहणमे निमित्त क्रियाओंके रोकनेको चारित्र कहते हैं। रागादि कर्मोंको ग्रहणमे निमित्त क्रिया है। अशुभ मन वचन और कायकी क्रिया भी कर्मोके ग्रहणमें निमित्त होती है। तथा छहकायके जीवसमूहको बाधा न पहुँचाये विना गमन करना, मिथ्यात्व और असंयममें प्रवर्तक वचन बोलना, साक्षात् या परम्परासे जीवोंको बाधा करनेवाला भोजन करना, विना देखे और विना साफ किये वस्तुओंको ग्रहण करना और रखना, विना देखी और बिना साफ की गई भूमिमें मलमूत्र त्यागना ये सब क्रियाएँ जीवोंको कष्ट पहुंचानेवाली हैं अतः

---

१. प्रकारे वि–आ० मु०।

क्रियाः । आसां परिवर्जनं चारित्रविनयः । अशुभक्रियापरिवर्जनं विना चारित्रं नाम किमारम्भवतां तस्मादत्रोद्योगं कुरुत । अनशनादिकतपोजनितक्लेशसहनं तपोविनयः । सति संक्लेशे महानास्रवो भवेदल्पा निर्जरा । उपचारविनयाद्विनीत इति पूज्यते बुधैरन्यथा अविनीत इति निन्द्यते किं च उपचारविनयं मनोवाक्कायविकल्पं यो न करोति, स गुरूनवजानाति, नाभ्युत्तिष्ठति, नानुगच्छति, नाञ्जलिं करोति, न स्तौति, न विज्ञप्तिं करोति, गुरोरग्रत आसनमारोहति, याति पुरस्तेषां, निन्दति, परुषं वदति, आक्रोशति वा स नीचैर्गोत्रं बध्नाति । तेन श्वपाकचाण्डालादिकुलेषु गर्हितेषु, सारमेयग्रामसूकरादिषु वा जायते । न च रत्नत्रयं गुरुभ्यो लभते । विनीतं हि शिक्षयन्ति गुरवः, प्रयत्नेन मानयन्ति च ततो विनयपरा भवत । अविनये दोषं विनये च गुणं महान्तमवबुध्य 'सज्झाए आजुत्ता होह' शोभनं अध्ययनं स्वाध्यायः । जीवादितत्त्वपरिज्ञानं, तदुपायभूतश्च ग्रन्थः तस्मिन्स्वाध्याये आजुत्ता आयुक्ता भवत निद्रां, हास्यं क्रीडां, आलस्यं, लोकयात्रां च त्यक्त्वा । तथा चोक्तम्—

> "णिद्दं ण बहु मण्णेज्ज हासं खेडं विवज्जए ।
> जोगं समणधम्मस्स जुंजे अणलसो सदा ॥" इति । [ ]

'गुरुपवयणवच्छल्ला होह' गुरुप्रवचनवत्सला भवत ॥३०२॥

दुस्सहपरीसहेहिं य गामवचीकंटएहिं तिक्खेहिं ।
अभिभूदा वि हु संता मा धम्मधुरं पमुच्चेह ॥३०३॥

कर्मोंके ग्रहणमे निमित्त हैं । इनको त्यागना चारित्र विनय है । इन कही गई अशुभ क्रियाओंको त्यागे विना आरम्भ करनेवालोंके चारित्र कैसे हो सकता है । अतः इसमें उद्योग करना चाहिए । अनशन आदि तपसे होनेवाला कष्ट सहना तपविनय है । संक्लेश परिणाम होनेपर महान् आस्रव होता है और थोड़ी निर्जरा होती है । उपचार विनय करनेसे विद्वानोंसे पूजित होता है । नहीं करनेपर अविनयी कहा जाता है और निन्दाका पात्र होता है । तथा मन वचन कायसे जो उपचार विनय नही करता वह मनसे गुरुओंकी अवज्ञा करता है, उनके आनेपर खडा नहीं होता, उनके जानेपर पीछे-पीछे गमन नही करता, हाथ नही जोड़ता, स्तुति नही करता, विज्ञप्ति नही करता, गुरुके सामने आसन पर बैठता है, उनके आगे चलता है, निन्दा करता है, कठोर वचन बोलता है, चिल्लाता है, ऐसा करनेवाला नीच गोत्रका बन्ध करता है और मरकर श्वपाक चाण्डाल आदि नीचकुलोंमे और कुत्ता सुअर आदिमें जन्म लेता है । उसे गुरुओंसे रत्नत्रयकी प्राप्ति नहीं होती । गुरु विनीतको शिक्षा देते हैं और प्रयत्नपूर्वक उसका सन्मान करते हैं । इसलिए अविनयमे दोष और विनयमें महान् गुण जानकर विनयी होना चाहिए । तथा स्वाध्यायमें लगना चाहिए । सुन्दर अध्ययनको स्वाध्याय कहते है । जीवादितत्त्वोका परिज्ञान और उसके उपायभूत ग्रन्थोंकी स्वाध्यायमें निद्रा, हास्य, क्रीड़ा, आलस्य और लोकयात्राको त्यागकर लगना चाहिए । कहा भी है—'बहुत सोना नही चाहिए । हास्य क्रीड़ा छोड़ना चाहिए । सदा आलस्य त्यागकर श्रमणधर्मके योग्य कार्यमे लगना चाहिए ।' तथा गुरुमें प्रवचनवात्सल्य रखना चाहिए ॥३०२॥

गा०—दुःसह परीषहोंसे और तीक्ष्ण आक्रोशवचनरूपी काँटोंसे पराभूत होकर भी धर्मकी धुराके भारको मत त्यागो ॥३०३॥

'दुस्सहपरीसहेहिं य' दुःसहैः परिषहैश्च । 'गामवचीकंटएहिं तिक्खेहिं' आक्रोशवचनकण्टकैस्तीक्ष्णैश्च । 'अभिभूदा वि य संता' प'राभूता अपि संतः । 'मा कुणह धुरं खंडं' मा कृथा धर्मभारत्यागं । ननु च "दुस्सहपरीसहेहिं य अभिभूदा मा कुणह धुरं खंडं" इत्यनेनैव आक्रोशपरीषहसहनं उपदिष्टं ? किमनेन 'गामवचीकंटएहिं' इत्यनेन ? । अयमभिप्रायः सूत्रकारस्य-सोढक्षुदादिवेदनोऽपि न स'हतेऽनिष्टं वचस्ततोऽति-दुष्करमपि तस्सोढव्यं इति दर्शनाय पृथगुपादानम् ॥३०३॥

तपस्युद्योगः सर्वप्रयत्नेन त्यक्तालस्यैर्भवद्भिः इत्युपदिशति—

तित्थयरो चदुणाणी सुरमहिदो सिज्झिदव्वयधुवम्मि ।
अणिगूहिदबलविरिओ तवोविधाणम्मि उज्जमदि ॥३०४॥

'तित्थयरो' तीर्थंकरः तरंति संसारं येन भव्यास्तत्तीर्थं । केचन तरंति श्रुतेन गणधरैर्वालंबनभूतैरिति श्रुतं गणधरा वा तीर्थमित्युच्यते । तदुभयकरणात्तीर्थंकरः । अथवा 'तिसु तिट्ठदित्ति तित्थं' इति व्युत्पत्तौ तीर्थशब्देन मार्गो रत्नत्रयात्मकः उच्यते तत्करणात्तीर्थंकरो भवति । 'चदुणाणी' मतिश्रुतावधिमनःपर्ययज्ञान-वान् । 'सुरमहिदो' सुरैश्चतुःप्रकारैः पूजितः स्वर्गावतरणजन्माभिषेकपरिनिष्क्रमणेषु । 'सिज्झिदव्वगधुवम्मि' नियोगभाविन्या सिद्धावपि । तथापि 'अणिगूहियबलविरिओ' अनुपह्नुतबलवीर्यः । 'तवोविहाणम्मि' तपः-समाधाने । 'उज्जमदि' उद्योगं करोति ॥३०४॥

किं पुण अवसेसाणं दुक्खक्खयकारणाय साहूणं ।
होइ ण उज्जमिदव्वं सपच्चवायम्मि लोयम्मि ॥३०५॥

'किं पुण अवसेसाणं' किं पुनर्न प्रयतितव्यं अवशिष्टैः साधुभिः । 'दुक्खक्खयकारणाय' दुःखविनाशन-

टी०—शङ्का—'दुःसह परीषहोंसे अभिभूत होकर भी धर्मकी धुराको मत त्यागो। इतना कहनेसे आक्रोश परीषहका सहनेका उपदेश दे दिया, फिर 'तीक्ष्ण आक्रोश वचन' आदिके कहने-की क्या आवश्यकता है ?

समाधान—ग्रन्थकारका अभिप्राय यह है कि भूख आदिकी वेदनाको सहनेवाला भी अनिष्टवचन नहीं सहता। अतः अति दुष्कर भी आक्रोश वचनको सहना चाहिए। यह बतलानेके लिए पृथक् ग्रहण किया है ॥३०३॥

आगे उपदेश देते है कि आलस्य त्यागकर आपको पूरे प्रयत्नसे तपमें उद्योग करना चाहिए—

गा०—टी०—जिसके द्वारा भव्यजीव संसारको तिरते हैं वह तीर्थ हैं। कुछ भव्य श्रुत अथवा आलम्बनभूत गणधरोके द्वारा संसारको तिरते हैं अतः श्रुत और गणधरोंको भी तीर्थ कहते हैं। इन दोनो तीर्थोंको जो करते हैं वे तीर्थंकर हैं। अथवा 'तिसु तिट्ठदित्ति तित्थं' इस व्युत्पत्तिके अनुसार तीर्थ शब्दसे रत्नत्रयरूप मार्ग कहा जाता है। उसके करनेसे तीर्थंकर होता है। वे मति, श्रुत, अवधि और मनःपर्ययज्ञानके धारी होते हैं। स्वर्गसे गर्भमें आनेपर, जन्माभिषेक और तपकल्याणमे चार प्रकारके देव उनकी पूजा करते हैं। उनको सिद्धिकी प्राप्ति नियमसे होती है फिर भी वे अपने बल और वीर्यको न छिपाकर तपके विधानमें उद्यम करते हैं ॥३०४॥

गा०—टी०—तब दुःखका विनाश करनेके लिए शेष साधुओंका तो कहना हो क्या है।

१. अभिभूता अ० । २. सहतोऽतिदुष्क–अ० ।

निमित्तं । सापाये लोके आयुषः, शरीरस्य, बलस्य नीरोगतायाश्च विनाशे अविदितकाले सति, दावानलसमाने मृत्यावायाति, लोकवनमिदं अशेषं भस्मसात्कर्तुं अद्य इत्यपि सुचिरं निमेषमात्रेणापि मृत्युरेयात्[1] मासमर्द्धमासमृतुमयनं संवत्सरं वा प्रति वचनाधिकारः कस्माद्यावन्नायाति मृत्युस्तावत्तपस्युद्योगः कार्यः । न हि मृत्योर्देशनियमोऽस्ति । स्थल एव प्रचारो यथा शकटादीनां, समीरपथ एव ज्योतिषां, सलिल एव मीनमकरादीनां । कष्टतमस्य पुनरस्य मृत्योः स्थले, जले, वियति च विहृतिः । दहनस्य, सुधासूतेर्वा सुराधिपतेः, प्रभंजनस्य शीतस्योष्णस्य वा, हिमान्या वा अप्रवेशदेशाः सन्ति न तथा मृत्योः । यथा वा निदानमान व्याधीनां पित्तानिलश्लेष्मरूपमेव मृत्यो पुनरखिलमेव निदानं । वातस्य पित्तस्य कफस्य, शीतोष्णयोर्वर्षाहिमातपानां शक्यः प्रतीकारविधिर्न पुनः संसारे मृत्यो । हिमोष्णवर्षादीनां च कालो विदितोऽस्ति न तद्वदस्य । न वा हितमस्य किंचिद्विद्यते । यथा राहुवदनकुहरे प्रवेशो निशापतेः । असत्यपि मृत्यूपनिपाते जीवतोऽपि कुरोगाशनिभ्यो महद्भयं । यथा वियतो निपतत्यबुद्ध एवाशनिः । आयुर्बलं रूपादयश्च । गुणास्तावदेव यावन्नोपैति रोगो देहं । यस्तु तन्तुलग्नस्य[2] फलस्य तावदपातो यावन्न श्वसनः । व्याधौ बाध्यमाने देहे न सुखेन शक्यते श्रेयः कर्तुं, यथा वेश्मनि दह्यमाने समन्तान्न शक्यते प्रतीकारः । असत्सु वा रोगेषु रागशत्रुः सुहृन्मुखेन शत्रुरिव प्रवृद्धः यदा नरस्य चित्तं बाधते न तदा समेऽधिकारः । पित्तोदयो वैद्यशुभप्रयोगैः प्रशाम्येदपि, रागोदयस्य

सर्व एव हि जीवपरिणामा मिथ्यात्वासंयमकषायाख्यास्त्रिप्रकारा भवन्ति। तीव्रो मध्यमो मन्द इति। कुतः कर्मनिमित्ता हि मिथ्यात्वादयः कर्माणि च तीव्रमध्यममन्दानुभवविशिष्टानि। तेन कारणभेदतः कार्याणां परिणामानां विचित्रता। तत्र ये हिंसादयः परिणामा मध्यमास्ते मनुजगतिनिर्वर्तकाः वालिकाराज्या, दारुणा, गोमूत्रिकया, कर्दमरागेण च समानाः यथासंख्येन क्रोधमानमायालोभाः परिणामाः। जीवघातं कृत्वा हा दुष्ठु कृतं, यथा दुःखं मरणं वास्माकं अप्रियं तथा सर्वजीवानां। अहिंसा शोभना वयं तु असमर्था हिंसादिकं परिहर्तुमिति च परिणामः। मृषा परदोष[१]सूचनं, परगुणानामसहनं वञ्चनं वाऽसज्जनाचारः। साधूनामयोग्यवचने दुर्व्यापारे च प्रवृत्तानां का नाम साधुतास्माकमिति परिणामः। तथा शस्त्रप्रहारादप्यनर्थं परद्रव्यापहरणं, द्रव्यविनाशो हि सकलकुटुम्बविनाशो। नेतरत्र नस्माद्दुष्टु[२] कृतं परधनहरणमिति परिणाम.। परदारादिलङ्घनमस्माभिः कृतं तदतीवाशोभनं। यथास्मद्दाराणां परैर्ग्रहणे दुःखमात्मसाक्षिकं तद्वत्तेषामिति परिणामः। यथा गङ्गादिमहानदीनां अनवरतप्रवेशेऽपि न तृप्तिः सागरस्यैवं द्रविणेनापि जीवस्य सन्तोषो नास्तीति परि-

---

भाव संसारको तो सभी सुखपूर्वक जान लेते हैं। अतः यहाँ उसका विस्तार नहीं किया। इस प्रकारके अनन्त संसार सागरमें मनुष्य पर्याय पाना दुर्लभ है। क्योंकि मनुष्य क्षेत्र अल्प है। तिर्यञ्च तो सब जगत्में उत्पन्न होते हैं। मनुष्य पर्यायमें जन्म लेनेके कारणभूत जो परिणाम हैं वे दुर्लभ हैं। वे परिणाम कौनसे हैं यह कहते हैं—मिथ्यात्व असंयम और कषाय रूप सभी जीव परिणाम तीन प्रकारके हैं—तीव्र, मध्यम, मन्द, क्योंकि मिथ्यात्व आदि परिणाम कर्मके निमित्तसे होते हैं और कर्म तीव्र मन्द और मध्यम अनुभाग शक्तिसे युक्त होते हैं। अतः कारणके भेदसे उनके कार्य परिणामोंमें भी विचित्रता होती है। उनमेंसे जो हिंसा आदि रूप परिणाम मध्यम होते हैं वे मनुष्य गतिके कारण होते हैं। ऐसे परिणाम हैं बालूकी लकीरके समान क्रोध, लकड़ीके समान मान, गोमूत्रिकाके समान माया और कीचड़के रागके समान लोभ। जीवघात करके पछताना, हा बुरा किया। जैसे दुःख और मरण हमें अप्रिय हैं उस तरह सभी जीवोंको अप्रिय हैं। अहिंसा उत्तम है किन्तु हमलोग हिंसा आदिको त्यागनेमें असमर्थ हैं। इस प्रकारके परिणाम मनुष्यगतिके कारण हैं। दूसरेको झूंठा दोष लगाना, दूसरेके गुणोंको न सहना, ठगना ये दुर्जनोंके आचार हैं। साधुओंके अयोग्य वचन और खोटे व्यापारमें लगे हम लोगोंमें साधुता कैसे संभव है इस प्रकारके परिणाम मनुष्यगतिके कारण हैं। दूसरेके द्रव्यका हरण करना शस्त्र प्रहारसे भी बुरा है। द्रव्यका विनाश समस्त कुटुम्बका विनाश है। इसलिए दूसरेका धन हरना खोटा काम है। इस प्रकारके परिणाम मनुष्यगतिके कारण हैं। हमने जो परस्त्री आदिका सेवन किया यह बुरा किया। जैसे हमारी स्त्रियोंको दूसरे पकड़ें तो हमें दुःख होता है उसी तरह दूसरोंको भी होता है। इस प्रकारके परिणाम मनुष्य गतिके कारण हैं। जैसे गंगा आदि महा नदियोंके द्वारा रात दिन जल आने पर भी सागरकी तृप्ति नहीं होती, इसी तरह धनसे भी जीवोंको सन्तोष नहीं होता।

---

१. दोषसूचन—आ०। २. दुट्ठु—आ०।

ध्यानम्‌। एवमादिपरिणामानामसुलभता अनुभवसिद्धैव। इत्थं दुर्लभमनुजत्वं साधुवदने परुषमिव वचः। धर्मरश्मिमण्डले तम इव, चण्डकोपे दयेव, लुब्धे सत्यवचनमिव, मानिनि परगुणस्तवनमिव, वामलोचनाया-मार्जवमिव, खलेषूपकारज्ञतेव, आप्ताभासमतेषु वस्तुतत्त्वावबोध इव। तह चेव मनुजत्वमिव। 'देसकुलरूवमा-रोग्गमाउगं बुद्धी' देशः, कुलं, रूपं, आरोग्यं, आयुर्बुद्धिश्च। 'सवणं गहणं सद्धा य' संजमो श्रवणं, ग्रहणं श्रद्धा संयमश्चेत्येते 'दुल्लहा' दुर्लभा लोके। तत्र देशदुर्लभतोच्यते। कर्मभूमिजा, भोगभूमिजा अन्तर्द्वीपजाः सम्मूर्छिमाः इति चतुःप्रकारा मनुजाः। पञ्च भरताः, पञ्चैरावताः, पञ्च विदेहाः इति पञ्चदशकर्मभूमयः। पञ्च हैमवतवर्षाः, पञ्च हरिवर्षाः, पञ्च देवकुरवः, पञ्च उत्तरकुरवः, पञ्च रम्यकाः, पञ्च हैरण्यवतवर्षाः त्रिंशद्भोगभूमयः। लवणकालोदधिसमुद्रयोरन्तरद्वीपाः। चक्रिस्कन्धावारप्रस्रवोच्चारभूमयः शुक्रसिंहाणकश्लेष्म-कर्णदन्तमलानि चाङ्गुलासंख्यातभागमात्रशरीराणां सम्मूर्छिमानां जन्मस्थानानि। तत्र भोगभूमिमन्तरद्वीपं च परिहृत्य कर्मभूमिषूत्पत्तिर्दुर्लभा। कर्मभूमिषु च बर्बरचिलातकपारसीकादिदेशपरिहारेण अङ्गवङ्गमगधादिदेशेषु उत्पत्तिः। लब्धेऽपि देशे चाण्डालादिकुलपरिहारेण तपोयोग्ये कुले जातौ। जातिर्मातृवंशः। सुकुलं कथं दुर्लभं इति चेदत्रोच्यते। जाति, कुलं, रूपं, ऐश्वर्यं, ज्ञानं, तपो, बलं वा प्राप्य अगर्वितत्व अन्येऽप्येतैर्गुणैरधिकाः स्वबुद्ध्यानमनं, परानवज्ञाकरणं, गुणाधिकेषु नीचैर्वृत्ति, परेण पृष्टस्यापि अन्यदोषाकथनं, आत्मगुणस्यास्तवनं, इत्येतैः परिणामैः उच्चैर्गोत्रं कर्म आपाद्यते तेन कुलेषु पूज्येषु जायते जन्तुरयं पुनर्न तथा प्रवर्तते जडमतिः। किन्त्वेतद्विपरीतेषु परिणामेषु वर्तमानो नीचैर्गोत्रमेव बध्नाति असकृत्तेन पूज्यं कुलं दुर्लभं। उक्तं च—

इस प्रकारके परिणामोंकी दुर्लभता अनुभवसे सिद्ध है। इस प्रकार मनुष्य जन्म वैसे ही दुर्लभ है जैसे साधुके मुखमें कठोर वचन सूर्यमण्डलमें अन्धकार, प्रचण्ड क्रोधीमें दया, लोभीमें सत्यवचन, मानीमें दूसरेके गुणोंका स्तवन, स्त्रीमें सरलता, दुर्जनोंमें उपकारकी स्वीकृति, आप्ताभासोंके मतों में वस्तु तत्त्वका ज्ञान दुर्लभ है। देश, कुल, रूप, आरोग्य, आयु, बुद्धि, ग्रहण, श्रवण और संयम ये लोकमें उत्तरोत्तर दुर्लभ हैं।

उनमेंसे देशकी दुर्लभता कहते हैं—मनुष्य चार प्रकारके हैं—कर्मभूमिया, भोगभूमिया, अन्तर्द्वीपज और सम्मूर्छिम। पाँच भरत, पाँच ऐरावत, पाँच विदेह ये पन्द्रह कर्मभूमिया हैं। पाँच हैमवत वर्ष, पाँच हरिवर्ष, पाँच उत्तरकुरु, पाँच देवकुरु, पाँच रम्यक, पाँच हैरण्यवत, ये तीस भोगभूमियाँ हैं। लवणसमुद्र और कालोदधि समुद्रमें अन्तर्द्वीप हैं। चक्रवर्तीकी सेनाके निवास-स्थानकी मलमूत्र त्यागनेकी भूमियाँ, वीर्य, नाक, थूक, कान और दाँतका मैल, ये अंगुलके असंख्यात भाग शरीरवाले सम्मूर्छन जीवोंके जन्मस्थान हैं। उनमेंसे भोगभूमि और अन्तरद्वीपको छोड़ कर्मभूमियोंमे उत्पत्ति दुर्लभ है। कर्मभूमियोंमें बर्बर, चिलातक, पारसीक आदि देशोंको छोड़ अंग, बंग, मगध आदि देशोंमें उत्पत्ति दुर्लभ है। योग्य देश मिलनेपर भी चाण्डाल आदि कुलोंको छोड़ तपके योग्य कुल जाति मिलना दुर्लभ है। मातृवंशको जाति कहते हैं।

शङ्का—सुकुल कैसे दुर्लभ है?

समाधान—जाति, कुल, रूप, ऐश्वर्य, ज्ञान, तप और बलको पाकर अन्य भी इन गुणोंसे अधिक हैं ऐसा अपनी बुद्धिसे मानकर गर्व न करना, दूसरोंकी अवज्ञा न करना, अपनेसे जो गुणोंमें अधिक हों उनसे नम्र व्यवहार करना, दूसरेके पूछनेपर भी किसीके दोष न कहना, अपने गुणोंकी प्रशंसा न करना, इस प्रकारके परिणामोंसे उच्चगोत्रका बन्ध होता है। उससे पूज्य कुलोंमें जन्म होता है। किन्तु यह अज्ञानी जीव उस प्रकारकी प्रवृत्ति नहीं करता, बल्कि उक्त

जात्या मत्तो यः कुलाद्यापि रूपादैश्वर्याद्वा ज्ञानतो वा बलाद्वा ।
प्राप्यार्थं वा यस्तपो वा परेषु निन्दायुक्तः स्तौति चात्मानमेव ॥ १ ॥
अन्यस्यावज्ञानादरातिरस्कारान् कर्ता मानं योऽतिमात्रं बिभर्ति ।
नीचैर्गोत्रं नाम कर्मैव बाल्याद्बध्नात्युग्रं निन्दितं जन्मवासे ॥ २ ॥
यस्तु प्राप्याप्युत्तमत्वं कुलाद्यैरन्यानुद्धृत्या मन्यमानो विशिष्टान् ।
अन्यान्कांश्चिन्नावजानाति धीरान्नीचैर्वृत्त्या युज्यते चाधिकेषु ॥ ३ ॥
पृष्टोऽप्यन्येनान्यदोषान्ब्रवीति नात्मानं वा स्तौति निर्मुक्तमानः ।
उच्चैर्गोत्रं नाम कर्मैव धीमान् बध्नातीष्टं जन्मवासे प्रजानाम् ॥ ४ ॥ इति । [ ]

नीरोगतापि दुर्लभा, असकृदसद्वेद्यकर्मबन्धनात् । बन्धाच्छेदात्ताडनान्मारणाद्दाहाद्रोधाच्चासद्वेद्यमेव बध्नाति । तथा चाभ्यधायि—

अन्येषां यो दुःखमज्ञोऽनुकम्पां त्यक्त्वा तीव्रं तीव्रसंक्लेशयुक्तः ।
बन्धच्छेदैस्ताडनैर्मारणैश्च दाहै रोधैश्चापि नित्यं करोति ॥
सौख्यं काङ्क्षन्नात्मनो दुष्टचित्तो नीचो नीचं कर्म कुर्वन्सदैव ।
पश्चात्तापं तापितो यः प्रयाति बध्नात्येषोऽसातवेद्यं सदैव ॥ इति । [ ]

रोगाभिभवान्नष्टबुद्धिचेष्टः कथमिव हितोद्योगं कुर्यात् ।

तथा चाभाणि—

प्राप्नोत्युपात्तादिह जीवतोऽपि महाभयं रोगमहाशनिभ्यः ।
यथाशनिः सन्निपतत्यबुद्धो रोगस्तथास्य निहन्ति देहम् ॥ १ ॥

परिणामोंसे विपरीत परिणाम करके बार-बार नीचगोत्रका बन्ध करता है इससे पूज्य कुल दुर्लभ है । कहा है—

जो जाति, कुल, रूप, ऐश्वर्य, ज्ञान या बलका मद करता है, धन अथवा तपको प्राप्त करके दूसरोंकी निन्दा और अपनी प्रशंसा करता है, अन्यकी अवज्ञा, अनादर और तिरस्कार करके खूब घमण्ड करता है वह बचपनसे ही नीचगोत्र नामक कर्मका बन्ध करके नीचकुलमें जन्म लेता है । और जो उत्तमकुल आदि प्राप्त करके दूसरोंको अपनेसे विशिष्ट मानता है, किसीकी भी अवज्ञा नहीं करता । अपनेसे अधिकोंमें नम्रव्यवहार करता है । पूछनेपर भी दूसरोंके दोष नहीं कहता और अपनी प्रशंसा नहीं करता । वह मानरहित व्यक्ति उच्चगोत्रका बन्ध करता है जो जनताको इष्ट है ।

नीरोगता भी दुर्लभ है क्योंकि जीव निरन्तर असातावेदनीयकर्मका बन्ध करता है । बन्धन, छेदन, ताड़न, मारण, दाह, और रोधसे असातावेदनीय ही कर्म बंधता है । कहा है—
जो अज्ञानी तीव्र संक्लेशसे युक्त हो, दया त्याग दूसरोंको बन्धन, छेदन, ताड़न, मारण, दाह और रोधसे नित्य तीव्र दुःख देता है, जो दुष्टचित्त नीच पुरुष अपनेको सुख चाहता हुआ सदैव नीचकर्म करता है और सताये हुएसे सताये जानेपर पछताता है वह सदैव असातवेदनीयको बाँधता है ।

रोगसे ग्रस्त होनेपर उसकी बुद्धि और चेष्टा नष्ट हो जाती है तब वह कैसे अपने हितका उद्योग कर सकता है ? कहा है—

इस लोकमें जीवन प्राप्त करके भी वह रोगरूपी महान् वज्रपातसे महाभयग्रस्त रहता

बलायुषी रूपगुणाश्च तावद्यावन्न रोगः समुपैति देहम् ।
फलस्य[1] लम्बस्य हि यावु तस्थोस्तावन्न पातः श्वसनो न यावत् ॥
तस्मिन्स्वदेहे परितापकाले क्षेमः प्रकर्तुं न सुखेन शक्यम् ।
गृहे समन्तान्न हि दह्यमाने क्षमः प्रकर्तुं पुरुषोऽत्र किंचित् ॥ इति । [ ]

सदा परप्राणिघातोद्यतस्तदीयप्रियतमजीवितविनाशनात् प्रायेणाल्पायुरेव भवति । आयुषश्छेदने बहूनि निमित्तानि—जलं, ज्वलनः, मारुतः, सर्पाः, वृश्चिकाः, रोगा, उच्छ्वासनिश्वासनिरोध , आहारालाभः, वेदनेत्येवमादीनि । ततो दीर्घमायुर्न सुलभं मनुजभवे । सामान्यवचनोऽप्यायुःशब्द. दीर्घे मनुजायुषि वर्तमानो गृहीतोऽन्यथायुर्मात्रस्य संसारिणः सुलभत्वात् । लब्धेष्वपि देशादिषु बुद्धिर्दुर्लभा । परलोकान्वेषणपरा बुद्धिरत्र बुद्धिशब्देनोच्यते न ज्ञानमात्रवाची । तद्धि सुलभं ज्ञानावरणेनावरुद्धबोधवीर्यस्य जलधर[2]पटावरुद्धमण्डलस्य छायामात्रमिव दिनपतेरपि वेदकं भवति ज्ञानम् । किंचिन्मिथ्यात्वोदयाद्विपर्यस्तमुदेति विज्ञान । नैवात्मा नाम कश्चित्कर्ता शुभाशुभयोः कर्मणोः । नापि तत्फलानुभवनिरत., नापि परलोक प्राप्य कर्मवशवर्तिना कश्चिदिति । तथाप्यधायि—

लोको नायं नापरो नापि चात्मा धर्माधर्मौ पुण्यपापे न चापि ।
स्वर्गो दृष्टः केन केनाथवा ते घोरा दृष्टा नारकाणां निवासाः ॥
बन्धः को वा कोऽथवा सोऽस्ति मोक्षो, मिथ्या सर्वं यन्त्रवेयं निरर्था ।
प्राप्ताः कामाः सेवितव्या यथेष्टं दृष्टं त्यक्त्वा दृष्टे कोऽभिलाष ॥ [ ]

है। जैसे आकाशसे अचानक वज्रपात होता है वैसे रोग अचानक आकर शरीरका घात करता है। बल, आयु, रूपादिगुण तभी तक हैं जब तक शरीरमें रोग नहीं होता। पेड़की डालमें लगा फल तभी तक नहीं गिरता जब तक हवा नहीं चलती। उसे अपने शरीरमें पीड़ा होने पर सुखपूर्वक कल्याण करना शक्य नहीं है। घरके चारों ओरसे न जलने पर ही पुरुष कुछ कर सकता है। घर भस्म हो जाने पर कुछ नही कर सकता।

जो सदा दूसरे प्राणियोंके घातमें तत्पर रहता है वह उनके प्रियतम जीवनका विनाश करनेसे प्रायः अल्प आयु वाला होता है। आयुके नष्ट होनेके बहुतसे निमित्त है—जल, आग, वायु, साँप, बिच्छु, रोग, श्वासोच्छ्वासका रुकना, भोजनका न मिलना, वेदना आदि। अतः मनुष्य भवमें दीर्घ आयु सुलभ नही है। यह आयुशब्द सामान्य आयुका वाचक होने पर भी दीर्घ मनुष्यायुके अर्थमे ग्रहण किया है। अन्यथा आयु मात्र तो ससारी जीवोमें सुलभ है। देश आदि प्राप्त होने पर भी बुद्धिकी प्राप्ति दुर्लभ है। यहाँ बुद्धि शब्दसे परलोककी खोजमें तत्पर बुद्धि ग्रहण की है, ज्ञान मात्रको वाचक बुद्धि नहीं। ज्ञानमात्र तो सुलभ है। जैसे सूर्यमण्डलके मेघकी घटासे ढक जानेपर हलकी छाया रहती है वैसे ही ज्ञान शक्तिके ज्ञानावरणसे ढक जानेपर साधारण ज्ञान रहता है। मिथ्यात्वका उदय होनेसे ज्ञान विपरीत हो जाता है। यथा—आत्मा नहीं है न कोई शुभ अशुभ कर्मका कर्ता है और न कोई उसके फलका भोक्ता है। न कोई कर्मके परवश होकर परलोक जाता है। कहा है—

'न कोई इह लोक है, न कोई परलोक है। न आत्मा है, न धर्म अधर्म हैं, न पुण्य पाप हैं। किसने स्वर्ग देखा है और किसने वे भयानक नारकियोंके निवास देखे हैं ? कौन बन्ध है और कौन

१. फलस्य शाखा गतवृन्तस्तो। २. रपटाव–आ०। रपप्लाव–मु०।

इति । तथा [1]चान्ये—षोडशवर्षिका स्त्री विंशतिवार्षिकः पुमान् तयोः परस्परं प्रेमपूर्वहावभावविभ्रम-कटाक्षकिलिकिंचितादिभावपूर्वकः संयोग एव स्वर्गः नान्यः ।

> स्त्रीमुद्रां मकरध्वजस्य जयिनीं सर्वार्थसंपत्करीं
> एनां ये प्रविहाय यान्ति कुधियः स्वर्गापवर्गेच्छया ।
> तद्दोषैर्विनिहत्य ते द्रुततरं नग्नीकृता मुण्डिताः
> केचिद्रक्तपटीकृताश्च जटिलाः कापालिकाश्चापरे ॥ [शृं० श० पृ० ४५]

तथान्यैरभिहितं—जलबुद्बुदवज्जीवाः, परलोकिनोऽभावात्परलोकाभावः इति च । सत्यामपि बुद्धौ समीचीनज्ञानलोचनवता, सकलप्राणिभृद्गोचरकृपापरिष्वक्तचेतसा लाभसत्कारादिनिरपेक्षेण, चतुर्गतिपरि-भ्रमणप्रभवयातनासहस्रमवलोक्य प्राणभृतां परमामनुकम्पामुपगतेन हा जनो विचेतनः मिथ्यादर्शनाद्यशुभपरिणाम-कदम्बकमिदमस्माभिरशुभगतिनिर्वर्तनप्रवणमवहातव्यमित्यजानानस्तत्रैवासकृत्प्रवर्तमानो दुःखरत्नाकरमपारमुप-विशत्यशरणो वराक इति कृतसंकल्पेन यतिजनेन संसर्गो दुर्लभः । कुतः ? दर्शनमोहोदयाज्ज्ञानावरणोदयाच्च न यतिगुणान्वेत्ति श्रद्धत्ते वा जनः । तत एव न ढौकते यतीन्न वा सुगुणमविदुषस्तदुसर्पणमुपपद्यते । अपि च चारित्रमोहोदयाद[2]संयतैरतिरतितरां प्राणिनस्ततोऽसौ हिंसादिकं स्वयं करोति, कारयति अनुमोदते । हिंसादिषु

मोक्ष है। यह सब मिथ्या और व्यर्थकी यन्त्रणा है। जो काम भोग प्राप्त हैं उन्हें यथेष्ट सेवन करना चाहिए। सामने वर्तमानको छोड़ दूरवर्तीकी अभिलाषा क्यों ?।'

तथा अन्य भी कहते हैं—सोलह वर्षकी स्त्री और बीस वर्षके पुरुषका परस्परमें प्रेमपूर्वक हाव भाव, विलास, कटाक्ष, शृङ्गारादि भावपूर्वक संयोग ही स्वर्ग है। इसके सिवाय कोई दूसरा स्वर्ग नहीं है। कहा है—'कामदेवको जीतनेवाली और समस्त अर्थ सम्पदाको करने वाली स्त्री मुद्रा है। जो कुबुद्धि स्वर्ग और मोक्षकी इच्छासे इसे छोड़कर जाते हैं वे उसके दोषोंसे सताये जाकर जल्द ही सिर मुण्डाकर नग्न हो जाते हैं। कुछ लाल वस्त्र धारण करते हैं और कुछ जटायें बढ़ाते हैं। कुछ हाथमें मनुष्यकी खोंपडी लेकर कापालिक हो जाते हैं।' तथा कुछ दूसरोंने भी कहा है—जीव जलके बुलबुलेके समान हैं और जब कोई परलोकी आत्मा नही है तो परलोक भी नही है।

यतिजनोंका चित्त समस्त प्राणियों पर कृपा भावसे युक्त होता है, उन्हे लाभ सत्कार पुरस्कार आदिकी अपेक्षा नहीं होती। चार गतियोंमें परिभ्रमणसे होनेवाली हजारों यातनाओंको देखकर प्राणियोंमें अत्यन्त दयालु हो उन्होंने संकल्प किया—'हा, यह अज्ञानी जन—अशुभगतिमे ले जानेमें समर्थ यह मिथ्यादर्शन आदि अशुभ परिणामोंका समूह हमें त्यागना चाहिए' ऐसा नही जानते और बार-बार उसीमें प्रवृत्ति करते हुए बेचारे अशरण होकर दुःखके अपार समुद्रमें प्रवेश करते हैं।' उनमें बुद्धि होते हुए भी यतिजनके साथ उनका सम्बन्ध नहीं हो पाता, क्योंकि दर्शनमोहके उदय और ज्ञानावरणके उदयसे मनुष्य यतिजनोंके गुण न तो जानता है और न उनपर श्रद्धा करता है। इसीसे न तो यतियोंकी ओर देखता है और उनके गुणोंको न जाननेसे उनके पास नही जाता। तथा चारित्र मोहका उदय होनेसे असंयमी जनोंके प्रति उसका अत्यधिक प्रेम होता है इससे वह प्राणियोंको स्वयं हिंसा करता है, दूसरोंसे कराता है और कोई स्वयं हिंसा करता है तो

---

१. तथा चान्येरत आरभ्य स्त्रीमुद्रा इत्यादि श्लोक पर्यन्तं नास्ति आ० । २. संयतोऽतितरा–आ० मु० ।

वर्तमानेष्वेव रतिं बध्नाति न हिंसादिपरिहारोद्यतेषु । विना रतिं कथं तैः संसर्गस्तत्सेवा वा । सा हि—

संसारोच्छेदकरी प्रशमकरी ज्ञानबुद्धिवृद्धिकरी ।
कीर्तिकरी पुण्यकरी संसेवा साधुवर्गस्य ॥
दर्शनमात्रमपि सतां संसारोच्छेदने भवति बीजं ।
किं पुनरधिकारकृता संसेवा साधुवर्गस्य ॥
तत्सेवा यदि न स्यान्न स्याद् ज्ञानलाभो विना ज्ञानात् ।
हितकर्मप्रतिपत्तिर्न स्यान्न स्यात्ततो मोक्षः ॥
साधूपसेवनं यदि पारम्पर्येण मोक्षमानयति ।
हानिश्रमौ च नृणां कौ साधूपसेवमानानाम् ॥
श्रेयः कथं न यतयो विबुधा श्रेयोर्थिना मनुष्येण ।
अक्षयमिह[1] ये श्रेयो मुधाश्रितेभ्यः प्रयच्छन्ति ॥
इति सततमपोह्य मानमोहाविहपरलोकहितैषिणा नरेण ।
अनवधिकतपोविभूतियुक्ता यतिवृषभा विनयेन सेवितव्याः ॥

यदृच्छया जातेऽपि यतिजनससर्गे न गुणः न चेद्धित शृणुयात् । यथा न वर्षस्य पात एव गुणो नरस्य अपि तु भुवि बीजवापः । तद्वच्छ्रवण गुणो यतिसमीपगमनेन । तदेवं श्रवण दुर्लभ कथयति । समीपमुपगतोऽपि निद्रायति ।

समीपस्थाना वचो यत्किंचित् शृणोति, न रोचते, वा तद्धर्ममाहात्म्यप्रकाशन मोहोदयात् । न जानाति

उसकी अनुमोदना करता है। जो हिंसा आदिमें लगे रहते हैं उन्हीसे प्रेम करता है। जो हिंसासे बचनेमें तत्पर हैं उनमे उसकी प्रीति नहीं होती। बिना प्रीति हुए कैसे उनके साथ सम्बन्ध हो सकता है अथवा कैसे उनकी सेवा कर सकता है?

ऐसे यतिजनोकी सेवा संसारका विनाश करती है, शान्ति प्रदान करती है, ज्ञान और बुद्धिको बढाती है, यश तथा पुण्यको लाती है।

सज्जनोंका दर्शनमात्र भी ससारके विनाश करनेमें बीज होता है फिर साधुवर्गकी अधिकार पूर्वक की गई सम्यक् सेवा का तो कहना ही क्या है? यदि उनकी सेवा न की जाये तो ज्ञानकी प्राप्ति नही हो सकती। ज्ञानके बिना हितकारी कर्मोंका ज्ञान नहीं होता और हितके ज्ञान बिना मोक्ष नही होता। यदि साधुजनोंकी सेवा परम्परासे मोक्ष लाती है तो साधुओंकी सेवा करनेवाले मनुष्योकी हानि और श्रम कैसे सम्भव है? कल्याणका इच्छुक ज्ञानी मनुष्य यतियोंका आश्रय क्यों न लेवे, जो निष्प्रयोजन भी आश्रय लेनेवालोंको अक्षय कल्याण प्रदान करते हैं। इसलिए इस लोक और परलोकमें हित चाहने वाले मनुष्यको निरन्तर मान और मोहको त्यागकर जगत्मे अधिक तपकी विभूतिसे युक्त श्रेष्ठ यतियोंकी विनयपूर्वक सेवा करनी चाहिए।

अचानक यतिजनोंका संसर्ग होनेपर भी यदि उनसे हितकी बात न सुने तो कोई लाभ नहीं है। जैसे वर्षाके होनेसे ही मनुष्यका लाभ नहीं है किन्तु जमीनमें बीज बोने पर लाभ है। उसी तरह यतिजनके समागमका लाभ उनसे हितकी बात सुननेसे है। इस प्रकार आचार्य उपदेश सुननेको दुर्लभ कहते हैं। मनुष्य समीपमें जाकर भी सोता है। समीपमें स्थित जनोंके वचन

---

१ य महाश्रियो ये मुधा—आ०।

वा मतिमान्द्यादत एव तत्र नानुरागोऽस्य । अन्तरेण चानुरागं कथं श्रोतुमुत्सहेत् । तथा चाभाणि—

'साधूनां शिवमार्गदेशकानां संप्राप्तो निलयमपि प्रमाददोषात् ।
आस्ते यो जनवचनानि तत्र शृण्वन् गत्वासौ ह्रदमपि पङ्क एव मग्नः ॥' इति [ ]

सत्यपि श्रवणे ग्रहण विज्ञानं ह्यन्तिरूपितस्यार्थस्य दुष्करं । सौक्ष्म्याज्जीवादिवस्तुतत्त्वस्य कदाचिदप्यश्रुतत्वात् श्रुतज्ञानावरणक्षयोपशमप्रकर्षाभावाच्च । ज्ञाते धर्मतत्त्वे तत्र श्रद्धा दुर्लभा । सोऽयं जिनप्रणीतो धर्मः अहिंसालक्षण., सत्याधिष्ठानः, परद्रव्यापहरणपरिवर्जनात्मकः, नवविधब्रह्मचर्यगुप्तः, परित्यक्ताशेषमूर्छः, विनयमूलः, समीचीनज्ञानपुरःसरः, क्षमामार्दवार्जवसंतोष[1]गुणः, नरकवर्तनीवज्रार्गलभूतः, तिर्यग्गतिलताकुठारः, कठोराशनिर्दुःखाचलशिखराणां, मोहमहामहीरुहोत्पाटनपटुर्मातरिश्वा जरादवानलशिखामुखप्रशमनमुखरो घनाघन, प्रावर्षकः प्रावृषेण्यः, मरणहरिणविशसनपटुर्लब्धचण्डपुण्डरीकः, क्रूररोगोरगाणां विनतासुतः, संपत्सुरापगायां हिमाचलः, यः सेतुरगाधशोकपङ्कस्य, पिता सुभगतायाः, ऐश्वर्यरत्नानामाकरः, कुयोनिवनविप्रनष्टानां पृथुलशिवपुर, इति श्रद्धानं अतिदुर्लभं दर्शनमोहोदयात् । उपशमात् क्षयोपशमात्, क्षयाद्वा दर्शनमोहस्य जातेऽपि श्रद्धाने सयमो दुर्लभतरः प्रत्याख्यानावरणोदयात् । उक्तं च—

थोड़ा बहुत सुनता है किन्तु रुचते नही । अथवा मोहके उदयसे उनके धर्मके महत्त्वका प्रकाशन उसे नहीं रुचता । अथवा बुद्धिकी मन्दतासे समझता नही है । इसीसे उसका उस उपदेशमें अनुराग नही होता । और अनुरागके बिना सुननेका उत्साह कैसे हो सकता है । कहा है—'जो मोक्षमार्गके उपदेशक साधुओंके निवास स्थान पर जाकर भी प्रमादवश वहाँ लोगोंकी बातचीत सुनता हुआ बैठता है वह तालाब पर जाकर भी कीचड़में ही फँस जाता है ।

उपदेश सुनकर भी उसमें कहे गये अर्थका ग्रहण, उसका ज्ञान कठिन है; क्योंकि एक तो जीवादि वस्तु तत्त्व सूक्ष्म है, दूसरे पहले कभी सुना नही, तीसरे श्रुतज्ञानावरणके क्षयोपशमका प्रकर्ष नही है । धर्मतत्त्वको जानने पर भी उसमे श्रद्धा दुर्लभ है । वह यह जिन भगवानके द्वारा कहा गया धर्म अहिंसा रूप है, सत्य उसका आधार है, उसमे परद्रव्यका अपहरण त्यागना होता है, नौ प्रकारके ब्रह्मचर्यसे वह रक्षित है, उसमे समस्त ममत्वभाव छोड़ना होता है । विनय उसका मूल है । समीचीन ज्ञानपूर्वक वह धर्म होता है । क्षमा, मार्दव, आर्जव, सन्तोष उसके गुण है । नरकके मार्गके लिए वज्रकी साकल रूप है । तिर्यञ्चगतिरूपी बेलके लिए कुठार है । दु:खरूप पर्वतोंके शिखरोंके लिए कठोर वज्र है । मोहरूपी महावृक्षको उखाड़नेमें चतुर प्रचण्ड वायु है । जरारूपी जंगलकी आगकी लपेटोंको शान्त करनेके लिए वर्षाकालीन मेघ है । मृत्युरूपी हरिणका वध करनेके लिए प्रचण्ड बाघ है । क्रूर रोगरूपी सर्पोंके लिए गरुड है । सम्पत्तिरूपी गंगाकी उत्पत्तिके लिए हिमवान पर्वत है । गम्भीर शोक रूपी कीचड़से पार उतरनेके लिए पुल है । सौभाग्यका पिता है । ऐश्वर्य रूपी रत्नोंकी खान है, कुयोनिरूपी वनमें भटकते हुए लोगोंके लिए विशाल मोक्ष नगर है ।' इस प्रकारका श्रद्धान दर्शनमोहका उदय होनेसे अति दुर्लभ है । दर्शनमोहका उपशम, क्षयोपशम अथवा क्षयसे श्रद्धान होनेपर भी प्रत्याख्यानावरणका उदय होनेसे संयम उससे भी अधिक दुर्लभ है । कहा है—

---

१. गुणभूषणः आ० मु० ।

दुर्बोधो भवति नरैव तत्त्ववर्मा ज्ञात्वापि प्रयतनमत्र कष्टमेव ।
तज्ज्ञात्वा धृतिमुपलभ्य दृष्टतत्त्वः, सद्धर्मे क्षणमपि मा कृथाः प्रमादम् ॥
भूत्वायं सुकरतरोऽपि पापकार्यात् धर्मोऽभूत्क्षणमपि दुष्करो मनुष्ये ।
आश्चर्यं किमपि न चात्र सन्ति मूढाः स्यादेतद् ध्रुवमिह कर्मणां गुरुत्वम् ॥
काकिण्यामपि गणयन्गुणं महान्तं तद्धेतो श्रममतुलं करोति यत्नात् ।
न त्वज्ञ सुरमनुजर्द्धिमोक्षमूले सद्धर्मे हृदयमपि स्थिरीकरोति ॥
यत्पापे भृशमहिते करोति चेष्टामालस्यं परमहिते च याति धर्मे ।
युक्तं तदपि न तथा भवेत्पृथिव्यां संसारं ननु पुरुषः कथं लभेत ॥ इति । [ ]

एवमपि 'परंपरेण' दुर्लभपरंपरया । 'लद्धूण वि' लब्ध्वापि । 'संयमं' सजम । 'खवगो' क्षपक । किं न 'लभेज्ज सुदिं' न लभते श्रुतिं । 'संवेगकरीं' संसारभयजननी । 'अबहुस्सुदसकासे' अबहुश्रुतस्य सूरे पार्श्वे । तस्माच्छ्रुतवानाचार्य आश्रयणीयः इति प्रस्तुतेन सबन्ध. ॥

'सम्मं सुदिमलभंतो' समीचीना श्रुतिमलभमान । कदा ? मरणकाले । 'अबहुस्सुदसगासे' अबहुश्रुतस्य पार्श्वे । 'चिरमद्ध' चिरं कालं । 'मुत्तिमुवगमित्तावि' मुक्तिशब्देनात्र प्राणेन्द्रियविषयासयमत्याग. परिगृह्यते । तेनायमर्थः—चिरप्रवर्तितसयमोऽपीति । 'परिवडदि' प्रच्यवते । कुतः ? संयमात् । सयमहानिकथनेन चारित्राराधनाया अभाव आख्यायते । सयमात्प्रच्यवते कथमिति चेत्—मनोज्ञानाममनोज्ञाना च विषयाणा सर्वत्र सदा च सानिध्यात् अभ्यन्तरकारणस्य कर्मणोऽपि रागद्वेषमोहपरिणामा. प्रादुर्भवन्तीति ते दुर्निवारा इति वदन्ति ।

मनुष्यके द्वारा धर्मका तत्त्व जानना कठिन है। जानकर भी उसमे प्रयत्नशीलता कष्टकर है। उस धर्मको जानकर, तत्त्व दृष्टिसे सम्पन्न मनुष्यों धैर्य धारण करके समीचीन धर्मके विषयमें एक क्षणके लिए भी प्रमाद मत करो। पापकार्यसे अति सुकर होने पर भी यह धर्म मनुष्योंको क्षणभरके लिए दुष्कर होता है। इसमें कोई आश्चर्य नही है। यह निश्चय ही कर्मोकी गुरुताका फल है। यह मनुष्य एक कौड़ीमे भी महान् गुण मानकर उसके लिए अतुल श्रम करता है। किन्तु अज्ञानी देव और मनुष्योकी ऋद्धिके मूल समीचीन धर्ममें अपने मनको भी स्थिर नही करता। अत्यन्त अहितकारी पापमे तो चेष्टा करता है और परमहितकारी धर्ममें आलस्य करता है। यह ठीक ही है। यदि ऐसा न होता तो पुरुष इस पृथिवी पर संसार कैसे पाता, कैसे सर्वत्र भ्रमण करता।'

इस तरह उत्तरोत्तर दुर्लभ संयमको धारण करके भी क्षपक अल्पज्ञानी आचार्यके पास संसारसे भयभीत करनेवाला उपदेश नही प्राप्त कर सकता। इसलिए शास्त्रज्ञ आचार्यका आश्रय लेना चाहिए, ऐसा प्रस्तुत कथनके साथ सम्बन्ध लगाना चाहिए। अल्पज्ञानी आचार्यके पास समीचीन उपदेश न पाकर चिरकाल तक मुक्तिको—यहाँ मुक्तिशब्दसे प्राणी और इन्द्रियोंके विषयमें असंयमका त्याग लिया जाता है। अतः उसका अर्थ होता है—संयमको धारण करके भी मरते समय संयमसे गिर जाता है। संयमकी हानि कहनेसे उसके चारित्र आराधनाका अभाव कहा है। संयमसे क्यों गिरता है। यह कहते हैं—

मनको प्रिय और अप्रिय लगनेवाले विषयोंके सदा सर्वत्र समीप रहनेसे तथा अभ्यन्तर कारण कर्मका उदय होनेसे रागद्वेष और मोहरूप परिणाम उत्पन्न होते हैं और वे दुर्निवार होते

'अप्पं वंसी छेत्तुं' अल्पवंशः वंशीत्युच्यते गाढावलग्नता हि तत्र संभवति शक्यते वंशी च्छेत्तुं। 'तत्तो' गुल्मात् 'अवकड्ढिदुं' अवक्रष्टुं। 'पुणो' पश्चात्। 'दुक्खं' दुष्करं। 'इय' एवं। 'संजदस्स वि' संयतस्यापि मन.। 'विसएसु' रूपादिविषयं। 'अवकड्ढिदुं' अपक्रष्टुं। 'दुक्खं' दुष्करं। रागद्वेषेभ्यो व्यावर्तयितु अशक्य। एतदुक्तं भवति—रागद्वेषविजयं यदि नाम प्रतिज्ञा कृता तथापि कृतशरीरसल्लेखनस्य क्षुदादिपरीषहैरुपद्रुत य मन्दवीर्यस्य न श्रुतज्ञानप्रणिधानन्तव्यान्तरेण रागद्वेषयो.प्रवृत्तेर्न चारित्राधकता स्यात्। बहुश्रुत. पुन यथास्य रागद्वेषौ न जायेत तथोपदिशति भोगनिर्वेजनीं शरीरनिर्वेजनी वा कथामित्थं—

एकान्तदुःखं निरयप्रतिष्ठा तिर्यक्षु देवेषु च मानुषेषु।
क्वचित्कदाचिन्नु कथंचिदेव सौख्यस्य संज्ञात्र शरीरिणां स्यात् ॥ १ ॥
एकेन जन्मस्वटताऽप्रमेयं शरीरिणा दुःखमवाप्यते यत्।
अनन्तभागोऽपि न तस्य हि स्यात् सर्वं सुखम् सर्वशरीरसंस्थं ॥ २ ॥
तत्रैकजीवः सुखभागमेकं भजेत्कियन्तं जननार्णवेऽस्मिन्।
संचूर्यमाणः परितो वराको वनेऽतिभीतो हरिणो यथैकः ॥ ३ ॥
भवेष्वनन्तेषु सुखे तथापि शरीरिणैकेन समाप्नोये।
एकप्रसूतौ यदवाप्यते तत्कियद्भवेत्तस्य विमृश्यमाणे ॥ ४ ॥
अत्यल्पमप्यस्य तदस्तु तावत्तद्दुःखराशौ पतितं तदीयम्।
स्यात्तद्रसं स्वादुरसं यथाम्बु प्राप्याम्बुदानां लवणार्णवाम्बु ॥ ५ ॥
यच्चाप्यदः सौख्यमितीष्यतेऽत्र पूर्वोत्थदुःखप्रतिकार एषः।
विना हि दुःखात्प्रथमप्रसूतात् न लक्ष्यते किंचन सौख्यमत्र ॥ ६ ॥

हैं। जैसे बाँसका झुण्ड गाढरूपसे बृहद् रहता है उसमेसे छोटा बाँस तो खीचा जा सकता है। किन्तु पीछे उसको अलग करना बहुत कठिन है। उसी तरह संयमीका भी मन रूपादिविषयोंमें फँसनेपर निकालना कठिन होता है अर्थात् रागद्वेषसे हटाना अशक्य होता है। कहनेका आशय यह है कि यद्यपि रागद्वेषको जीतनेकी प्रतिज्ञा की है फिर भी शरीरकी सल्लेखना करनेपर भूख आदिकी परीषहसे पीडित और मन्दशक्ति उस क्षपकके श्रुतज्ञानकी ओर उपयोग नहीं होता। और उसके विना रागद्वेषमे प्रवृत्ति होनेसे चारित्रकी आराधना नहीं होती। किन्तु बहुश्रुत आचार्य उसको रागद्वेष पैदा न हों इस प्रकारकी भोग और शरीरसे वैराग्य करानेवाली कथा इस प्रकार कहता है—

नरक, तिर्यञ्च, मनुष्य और देवोंमें सर्वथा दुःख ही है। उनमें प्राणियोंको सुखकी संज्ञा कभी, कहीं किञ्चित् ही होती है। एक प्राणी नाना जन्मोंमें भ्रमण करते हुए जो अपरिमित दुःख भोगता है उसका अनन्तभाग भी सब सुख सब शरीरोंमे मिलकर भी नही होता। तब इस जन्म-रूपी समुद्रमें एक जीव उस सुखका कितना भाग भोगता है? जैसे वनमें एक अत्यन्त डरा हुआ बेचारा हरिण सब ओरसे त्रस्त हुआ रहता है वैसी ही दशा जीवकी संसारमें है। अनन्तभवोंमें एक प्राणी के द्वारा प्राप्त सुख की जब यह स्थिति है तो उसका विचार करनेपर एक जन्ममें जो सुख प्राप्त होता है वह कितना होगा। अत्यन्त अल्प भी यह सुख दुःखके समुद्रमें गिरकर दुःखरूप ही हो जाता है। जैसे मीठा भी मेघोंका पानी लवण समुद्रके जलमें पड़कर खारा हो जाता है। तथा उसमें जो सुखका आभास होता है वह सुख नही है किन्तु पहले उत्पन्न हुए दुःखका प्रतीकार है।

१. स्य श्रुतज्ञानप्रणिधानात्–आ०।

प्रपीयते ह्यम्बु तृषाप्रशान्त्यै क्षुन्नाशनायाशनमद्यते च ।
वेश्माम्बुवातातपवारणाय गुह्यप्रतिच्छादनमम्बरं च ॥ ७ ॥
शीतापनुत्प्रावरणं च गृहं शय्या च निद्राश्रमनोदनाय ।
यानानि चाध्वश्रमवारणार्थं स्नानं श्रमस्वेदमलापनुत्यै ॥ ८ ॥
स्थानश्रमस्यौषधमासनं च दुर्गन्धनाशाय च गन्धसेवा ।
वैरूप्यनाशाय च भूषणानि कलाभियोगोऽरतिबाधनाय ॥ ९ ॥
तथेह सर्वं परिचिन्त्यमानं भोगाभिधानं सुरमानुषाणाम् ।
दुःखप्रतीकारनिमित्तमेव भैषज्यसेवेव रुगर्दितस्य ॥१०॥
पित्तप्रकोपेन विदह्यमाने द्रव्याणि शीतानि निषेवमाणः ।
मन्येत भोगा इति तानि योऽज्ञः कुर्वीत सोऽन्नादिषु भोगसंज्ञाः ॥११॥
यतश्च नैकान्तसुखप्रदानि द्रव्याणि तोयप्रभृतीनि लोके ।
अतश्च दुःखप्रतिकारबुद्धिं तेषु प्रकुर्यान्न तु भोगसंज्ञाम् ॥१२॥
क्षुधाभिभूतस्य हि यत्सुखाय तदेव तृप्तस्य विषायतेऽन्नम् ।
उष्णार्दितः काङ्क्षति यानि चेह तान्येव विद्वेषकराणि शीते ॥१३॥

किं च स्वचक्रविक्रमाक्रान्तदेवमानवविद्याधरचक्राणां निकटोपनिविष्टाक्षयनवनिधीनां, समधिगतचतुर्दशरत्नानां, चक्रलाञ्छनानां, दशाङ्गभोगानुभवचतुराणां तथा सुधाशनानामप्यनेकसमुद्रोपमजीविनां, अप्रच्यवप्रत्यग्रयौवनानां, सहजस्वेच्छानुसारिदिव्याभरणमाल्यवसनसंपत्सौभाग्यस्कन्धेन मनोनयनवल्लभरूपप्रसूनोज्ज्वलेन

पहले हुए दुःखके बिना उसमें किञ्चित् भी सुख प्रतीत नहीं हो सकता। प्यासकी शान्तिके लिए पानी पिया जाता है और भूखकी शान्तिके भोजन किया जाता है। पानी, हवा और घामसे बचनेके लिए मकान होता है और गुह्यभागको ढकनेके लिए वस्त्र होता है। ठंडसे बचनेके लिए ओढ़ना होता है। निद्रा तथा थकान दूर करनेके लिए शय्या होती है। मार्गके श्रमसे बचनेके लिए सवारी होती है। थकान, पसीना और मल दूर करनेके लिए स्नान होता है। बैठनेके श्रमका इलाज आसन है। दुर्गन्ध दूर करनेके लिए सुगन्धका सेवन होता है। विरूपताको दूर करनेके लिए आभूषण पहने जाते है। अरतिको दूर करनेके लिए कलाएँ है। इस प्रकार विचार करने पर देव और मनुष्योंके जो ये भोग हैं वे सब दुःखको दूर करनेमें ही निमित्त हैं। जैसे रोगसे पीडित रोगी औषधिका सेवन करता है। पित्तके प्रकोपसे शरीरके जलने पर जो शीत पदार्थोंके सेवनको भोग मानता है वही अज्ञानी अन्न आदिको भोग नामसे कहता है। किन्तु यतः लोकमे जल आदि पदार्थ एकान्तसे सुख देनेवाले नही हैं अतः उनको दुःखका प्रतीकार करनेवाला ही कहना चाहिए, भोग नामसे नही कहना चाहिए। जो अन्न भूखसे पीड़ितको सुख देता है वही अन्न पेटभरे व्यक्तिको विषके समान लगता है। गर्मीसे पीडित मनुष्य जिन पदार्थोंकी इच्छा करता है, शीतसे पीड़ित उन्हींसे द्वेष करता है।

तथा अपने चक्ररत्नसे देव, मनुष्य और विद्याधरोंके समूहको वशमें करनेवाले, अक्षय नौ निधियोंके स्वामी और चौदह रत्नोंसे सम्पन्न चक्रवर्तियों की, जो दस प्रकारके भोगोंको भोगनेमें चतुर हैं, भोगोंसे तृप्ति नहीं होती। तथा अनेक सागरोकी आयुवाले अमृतभोजी देवोंकी भी भोगोंसे तृप्ति नहीं होती जो देवांगनारूपी लताओंके वनसे घिरे रहते हैं। वे देवांगना लताएँ भी कैसी हैं? जो जन्मजात अपने इच्छानुसार दिव्य आभरण, माला, वस्त्र सम्पदारूपी सौभाग्य

विलासपल्लवेन, सौकुमार्याङ्कुरेण दिगङ्गनामुखवासायमानसौरभेण विद्रुमाधरपल्लवेन, निबिडोन्नतवृत्तस्तनफलेन, मनोभवदक्षिणानिलप्रेरणान्दोलितेन, ललितभुजशाखाप्रतानेन, स्फुरत्तपनीयमयरशनावेदिकापरीतकामनीरभरितविशालजघनसरोविभूषणेन, मुखरनूपुरभ्रमरकृतकलकलेन देवकन्यालतावनेन परिवृतानामपि परैर्भोगैस्तृप्तिर्न किं पुनरितरमानवानां । अपि च तीव्रतरपुंवेदोदयानलजनितचेतोविदाहानां नैवौषधं वामलोचनासंगमः तापप्रकर्षानुबंधत्वात् । रूपयौवनविलासचातुर्यसौभाग्यादीनां प्रकर्षापकर्षरूपेणावस्थितत्वादङ्गनासु । तास्ताः पश्यतोऽपि उत्कण्ठानुपरतमुपजायमाना विदाहमावहति दुर्वहं । तास्त्यक्त्वा चेमं यान्ति मृतिं वा ढौकन्ते, परैर्बलिभिर्वापन्ह्रियन्ते । स्वयं वा दुर्विमोचतमपातकयमपाशेनाकृष्यमाणो विहाय तानि विवृतमुखो, निर्निमेषनयनो नितान्तरोदनाच्छादितलोहितलोचना जहाति । तासां तनवोऽपि स्फटिकमालेवोपाश्रितगुणग्राहिण्यः तास्वास्थिररागाः संध्यासमयजलदलेखेव दुर्लभाश्च । स्त्रीवस्त्रगन्धमाल्यादींश्च लब्धानप्य[1]पहरन्ति बलिनः इति महद्भयं, न च ते[2]ऽर्पयन्ति । तदर्जनार्थं षट्कर्मसु प्रयतितव्यं । तानि च संदिग्धफलानि बहुतरायासमूलानि हिंसादिसावद्यक्रियापरतन्त्राणि, दुर्गतिवर्धनानि इत्येवमात्मिका भोगनिर्वेदनी । शरीरं पुनरिदमशुचिनिधानं, आत्मनो महान् भारः, न चात्रास्ति किंचित्सारभूतं । संनिहितानेकापायं व्याधिसर्पाणां क्षेत्रं, जराडाकिनीपितृगृहं । किं

स्कन्धवाली हैं, मन और नेत्रोंको प्रिय रूप सौन्दर्यरूपी पुष्पोंसे शोभित हैं, विलासरूपी पत्तोंसे वेष्ठित हैं, सौकुमार्य उनका अंकुर है, दिशारूपी अंगनाओंके मुखकी सुवास जैसी उनकी सुगन्ध है, मूँगेके समान उनके ओष्ठरूपी पल्लव हैं, घने ऊँचे गोल स्तनरूपी फल हैं, कामदेवरूपी दक्षिण वायुकी प्रेरणासे वे हिलती हैं, ललित भुजारूपी उनका शाखाविस्तार है, चमकदार सोनेकी करधनीरूपी वेदिकासे घिरे और कामजलसे भरे विशाल जघनरूपी सरोवरसे भूषित है, बजते हुए नूपुररूपी भौरोंकी गुंजारसे गुंजित हैं। ऐसी देवांगनाओंसे घिरे हुए देवोंकी भी जब भोगोंसे तृप्ति नहीं होती तब अन्य मनुष्योंका तो कहना ही क्या है ? तथा जिनका चित्त तीव्रतर पुरुषवेदके उदयरूपी अग्निसे जल रहा है, स्त्रियोंका संगम उनकी औषधी नहीं है। उससे तो उनका सन्ताप और भी अधिक बढ़ेगा; क्योंकि स्त्रियोंमें रूप, यौवन, विलास, चतुरता, सौभाग्य आदि कमती बढ़ती पाया जाता है। उन-उन स्त्रियोंको देखकर निरन्तर उत्कण्ठा उत्पन्न होकर ऐसी दाह होती है जिसको सहना कठिन होता है। वे स्त्रियाँ पतिको छोड़कर चली जाती हैं, या मर जाती हैं अथवा दूसरे बलवान् पुरुष उन्हे हर लेते हैं। अथवा जिससे छूटना किसी भी तरह सम्भव नहो है उस मृत्युके फन्देसे खिचकर मनुष्य, मुँह खोले, आँखें पथराये हुए स्वयं, अत्यन्त रुदन करनेसे लाल आंख हुई स्त्रीको स्वयं छोड़कर चला जाता है। उन स्त्रियोंके शरीर भी स्फटिककी मालाकी तरह जो पासमें आता है उसीके गुणोंको ग्रहण करनेवाले होते हैं। जैसे सन्ध्याकालीन मेघोंका रंग अस्थिर होता है वैसे ही स्त्रियोंका अनुराग भी अस्थिर होता है। तथा वे दुर्लभ होती हैं क्योंकि स्त्री, वस्त्र, गन्धमाला आदिको बलवान् हर लेते हैं और देते नहीं हैं। इस प्रकार बड़ा भय रहता है। स्त्रीकी प्राप्तिके लिए छह कर्मोंको करना पड़ता है। उनका फल संदिग्ध होता है। उनके लिए बड़ा परिश्रम करना पड़ता है। तथा वे षट्कर्म हिंसा आदि सावद्य क्रियाके अधीन होते हैं उनमें हिंसा आदि होती है। अतः वे दुर्गतिको बढ़ाते हैं। इत्यादि कथा भोगोंसे वैराग्य उत्पन्न करती है। तथा यह शरीर अपवित्रताकी खान है, आत्माके लिए बड़ा भाररूप है। इसमें कुछ भी सार नहीं है इसके साथ अनेक संकट लगे हैं। व्याधिरूपी धानके

---

१. व्याहर—आ० मु०। २. तर्पयन्ति आ० मु०।

य मान्ये कुले जातो विशालकीर्तिः गुणवानपि प्रहीणविभवो नीचं कर्म, पुरो धावनं, प्रेषणकरणं, तदुच्छिष्ट-भोजनं वा करोति शरीरपोषणाय।

नान्तर्गतोऽस्य न बहिर्न च तस्य मध्ये सारोऽस्ति येन मनसा परिगण्यतास्य।
तस्मिन्नसारजनकांक्षितकामसारे कोऽन्यः करिष्यति मनः प्रतिबुद्धसारः॥
वायुप्रकोपजनितैः कफपित्तजैश्च रोगैः सदा दुरितजैः प्रविमथ्यमानः।
देहोऽयमेवमतिदुःखनिमित्तभूतो नाशं प्रयाति बहुधेति कुरुध्व धर्मं॥
संघाततः प्रशिथिलास्थि तदप्रमाढं स्नायुप्रबद्धमशुभं प्रततं शिराभिः।
लिप्तं च मांसरुधिरोदककर्दमेन रोगाहतं स्पृशति को हि शरीरगेहं॥ [ ]
इत्येवमादिका शरीरनिर्वेजनी।

गीदत्थपादमूले होंति गुणा एवमादिया बहुगा।
ण य होइ संकिलेसो ण चावि उप्पज्जदि विवत्ती ॥४४९॥

'गीदत्थपादमूले' गृहीतार्थस्य बहुश्रुतस्य पादमूले। 'होंति बहुगा गुणा' 'गीदत्थो पुण खवयस्स' इत्येवमादिसूत्रपञ्चकनिर्दिष्टाः। 'ण य होइ संकिलेसो' नैव भवति संक्लेशः 'ण चावि उप्पज्जइ विवत्ती' न चोत्पद्यते विपद्रत्नत्रयस्य। तस्मादाधारवानाचार्यः उपाश्रयणीय. इत्युपसंहारः इति आधारव ॥४४९॥

व्यवहारवत्त्वनिरूपणायोत्तरगाथा—

लिए यह खेत है। जरारूपी डाकिनीके लिए श्मसान है। मान्यकुलमें जन्म लेकर विशाल यश अर्जन करके गुणी मनुष्य भी सम्पत्ति नष्ट हो जानेपर शरीर-पोषणके लिए नीचकर्म करता है, आगे-आगे दौड़ता है, मालिकका सन्देश ले जाता है उसका जूठा भोजन करता है। कहा है—

उस शरीरके अन्दर, बाहर और मध्यमें कोई सार नहीं हैं जिससे मन उसे स्वीकार करे। असारजनोंके द्वारा पसन्द किये जानेवाला काम ही जिसमें सार है उस शरीरके सारको जाननेवाला कौन व्यक्ति अपना मन लगायेगा। यह शरीर वायुके प्रकोपसे उत्पन्न हुए और कफ तथा पित्तके प्रकोपसे और पापकर्मसे उत्पन्न हुए रोगोंसे सदा मथा जाता है। इस तरह यह अति दुःख का निमित्त होता और नाशको प्राप्त होता है इसलिए धर्मका आचरण करो।

यह शरीररूपी घर रज और वीर्यके मेलसे बना है। इसकी अस्थियाँ ढीली-ढाली हैं। स्नायुओंसे बँधा है, अशुभ है, सिराओंसे वेष्ठित है, माँस और रुधिररूपी कोचड़ तथा जलसे लीपा गया है। रोगोसे घिरा है इसे कौन छूना पसन्द करेगा।

इत्यादि कथा शरीरसे वैराग्य उत्पन्न करती है ॥४४८॥

गीतार्थं अर्थात् बहुश्रुत आचार्यके पादमूलमे रहनेक 'गीदत्थो पुण खयगो' इत्यादि पाँच गाथासूत्रोमें कहे गये बहुत गुण-लाभ होते हैं। उस क्षपकके परिणामोमें सक्लेश नहीं होता और न रत्नत्रयको लेकर ही कोई विपत्ति आती है अर्थात् उसके रत्नत्रयका विनाश नहीं होता। अतः आधारवान् आचार्यका आश्रय लेना चाहिए। इस प्रकार आधारवत्त्व गुणका कथन हुआ ॥४४९॥

आगे व्यवहारवत्त्वगुणका निरूपण करते हैं—

पंचविहं ववहारं जो जाणइ तच्चदो सवित्थारं ।
बहुसो य दिट्ठकयपट्ठवणो ववहारवं होइ ॥४५०॥

'पंचविहं ववहारं' पञ्चप्रकारं प्रायश्चित्तं । 'जो जाणदि तच्चदो सवित्थारं' यो जानाति तत्त्वतः सविस्तरं । 'बहुसो य दिट्ठकयपट्ठवणो' बहुशश्च दृष्टकृतप्रस्थापनः । आचार्याणां प्रायश्चित्तदानं दृष्टं, स्वयं चान्येषां दत्तप्रायश्चित्तः । 'ववहारवं होदि' व्यवहारवान् भवति । पूर्वार्द्धेन प्रायश्चित्तज्ञानता दर्शिता, कर्मदर्शनं कर्माभ्यासश्च प्रख्यापितः । अशास्त्रज्ञो यत्किंचिद्दात्यात्मनोऽभिलषितं न तेन परः शुद्धयति, शास्त्रज्ञोऽप्यदृष्टकर्माकर्मसु विषादमेति । ततो ज्ञानं, कर्मदर्शनं, कर्माभ्यास इति त्रयो गुणाः यस्य स व्यवहारवानित्युच्यते ॥४५०॥

कः पञ्चविधो व्यवहारः, को वा विस्तर इत्याशङ्कायां तदुभयं निरूपयति—

आगमसुद आणाधारणा य जीदो य हुंति ववहारा ।
एदेसिं सवित्थारा परूवणा सुत्तणिदिट्ठा ॥४५१॥

'आगमसुद आणाधारणा य जीदो य हुंति ववहारा' आगम., श्रुतं, आज्ञा, धारणा, जीव इति व्यवहारा. पञ्च । 'एदेसिं' एतेषां आगमादीनां । परूवणा कीदृशी ? 'सवित्थारा' विस्तारसहिता । 'सुत्तणिद्दिट्ठा' सूत्रेषु चिरंतनेषु निर्दिष्टा । प्रायश्चित्तस्य सर्वजनानामग्रतोऽकथनीयत्वाच्छास्त्रान्तरे च निर्दिष्टत्वादिह नोच्यते ॥४५१॥ उक्त च—

सव्वेण वि जिणवयणं सोदव्वं [2]सड्ढिदेण पुरिसेण ।
छेदसुदस्स हु अत्थो ण होदि सव्वेण सोदव्वो ॥ इति ॥ [ ]

गा०—जो पाँच प्रकारके व्यवहार अर्थात् प्रायश्चित्तको तत्त्वरूपसे विस्तारके साथ जानता है तथा जिनने अनेक आचार्योंका प्रायश्चित्त देना देखा है और स्वयं भी दूसरोंको प्रायश्चित्त दिया है वह आचार्य व्यवहारवान् होता है । गाथाके पूर्वार्द्धसे आचार्यका प्रायश्चित्तका ज्ञाता होना दर्शाया है तथा प्रायश्चित्तकर्मका दर्शन और प्रायश्चित्तकर्मका अभ्यास होना कहा है । जो प्रायश्चित्त शास्त्रका ज्ञाता नहीं होता वह अपनी इच्छानुसार कुछ भी प्रायश्चित्त देता है किन्तु उससे दूसरेके दोषकी विशुद्धि नहीं होती । प्रायश्चित्तशास्त्रका ज्ञाता होते हुए भी यदि उसने अन्य आचार्योंको प्रायश्चित्त देते न देखा हो तो प्रायश्चित्त देते समय खेदखिन्न होता है । इसलिए प्रायश्चित्तशास्त्रका ज्ञान, प्रायश्चित्तकर्मका देखना तथा प्रायश्चित्त देनेका अभ्यास ये तीन गुण जिसमें होते है उस आचार्यको व्यवहारवान् कहते है ॥४५०॥

पाँच प्रकारका व्यवहार कौन-सा है ? और उसका विस्तार क्या है? ऐसी आशंका होनेपर दोनोंको कहते हैं—

गा०—आगम, श्रुत, आज्ञा, धारण और जीव ये पाँच प्रकारका व्यवहार है । इन आगम आदिका विस्तारसे कथन प्राचीन सूत्रोंमें कहा है । प्रायश्चित्त सब जनोके आगे नही कहा जाता, तथा अन्य शास्त्रोंमें उसका कथन है इसलिए यहाँ नहीं कहा । कहा है—'समस्त श्रद्धालु पुरुषोंको जिनागम सुनना चाहिए । किन्तु छेदशास्त्रका अर्थ सबको नही सुनाना चाहिए' ॥४५१॥

---

१. अदृष्ट कर्मसु—आ० । २. सुद्धिदेण—आ० ।

व्यवहारवानसौ परालोचितापराधस्य कथं प्रायश्चित्तं ददातीत्याशङ्कायां प्रायश्चित्तदानक्रमनिरूपणार्थं गाथाद्वयम्—

दव्वं खेत्तं कालं भावं करणपरिणाममुच्छाहं ।
संघदणं परियायं आगमपुरिसं च विण्णाय ॥४५२॥

'दव्वं खेत्तं कालं भावं करणपरिणाममुच्छाहं' द्रव्यमित्यादीनां विज्ञायेत्यनेन संबन्धः। तत्र द्रव्यं त्रिविध सचित्तमचित्त मिश्रमिति। पृथिवी, आपस्तेजो वायुः, प्रत्येककायाः, त्रसाश्चेति सचित्तद्रव्यमित्युच्यते। तृण-फलकादिकं जीवैरनुन्मिश्र अचित्त। संसक्त उपकरणं मिश्रं। एवं त्रिविधा द्रव्यप्रतिसेवना। वर्षासु क्रोशार्द्ध-गमनमिष्टं अर्धयोजनं वा। ततोऽधिकक्षेत्रगमनं क्षेत्रप्रतिसेवना। अथवा [1]प्रतिषिद्धक्षेत्रगमनं, विरुद्धराज्य-

---

विशेषार्थ—पं० आशाधरजीने अपनी मूलाराधना टीकामें इनका अर्थ इस प्रकार किया है—ग्यारह अंगोंमे कहे गये प्रायश्चित्तको आगम कहते हैं। चौदह पूर्वोंके कहेको श्रुत कहते हैं। अन्य स्थानमें स्थित अन्य आचार्यके द्वारा अन्य स्थानमे स्थित अन्य आचार्यके द्वारा आलोचित अपने गुरुके दोषको ज्येष्ठ शिष्यके हाथ भेजना आज्ञा है। कोई एकाकी मुनि पैरोंमे चलनेकी शक्ति न होनेसे दोष लगनेपर वहीं रहते हुए पूर्वनिश्चित प्रायश्चित्तको करता है यह धारणा है। बहत्तर पुरुषोंके स्वरूपको लेकर वर्तमान आचार्योंने जो शास्त्रमे कहा है वह जीत है। श्वेताम्बरीय आगमोमें भी व्यवहारके ये ही पाँच भेद किये हैं। आगमव्यवहारी छह हैं—केवल-ज्ञानी, मनःपर्ययज्ञानी, अवधिज्ञानी, चतुर्दशपूर्वी, दसपूर्वी और नौपूर्वी। शेष पूर्वधारी और ग्यारह अंगके धारी श्रुतसे व्यवहार करते हैं। आगमव्यवहारी आगमसे ही व्यवहार करता है अन्यसे नहीं करता। यह भी चर्चा आती है कि केवलीका व्युच्छेद हो जानेपर चौदह पूर्वधरोंका भी विच्छेद हो गया अतः प्रायश्चित्तदायक न रहनेसे प्रायश्चित्तका विच्छेद हो गया। किन्तु इसका निराकरण किया है। जो व्यवहार एक बार प्रवृत्त हुआ, दुबारा और तिबारा प्रवृत्त हुआ उसे महाजनने स्वीकार किया। वही पाँचवाँ जीतकल्प व्यवहार है। जीत अर्थात् अवश्य ही कल्प-आचार जीतकल्प है। द्रव्य क्षेत्र काल भाव, संहनन आदिकी हानिको लक्षमे रखकर दिया गया प्रायश्चित्त जीत है ॥४५१॥

वह व्यवहारवान् आचार्य दूसरेके आलोचित दोषका प्रायश्चित्त कैसे देता है? ऐसी आशंका किये जाने पर दो गाथासे प्रायश्चित्त देनेके क्रमका निरूपण करते है—

गा०—द्रव्य, क्षेत्र, काल, भाव, करण, परिणाम, उत्साह, शरीरबल, प्रवज्याकाल, आगम और पुरुषको जानकर प्रायश्चित्त देते हैं ॥४५२॥

टी०—द्रव्यके तीन भेद है—सचित्त, अचित्त और मिश्र। पृथिवी, जल, आग, वायु, प्रत्येककाय, अनन्तकाय और त्रस इन्हे सचित्त द्रव्य कहते हैं। जीवोसे रहित तृण, फलक आदि अचित्त द्रव्य है। जीवोंसे सम्बद्ध उपकरण मिश्र हैं। इस प्रकार द्रव्य प्रतिसेवनाके तीन भेद हैं। वर्षामें आधा कोस अथवा आधा योजन जाना सम्मत है। उससे अधिक क्षेत्रमे जाना क्षेत्र प्रति-

---

१. प्रतिद्वेष–आ०।

गमनं, छिन्नाध्वगमनं, ततो रक्षणीयागमनं तस्यार्द्धों यदा क्रान्तः। उन्मार्गेण वा गमनं। अन्तःपुरप्रवेशः। अननुज्ञातगृहभूमिगमनं। इत्यादिना क्षेत्रप्रतिसेवा। आवश्यककालादन्यस्मिन्काले आवश्यककरणं वर्षावग्रहातिक्रमः इत्यादिका कालप्रतिसेवना। दर्पः, प्रमादः, अनाभोगः, भयं, प्रदोषः इत्यादिकेषु परिणामेषु प्रवृत्तिर्भावसेवा। एवमपराधनिदानं ज्ञात्वा अथवा प्रायश्चित्तं प्रकृतेर्द्रव्यादिकं ज्ञात्वा रसबहुलं, धान्यबहुलं, शाकबहुलं यवागूशाकमात्रं वा पानकमेव वेत्याहारे द्रव्यपरिज्ञानं। प्रायश्चित्तसमाचरतः अनूपजांगलसाधारणक्षेत्रपरिज्ञानं। धर्मशीतसाधारणकालज्ञानं। क्षमामार्दवार्जवसंतोषकादिकं भावं क्रोधादिकं वा। करणपरिणामं प्रायश्चित्तक्रियायां परिणामं। सहवासार्थं किमयं प्रायश्चित्ते प्रवृत्तः उत यशोर्थं, लाभार्थमुत कर्मनिर्जरार्थं इति। 'उच्छाहं' उत्साहं। 'संघयणं' शरीरबलं। 'परियायं' प्रव्रज्याकालं। 'आगमं' अल्पं श्रुतमस्य बहु वेति। पुरिसं [1]जावतरोभयासरंगो इत्येवमादिकं विकल्पं च ज्ञात्वा ॥४५२॥

मोत्तूण रागदोसे ववहारं पट्ठवेइ सो तस्स।
ववहारकरणकुसलो जिणवयणविसारदो धीरो ॥४५३॥

'मोत्तूण' त्यक्त्वा। 'रागदोसे' रागं द्वेषं च मध्यस्थः सन्निति यावत्। 'ववहारं पट्ठवेदि सो तस्स' प्रायश्चित्तं ददाति स सूरिस्तस्मै। 'ववहारकरणकुसलो' प्रायश्चित्तदानकुशलः। 'जिणवयणविसारदो' जिनप्रणीते आगमे निपुणः। धीरो धृतिमान् ॥४५३॥

सेवना है। अथवा वर्जित क्षेत्रमें जाना, विरुद्ध राज्यमें जाना, कटे-टूटे मार्गसे जाना, ऐसे मार्गका आधा भाग जानेपर वहाँसे अरक्षणीय मानकर लौट आना अथवा उन्मार्गसे जाना, अन्तःपुरमें प्रवेश करना, जहाँ जानेकी आज्ञा नहीं है ऐसी गृहभूमिमें जाना, इत्यादिके द्वारा क्षेत्र प्रतिसेवना करना। आवश्यककालमें छह आवश्यक न करके अन्यकालमें करना, वर्षाकालके नियमका उल्लंघन करना, इत्यादि काल प्रतिसेवना है। घमण्ड, प्रमाद, अनाभोग, भय, प्रदोष आदि परिणामोंमें प्रवृत्ति भाव सेवा है। इस प्रकार द्रव्य प्रतिसेवना आदिके द्वारा अपराधका निदान जानकर प्रायश्चित्त देना चाहिए। अथवा प्रकृतिके द्रव्यादिको जानकर प्रायश्चित्त देना चाहिए। आहारके सम्बन्धमें ज्ञान होना द्रव्यपरिज्ञान है, रसबहुल—जिसमें रसकी अधिकता हो, धान्यबहुल—जिसमें अन्नकी अधिकता हो, शाकबहुल—जिसमें शाकसब्जीकी अधिकता हो, यवागू—हलवा लपसी, शाकमात्र अथवा पानकमात्र। आहारके साथ दोषीकी प्रकृति जानकर उसे आहार बतलाना चाहिये। प्रायश्चित्त देते समय क्षेत्रका भी ज्ञान होना चाहिये कि यह क्षेत्र जलबहुल है या जलकी कमी वाला है अथवा साधारण है। कालका भी ज्ञान होना चाहिये कि यह गर्मीके दिन हैं या शीतके दिन हैं अथवा साधारण हैं। क्षमा, मार्दव, आर्जव, सन्तोष आदि भाव हैं। अथवा क्रोधादि भाव हैं। करण परिणामका अर्थ है प्रायश्चित्त करनेके परिणाम। यह प्रायश्चित्त क्यों लेना चाहता है? क्या यह साथ रहनेके लिए प्रायश्चित्तमें प्रवृत्त हुआ है अथवा यश, लाभ या कर्मोंकी निर्जराके लिए प्रवृत्त हुआ है। उसका प्रायश्चित्तमे उत्साह कैसा है, शरीरमें बल कितना है, दीक्षा लिए कितना काल हुआ है, शास्त्रज्ञान थोड़ा है या बहुत है। और वैराग्यमें तत्पर है या नहीं ॥४५२॥

गा०—प्रायश्चित्त देनेमें कुशल और जिन भगवान्‌के द्वारा कहे गये आगममे निपुण धीर वह आचार्य रागद्वेषको त्याग अर्थात् मध्यस्थ होकर उसको प्रायश्चित्त देता है ॥४५३॥

१. जाव जाव तरो—आ०। जावावरो भयान्तरंगो—मु०।

अज्ञात्वा प्रायश्चित्तग्रन्थं यो ददाति तस्य दोषं संकीर्तयत्युत्तरगाथया—

ववहारमयाणंतो ववहरणिज्जं च ववहरंतो खु।
उस्सीयदि भवपंके अयसं कम्मं च आदियदि ॥४५४॥

'**ववहारं अयाणंतो**' प्रायश्चित्तं ग्रन्थतोऽर्थतश्च कर्मतश्चाविद्वान्। '**ववहरणिज्जं च**' व्यवन्ह्रियते अतिचारविनाशार्थिनेति व्यवहरणीयमालोचनादिकं प्रायश्चित्त इति नवधा। '**ववहरंतो**' प्रयच्छन्। **उस्सीयदि** अवसीदति। क्व ? '**भवपंके**' संसारपङ्के। '**अयसं आदियदि**' अयश तुण्डाचार्योऽयं यत्किंचन ददाति नायं परं शोधयति, संसारभीरुयतिजनं वृथैव क्लेशयति इति। '**कम्मं च आदियदि**' बध्नाति कर्म दर्शनमोहनीयाख्यं उन्मार्गोपदेशात् सन्मार्गविनाशनाच्च। तस्मादज्ञो न दद्यात्प्रायश्चित्तमिति सूत्रार्थः। आचार्याणामियं शिक्षा। वयमाचार्या यदस्माभिर्दत्तं तदिदं [1]कुर्वन्तोति यत्किंचन न वक्तव्यम्। श्रुतरहस्या प्रायश्चित्तदाने [2]यदलमिति ॥४५४॥

जह ण करेदि तिगिंच्छं वाधिस्स तिगिंच्छओ अणिम्मादो।
ववहारमयाणंतो ण सोधिकामं वि सुज्झेइ ॥४५५॥

यदि नाम मुखरा मुग्धानेकशिष्यजनपरिवृतत्वमात्रेणोपजाताहंकारा मूर्खलोकेनादृता सन्ति सूरयस्ते भवद्भिः शुद्धयर्थं न ढौकनीया इति शिक्षयति— '**जह ण करेदि तिगिंच्छ**'–यथा न करोति चिकित्सा **वाहिस्स** व्याधे.। '**तिगिंच्छगो**' वैद्यो। '**अणिम्मादो**' अनिपुण। '**तहा**' तथा। '**ववहारमजाणंतो**' प्रायश्चित्तमजानन्सूरि। '**सोधिकामं**' रत्नत्रयशुद्धयभिलाषं। **ण सोधेदि** खु न शोधयत्येव ॥४५५॥

जो प्रायश्चित्त शास्त्रको जाने बिना प्रायश्चित्त देता है उसका दोष कहते हैं—

गा०-टी०—जो प्रायश्चित्त शास्त्रको ग्रन्थरूपसे, अर्थरूपसे और कर्मरूपसे नहीं जानता, तथा अतिचारके विनाशके इच्छुक मुनिके द्वारा जिसका व्यवहार किया जाता है वह व्यवहरणीय है। आलोचना आदि नौ प्रकारका प्रायश्चित्त, उसे जो देता है वह आचार्य संसाररूपी कीचड़में फँसकर दुःख उठाता है तथा अपयश पाता है। लोग कहते हैं यह तुण्डाचार्य है जो कुछ भी प्रायश्चित दे देता है, दूसरेके दोषकी विशुद्धि नहीं करता। संसारसे भीरु साधुओंको व्यर्थ ही कष्ट देता है। तथा उन्मार्गका उपदेश देनेसे और सन्मार्गका नाश करनेसे दर्शनमोहनीय नामक कर्मका बन्ध करता है। अतः अज्ञानीको प्रायश्चित्त नहीं देना चाहिये यह इस गाथाका अभिप्राय है। यह आचार्योंकी शिक्षा है। हम आचार्य हैं। हमने जो प्रायश्चित्त दिया है उसे करो, इस प्रकार जो कुछ भी नहीं बोलना चाहिये। प्रायश्चित्त शास्त्रके ज्ञाताओं ही प्रायश्चित्त देनेमें समर्थ होते हैं ॥४५४॥

जो वाचाल आचार्य मूढ़ अनेक शिष्योंसे घिरे रहने मात्रसे गर्वित हैं और मूर्ख लोग जिनका आदर करते हैं, प्रायश्चित्तके लिए उनके पास नहीं जाना चाहिये यह शिक्षा देते हैं—

गा०—जैसे अनिपुण वैद्य व्याधिकी चिकित्सा नहीं करता, वैसे ही प्रायश्चित्तको न जाननेवाला आचार्य रत्नत्रयकी विशुद्धिके इच्छुकको शुद्ध नहीं करता ॥४५५॥

---

१. कुर्वितीति आ०। कुर्विति मु०। २. यतध्वमिति आ० मु०।

तम्हा णिव्विसिदव्वं ववहारविदो हु पादमूलम्मि ।
तत्थ हु विज्जा चरणं समाधि सोधी य णियमेण ॥४५६॥

'तम्हा णिव्विसिदव्वं' तस्मात्स्थातव्यं । 'ववहारवदो खु' व्यवहारवतः एव । 'पादमूलम्मि' पादमूले । 'तत्थ खु' तत्र व्यवहारवित्पादमूले । 'विज्जा' विद्या ज्ञानं भवति । 'चरणं समाधी य' चारित्रं समाधिश्च । 'सोधी य' शुद्धिश्च । 'णियमेण' निश्चयेन भवति । ववहारवं ॥४५६॥

पकुव्वी एतद्व्याचष्टे—

जो णिक्खमणपवेसे सेज्जासंथारउवधिसंभोगे ।
ठाणणिसेज्जागासे अगदूण विकिंचणाहारे ॥४५७॥

'जो णिक्खमणपवेसे' यो यः सूरिः क्षपकस्य वसतेर्निःक्रमणे प्रवेशे वा । 'सेज्जासंथारउवधिसंभोगे' वसतेः, संस्तरस्य, उपकरणस्य शोधने । 'ठाणणिसेज्जागासे' स्थाने, निषद्यावकाशे, 'अगदूणविकिंचणाहारे' शय्यायां, शरीरमलाहरणे, भक्तपानढौकने च ॥४५७॥

अब्भुज्जदचरियाए उवकारमणुत्तरं वि कुव्वंतो ।
सव्वादरसत्तीए वट्टइ परमाए भत्तीए ॥४५८॥

'अब्भुज्जदचरियाए' क्षपकस्य अभ्युद्यतचर्यया 'उपकारं' अनुग्रहं हस्तावलम्बनादिकं । 'अणुत्तरं पकुव्वंतो' उत्कृष्टं प्रकुर्वन् । 'सव्वादरसत्तीए' सर्वादरशक्त्या । 'भत्तीए' भक्त्या । 'परमाए' उत्कृष्टया । 'वट्टदि' वर्तते । स प्रकुर्वकः सूरिर्भवति इति संबन्धः ॥४५८॥

इय अप्पपरिस्समगणित्ता खवयस्स सव्वपडिचरणे ।
वट्टंतो आयरिओ पकुव्वओ णाम सो होइ ॥४५९॥

'इय' एवं । 'अप्पपरिस्समं' आत्मपरिश्रमं । 'अगणित्ता' अपरिगणय्य । 'खवयस्स' आराधकस्य । 'सव्वपडिचरणे' सर्वशुश्रूषायां । 'वट्टंतो' वर्तमानः । 'आयरिओ' आचार्यः । 'पकुव्वओ णाम' प्रकारको नाम 'सो होदि' स भवति । पकुव्वी गदं ॥४५९॥

इसलिये क्षपकको प्रायश्चित्तके ज्ञाता आचार्यके पादमूलमें ही ठहरना चाहिये। उनके पादमूलमें रहनेसे ज्ञान, चारित्र, समाधि और शुद्धि निश्चयसे होती है ॥४५६॥

इस प्रकार व्यवहारवान्‌का कथन समाप्त हुआ। प्रकुर्वित्व गुणका कथन करते हैं—

गा०—जो आचार्य क्षपकके वसतिसे निकलने अथवा उसमें प्रवेश करनेमें, वसति संस्तर और उपकरणके शोधनमें, खड़े होने, बैठने, सोने, शरीरसे मल दूर करनेमें, खानपान लानेमें, इन पण्डितमरण सम्बन्धी चर्यामें समस्त आदर शक्तिसे और उत्कृष्ट भक्तिसे हस्तावलम्बन आदि द्वारा उत्कृष्ट उपकार करते हैं, वह आचार्य प्रकुर्वक होते हैं ॥४५७-४५८॥

गा०—इस प्रकार अपने श्रमकी परवाह न करके जो आचार्य क्षपकको सब प्रकारसे सेवा करते हैं वह प्रकारक नामसे कहे जाते हैं ॥४५९॥

---

१. प्रकुर्वको मु० ।

क्षपकविज्ञापरा गाथा—

खवओ किलामिदंगो पडिचरयगुणेण णिव्वुदिं लहइ ।
तम्हा णिव्विसिदव्वं खवएण पकुव्वयसयासे ॥४६०॥

'खवओ' क्षपकः । 'किलामिदंगो' ग्लानशरीरः । 'पडिचरयगुणेण' शुश्रूषागुणेनैव, 'णिव्वुदिं लहदि' सुखं लभते । यस्मात् । तम्हा—तस्मात् णिव्विसिदव्वं-निर्वेष्टव्यं । 'खवएण' क्षपकेण । पकुव्वयसयासे विनयकारिणः समीपे । पकुव्वीगदं ॥४६०॥

आयोपायविदंसीत्येतद्व्याख्यानायोत्तरप्रबन्धः—

खवयस्स तीरपत्तस्स वि गुरुगा होंति रागदोसा हु ।
तम्हा छुहादिएहिं य खवयस्स विसोत्तिया होइ ॥४६१॥

'खवगस्स' क्षपकस्य । 'तीरपत्तस्स वि' तीरं प्राप्तस्यापि । 'रागदोसा गुरुगा होंति' रागद्वेषौ गुरू तीव्रौ भवतः । 'तम्हा' तस्मात् 'छुहादिएहिं य' क्षुत्पिपासादिभिः परीषहैश्च कारणभूतैः । 'खवगस्स' क्षपकस्य 'विसोत्तिया होइ' अशुभपरिणामो जायते ॥४६१॥

थोलाइदूण पुव्वं तप्पडिवक्खं पुणो वि आवण्णो ।
खवओ तं तह आलोचेदुं लज्जेज्ज गारविदो ॥४६२॥

'थोलाइदूण पुव्वं' प्रव्रज्यादिक्रमेण तद्दिनपर्यवसानं रत्नत्रयातिचारं निवेदयामीति पूर्वं प्रतिज्ञाय । 'तप्पडिवक्खं' तस्यापराधप्रत्याख्यापनस्य प्रतिपक्षेन निवेदनं । 'आवण्णो' आपन्नः प्राप्तः । 'खवगो तं तह आलोचेदुं लज्जेज्ज गारविदो' क्षपकस्तमपराधं तथा स्वाचरितक्रमेण गदितुं जिन्हेति संभावनागुरुः ॥४६२॥

तो सो हीलणभीरू पूयाकामो ठवेणइत्तो य ।
णिज्जूहणभीरू वि य खवओ वि न दोसमालावे ॥४६३॥

'तो' पश्चात् । 'सो' क्षपक. । 'हीलणभीरू' ज्ञातमदीयापराधा इमे मामवजानन्ति इति अवज्ञाभीरुः ।

गा०—यत: रोगसे ग्रस्त क्षपक आचार्यके सेवागुणसे सुख प्राप्त करता है, अत क्षपकको सेवा करनेवाले आचार्यके समीप ठहरना चाहिये ॥४६०॥

प्रकारकका कथन समाप्त हुआ ।

आय अपाय विदर्शित्व गुणका कथन करते हैं—

गा०—यद्यपि क्षपक संसार समुद्रके किनारे पहुंच जाता है फिर भी उसे तीव्र रागद्वेष होते हैं। अत: भूख प्यासकी परीषहोके कारण क्षपकके अशुभ परिणाम होते हैं ॥४६१॥

गा०—क्षपक पूर्वमें प्रतिज्ञा करता है कि दीक्षा लेनेके दिनसे समाधि धारण करनेके दिन तक रत्नत्रयमे जो दोष लगे हैं उन सबको मैं गुरुके सामने निवेदन करूँगा। ऐसी प्रतिज्ञा करके भी जब अपराध निवेदनका समय आता है तो अपना बड़प्पन जानकर क्षपक उस अपराधको जिस प्रकार वह किया गया उसी प्रकारसे कहनेमे लज्जा करता है ॥४६२॥

गा०—पश्चात् वह क्षपक डरता है कि मेरे अपराधको जानकर ये सब मेरी अवज्ञा

'पूजाकामो य' वन्दनाभ्युत्थानं इत्यादिकायां पूजायामभिलाषवान् । सापराधं न पूजयन्तीति । 'ठवणइत्तो य' आत्मानं सुचरितत्वे स्थापयितुकामश्च । 'णिज्जूहणभीरू वि य' मामिमे सापराधं त्यजन्तीति त्यागभीरुश्च । 'चयणो वि' स्वापराधं शरीरं च त्यजामीति प्रवृत्तोऽपि । 'आलोचेज्ज दोसं' न कथयेद् गुरोरात्मीयं दोषं ॥४६३॥

तस्स अवायोपायविदंसी खवयस्स ओघपण्णवओ ।
आलोचेंतस्स अणुज्जगस्स दंसेइ गुणदोसे ॥४६४॥

'तस्स खवयस्स गुणदोसे दंसेदित्ति पदसंबन्धः । तस्य अनालोचकस्य आलोचनायां गुणमितरत्र दोषं च दर्शयति । कः ? 'आयोपायविदंसी' आयोपायविदर्शी सूरिः । अपायो रत्नत्रयस्य विनाशः उपायो लाभ. । उपशब्दोऽनर्थकः इति कृत्वा रत्नत्रयस्य आउ शुद्धिर्लाभः तदुभयदर्शी । 'ओघपण्णवगो' सामान्यं प्रज्ञापयन् यो न कथयति स्वापराधं तस्यायं दोष इति । 'आलोचेंतस्स वि' अपि शब्दोऽत्र लुप्तनिर्दिष्टो आलोचनां कुर्वतोऽपि । 'अणुज्जगस्स' मायावतः ॥४६४॥

मायायां दोषं याथात्म्यकथने गुणं च दर्शयति । एवं दोषप्रकटनं कर्तव्यमित्याचष्टे—

दुक्खेण लहइ जीवो संसारमहण्णवम्मि सामण्णं ।
तं संजमं खु अबुहो णासेइ ससल्लमरणेण ॥४६५॥

'दुक्खेण लहइ जीवो' क्लेशेन लभते जीवः । किं ? 'सामण्णं' श्रामण्यं चारित्रं संयमं । क्व ? 'संसार-महण्णवम्मि' चतुर्गतिपरिभ्रमणमहार्णवे दुष्प्रापपारतया संसारो महार्णव इव । 'खु' शब्द. 'णासेइ' इत्यतः परतो अवधारणार्थो द्रष्टव्यः । तं संयमं नाशयत्येव 'बुधः' अविद्वान् । 'ससल्लमरणेण'—यद्यपि शल्यमनेक-प्रकारं मिथ्यामायानिदानशल्यभेदेन तथापीह प्रकरणवशान्मायाशल्यं गृह्यते, मायाशल्यसहितेन मरणेनेत्यर्थः ।

करेंगे । उसकी अभिलाषा अपनी पूजा कराने की है कि मेरी वन्दना करें, मेरे लिए उठकर खड़े होवें । किन्तु अपराध ज्ञात होने पर तो पूजा नहीं करेंगे । वह अपनेको सम्यक् आचारमें स्थापित करना चाहता है । किन्तु अपराधी जानकर यह मुझे त्याग देंगे, इससे डरता भी है । अतः अपने अपराध और शरीरको त्यागनेके लिए तत्पर होते हुए भी वह गुरुसे अपने दोषोंको नहीं कहता ॥४६३॥

गा०—उस अपने दोषोंकी आलोचना न करनेवाले अथवा आलोचना करते हुए भी माया-चार पूर्वक आलोचना करनेवाले क्षपकको आय और उपायको दिखलाने वाले आचार्य आलोचना-के गुण और आलोचना न करनेके दोष सामान्यसे बतलाते हैं कि जो अपना अपराध नहीं कहता उसको यह दोष होता है ॥४६४॥

टी०—रत्नत्रयके विनाशको अपाय और रत्नत्रयके लाभको उपाय कहते हैं । 'उप' शब्द व्यर्थ है' ऐसा मानकर रत्नत्रयका 'आऊ' अर्थात् शुद्धि और लाभ दोनोंको दिखानेवाले आचार्य आयोपायविदर्शी होते हैं ॥४६४॥

गा०-टी०—इस संसारका पार पाना बड़ा कठिन है इसलिये चारों गतिमें भ्रमण रूप संसारको महासमुद्रकी उपमा दी है । उसमें भ्रमण करते हुए 'श्रामण्य' अर्थात् चारित्रको—संयमको जीव बड़े कष्टसे प्राप्त करता है । अज्ञानी उस समयको सशल्य मरणसे नष्ट कर देता है । यद्यपि मिथ्यात्व, माया और निदानके भेदसे शल्यके अनेक भेद हैं । तथापि यहाँ प्रकरणवश मायाशल्य

ननु समानतायाः प्रस्तुतत्वात् सामण्णं इत्यनेन तत् परित्यज्य कथमन्यदुपन्यस्तं 'तं संजममिति'। अस्यायमभिप्रायः[1] श्रमणशब्दस्य द्रव्येऽप्रवृत्तिनिमित्तं यच्छ्रामण्यं किं च तत्संयमः। तथाहि सावद्यक्रियापरो नायं श्रमण इति लोको वदति। ततो युक्तमेव भावशल्यमात्मन्यवस्थितमिव[2] दोषमावहतीति दृष्टान्तमुखेन कथयति—॥४६५॥

जह णाम दव्वसल्ले अणुद्धदे वेदणुद्दिदो होदि।
तह भिक्खू वि ससल्लो तिव्वदुहट्टो भयोव्विग्गो ॥४६६॥

'जह णाम' यथा नाम स्फुटं। **'दव्वसल्ले'** शरकण्टकादौ **'अणुद्धदे'** अनुद्धृते अनिराकृते। **'वेदणुद्दिदो होदि'** वेदनार्तो भवति। **'तह'** तथा। **'भिक्खु वि'** भिक्षुरपि। **'ससल्लो'** भावशल्यवान्। **'तिव्वदुहिदो होदि'** तीव्रदुःखितो भवति। **'भयोव्विग्गो'** भयेन चलो भवति। एवमनुद्धृतशल्यो गमिष्यामि कां गतिमिति भयमस्य जायते। एवमर्थं दृष्टान्तेनाविरोधयति ॥४६६॥

कंटकसल्लेण जहा वेधाणी चम्मखीलणाली य।
रप्फइयजालगत्तागदो य पादो पडदि पच्छा ॥४६७॥

'कंटकसल्लेण जहा' कण्टकाख्येन शल्येन करणभूतेन यथा। **'वेधाणी चम्मखीलणाली य'** व्यधनचर्मकीलनालिकाश्च भवन्ति। **'रप्फइयजालगत्तागदो य'** कुथितवल्मीकच्छिद्राणि प्राप्तः स पादः **'पडदि'** पतति पश्चाद्यथा ॥४६७॥

एवं तु भावसल्लं लज्जागारवभएहिं पडिबद्धं।
अप्पं पि अणुद्धरियं वदसीलगुणे वि णासेइ ॥४६८॥

लिया है। मायाशल्य सहित मरणसे अज्ञानी संयमको नष्ट करता है।

शङ्का—यहाँ तो 'सामण्ण' शब्दसे समानता ली गई है। उसे छोड़कर 'संयम' क्यों कहा ?

'**चदुरंगाए सेणाए णायगो**' चतुरङ्गायाः सेनाया नायको । '**जह पवत्तगो होदि**' यथा प्रवर्तको भवति । '**तह भावणमोक्कारो**' तथा भावनमस्कारः । '**मरणे**' मरणगोचरः । '**तवणाणचरणाणं**' तपोज्ञानचरणाना । क्षायिकसम्यक्त्वज्ञानदर्शनवीर्यगुणात्मका अर्हन्त इत्येवं श्रद्धानात्मको भावनमस्कारः सम्यग्दर्शनत्वात् समीचीन तपो, ज्ञान, चारित्रं च प्रवर्तयति । न ह्याप्तगुणश्रद्धानं विना शब्दश्रुतस्य प्रामाण्यमयं व्यवस्थापयितुमीशः । वक्तृप्रामाण्याद्विना वचनप्रामाण्यासिद्धे. । न [1]ह्यतीन्द्रियविषयज्ञानमयथार्थमिदमेतद्यथार्थमिति वा विवेक्तु शक्यते अस्मदादिना । अर्थयाथात्म्यवेदिनो वीतरागद्वेषस्य च यतो वचस्ततो यथार्थमेव विज्ञानं जनयति, नायथार्थमिति समीचीनज्ञानस्य सम्यग्ज्ञानपुरस्सरतया चरणं तपश्च समीचीनं सत्कर्मापनोदे निमित्तं

ससारका उच्छेद करनेमें समर्थ कहा है ॥७५४॥

नमस्कारके विना भी सम्यक्त्व ज्ञान और चारित्र संसारका उच्छेद करते हैं ? ऐसी आशंकामें उत्तर देते हैं—

गा०—भाव नमस्कारके विना जो सम्यक्त्व ज्ञान और चारित्र होते हैं वे संसारका उच्छेद करनेमें समर्थ नही है ॥७५५॥

यदि ऐसा है तो 'सम्यग्दर्शन सम्यग्ज्ञान सम्यक् चारित्र मोक्षका मार्ग है' इस सूत्रके साथ विरोध आता है क्योंकि आप नमस्कार मात्रको ही कर्मोंके विनाशका उपाय मानकर मुक्तिका एक ही मार्ग कहते हैं ? इसका उत्तर देते हैं—

गा०-टी०—जैसे चतुरग सेनाका नायक प्रवर्तक होता है वैसे ही मरते समय भाव नमस्कार—क्षायिक सम्यक्त्व, क्षायिक ज्ञान, क्षायिक दर्शन, क्षायिक वीर्य गुण वाले अर्हन्त हैं इस प्रकार श्रद्धान रूप भाव नमस्कार सम्यग्दर्शन रूप होनेसे समीचीन ज्ञान तप और चारित्रका प्रवर्तक होता है । आप्तके गुणोके श्रद्धानके विना शब्दरूप श्रुतके प्रामाण्यकी व्यवस्था नही की जा सकती; क्योंकि वक्ताके प्रामाण्यके विना वचनोंका प्रामाण्य सिद्ध नही होता । अतीन्द्रिय विषयोंका ज्ञान अयथार्थ है और 'यह' आदि ज्ञान यथार्थ है, ऐसा विवेक हम लोग नही कर सकते । यतः अर्थके यथार्थ स्वरूपको जानने वाले और राग द्वेषसे रहित आप्तका वचन यथार्थ ज्ञानको ही उत्पन्न करता है, अयथार्थ ज्ञानको नहीं, इस प्रकारके सच्चे ज्ञानीका सम्यग्ज्ञान पूर्वक सम्यक्

---

१ ह्यन्द्रिय—आ० मु० ।

नान्यथेति प्रवर्तकता भावनमस्कारस्य ततः [1]प्रधानत्वाद्भावनमस्कारः संसारोच्छेदकारीति व्यपदिश्यते ॥७५६॥

आराधणापडायं गेण्हंतस्स हु करो णमोक्कारो ।
मल्लस्स जयपडायं जह हत्थो घेत्तुकामस्स ॥७५७॥

आराधनापताकां ग्रहीतुकामस्य भावनमस्कार एव करो जयपताकां ग्रहीतुकामस्य मल्लस्य हस्त इवेत्युत्तरगाथार्थः ॥७५७॥

अण्णाणी वि य गोवो आराधित्ता मदो णमोक्कारं ।
चंपाए सेट्ठिकुले जादो पत्तो य सामण्णं ॥७५८॥

अर्हद्गुणज्ञानरहितोऽपि गोपो द्रव्यनमस्कारमाराध्य मृतश्चम्पापुरे श्रेष्ठिकुले जातः श्रामण्यं च प्राप्तवान् इति च द्रव्यनमस्कारोऽप्येवं विपुलं प्रयच्छति फलं किं न कुर्याद् भावनमस्कार इति भावः। भावनमस्कारो व्याख्यातः । णमोक्कारं ॥७५८॥

णाणोवओगरहिदेण ण सक्को चित्तणिग्गहो काउं ।
णाणं अंकुसभूदं मत्तस्स हु चित्तहत्थिस्स ॥७५९॥

णाणुवओगं इत्येतद्व्याख्यानायोत्तरः प्रबन्धः—'**णाणोवओगरहिदेण**' ज्ञानपरिणामरहितेन पुंसा । '**ण सक्को चित्तणिग्गहो काउं**' चित्तनिग्रहः कर्तुमशक्यः । कस्मात् ज्ञानमन्तरेण न शक्यश्चित्तनिग्रहः कर्तुमित्यारेकायां—ज्ञानं निग्रहकरणे साधकतमं ततस्तदन्तरेण न भवति चित्तनिग्रह इत्याचष्टे । '**णाणं अंकुसभूदं**

चारित्र और सम्यक् तप विद्यमान कर्मोंको दूर करनेमें निमित्त होता है, अन्यथा नहीं होता। इसलिए भाव नमस्कार ज्ञान चारित्र और तपका प्रवर्तक होनेसे प्रधान है और संसारका उच्छेद करने वाला कहाता है ॥७५६॥

गा०—जैसे विजय पताकाको ग्रहण करनेके अभिलाषी मल्लके लिए हाथ है। हाथसे ही वह जय पताका ग्रहण करता है। वैसे ही आराधना पताका (ध्वजा) को ग्रहण करनेके इच्छुक आराधकका हाथ भाव नमस्कार है। भाव नमस्कार पूर्वक ही वह आराधनामें सफलता पाता है ॥७५७॥

गा०—सुभग नामका ग्वाला अज्ञानी था, उसे अर्हन्तके गुणोंका ज्ञान नहीं था। वह द्रव्यनमस्कारकी आराधना करके अर्थात् मुखसे णमोकर मन्त्रका जप करते हुए मरा और चम्पा नगरीमे एक श्रेष्ठीके वंशमें उत्पन्न हुआ। तथा मुनि पदको धारण कर मुक्त हुआ। इस प्रकार द्रव्यनमस्कारसे भी विपुल फलकी प्राप्ति होती है। तब भावनमस्कारका तो कहना ही क्या है। इस प्रकार भावनमस्कारका कथन समाप्त हुआ ॥७५८॥

अब ज्ञानोपयोगका कथन करते हैं—

गा०-टी०—ज्ञानोपयोगसे रहित मनुष्य अपने चित्तका निग्रह नहीं कर सकता।

शङ्का—ज्ञानके बिना चित्तका निग्रह क्यों नहीं कर सकता ?

समाधान—ज्ञान चित्तका निग्रह करनेमें साधकतम है अतः उसके बिना चित्तका निग्रह

---

१. प्रभावत्वा–आ० मु० ।

मत्तस्य तु चित्तहस्तिनस्त्' ज्ञानमङ्कुशभूतं मत्तस्य चित्तहस्तिनः । इदमत्र चोद्यते—इह चित्तशब्देन किमुच्यते ? अन्यत्र सचित्तशीतसंवृत इत्यादौ चित्तं चैतन्यमिति गृहीतं । इहापि यदि तदेव तस्य निग्रहो नाम कः ? अत्रोच्यते—विपर्ययज्ञानमया अशुभध्यानलेश्यात्मया वा परिणतिः[1] प्राणभृतो यस्य तस्य निरोधो यथार्थज्ञान-परिणामेन क्रियते । परिणामो हि परिणामिनं निरुणद्धि, परिणामोऽस्मा[2]द्विरुद्धस्त्वया नादातव्यः इति । यथा मत्तो हस्ती न क्वचिदवतिष्ठते बन्धनमर्दनादिकं विना तद्वच्चित्तहस्त्यपि यत्र क्वचनाशुभपरिणामे प्रवर्तते इति ॥७५९॥

विज्जा जहा पिसायं सुट्ठु पउत्ता करेदि पुरिसवसं ।
णाणं हिदयपिसायं सुट्ठु पउत्ता करेदि पुरिसवसं ॥७६०॥

'विज्जा सुट्ठु पउत्ता जहा पिसाय पुरिसवसं करेदि' विद्या सुष्ठु प्रयुक्ता सम्यगाराधिता यथा पिशाचं पुरुषस्य वश्यं करोति । 'तह णाणं सुट्ठुवजुत्तं वसं करेदि हिदयपिसायं' । तथा ज्ञानं सुष्ठु प्रयुक्तं वशं करोति कि ? हृदयपिशाच । चित्तं पिशाचवदयोग्यकारितया ज्ञानं समीचीनं असकृत्प्रवर्तमान शुभे शुद्धे वा परिणामे प्रवर्तयति चेतनामिति यावत् ॥७६०॥

उवसमइ किण्हसप्पो जह मंतेण विधिणा पउत्तेण ।
तह हिदयकिण्हसप्पो सुट्ठुवजुत्तेण णाणेण ॥७६१॥

'उवसमदि किण्हसप्पो' उपशाम्यति कृष्णसर्प. । 'जह' यथा । 'मंतेण सुप्पजुत्तेण' स्वाहाकारान्ता विद्या[3] नि स्वाहाकारो मन्त्रशब्देनोच्यते । मन्त्रेण सुष्ठु प्रयुक्तेन । 'तह' तथैव । 'हिदयकिण्हसप्पो उवसमदि' हृदयकृष्णसर्प उपशाम्यति । 'सुट्ठुवजुत्तेण णाणेण' सुष्ठु प्रवृत्तेन ज्ञानपरिणामेन । अशुभनिग्रहहेतुता ज्ञानस्य

नही होता, यह कहते है—मदोन्मत चित्तरूपी हाथीके लिए ज्ञान अंकुश रूप है ।

शङ्का—यहाँ चित्त शब्दसे क्या लिया है ? तत्त्वार्थ सूत्रमें 'सचित्त शीत संवृत' इत्यादि सूत्रमे चित्तसे चैतन्यका ग्रहण किया है । यहाँ भी यदि चैतन्य ही लिया है तो उसका निग्रह कैसा ?

समाधान—जिस प्राणीकी परिणति विपरीत ज्ञान रूप या अशुभ ध्यान और अशुभ लेश्या रूप होती है उसका निरोध यथार्थ ज्ञानरूप परिणामसे किया जाता है । परिणाम परिणामीको रोकता है जैसे तुम्हें हमारे विरुद्ध परिणाम नही करना चाहिए । अत. जैसे मत्त हाथी बन्धन मर्दन आदिके विना वशमें नहीं होता वैसे ही चित्तरूपी हाथी भी जिस किसी भी अशुभ परिणाम मे प्रवृत्त होता है ॥७५९॥

गा०—जैसे सम्यक् रीतिसे साधी गई विद्या पिशाचको पुरुषके वशमें कर देती है । वैसे ही सम्यक् रूपसे आराधित ज्ञान हृदय रूपी पिशाचको वशमें करता है । अयोग्य काम करनेसे चित्त पिशाचके समान है । बार-बार प्रयुक्त सम्यग्ज्ञान चेतनाको शुभ अथवा शुद्ध परिणाममे प्रवृत्त करता है ॥७६०॥

गा०—जैसे विधिपूर्वक प्रयोग किये गये मंत्रसे कृष्ण सर्प शान्त हो जाता है । वैसे ही अच्छी तरहसे भावित ज्ञानसे हृदयरूपी कृष्ण सर्प शान्त हो जाता है । प्रथम गाथा (७५९) से

---

१. तिं प्राकृत यस्य निरोधः अ० । २. स्माद्वि—अ० मु० । ३. द्या इति स्वा—आ० मु० ।

आद्यया गाथयोक्ता। द्वितीयया चित्तस्य स्ववशकारित्वं ज्ञानभावनयोक्तं। अनया तु अशुभपरिणामप्रशान्तिकारिता ज्ञानभावनया निरूप्यते ॥७६१॥

आरण्णवो वि मत्तो हत्थी णियमिज्जदे वरत्ताए ।
जह तह णियमिज्जदि सो णाणवरत्ताए मणहत्थी ॥७६२॥

'आरण्णवो वि मत्तो हत्थी' अरण्यचारी मत्तो हस्ती। **'णियमिज्जदे वरत्ताए'** नियम्यते निरुध्यते वरत्रेण यथा। तथा **'मणहत्थी णियमिज्जदे'** मनोहस्ती नियम्यते। **'णाणवरत्ताए'** ज्ञानवरत्रेण। प्राणिनामहितकारितया, दुर्निवारतया च मनो हस्तीवेति मनोहस्तीति भण्यते। ज्ञानमशुभप्रवाहं निरुणद्धि। इत्यनयोच्यते ॥७६२॥

ज्ञानवरत्रानियमितस्य मनसो व्यापार निरूपयत्युत्तरगाथा—

जह मक्कडओ खणमवि मज्झत्थो अत्थिदुं ण सक्केइ ।
तह खणमवि मज्झत्थो विसएहिं विणा ण होइ मणो ॥७६३॥

'मक्कडओ खणमवि मज्झत्थो अत्थिदुं ण जहा सक्कदि' मर्कटकः क्षणमपि मध्यस्थो निर्विकार सन् स्थातुं न शक्नोति। **'तहा मणो विसएहिं विणा मज्झत्थो खणमवि ण होदि'** तथा मनो विषयैः शब्दादिविषयनिमित्ता रागादय इह विषयशब्दवाच्या विषयकार्यत्वात्। ततोऽयमर्थः, अत्र रागद्वेषौ विना मध्यस्थ मनो भवति। ज्ञानभावनायामसत्यां रागद्वेषयोर्वृत्तिरेव मनसो व्यापार इत्यर्थः। एतया ज्ञानं मनसो माध्यस्थं करोतीत्याख्यायते। यस्मान्न मनसो माध्यस्थ्यमस्ति सन्निहितमनोज्ञामनोज्ञविषयरागद्वेषसहचारितया ॥७६३॥

तम्हा सो उड्डहणो मणमक्कडओ जिणोवएसेण ।
रामेदव्वो णियदं तो सो दोसं ण काहिदि से ॥७६४॥

ज्ञानको अशुभका निग्रह करनेमे हेतु कहा। दूसरी गाथासे ज्ञान भावनाके द्वारा चित्त अपने वशमे होता है यह कहा। इस गाथासे ज्ञान भावनाके द्वारा अशुभ परिणामोकी शान्ति होती है यह कहा ॥७६१॥

गा०—जैसे चमड़ेके कोड़ेसे जगली भी मस्त हाथी वशमें किया जाता है। वैसे ही ज्ञान रूपी चर्मदण्डसे मन रूपी हाथी वशमे किया जाता है। प्राणियोका अहितकारी तथा दुर्निवार होनेसे मनको हाथीकी तरह कहा है। ज्ञान अशुभ प्रवाहको रोकता है यह इस गाथासे कहा है ॥७६२॥

आगे ज्ञानरूपी चर्मदण्डसे वशमें किये गये मनका व्यापार कहते है—

गा०—जैसे बन्दर एक क्षण भी निर्विकार होकर ठहर नहीं सकता, वैसे ही मन एक क्षण भी विषयोके विना नही रहता। यहाँ विषय शब्दसे शब्द आदिके निमित्तसे होने वाले रागादिको लिया है क्योंकि वे विषयोंसे उत्पन्न होते हैं। इसलिए ऐसा अर्थ होता है कि रागद्वेषके विना मन मध्यस्थ नही होता है। अर्थात् ज्ञान भावनाके अभावमे रागद्वेषमें प्रवृत्ति करना ही मनका व्यापार है। इस गाथासे कहा है कि ज्ञान मनको मध्यस्थ करता है। निकटवर्ती प्रिय और अप्रिय विषयोंमें रागद्वेष करनेसे मन मध्यस्थ नहीं होता ॥७६३॥

'तम्हा' तस्मात् । 'सो मणमक्कडओ' मनोमर्कटः । 'उड्डहणो' इतस्ततः उल्लंघनपरः । 'रामेदव्वो णियदं' सर्वकालं रमयितव्यः । क्व 'जिणोवदेसम्मि' जिनागमे । 'तो' ततो जिनागमरतेः । 'सो' मनोमर्कटः । 'दोसं' रागद्वेषादिकं । 'ण काहिदि' न करिष्यति । 'से' तस्य ज्ञानाभ्यासकारिणः ॥७६४॥

यस्माज्ज्ञानाभ्यासे सति मनोमर्कटको दोषं अशुभपरिणामं न करोति—

तम्हा णाणुवओगो खवयस्स विसेसदो सदा भणिदो ।
जह विंधणोवओगो चंदयवेज्झं करंतस्स ॥७६५॥

'तम्हा णाणुवओगो' तस्माज्ज्ञानपरिणामः । 'खवयस्स विसेसदो सदा भणिदो' क्षपकस्य विशेषतः सदा निरूपितः । 'जह विंधणोवओगो' यथा व्यधनाभ्यासो विशेषतो भणितः । कस्य ? 'चंदयवेज्झं करंतस्स' चन्द्रकवेधं कुर्वतः ॥७६५॥

णाणपदीओ पज्जलइ जस्स हियए विसुद्धलेस्सस्स ।
जिणदिट्ठमोक्खमग्गे पणासणभयं ण तस्सत्थि ॥७६६॥

'णाणपदीओ' ध्यानप्रदीपः । 'पज्जलइ' प्रज्वलति । यस्य विशुद्धलेश्यस्य हृदये । तस्य संसारावर्ते पतित्वा विनष्टोऽस्मीति विनाशभयं नास्ति । 'जिणदिट्ठमोक्खमग्गे' जिनदृष्टे श्रुते । रत्नत्रयवृत्तिरपि मोक्षमार्ग-शब्द इह श्रुतवृत्तिर्ग्राह्यः ॥७६६॥

ज्ञानप्रकाशमाहात्म्यं कथयति—

णाणुज्जोवो जोवो णाणुज्जोवस्स णत्थि पडिघादो ।
दीवेइ खेत्तमप्पं सूरो णाणं जगमसेसं ॥७६७॥

'णाणुज्जोवो' ज्ञानोद्योत एव द्योतोऽतिशयित[1] । कस्तस्यातिशय इत्यत्र आह—'णाणुज्जोवस्स णत्थि पडिघादो' ज्ञानोद्यतस्य नास्ति प्रतिघातः । 'दीवेदि' प्रकाशयति । 'खेत्तमप्पं' स्वल्पं क्षेत्रं । क ? 'सूरो'

गा०—इसलिये इधर-उधर कूदने वाले मनरूपी बन्दरको जिनागममें सदा लगाना चाहिए। जिनागममें लगे रहनेसे वह मनरूपी बन्दर उस ज्ञानाभ्यास करने वालेमें रागद्वेष उत्पन्न नहीं कर सकेगा ॥७६४॥

गा०—यतः ज्ञानाभ्यास करने पर मनरूपी बन्दर अशुभ परिणामरूप दोष उत्पन्न नहीं करता। इसलिये क्षपकके लिये सदा ज्ञानोपयोग विशेष रूपसे कहा है। जैसे चन्द्रक यंत्रका वेध करने वालेके लिये सदा बीधनेका अभ्यास विशेष रूपसे कहा है ॥७६५॥

गा०—जिस विशुद्ध लेश्या वालेके हृदयमें ज्ञानरूपी दीपक जलता है उसको जिन भगवान्-के द्वारा कहे गये आगममें प्रवृत्त रहते हुए 'मैं संसारकी भँवरमें गिरकर नष्ट होऊँगा', ऐसा भय नहीं रहता ॥७६६॥

ज्ञानरूपी प्रकाशका माहात्म्य कहते हैं—

गा०—ज्ञानरूप प्रकाश ही यथार्थ प्रकाश है; क्योंकि ज्ञानरूपी प्रकाशमें रहनेवालेका

---

१. ज्ञानप्र—आ० ।

आविश्य । 'जाणं जगमतेलं' ज्ञानं जगदवोधं । 'दीवेदि' प्रकाशयति । समस्तवस्तुव्यापिज्ञानवदन्यः प्रकाशो नास्तीत्यर्थः ॥७६७॥

णाणं पयासओ सोधओ तवो संजमो य गुत्तियरो ।
तिण्हंपि समाओगे मोक्खो जिणसासणे दिट्ठो ॥७६८॥

'णाणं पयासगं' ज्ञानं प्रकाशयति 'संसारं' संसारकारणं, 'मुत्ति' मुक्तिकारणं च ॥ 'सोधवो तवो' निर्जरानिमित्तं तपः । 'संजमो य गुत्तियरो' संयमश्च गुप्तिकरः । 'तिण्हंपि' त्रयाणामपि । 'समाओगे' संयोगे । 'मोक्खो' मोक्षः । 'जिणसासणे दिट्ठो' जिनशासने दृष्टः ॥७६८॥

णाणं करणविहूणं लिंगग्गहणं च दंसणविहूणं ।
संजमहीणो य तवो जो कुणदि णिरत्थयं कुणदि ॥७६९॥

णाणुज्जोएण विणा जो इच्छदि मोक्खमग्गमुवगंतुं ।
गंतुं कडिल्लमिच्छदि अंधलओ अंधयारम्मि ॥७७०॥

'णाणुज्जोएण विणा' ज्ञानोद्योतेन विना । 'जो इच्छदि' यो वाञ्छति । 'मोक्खमग्गमुवगंतुं' चारित्रं तपश्च इह मोक्षमार्ग इत्युच्यते चारित्रं तपश्चोपगन्तुं । 'गंतुं कडिल्लमिच्छदि' गन्तुं दुर्गमिच्छति । क. ? 'अंधलओ' अन्धः । 'अंधयारम्मि' अन्धकारे तमसि । यथा वृक्षतृणगुल्मादिनिचिते प्रदेशे गमनं अतिदुष्करं अप्रकाशे सति । तद्वद्धिंसादिपरिहारो जीवनिकायाकुले दुष्कर इति मन्यते ॥७७०॥

जइदा खंडसिलोगेण जमो मरणादु फेडिदो राया ।
पत्तो य सुसामण्णं किं पुण जिणउत्तसुत्तेण ॥७७१॥

'जइदा खण्डसिलोगेण' यदि तावत्खण्डेन श्लोकस्य । 'जमो राया मरणादो फेडिदो' यमो राजा मरणा-

---

पतन नहीं होता। सूर्य तो अल्पक्षेत्रको ही प्रकाशित करता है किन्तु ज्ञान समस्त जगत्को प्रकाशित करता है। आशय यह है समस्त वस्तुओंमें व्याप्त ज्ञानके समान अन्य प्रकाश नहीं है ॥७६७॥

गा०—ज्ञान संसार, संसारके कारण, मोक्ष और मोक्षके कारणोंको प्रकाशित करता है। तप निर्जराका कारण है। संयम गुप्तिकारक है। इन तीनोंके मिलनेपर जिनागममें मोक्ष कहा है ॥७६८॥

गा०—आचरणहीन ज्ञान, श्रद्धानके विना मुनि दीक्षाका ग्रहण और संयमके विना तप जो करता है वह सब निरर्थक करता है ॥७६९॥

गा०—ज्ञानरूप प्रकाशके विना मोक्षमार्गको जो प्राप्त करना चाहता है, यहाँ चारित्र और तपको मोक्षमार्ग कहा है अतः जो ज्ञानके बिना चारित्र और तपको प्राप्त करना चाहता है वह अन्धा अन्धकारमें दुर्गपर जाना चाहता है। जैसे प्रकाशके अभावमें वृक्ष, तृण, झाड़ी आदिसे भरे प्रदेशमें जाना अति कठिन है वैसे ही जीवोंसे भरे प्रदेशमें हिंसा आदिका बचाव कठिन है ॥७७०॥

दपसारितः । 'पत्तो य सुसामण्णं' प्राप्तश्च शोभनं श्रामण्यं । 'किं पुण जिणउत्तसुत्तेण' किं पुनर्जिनोक्तसूत्रेण प्राप्यफले आश्चर्यं । बाध्यमभ्याख्यानकं च । तदुक्तं—

[1]भवत्यन्धेनाज्ञेन जीवितार्थिना यत्किंचिदुक्तं वचनं श्रुत्वा हास्यपरेण राज्ञा भाव्यमानं यद्यापदपसारणे निमित्तं विश्ववेदिनां वचो भाव्यमानं किमभिलषितं न प्रापयति ॥ ७७१॥

स्वल्पस्यापि श्रुतस्य भावना मरणकाले महाफलं ददातीत्येव तत्कथयति—

दढसुप्पो सूलहदो पंचणमोक्कारमेत्त सुदणाणे ।
उवजुत्तो कालगदो देवो जावो महड्ढओ ॥७७२॥

'दढसुप्पो सूलहदो' दृढसूर्पो नाम चौरः शूलमारूढः । 'पंचणमोक्कारमेत्त सुदणाणे उवजुत्तो कालगदो' पञ्चनमस्कार एव श्रुतज्ञाने उपयुक्तः सन् कालगतः । 'महड्ढिगो देवो जादो' महर्द्धिको देवो जातः ॥७७२॥

ण य तम्मि देसयाले सव्वो बारसविघो सुदक्खंघो ।
सक्को अणुचिंतेदुं बलिणा वि समत्थचित्तेण ॥७७३॥

'सव्वो बारसविधो वि सुदक्खंधो तम्मि देसयाले ण य सक्को अणुचिंतेदुं बलिणा वि समत्थचित्तेण' सर्वो द्वादशविधोऽपि श्रुतस्कंधस्तस्मिन्मरणे देशे काले च नैव शक्योऽनुस्मर्तुं नितरामपि समर्थचित्तेन । बहुश्रुतस्यापि न ध्यानालम्बनं समस्तं श्रुतं किं तु किंचिदेव सूत्रं । तथा ह्युक्तं 'एकाग्रचिन्तानिरोधो ध्यानमिति' [त० सू० ९।४५] ॥७७३॥

एक्कम्मि वि जम्मि पदे संवेगं वीदरायमग्गम्मि ।
गच्छदि णरो अभिक्खं तं मरणंते ण मोत्तव्वं ॥७७४॥

गा०–टी०—यदि श्लोकके एक खण्डके पाठसे राजा यम मृत्युसे बचा और शोभनीय मुनिपदको प्राप्त हुआ तो जिनभगवान्‌के द्वारा प्रतिपादित सूत्रकी स्वाध्यायसे प्राप्त होनेवाले फलमें क्या आश्चर्य है। इस विषयमें हरिषेणकृत वृहत् कथाकोशमें यममुनि की कथा है। कहा भी है—

जीवनके अर्थी अज्ञानी अन्धेके द्वारा कहे गये अनर्गलवचनको सुनकर राजाने हँसीमें उसे ग्रहण किया और वह उसकी आपत्ति दूर करनेमें निमित्त हुआ तो सर्वज्ञके वचनका अभ्यास किस इच्छित वस्तुको नहीं देता ? अर्थात् सब देता है ॥७७१॥

आगे कहते हैं कि थोडे से भी शास्त्र की भावना मरते समय महाफल देती है—

गा०—दृढ़सूर्प नामक चोरको सूली पर चढाया गया तो वह पंच नमस्कार मन्त्र-मात्र श्रुतज्ञानमें उपयोग लगाकर मरा अर्थात् पंच नमस्कार मंत्र का पाठ करते हुए मरा और मरकर महान् ऋद्धिका धारी देव हुआ ॥७७२॥

गा०—मरते समय बलवान भी सामर्थ्यसम्पन्न मनुष्य समस्त द्वादशांग श्रुत स्कन्धका अनुचिन्तन नहीं कर सकता। बहुत शास्त्रोंका ज्ञाता भी समस्त श्रुतका ध्यान मरते समय नहीं कर सकता। किन्तु किसी एक का ही ध्यान सम्भव है। कहा भी है—एक विषयमें चिन्ताके निरोध को ध्यान कहते हैं ॥७७३॥

---

१. भवेत्यांधेनाज्ञेन–आ० ।

'तेण एकम्मि वि जम्मि पदे' यस्मिन्नेकस्मिन्नपि पदे युक्तः । 'संवेगं गच्छदि' रत्नत्रये श्रद्धामुपैति । 'अभिक्खं' पुनः पुनः । 'तं' तत्पदं । 'मरणंते' शरीराद्वियोगकाले । 'ण मोत्तव्वं' न मोक्तव्यं । णाणुवओग इत्येतद्व्याख्यातं । णाणं गदं ॥७७४॥

पञ्चमहव्वदरक्खा इत्येतद्व्याचिख्यासुराद्यमहिंसाव्रतं पालयेति कथयति—

परिहर छज्जीवणिकायवहं मणवयणकायजोगेहिं ।
जावज्जीवं कदकारिदाणुमोदेहिं उवजुत्तो ॥७७५॥

'परिहर छज्जीवणिकायवहं' षण्णा जीवनिकायानां वधं मा कृथा मनोवाक्काययोगैः प्रत्येकं कृत-कारितानुमतविकल्पै । कालप्रमाणमाह—'जावज्जीवं' यावज्जीवं । सर्वजीवविषयसर्वप्रकारहिंसापरिहार-रूपत्वात् सर्वस्मिन्नेव भवपर्यायकाले प्रवृत्तत्वादहिंसाव्रतस्य महत्ता निवेदिता । 'छज्जीवणिकाय' इत्यत्र व्यक्तयो जीवनिकायाना परिगृहीता । 'मणवयणकायजोगेहिं कदकारिदाणुमोदेहिं' इत्यनेन हिंसाविकल्पाः संगृहीता । 'जावज्जीवमित्यनेन निरवशेषमनुजजीवितकालग्रहणं । 'उवजुत्तो समिदीसु' इति शेष उपयुक्तः समितिषु समाहितचित्तः । इह वा सावज्जकिरियापरिहारे इति शेष. । सावद्यक्रियापरिहारप्रणिहित-चित्त ॥७७५॥

जह ते ण पियं दुक्खं तहेव तेसिंपि जाण जीवाणं ।
एवं णच्चा अप्पोवमिवो जीवेसु होदि सदा ॥७७६॥

'जह ते ण पियं दुःखं' यथा तव न प्रिय दु खं । 'तधेव तेसिं पि जीवाणं दुःखं न पियंति' तथैव तेषामपि जीवाना न दु खं प्रियमिति । 'जाण' जानीहि । 'एवं णच्चा' एवं ज्ञात्वा । अप्पोवमिवो आत्मो-पमान । 'सदा होहि जीवेसु' सदा भव जीवेसु । परजीवदु खाप्रियो भवेति यावत् ॥७७६॥

गा०—अतः जिस एक भी पदमें मन लगानेसे मनुष्यमें रत्नत्रयके प्रति श्रद्धा उत्पन्न होती है उस पदको बार-बार विचारना चाहिये और मरते समय भी नही छोडना चाहिये ॥७७४॥

'पंच महाव्रत रक्षा' का व्याख्यान करनेके इच्छुक ग्रन्थकार अहिंसाव्रतके पालनका कथन करते हैं—

गा०-टी०—मन वचन काय और उनमें से प्रत्येकके कृत कारित और अनुमत भेदोंके साथ छह कायके जीवों की हिंसा जीवन पर्यन्त मत करो । क्योंकि सब जीवोंकी सब प्रकारकी हिंसाका त्याग अहिंसा महाव्रत है सभी भवोंमें इसका पालन करना आवश्यक है । इससे अहिंसाव्रतकी महत्ता सूचित की है । 'छह जीव निकाय' पदसे जीव निकायोंके सब जीवोंका ग्रहण किया है । मन वचन काय और कृत कारित, अनुमोदनासे हिंसाके भेदोंका ग्रहण किया है अर्थात् हिंसा नौ प्रकार से होती है, 'यावज्जीवन' पदसे मनुष्यका सम्पूर्ण जीवन काल ग्रहण किया है । 'उपयुक्त' पदसे समितियों में सावधान चित्त व्यक्तिका ग्रहण किया है । जो व्यक्ति सावद्य कार्यों के परिहारमें दत्त-चित्त है वही जीवन पर्यन्त छह काय के सब जीवोंकी मन वचन काय और कृत कारित अनुमोदना से हिंसा नहीं करता ॥७७५॥

गा०—जैसे तुझे दुःख प्रिय नहीं है वैसे ही उन जीवोंको भी दुःख प्रिय नहीं है । ऐसा जानकर अपनी ही तरह सदा जीवोंमें व्यवहार करो अर्थात् किसी को दुःख मत दो ॥७७६॥

तण्हाछुहादिपरिदाविदो वि जीवाण घादणं किच्चा ।
पडियारं कादुं जे मा तं चिंतेसु लभसु सदिं ॥७७७॥

'**तण्हाछुहादिपरिदाविदो वि**' तृषा, क्षुधा, रोगेण, शीतेन, आतपेन बाधितोऽपि सन् । '**जीवाणं घादणं किच्चा**' जीवानामुपघातं कृत्वा । '**पडियारं कादुं जे**' तृडादीना प्रतिकारं कर्तुं । '**तं मा चिंतेहि**' मा कार्षीश्चित्तं । '**लभसु सदिं**' लभस्व स्मृतिं । पिबामि हिमशीतलं जलं कर्पूरक्षोदवासितं । अगाधं वा सरः सुरभितोत्पलरजोवगुंठितं प्रविश्य मदान्धसिन्धुर इव निमज्जनोन्मज्जने करोमि । ललाटे, शिरसि, पृथुले चोरस्थले करकप्रकरनिपातो यदि स्याद्भद्रं भवेत् । कल्हारसिकताधिकपल्लवशयनादिलाभे वा जीवामि इति वा । आतपति वा दिवानिशं तर्षं । अपसारितसतीक्ष्णकरकरनिकुरुंबमिति व्यजनतालवृन्तसमुपनीतशीतमारुतापातेन श्रममशेषमपाकुर्वन्तु भवन्तः । हिमानी पततु । वान्तु वा मातरिश्वान इति वा । आढूपक्वानपूपान्सुरभिघृताढ्रान् भक्षयामीति । सम्यक् क्वथितं क्षीरं शार्करामिश्रं सुखोष्णं पिबामीति वा । धगधगायमानं खादिरमग्निं कुरुत । शीतेन स्फुटन्ति ममाङ्गानि इत्येवमादिका प्रतिक्रिया मनसि न कार्येत्यर्थः । असद्वेद्योदयाशनौ महति निपतति, को नु तस्य प्रतीकारः ? तदुपशमकालभाविन एव बाह्यद्रव्यसंपाद्या प्रतीकारा इति मनो निधेहि ॥७७७॥

रदिअरदिहरिसभयउस्सुगत्तदीणत्तणादिजुत्तो वि ।
भोगपरिभोगहेदुं मा हु विचिंतेहि जीववहं ॥७७८॥

'**रदिअरदिहरिसभयउस्सुगत्तदीणत्तणादिजुत्तोऽवि**' । शब्दादिविषया प्रीती रतिः । अमनोज्ञविषयसन्निधाने या विमुखता सा अरतिः । हास्यकर्मोदयनिमित्तः परिणामो हर्षः । भय, उत्सुकता, दीनतेत्येवमादिभिर्युक्तोऽपि । '**भोगपरिभोगहेदुं**' भोगोपभोगार्थं वा जीववधं मा कृथा मनसि ॥७७८॥

गा०-टी०—भूख, प्यास, रोग, शीत अथवा आतपसे पीड़ित होने पर भी जीवोंका घात करके प्यास आदिका प्रतीकार करनेका विचार मत करो । मैं कपूरके चूर्णसे सुवासित तथा बर्फसे शीतल जलका पान करूँ ? अथवा अति सुगन्धित कमलकी रजसे व्याप्त गहरे तालाबमें घुसकर मदोन्मत्त हाथी की तरह डुबकियाँ लूँ । मस्तक, सिर और विशाल छाती पर यदि ओलोंकी वर्षा हो तो उत्तम हो । अथवा यदि कमल बालु और कोमल पल्लवों आदिकी शय्या मिले तो मैं जीवित रह सकूँ । रात दिन प्यास सताती है । सूर्यकी किरणेंके समूह को दूर करके पंखेकी शीतल वायु से मेरी सब थकान आप दूर करे । बर्फ गिरे । शीतल पवन बहे । सुगन्धित घीमे अगार पर पके पुओं को खाऊँगा । अथवा सम्यक् रूपसे उबाले गये और शक्कर मिलाये तथा सुखकर उष्णता को लिये दूधको पीऊँ । खैरकी लकड़ीकी धक् धक् करती हुई आग जलाओ, मेरे अग ठडसे ठिठुर रहे हैं । इस प्रकारका प्रतिकार मनमें नहीं लाना चाहिये । यह उक्त कथनका आशय है । महान् असाता वेदनीय रूप वज्रपात होने पर उसका क्या प्रतीकार हो सकता है ? उसका उपशमन काल आने पर ही बाह्य द्रव्योंके द्वारा प्रतीकार संभव है, ऐसा मनमें विचार होना चाहिये ॥७७७॥

गा०-टी०—शब्द आदि विषयोंमें प्रीतिको रति कहते हैं । अप्रिय विषयोंके प्राप्त होनेपर उनसे विमुख होनेको अरति कहते हैं । हास्यकर्मके उदयके निमित्तसे जो भाव होता है उसे हर्ष कहते हैं ।

---

१. वयः स नो महानिति—आ० मु० ।

महुकरिसमज्जियमहुं व संजमं थोवथोवसंगलियं ।
तेलोक्कसव्वसारं जो वा पूरेहि मा जहसु ॥७७९॥

'महुकरिसमज्जियमहुं व' मधुकरीभिः समर्जितं मध्विव । 'संजमं' चारित्रं । 'थोवथोवसंगलियं' स्तोक-स्तोकेनोपचितं । 'तेलोक्कसव्वसारं' त्रैलोक्यस्य सर्वसारं विष्टपत्रये यदतिशयवत् स्थानं, मानं, ऐश्वर्यं सुखं वा तस्य कारणत्वात् त्रैलोक्यसर्वसारं । 'मा जहसु' मा त्याक्षीः ॥७७९॥

दुक्खेण लभदि माणुस्सजादिमदिसवणदंसणाचरित्तं ।
दुक्खज्जियसामण्णं मा जहसु तणं व अगणतो ॥७८०॥

'दुक्खेण लभदि माणुस्सजादिमदिसवणदंसणचरित्तं' दुःखेन लभते मनुष्यजन्म जंतुः । सूत्रे यद्यपि मणुस्सजादिशब्दः सामान्यवाच्युपात्तस्तथापि विशेष[1]मत्रासौ वदति इति ग्राह्य । मनुजा हि चतुःप्रकाराः—

कर्मभूमिसमुत्पाश्च भोगभूमिभवास्तथा ।
अंतरद्वीपजाश्चैव तथा सम्मूर्च्छिमा इति ॥
असिर्मषिः कृषिः शिल्पं वाणिज्यं व्यवहारिता ।
इति यत्र प्रवर्तंते नृणामाजीवयोनयः ॥
प्रपाल्यसंयमं यत्र तपःकर्मपरा नराः ।
सुरसंग[2]तीव सिद्धिं प्रयांति हतशत्रवः ॥
एताः कर्मभुवो ज्ञेयाः पूर्वोक्ता दश पञ्च च ।
यत्र संभूय पर्याप्तिं यान्ति ते कर्मभूमिजाः ॥
मद्यतूर्याम्बराहारपात्राभरणमाल्यदैः ।

इन रति, अरति, हर्ष, भय, उत्सुकता, दीनता आदि भावोसे युक्त होने पर भी अपने भोग अथवा उपभोगके लिये मनमें जीव हिंसाका विचार मत करो ॥७७८॥

गा०—मधु-मक्खियाँ जिस प्रकार थोड़ा-थोड़ा करके मधुका संचय करती हैं उसी प्रकार थोड़ा-थोड़ा करके संचित किया गया संयम तीनों लोकोमे जो सातिशय स्थान मान ऐश्वर्य अथवा सुख है उस सबका कारण होनेसे सारभूत है। उसे यदि पूर्ण नहीं कर सकते तो उसका त्याग तो मत करो ॥७७९॥

गा०-टी०—प्राणी बड़े दुःखसे मनुष्य जन्म पाता है। गाथामे यद्यपि मनुष्य जाति शब्द सामान्य वाची है तथापि यह विशेष मनुष्यको कहता है, ऐसा अर्थ लेना चाहिये। मनुष्य चार प्रकारके होते हैं—कर्म भूमिमें उत्पन्न हुए, भोग भूमिमें उत्पन्न हुए, अन्तर्द्वीपोंमे उत्पन्न हुए तथा सम्मूर्छन जन्मसे उत्पन्न हुए। जहाँ मनुष्य असि, मषि, कृषि, शिल्प, व्यापार और सेवाके द्वारा जीवन यापन करते हैं, तथा जहाँ मनुष्य संयमका पालन करके तपस्यामें तत्पर होकर देवगति प्राप्त करते हैं अथवा कर्म शत्रुओंको मारकर मोक्ष जाते हैं वे कर्मभूमियाँ हैं। वे कर्मभूमियाँ पन्द्रह हैं। उनमें जन्म लेकर वे कर्मभूमिज मनुष्य पर्याप्तियाँ पूर्ण करते हैं। और

---

१. वमवसावयति इति आ० ।—वमवसाययति इति मु० ।
२. संगतिवत् सि—आ० ।—संगति वा सि—मु० ।

गृहदीपज्योतिषाख्यैस्तरुभिस्तत्र जीविकाः ॥
पुरग्रामादयो यत्र न निवेशा न पार्थिवाः ।
न कुलं कर्म शिल्पानि न वर्णाश्रमसंस्थितिः ॥
यत्र नार्यो नराश्चैव मैथुनीभूय नीरुजाः ।
रमन्ते पूर्वपुण्यानां प्राप्नुवन्तः परं फलं ॥
यत्र प्रकृतिभद्रत्वात् दिवं यान्ति मृता अपि ।
ता भोगभूमयस्प्रोक्तास्तत्र स्युर्भोगभूमिजाः ॥
अभाषका एकोरुका लाङ्गूलिकविषाणिकाः ।
आदर्शमुखहस्त्यश्वविद्युदुल्कमुखा अपि ॥
हयकर्णा गजकर्णाः कर्णप्रावरणास्तथा ।
इत्येवमादयो ज्ञेया अन्तरद्वीपजा नराः ॥
समुद्रद्वीपमध्यस्थाः कन्दमूलफलाशिनः ।
वेदयन्ते मनुष्यायुस्ते मृगोपमचेष्टिताः ॥
कर्मभूमिषु चक्रास्त्रहलभृद्भूरिभूभुजां ।
स्कंधावारसमूहेषु प्रस्रावोच्चारभूमिषु ॥
शुक्रसिंघाणकश्लेष्मकर्णदन्तमलेषु च ।
अत्यन्ताशुचिदेशेषु सद्यःसम्मूर्छनेन ये ॥
भूत्वाङ्गुलस्यासंख्येयभागमात्रशरीरकाः ।
आशु नश्यन्त्यपर्याप्तास्ते स्युः सम्मूर्च्छिमा नराः ॥

एतेषु कर्मभूमिजमानवानां एव रत्नत्रयपरिणामयोग्यता नेतरेषां इति तदेव मनुजजन्म गृह्यते । लब्धेऽपि

जहाँ मनुष्य मद्य, तूर्य, वस्त्र, आहार, पात्र, आभरण, माला, घर, दीप और ज्योति प्रदान करने वाले दस प्रकारके कल्प वृक्षोंसे जीवन यापन करते है, जहाँ पुर ग्राम आदि नही होते, न राजा होते हैं न कुल, न कर्म और न शिल्प होता है, न वर्ण और आश्रमका चलन होता है, जहाँ स्त्री और पुरुष निरोग रहकर पति पत्नी की तरह रमण करते हुए पूर्व जन्ममें किये पुण्य कर्मका फल भोगते हैं, और जो स्वभावसे ही भद्र होनेके कारण मरकर भी स्वर्गमे जाते है वे भोगभूमियाँ कही हैं। उनमें जन्म लेने वाले मनुष्य भोगभूमिज होते हैं। अभाषका—जो भाषा नही जानते-मूक रहते हैं, एकोरुका—जिनके एक पैर होता है, लागूलिका जिनके पूँछ होती है, विषाणिका—जिनके सींग होते हैं, आदर्शमुखा—जिनका मुख दर्पण की तरह होता है, हस्तिमुखा—हाथी की तरह मुख वाले, अश्वमुख—घोडेकी तरह मुखवाले, विद्युन्मुख, विजलीकी तरह मुखवाले, उल्का-मुख, हयकर्ण—घोडेकी तरह कानवाले, गजकर्ण—हाथीकी तरह कान वाले, कर्ण प्रावरण—कान ही जिनका आवरण है, इत्यादि अन्तर्द्वीपज मनुष्य होते हैं। ये समुद्रके द्वीपोके मध्यमें रहते हैं, कन्दमूल फल खाते हैं, तथा हिरनोंकी तरह चेष्टा करते हुए मनुष्यायु भोगते हैं। कर्म भूमियोंमें चक्रवर्ती, बलदेव, राजाओंकी सेनाके पड़ावोंमे मलमूत्र त्यागनेके स्थानोंमें, वीर्य, नाकके मल, कफ, कान और दाँतोंके मलमे और अत्यन्त गन्दे प्रदेशोंमें शीघ्र ही सम्मूर्छन जन्मसे उत्पन्न होकर तत्काल ही अपर्याप्त दशामें मरणको प्राप्त होनेवाले सम्मूर्छन मनुष्य होते हैं। उनका शरीर अंगुल के असंख्यातवें भाग मात्र होता है। इन चार प्रकारके मनुष्योंमेसे कर्मभूमि मनुष्योंमें ही रत्नत्रय

तस्मिन् ज्ञानावरणोदयाद्धिताहितपरीक्षायां समर्था बुद्धिर्न सुलभा। तया विना लब्धमपि मनुजजन्म विफलमेव दृष्टिरहितमिवायतं लोचनं, द्रविणसंपदं विना कुलीनत्वमिव, सुभगतामन्तरेण रूपमिव, यथार्थतारहितं वचनमिव, सत्यामपि मतौ यदि नाप्तानां वचः श्रृणुयात् सापि विफलैव सरोजरहिता सरसीव। इहापि श्रवणं आप्तवचनगोचरमेव गृहीतं, श्रवणमपि श्रद्धानरहितं सुलभमेव। इदं यथा येन प्रतिपादितं तथैवेति श्रद्धानं दुर्लभं दर्शनमोहोदयात्। सत्यपि श्रद्धाने चारित्रमोहोदयात् ज्ञातेऽभिलषिते मार्गे प्रवृत्तिर्दुर्लभा। एवं 'दुरवग्नि-वसामण्णं' दुःखेनार्जितश्रामण्यं। मा खल्लु मा त्याक्षीः। 'तणं व अगणितो' तृणमिव अगणयन् ॥७८०॥

जीवघातदोषमाहात्म्यं कथयति गाथाद्वयेन—

तेलोक्कजीविदादो वरेहि एक्कदरमत्ति देवेहिं।
भणिदो को तेलोक्कं वरिज्ज संजीविदं मुच्चा ॥७८१॥
जं एवं तेलोक्कं णग्घदि सव्वस्स जीविदं तम्हा।
जीविदघादो जीवस्स होदि तेलोक्कघादसमो ॥७८२॥

त्रैलोक्यजीवितयोरेकं गृहाणेति देवैश्चोदितः कस्त्रैलोक्यं वृणीते [1]स्वजीवितं त्यक्त्वा, जीवनमेव ग्रहीतुं वाञ्छति। यस्मादेवं त्रैलोक्यस्य मूल्यं जीवितं सर्वप्राणिनस्तस्माज्जीवितघातो। जीवस्य [जीवितस्य] जीवादन्यत्रावृत्ते [2]र्जीवस्येहवचनमनर्थकमिति चेन्न, उत्तरेण सम्बन्धात्। जीवस्य हतुस्त्रैलोक्यघातसमो महान्दोषो भवतीति यावत् ॥७८१॥

रूप परिणामों की योग्यता होती है, शेष तीन में नहीं होती। इसलिये यहाँ उसी मनुष्य जन्मका ग्रहण होता है। उस मनुष्य जन्मको प्राप्त करके भी ज्ञानावरण कर्मके उदयसे हित अहितका विचार करनेमें समर्थ बुद्धि सुलभ नहीं है। उसके बिना प्राप्त भी मनुष्य जन्म उसी प्रकार व्यर्थ है जैसे देखनेकी शक्तिसे रहित लम्बी आँखें, धन सम्पत्तिके बिना कुलीनता, सौभाग्यके बिना रूप, और यथार्थतासे रहित वचन व्यर्थ हैं। बुद्धिके होनेपर भी यदि आप्त पुरुषोंका वचन न सुने तो वह बुद्धि भी कमलोंसे रहित सरोवरकी तरह निष्फल ही है। यहाँ श्रवण भी आप्तके वचन विषयक ही ग्रहण किया है। श्रद्धान रहित सुनना भी सुलभ ही है। 'जिसने जैसा कहा है वैसा ही है' इस प्रकारका श्रद्धान दर्शन मोहके उदयमें दुर्लभ है। श्रद्धान होने पर भी चारित्र मोहके उदयसे जाने हुए और रुचने वाले मार्गमें प्रवृत्ति दुर्लभ है। इस प्रकार बड़े कष्टसे प्राप्त मुनिधर्मको तृणकी तरह मानकर त्यागना नहीं ॥७८०॥

टी०—आगे दो गाथाओंसे जीवघातसे हुए दोषका महत्त्व बतलाते हैं—

गा०—तीनों लोक और जीवनमेंसे एकको स्वीकार करो? ऐसा देवोंके द्वारा कहे जानेपर कौन प्राणी अपना जीवन त्यागकर तीनों लोकोंको ग्रहण करेगा? अतः इस प्रकार सब प्राणियोंके जीवनका मूल्य तीनों लोक है अतः जीवका घात करनेवालोंको तीनों लोकोंका घात करनेके समान दोष होता है।

शङ्का—जीवितपना जीवको छोड़कर अन्यत्र नहीं रहता अतः 'जीवस्स' यह वचन व्यर्थ है?

समाधान—गाथामें आये जीवस्सका सम्बन्ध आगेके कथनसे है—जीवके घातकको तीनों लोकोंके घातके समान दोष होता है ॥७८१-७८२॥

---

१. ते जीवस्य जी–मु०। २. त्यैव व–अ०।

अहिंसाव्रतमहत्तां निवेदयन्ति—

अत्थि अणूदो अप्पं आयासादो अणूणयं णत्थि ।
जह जह जाण महल्लं ण वयमहिंसासमं अत्थि ॥७८३॥

'णत्थि अणूदो अप्पं' नास्त्यणोरल्पं अन्यत्किंचिद्द्रव्यं । 'आयासादो अणूणयं णत्थि' । आकाशाद्वा अन्यन्महन्नास्ति यथा तथाप्यद्व्रतं अहिंसातो महन्नास्ति ॥७८३॥

जह पव्वदेसु मेरू उच्चावो होइ सव्वलोयम्मि ।
तह जाणसु उच्चायं सीलेसु वदेसु य अहिंसा ॥७८४॥

'जह पव्वदेसु' सर्वस्मिंल्लोके पर्वतेभ्यो मेरुर्यथोच्चैस्तथा अहिंसा शीलेषु व्रतेषु च उन्नततमेति जानीहि ॥७८४॥

व्रतानां, शीलानां, गुणानां च अधिष्ठानमहिंसेति वदन्ति—

सव्वो हि जहायासे लोगो भूमीए सव्वदीउदधी ।
तह जाण अहिंसाए वदगुणसीलाणि चिट्ठंति ॥७८५॥

यथा सर्वलोक ऊर्ध्वाधस्तिर्यग्विकल्प आकाशाधिकरण । भूमी च समवस्थिता. सर्वे द्वीपा उदधयश्च । तथैव 'जाण' जानीहि । व्रतगुणशीलान्यहिंसायां तिष्ठन्ति इति ॥७८५॥

कुव्वंतस्स वि जत्तं तुंबेण विणा ण ठंति जह अरया ।
अरएहिं विणा य जहा णट्ठं णेमी दु चक्कस्स ॥७८६॥

'कुव्वंतस्स वि जत्तं' यत्नं कुर्वतोऽपि । तुम्बमन्तरेण यथा न तिष्ठन्त्यराणि । अरैर्विना नेम्यवस्थानं चक्रस्य यथा नास्ति ॥७८६॥

तह जाण अहिंसाए विणा ण सीलाणि ठंति सव्वाणि ।
तिस्सेव रक्खणट्ठं सीलाणि वदीव सस्सस्स ॥७८७॥

'तह जाण' तथैव जानीहि । अहिंसा विना सर्वाणि शीलानि न तिष्ठन्ति इति । अहिंसाया एव रक्षार्थं शीलानि वृतिरिव सस्यस्य ॥७८७॥

गा०—जैसे अणुसे छोटा कोई अन्य द्रव्य नहीं है और आकाशसे बड़ा कोई नहीं है वैसे ही अहिंसासे महान् कोई अन्य व्रत नहीं है ॥७८३॥

गा०—जैसे सब लोकमें मेरु सब पर्वतोंसे ऊँचा है वैसे ही शीलों और व्रतोंमें अहिंसा सबसे ऊँची है ॥७८४॥

अहिंसा व्रतों शीलों और गुणोंका अधिष्ठान है, ऐसा कहते हैं—

गा०—जैसे ऊर्ध्वलोक, अधोलोक और मध्यलोकके भेदसे सब लोक आकाशके आधार हैं और सब द्वीप और समुद्र भूमिके आधार हैं वैसे ही व्रत गुण और शील अहिंसाके आधार रहते हैं ॥७८५॥

गा०—लाख प्रयत्न करनेपर भी जैसे चक्केके आरे तुम्बीके विना नहीं ठहरते और आरोंके विना नेमि नहीं ठहरती, वैसे ही अहिंसाके विना सब शील नहीं ठहरते । उसीकी रक्षाके लिए शील हैं जैसे धान्यकी रक्षाके लिए बाड़ होती है ॥७८६-७८७॥

अहिंसाव्रतमन्तरेणेतरेषां नैष्फल्यमाचष्टे—

सीलं वदं गुणो वा णाणं णिस्संगदा सुहच्चाओ ।
जीवे हिंसंतस्स हु सव्वे वि णिरत्थया होंति ॥७८८॥

शीलादीनि हि संवरनिर्जरां चोद्दिश्यानुष्ठीयन्ते । हिंसायां तु सत्यां न स्तः फलभूते संवरनिर्जरे मुक्त्युपायभूते इति निष्फलता मन्यते ॥७८८॥

सव्वेसिमासमाणं हिदयं गब्भो व सव्वसत्थाणं ।
सव्वेसिं वदगुणाणं पिंडो सारो अहिंसा हु ॥७८९॥

'सव्वेसिमासमाणं' सर्वेषामाश्रमाणां हृदयं शास्त्राणां गर्भः । सर्वेषां व्रतानां गुणानां च पिण्डीभूतसारो भवत्यहिंसा ॥७८९॥

जम्हा असच्चवयणादिएहिं दुक्खं परस्स होदित्ति ।
तप्परिहारो तम्हा सव्वे वि गुणा अहिंसाए ॥७९०॥

'जम्हा असच्चवयणादिएहिं' यस्मादसत्यवचनेन, अदत्तादानेन, मैथुनेन, परिग्रहेण च परस्य दुःखं भवति । तस्मात्तेषां असत्यवचनादीनां परिहार इति सर्वेऽपि अहिंसाया गुणाः ।

गोबंभणित्थिवधमेत्तणियत्ति जदि हवे परमधम्मो ।
परमो धम्मो किह सो ण होइ जा सव्वभूददया ॥७९१॥

'गोबंभणित्थिवधमेत्तणियत्ति' गवां, ब्राह्मणानां, स्त्रीणां च वधमात्रनिवृत्तिर्यदि भवेदुत्कृष्टो धर्मः परमो धर्मः कथं न भवति या सर्वजीवदया ॥७९१॥

हिंसानिवृत्तिं उपायेन कारयन्ति कृतापकारानपि बान्धवान्स्नेहान्न मारयितुमीहते जनः । [1]तवपुरस-

अहिंसाव्रतके बिना शील आदिकी निष्फलता बतलाते हैं—

गा०—जीवोंकी हिंसा करनेवालेके शील, व्रत, गुण, ज्ञान, निःसगता और विषय सुखका त्याग ये सभी ही निरर्थक होते हैं ॥७८८॥

विशेषार्थ—शील आदि संवर और निर्जराके उद्देशसे किये जाते हैं। हिंसाके होते हुए मुक्तिके उपायभूत संवर निर्जरारूप फल नहीं होते । इसलिए निष्फल कहा है ॥७८८॥

गा०—सब आश्रमोंका हृदय, सब शास्त्रोंका गर्भ और सब व्रतों और गुणोंका पिण्डीभूत सार अहिंसा ही है ॥७८९॥

गा०—यतः असत्य बोलनेसे, बिना दी हुई वस्तुके ग्रहणसे, मैथुनसे, और परिग्रहसे दूसरोंको दुःख होता है। इसलिए उन सबका त्याग किया जाता है। अतः वे सब सत्य, अचौर्य, ब्रह्मचर्य और अपरिग्रह अहिंसाके ही गुण हैं ॥७९०॥

गा०—यदि गौ, ब्राह्मण और स्त्रियोंके वधमात्रसे निवृत्ति उत्कृष्ट धर्म है तो सब प्राणियोंपर दया परमधर्म क्यों नहीं है ? ॥७९१॥

लोग सावधानीपूर्वक हिंसासे बचते हैं। अपकार करनेवाले भी बन्धु-बान्धवोंको स्नेहवश

१. तव पुरस्सावचर स–आ० ।

कुलजन्मान्तरे पितृपुत्रादिभावमुपागतानां मारणमयुक्तं इति वदति—

सव्वे वि य संबंधा पत्ता सव्वेण सव्वजीवेहिं ।
तो मारंतो जीवो संबंधी चेव मारेइ ॥७९२॥

'सव्वे वि य' सर्वेऽपि च । 'संबंधा' सम्बन्धाः प्राप्ताः । 'सव्वेण' सर्वेण जीवेन । 'सव्वजीवेहिं' सर्वजीवैः । 'तो' तस्मात् । जीवो मारणोद्यतः सम्बन्धिन एव घातयति ॥७९२॥

तच्च सम्बन्धिहननं लोके अतिनिन्दितं—

जीववहो अप्पवहो जीवदया होइ अप्पणो हु दया ।
विसकंटओव्व हिंसा परिहरियव्वा तदो होदि ॥७९३॥

'जीववहो अप्पवहो' जीवानां घात आत्मघात एव । जीवानां क्रियमाणा दया आत्मन एव कृता भवति । सकृदेकजीवघातनोद्यतः स्वयमनेकेषु जन्मसु मार्यते । कृतैकजीवदयोऽपि स्वयमनेकेषु जन्मसु परै रक्ष्यते । इति विषलिप्तकण्टकवत् परिहार्या हिंसा दुःखभीरुणा ॥७९३॥

हिंसादोषमिहैव जन्मनि वर्णयति—

मारणसीलो कुणदि हु जीवाणं रक्खसुव्व उव्वेगं ।
संबंधिणो वि ण य विस्संभं मारिंतए जंति ॥७९४॥

'मारणसीलो हु' मारणशीलः परहननोद्यतः । राक्षस इव जीवानामुद्वेगं करोति । सम्बन्धिनोऽपि न विस्रम्भं उपयान्ति तस्मिन्वधके ॥७९४॥

वधबंधरोधधणहरणआदणाओ य वेरमिह चेव ।
णिव्विसयमभोजित्तं जीवे मारंतगो लभदि ॥७९५॥

मारना नहीं चाहते । तब पूर्व नाना जन्मोमें पिता पुत्र आदि सम्बन्ध जिनके साथ रहा है, उन जीवोंको मारना अनुचित है, यह कहते हैं—

गा०—सब जीवोंके साथ सब जीवोंके सब प्रकारके सम्बन्ध पूर्वभवोंमें रहे हैं। अत. उनको मारनेवाला अपने सम्बन्धीको ही मारता है और सम्बन्धीको मारना लोकमें अत्यन्त निन्दित माना जाता है ॥७९२॥

गा०-टी०—जीवोंका घात अपना ही घात है। और जीवोंपर की गई दया अपनेपर ही की गई दया है। जो एक बार एक जीवका घात करता है वह स्वयं अनेक जन्मोंमें मारा जाता है। और जो एक जीवपर दया करता है वह स्वयं अनेक जन्मोंमें दूसरे जीवोंके द्वारा रक्षा किया जाता है। इसलिए दुःखसे डरनेवाले मनुष्यको विषैले कांटेकी तरह हिंसासे बचना चाहिए ॥७९३॥

इसी जन्ममें हिंसाके दोष दिखलाते हैं—

गा०—जो दूसरोंका घात करनेमें तत्पर होता है उससे प्राणी वैसे ही डरते हैं जैसे राक्षससे। उस हिंसकका विश्वास सम्बन्धीजन भी नहीं करते ॥७९४॥

[1]'वध बन्ध उत्कोटकादिकं वधं बन्धं मारणं। रोधनं, धनहरणं। यातनाश्च वैरं विषयाद्धाडनं अभो-ज्यतां च रोषाद्ब्राह्मणादिहननात्। 'मारेंतओ' हन्ता। 'लभदि' लभते ॥७९५॥

कुद्धो परं वधित्ता सयंपि कालेण मरइ जंतेण।
हदघादयाण णत्थि विसेसो मुत्तूण तं कालं ॥७९६॥

[2]'कुद्धो परं वधित्ता'—रुष्ट परं वधित्वा। स्वयमपि कालेन जन्तेण—गच्छता कालेन। मरदि—मृतिमुपैति। 'हदघादयाणं'-हतस्य घातकस्य च। णत्थि विसेसो—नास्ति विशेष। तं कालं मुत्तूण—तं कालं मुक्त्वा। पूर्वमसौ मृतः पश्चात्स्वयमिति ॥७९६॥

अप्पाउगरोगिदयाविरूवदाविगलदा अवलदा य।
दुम्मेहवण्णरसगंधदा य से होइ परलोए ॥७९७॥

'अप्पाउगरोगिदयाविरूवदाविगलदा अवलदा य' अल्पजीवितरोगिता विरूपता, विकलेन्द्रियता दुर्बलता। 'दुम्मेधवण्णरसगंधदा य' दुर्मेधता, दुर्वर्णता, दूरसदुर्गन्धता च। 'से' तस्य। 'होदि' भवति। 'परलोए' जन्मान्तरे ॥७९७॥

मारेदि एयमवि जो जीवं सो बहुसु जम्मकोडीसु।
अवसो मारिज्जंतो मरदि विधाणेहिं बहुएहिं ॥७९८॥

'मारेदि' हन्ति। 'एगमवि' एकमपि। 'जो जीवं' यो जीव। 'सो' सः। 'बहुसु जम्मकोडीसु' बह्वीषु जन्मकोटीषु। 'अवसो मरदि मारिज्जंतो' परवशो मरति मार्यमाणो। 'विधाणेहिं बहुगेहिं' बहुभि प्रकारै-र्मार्यमाणः ॥७९८॥

जावइयाइं दुक्खाइं होंति लोयम्मि चदुगदिगदाइं।
सव्वाणि ताणि हिंसाफलाणि जीवस्स जाणाहि ॥७९९॥

गा०—मारनेवाला इसी जन्ममें वध, बन्ध मारण, धनहरण, अनेक यातनाएँ, बैर, देश निष्कासन तथा क्रोधमें आकर ब्राह्मण आदिकी हत्या करनेपर जातिबहिष्कारका दण्ड पाता है ॥७९५॥

गा०—क्रोधी मनुष्य दूसरेको मारकर समय आनेपर स्वय भी मर जाता है। अत मरने-वाले और मारनेवालेमें कालके सिवाय अन्य भेद नहीं है। पहले वह जिसे मारता है वह मरता है और पीछे स्वयं भी मरता है ॥७९६॥

गा०—हिंसक परलोक अर्थात् जन्मान्तरमें अल्पायु, रोगी, कुरूप, विकलेन्द्रिय, दुर्बल, मूर्ख, बुरेरूप, बुरेरस और दुर्गन्धयुक्त होता है ॥७९७॥

गा०—जो एक भी जीवको मारता है वह करोड़ो जन्मोंमें परवश होकर अनेक प्रकारसे मारा जाकर मरता है ॥७९८॥

---

१. वधं मारणं, बंधं बन्धन, रोधं उत्कंटादिकं, रोधन धनहरणं रिक्थोद्दालन यातनाश्च कदर्थनानि वैरं—आ० मु०। २. 'कुद्धो परं वधित्ता' क्रुद्धः सन् परमन्य बधित्वा स्वयमपि गच्छता कालेन म्रियते हतघात-कयोर्नास्ति विशेषः—आ० मु०।

'जावदियाइं' यावन्ति । **'दुक्खाइं'** दुःखानि । **'हुंति'** भवन्ति । **'चदुगदिगदाइं'** गतिचतुष्टयगतानि । **'सव्वाणि ताणि' 'हिंसाफलाणि'** सर्वाणि तानि हिंसाफलानि । **'जीवस्स जाणाहि'** जीवस्येति जानीहि ॥७९९॥

का हिंसा नाम यस्या इमे दोषा निरूप्यन्ते इत्याचष्टे—,

हिंसादो अविरमणं वहपरिणामो य होइ हिंसा हु ।
तम्हा पमत्तजोगो पाणव्ववरोवओ णिच्चं ॥८००॥

'हिंसादो अविरमणं' हिंसातोऽविरतिर्हिंसेति सम्बन्धनीयः । प्राणान् प्राणिनो[1] न व्यपरोपयामीति संकल्पाकरणं हिंसा इत्यर्थः । **'वधपरिणामो वा'** हन्मीति एवं परिणामो वा हिंसा । **'तम्हा'** तस्मात् । **'पमत्तजोगो'** प्रमत्तता सम्बन्धः । **पाणव्ववरोवओ** प्राणानपनयति । **'णिच्चं'** नित्य । विकथा, कषाय इत्येवमादयः पञ्चदशपरिणामा आत्मनो भावप्राणाना परस्य च द्रव्यभावप्राणाना वियोजका इति हिंसेत्युच्यते । तथा चोक्तम्—

रत्तो वा दुट्ठो वा मूढो वा जं पयुंजदि पओगं ।
हिंसा वि तत्थ जायदि तम्हा सो हिंसगो होइ ॥ [ ]

रक्तो द्विष्टो मूढो वा सन् यं प्रयोग प्रारभते तस्मिन्हिंसा जायते । न प्राणिनः प्राणाना वियोजनमात्रेण । आत्मनि रागादीनामनुत्पादकः सोऽभिधीयते अहिंसक इति । यस्माद्रागाद्युत्पत्तिरेव हिंसा । न हि जीवान्तरगतदेशतया अन्यतमप्राणवियोगापेक्षा हिंसा, तदभावकृता वा अहिंसा, किन्तु आत्मैव हिंसा आत्मा चैव अहिंसा । प्रमादपरिणत आत्मैव हिंसा अप्रमत्त एव च अहिंसा । उक्तं च—

अत्ता चेव अहिंसा अत्ता हिंसत्ति णिच्छओ समये ।
जो होदि अप्पमत्तो अहिंसगो हिंसगो इदरो ॥ [ ]

गा०—इस लोकमे चारों गतियोंमें जितने दुःख होते है वे सब उस जीवकी हिंसाके फल जानो ॥७९९॥

जिसके ये दोष कहे हैं वह हिंसा किसे कहते हैं, यह बतलाते हैं—

गा०-टी०—हिंसासे विरत न होना हिंसा है। अर्थात् 'मै प्राणीके प्राणोंका घात नही करूँगा' ऐसा संकल्प न करना हिंसा है। अथवा 'मै मारूँ' ऐसा परिणाम हिंसा है। इसलिए प्रमादीपना नित्य प्राणोंका घातक है। अर्थात् विकथा कषाय इत्यादि पन्द्रह प्रमादरूप परिणाम अपने भाव प्राणोंके और दूसरेके द्रव्यप्राण तथा भावप्राणोके घातक होनेसे हिंसा कहे जाते है। कहा भी है—

रागी, द्वेषी और मोही होकर जो कार्य करता है उसमें हिंसा होती है। प्राणियोके प्राणोंका घात हो जाने मात्रसे हिंसा नही होती। जो अपने रागादि भावोंको नही करता, उसे अहिंसक कहते हैं, क्योंकि रागादिकी उत्पत्ति ही हिंसा है। अन्य जीवके किसी प्राणके घातकी अपेक्षा हिंसा और उसका घात न होना अहिंसा नहीं है। किन्तु आत्मा ही हिंसा और आत्मा ही अहिंसा है। प्रमादभावसे युक्त आत्मा ही हिंसा है और अप्रमादी आत्मा ही अहिंसा है। कहा है—

निश्चयसे आगममें आत्माको ही अहिंसा और आत्माको ही हिंसा कहा है। जो अप्रमादी आत्मा है वह अहिंसक है और जो प्रमादभावसे युक्त है वह हिंसा है।

---

१. नो व्यपरोपयामीति सकल्पक—आ० मु० ।

जीवपरिणामायत्तो बन्धो जीवो मृतिमुपैतु नोपेयाद्वा । तथा चाभाणि—

> [1]अज्झवसिदेण बंधो सत्ते मारेउ मा व मारेउ ।
> एसो बंधसमासो जीवाणं णिच्छयणयस्स ॥ [—समय० २६२]

जीवास्तदीयानि शरीराणि शरीरग्रहणस्थान योनिसंज्ञितं यो च वरोवगो वेत्ति तत्सम्भवकालं तत्पीडा-परिहारेच्छु[2]रशठस्तपःक्रियायां लोभसत्काराद्यनपेक्ष्य प्रवृत्तो भवत्यहिंसक । उक्तं च—

> णाणी कम्मस्स खयत्थमुट्ठिदो णोट्ठिदो य हिंसाए ।
> अददि असढो हि सत्थं अप्पमत्तो अवधगो सो ॥　[　]

शुभपरिणामसमन्वितस्याप्यात्मनः स्वशरीरनिमित्तान्यप्राणिप्राणवियोगमात्रेण बन्ध स्यान्न कस्य-चिन्मुक्तिः स्यात् । योगिनामपि वायुकायिकवधनिमित्तबन्धसद्भावात् । अभाणि च—

> जदि सुद्धस्स य बंधो होहिदि बाहिरंगवत्थुजोगेण ।
> णत्थि दु अहिंसगो णाम होदि वायादिवधहेदु ॥　[　]

तस्मान्निश्चयनयाश्रये ण प्राण्यन्तरप्राणवियोगापेक्षा हिंसा ॥८००॥

हिंसागतक्रियाभेदान्निरूपयति—

> **पादोसिय अधिकरणिय कायिय परिदावणादिवादाए ।**
> **एदे पंचपओगा किरियाओ होंति हिंसाओ ॥८०१॥**

जीव मरे या न मरे, जीवके परिणामोके अधीन बन्ध होता है कहा है—

जीव मरे या न मरे हिंसायुक्त परिणामसे बन्ध होता है। निश्चयनयसे यह जीवके बन्धका सार है।

जीव, उनके शरीर, शरीर ग्रहण करनेके स्थान जिसे योनि कहते हैं, उनका उत्पत्तिकाल, इन सबको जो जानता है और उनकी पीड़ाको दूर करना चाहता है तथा लोभ सन्मान आदिकी अपेक्षा न करके मायाचार रहित तपमें लीन हैं वह अहिंसक है। कहा है—

ज्ञानी कर्मके क्षयके लिए उद्यत होता है, हिंसाके लिए उद्यत नही होता। वह मायाचारसे रहित होता है। अतः अप्रमत्त होनेसे वह अहिंसक है। शुभपरिणामसे युक्त आत्माके भी यदि अपने शरीरके निमित्तसे अन्य प्राणियोके प्राणोंका घात हो जानेमात्रसे बन्ध हो तो किसीकी मुक्ति ही न हो। क्योंकि योगियोंके भी वायुकायिक जीवोंके घातके निमित्तसे बन्धका प्रसंग आता है वे भी श्वास लेते हैं और उससे वायुकायिक जीवोंका घात होता है। कहा है—

यदि बाह्य वस्तुओंके सम्बन्धसे शुद्धपरिणामवाले जीवके भी बन्ध होता हो तो कोई अहिंसक हो ही नहीं सकता, क्योंकि शुद्धपरिणामोके श्वाससे वायुकायिक जीवोंका वध होता है।

इसलिए निश्चयनयकी दृष्टिसे दूसरे प्राणियोंके प्राणोंके घातकी अपेक्षामात्रसे हिंसा नही होती ॥८००॥

हिंसा सम्बन्धी क्रियाओंके भेदोंका कथन करते हैं—

---

१. अज्झवसिदो य बद्धो—आ० मु०।　२. रसकृत्तप—आ० मु०।

'पादोसियअधिकरणिय कायिय परिदावणादिवादाए' पादोसिय शब्देनेष्टदारवित्तहरणादिनिमित्तः कोपः प्रद्वेष इत्युच्यते। प्रद्वेष एव प्राद्वेषिको यथा विनय एव वैनयिकमिति। हिंसाया उपकरणमधिकरणमित्युच्यते। हिंसोपकरणादानक्रिया आधिकरणिकी। दुष्टस्य सत. 'कायेन वा चलनक्रिया कायिकी। परितापो दुःखं दुःखोत्पत्तिनिमित्ता क्रिया पारितापिकी। आयुरिन्द्रियबलप्राणानां वियोगकारिणी प्राणातिपातिकी। **'एदे पंच पओगा'** एते पञ्च प्रयोगाः। **'हिंसाकिरियाओ'** हिंसासम्बन्धिन्यः क्रियाः ॥८०१॥

तिहिं चदुहिं पंचहिं वा कमेण हिंसा समप्पदि हु ताहिं।
बंधो वि सिया सरिसो जइ सरिसो काइयपदोसो ॥८०२॥

'तिहि चदुहि पंचहि वा' त्रिभिर्मनोवाक्कायैः, चतुर्भिः क्रोधमानमायालोभैः, पञ्चभिः स्पर्शनादिभिरिन्द्रियैर्वा। **'कमेण हिंसा समप्पदि हु'** क्रमेण हिंसा समाप्तिमुपैति। ताभिर्मनसा प्रद्वेषो वचसा द्विष्टोऽस्मीति वचनं वाग्द्वेष। कायेन मुखवैवर्ण्यादिकरणं कायद्वेष। मनसा हिंसोपकरणादानं, वाचा शस्त्र[2] उपगृह्णामीति हस्तादिताडन इति अधिकरणमपि त्रिविध। मनसा उत्तिष्ठामीति चिन्ता कायक्रिया। वचसा उत्तिष्ठामि इति, हन्तु ताडयितुमिति उक्ति। कायेन चलन कायिकी। मनसा दुःखमुत्पादयामीति चिन्ता, दु.खं भवत करोमि इति उक्तिर्वाचा पारितापिकी क्रिया। हस्तादिताडनेन दु.खोत्पादनं कायेन पारितापिकी क्रिया। प्राणान्वियोजयामीति चिन्ता मनसा प्राणातिपात, हन्मीति वच वाक्प्राणातिपात। कायव्यापारः कायिकप्राणातिपात. क्रोधनिमित्ता कस्मेश्चिदपीति, माननिमित्ता, मायानिमित्ता, लोभनिमित्ता, क्रोधादिना शस्त्रग्रहणं

गा०—'पादोसिय' शब्दसे इष्ट स्त्री, धन हरने आदिके निमित्तसे होनेवाला कोप प्रद्वेष कहलाता है। प्रद्वेष ही प्राद्वेषिक है जैसे विनय ही वैनयिक है। हिंसाके उपकरणको अधिकरण कहते हैं। हिंसाके उपकरणोंका लेन-देन अधिकरणिकी क्रिया है। दुष्टतापूर्वक हलन-चलन कायिकी क्रिया है। परितापका अर्थ दुःख है। दु खकी उत्पत्तिमें निमित्त क्रिया पारितापिकी है। आयु इन्द्रिय और बल प्राणोका वियोग करनेवाली क्रिया प्राणातिपातिकी है। पाँच प्रकारकी प्रयोग हिंसासे सम्बन्ध रखनेवाली क्रियाएँ है ॥८०१॥

गा०-टी०—मन वचन काय इन तीनसे, क्रोध मान माया लोभ इन चारसे और स्पर्शन आदि पाँच इन्द्रियोंसे क्रमसे हिंसा होती है। मनसे द्वेष करना, वचनसे मै द्वेषयुक्त हूँ ऐसा कहना वचनद्वेष है। शरीरसे मुखको विकृत आदि करना कायद्वेष है। मनसे हिंसाके उपकरण स्वीकार करना, वचनसे मैं शस्त्र ग्रहण करता हूँ ऐसा कहना, कायसे हाथ आदि भाजना ये अधिकरणके तीन भेद है। मनसे विचारना 'मैं मारनेके लिए उठूँ' वचनसे कहना मैं मारनेके लिए उठता हूँ। और कायसे हलन-चलन ये तीन कायिकी क्रिया है। मनमें चिन्ता करना 'मै दुःख दूँ' यह मानसिक पारितापिकी क्रिया है। आपको दुःख दूँ ऐसा कहना वाचनिक पारितापिकी क्रिया है। हाथ आदिके द्वारा ताडन करनेसे दु.ख देना कायिक पारितापिकी क्रिया है। मै प्राणोंका वियोग करूँ ऐसा चिन्तन करना मानसिक प्राणातिपात है। मैं घात करता हूँ ऐसा कहना वाचनिक प्राणातिपात है। शरीरसे व्यापार करना कायिक प्राणातिपात है। यह किसीमे क्रोधके निमित्तसे, किसीमें मानके निमित्तसे, किसीमें मायाके निमित्तसे और किसीमे लोभके निमित्तसे होता है। क्रोध आदि-

---

१. काये भवा चा—आ०। २. स्त्रं नोप—अ०।

क्रोधादिनिमित्त: कायपरिस्पन्द:। क्रोधादिनिमित्तपरपरितापकरणं, प्राणातिपातो वा क्रोधादिना भवति। स्पर्शनादीन्द्रियनिमित्तो वा प्रद्वेष:, इन्द्रियसुखार्थं वा फलपल्लवप्रसूनादिछेदननिमित्तसाधनोपादानं, तत्सुखार्थमेव विषयप्रत्यासत्तिमभिप्रेत्य यत: कायपरिस्पन्द:। परस्य वा गाढालिङ्गननखक्षतादिना सन्तापकरणं, मांसाद्यर्थं वा प्राणिप्राणवियोजनमिति। किमेताभिर्हिसाभि संपाद्य: कर्मबन्ध समान उत न्यूनाधिकभावो बन्धस्येत्याशङ्कायामाचष्टे 'बंधोऽपि' कर्मबन्धोऽपि 'सिया सरिसो' स्यात्सदृश.। कथं? 'जदि सरिसो' यदि सदृश:। 'काथिकपदोसो' कायिकी क्रिया प्रद्वेषश्च यदि सम: स्यात्कारणसामान्यात्कार्यस्यापि बन्धस्य सादृश्यं, अन्यथा न सदृशता। तीव्रमध्यमन्दरूपा. परिणामा' तीव्र, मध्यं, मन्द च बन्धमापादयन्ति इति भाव.॥८०२॥

अधिकरणभेद निरूपयति—

वीसं[1] पलिया पंचेत्थ मोदया चारि पंच दस पलिया।
तिण्णि चदु पंच सत्तमोदय तेसिं पि समो हवे बंधो॥
वीस पल तिण्णि मोदय पण्णरह पला तहेव चत्तारि।
बारह पलिया पंच दु तेसिं पि समो हवे बंधो॥८०३॥

जीवगदमजीवगद समासदो होदि दुविहमधिकरणं।
अट्ठुत्तरसयभेदं पढमं विदियं चदुब्भेदं॥८०४॥

के वशमें होकर शस्त्र ग्रहण करना क्रोधादि निमित्तसे होने वाला काय परिस्पन्द है। क्रोध आदिके निमित्तसे दूसरोंको दु:ख देना अथवा प्राणोंका घात करना क्रोध आदिसे होता है। अथवा स्पर्शन आदि इन्द्रियोंके निमित्तसे प्रद्वेष होता है। इन्द्रिय सुखके लिए फल, पत्र, फूल आदि तोडनेके लिए उसके साधन ग्रहण किये जाते हैं। इन्द्रिय सुखके लिए ही विषयोको स्वीकार किया जाता है, शरीरसे हलन-चलन किया जाता है, गाढ़ आलिंगन तथा नख द्वारा नोचना आदिसे दूसरोंको सताप दिया जाता है। अथवा मास आदिके लिये प्राणीके प्राणोका घात किया जाता है।

इस प्रकार प्राद्वेषिकी क्रिया, आधिकरिणिकी क्रिया, कायिकी क्रिया, पारितापिकी क्रिया और प्राणातिपातिकी क्रिया मन वचन काय, क्रोध मान माया लोभ और स्पर्शन रसन घ्राण, चक्षु श्रोत्रसे होती हैं।

शङ्का—इन क्रियाओंसे होने वाला कर्मबन्ध समान होता है या हीनाधिक होता है?

समाधान—यदि कायिकी क्रिया और प्रद्वेष समान होता है तो समान कर्मबन्ध होता है। क्योंकि कारणमें समानता होनेसे कार्य बन्धमे भी समानता होती है, अन्यथा समानता नहीं होती। तीव्र मध्य या मन्दरूप परिणामोंसे तीव्र मध्य या मन्द बन्ध होता है॥८०२॥

अधिकरणके भेद कहते हैं—

[गाथा ८०३ दो रूपोमे मिलती है किन्तु उसका भाव स्पष्ट नहीं होता। पं० सदासुखजीने भी ऐसा ही लिखा है। अत: इनका अर्थ नही किया। किसी टीकाकारने भी इसकी व्याख्या नही की।]

---

1. आ० प्रति में दोनो गाथायें है न० दोनो पर ९६ ही है।

'जीवगदमजीवगदं इदि' जीवगत इति जीवपर्याय उच्यते । न हि जीवद्रव्यत्वमात्रमेव हिंसायां उपकरणं भवति । किन्तु जीवस्य पर्यायः आत्मनस्य हिंसादेर्जीवपरिणामो युक्तोऽभ्यन्तरकारणं । अजीवगतः पर्यायः द्रव्यस्याश्रयः सदा सन्निहितकार्यः स्यात्कादाचित्कतां कथमिव प्रतिपादयति । पर्यायस्तु स्वकारणसान्निध्यात्कादाचित्कोऽवेति । यदा स्वयं सन्ति सन्निहितसहकारिकारणास्तदैव स्वकार्यं कुर्वन्ति नान्यदेति युक्ता कादाचित्कता कार्यस्येति भावः । 'समासदो दुविधमधिकरणं' संक्षेपतो द्विविधं हिंसाधिकरणं 'अट्ठुत्तरसदभेदं' अष्टोत्तरशतभेदं । 'पढमं जीवगदमधिकरणं' प्रथमं जीवगतमधिकरणं । 'विदियं' द्वितीयं अजीवगतमधिकरणं 'चदुब्भेदं' चतुर्विकल्पं ॥८०४॥

प्रथमस्य भेदान्निरूपयति—

संरंभसमारंभारंभं जोगेहिं तह कसाएहिं ।
कदकारिदाणुमोदेहिं तहा गुणिदा पढमभेदा ॥८०५॥

'संरंभसमारंभारंभजोगेहिं तह कसाएहिं' प्राणव्यपरोपणादौ प्रमादवतः संरम्भः । साध्याया हिंसादिक्रियायाः साधनानां समाहारः समारम्भः । सञ्चितहिंसाद्युपकरणस्य आद्यः प्रक्रम आरम्भः । योगशब्देन मनोवाक्कायव्यापारा उच्यन्ते । एतैः सरम्भसमारम्भारम्भयोगैः । 'तथा' तथा 'कसाएहिं' कषायैः 'कदकारिदाणुमोदेहिं' कृतकारितानुमोदितैः । 'तहा गुणिदा' तथा गुणिताः । 'पढमभेदा' जीवाधिकरणभेदा । प्रयत्नपूर्वकत्वाच्चेतनावतो व्यापारस्यादौ संरंभस्य वचनं । अनुपाया साध्यसिद्धिर्न भवति प्रयत्नवतोऽपि ततः साधनसमाहरणं प्रयत्नादनन्तरमिति समारम्भो युक्तः । साध्यं पुनः उपसाधनसंहृतौ सत्यां प्रक्रमते क्रियामिति आरम्भः

गा०–टी०—अधिकरणके दो भेद हैं—जीवगत और अजीवगत । जीवगतका अर्थ है जीवपर्याय । केवल जीवद्रव्य हिंसामे सहायक नहीं होता किन्तु जीवकी पर्याय होती है । हिंसा आदिसे युक्त जीवका परिणाम हिंसाका अभ्यन्तर कारण होता है । इसी तरह अजीवगतसे अजीवपर्याय लेना चाहिए; क्योंकि अजीवद्रव्य तो सदा रहनेसे सदा कार्यकारी रहता है अतः कार्य सदा होता रहेगा । किन्तु पर्याय तो अपने कारणोंके होने पर ही होती है अतः कदाचित् होती है । जब सहकारी कारण होते हैं तभी अपना कार्य करते हैं, अन्य कालमे नहीं करते । अतः कार्य सदा न होकर कदाचित् होता है ।

इस तरह संक्षेपसे अधिकरणके दो भेद हैं । उनमेसे प्रथम जीवाधिकरणके एक सौ आठ भेद हैं और दूसरे अजीवाधिकरणके चार भेद हैं ॥८०४॥

जीवाधिकरणके भेद कहते हैं—

गा०–टी०—प्राणोंके घात आदिमें प्रमाद युक्त व्यक्ति जो प्रयत्न करता है वह संरंभ है । साध्य हिंसा आदि क्रियाके साधनोंको एकत्र करना समारंभ है । हिंसा आदिके उपकरणोंका संचय हो जाने पर हिंसाका आरम्भ करना आरम्भ है । योग शब्दसे मन वचन और कायका व्यापार लिया गया है । इन संरंभ, समारम्भ, आरम्भको, योग, कषाय और कृत कारित अनुमोदनासे गुणा करने पर जीवाधिकरणके भेद होते हैं ।

चेतन जीवका व्यापार प्रयत्नपूर्वक होता है इसलिए प्रथम संरम्भ कहा है । प्रयत्न करनेपर भी उपायोंके बिना कार्यसिद्धि नहीं होती, अतः संरम्भके पश्चात् समारम्भ कहा है । साधनोंके एकत्र होनेपर कार्य प्रारम्भ होता है । अतः समारम्भके पश्चात् आरम्भको रखा है । जीवके द्वारा

पश्चादुपन्यस्तः । स्वातन्त्र्यविशिष्टेन आत्मना यत् क्रियते तत् कृतं । परस्य प्रयोगमपेक्ष्य सिद्धिमुपयाति यत्तत्कारितं । स्वयं न करोति न च कारयति, किन्त्वभ्युपैति यत्तदनुमननं अभ्युपगमः । तत्र संरंभस्तावदुच्यते क्रोधनिमित्तं स्वतन्त्रस्य हिंसाविषय प्रयत्नावेश. क्रोधकृतकायसंरम्भः । मानकृतकायसंरम्भ॰, मायाकृतकायसंरम्भः, लोभकृतकायसंरम्भः । क्रोधकारितकायसंरम्भ., मानकारितकायसरम्भः मायाकारितकायसंरम्भः, लोभकारितकायसंरम्भः । क्रोधानुमतकायसरम्भः, मानानुमतकायसंरम्भः, मायानुमतकायसंरम्भः, लोभानुमतकायसंरम्भः । इति द्वादशधा संरम्भः । क्रोधकृतकायसमारम्भः, मानकृतकायसमारम्भः, मायाकृतकायसमारम्भ, लोभकृतकायसमारम्म. । क्रोधकारितकायसमारम्भ, मानकारितकायसमारम्भ । मायाकारितकायसमारम्भ., लोभकारितकायसमारम्भ. । क्रोधानुमतकायसमारम्भः, मानानुमतकायसमारम्भ., मायानुमतकायसमारम्भः, लोभानुमत कायसमारम्भ. इति द्वादशधा समारम्भ । क्रोधकृतकायारम्भ., मानकृतकायारम्भ., मायाकृतकायारम्भ॰, लोभकृतकायारम्भः । क्रोधकारितकायारम्भ मानकारितकायारम्भ, मायाकारितकायारम्भ, लोभकारितकायारम्भ । क्रोधानुमतकायारम्भ॰, मानानुमतकायारम्भ, मायानुमतकायारम्भ., लोभानुमतकायारम्भश्च । इत्येव आरम्भोऽपि द्वादशधा । एव सबिदिता॰ कायारम्भा षट्त्रिंशत् । एते सपिण्डिता. जीवाधिकरणास्रवभेदा अष्टोत्तरशतसख्या भवन्ति ॥८०५॥

संरंभो संकप्पो परिदावकदो हवे समारंभो ।
आरंभो उद्दवओ सव्ववयाणं विसुद्धाणं ॥८०६॥

स्वतन्त्रता पूर्वक जो किया जाता है वह कृत है । जो दूसरेके द्वारा सिद्ध होता है वह कारित है । न स्वयं करता है न कराता है किन्तु जो करता है उसे स्वीकार करता है वह अनुमत है। इनमेसे संरम्भके भेद कहते हैं—

क्रोधके निमित्तसे स्वतन्त्रता पूर्वक हिंसा विषयक प्रयत्न करना क्रोध कृत काय संरम्भ है। इसी तरह मान कृत काय संरम्भ, मायाकृत काय सरम्भ, लोभकृत काय संरम्भ, क्रोध कारित काय संरम्भ, मान कारित काय संरम्भं, माया कारित काय सरम्भ, लोभ कारित काय संरम्भ । क्रोधानुमत काय सरम्भ, मानानुमत काय सरम्भ, मायानुमत काय सरभ, लोभानुमत काय सरम्भ इस तरह बारह प्रकारका संरम्भ है। क्रोधकृत काय समारम्भ, मानकृत काय समारम्भ, मायाकृत काय समारम्भ, लोभ कृत काय समारम्भ। क्रोध कारित काय समारम्भ, मान कारित काय समारम्भ, माया कारित काय समारम्भ, लोभ कारित काय समारम्भ। क्रोधानुमत काय समारम्भ, मानानुमत काय समारम्भ, मायानुमत काय समारम्भ, लोभानुमत काय समारम्भ। इस तरह बारह प्रकारका समारम्भ है। क्रोधकृत काय आरम्भ, मानकृत काय आरम्भ, मायाकृत काय आरम्भ, लोभकृत काय आरम्भ, क्रोध कारित काय आरम्भ, मान कारित काय आरम्भ, माया कारित काय आरम्भ, लोभ कारित काय आरम्भ, क्रोधानुमत काय आरम्भ, मानानुमत काय आरम्भ, मायानुमत काय आरम्भ, लोभानुमत काय आरम्भ। इस प्रकार आरम्भ भी बारह प्रकारका है। ये मिलकर कायारम्भके छत्तीस भेद होते हैं। छत्तीस ही भेद वचन सम्बन्धी आरम्भके और छत्तीस ही भेद मन सम्बन्धी आरम्भके होते हैं। ये सब मिलकर जीवाधिकरण सम्बन्धी आस्रवके एक सौ आठ भेद होते है ॥८०५॥

गा०—संकल्पको संरम्भ कहते हैं। संताप देनेको समारम्भ कहते हैं और आरम्भ सब

अजीवाधिकरणस्य चतुरो भेदानाचष्टे—

णिक्खेवो णिव्वत्ति तहा य संजोयणा णिसग्गो य ।
कमसो चदु दुग दुग तिय भेदा होंति हु विदियस्स ॥८०७॥

'णिक्खेवो णिव्वत्ति तहा य संजोयणा णिसग्गो य' निक्षेपो निर्वर्तना संयोजना निसर्ग इति । 'कमसो' यथासंख्येन । 'चदु दुग दुग तिय भेदा' निक्षेपश्चतुःप्रकारः । निर्वर्तना द्विप्रकारा । संयोजना द्विप्रकारा । निसर्गस्त्रिविध इति सम्बध्यते ॥८०७॥

निक्षेपस्य चतुरो विकल्पानाचष्टे—

सहसाणाभोगिय दुप्पमज्जिद अपच्चवेक्खणिक्खेवो ।
देहो व दुप्पउत्तो तहोवकरणं च णिव्वत्ति ॥८०८॥

'सहसाणाभोगियदुप्पमज्जिद अपच्चवेक्खणिक्खेवो' सहसानिक्षेपाधिकरणं, अनाभोगनिक्षेपाधिकरणं, दुःप्रमृष्टनिक्षेपाधिकरणं, अप्रत्यवेक्षितनिक्षेपाधिकरणं चेति । निक्षिप्यते इति निक्षेपः । उपकरणं पुस्तकादि, शरीरं, शरीरमलानि वा सहसा शीघ्रं निक्षिप्यमाणानि भयात् कुतश्चित्कार्यान्तरकरणप्रयुक्तेन वा त्वरितेन षड्जीवनिकायबाधाधिकरणतां प्रतिपद्यन्ते । असत्यामपि त्वरायां जीवाः सन्ति न सन्तीति निरूपणामन्तरेण निक्षिप्यमाणं तदेवोपकरणादिकं अनाभोगनिक्षेपाधिकरणमुच्यते । दुष्प्रमृष्टमुपकरणादि निक्षिप्यमाणं दुष्प्रमृष्टनिक्षेपाधिकरणं स्थाप्यमानाधिकरणं वा दुष्प्रमृष्टनिक्षेपाधिकरण । प्रमार्जनोत्तरकाले जीवाः सन्ति न सन्तीति अप्रत्यवेक्षितं यन्निक्षिप्यते तदप्रत्यवेक्षितनिक्षेपाधिकरणं । निर्वर्तनाभेदमाचष्टे—'देहो य दुप्पउत्तो' दुःप्रयुक्तं शरीरं हिंसोपकरणतया निर्वर्त्यते इति निर्वर्तनाधिकरणं भवति । उपकरणानि च सच्छिद्राणि यानि जीवबाधा-

---

विशुद्ध व्रतोंका घातक है ॥८०६॥

अजीवाधिकरणके चार भेदोंको कहते हैं—

गा०—अजीवाधिकरणके चार भेद हैं—निक्षेप, निर्वर्तना, संयोजना और निसर्ग। क्रमानुसार निक्षेपके चार भेद हैं। निर्वर्तनाके दो भेद हैं। संयोजनाके दो भेद है और निसर्गके तीन भेद हैं ॥८०७॥

निक्षेपके चार भेद कहते हैं—

गा०–टी०—निक्षेपके चार भेद हैं—सहसानिक्षेपाधिकरण, अनाभोगनिक्षेपाधिकरण, दुःप्रमृष्टनिक्षेपाधिकरण और अप्रत्यवेक्षित निक्षेपाधिकरण। रखनेको निक्षेप कहते हैं। उपकरण, पुस्तक आदि, शरीर अथवा शरीरके मल भयसे अथवा किसी अन्य कारणान्तरसे सहसा शीघ्र रखनेसे त्यागनेसे छहकायके जीवोंकी बाधाके आधार हो जाते है। यह सहसानिक्षेपाधिकरण है। जल्दी नहीं होनेपर भी 'पृथ्वी आदिपर जन्तु हैं या नहीं' यह देखे बिना ही उपकरण आदिको रखना अनाभोगनिक्षेपाधिकरण है। उपकरण आदिको असावधानतासे या दुष्टतासे साफ करके रखना अथवा जिस स्थानपर उन्हें रखना है उस स्थानकी दुष्टतासे सफाई करना, जिससे जीवोंको कष्ट पहुंचे, दुष्प्रमृष्ट निक्षेपाधिकरण है। स्थानकी सफाई करनेके पश्चात् वहाँ जीव हैं या नहीं यह देखे बिना उपकरणादि रखना अप्रत्यवेक्षित निक्षेपाधिकरण है। दुष्प्रयुक्त शरीर–शरीरकी असावधानतापूर्वक प्रवृत्ति हिंसाका कारण होती है उसे निर्वर्तनाधिकरण कहते हैं। छिद्रवाले

निमित्तानि निर्वर्त्यन्ते तान्यपि निर्वर्तनाधिकरणं । यस्मिन्सौवीरादिभाजने प्रविष्टा म्रियन्ते ॥८०८॥

संजोयणमुवकरणाणं च तहा पाणभोयणाणं च ।
दुट्ठणिसिट्ठा मणवचिकाया भेदा णिसग्गस्स ॥८०९॥

'संजोजणमुवकरणाणं' उपकरणानां पिच्छादीना अन्योन्येन सयोजना । शीतस्पर्शस्य पुस्तकस्य कमण्डल्वादेर्वा आतपादितप्तेन पिच्छेन प्रमार्जनं इत्यादिकं । **'तहा'** तथा । **'पाणभोजणाणं च'** पानभोजनयोश्च पानं पानेन, पानं भोजनेन, भोजन भोजनेन, भोजन पानेनेत्येवमादिक सयोजनं यस्य सम्मूर्च्छनं सम्भवति सा हिंसाधिकरणत्वेनात्रोपात्ता न सर्वा । **'दुट्ठुणिसिट्ठा मणवचिकाया'** दुष्टप्रवृत्ता मनोवाक्कायप्रभेदा निसर्गशब्देनोच्यन्ते ॥८०९॥

अहिंसारक्षणोपायमाचष्टे—

जं जीवणिकायवहेण विणा इंदियकयं सुहं णत्थि ।
तम्हि सुहे णिस्संगो तम्हा सो रक्खदि अहिंसा ॥८१०॥

'जं जीवणिकायवहेण' यस्माज्जीवनिकायघातं विना । **'इंदियसुहं'** इन्द्रियसुखं नास्ति । स्त्रीवस्त्रगन्धमाल्यादिसेवा विचित्रा जीवनिकायपीडाकारिणी आरम्भेण महतोपार्जनीयत्वात् । तस्मिन्निन्द्रियसुखे । निस्संगो यस्स पात्यहिंसां नेन्द्रियसुखार्थी । तस्मादिन्द्रियसुखादरं मा कृथा इत्युपदिशति सूरि. ॥८१०॥

उपकरण जो जीवोको बाधा पहुँचाते हैं उनकी निर्वर्तना—रचना करना भी निर्वर्तनाधिकरण है । जैसे कांजी आदि रखनेके ऐसे सछिद्रपात्र बनाना जिसमें प्रविष्ट जीव मर जाते हैं ।

विशेषार्थ—सर्वार्थसिद्धिमे पूज्यपाद स्वामीने निर्वर्तनाधिकरणके दो भेद कहे हैं एक मूलगुणनिर्वर्तना, एक उत्तरगुण निर्वर्तना । शरीर वचन मन, उच्छ्वास निश्वासकी रचना मूलगुण निर्वर्तना है । लकड़ीके पट्टपर चित्रकर्म आदि रचना करना उत्तर गुणनिर्वर्तना है । इन क्रियाओसे जीवोंको कष्ट पहुँचता है । चित्रकर्ममें छेदन-भेदनकी भावना उत्पन्न होती है ॥८०८॥

संयोजनाधिकरण और निसर्गाधिकरणका स्वरूप कहते हैं—

गा०-टी०—पिच्छी आदि उपकरणोंको परस्परमे मिलाना । जैसे शीतस्पर्शवाली पुस्तक अथवा कमंडलु आदिको धूपसे तप्त पीछीसे साफ करना उपकरण संयोजना है । एक जलमें दूसरा जल मिलाना, एक भोजनमें दूसरा भोजन मिलाना अथवा भोजनमें पेय मिलाना आदि भक्तपान संयोजना है । यहाँ इतना विशेष जानना कि जिस पेय या भोजनमे सम्मूर्च्छन जीव होते है उसे ही हिंसाका अधिकरण स्वीकार किया है, सबको नहीं । दुष्टतापूर्वक मन वचन कायकी प्रवृत्तिको निसर्गाधिकरण कहते हैं ॥८०९॥

अहिंसाकी रक्षाके उपाय कहते हैं—

गा०-टी०—यत छहकायके जीवोंकी हिंसाके विना इन्द्रियजन्य सुख नही होता । विचित्र प्रकारके स्त्री, वस्त्र, गन्ध, माला आदिका सेवन जीवोंको पीड़ा करनेवाला होता है क्योंकि बहुत आरम्भसे उसकी प्राप्ति होती है । अतः जो इन्द्रियजन्य सुखमें आसक्त नहीं है वही अहिंसा की रक्षा करता है । जो इन्द्रिय सुखका अभिलाषी है वह नहीं रक्षा करता । अत आचार्य कहते हैं कि इन्द्रियसुखका आदर मत करो ॥८१०॥

हिंसा कषायैः प्रवर्त्यते, ततोऽहिंसामिच्छता एते परिहर्तव्या इत्युत्तरसूत्रार्थः—

जीवो कसायबहुलो संतो जीवाण घायणं कुणइ ।
सो जीववहं परिहरइ सया जो णिज्जियकसाओ ॥८११॥

प्रमादो हिंसायाः प्रवर्तकः स परित्याज्योऽहिंसाव्रतार्थिना इति गाथार्थः—

आदाणे णिक्खेवे वोसरणे ठाणगमणसयणेसु ।
सव्वत्थ अप्पमत्तो दयावरो होइ हु अहिंसो ॥८१२॥

काएसु णिरारंभे फासुगभोजिम्मि णाणरइयम्मि ।
मणवयणकायगुत्तिम्मि होइ सयला अहिंसा हु ॥८१३॥

परित्यक्तारम्भे च प्रासुकभोजिनि ज्ञानभावनाविहितमनसि गुप्तित्रयोपेते सम्पूर्णा भवत्यहिंसा इति सूत्रार्थः ॥८१३॥

आरंभे जीववहो अप्पासुगसेवणे य अणुमोदो ।
आरंभादीसु मणो णाणरदीए विणा चरइ ॥८१४॥

पृथिव्यादिविषयो व्यापार आरम्भः । तस्मिन्सति तदाश्रयप्राण्युपद्रव इति जीववधो भवति । उद्गमादिदोषोपहतस्य आहारस्य भोजने जीवनिकायवधानुमोदो भवति । ज्ञानरतिमन्तरेण आरम्भे कषाये च मनः प्रवर्तते ॥८१४॥

तम्हा इहपरलोए दुक्खाणि सदा अणिच्छमाणेण ।
उवओगो कायव्वो जीवदयाए सदा मुणिणो ॥८१५॥

हिंसा कषायसे होती है। अतः अहिंसाके अभिलाषीको कषाय त्यागना चाहिए, यह कहते हैं—

गा०—जो जीव कषायकी अधिकता रखता है वह जीवोंका घात करता है। और जो कषायोंको जीत लेता है वह सदा जीवोंकी हिंसासे दूर रहता है। अतः प्रमाद हिंसाका कारण है। अहिंसाव्रतके अभिलाषीको प्रमादको त्यागना चाहिए ॥८११॥

गा०—उपकरणोंको ग्रहण करनेमें, रखनेमें, उठने बैठने, चलने और शयनमें जो दयालु सर्वत्र यत्नाचारपूर्वक प्रवृत्ति करता है वह अहिंसक होता है ॥८१२॥

गा० जो आरम्भका त्यागी है, प्रासुक भोजन करता है, ज्ञानभावनामें मनको लगाता है और तीन गुप्तियोंका धारी है वही सम्पूर्ण अहिंसाका पालक है यह उक्त गाथासूत्रका अर्थ है ॥८१३॥

गा०–टी०—पृथिवी आदिके विषयमे जो खोदना आदि व्यापार किया जाता है उसे आरम्भ कहते हैं। उसके करने पर पृथिवी आदिमें रहने वाले जीवोंका घात होता है। उद्गम आदि दोषों-से युक्त आहार ग्रहण करने पर जीव समूहके वधकी अनुमोदना होती है, ज्ञानमें लीनता न होने पर आरम्भ और कषायमें मनकी प्रवृत्ति होती है ॥८१४॥

तम्हा तस्मात् । आरम्भो भवता त्याज्यः, प्रासुकभोजनं भोज्यं, ज्ञाने अरतिश्च अपाकार्या इति क्षपकशिक्षा । अहिंसा जीवदया तस्याः फलमुपवर्णयति—तम्हा इत्यनया उभयलोकगतदुःखपरिहारमिच्छता दयाभावना कार्या इति कथयति क्षपकस्य ॥८१५॥

स्वल्पकालवर्त्यपि अहिंसाव्रतं करोत्यात्मनो महान्तमुपकारमित्याख्यानं कथयति—

पाणो वि पाडिहेरं पत्तो छूढो वि सुंसुमारहदे ।
एगेण एक्कदिवसकदेण हिंसावदगुणेण ॥८१६॥

'पाणो वि' चण्डालोऽपि 'पाडिहेरं' प्रातिहार्यं 'पत्तो' प्राप्त. । 'सुंसुमारहदे छूढो' शिशुमाराकुले ह्रदे निक्षिप्तोऽपि । 'एक्केण हिंसावदगुणेण' एकेनैव अहिंसाव्रताख्येन गुणेन । 'अप्पकालकदेण' अल्पकालकृतेन । अहिंसा ॥८१६॥

द्वितीयव्रतनिरूपणाय उत्तरप्रबन्धः—

परिहर असंतवयणं सव्वं पि चदुव्विधं पयत्तेण ।
धत्तं पि संजमिंतो भासादोसेण लिप्पदि हु ॥८१७॥

'परिहर' परित्यज । 'असंतवयणं' असद् अशोभनं वचनं । यत्कर्मबन्धनिमित्त वचस्तदशोभनं । तथा चोक्तं—'असदभिधानमनृतं [त० सू० ७] । ननु वचनमात्मपरिणामो न भवति । द्रव्यान्तरं हि तत्पुद्गलाख्यं, आत्मपरिणामो हि परित्याज्यो यो बन्धस्य बन्धस्थितेर्वा निमित्तभूतो मिथ्यात्वमसयम कषायो योग इत्येवंप्रकारः । तस्मादसद्वचनपरिहारोपदेशोऽनुपयोगी कस्मात्कृत इति अत्रोच्यते— असंयमो हि त्रिप्रकारः कृतः

गा०—अतः इस लोक और परलोकमें दुःखको नहीं चाहने वाले मुनिजनोको सदा जीव दयामें उपयोग लगाना चाहिए और उसके लिए आरम्भ त्यागना चाहिए, प्रासुक भोजन करना चाहिए और ज्ञानमें मन लगाना चाहिए। आचार्य क्षपकको यह उपदेश करते हैं ॥८१५॥

थोड़े समयके लिए पाला गया भी अहिंसा व्रत आत्माका महान् उपकार करता है यह दृष्टान्त द्वारा कहते हैं—

गा०—यमपाल चण्डाल भी एक चतुर्दशीके दिन किसीको फाँसी न देनेके एक अहिंसाव्रतके गुणसे मगरमच्छोंसे भरे तालाबमें फेंक दिए जाने पर प्रातिहार्यको प्राप्त हुआ—देवोने उसकी पूजा की ॥८१६॥

अहिंसाव्रतका कथन समाप्त हुआ ।

दूसरे सत्यव्रतका कथन आगे करते हैं—

गा०-टी०—असत् अर्थात् अशोभन वचन मत बोलो । जो वचन कर्मबन्धमें निमित्त होता है उसे अशोभन कहते हैं । कहा है—असत् वचन बोलना असत्य है ।

शंका—वचन आत्माका परिणाम नहीं हैं, पुद्गल नामक अन्य द्रव्य है । कर्मबन्ध या कर्म स्थितिके बन्धमें निमित्त मिथ्यात्व, असंयम, कषाय योग, इस प्रकारका आत्मपरिणाम त्यागने योग्य है । अतः असत् वचनके त्यागका उपदेश उपयोगी नहीं है उसे क्यों कहा ?

कारितोऽनुमतश्च । इममस्मिन्नसंयमे प्रवर्तयामि अनेन वचनेन प्रवृत्तं वानुजानामि । इत्यभिसन्धिमन्तरेण[1] तस्य वचनस्याप्रवृत्तेस्तद्वचनकारणभूतोऽभिसन्धिरात्मपरिणामो भवति कर्मनिमित्तमिति परिहार्यस्तस्य परिहारे तत्कार्यं वचनमपि परिहृतं भवति । न ह्यसति कारणे कार्यप्रतिपत्तिरित्यसद्वचनपरिहारोऽनेन क्रमेणोपन्यस्त इति । स्वयमसद्वचनैकदेशपरिहारेऽप्यपहृतमसद्वचनं भवति इत्याशङ्कां परिहरति सर्वमिति चतुर्विधमिति तदीय-भेदोपन्यासः । 'पयत्तेणेति' तत्र अप्रमत्ततामुपदिशति । 'वत्तं पि संजमंतो' नितरामपि संयममाचरन्नपि । 'भासादोसेण' भाषावचनं तन्निमित्तत्वाद्वाग्योगाख्य आत्मपरिणामो भाषाशब्देनोच्यते । भाषादुष्टः भाषादोषः । वाग्योगेन दुष्टेन निमित्तेन जातं यत्कर्म तेन । 'लिप्पदि' लिप्यत एव संबध्यत एव आत्मा । एतेन कर्मबन्ध-निमित्ततादोषकथनेन असद्वचनपरिहारे दाढर्यं करोति क्षपकस्य ॥८१७॥

प्रतिज्ञातं चातुर्विध्यं व्याचष्टे—

पढमं असंतवयणं संभूदत्थस्स होदि पडिसेहो ।
णत्थि णरस्स अकाले मच्चुत्ति जधेवमादीयं ॥८१८॥

'पढमं असंतवयणं' चतुर्षु आद्यमसद्वचनं 'संभूदत्थस्स होदि पडिसेहो' सतोऽर्थस्य प्रतिषेधः । सतां[2] सतो न वचनं असद्वचनमित्येकोऽर्थः । तस्योदाहरणमाह—'णत्थि णरस्स अकाले मच्चुत्ति' एवमादिकं नास्त्यकाले मनुष्यस्य मृतिरिति एवमादिकं वचनं । आयुष. स्थितिकाल. काल इत्युच्यते । तस्मात्कालादन्य कालोऽकालः । तस्मिन्नकाले । ननु च भोगभूमिनराणामनपवर्त्यमायुरत अकाले मरण नास्त्येव अतो युक्तमुच्यते णत्थि णरस्स

समाधान—असंयमके कृत कारित और अनुमतके भेदसे तीन प्रकार हैं । इस पुरुषको इस असंयममें प्रवृत्त करता हूं अथवा असंयममें प्रवृत्त पुरुषकी इस वचनके द्वारा अनुमोदना करता हूं । इस अभिप्रायके बिना उस प्रकारका वचन नहीं बोला जाता । अतः उस प्रकारके वचनमें कारण-भूत आत्मपरिणाम कर्मबन्धमें निमित्त होता है अतः त्यागने योग्य है । उस परिणामके त्यागने पर उसका कार्य वचन भी त्यागा जाता है, क्योंकि कारणके अभावमें कार्य नहीं होता । इसलिए असत् वचनका त्याग कहा है । यदि कोई असत् वचनके एक देशका त्याग करे तब भी असत् वचनका त्याग हो जाता है क्या ? ऐसी आशंकाका परिहार करते हैं कि चारों ही प्रकारके असत्य वचनका त्याग प्रमाद छोड़कर करना चाहिए । क्योंकि अतिशय युक्त संयमका आचरण करता हुआ भी भाषादोषसे कर्मसे लिप्त होता है । यहाँ निमित्त होनेसे भाषा शब्दसे वचन योग रूप आत्मपरि-णाम कहा है । दुष्ट भाषाको भाषा दोष कहते हैं । अतः दुष्ट वचनयोगके निमित्तसे जो कर्म बन्ध होता है उससे आत्मा लिप्त होता है । इससे असत्य वचनको कर्मबन्धमें निमित्त होनेका दोष बतलाकर उसके त्यागमें क्षपकको दृढ़ करते हैं ॥८१७॥

असत्य वचनके चार भेद कहते हैं—

गा०-टी०—चार भेदोंमें सद्भूत अर्थका निषेध करना प्रथम असत्य वचन है । जैसे मनुष्य-की अकालमें मृत्यु नहीं होती इत्यादि वचन । आयुके स्थिति कालको काल कहते हैं । उस काल-से अन्य कालको अकाल कहते हैं । उसमें मरण नहीं होता । ऐसा कहना सद्भूतका निषेध रूप असत्य वचन है ।

शङ्का—भोगभूमिके मनुष्योंकी आयु अनपवर्त्य होती है अतः मनुष्योंका अकालमें मरण

---

१. न वास्य—आ० मु० । २. सतां सवेतत् वचनं सद्वचनमि—आ० । सतां सतो नमस—अ० ।

अकाले मच्चुत्ति । नरशब्दस्य सामान्यवाचित्वात्सर्वनरविषय: अकालमरणाभावोऽयुक्तः केषुचित्कर्मभूमिजेषु तस्य सतो निषेधादित्यभिप्रायः ॥८१८॥

अहवा सयबुद्धीए पडिसेधे खेत्तकालभावेहिं ।
अविचारिय णत्थि इह घडोत्ति तह एवमादीयं ॥८१९॥

'अथवा विचारबुद्धीए पडिसेधे खेत्तकालभावेहि अविचारिय भावमिति शेषः' । स्वबुद्धया क्षेत्रकाल-आदैरभावमविचार्यमाणं अत्र नास्ति इदानी न विद्यते, [1]शुक्ल.कृष्णो न वेत्यनिरूप्य घटस्य भाव इत्थं अनेन-प्रकारेण 'णत्थि घडो जह एवमादियं' नास्ति घट इत्येवमादिक । सतो घटस्य अविशेषेण असंतवचनं असद्वचन-मित्युदाहरणान्तरमिदं ॥८१९॥

जं असभूदुब्भावणमेदं विदियं असंतवयणं तु ।
अत्थि सुराणमकाले मच्चुत्ति जहेवमादीयं ॥८२०॥

'जं असभूदुब्भावणमेदं विदियं असंतवयणं तु' यदसदुद्भावनं द्वितीयं असद्वचस्तस्योदाहरणमुत्तरं । 'अत्थि सुराणमकाले मच्चुत्ति जहेवमादीय' सुराणामकाले मृत्युरस्तीत्येवमादिक यथा असदेव अकालमरणमने-नोच्यते इत्यसद्वचनम् ॥८२०॥

नहीं होता अतः उक्त कथन उचित ही है।

समाधान—गाथामें आगत 'नर' शब्द सामान्यवाची होनेसे सभी मनुष्योंके अकालमरण-का अभाव कहना अयुक्त है। किन्ही कर्मभूमिज मनुष्योंमें अकाल मरण होता है अत सत्का निषेध करनेसे उक्त कथनको असत्य कहा है ॥८१८॥

गा०—अथवा क्षेत्रकालभावसे अभावका विचार न करके—घट यहाँ नही है, इस समय नहीं है, या सफेद अथवा कृष्णरूप नही है, ऐसा न विचारकर अपनी बुद्धिसे घटका सर्वथा अभाव कहना असत्य वचन है ॥८१९॥

विशेषार्थ—किसी वस्तुका निषेध या विधि द्रव्य क्षेत्र काल और भावकी अपेक्षासे होती है। न तो वस्तुका सर्वथा निषेध होता है और न सर्वथा विधि होती है। प्रत्येक वस्तु अपने द्रव्य क्षेत्र काल और भावकी अपेक्षा अस्तिरूप है और परद्रव्य क्षेत्रकालभावकी अपेक्षा अस्तिरूप है जैसे घट अपने द्रव्यकी अपेक्षा अस्तिरूप है और अन्य घटोकी अपेक्षा नास्तिरूप है। तथा जिस क्षेत्रमें वह घट है उस क्षेत्रमें अस्तिरूप है, अन्य घटोके क्षेत्रमे नास्तिरूप है। जिस कालमे है उस कालमे अस्तिरूप है, अन्यकालोमें नास्तिरूप है। जिस भावमे स्थित है उस भावसे अस्तिरूप है अन्यभावकी अपेक्षा नास्तिरूप है। ऐसे द्रव्य क्षेत्र काल भावका विचार किये विना यह कह देना कि घट नही है यह असत्यवचनका दूसरा उदाहरण है ॥८१९॥

गा०—जो नही है उसे 'है' कहना दूसरा असत्यवचन है। जैसे देवोंके अकालमें मरण होता है ऐसा कहना। किन्तु देवोंमें अकालमरण नही होता। अतः यह असत्का उद्भावन करनेसे असत्यवचन है ॥८२०॥

---

१. शुक्ल कृष्णो भवत्यनिरूप्य—आ०।

अहवा जं उब्भावेदि असंतं खेत्तकालभावेहिं ।
अविचारिय अत्थि इह घडोत्ति जह एवमादीयं ॥८२१॥

अथवा 'जं उब्भावेदि' यद्वचनं उद्भावयति । असन्तं घटं । कथमसन्तं ? खेत्तकालभावेहिं क्षेत्रान्तर-सम्बन्धित्वेन (अ) सन्तं इहत्यं घटं कालान्तरसम्बन्धेन अतीते अनागते वा असन्तं भावान्तरसम्बन्धित्वेन कृष्ण-त्वादिनाऽसन्तं । 'अविचारिय' अविचार्य इत्थं सत् इत्थमसत् इति अस्ति घट इत्येवमादिकं सर्वथास्तित्वमस-दुभावयतीति असद्वचनं ॥८२१॥

तदियं असंतवयणं संतं जं कुणदि अण्णजादीगं ।
अविचारित्ता गोणं अस्सोत्ति जहेवमादीयं ॥८२२॥

'तदीयं असंतवयणं' तृतीयमसद्वचनं । 'संतं जं कुणदि अण्णजादीगं' सत्करोति अन्यजातीयं । 'अवि-चारित्ता गोणं अस्सोत्ति जहेवमादीगा' । अश्वमित्येवमादिकं । सतो बलीवर्दत्वात् अश्वत्वं असतस्य वचनं ॥८२२॥

चतुर्थमसद्वचनमाचष्टे—

जं वा गरहिदवयणं जं वा सावज्जसंजुदं वयणं ।
जं वा अप्पियवयणं असच्चवयणं चउत्थं च ॥८२३॥

'जं वा गरहिदवयणं' यद्वा गर्हित वचनं । 'जं वा सावज्जसंजुदं वयणं' यद्वा सावद्यसंयुतं वचनं । 'जं वा अप्पियवयणं' यद्वा अप्रियवचनं । 'तत् चउत्थं' चतुर्थं असंतवयणं असद्वचनं ॥८२३॥

तेषु वचनेषु गर्हितवचनं व्याचष्टे—

गा०—अथवा जो वचन क्षेत्र काल भावकी अपेक्षा असत् घटका विचार न करके 'घट है' ऐसा कहता है वह असत्यवचन है ॥८२१॥

विशेषार्थ—यह पहले कहा है कि कोई वस्तु न सर्वथा सत् है और न सर्वथा असत् है । जो स्वद्रव्य क्षेत्र काल भावकी अपेक्षा सत् है वही पर द्रव्य क्षेत्र काल भावकी अपेक्षा असत् है । जैसे जो घट इस क्षेत्रकी अपेक्षा सत् है वही अन्य क्षेत्रकी अपेक्षा असत् है । जो इस कालकी अपेक्षा सत् है वही अतीत और अनागतकालकी अपेक्षा असत् है, जो स्वभावकी अपेक्षा सत् है वही भावान्तरकी अपेक्षा असत् है । अत: घट इस रूपसे सत् है और इस रूपसे असत् है ऐसा विचार न करके 'घट है' इस तरह घटको सर्वथा सत् कहना असत्का उद्भावन होनेसे असत्य वचन है ॥८२१॥

गा०—एक जातिकी वस्तुको अन्य जातिकी कहना तीसरा असत्य वचन है । जैसे बिना विचारे बैलको घोड़ा कहना ॥८२२॥

चतुर्थ असत्य वचनको कहते हैं—

गा०—जो गर्हित वचन है, सावद्ययुक्त वचन है, अप्रिय वचन है वह चतुर्थ असत्य वचन है ॥८२३॥

उनमेंसे गर्हित वचनको कहते हैं—

कक्कसवयणं णिट्ठुरवयणं पेसुण्णहासवयणं च ।
जं किंचि विप्पलावं गरहिदवयणं समासेण ॥८२४॥

'कक्कसवयणं' कर्कशवचनं नाम सगर्ववचनमिति केचिद्वदन्त्यन्ये असत्यवचनमिति । 'णिट्ठुरवयणं' निष्ठुरवचनं । 'पेसुण्णहासवयणं च' परदोषसूचनपरं वचनं पैशुन्यवचन हासावह वचन । 'जं किंचि विप्पलावं' यत्किंचित्प्रलपनं च मुखरतया । 'गरहिदवयणं' गर्हितवचनं । 'समासेण' संक्षेपेण ॥८२४॥

सावद्यवचनं निरूपयति—

जत्तो पाणवधादी दोसा जायंति सावज्जवयणं च ।
अविचारित्ता थेणं थेणत्ति जहेवमादीयं ॥८२५॥

'जत्तो पाणवधादी दोसा जायंतीति' यस्माद्वचनाद्धेतो: प्राणवधादयो दोषा जायन्ते । 'सावज्जवयण त' सावद्यं वचनं पृथिवीं खन[1], महिषी दोहक (?) पयसा, प्रसूनानि चिनु । इत्येवमादिकानि 'अविचारित्ता' अविचार्य किमेवं वक्तुं युक्तं [2]न वेति । अथवा दोषोऽनेन वचसा न वेति अपरीक्ष्य चौरं चौरोऽयमिति कथन ॥८२५॥

परुसं कडुयं वयणं वेरं कलहं च जं भयं कुणइ ।
उत्तासणं च हीलणमप्पियवयणं समासेण ॥८२६॥

हासभयलोहकोहप्पदोसादीहिं तु मे पयत्तेण ।
एवं असंतवयणं परिहरिदव्वं विसेसेण ॥८२७॥

'हासभय' हास्येन, भयेन, लोभेन, क्रोधेन, प्रदोषेणेत्येवमादिना कारणेन । 'एवं असंतवयणं' एतद-सद्वचनं । 'तुमे' त्वया । 'पत्तेण' प्रयत्नेन । 'परिहरिदव्वं' परिहर्तव्यं । 'विसेसेण' विशेषेण ॥८२७॥

एवमसद्विवादं परिहार्यमुपदर्श्य सत्यवचनलक्षणमुक्तासद्वचनविलक्षणतया दर्शयति—

गा०—कर्कश वचन अर्थात् घमण्डयुक्त वचन, निष्ठुर वचन, दूसरेके दोषोका सूचन करने-वाले वचन, हास्यवचन और जो कुछ भी बकवाद करना, ये सब सक्षेपमे गर्हित वचन हैं ॥८२४॥

सावद्य वचन कहते हैं—

गा०—जिस वचनसे प्राणोंका घात आदि दोष उत्पन्न होते है वह सावद्यवचन है। जैसे पृथ्वी खोदो। नांदका पानी भैंसने पी लिया उसे पानीसे भरो। फूल चुनो आदि। अथवा ऐसा कहनेमें दोष है या नहीं, यह विचार न करके चोरको चोर कहना सावद्य वचन है ॥८२५॥

गा०—कठोर वचन, कटुक वचन, जिस वचनसे वैर, कलह और भय पैदा हो, अति त्रास देनेवाले वचन, तिरस्कार सूचक वचन ये संक्षेपमें अप्रियवचन हैं ॥८२६॥

गा०—हास्य, भय, लोभ, क्रोध और द्वेष आदि कारणोंसे बोले जानेवाले असत्य वचनोंको हे क्षपक, तुम्हे प्रयत्नपूर्वक विशेष रूपसे नही बोलना चाहिए ॥८२७॥

इस प्रकार असत्यवचनोंको त्यागने योग्य बतलाकर उक्त असत्यवचनोंसे विलक्षण सत्य-वचनोंका लक्षण कहते हैं—

१. खन । प्रहिं पीतोदकं पयसा पूरय—आ० । खन । महिषी पीतोदका पयसा प्रपूरय, मु० ।
२. ममेति—आ० मु० ।

तव्विवरीदं सच्चं कज्जे काले मिदं सविसए य ।
भत्तादिकहारहियं भणाहि तं चेव य [1]सुणाहि ॥८२८॥

'तव्विवरीदं' असत्यवचनविपरीतं । 'सच्चं' सत्यं । 'भणाहि' भण । 'कज्जे' कार्ये ज्ञानचारित्रादि शिक्षालक्षणे, असंयमपरिहारे परस्य वा सन्मार्गस्थापनाख्ये । काले आवश्यकादीनां कालादन्यः काल इत्य-कालशब्देनोच्यते । अथवा कालशब्देन प्रस्ताव उच्यते । 'मिदं' परिमितं वचन । 'सविसए य' भवतो ज्ञानस्य विषये प्रवृत्तं वचनं । 'भणाहि' भण । ज्ञानमेव वचनानीति यावत् । भत्तादिकहारहियं भक्तचोरस्त्रीराजकथावि-रहितं । 'तं चेव य' तथाभूतमेव सत्यमेव वचनं । 'सुणाहि' शृणु । अयमयोग्यं न ब्रवीति एतावता सत्यव्रतं पालितमिति आशा न कार्या । परेणोच्यमानमसद्वचनं शृण्वतो मनोऽशुभतया च कर्मबन्धो महानिति भावः ॥८२८॥

सत्यवचनगुणं हृदयनिर्वाणं ख्यापयति गाथोत्तरा स्पष्टा—

जलचंदणससिमुत्ताचंदमणी तह णरस्स णिव्वाणं ।
ण करंति कुणइ जह अत्थज्जुयं हिदमधुरमिदवयणं ॥८२९॥

न सत्यमित्येतावता वचनं वक्तव्यं, सत्यमपि सदैव वक्तव्यमेव नेति ब्रवीति—

अण्णस्स अप्पणो वा वि धम्मिए विड्डंतए कज्जे ।
जं पि अपुच्छिज्जंतो अण्णेहिं य पुच्छिओ जंप ॥८३०॥

'अन्नस्स अप्पणो वापि' अन्यस्य आत्मनो वा धार्मिके कार्ये विनश्यति सति अपृष्टोऽपि ब्रूहि । अनति-पातिनि कार्ये पृष्ट एव वद नापृष्टः इत्यर्थः ॥८३०॥

गा०–टी०—हे क्षपक, ज्ञान चारित्र आदिकी शिक्षारूप कार्यमें, असंयमका त्याग कराने या दूसरेको सन्मार्गमें स्थापित करनेके कार्यमें, आवश्यक आदिके कालसे भिन्नकालमें, और ज्ञानके विषयमें असत्यवचनसे विपरीत सत्यवचन बोलो। तथा भक्तकथा, स्त्रीकथा, चोरकथा और राज-कथासे रहित वचन बोलो—इन कथाओंकी चर्चा मत करो। तथा इसी प्रकारके सत्य वचनोंको सुनो। अमुक-वक्ता अयोग्य बात नहीं बोलता अतः यह सत्यव्रतका पालक है ऐसी आशा मत करो। दूसरेके द्वारा कहे असत्यवचनको जो सुनता है उसका मन बुरा होता है और मनके बुरे होनेसे महान् कर्मबन्ध होता है ॥८२८॥

आगे सत्यवचनका गुण हृदयको सुख देना है, यह कहते हैं—

गा०—अर्थसे भरे हितकारी परिमित मधुर वचन इस जीवको जैसा सुख देते हैं वैसा सुख जल, चन्दन, चन्द्रमा, मोती और चन्द्रकान्तमणि भी नहीं देते ॥८२९॥

आगे कहते हैं कि सत्य होनेसे बोलना चाहिए ऐसी बात नहीं है और सदा सत्य बोलना ही चाहिए ऐसी भी बात नहीं है—

गा०—अपना या दूसरोंका धार्मिक कार्य नष्ट होता हो तो बिना पूछे भी बोलना चाहिए। किन्तु यदि कार्य नष्ट न होता हो तो पूछनेपर ही बोलो, बिना उनके द्वारा पूछे जानेपर मत बोलो ॥८३०॥

---

१. मुत्तामणिमाला तह–आ० ।

सच्चं वदंति रिसओ रिसीहिं विहिदाउ सव्व विज्जाओ ।
मिच्छस्स वि सिज्झंति य विज्जाओ सच्चवादिस्स ॥८३१॥

'सच्चं वदंति रिसओ' सत्यं वदन्ति यतयः । 'रिसीहिं विहिदाओ' यतिभिर्विहिताः सर्वविद्याः । 'मिच्छस्सवि' म्लेच्छस्यापि । 'सिज्झंति' सिध्यन्ति । 'विज्जाओ' विद्याः । 'सच्चवादिस्स' सत्यवादिन ॥८३१॥

ण डहदि अग्गी सच्चेण णरं जलं च तं ण बुड्डेइ ।
सच्चबलियं खु पुरिसं ण वहदि तिक्खा गिरिणदी वि ॥८३२॥

'ण डहदि अग्गी णरं' न दहत्यग्निः सत्येन नरं । 'जलं च तन्न बुड्डेदि' जलं च तन्न निमज्जति । 'सच्चबलियं' सत्यमेव बलं तदस्यास्ति तं 'न वहति' नाकर्षयति । 'तिक्खा गिरिनदीवि' तीव्रवेगा गिरि-नद्यपि ॥८३२॥

सच्चेण देवदावो णवंति पुरिसस्स ठंति य वसम्मि ।
सच्चेण य गहगहिदं मोएइ करेंति रक्खं च ॥८३३॥

'सच्चेण देवदाओ णमंति' सत्येन देवता नमस्यन्ति । 'पुरिसस्स ठंति य वसम्मि' पुरुषस्य च वशे तिष्ठन्ति । 'गहगहिदं सच्चेण मोएइ' पिशाचग्रहणं मोचयन्ति सत्येन । 'करेंति सच्चेण रक्खं च' कुर्वन्ति सत्येन ग्रहादिरक्षां ॥८३३॥

माया व होइ विस्सस्सणिज्जो पुज्जो गुरुव्व लोगस्स ।
पुरिसो हु सच्चवाई होदि हु [1]सणियल्लओ व पिओ ॥८३४॥

'माया व होदि विस्ससणिज्जो' मातेव भवति विश्वसनीय । 'पुज्जो गुरुव्व लोगस्स' पूज्यो गुरु-वल्लोकस्स । कः ? 'सच्चवादी पुरिसो' सत्यवादी पुरुष. । 'पिओ होदि सणियल्लओव' प्रियो भवति बन्धु-रिव ॥८३४॥

सच्चं अवगदद्दोसं वुत्तूण जणस्स मज्झयारम्मि ।
पीदिं पावदि परमं जसं च जगविस्सुदं लहइ ॥८३५॥

गा०—ऋषिगण सत्य बोलते है । ऋषियोंने ही सब विद्याओंका विधान किया है । सत्य-वादी यदि म्लेच्छ भी हो तो उसे विद्याएँ सिद्ध होती हैं ॥८३१॥

गा०—सत्यवादी मनुष्यको आग नही जलाती । पानी उसे नहीं डुबाता । जिसके पास सत्यका बल है उसे तीव्र वेगवाली नदी भी नहीं बहाती ॥८३२॥

गा०—सत्यसे देवता नमस्कार करते हैं । सत्यसे देवता पुरुषके वशमें होते हैं । सत्यसे पिशाच पकड़ा हुआ मनुष्य भी छूट जाता है और उसकी रक्षा देव करते हैं ॥८३३॥

गा०—सत्यवादी माताके समान विश्वासयोग्य, गुरुके समान पूज्य, और बन्धुके समान लोकप्रिय होता है ॥८३४॥

---

१. सुणि—आ० ।

'सच्चं वुत्तूण' सत्यवचनमुक्त्वा । कीदृग्भूतं ? 'अणवज्जमोसं' दोषरहितं । क्व ? 'जणस्स मज्झयारम्मि' जनमध्ये । 'पीदिं पावदि' परमां प्रीतिं प्राप्नोति, परां 'जसं लभदि' यशश्च लभते । 'जगविस्सुदं' जगति विश्रुतं ॥८३५॥

सच्चम्मि तवो सच्चम्मि संजमो तह वसे सया वि गुणा ।
सच्चं णिबंधणं हि य गुणाणमुदधीव मच्छाणं ॥८३६॥

'सच्चम्मि संजमो' सत्याधारौ तपःसंयमौ, शेषाश्च गुणाः । 'सच्चं णिबंधणं गुणाणं' गुणानां निबन्धनं सत्यं । 'मच्छाणं उदधीव' मत्स्यानामुदधिरिव ॥८३६॥

सच्चेण जगे होदि पमाणं अण्णो गुणो जदि वि से णत्थि ।
अदिसंजदो य मोसेण होदि पुरिसेसु तणलहुओ ॥८३७॥

'सच्चेण जगे होदि' सत्येन जगति भवति । 'पमाणं' प्रमाणं । यद्यप्यन्यो गुणो नास्ति । अतीव संयतोऽपि सतां मध्ये तृणवल्लघुर्भवति मृषावचनेनेति गाथार्थः ॥८३७॥

होदु सिहंडी व जडी मुंडी वा णग्गओ व [1]चीरधरो ।
जदि भणदि अलियवयणं विलंबणा तस्स सा सव्वा ॥८३८॥

'होदु सिहंडी' भवतु नाम शिखावान् । 'जडी मुंडी वा' नग्नश्चीवरधरो वा यद्यलीकं वदति तस्य सा सर्वा विलम्बना ॥८३८॥

जह परमण्णस्स विसं विणासयं जह व जोव्वणस्स जरा ।
तह जाण अहिंसादी गुणाण य विणासयमसच्चं ॥८३९॥

'जह परमण्णस्स' यथा परमान्नस्य विनाशकं विषं । यथा वा जरा यौवनस्य, तथा जानीहि अहिंसादिगुणानां विनाशकं असत्यं ॥८३९॥

गा०—जनसमुदायके बीच में दोषरहित सत्यवचन बोलनेसे मनुष्य जनताका प्रेम तथा जगत्में प्रसिद्ध उत्कृष्ट यश पाता है ॥८३५॥

गा०—तप, संयम तथा अन्यगुण सत्यके आधार हैं। जैसे समुद्र मगरमच्छोंका कारण है उसमें मगरमच्छ पैदा होते और रहते हैं वैसे ही सत्य गुणोंका कारण है ॥८३६॥

गा०—यदि मनुष्यमें अन्य गुण न हों तब भी वह एक सत्यके कारण जगमें प्रमाण माना जाता है। अति संयमी भी मनुष्य यदि असत्य बोलता है तो सज्जनोंके मध्यमें तृणसे तुच्छ होता है ॥८३७॥

गा०—भले ही मनुष्य शिखाधारी हो, जटाधारी हो, सिर मुड़ाए हो, नंगा रहता हो या चीवर धारण किये हो, यदि वह झूठ बोलता है तो वह सब उसकी विडम्बनामात्र है ॥८३८॥

गा०—जैसे विष उत्तमोत्तम भोजनका विनाशक है, बुढ़ापा यौवनका विनाशक है वैसे ही असत्य वचन अहिंसा आदि गुणोंका विनाशक है ॥८३९॥

---

१. चीवर—मु० ।

मादाए वि वेसो पुरिसो अलिएण होइ एक्केण ।
किं पुण अवसेसाणं ण होइ अलिएण सत्तुव्व ॥८४०॥

'मादाए वि य' मातुरप्यविश्वास्यो भवत्यलीकेन एकेन पुरुषः । शेषाणां पुनर्न किं भवेदलीकेन शत्रुरिव ॥८४०॥

अलियं स किं पि भणियं घादं कुणदि बहुगाण सच्चाणं ।
अदिसंकिदो य सयमवि होदि अलियभासणो पुरिसो ॥८४१॥

'अलियं स किंपि भणियं' सकृदप्युक्तं अलीकं सत्यानि बहूनि नाशयति । अलीकवादी पुरुषः स्वयमपि शङ्कितो भवति नितरां ॥८४१॥

अप्पच्चओ अकित्ती भंसारदिकलहवेरभयसोगा ।
वधबंधभेय[1] धणणासा वि य मोसम्मि सण्णिहिदा ॥८४२॥

'अपच्चओ' अप्रत्ययः । अकीर्तिः, संक्लेशः, अरतिः, कलहो, वैरं, भय, शोकः, वधो, बन्धः, स्वजनभेदः, धननाशश्चेत्यमी दोषाः सन्निहिता मृषावचने ॥८४२॥

पावस्सासवदारं असच्चवयणं भणंति हु जिणिंदा ।
हिदएण अपावो वि हु मोसेण गदो वसू णिरयं ॥८४३॥

'पावस्सासवदारं' पापस्यागमद्वारमिति वदन्त्यसत्यं जिनेन्द्राः । हृदये अपापोऽपि मृषामात्रेण वसुर्गतो नरकं इत्याख्यानकं वाच्यं ॥८४३॥

परलोगम्मि वि दोसा ते चेव हवंति अलियवादिस्स ।
मोसादीए दोसे जत्तेण वि परिहरंतस्स ॥८४४॥

गा०—एक असत्य वचनसे मनुष्य माताका भी विश्वास-भाजन नहीं रहता । तब असत्य बोलनेसे शेषजनोंको वह शत्रुके समान क्यों नहीं प्रतीत होगा ॥८४०॥

गा०—एक बार भी बोला गया झूठ बहुत बार बोले गये सत्यवचनोंका घात कर देता है । लोग उसके सत्यकथनको भी झूठ मानने लगते हैं । झूठ बोलनेवाला मनुष्य स्वयं भी अतिभीत रहता है ॥८४१॥

गा०—असत्य भाषणमें अविश्वास, अपयश, संक्लेश, अरति, कलह, वैर, भय, शोक, वध, बन्ध, कुटुम्बमें फूट, धनका नाश इत्यादि दोष पाये जाते हैं ॥८४२॥

गा०—जिनेन्द्रदेव असत्यको पापास्रवका द्वार कहते हैं, उससे पापका आगमन होता है । राजा वसु हृदयसे पापी नहीं था फिर भी झूठ बोलनेसे नरकमें गया । इसकी कथा कथाकोशमें है ॥८४३॥

---

१. धणणासा–आ० ।—भेदणाणा सव्वे मो–मु० ।

'परलोगम्मि वि दोसा' परभवेऽपि दोषास्त एव अप्रत्ययादय एव भवन्त्यलीकवादिनः। यत्नेनापि परिहरतः। किं ? 'मोसादिये दोसे' मृषादिकान्दोषान्। मृषा आदिर्येषां स्तेयाब्रह्मपरिग्रहाणां ते मृषादयः। तद्गुणसंविज्ञानो बहुव्रीहिरत्र ग्राह्यः। स्तेयादिदोषान्परिहरतोऽपीत्यर्थः ॥८४४॥

भवतु नाम अप्रत्ययसत्यादिका मृषावादस्य दोषाः कर्कशवचनादिना परभवे इह वाथ के दोषा इत्यत्राचष्टे—

इहलोइय परलोइय दोसा जे होंति अलियवयणस्स।
कक्कसवयणादीण वि दोसा ते चेव णादव्वा ॥८४५॥

'इहलोगिय परलोगिय दोसा' अस्मिञ्जन्मनि परत्र च ये दोषा भवन्ति अलीकवादिनः। कर्कशवचनादीनामपि त एव दोषा इति ज्ञातव्याः ॥८४५॥

उपसंहारगाथा—

एदेसिं दोसाणं मुक्को होदि अलिआदिवचिदोसे।
परिहरमाणो साधू तव्विवरीदे य लभदि गुणे ॥८४६॥

एतेभ्यो दोषेभ्यो मुक्तो भवति व्यलीकादिवचनदोषान्यः परिहरति साधुः लभते चापि ? दोषप्रतिपक्षभूतान्प्रत्ययितत्वादिगुणान्। प्रत्ययः, कीर्तिः, असंक्लेश, रतिः, कलहाभावः, निर्भयतादिकश्च। 'लभदि' ॥८४६॥

व्याख्याय सत्यव्रतं तृतीयव्रतं निगदति—

मा कुणसु तुमं बुद्धिं बहुमप्पं वा परादियं घेत्तुं।
दंतंतरसोधणयं कलिंदमेत्तं पि अविदिण्णं ॥८४७॥

गा०—असत्य, चोरी, कुशील और परिग्रहरूप दोषोंका प्रयत्नपूर्वक त्याग करनेवाले भी असत्यवादीके परलोकमें भी अविश्वास आदि दोष होते हैं। अर्थात् असत्यवादी मरकर भी इन दोषोंका भागी होता है ॥८४४॥

असत्य भाषणसे अविश्वास आदि दोष भले ही होते हों, किन्तु कर्कश आदि वचन बोलनेसे इस भव या परभवमें क्या हानि है ? इसका उत्तर देते हैं—

गा०—इस लोक और परलोकमें असत्यवादी जिन दोषोंका पात्र होता है, कर्कश आदि वचन बोलनेवाला भी उन्हीं दोषोंका पात्र होता है ॥८४५॥

गा०—जो साधु असत्य भाषण आदि दोषोंको दूर कर देता है वह ऊपर कहे दोषोंसे मुक्त होता है—उसमें वे दोष नहीं होते। तथा उन दोषोंसे विपरीत विश्वास, यश, असंक्लेश, रति कलहका अभाव, निर्भयता आदि गुणोंका भाजन होता है ॥८४६॥

सत्य महाव्रतका कथन समाप्त हुआ।

सत्य व्रतका कथन करके तीसरे व्रतका कथन करते हैं—

१. ते इहिपरोसे भेदि आमि—आ० मु०।

'मा कुणसु तुमं बुद्धिं' मा कृथास्त्वं बुद्धिं । कीदृशीं ? 'पराविर्यं घेत्तुं' परकीयं वस्तु ग्रहीतुं । परकीय-वस्तु विशेषयमाचष्टे—'बहुमल्लं वा' महदल्पं वा । अल्पद्रव्यपरिमाणमभिदधाति—'दंतंतरसोधणयं कलिंच-मेत्तंपि' दन्तान्तरशुद्धिकारि तृणशलाकामात्रमपि । 'अविदिण्णं' अदत्तं ॥८४७॥

जह मक्कडओ धादो वि फलं दट्ठूण लोहिदं तस्स ।
दूरत्थस्स वि डेवदि जइ वि घित्तूण छंडेदि ॥८४८॥

'जह मक्कडओ' यथा मर्कटो वानरः । 'धादो वि' तृप्तोऽपि । 'दट्ठूण फलं' दृष्ट्वापि फलं । 'लोहिदं' रक्तं । 'तस्स दूरत्थस्स वि डेवदि' दूरस्थमपि फलमुद्दिश्योल्लंघनं करोति । 'जदि वि घित्तूण छंडेदि' यद्यपि गृहीत्वा त्यजति ॥८४८॥

दार्ष्टान्तिके योजयति—

एवं जं जं पस्सदि दव्वं अहिलसदि पाविदुं तं तं ।
सव्वजगेण वि जीवो लोभाइट्ठो न तिप्पेदि ॥८४९॥

'एवं जं जं पस्सदि' एव यद्यत्पश्यति द्रव्यं । 'तं तं पाविदुमहिलसदि' तत्तद्द्रव्यं प्राप्तुमभिलषति । 'सव्वजगेण वि' सर्वेणापि जगता । 'लोभाइट्ठो जीवो ण तिप्पेदि' जीवो लोभाविष्टो न तृप्यति ॥८४९॥

जह मारुओ पवड्ढइ खणेण वित्थरइ अब्भयं च जहा ।
जीवस्स तहा लोभो मंदो वि खणेण वित्थरइ ॥८५०॥

'जह मारुओ पवड्ढइ' यथा मारुतः प्रवर्द्धते । 'खणेण' क्षणेन । 'वित्थरदि' विस्तीर्णो भवति । 'अब्भय च जहा' यथा चाभ्र । 'जीवस्स' जीवस्य । 'तह' तथा । लोभो मन्दोऽपि क्षणेनैव विस्तीर्णता-मुपयाति ॥८५०॥

बाह्यद्रव्यसन्निधिमपपेक्ष्य लोभकर्मण उदयो जायते तस्य लोभश्च वर्द्धते तद्वृद्धौ चाय दोष इति व्याचष्टे—

लोभे पवड्ढिदे पुण कज्जाकज्जं णरो ण चिंतेदि ।
तो अप्पणो वि मरणं अगणिंतो साहसं कुणइ ॥८५१॥

गा०—हे क्षपक ! तुम पराई बहुत या अल्प वस्तुको भी ग्रहण करनेकी भावना मत करो । दाँतका मल शोधनेके लिए एक तिनका भी बिना दिया मत ग्रहण करो ॥८४७॥

गा०—जैसे बन्दर पेट भरा होनेपर भी लाल पके फलको देखकर दूरसे ही फल ग्रहण करनेके लिए कूदता है, यद्यपि वह उसे फिर छोड़ देता है ॥८४८॥

गा०—वैसे ही मनुष्य जो जो वस्तु देखता है उस उसको प्राप्त करनेकी इच्छा करता है । लोभसे घिरा मनुष्य समस्त जगत्को पाकर भी सन्तुष्ट नहीं होता ॥८४९॥

गा०—जैसे मन्द वायु बढ़कर क्षणभरमें फैल जाती है या मेघ बढ़ते-बढ़ते आकाशमें फैल जाते हैं । वैसे ही जीवका थोडा-सा भी लोभ क्षणभरमें बढ़ जाता है ॥८५०॥

आगे कहते हैं कि बाह्य द्रव्यका सान्निध्य पाकर लोभकर्मका उदय होता है उससे मनुष्य-

'लोभे पवड्ढिदे पुण' लोभे प्रकर्षेण वृद्धिमुपगते पुनः । 'कज्जाकज्जं णरो ण चिंतेदि' कार्यं अकार्यं च न मनसा निरूपयति । इदं कर्तुं युक्तं न चेति । 'तो' ततः युक्तायुक्तविचारणाभावात् । 'अप्पणो मरणमवि अगणित्ता' आत्मनो मृत्युमप्यगणय्य । 'चोरिक्कं कुणदि' चौर्यं करोति । बन्दीग्रहणतालोद्घाटनसंप्रवेशादिकं च भयं मृत्योः कष्टतरमवस्थितमपि न गणयति नरश्चौर्ये प्रवृत्त इति भावः ॥८५१॥

न केवलमात्मन एवोपद्रवकारि चौर्यं अपि तु परेषामपि महतीमानयति विपदमिति कथयति—

सव्वो उवहिदबुद्धी पुरिसो अत्थे हिदे य सव्वो वि ।
सत्तिप्पहारविद्धो व होदि हिययंमि अदिदुहिदो ॥८५२॥

'सव्वो उवहिदबुद्धी' सर्वो जनः उपहितबुद्धिः स्थापितचित्तः । क्व ? 'अत्थे' वस्तुनि इदं भवत्विति । 'अत्थे हिदे य सव्वो वि' सर्वोऽपि जनो अर्थे हृते । 'अदिदुहिदो' अतीव दुःखितो भवति । किमिव ? 'सत्तिप्पहारविद्धोव हियये' शक्त्याख्येन शस्त्रेण हृदये विद्ध इव ॥८५२॥

अत्थम्मि हिदे पुरिसो उम्मत्तो विगयचेयणो होदि ।
मरदि व हक्कारकिदो अत्थो जीवं खु पुरिसस्स ॥८५३॥

'अत्थम्मि हिदे' अर्थे हृते परेणात्मीये 'पुरिसो' पुरुषः । 'उम्मत्तो विगयचेयणो होदि' उन्मत्तो विगतचेतनो भवति । चेतनाविशेषे ज्ञानपर्याये चेतनाशब्दो वर्तते नष्टज्ञानो भवतीति यावत् । अन्यथा चैतन्यस्य विनाशाभावात् । 'मरदि व' म्रियेत वा अर्थे हृते । अत्थे हक्कारकिदो अर्थे [1]हाकारं कुर्वन् । 'अत्थो जीवं खु पुरिसस्स' पुरुषस्य जीवितमर्थः ॥८५३॥

का लोभ बढ़ता है । लोभ बढ़नेपर यह दोष होता है—

गा०-टी०—लोभ बढ़नेपर मनुष्य 'यह करना योग्य है और यह योग्य नहीं है' इस प्रकार मनमें कार्य और अकार्यका विचार नहीं करता । युक्त अयुक्तका विचार न करनेसे अपनी मृत्युकी परवाह न करके चोरी करता है—ताले तोडकर घरोंमें प्रवेश करता है, जेल जाता है । इस प्रकार चोरीमें लगा मनुष्य मृत्युका कठोर भय उपस्थित होते हुए भी उसकी अवहेलना करता है ॥८५१॥

आगे कहते हैं कि चोरी केवल चोरी करनेवालेपर ही विपत्ति नहीं लाती किन्तु दूसरोंपर भी महती विपदा लाती है—

गा०—सभी मनुष्य धनासक्त हैं—उनका मन धनमें लगा रहता है । अतः धन चुरानेपर सभी जन हृदयमें शक्ति नामक अस्त्रसे आघात होनेकी तरह अत्यन्त दुःखी होते हैं ॥८५२॥

गा०-टी०—दूसरेके द्वारा अपना धन हरे जानेपर मनुष्य पागल हो जाता है, उसकी चेतना नष्ट हो जाती है । यहाँ चेतना शब्द चेतनाके भेद ज्ञानपर्यायमें प्रयुक्त हुआ है अतः उसका ज्ञान नष्ट हो जाता है ऐसा अर्थ लेना चाहिए, क्योंकि चेतनाका तो विनाश होता नहीं । तथा हाहाकार करके मर जाता है । ठीक ही कहा है—धन मनुष्यका प्राण है ॥८५३॥

---

१. हारवं—आ० मु० ।

अडइगिरिदरिसागरजुद्धाणि अडंति अत्थलोभादो ।
पियबंधु चेवि जीवं पि णरा पयहंति धणहेदुं ॥८५४॥

'अडइगिरिदरिसागर' अटवीं, दरीं, गिरिं, सागरं, युद्धं प्रविशन्ति अर्थलोभात् । प्रियान्बन्धून् जीवितं च नरा जहति धननिमित्तं । सर्वेभ्यो धनं प्रियतमं धनस्तदर्थिनः सर्वं त्यजन्ति इति भावार्थो गाथायाः ॥८५४॥

अत्थे संतम्मि सुहं जीवदि सकलत्तपुत्तसंबंधी ।
अत्थं हरमाणेण य हिदं हवदि जीविदं तेसिं ॥८५५॥

'अत्थे संतम्मि सुहं' अर्थे सति सुखं 'जीवदि सकलत्तपुत्तसम्बन्धी' जीवति सह कलत्रैर्भार्याभिः, पुत्रैर्बंधुभिश्च । अर्थं हरता तेषां कलत्रादीनां जीवितमेव हृतं भवति ॥८५५॥

चोरस्स णत्थि हियए दया य लज्जा दमो व विस्सासो ।
चोरस्स अत्थहेदुं णत्थि अकादव्वयं किं पि ॥८५६॥

'चोरस्स णत्थि हियए' चौरस्य नास्ति हृदये । दया, लज्जा, दमो, विश्वासो वा । चौरस्य नास्ति अकर्तव्यं किंचित् । अर्थार्थिन इति भावार्थः ॥८५६॥

लोगम्मि अत्थि पक्खो अवरज्झंतस्स अण्णमवराधं ।
णीयल्लया वि पक्खे ण होंति चोरिक्कसीलस्स ॥८५७॥

'लोगम्मि अत्थि पक्खो' लोकेऽस्ति पक्षोऽन्यमपराधं हिंसादिकं कुर्वतो बन्धवोऽपि न पक्षता प्रतिपद्यन्ते चौर्यकारिणः ॥८५७॥

अण्णं अवरज्झंतस्स दिंति णियये घरम्मि ओगासं ।
माया वि य ओगासं ण देइ चोरिक्कसीलस्स ॥८५८॥

'अण्णं अवरज्झंतस्स' अन्य अपराधं कुर्वन ददति स्वावासे अवकाशं । मातापि अवकाशं न ददाति चुरायां प्रवृत्तस्य ॥८५८॥

गा०—धनके लोभसे मनुष्य जंगल पर्वत गुफा और समुद्रमें भटकता है, युद्ध करता है। धनके लिए मनुष्य प्रियजनोंका और अपने जीवनका भी त्याग करता है। सारांश यह है कि मनुष्यको धन सबसे प्रिय है उसके लिए वह सबको छोड़ देता है ॥८५४॥

गा०—धनके होनेपर मनुष्य स्त्री पुत्र और बन्धु बान्धवोंके साथ सुखपूर्वक जीवन यापन करता है। धनके हरे जानेपर उन स्त्री आदिका जीवन ही हर लिया जाता है ॥८५५॥

गा०—चोरके हृदयमे दया, लज्जा, साहस और विश्वास नही होते। चोर धनके लिए कुछ भी कर सकता है उसके लिए न करने योग्य कुछ भी नही है ॥८५६॥

गा०—हिंसा आदि अन्य अपराध करनेवालेके पक्षमे तो लोग रहते है किन्तु चोरी करनेवालेके पक्षमें बन्धु बान्धव भी नहीं होते ॥८५७॥

गा०—अन्य अपराध करनेवालेको लोग अपने घरमें आश्रय देते हैं। किन्तु चोरी करनेवालेको माता भी आश्रय नहीं देती ॥८५८॥

परदव्वहरणमेदं आसवदारं खु बेंति पावस्स ।
सोगरियवाहपरदारिएहिं चोरो हु पापदरो ॥८५९॥

'परदव्वहरणमेदं' परद्रव्यापहरणमेतत् पापस्यास्रवद्वारं ब्रुवन्ति । सौकरिकात्, व्याधात्, परदाररतिप्रियाच्च चौरः पापीयान् ॥८५९॥

सयणं मित्तं आसयमल्लीणं पि य महल्लए दोसे ।
पाडेदि चोरियाए अयसे दुक्खम्मि य महल्ले ॥८६०॥

'सयणं मित्तं' बन्धून्मित्राणि आश्रयभूतं समीपस्थं च महति दोषे बन्धवधधनापहरणादिके पातयति चौर्यं । महत्ययशसि दुःखे च निपातयति ॥८६०॥

बंधवधजादणाओ छायाघादपरिभवभयं सोयं ।
पावदि चोरो सयमवि मरणं सव्वस्सहरणं वा ॥८६१॥

'बंधवधजादणाओ' बन्धं, वधं, यातनाश्च, छायाघातं, परिभवं, भयं, शोकं प्राप्नोति । स्वयमपि चौरो मरणं सर्वस्वहरणं वा ॥८६१॥

णिच्चं दिया य रत्तिं च संकमाणो ण णिद्दमुवलभदि ।
तेणं तओ समंता उव्विग्गमओ य पिच्छंतो ॥८६२॥

'णिच्चं दिया य रत्तिं च संकमाणो' नित्यं दिवारात्रिं शङ्कमानः न निद्रामुपलभते चौरः । समन्तात्प्रेक्षते उद्विग्नहरिण इव ॥८६२॥

उंदुरकदंपि सद्दं सुच्चा परिवेवमाणसव्वंगो ।
सहसा समुच्छिदमओ उव्विग्गो धावदि खलंतो ॥८६३॥

'उंदुरकदंपि सद्दं' मूषकचलनकृतमपि शब्दं श्रुत्वा प्रस्फुरत्सर्वगात्रः सहसोत्थभयोद्विग्नो धावति स्खलत्पदे पदे ॥८६३॥

गा०—यह परद्रव्यका हरण पापके आनेका द्वार कहा जाता है। मृग पशु पक्षियोंका घात करनेवाले और परस्त्रीगमनके प्रेमीजनोंसे चोर अधिक पापी होता है ॥८५९॥

गा०—चोरीका व्यसन बन्धु, मित्र, अपने आश्रित, और निकटमें रहनेवालोको भी वध, बन्ध, धनका हरना आदि दोषोंमें डाल देता है वे भी ऐसे बुरे काम करने लगते हैं। तथा वे महान् अपयश और दुःखके भागी होते हैं ॥८६०॥

गा०—चोर स्वयं भी बन्ध, वध, कष्ट, तिरस्कार, भय, शोक, मरण और सर्वस्व हरणका भागी होता है ॥८६१॥

गा०—चोर दिन रात पकड़े जानेकी आशंकासे सोता नहीं है और भयभीत हरिनकी तरह चारों ओर देखा करता है ॥८६२॥

गा०—चूहेके द्वारा भी किये शब्दको सुनकर उसका सर्वांग थरथर कांपने लगता है, एक दम भयसे भीत हो, घबराकर दौड़ता है और पद-पदपर गिरता उठता है ॥८६३॥

घर्सि पि संजमंतो घेत्तूण किलिंचमेत्तमविदिण्णं ।
होदि हु तणं व लहुओ अप्पच्चइओ य चोरो व्व ॥८६४॥

'घर्सि पि संजमंतो' नितरामपि सयमं कुर्वन् । अदत्त तृणमात्रमपि गृहीत्वा तृणवल्लघुर्भवति, अप्रत्ययितश्चौर इव ॥८६४॥

परलोगम्मि य चोरो करेदि णिरयम्मि अप्पणो वसदिं ।
तिव्वाओ वेदणाओ अणुभवहिदि तत्थ सुचिरंपि ॥८६५॥

'परलोगम्मि य चोरो करेदि' परलोके चौर करोत्यात्मनो नरके वसतिं । कीदृग्भूतो यत्र नरकेषु सुचिरं दीर्घकाल पच्यमान तीव्रवेदना अनुभवति ॥८६५॥

तिरियगदीए वि तहा चोरो पाउणदि तिव्वदुक्खाणि ।
पाएण णीयजोणीसु चेव संसरइ सुचिरंपि ॥८६६॥

'तिरियगदीए वि तहा' तिर्यग्गतावपि चौर प्राप्नोति तीव्राणि दुःखानि । प्रायेण नीचयोनिष्वेव ससरति सुचिरमपि ॥८६६॥

माणुसभवे वि अत्था हिदा व अहिदा व तस्स णस्संति ।
ण य से घणमुवचीयदि सयं च ओलुद्दि घणादो ॥८६७॥

'माणुसभवे वि' मनुष्यभवेऽपि तस्य अर्था नश्यन्ति हृता वा अहृता वा । न चोपयाति संचयं धनं, तस्य उपचितेऽपि धने स्वय तस्मादपयाति धनात् ॥८६७॥

परदव्वहरणबुद्धी सिरिभूदी णयरमज्झयारम्मि ।
होदूण हदो पहदो पत्तो सो दीहसंसारं ॥ ८६८॥

'परदव्वहरणबुद्धी' परद्रव्यहरणबुद्धिः । 'सिरिभूदी' श्रीभूतिर्नगरमध्ये ताडितः प्रहतश्च भूत्वा दीर्घसंसारं प्राप्तः ॥८६८॥

गा०—महान् संयमका धारी साधु भी बिना दिया तृणमात्र भी ग्रहण करके अविश्वसनीय चोरकी तरह तिनकेके समान लघु हो जाता है॥८६४॥

गा०—चोर मरकर भी नरकमें वास करता है और वहाँ चिरकालतक तीव्र कष्ट भोगता है ॥८६५॥

गा०—तथा चोर तिर्यञ्चगतिमें भी तीव्र दुःख पाता है। वह प्राय. चिरकालतक नीच योनियोंमें ही जन्ममरण करता है ॥८६६॥

गा०—मनुष्यभवमें भी उसका धन किसीके द्वारा हरा जाकर अथवा बिना हरे नष्ट हो जाता है। वह धनका संचय नहीं कर पाता। धनका संचय हुआ भी तो वह स्वयं उस धनसे वंचित हो जाता है ॥८६७॥

गा०—परद्रव्यको हरनेमें आसक्त श्रीभूतिनामक ब्राह्मण नगरके मध्यमें मारा गया और मरकर दीर्घसंसारी हुआ इसकी कथा कथाकोशमें है ॥८६८॥

अदत्तादानदोषानुपवर्ण्य दत्तं योग्यं गृहाणेति व्याचष्टे—

एदे सव्वे दोसा ण होंति परदव्वहरणविरदस्स ।
तव्विवरीदा य गुणा होंति सदा दत्तभोइस्स ॥८६९॥

देविंदरायगहवइदेवदसाहम्मि उग्गहं तम्हा ।
उग्गहविहिणा दिण्णं गेण्हसु सामण्णसाहणयं ॥८७०॥

'देविंदरायगहवइ' देवेन्द्राणां, राज्ञां, गृहपतीनां, राष्ट्रकूटानां, देवतानां, सधर्मणां च परिग्रहं । 'उग्गह विहिणा' अवग्रहविधिना । 'दिण्णं' दत्तं । 'गिण्हसु' गृहाण । 'सामण्णसाहणयं' श्रामण्यसाधनं ज्ञानसंयमस्य वा साधनं । अदत्तं ॥८७०॥

चतुर्थं व्रतं निरूपयति—

रक्खाहि बंभचेरं अब्बंभं दसविधं तु वज्जित्ता ।
णिच्चं पि अप्पमत्तो पंचविधे इत्थिवेरग्गे ॥८७१॥

'रक्खाहि बंभचेरं' पालय ब्रह्मचर्यं । अब्रह्म दशप्रकारमपि वर्जयित्वा नित्यमप्रमत्तः पञ्चविधे स्त्रीवैराग्ये ॥८७१॥

ब्रह्मचर्यं पालयेत्युक्तं तदेव न ज्ञायते इत्यारेकायां तद्व्याचष्टे—

जीवो बंभा जीवम्मि चेव चरिया हविज्ज जा जदिणो ।
तं जाण बंभचेरं विमुक्कपरदेहतत्तिस्स ॥८७२॥

'जीवो बंभा' ब्रह्मशब्देन जीवो भण्यते । ज्ञानदर्शनादिरूपेण वर्द्धते इति वा । यावल्लोकाकाशं वर्धते लोकपूरणाख्यायां क्रियाया इति वा । 'जीवम्मि चेव' ब्रह्मण्येव चर्या । जीवस्वरूपमनन्तपर्यायात्मकमेव निरूप-

---

अदत्तादानके दोष बतलाकर योग्य दत्तवस्तुको ग्रहण करनेकी प्रेरणा करते हैं—

गा०—जो परद्रव्य हरनेका त्यागी होता है उसे ये सब दोष नहीं होते । तथा जो दत्त-वस्तुका ही उपभोग करता है उसमें उक्त दोषोंसे विपरीत गुण सदा होते हैं ॥८६९॥

गा०—हे क्षपक ! देवेन्द्र, राजा, गृहपति, देवता और साधर्मी साधुओंके द्वारा विधिपूर्वक दी गई परिग्रहको, जो ज्ञान और संयमकी साधक हो, ग्रहण कर ॥८७०॥

अदत्तविरत व्रतका कथन समाप्त हुआ ।

चतुर्थ व्रतका कथन करते हैं—

गा०—हे क्षपक ! दस प्रकारके अब्रह्मको त्याग कर ब्रह्मचर्यकी रक्षा कर । और पांच प्रकार के स्त्री वैराग्यमें सदा सावधान रह ॥८७१॥

ब्रह्मचर्यके पालन करनेको तो कहा । किन्तु ब्रह्मचर्य क्या है यही नहीं जानते । इसके लिए कहते हैं—

गा०-टी०—ब्रह्म शब्दसे जीव कहा जाता है । अथवा 'बृह' धातुसे ब्रह्म शब्द बना है उसका अर्थ होता है बढ़ना । ज्ञान दर्शन आदि रूपसे बढ़नेको ब्रह्म कहते हैं । अथवा जब सयोग केवली जिन लोकपूरण समुद्घात करते हैं तो उनके आत्म प्रदेश लोकाकाश प्रमाण बढ़कर फैल

यतो वृत्तिर्वा 'सं' तां 'जाण' जानीहि। 'बंभचरियं' ब्रह्मचर्यं। 'विमुक्कपरदेहतत्तिस्स' विमुक्तपरदेहव्यापारस्य ॥८७२॥

मनसा वचसा शरीरेण परशरीरगोचरव्यापारातिशयं त्यजतः दशविधाब्रह्मत्यागात् दशविधं ब्रह्मचर्यं भवतीति वक्तुकामो ब्रह्मभेदमाचष्टे—

इत्थिविसयाभिलासो वत्थिविमोक्खो य पणिदरससेवा।
संसत्तदव्वसेवा तदिंदियालोयणं चेव ॥८७३॥

'इत्थिविसयाभिलासो' स्त्रीसम्बन्धिनो ये इन्द्रियाणां विषयास्तासां रूपं, तदीयोऽधररसः, तासां वक्त्रप्रभवो गन्धः तासां कलं गीतं, हासो, मधुरं वचः, मृदुस्पर्शश्च तत्र अभिलाषः। आत्मस्वरूपपरिज्ञानपरिणतिलक्षणं ब्रह्मचर्यं वहतीति आत्मा ब्रह्म ततोऽन्यो वामलोचनाशरीरगतो रूपादिपर्यायः सोऽत्र भण्यतेऽब्रह्मशब्देन तत्र चर्या नामाभिलाषपरिणतिः। 'वत्थिविमोक्खो' मेहनविकारानिवारणं[१]। 'पणिदरससेवा' वृष्याहारसेवना। 'संसत्तदव्वसेवा' स्त्रीभिः संसक्तानां सम्बद्धानां शय्यादीनां सेवा तदङ्गस्पर्शवदेव कामिनां तनुप्राप्तद्रव्यस्पर्शोऽपि प्रीतिं जनयति। 'तदिंदियालोयणं चेव' तासां वराङ्गावलोकनं च ॥८७३॥

सक्कारो संकारो अदीदसुमरणमणागदभिलासो।
इट्ठविसयसेवा वि य अब्बंभं दसविहं एदं ॥८७४॥

'सक्कारो' सत्कारः सम्मानना। स च तनुरागप्रवर्तितः। 'संकारो' संस्कारः तासां वस्त्रमाल्यादिभिः।

जाते हैं। इस प्रकारसे जो बढ़ता है वह ब्रह्म जीव है उस ब्रह्ममें ही चर्या ब्रह्मचर्य है। पराये शरीर सम्बन्धी व्यापारसे अर्थात् स्त्री रमणादिसे विरत मुनि अनन्त पर्यायात्मक जीव स्वरूप का ही अवलोकन करते हुए जो उसीमें रमण करता है वह ब्रह्मचर्य है ॥८७२॥

मन वचन कायसे पर शरीर सम्बन्धी व्यापार विशेषको जिसने त्याग दिया है उसके दस प्रकारके अब्रह्मका त्याग करनेसे दस प्रकारका ब्रह्मचर्य होता है यह कहनेकी इच्छासे आचार्य अब्रह्मके भेद कहते हैं—

गा०-टी०—स्त्री सम्बन्धी जो इन्द्रियोंके विषय हैं—उनका रूप, उनके अधरका रस, उनके मुखकी सुगन्ध, उनका मनोहर गायन, हास, मधुर वचन और कोमल स्पर्श, उनकी अभिलाषा करना अब्रह्मका प्रथम भेद है। आत्माके स्वरूपको जानकर उसीमें लीन होना ब्रह्मचर्य है। उसको वहन करनेसे आत्मा ब्रह्म है। उससे अन्य स्त्रीके शरीर सम्बन्धी जो रूप रसादि हैं उन्हे यहाँ अब्रह्म शब्दसे कहा है। उसमें चर्या अर्थात् अभिलाषा रूप परिणति अब्रह्मचर्य है। लिंगमे हुए विकारको दूर न करना दूसरा अब्रह्मका भेद है। इन्द्रियमद कारक आहार करना तीसरा भेद है। स्त्रियोंसे सम्बद्ध शय्या आदिका सेवन चतुर्थ भेद है। स्त्रियोंके शरीरके स्पर्शकी ही तरह उनके शरीरसे सम्बद्ध वस्तुओंका स्पर्श भी कामी जनोंको रागकारक होता है। स्त्रियोंके उत्तम अंगोंका अवलोकन पाँचवाँ भेद है ॥८७३॥

गा०—स्त्रियोंका सम्मान करना छठा भेद है। वस्त्र माला आदिसे उन्हें आभूषित करना

---

१. विहरति–अ०। २. कारनिवा–अ० आ०।

'अदीदसुमरणं' अतीतकालानुभूतरतिक्रीडास्मरणं । 'अणागदभिलासो' भविष्यति काले एवं ताभिः क्रीडां करिष्यामि इति रत्यभिलाषः । 'इट्ठविसयसेवा वि य' इष्टविषयसेवापि च । 'अब्बंभं दसविहं एदं' दशप्रकारमब्रह्मैतत् । अक्षीणरागस्य परद्रव्योपयोगाशुभोपयोगौ भवतः । तेन संवृत्योपयोगं, परद्रव्याकमनं[1] ब्रह्मानमिति वीतरागतायैव चरणं ब्रह्मचर्यं ततोऽन्यदिदं दशविधमब्रह्मेति निरूपितं ॥८७४॥

एवं विसग्गिभूदं अब्बंभं दसविहंपि णादव्वं ।
आवादे मधुरमिव होदि विवागे य कडुयदरं ॥८७५॥

'एवं विसग्गिभूदं' विषाग्निना सदृशं एतदब्रह्म दशप्रकारमिति ज्ञातव्यं । आपाते मधुरमिव भवति विपाके तु कटुकतमं ॥८७५॥

स्त्रीविषयो रागोऽब्रह्म स च तत्प्रतिपक्षभूतवैराग्येण नाशयितुं शक्यते इति मत्वा वैराग्योपायकथनामाचष्टे—

कामकदा इत्थिकदा दोसा असुचित्तवुड्ढसेवा य ।
संसग्गदोसा वि य करंति इत्थीसु वेरग्गं ॥८७६॥

'कामकदा इत्थिकदा' कामकृताः स्त्रीकृताश्च दोषाः । अशुचित्वं, वृद्धसेवा, संसर्गदोषाश्च कुर्वन्ति स्त्रीषु वैराग्यं ॥८७६॥

कामकृतदोषनिरूपणा प्रबन्धेन उत्तरेण क्रियते—

आवइया किर दोसा इहपरलोए दुहावहा होंति ।
सव्वे वि आवहदि ते मेहुणसण्णा मणुस्सस्स ॥८७७॥

'आवदिया किर दोसा' इत्यादिना यावन्तः किल जन्मद्वये, 'दुहावहा' दुःखावहा भवन्ति दोषा हिंसादयस्तान्सर्वानपि आवहति मैथुनसंज्ञा मनुष्यस्य ॥८७७॥

सातवाँ भेद है। अतीत कालमें की गई रति क्रीडाका स्मरण करना आठवाँ भेद है। भविष्य कालमें मैं उनके साथ इस प्रकार क्रीड़ा करूँगा इस प्रकार अनागत रतिमें अभिलाषा नौवाँ भेद है। इष्ट विषयोंका सेवन दसवाँ भेद है। इस प्रकार अब्रह्मके ये दस भेद हैं ॥८७४॥

गा०—इस प्रकार विष और आगके समान अब्रह्मके दस भेद जानना। यह प्रारम्भमें मधुर प्रतीत होता है किन्तु परिणाममें अत्यन्त कटु होता है ॥८७५॥

स्त्री विषयक राग अब्रह्म है। वह अपने विरोधी वैराग्यसे ही नष्ट किया जा सकता है। ऐसा मानकर वैराग्यके उपायोंका कथन करते हैं—

गा०—काम विकारसे उत्पन्न हुए दोष, स्त्रियोंके द्वारा किये गये दोष, शरीरकी अशुचिता, वृद्ध जनोंकी सेवा, स्त्रीके संसर्गसे उत्पन्न हुए दोष, इनके चिन्तनसे स्त्रियोंमें वैराग्य उत्पन्न होता है ॥८७६॥

आगे कामजन्य दोष कहते हैं—

गा०—इस लोक और परलोकमें दुःखदायी जितने भी दोष हैं मनुष्यकी मैथुन संज्ञामें वे

---

१. मं ज्ञानं ब्रह्म—आ० मु० ।

सोयदि विलवदि परितप्पदी य कामादुरो विसीयदि य ।
रत्तिंदिया य णिद्दं ण लहदि पज्झादि विमणो य ॥८७८॥

'सोयदि विलवदि' शोचते, विलपति । परितप्यते । 'कामादुरो विसीयदि य' कामातुरो विषीदति च । नक्तं दिनं निद्रां न लभते । ध्यायति विमनस्को भवति ॥८७८॥

सयणे जणे य सयणासणे य गामे घरे व रण्णे वा ।
कामपिसायग्गहिदो ण रमदि य तह भोयणादीसु ॥८७९॥

'सयणे जणे य' स्वजने परजने, शयने, आसने, ग्रामे, गृहे, अरण्ये, भोजनादिक्रियासु च न रमते कामपिशाचगृहीतः ॥८७९॥

कामादुरस्स गच्छदि खणो वि संवच्छरो व पुरिसस्स ।
सीदंति य अंगाइं होदि अ उक्कंठिओ पुरिसो ॥८८०॥

'कामादुरस्स गच्छदि खणो वि' कामव्याधितस्य गच्छति क्षणोऽपि संवत्सर इव । अङ्गानि च सीदन्ति । भवत्युत्कण्ठितश्च पुरुषः ॥८८०॥

पाणिदलधरिदगंडो बहुसो चिंतेदि किं पि दीणमुहो ।
सीदे वि णिवाइज्जइ वेवदि य अकारणे अंगं ॥८८१॥

'पाणिदलधरिदगंडो' पाणितलधृतगंडः, 'बहुसो चिंतेदि' बहुशश्चिन्तां करोति । किमपि दीनमुखः । शीतेऽपि स्विद्यते । वेपते च अङ्गं कारणमन्तरेण ॥८८१॥

कामुम्मत्तो संतो अंतो डज्झदि य कामचिंताए ।
पीदो व कलकलो सो रदग्गिजाले जलंतम्मि ॥८८२॥

'कामुम्मत्तो' कामोन्मत्तः । कामचिन्तया चिरं दह्यते । पीतताम्रद्रव इव । अरत्यग्नेर्ज्वालासु ज्वलन्तीषु ॥८८२॥

सब दोष वर्तमान हैं ॥८७७॥

गा०—कामसे पीड़ित मनुष्य शोक करता है, विलाप करता है, परिताप करता है, विषाद करता है, रात दिन नहीं सोता । इष्ट स्त्री आदिका स्मरण करता है और अन्यमनस्क होकर धर्म कर्म भी भूल जाता है ॥८७८॥

गा०—कामरूपी पिशाचके द्वारा पकड़े गये मनुष्यका मन स्वजनमें, अन्य मनुष्योंमें, शयनमें, आसनमें, ग्राममें, घरमें, वनमें और भोजन आदिमें नहीं रमता ॥८७९॥

गा०—कामसे पीड़ित मनुष्यका एक क्षण भी एक वर्षकी तरह बीतता है । उसके सब अंग वेदनाकारक होते हैं । और वह उत्कण्ठित होता है उसका मन उसीमें लगा रहता है खान-पानमें नहीं लगता । वह उसे रुचता नहीं ॥८८०॥

गा०—वह अपनी हथेलीपर गाल रखकर दीनमुखसे बहुत-सी व्यर्थ चिन्ता किया करता है । शीतकालमें भी पसीनेसे भींग जाता है । बिना कारण ही उसके अंग कांपते हैं ॥८८१॥

कामादुरो णरो पुण कामिज्जंते जणे हु अलहंतो ।
पयदि मरिदुं बहुधा मरुप्पवादादियरणेहिं ॥८८३॥

'कामातुरो' कामातुरो नरः । स्वाभिलषिते जने अलभ्यमाने चेष्टते बहुधा मर्तुं । पर्वतोदधिनिपातेन तरुशाखावलम्बनेन, अग्निप्रवेशादिना वा ॥८८३॥

संकप्पंडयजादेण रागदोसचलजमलजीहेण ।
विसयबिलवासिणा रदिमुहेण चिंतादिरोसेण ॥८८४॥

'संकप्पंडयजादेण' संकल्पाण्डप्रसूतेन । रागद्वेषचलयमलजिह्वेन । विषयबिलवासिना रतिमुखेन चिन्तातिरोषेण ॥८८४॥

कामभुजगेण दट्ठा लज्जाणिम्मोगदप्पदाढेण ।
णासंति णरा अवसा अणेयदुक्खावहविसेण ॥८८५॥

'कामभुजंगेन' कामसर्पेण । लज्जात्वङ्निर्मोचनकारिसदर्पदंष्ट्रेण दष्टा अनेकदुःखावहविषेणावशा नरा नश्यन्ति ॥८८५॥

आसीविसेण अवरुद्धस्स वि वेगा हवंति सत्तेव ।
दस होंति पुणो वेगा कामभुअंगावरुद्धस्स ॥८८६॥

'आसीविसेण' आशीविषेण सर्पाग्रणिना दष्टस्यापि सप्तैव वेगा भवन्ति । कामभुजङ्गेन दष्टस्य दशवेगा भवन्ति ॥८८६॥

तान्दशापि वेगान्क्रमेण दर्शयति—

गा०—कामसे उन्मत्त पुरुष अन्तरंगमें कामकी चिन्तासे जला करता है। जैसे आगसे तपा ताम्बेका द्रव पीकर मनुष्य अन्तरंगमें जलता है वैसे ही वह इच्छित स्त्रीके न मिलनेपर अन्तरंगमें जलती हुई अरतिरूप आगकी ज्वालामें जलता है ॥८८२॥

गा०—कामसे पीड़ित मनुष्य अपनी इच्छित स्त्रीके न मिलनेपर प्रायः पर्वतसे गिरकर या समुद्रमें डूबकर या वृक्षकी शाखासे लटककर अथवा आगमें कूदकर मरनेकी चेष्टा करता है ॥८८३॥

गा०—कामरूप सर्प मानसिक संकल्परूप अण्डेसे उत्पन्न होता है। उसके रागद्वेषरूप दो जिह्वाएँ होती हैं जो सदा चला करती हैं। विषयरूपी बिलमें उसका निवास है। रति उसका मुख है। चिन्तारूप अतिरोष है। लज्जा उसकी कांचली है उसे वह छोड़ देता है। मद उसकी दाढ़ है। अनेक प्रकारके दुःख उसका जहर हैं। ऐसे कामरूप सर्पसे डँसा हुआ मनुष्य नाशको प्राप्त होता है ॥८८४–८८५॥

गा०—सब सर्पोंमें प्रमुख आशीविष सर्प होता है। उसके द्वारा डसे मनुष्यके तो सात ही वेग होते हैं। किन्तु कामरूपी सर्पके द्वारा डसे मनुष्यके दस वेग होते हैं ॥८८६॥

उन दस वेगोंको क्रमसे कहते हैं—

पढमे सोयदि वेगे दट्ठुं तं इच्छदे बिदियवेगे ।
णिस्ससदि तदियवेगे आरोहदि जरो चउत्थम्मि ॥८८७॥

'पढमे सोयदि वेगे' प्रथमे वेगे शोचति । द्वितीये वेगे स तं द्रष्टुमिच्छति । निःश्वसिति च तृतीये वेगे । आरोहति ज्वरश्चतुर्थे वेगे ॥८८७॥

डज्झदि पंचमवेगे अंगं छट्ठे ण रोचदे भत्तं ।
मुच्छिज्जदि सत्तमए उम्मत्तो होइ अट्ठमए ॥८८८॥

'डज्झदि पंचमवेगे' पञ्चमवेगेऽङ्गं दह्यते । भक्तारुचिः षष्ठे वेगे । सप्तमवेगे मूर्च्छति । उन्मत्तो भवत्यष्टमे ॥८८८॥

णवमे ण किंचि जाणदि दसमे पाणेहिं मुच्चदि मदंधो ।
संकप्पवसेण पुणो वेगा तिव्वा व मंदा वा ॥८८९॥

नवमे नात्मानं वेत्ति । दशमे वेगे प्राणैर्विमुच्यते । मदान्धस्य संकल्पवशेन पुनस्तीव्रा मन्दा वा भवन्ति वेगाः ॥८८९॥

जेट्ठामूले जोण्हे सूरो विमले णहम्मि मज्झण्हे ।
ण डहदि तह जह पुरिसं डहदि विवड्ढंतओ कामो ॥८९०॥

'जेट्ठामूले' ज्येष्ठमासे शुक्लपक्षे विमले नभसि मध्याह्ने रविः स न दहति तथा यथा पुरुषं दहति प्रवर्द्धमानः कामः ॥८९०॥

सूरग्गी डहदि दिवा रत्तिं च दिया य डहइ कामग्गी ।
सूरस्स अत्थि उच्छागारो कामग्गिणो णत्थि ॥८९१॥

'सूरग्गी डहदि दिवा' सूर्याग्निर्दहति दिवा, नक्तं दिवा दहति कामाग्निः । सूर्यस्याच्छादनकारी छत्रादिकमस्ति न कामाग्नेः ॥८९१॥

गा०—कामके प्रथम वेगमें सोचता है जिसको देखा या सुना उसके बारेमें चिन्ता करता है। दूसरे वेगमें उसे देखनेकी इच्छा करता है। तीसरे वेगमें दीर्घ निश्वास लेता है। चतुर्थ वेगमें शरीरमें ज्वर चढ़ जाता है ॥८८७॥

गा०—पाँचवें वेगमें अंग जलने लगते हैं। छठे वेगमें भोजन नहीं रुचता। सातवें वेगमें मूर्छित हो जाता है। आठवें वेगमें उन्मत्त हो जाता है ॥८८८॥

गा०—नौवें वेगमें अपनेको भी नहीं जानता। दसवें वेगमें मर जाता है। इस प्रकार कामान्ध पुरुषके संकल्पवश तीव्र या मन्द वेग होते हैं ॥८८९॥

गा०—ज्येष्ठमासके शुक्लपक्षमें मध्याह्नकालमें आकाशके निर्मल रहते हुए सूर्य वैसा नहीं जलाता जैसा पुरुषको प्रज्वलित काम जलाता है ॥८९०॥

गा०—सूर्य अग्नि तो केवल दिनको ही जलाती है किन्तु कामाग्नि रात दिन जलाती है। सूर्यके तापसे बचनेके उपाय तो छाता आदि हैं किन्तु कामाग्निका कोई उपाय नहीं है ॥८९१॥

विज्झायदि सूरग्गी जलादिएहिं ण तहा दु कामग्गी ।
सूरग्गी डहइ तयं अब्भंतरबाहिरं इदरो ॥८९२॥

'विज्झायदि सूरग्गी' विध्याति सूर्यजनितस्तापो जलादिभिर्न तथा जलादिभिः कामाग्निः प्रशाम्यति । सूर्यस्योष्णत्वं त्वचं दहति । कामाग्निरभ्यन्तरंबहिश्च दहति ॥८९२॥

जादिकुलं संवासं धम्मं णियबंधवम्मि अगणित्ता ।
कुणदि अकज्जं पुरिसो मेहुणसण्णापसंमूढो ॥८९३॥

'जादिकुलं' मातृपितृवंशं । 'संवासं' [1]सहवसतः । धर्मं बान्धवानपि अगणय्य पुरुषोऽकार्यं करोति मैथुनसंज्ञामूढः ॥८९३॥

कामपिसायग्गहिदो हिदमहिदं वा ण अप्पणो मुणदि ।
होइ पिसायग्गहिदो व सदा पुरिसो अणप्पवसो ॥८९४॥

'कामपिसायग्गहिदो' कामपिशाचगृहीतः हितमहितं वा न वेत्ति, पिशाचेन गृहीतः पुरुष इव सदा अनात्मवशो भवति ॥८९५॥

णीचो व णरो बहुगं पि कदं कुलपुत्तओ वि ण गणेदि ।
कामुम्मत्तो लज्जालुओ वि तह होदि णिल्लज्जो ॥८९५॥

'णीचो व णरो' नीच इव नरः कृतमपि बहुमुपकारं न गणयति । कुलपुत्रोऽपि सन्कामोन्मत्तो, लज्जावानपि पूर्वं विगतलज्जो भवति ॥८९५॥

कामी सुसंजदाण वि रूसदि चोरो व जग्गमाणाणं ।
पिच्छदि कामग्घत्थो हिदं भणंते वि सत्तू व ॥८९६॥

'कामी सुसंजदाण वि' कामी सुसंयतानामपि रुष्यति । जाग्रतां चोर इव कामग्रस्तः, प्रेक्षते हितं प्रतिपादयतः शत्रुरिव ॥८९६॥

गा०—सूर्यसे उत्पन्न हुआ ताप तो जल आदिसे शान्त हो जाता है किन्तु कामाग्नि जलादिसे शान्त नहीं होती। सूर्यकी गर्मी तो चर्मको ही जलाती है किन्तु कामाग्नि शरीर और आत्मा दोनोंको जलाती है ॥८९२॥

गा०—मैथुन संज्ञासे मूढ़ हुआ मनुष्य मातृवंश, पितृवंश, साथमें रहनेवाले मित्रादि, धर्म, और बन्धु बान्धवोंकी भी परवाह न करके अकार्य करता है ॥८९३॥

गा०—कामरूपी पिशाचके द्वारा पकड़ा गया मनुष्य अपने हित अहितको नहीं जानता। पिशाचके द्वारा पकड़े गये मनुष्यकी तरह अपने वशमें नहीं रहता ॥८९४॥

गा०—जैसे नीच मनुष्य किये गये उपकारको भुला देता है वैसे ही कुलीन वंशका भी व्यक्ति कामसे उन्मत्त होकर पूर्वमें लज्जावान होते हुए निर्लज्ज हो जाता है ॥८९५॥

गा०—जैसे चोर जागते हुए व्यक्तियोंपर रोष करता है वैसे ही कामी संयमीजनोंपर रोष

---

१. सहवसनं—आ० मु० । संवासं सहवसतो जनान् मित्रादीन्—मूलारा० ।

आयरियउवज्झाए कुलगणसंघस्स होदि पडिणीओ ।
कामकलिणा हु घत्थो धम्मियभावं पयहिदूणं ॥८९७॥

'आयरियउवज्झायए' आचार्याणां अध्यापकानां, कुलस्य गुरुशिष्यवर्गस्य, गुरुधर्मभ्रातृशिष्याणां वा चातुर्वर्ण्यस्य वा संघस्य च भवति प्रतिकूलः कामकलिना ग्रस्तः धार्मिकत्वं विहाय ॥८९७॥

कामग्घत्थो पुरिसो तिलोयसारं जहदि सुदलाभं ।
तेलोक्कपूइदं पि य माहप्पं जहदि विसयंधो । ८९८॥

'कामग्घत्थो' कामग्रस्तः । त्रैलोक्यसर्वसारमपि श्रुतलाभं जहाति । त्रैलोक्येन पूजितमपि माहात्म्यं त्यजति विषयान्धः ॥८९८॥

तह विसयामिसघत्थो तणं व तवचरणदंसणं जहइ ।
विसयामिसगिद्धस्स हु णत्थि अकायव्वयं किंचि ॥८९९॥

'तह विसयामिसघत्थो' विषयामिषलंपटः । तृणमिव तपश्चरण दर्शनं च जहाति । विषयामिषलंपटस्य नास्त्यकार्यं किञ्चित् ॥८९९॥

अरहंतसिद्ध आयरिय उवज्झाय साहु सव्ववग्गाणं ।
कुणदि अवण्णं णिच्चं कामुम्मत्तो विगयवेसो ॥९००॥

अरहंतसिद्धआयरिय' अर्हतां, सिद्धानां, आचार्याणां, उपाध्यायाना, सर्वेषां यतीनां चावर्णवादं करोति नित्यं विकृतवेषः ॥९००॥

अयसमणत्थं दुःखं इहलोए दुग्गदी य परलोए ।
संसारं पि अणंतं ण मुणदि विसयामिसे गिद्धो ॥९०१॥

करता है । तथा कामी हितकारी बात कहनेवालेको शत्रुके समान देखता है ॥८९६॥

'**जा रागादिणियत्ती मणस्स जाणाहि तं मणोगुत्तिं**' या रागद्वेषाभ्यां निवृत्तिर्मनसस्तां जानीहि मनोगुप्तिं। अत्रेदं परीक्ष्यते। मनसो गुप्तिरिति यदुच्यते किं प्रवृत्तस्य मनसो गुप्तिरथाप्रवृत्तस्य? प्रवृत्तं चेदं शुभं मनः तस्य का रक्षा। अप्रवृत्तं यदि तथापि असतः का रक्षा? ततोऽप्यपायपरिहारोपयुक्ततेत्युच्यते? किं च मनःशब्देन किमुच्यते द्रव्यमन उत भावमन? मनोद्रव्यवर्गणा मनश्चेत् तस्य कोऽपायो नाम यस्य परिहारो रक्षा स्यात्? किं च द्रव्यान्तरेण तेन रक्षितेनास्य जीवस्य फलं य आत्मनः परिणामोऽशुभमावहति। ततोऽयुक्ता रक्षात्मनः। अथ नो इन्द्रियमतिज्ञानावरणक्षयोपशमसंजातं ज्ञानं मन इति गृह्यते तस्य अपायः कः? यदि विनाशः स न परिहर्तुं शक्यते यतोऽनुभवसिद्धो विनाशः। अन्यथा एकस्मिन्नेव ज्ञाने प्रवृत्तिरात्मनः स्यात्। ज्ञानानीह वीचय इवानारतमुत्पद्यन्ते न चास्ति तद्विनाशोपायः। अपि च इन्द्रियमतिरपि रागादिव्यावृत्तिरिष्टैव किमुच्यते रागादिणियत्ती मणस्स इति।

अत्र प्रतिविधीयते—नो इन्द्रियमतिरिह मनःशब्देनोच्यते। सा रागादिपरिणामैः सह एककालं आत्मनि प्रवर्तते। न हि विषयावग्रहादिज्ञानमन्तरेणास्ति रागद्वेषयोः प्रवृत्तिः, अनुभवसिद्धैवास्ति नापरा युक्तिः अनुगम्यते। वस्तुतत्त्वानुयायिना मानसेन ज्ञानेन समं रागद्वेषौ न वर्तेते इत्येतदप्यात्मसाक्षिकमेव। तेन मनसस्त-

---

आगे प्रवचन माताओंका व्याख्यान करते हैं। उनमें से प्रथम मनोगुप्ति और वचनगुप्तिका व्याख्यान करते हैं—

गा०-टी०—मनकी जो रागादिसे निवृत्ति है उसे मनोगुप्ति जानो।

शंका—यहाँ यह विचार करते हैं कि यह जो आप मनकी गुप्ति कहते हैं सो यह गुप्ति प्रवृत्त मनकी है या अप्रवृत्त मनकी है? प्रवृत्त मन तो शुभ रूप होता है उसकी रक्षा कैसी? यदि मन अप्रवृत्त है तो वह असत् हुआ, उसकी रक्षा कैसी। प्रवृत्त मनकी अपायसे बचाव करनेमें उपयोगिता होती है। तथा मन शब्दसे द्रव्यमन लेते हैं या भावमन? यदि द्रव्यवर्गणा रूप मन लेते हैं तो उसका अपाय क्या, जिससे बचनेसे उसकी रक्षा हो। तथा द्रव्यवर्गणा रूप मन तो भिन्न द्रव्य है। उसकी रक्षा करनेसे इस जीवको क्या लाभ जो आत्माके अशुभ परिणाम करता है। अतः आत्माकी रक्षाकी बात युक्त नहीं है। यदि नोइन्द्रिय मतिज्ञानावरणके क्षयोपशमसे उत्पन्न हुए ज्ञानको मन शब्दसे ग्रहण करते हैं तो उसका अपाय क्या है? यदि अपायसे मतलब विनाश है तो उसका परिहार शक्य नहीं है क्योंकि विनाश तो अनुभवसे सिद्ध है। यदि ज्ञानका विनाश न हो तो आत्माकी प्रवृत्ति सदा एक ही ज्ञानमें रहे। किन्तु ज्ञान तो तरंगोंकी तरह निरन्तर उत्पन्न होते रहते हैं। उनके विनाश न होनेका कोई उपाय नहीं है। तथा इन्द्रियजन्य मतिकी भी रागादिसे व्यावृत्ति मान्य है तब 'मनकी रागादिसे निवृत्ति' क्यों कहते हैं?

समाधान—यहाँ मन शब्दसे नोइन्द्रिय जन्य मति कही है। वह आत्मामें रागादि परिणामोंके साथ एक ही कालमें प्रवृत्तिशील है। विषयोंका अवग्रहादिज्ञान हुए विना रागद्वेषमें प्रवृत्ति नहीं होती, यह बात अनुभव सिद्ध है। इसमें अन्य कोई युक्ति नहीं है। जो मानस ज्ञान वस्तुतत्त्वके अनुसार होता है उस ज्ञानके साथ रागद्वेष नहीं होते यह बात आत्मसाक्षिक है। अतः तत्त्व-

त्वावग्राहिणो रागादिभिरसहचारिता या सा मनोगुप्तिः। मनोग्रहणं ज्ञानोपलक्षणं तेन सर्वो बोधो निरस्तराग-द्वेषकलङ्को मनोगुप्तिरन्यथा इन्द्रियमतौ श्रुते, अवधौ, मनःपर्यये वा परिणममानस्य न मनोगुप्तिः स्यात्। इष्यते च। अथवा मनःशब्देन मनुते य आत्मा स एव भण्यते तस्य रागादिभ्यो या निवृत्तिः रागद्वेषरूपेण या अपरिणतिः सा मनोगुप्तिरित्युच्यते। अथैवं ब्रूषे सम्यग्योगनिग्रहो गुप्तिः दृष्टफलमनपेक्ष्य योगस्य वीर्यपरिणामस्य निग्रहो रागादिकार्यकरणनिरोधो मनोगुप्तिः। 'अलियादिणियत्ती वा मोणं वा होइ वचिगुत्ती' विपरीतार्थप्रतिपत्तिहेतुत्वात्परदुःखोत्पत्तिनिमित्तत्वाच्चाधर्माद्या व्यावृत्तिः सा वाग्गुप्तिः। ननु च वाचः पुद्गलत्वात् विपरीतार्थप्रतिपत्तिहेतुत्वादिभ्यो व्यावृत्तिहेतुर्वाचो धर्मो न चासौ संवरणे हेतुरनात्मपरिणामत्वात्। शब्दादिवत्। एवं तर्हि व्यलीकात्परुषादात्मप्रशंसापरात् परनिन्दाप्रवृत्तात्परोपद्रवनिमित्ताच्च वचसो व्यावृत्तिरात्मनस्तथाभूतस्य वचसोऽप्रवर्तिका वाग्गुप्तिः। यां [1]वाचं प्रवर्तयन् अशुभं कर्म स्वीकरोत्यात्मा तस्या वाच इह ग्रहणं वाग्गुप्तिरित्यत्र तेन वाग्विशेषस्यानुत्पादकता वाचः परिहारो वाग्गुप्तिः। मौनं वा सकलाया वाचो या परिहृतिः सा वाग्गुप्तिः। अयोग्यवचनेऽप्रवृत्तिः प्रेक्षापूर्वकारितया योग्यं तु वक्ति वा न वा। भाषासमितिस्तु

का ग्रहण करने वाले मनका रागादि भावके साथ साहचर्य न होना मनोगुप्ति है। 'मन' शब्द ज्ञानका उपलक्षण है। अतः रागद्वेषकी कालिमासे रहित ज्ञानमात्र मनोगुप्ति है। यदि ऐसा न माना जाय तो जब आत्मा इन्द्रिय ज्ञान, श्रुतज्ञान, अवधिज्ञान अथवा मनःपर्ययज्ञान रूपसे परिणत हो उस समय मनोगुप्ति नहीं हो सकेगी। किन्तु उस समय भी मनोगुप्ति मानी जाती है। अथवा जो आत्मा 'मनुते' अर्थात् पदार्थोंको जानता है वही मन शब्दसे कहा जाता है। उसकी जो रागादिसे निवृत्ति है अथवा रागद्वेषसे परिणमन करना वह मनोगुप्ति कही जाती है। ऐसा होने पर 'सम्यक् रूपसे योगका निग्रह गुप्ति है' ऐसा कहनेमें भी कोई विरोध नहीं है। सम्यक् अर्थात् किसी लौकिक फलकी अपेक्षा न करके वीर्य परिणाम रूप योगका निग्रह अर्थात् रागादि कार्य करनेसे रोकना मनोगुप्ति है।

तथा विपरीत अर्थको प्रतिपत्तिमें कारण होनेसे और दूसरोको दुःखकी उत्पत्तिमें निमित्त होनेसे जो अधर्म मूलक वचनसे निवृत्ति है वह वचन गुप्ति है।

शङ्का—वचन तो पौद्गलिक है अतः विपरीत अर्थकी प्रतिपत्तिमे हेतु आदि होनेसे व्यावृत्ति वचनका धर्म है और वह संवरमें कारण नहीं है क्योंकि वह तो पुद्गलका परिणाम है, आत्माका परिणाम नहीं है जैसे शब्द वगैरह पुद्गलके परिणाम हैं।

समाधान—मिथ्या, कठोर, अपनी प्रशंसा और परकी निन्दा करने वाले तथा दूसरोंमे उपद्रव कराने वाले वचनसे आत्माकी निवृत्ति, जो इस प्रकारके वचनोंकी प्रवृत्तिको रोकती है वह वचन गुप्ति है। वचन गुप्तिमें वचन शब्दसे जिस वचनको सुनकर प्रवृत्ति करता हुआ आत्मा अशुभ कर्म करता है उस वचनका ग्रहण है। अतः वचन विशेषको उत्पन्न न करना वचनका परिहार है और वही वचन गुप्ति है। अथवा समस्त प्रकारके वचनोंका परिहार रूप मौन वचनगुप्ति है। अयोग्य वचनमें अप्रवृत्ति वचनगुप्ति है। प्रेक्षापूर्वकारो होनेसे वह योग्य वचन बोले या न बोले। किन्तु योग्य वचन बोलना—उनका कर्ता होना भाषासमिति है। अतः गुप्ति और

---

१. वाचां—अ० आ० ज०।

योग्यवचसः कर्तृता ततो महान्भेदो गुप्तिसमित्योः। मौनं वाग्गुप्तिरत्र स्फुटतरो वचोभेदः। योग्यस्य वचसः प्रवर्तकता। वाचः कस्याश्चिदनुत्पादकतेति ॥११८१॥

कायकिरियाणियत्ती काउस्सग्गो सरीरगे गुत्ती।
हिंसादिणियत्ती वा सरीरगुत्ती हवदि दिट्ठा ॥११८२॥

'कायकिरियाणियत्ती' कायस्यौदारिकादेः शरीरस्य या क्रिया तस्या निवृत्तिः 'सरीरगे गुत्ती' शरीरविषया गुप्तिः कायगुप्तिरिति यावत्। आसनस्थानशयनादीनां क्रियात्वात् तासां चात्मना [1]प्रवर्तितत्वात् कथमात्मनः कायक्रियाभ्यो व्यावृत्तिः। अथ मतं, कायस्य पर्यायः क्रिया, कायाच्चार्थान्तरमात्मा ततो द्रव्यान्तरपर्यायात् द्रव्यान्तरं तत्परिणामशून्यं तथाऽपरिणतं व्यावृत्तं भवतीति कायक्रियानिवृत्तिरात्मनो भण्यते। सर्वेषामेवात्मनामित्थं कायगुप्तिः स्यात् न चेष्टेति।

अत्रोच्यते—कायस्य सम्बन्धिनी क्रिया कायशब्देनोच्यते। तस्याः कारणभूतात्मन. क्रिया कायक्रिया तस्य निवृत्तिः। 'काउस्सग्गो' कायोत्सर्गः शरीरस्याशुचितामसारतामापन्निमित्ततां चावेत्य तद्गतममतापरिहारः कायगुप्तिः। अन्यथा शरीरमायुः शृङ्खलाबद्धं त्यक्तुं न शक्यते इत्यसम्भवः कायोत्सर्गस्य। धातूनामनेकार्थत्वात् गुप्तिर्निवृत्तिवचन इहेति सूत्रकाराभिप्रायोऽन्यथा 'कायकिरियाणियत्ती सरीरगे गुत्ती' इति कथं ब्रूयात्। कायोत्सर्गग्रहणेन निश्चलता भण्यते। यद्येवं कायकिरियाणियत्ती इति न वक्तव्य, कायोत्सर्गः काय-

---

समितिमें महान् अन्तर है। मौन वचन गुप्ति है ऐसा कहने पर गुप्ति और समितिका भेद स्पष्ट हो जाता है। समिति योग्य वचनमें प्रवृत्ति कराती है। और गुप्ति किसी वचनकी उत्पादक नहीं है ॥११८१॥

गा०-टी०—काय अर्थात् औदारिक आदि शरीरकी जो क्रिया है उसकी निवृत्ति कायगुप्ति है।

शङ्का—बैठना, ठहरना, सोना आदि क्रियाएँ हैं। और वे क्रियाएँ आत्माके द्वारा प्रवर्तित हैं। तब आत्मा कायकी क्रियाओंसे कैसे निवृत्त हो सकता है। यदि कहोगे कि क्रिया कायकी पर्याय है और कायसे आत्मा भिन्न है। अतः द्रव्यान्तर कायकी पर्यायसे द्रव्यान्तर आत्मा उस पर्यायसे रहित होनेसे कायकी पर्यायरूप परिणत नही होता अत उससे वह निवृत्त है और इसीको आत्माकी कायकी क्रियाओंसे निवृत्ति कही है। तो इस प्रकारसे सभी आत्माओंके कायगुप्तिका प्रसग आता है।

समाधान—कायशब्दसे कायसम्बन्धी क्रिया कही है। उसकी कारणभूत आत्माकी क्रिया कायक्रिया है और उसकी निवृत्ति कायगुप्ति है। अथवा कायोत्सर्ग अर्थात् शरीरकी अपवित्रता, असारता और आपत्तिमें निमित्तपना जानकर उससे ममत्व न करना कायगुप्ति है। अन्यथा शरीर तो आयुकी सांकलसे बँधा है। अब तक आयु है शरीरका त्याग नही किया जा सकता। यदि शरीर त्यागको कायोत्सर्ग कहेंगे तो कायोत्सर्ग असम्भव हो जायगा। धातुओंके अनेक अर्थ होते हैं अतः यहाँ गुप्तिका अर्थ निवृत्ति है ऐसा गाथासूत्रकार आचार्यका अभिप्राय है। यदि ऐसा न होता तो 'कायक्रिया निवृत्ति शरीर गुप्ति है' ऐसा कैसे कहते।

---

1. प्रवतर्कत्वात् कथमात्मनः कार्या क्रियाभ्यो—आ० मु०।

गुप्तिरित्यैतदेव वाच्यं इति चेत् न कार्यविषयं ममेदंभावरहितत्वमात्रमपेक्ष्य कायोत्सर्गस्य प्रवृत्तेः धावनगमन-लङ्घनादिक्रियासु प्रवृत्तस्यापि कायगुप्तिः स्यान्न चेष्यते। अथ कायक्रियानिवृत्तिरित्येतावदुच्यते मूर्च्छापरिगत-स्यापि अपरिस्पन्दता विद्यते इति कायगुप्तिः स्यात्। तत उभयोपादानं व्यभिचारनिवृत्तये। कर्मादाननिमित्त-सकलकायक्रियानिवृत्तिः कायगोचरममतात्यागपरा वा कायगुप्तिरिति सूत्रार्थः। 'हिंसादिणियत्ती वा सरीरगुत्ती हवदि दिट्ठा' हिंसादिनिवृत्तीर्वा शरीरगुप्तिरिति दृष्टा जिनागमे, प्राणिप्राणवियोजनं, अदत्तादानं, मिथुनकर्म शरीरेण, परिग्रहादानमित्यादिका या विशिष्टा क्रिया सेह कायशब्देनोच्यते। कायिकोपकृतेर्गुप्तिर्व्यावृत्तिः काय-गुप्तिरिति व्याख्यातं सूरिणा ॥११८२।

छेत्तस्स वदी णयरस्स खाइया अहव होइ पायारो।
तह पावस्स णिरोहे ताओ गुत्तीओ साहुस्स ॥११८३॥

'छेत्तस्स वदी' क्षेत्रस्य वृतिः 'णयरस्स खातिका अथवा पायारो' अथवा प्राकारो भवति नगरस्य। 'तथा पावस्स णिरोधो' पापस्य निरोध उपायः। 'ताओ गुत्तीओ' ता गुप्तय साधोः ॥११८३॥

तम्हा तिविहेवि तुमं मणवचिकायप्पओगजोगम्मि।
होहि सुसमाहिदमदी णिरंतरं ज्झाणसज्झाए ॥११८४॥

'तम्हा तिविधेण मणवचिकायपओगजोगम्मि' मनोवाक्कायविषये प्रकृष्टे योगे। 'तुमं' त्वं। 'सुसमा-

---

शङ्का—यदि कायोत्सर्गसे निश्चलता कही जाती है तो 'कायक्रियानिवृत्ति कायगुप्ति है' ऐसा नहीं कहना चाहिए। किन्तु कायोत्सर्ग कायगुप्ति है ऐसा ही कहना चाहिए।

समाधान—ऐसा कहना ठीक नहीं है क्योंकि कायमे 'यह मेरा है' इस भावके न होने मात्रकी अपेक्षासे कायोत्सर्ग शब्दकी प्रवृत्ति होती है। किन्तु यदि कायगुप्ति यही है तो दौड़ना, जाना, लांघना आदि क्रियाओंको करते हुए भी कायगुप्ति हो सकेगी। किन्तु ऐसा नही माना जाता। और 'कायक्रियाकी निवृत्ति कायगुप्ति है' इतना ही कहा जाता है तो मूर्छित अवस्थामे भी कायक्रियाकी निवृत्ति होनेसे कायगुप्तिका प्रसंग आता है। इसलिए व्यभिचार दोषकी निवृत्तिके लिए दोनोंका ग्रहण गाथामें किया है।

अतः कर्मके ग्रहणमें निमित्त समस्त कायकी क्रियाओसे निवृत्ति और कायविषयक ममत्वका त्याग कायगुप्ति है, यह गाथासूत्रका अर्थ है।

अथवा आगममे हिंसा आदिसे निवृत्तिको कायगुप्ति कहा है। यहाँ काय शब्दसे प्राणियोके प्राणोंका घात, बिना दी हुई वस्तुका ग्रहण, शरीरसे मैथुन कर्म और परिग्रहका ग्रहण इत्यादि विशिष्ट क्रिया कही गई है। कायिक क्रियाओंसे गुप्ति अर्थात् व्यावृत्ति कायगुप्ति है ऐसा आचार्यने व्याख्यान किया है ॥११८२॥

गा०—जैसे खेतकी बाड और नगरकी खाई अथवा चारदिवारी होती है वैसे ही पापको रोकनेमें साधुकी गुप्तियाँ होती हैं ॥११८३॥

गा०—इसलिए हे क्षपक! तुम निरन्तर ध्यान और स्वाध्यायमें लगे रहकर मन वचन काय विषयक तीन प्रकारके प्रकृष्ट योगमें सावधान रहो। क्योंकि ध्यान और स्वाध्यायके बिना गुप्तियाँ नहीं ठहरतीं ॥११८४॥

'झाणवदी होदि' सुष्टु समाहितमतिरेव । कथं ? 'णिरंतरं झाणज्झाए' निरन्तरप्रवृत्तध्यानस्वाध्याये । न हि ध्यानस्वाध्यायावन्तरेण गुप्तयोऽवतिष्ठन्त इति भावः ॥११८४॥

समितिव्याख्यानायोत्तरप्रबन्धस्तत्रेर्यासमितिनिरूपणायोत्तरा गाथा—

मग्गुज्जोवपओगालंबणसुद्धीहिं इरियदो मुणिणो ।
सुत्ताणुवीचि भणिदा इरियासमिदी पवयणम्मि ॥११८५॥

'मग्गुज्जोवपओगालंबणसुद्धीहिं' मार्गशुद्धिः, उद्योतशुद्धिरुपयोगशुद्धिरालम्बनशुद्धिरिति चतस्रः शुद्धयस्ताभिः करणभूताभिः । 'इरियदो' गच्छतः । 'मुणिणो' मुनेः । 'सुत्ताणुवीचि' सूत्रानुसारेण । 'भणिदा' कथिता । 'इरियासमिदी' ईर्यासमितिः । 'पवयणम्मि' प्रवचने । तत्र मार्गस्य शुद्धिर्नाम अप्रचुरपिपीलिकादित्रसता, बीजाङ्कुरतृणहरितपत्राशाकर्दमादिरहितता । स्फुटतरता व्यापिता च उद्योतशुद्धिः । निशाकरनक्षत्रादीनामस्फुट प्रकाश , अव्यापी प्रदीपादिप्रकाशः । [1]पादोद्धारनिक्षेपदेशजीवपरिहरणावहितचेतस्ता उपयोगशुद्धिः । गुरुतीर्थचैत्ययतिवन्दनादिकमपूर्वशास्त्रार्थग्रहणं, संयतप्रायोग्यक्षेत्रमार्गणं, वैयावृत्यकरणं, अनियतावासस्वास्थ्यासम्पादने श्रमपराजय, नानादेशभाषाशिक्षणं, विनेयजनप्रतिबोधनं चेति प्रयोजनापेक्षया आलम्बनाशुद्धिः । किं तत् सूत्रानुसारिगमन, अद्रुत, नातिविलम्बित, पुरो युगमात्रदर्शनप्रवृत्तिः, अविकृष्टचरणन्यास, भयविस्मयावन्तरेणासलील मनत्युत्क्षेप, परिहृतलङ्घनधावन प्रविलम्बितभुजं, निर्विकार, अचपलमसम्भ्रान्तमनूर्ध्वतिर्यक्प्रेक्षण, हस्तमात्रपरिहृततरुणतृणपल्लवं, अकृतपशुपक्षिमृगोद्वेजनं, विरुद्धयोनिसक्रमणजातबाधाव्युदासाय

आगे समितिका व्याख्यान करते है । प्रथम ईर्यासमितिका कथन करते हैं—

गा०-टी०—मार्गशुद्धि, उद्योतशुद्धि, उपयोगशुद्धि और आलम्बन शुद्धि, इन चार शुद्धियोंके द्वारा सूत्रके अनुसार गमन करते हुए मुनिके प्रवचनमें ईर्यासमिति कही है।

मार्गमें चीटी आदि त्रस जीवोंकी अधिकताका न होना तथा बीज, अंकुर, तृण, हरे पत्ते और कीचड आदिका न होना मार्गशुद्धि है। सूर्यके प्रकाशका स्पष्ट फैलाव और उसकी व्यापकता उद्योतशुद्धि है। चन्द्रमा नक्षत्र आदिका प्रकाश अस्पष्ट होता है और दीपक आदिका प्रकाश व्यापक नही होता। पैर उठाने और रखनेके देशमें जीवोंकी रक्षामें चित्तकी सावधानता उपयोग शुद्धि है। गुरु, तीर्थ, चैत्य और यतिकी वन्दनाके लिए गमन करना आदि किसीके पास शास्त्रका अपूर्व अर्थ या अपूर्व शास्त्रके अर्थका ग्रहण करनेके लिए गमन करना, मुनियोंके योग्य क्षेत्रकी खोजके लिए गमन करना, वैयावृत्य करनेके उद्देशसे गमन करना, अनियत आवासके उद्देशसे गमन करना, स्वास्थ्य लाभके लिए गमन करना, श्रमपर विजय पानेके लिए गमन करना, नाना देशोकी भाषा सीखनेके लिए गमन करना, शिष्य समुदायका प्रतिबोधन करनेके लिए गमन करना, इत्यादि प्रयोजनोकी अपेक्षा गमन करना आलम्बन शुद्धि है।

सूत्रानुसार गमन इस प्रकार है—न बहुत जल्दी और न बहुत विलम्बसे सामने युगमात्र भूमि देखकर चलना, पादनिक्षेप अधिक दूर न करना, भय और आश्चर्यके विना गमन करना, लीलापूर्वक गमन न करना, पैर अधिक ऊँचा न उठाते हुए गमन करना, लांघना दौड़ना आदि नही, दोनों भुजा लटकाकर गमन करना, विकार रहित, चपलता रहित, ऊपर तिर्यक् अवलोकन

---

१ पादोपरिवि–अ०आ० । २ मनक्षेप–अ० । मनन्यत्रक्षेपं आ० । मनत्युत्क्षेप–मूलारा० ।

[illegible]तिनेत्रगमं, अप्रतिसारितप्रतिमार्गयायिसंघट्टनं दुष्टधेनुबलीवर्दसारमेयादिपरिहृतिचतुरं, परिहृतबुस-तुषमषीभस्मार्द्रगोमयतृणनिचयजलोपलफलकं, दूरीकृतचोरीकलहं, [1]अनारूढसंक्रमं निरूपयतो यतेरीर्या-समितिः ॥११८५॥

भाषासमितिनिरूपणार्थोत्तरगाथा—

सच्चं असच्चमोसं अलियादीदोसवज्जमणवज्जं ।
वदमाणस्सणुवीची भासासमिदी हवदि सुद्धा ॥११८६॥

चतुर्विधा वाक्—सत्या, मृषा, सत्यसहिता मृषा, असत्यमृषा चेति । सता हिता सत्या । न सत्या न च मृषा या सा असच्चमोसा । द्विप्रकारा वाचमित्थंभूता । '**अलियादिदोसवज्जं**' व्यलीकता अर्थाभाव', पारुष्यं, पैशुन्यमित्यादिदोषरहितं । '**अणवज्जं**' पापास्रवो न भवति इत्यनवद्य । '**वदमाणस्स**' व्याहरतः । '**अणुवीचि**' सूत्रानुसारेण '**भासासमिदी सुद्धा हवदि**' भाषासमितिः शुद्धा भवति ॥११८६॥

सत्यवचनभेदं निरूपयति—

जणवदसंमदिठवणा णामे रूवे पडुच्चववहारे ।
संभावणववहारे भावेणोपम्मसच्चेण ॥११८७॥

'**जणवदसंमदि**' नानाजनपदप्रसिद्धा मुसकेतानुविधायिनी वाणी जनपदसत्यं । गच्छति इति गौ., गर्ज-

---

रहित गमन करना, तरुण तृण पत्रोसे एक हाथ दूर रहते हुए गमन करना, पशु पक्षी और मृगोको भयभीत न करते हुए गमन करना, विरुद्ध योनिवाले जीवोंके मध्यसे जानेपर उनको होनेवाली बाधाको दूर करनेके लिए पीछीसे अपने शरीरकी बारबार प्रतिलेखना करते हुए गमन करना, सामनेसे आते हुए मनुष्योसे न टकराते हुए गमन करना, दुष्ट गाय, दुष्ट बैल, कुत्ता आदिसे चतुरतापूर्वक बचते हुए गमन करना, भुस, तुष, मसी, गीला गोबर, तृणसमूह, जल, पाषाण और लकड़ीके तख्तसे बचकर गमन करना, चोरी और कलहसे दूर रहना और पुलपर न चढ़ना। ये सब करते हुए गमन करना ईर्यासमिति है ॥११८५॥

आगे भाषासमितिका कथन करते हैं—

गा०—वचनके चार प्रकार है—सत्य, असत्य, सत्यसहित असत्य और असत्यमृषा। सज्जनोके हितकारी वचनको सत्य कहते है। जो वचन न सत्य होता है और न असत्य उसे असत्यमृषा कहते हैं। इस प्रकार सत्य और असत्यमृषा वचनको बोलना तथा असत्य, कठोरता, चुगली आदि दोषोंसे रहित और अनवद्य अर्थात् जिससे पापका आस्रव न हो ऐसा वचन सूत्रा-नुसार बोलनेवालेके शुद्ध भाषासमिति होती है ॥११८६॥

सत्यवचनके भेद कहते हैं—

गा०—जनपद सत्य, सम्मति सत्य, स्थापना सत्य, नामसत्य, रूपसत्य, प्रतीत्यसत्य, सम्भावना सत्य, व्यवहार सत्य, भाव सत्य और उपमा सत्य इस प्रकार सत्यवचनके दस भेद हैं।

टी०—विभिन्न जनपदोंमे जो उस उस जनपदके संकेतके अनुसार प्रचलित वाणी है वह

१. यवलो–अ० । २. अनूढ–अ० ।

तीति गज इत्येवमादिका अवयवार्थानुगमाभावेऽपि विवक्षितार्थप्रवृत्तिनिमित्तभूता । सम्मतिशब्देन संस्थानाभ्युपगम उच्यते । गजेन्द्रो नरेन्द्र इत्यादिकाः शब्दाः शुभलक्षणयोगात् केषाञ्चित् स्वतो लक्षणत्वा नामीश्वरत्वेनाभ्युपगममाश्रित्य क्वचिद्‌गजे मानवे वा प्रयुज्यमाना सम्मतिसत्यशब्देनोच्यन्ते । अर्हन्निन्द्रः स्कन्दः इत्येवमादयः सद्‌भावासद्‌भावस्थापनाविषया स्थापनासत्य । अरिहननं, रजोहननं, इन्दनं इत्येवमादीनां क्रियाणा तत्राभावाद्व्यलीकता नाशङ्कनीया आकारमात्रे परमार्थत्वात्सर्वभावानां । तस्य च स्थापनायां वस्त्वास्तित्वाद् बुद्धिपरिग्रहेण वा सद्‌भावात । इन्द्रादिसंज्ञा स्वप्रवृत्तिनिमित्तजातिगुणक्रियाद्रव्यनिरपेक्षा तच्छब्दाभिधेयसम्बन्धपरिणतिमात्रेण वस्तुनः प्रवृत्ता नामसत्यं । रूपग्रहणं उपलक्षणं प्रवृत्तिनिमित्तानां नीलमुत्पलं, धवलो हि मृगलाञ्छन इत्येवमादिक रूपसत्यं । सम्बन्ध्यन्तरापेक्षाभिव्यङ्ग्य च वस्तुस्वरूपालम्बनं दीर्घो ह्रस्व इत्येवमादिकं प्रतीत्यसत्यं । वस्तुनि तथाऽप्रवृत्तेऽपि तथाभूतकार्ययोग्यतादर्शनात् सम्भावनया वृत्तं सम्भावनासत्यं । अपि दोर्भ्यां समुद्रं तरेत्, शिरसा पर्वतं भिन्द्यात् इत्यादि । वर्तमानकाले स परिणामो यद्यपि नास्ति तथाप्यतीतानागत-

---

जनपद सत्य है । जैसे गमन करे वह गाय है गर्जन करे वह गज—हाथी है । यद्यपि गमनरूप और गर्जनरूप अर्थ नहीं होनेपर भी इन अर्थोंकी प्रवृत्तिमें निमित्तभूत वाणी जनपद सत्य है । अर्थात् जैसे गाय और गजशब्द गमन और गर्जन अर्थको लेकर निष्पन्न हुए हैं और उनका संकेत गाय और गजमें किया गया है । गाय बैठी हो तब भी उसे गाय कहते हैं । इस प्रकार प्रत्येक देशकी भाषामें शब्द जनपद सत्य हैं ।

सम्मति शब्दसे आकार विशेषकी स्वीकृति कही जाती है । जैसे गजेन्द्र नरेन्द्र इत्यादि शब्द शुभलक्षणके योगसे व्यवहृत होते हैं । किन्हींमें स्वयं शुभलक्षण पाये जानेसे उन्हें इन्द्र या ईश्वरके रूपमें स्वीकार करके किसी गजको गजेन्द्र या मनुष्यको सुरेन्द्र कहना सम्मति सत्य है । किसी तदाकार या अतदाकार वस्तुमें अर्हन्त, इन्द्र या स्कन्दकी स्थापना करके उसे अर्हन्त आदि कहना स्थापना सत्य है । मूर्तिमें स्थापित अर्हन्त या इन्द्रमें अर्हन्तशब्दका अर्थ अरि—कर्मशत्रुका हनन करना या कर्मरजका हनन करना और इन्द्र शब्दका अर्थ इन्दन क्रिया नहीं पाई जाती, इसलिए उसमें असत्यपनेकी आशंका नहीं करनी चाहिए । क्योंकि सभी पदार्थ आकारमात्रमें परमार्थ माने जाते हैं । और वह आकार तदाकार स्थापनामें वस्तुरूपसे रहता है अथवा अतदाकार स्थापनामें उसमें उस प्रकारकी बुद्धि कर ली जाती है ।

इन्द्रादि नामोंकी प्रवृत्तिमें निमित्त जाति, गुण, क्रिया और द्रव्यकी अपेक्षा न करके जो उस शब्दका अपने वाच्यार्थके साथ सम्बन्ध है केवल उसी दृष्टिसे रखा वस्तुका इन्द्रादि नाम नामसत्य है । रूपका ग्रहण शब्दकी प्रवृत्तिके निमित्तोंका उपलक्षण है । जैसे कमलका नीला रूप देखकर नीलकमल कहना या चन्द्रमा सफेद कहना रूप सत्य है । अन्य वस्तुके सम्बन्धसे व्यक्त होनेवाला वस्तुका स्वरूप प्रतीत्य सत्य है जैसे किसीको लम्बा या ठिगना कहना ।

वस्तुमें वैसा नहीं होने पर भी उस प्रकारके कार्यकी योग्यता देखकर जो संभावना मूलक वचन है वह संभावना सत्य है । जैसे कहना अमुक व्यक्ति हाथोंसे समुद्र पार कर सकता है या सिरसे पर्वत तोड़ सकता है । इत्यादि । यद्यपि वर्तमान कालमें वस्तुमें वह परिणाम नहीं है तथापि

---

१. णत्थमो–आ० । णत्थादी–मु० । णाकामी–मूलारा० ।

परिणामा[1] इवमेव द्रव्यमिति कृत्वा प्रवृत्तानि वचांसि ओदनं पच, कटं कुर्वित्येवमादीनि व्यवहारसत्यं। अहिंसालक्षणो भावः पाल्यते येन वचसा तद्भावसत्यं निरीक्ष्य स्वप्रवृत्ताचारो भवेत्येवमादिकं। पल्योपमसागरोपमादिकमुपमा सत्यम् ॥११८७॥

मृषादिवचनत्रयलक्षणं कथयन्ति—

तव्विवरीदं मोसं तं उभयं जत्थ सच्चमोसं तं।
तव्विवरीया भासा असच्चमोसा हवे दिट्ठा ॥११८८॥

'तव्विवरीदं' सत्यविपरीतं। 'मोसं' मृषा। 'असदभिधानमनृतं' [त० सू० ७।] इति वचनात्। मिथ्याज्ञानमिथ्यादर्शनयोरसंयमस्य वा निमित्तं वचनमसदभिधानं अप्रशस्तं तत्सत्यविपरीतं। 'तं उभयं' तत्सत्यमनृतं च उभयं। 'जत्थ' यस्मिन् वाक्ये। 'तं' तद्वाक्यं। 'सच्चमोसं' सत्यमृषेत्युच्यते। 'तव्विवरीया भासा' सत्यानृताभ्यामन्यपृथग्भूता। 'भासा' भाषा वचनं 'असच्चमोसा' असत्यमृषेति। 'हवे' भवेत्। 'दिट्ठा' दृष्टा पूर्वागमेषु। एकान्तेन न सत्या नापि मृषा नोभयमिश्रा किंतु जात्यन्तरं यथा वस्तु नैकान्तेन नित्यं नापि अनित्यं नापि सर्वथा एकान्तयोः समुच्चय किंतु कथंचिद्रूपान्नित्यानित्यात्मकं। एवमियं भारती ॥११८८॥

सा नवप्रकारा तस्याश्च भेदा[2] इयन्त इति गाथाद्वयेनाचष्टे—

आमंतणि आणवणी जायणि संपुच्छणी य पण्णवणी।
पच्चक्खाणी भासा भासा इच्छाणुलोमा य ॥११८९॥

अतीत और अनागत परिणाम रूप यही द्रव्य है ऐसा मानकर किया गया वचन व्यवहार सत्य है जैसे भात पकाओ या चटाई बुनो। ये दोनों परिणाम वर्तमानमें नहीं हैं क्योंकि चावल पकने पर भात बनेगा और बुनने पर चटाई होगी। फिर भी अनागत परिणामकी अपेक्षा इनका व्यवहार होता है। जिस वचनके द्वारा अहिंसा रूप भाव पाला जाता है वह वचन भाव सत्य है। जैसे देखकर सावधानतापूर्वक प्रवृत्ति करो आदि। पल्योपम, सागरोपम आदिका जो कथन आगममें कहा है वह उपमा सत्य है ॥११८७॥

असत्य आदि तीन वचनोंका लक्षण कहते हैं—

गा०-टी०—सत्यसे विपरीत वचन असत्य है। तत्त्वार्थ सूत्रमें कहा है 'असत् कहना झूठ है।' जो वचन मिथ्याज्ञानमें, मिथ्याश्रद्धानमें और असंयममें निमित्त होता है वह वचन असत् कथन रूप होनेसे अप्रशस्त है। अतः सत्यसे विपरीत है। जो वचन सत्य और असत्य दोनों रूप होता है वह वचन सत्यमृषा है। जो वचन सत्य, असत्य और सत्य असत्यसे विपरीत होता है उसे पूर्व आगमोंमें असत्यमृषा कहा है। वह वचन न तो एकान्तसे सत्य होता है न एकान्तसे असत्य होता है और न सत्यासत्य होता है किन्तु जात्यन्तर होता है। जैसे वस्तु न तो एकान्तसे नित्य है, न अनित्य है और न सर्वथा नित्य और सर्वथा अनित्य है, किन्तु कथंचित् नित्यानित्य है। उसी प्रकार यह असत्यमृषा वचन भी होता है ॥११८८॥

उस असत्यमृषा वचनके नौ भेद दो गाथाओंसे कहते हैं—

---

१. माम्प्रति इद-मु०। भिन्नेयांगं-आ० मु०। २. दा यत इति-अ०। दा य इति-आ०।

'आमंतणी' यया वाचा परोऽभिमुखीक्रियते सा आमन्त्रणी। हे देवदत्त इत्यादि। अगृहीतसंकेतं नाभिमुखी करोति इति न सत्यैकान्तेन गृहीतमभिमुखी करोति तेन न मृषा गृहीतागृहीतसंकेतयोः प्रतीतिनिमित्तमनिमित्तं चेति द्वयात्मकता। स्वाध्यायं कुरुत, विरमतासंयमात् इत्यादिका अनुशासनवाणी आणवणी। चोदितायाः क्रियायाः करणमकरणं चापेक्ष्य नैकान्तेन सत्या न मृषैव वा। 'जायणी' ज्ञानोपकरणं पिच्छादिकं वा भवद्भिर्मह्यं दातव्यं इत्यादिका याचनी। दातुरपेक्षया पूर्ववदुभयरूपा। निरोध[1] वेदनास्ति भवतो न वेति प्रश्नवाक् 'संपुच्छणी'। यद्यस्ति सत्या न चेदितरा इति। वेदनाभावाभावमपेक्ष्य प्रवृत्तेरुभयरूपता। 'पण्णवणी' नाम धर्म्मकथा। सा बहून्निर्दिश्य प्रवृत्ता कैश्चिन्मनसि करणमितरैरकरणं चापेक्ष्य द्विरूपा। 'पच्चक्खाणी' नाम केनचिद्गुरुमननुज्ञाप्य इदं क्षीरादिकं इयन्तं कालं मया प्रत्याख्यातं इत्युक्तं कार्यान्तरमुद्दिश्य[2] तत्कुर्वित्युदितं गुरुणा प्रत्याख्यानावधिकालो[3] न पूर्ण इति नैकान्ततः सत्यता गुरुवचनात्प्रवृत्तो न दोषायेति न मृषैकान्त.। 'इच्छानुलोमा य' ज्वरितेन पृष्टं घृतशर्करामिश्रं क्षीरं न शोभनमिति। यदि परो ब्रूयात् शोभनमिति माधुर्यादि-

गा०—आमन्त्रणी, आणवणी, याचनी, संपुच्छणी, प्रज्ञापनी, प्रत्याख्यानी और इच्छानुलोमा।

टी०—जिस वचनसे दूसरेको बुलाया जाता है वह आमंत्रणी भाषा है। जैसे हे देवदत्त! यह वचन जिसने संकेत ग्रहण नहीं किया उसे बुलाने वालेके अभिमुख नहीं करता अर्थात् वह बुलाने पर नहीं आता। इसलिए यह वचन सत्य भी नहीं है और जिसने सर्वथा संकेत ग्रहण किया है उसे अभिमुख करता है इसलिए असत्य भी नहीं है। इस तरह यह वचन गृहीत संकेत वालेको तो प्रतीति करानेमें निमित्त होता है किन्तु जिसने संकेत ग्रहण नहीं किया उसको प्रतीति करानेमें निमित्त नहीं होनेसे दो रूप है। 'स्वाध्याय करो, असंयमसे विरत होओ,' इत्यादि अनुशासन वचन आणवणी है। जो काम करनेकी प्रेरणा की गई है वह करने या करनेकी अपेक्षा यह वचन न तो एकान्तसे सत्य है और न एकान्तसे असत्य है। आप मुझे ज्ञानके उपकरण अथवा पीछी आदि प्रदान करें, इत्यादि वचन याचनी भाषा है। यह भी दाताकी अपेक्षा पहलेकी तरह न तो सर्वथा सत्य है और न सर्वथा असत्य है क्योंकि माँगने पर दाता दे भी सकता है और नहीं भी दे सकता।

आपकी वेदना—कष्ट रुका या नहीं? या निरोध—जेलमें आपको कष्ट है या नहीं? इस प्रकार पूछना संपृच्छनी भाषा है। यदि वेदना है तो सत्य है, नहीं है तो मिथ्या है। इस प्रकार वेदनाके भाव और अभावकी अपेक्षासे प्रवृत्त होनेसे यह वचन उभयरूप है।

धर्मकथाको पण्णवणी या प्रज्ञापनी कहते हैं। यह बहुतसे श्रोताओंको लक्ष करके होती है अतः कुछ तो अपने मनमें उसका पालन करनेका विचार करते हैं और कुछ नहीं करते। इस अपेक्षा यह भी उभयरूप है। प्रत्याख्यानी भाषा इस प्रकार है—किसीने गुरुसे निवेदन किये बिना यह दूध आदि मैंने इतने कालतक त्यागा' ऐसा नियम किया। किसी अन्य कार्यको लक्ष करके गुरुने कहा ऐसा करो। उसके त्याग करनेकी मर्यादाका काल पूरा नहीं हुआ, इसलिए उसका प्रत्याख्यान सर्वथा सत्य नहीं है और गुरुकी आज्ञासे उसने त्यागी हुई वस्तुमें प्रवृत्ति की इसलिए दोष भी न होनेसे सर्वथा असत्य भी नहीं है।

इच्छानुलोमा भाषा इस प्रकार है—किसी ज्वरके रोगीने पूछा—घी और शक्कर मिला

१. धो वेदनाया अस्ति-आ०। निरोधो वेदनास्ति-ज० २ श्य तद्गुरुहितं-ज० श्य तद्गुर्हितं गु-अ०। श्य तद्गुर्हितं ग-आ०। ३. कालेन पूर्व इति-अ०। कालो न पूर्व इति-ज०।

प्रशस्यगुणसद्भावं ज्वरवृद्धिनिमित्ततां चापेक्ष्य न शोभनमिति वचो मृषैकान्ततो नापि सत्यमेवेति ह्युभयात्मकता ॥११८९॥

संसयवयणी य तहा असच्चमोसा य अट्ठमी भासा।
णवमी अणक्खरगदा असच्चमोसा हवदि णेया ॥११९०॥

'संसयवयणी' किमयं स्थाणुरुत पुरुष इत्यादिका द्वयोरेकस्य सद्भावमितरस्याभावं चापेक्ष्य द्विरूपता। 'अणक्खरगदा' अङ्गुलिस्फोटादिध्वनिः कृताकृतसंकेतपुरुषापेक्षया प्रतीतिनिमित्ततामनिमित्ततां च प्रतिपद्यते इत्युभयरूपा ॥११९०॥

उग्गमउप्पायणएसणाहिं पिंडमुवधिं सेज्जं च।
सोधिंतस्स य मुणिणो विसुज्झए एसणासमिदी ॥११९१॥

'उग्गमउप्पायणएसणाहिं' उद्गमोत्पादनैषणादोषरहितं भक्तमुपकरणं वसतिं च गृह्णत एषणासमितिर्भवतीति सूत्रार्थ। दशवैकालिकटीकायां श्रीविजयोदयायां प्रपञ्चिता उद्गमादिदोषा इति नेह प्रतन्यन्ते ॥११९१॥

आदाननिक्षेपणसमितिनिरूपणा गाथा—

सहसाणाभोगिददुप्पमज्जिय अपच्चवेसणा दोसो।
परिहरमाणस्स हवे समिदी आदाणणिक्खेवो ॥११९२॥

'सहसाणाभोगिद' आलोकनप्रमार्जने कृत्वा आदानं निक्षेपं इत्येको भङ्गः। अनालोक्य प्रमार्जनं कृत्वा

दूध उत्तम नहीं है ? यदि दूसरा कहे कि माधुर्य आदि प्रशस्त गुणोकी अपेक्षा तो उत्तम है किन्तु ज्वरको बढ़ानेवाला होनेसे उत्तम नही है तो इस प्रकारके वचन न सर्वथा असत्य है और न सर्वथा सत्य हैं किन्तु दोनो रूप होनेसे उभयात्मक है। यहाँ उभयात्मकसे इन वचनोको सत्य और असत्यरूप नहीं समझना चाहिए। किन्तु सत्य भी नही और असत्य भी नहीं अर्थात् अनुभयरूप समझना चाहिए ॥११८९॥

गा०—आठवी असत्यमृषा भाषा संशय वचनो है। जैसे यह स्थाणु है या पुरुष। दोनोमेंसे एकके सद्भाव और दूसरेके अभावकी अपेक्षा यह वचन उभयरूप है। और नौवीं असत्यमृषा भाषा अनक्षरात्मक भाषा है। जैसे अंगुलि चटकाने आदिका शब्द। जिस पुरुषने संकेत ग्रहण किया है उसे तो ध्वनिसे प्रतीति होती है दूसरेको नहीं होती। इस तरह यह वचन उभयरूप है ॥११९०॥

अब एषणा समितिका कथन करते हैं—

गा०—उद्गम, उत्पादन और एषणा दोषोंसे रहित भोजन, उपकरण और वसतिको ग्रहण करनेवाले मुनिकी एषणा समिति निर्मल होती है ॥११९१॥

आदाननिक्षेपण समितिका कथन करते है—

गा०-टी०—विना देखे और विना प्रमार्जन किये पुस्तक आदिका ग्रहण करना या रखना

आदानं निक्षेपो वेति द्वितीयो भङ्गः । आलोक्य दुःप्रमृष्टं इति तृतीयः । आलोकितं प्रमृष्टं च न पुनरालोकितं शुद्धं न शुद्धं वेति चतुर्थो भङ्गः । एतद्दोषचतुष्टयं परिहरतो भवति आदाननिक्षेपणसमितिः ॥११९२॥

एदेण चेव पदिट्ठावणसमिदीवि वण्णिया होदि ।
वोसरणिज्जं दव्वं थंडिल्ले वोसरिंतस्स ॥११९३॥

'एदेण चेव' आदाननिक्षेपविषयवत्नकथनेन । 'पदिट्ठावणसमिदीवि वण्णिया होदि' प्रतिष्ठापनसमिति-र्वर्णिता भवति । 'वोसरणिज्जं' परित्यक्तव्यं मूत्रपुरीषादिकं मलं । 'थंडिल्ले वोसरिंतस्स' स्थंडिले निर्जन्तुके, निश्छिद्रे, समे व्युत्सृजतः ॥११९३॥

एदाहिं सदा जुत्तो समिदीहिं जगम्मि विहरमाणो हु ।
हिंसादीहिं ण लिप्पइ जीवणिकायाउले साहू ॥११९४॥

'एदाहिं समिदीहिं' एताभिः । 'सदा जुत्तो' सदा युक्तः । 'जगम्मि विहरमाणो हु' जगति विचरन्नपि । कीदृशी ? 'जीवणिकायाउले' षड्जीवनिकायाकीर्णे । 'हिंसादीहिं' हिंसादिभिः । 'ण लिप्पइ' न लिप्यते साधुः । आदिग्रहणेन परितापन, संघट्टनं, अङ्गन्यूनताकरणादिपरिग्रहः । समितिषु प्रवर्तमानः प्रमादरहितः । 'प्रमत्तयोगात्प्राणव्यपरोपणं हिंसेत्युच्यते' । हिंसादिसहितानि कर्माणि हिंसादिशब्देनोच्यन्ते । कार्ये कारणशब्द-प्रवृत्तिः [1]प्रतीततरत्वात् ॥११९४॥

यद्यपि विवर्जननिमित्तगुणान्वित तत्र प्रवर्तमानमपि तेन न लिप्यते यथा स्नेहगुणान्वित तामरसपत्र

सहसा नामक प्रथम दोष है। बिना देखे प्रमार्जन करके पुस्तक आदिको ग्रहण करना या रखना अनाभोगित नामक दूसरा दोष है। देखकर भी सम्यक् प्रतिलेखना न करके पुस्तक आदिको ग्रहण करना या रखना दुष्प्रमृष्ट नामक तीसरा दोष है। देखा भी और प्रमार्जन भी किया किन्तु यह शुद्ध है या अशुद्ध, यह नही देखा यह चतुर्थ अप्रत्यवेक्षण नामक दोष है। इन चारो दोषोको जो दूर करता है उसके आदान निक्षेपण समिति होती है ॥११९२॥

प्रतिष्ठापन समिति कहते हैं—

गा०—आदान और निक्षेप विषयक सावधानताका कथन करनेसे प्रतिष्ठापन समितिका कथन हो जाता है। त्यागने योग्य मूत्र विष्ठा आदिको जन्तुरहित और छिद्ररहित समभूमिमे त्यागना प्रतिष्ठापन समिति है ॥११९३॥

गा०-टी०—इन पाँच समितियोंका सदा पालन करनेवाला मुनि छ प्रकारके जीवनिकायो-से भरे हुए लोकमे गमनागमन आदि करता हुआ भी हिंसा आदिसे लिप्त नही होता। 'आदि' शब्दसे छहकायके जीवोको कष्ट देना, उनका परस्परमे सघट्टन करना, उनके अग उपागोको छिन्न-भिन्न करना आदि पापोसे लिप्त नही होता। समितियोमे प्रवृत्ति करने हुए मुनि प्रमादसे रहित होता है। और प्रमत्तयोगसे प्राणोंके घातको हिंसा कहा है। हिंसा आदिसे सहित कर्म हिंसा आदि शब्दसे कहे जाते है। क्योंकि कार्यमे कारणशब्दकी प्रवृत्ति अति प्रसिद्ध है। आदान निक्षेपमे निमित्त गुणोसे युक्त मुनि प्रवृत्ति करते हुए भी हिंसा आदि पापसे लिप्त नही होता ॥११९४॥

जैसे चिक्कणगुणसे युक्त कमल नीलमणिके समान निर्मल जलमे सदा रहते हुए भी

१. प्रतीतिमागच्छत् । यदपि–आ० ।

कामनीरुनीरां ।रन्तरकस्यंपि नाम्बुना लिप्यते । निरन्तरनिचितजीवनिकायाकुलेऽपि जगति अप्रमत्तः मुनिर्न लिप्यते[1] अप्रमत्ततया प्रवृत्त पञ्चसु समितिष्विति कथयति—

पउमणिपत्तं व जहा उदयेण ण लिप्पदि सिणेहगुणजुत्तं ।
तह समिदीहिं ण लिप्पइ साधू काएसु इरियंतो ॥११९५॥

'पउमणिपत्तं' इत्यनया गाथया—पद्मपत्रं यथा नोदकेन विलिप्यते स्नेहगुणसमन्वित । तथा कायेसु शरीरेषु प्राणभृतां प्रवर्तमानोऽपि न लिप्यते साधु समितिभिर्हेतुभूताभि. ॥११९५ ॥

सरवासे वि पडंते जह दढकवचो ण विज्झदि सरेहिं ।
तह समिदीहिं ण लिप्पइ साधू काएसु इरियंतो ॥११९६॥

'सरवासे वि पडते' शरवर्षेऽपि पतति सति च रणाङ्गणे यथा दृढकवचो न शरैर्भिद्यते, यथा समितिभिर्हेतुभूताभिन लिप्यते कायेषु वर्तमानो मुनिः ॥११९६॥

जत्थेव चरइ बालो परिहारण्हू वि चरइ तत्थेव ।
वज्झदि पुण सो बालो परिहारण्हू वि मुच्चइ सो ॥११९७॥

'जत्थेव चरइ बालो' यत्रैव क्षेत्र चरति जीवपरिहारक्रमानभिज्ञ । परिहारण्हू वि' जीवबाधापरिहारक्रमज्ञोऽपि तत्रैव चरति । तथापि 'वज्झदि सो पुण बालो' बध्यते पुनरसौ ज्ञानबालश्चारित्रबालश्चासौ । 'परिहारण्हू' परिहारज्ञ । 'मुच्चइ' मुच्यत कर्मलेपात् ॥११९७॥

उक्तमर्थमुपसहरत्युत्तरगाथया—

तम्हा चेट्ठिदुकामो जइया तइया भवाहि तं समिदो ।
समिदो हु अण्णमण्णं णादियदि खवेदि पोराणं ॥११९८॥

जलसे लिप्त नही होता । पाँचों समितियोंमे अप्रमादीरूपसे प्रवृत्ति करनेवाला मुनि भी निरन्तर जीव निकायोसे भरे हुए जगत्में गमनागमन करते हुए पापसे लिप्त नही होता । यह कहते हैं—

गा०—जैसे स्नेह गुणसे युक्त कमलपत्र जलसे लिप्त नही होता । उसी प्रकार प्राणियोंके शरीरोके मध्यमेसे गमनागमन करते हुए भी साधु समितिका पालन करनेमे पापसे लिप्त नही होता ॥११९५॥

गा०—जैसे दृढ कवचसे युक्त योद्धा युद्धभूमिमे बाणोकी वर्षा होते हुए भी बाणोसे नही छिदता । उसी प्रकार षट्कायके जीवोंके मध्यमें विचरण करता हुआ भी समितियोंके कारण हिंसा आदिसे लिप्त नही होता ॥११९६॥

गा०—जीवोंकी हिंसासे बचनेके उपायोंको न जाननेवाला जिस क्षेत्रमें विचरण करता है, जीवोंकी हिंसासे बचनेके उपायोंको जाननेवाला भी उसी क्षेत्रमें विचरण करता है । तथापि वह ज्ञान और चारित्रमें बालकके समान अज्ञ तो पापसे बद्ध होता है किन्तु उपायोंको जाननेवाला पापसे लिप्त नही होता बल्कि उससे मुक्त होता है ॥११९७॥

आगे उक्त कथनका उपसंहार करते हैं—

---

१ 'यते अथ प्रमत्ततया प्रमत्त प–आ० ज० ।

यस्मात्समितिषु प्रवर्तमानो न बध्यते, पापेन मुच्यते। असमितस्तु महता बध्यते कर्मसमूहेन 'तम्हा' तस्मात्। 'चेट्ठिदुकामो' गमनमाषणाद्यभिलाषी। 'जइया जइया' यदा तदा। 'तं' भवान् 'समिदो भवाहि' समितिपरो भवेति निर्यापकसूरिराह क्षपकं। 'समिदो खु' समितः सम्यक्प्रवृत्तः ईर्यादिषु। 'अण्णमण्णं कम्मं' अन्यत् अन्यत्। प्रत्यग्रं। 'णादियदि' नैवादत्ते। 'खवेदि पोराणं' प्राक्तन च कर्म क्षपयति निर्जरति ॥११९८॥

एदाओ अट्ठपवयणमादाओ णाणदंसणचरित्तं।
रक्खंति सदा मुणिणो मादा पुत्तं व पयदाओ ॥११९९॥

'एदाओ अट्ठपवयणमादाओ' एता अष्टप्रवचनमातृकाः 'पयदाओ' प्रयता। 'णाणदंसणचरित्तं रक्खंति' समीचीनज्ञानदर्शनचारित्राणि पालयन्ति सदा मुनेः। 'मादा पुत्तं व जधा' जननी पुत्रं यथा। प्रयता माता पुत्रं पालयत्यपायस्थानेभ्यः ॥११९९॥

व्रतभावनानिरूपणायोत्तरप्रबन्धः। त्रयोदशविधं चारित्रं अखण्डमाराधयतश्चारित्राराधना। तत्र व्रतानां स्थैर्यं सम्पादयितुं भावना एकैकस्य पञ्च पञ्चाभिहितास्तत्रेमा अहिंसाव्रतभावना इति बोधयति।

एषणासमितिर्निरूप्यते—

एसणणिक्खेवादाणिरियासमिदी तहा मणोगुत्ती।
आलोयभोयणं वि य अहिंसाए भावणा होंति ॥१२००॥

'एसणणिक्खेवादाणिरियासमिदी' एसणसमिदी एषणासमितिरादाननिक्षेपणासमितिः, ईर्यासमितिस्तथा मनोगुप्तिः। 'आलोयभोयणं च' आलोकभोजनं च। 'अहिंसाए' अहिंसाव्रतस्य। 'भावणा' भावनाः। 'होंति' भवन्ति।

भिक्षाकाल, बुभुक्षाकालोऽवग्रहकालश्चेति कालत्रयं ज्ञातव्यं। ग्रामनगरादिषु इयता कालेन आहार-

---

गा०-टी०—यतः समितियोंका पालक पापसे लिप्त नहीं होता किन्तु उससे छूटता है और समितिका पालन न करनेवाला महान् कर्मसमूहसे बँधता है अतः जब तुम गमन करना या बोलना चाहो तो समितिमें तत्पर रहो। ऐसा निर्यापकाचार्य क्षपकसे कहते हैं। क्योंकि ईर्या आदिमें सम्यक् प्रवृत्ति करनेवाला नवीन-नवीन कर्मोंका बन्ध नहीं करता और पूर्वमें बाँधे कर्मोंकी निर्जरा करता है ॥११९८॥

गा०—जैसे सावधान माता पुत्रकी अनिष्टोंसे रक्षा करके उसका पालन करती है। वैसे ही सम्यक्‌रूपसे पालित ये आठ प्रवचन मातायें मुनिके सम्यग्ज्ञान सम्यग्दर्शन और सम्यक्चारित्र की रक्षा करती हैं ॥११९९॥

आगे व्रतोंकी भावनाओंका कथन करते हैं। जो तेरह प्रकारके चारित्रकी निर्दोष आराधना करता है उसके चारित्राराधना होती है। उनमेंसे व्रतोंको स्थिर करनेके लिए एक-एक व्रतकी पाँच-पाँच भावना कही हैं। उनमेंसे अहिंसाव्रतकी भावना कहते हैं—

गा०-टी—एषणा समिति, आदान निक्षेपण समिति, ईर्यासमिति, मनोगुप्ति और आलोक भोजन ये पाँच अहिंसाव्रतकी भावना हैं। उनमेसे एषणा समिति कहते है—भिक्षाकाल, बुभुक्षा-काल और अवग्रहकाल ये तीन काल जानना चाहिए। अमुक मासोंमें ग्राम नगर आदिमे अमुक

निष्पत्तिर्भवति, अमीषु मासेषु, अस्य वा कुलस्य वायं भोजनकाल इच्छायाः प्रमाणादिना भिक्षाकालोऽवगन्तव्यः । क्षुधा मम तीव्रा मन्दा वेति स्वशरीरव्यवस्था च परीक्षणीया । अयमवग्रहः पूर्वं गृहीत एवंभूत आहारो मया न भोक्तव्यः इति । अद्यायमवग्रहो ममेति मीमांसा कार्या । तदनन्तरं पुरतो युगान्तरमात्रभूभागावलोकनपरः अद्रुतं, अविलम्बितं, असंभ्रान्तं व्रजेत् प्रलम्बबाहुरविकृष्टचरणन्यासो निर्विकार ईषदवनतोत्तमाङ्गः अकर्दमेनानुदकेन अत्रसहरितबहुलेन वर्त्मना । दृष्ट्वा तु खरान्, करभान्, बलीवर्दान्, गजांस्तुरगान्महिषान्सारमेयान्कलहकारिणो वा मनुष्यान्दूरतः परिहरेत् । पक्षिणो मृगाश्चाहारकालोद्यता वा यथा न बिभ्यति, यथा वा स्वमाहारं मुक्त्वा न व्रजन्ति तथा यायात् । मृदुना प्रतिलेखनेन कृतप्रमार्जनो गच्छेद्यदि निरन्तरासुसमाहितफलादिकं व्रजतो भवेत् मार्गान्तरमस्ति भिन्नवर्णां वा भूमिं प्रविशंस्तद्वर्णभूभाग एव अङ्गप्रमार्जनं कुर्यात् । तुषगोमयभस्मबुसपलालनिचयं, दलोपलफलादिकं च परिहरेत् । निन्द्यमानो न कुप्येत्, पूज्यमानोऽपि न तुष्येत् । न गीतनृत्यबहुलं, उच्छ्रितपताकं वा गृहं प्रविशेत् । तथा मत्तानां गृहं न प्रविशेत् । सुरापण्याङ्गनालोकगर्हितकुलं वा, यज्ञशालां, दानशाला, विवाहगृह, वार्यमाणानि, रक्ष्यमाणानि; अमुक्तानि च गृहाणि परिहरेत् । दरिद्रकुलानि उत्क्रमाढ्यकुलानि न प्रविशेत् । ज्येष्ठाल्पमध्यानि सममेवाटेत् । द्वारमर्गलं कवाटं वा नोद्घाटयेत् । बालवत्सं एलकं, शुनो वा नोल्लङ्घयेत् । पुष्पै. फलैर्बीजैर्वाविकीर्णां भूमिं वर्जयेत् तदानीमेव अवलिप्तां । भिक्षाचरेषु परेषु लाभार्थिषु स्थितेषु तद्गेह न प्रविशेत् । तथा कुटुम्बिषु व्यग्रविषण्णदीनमुखेषु च

समय भोजन बनता है, अथवा अमुक कुलका या अमुक मुहालका अमुक समय भोजनका है। इस प्रकार इच्छाके प्रमाण आदिसे भिक्षाका काल जानना चाहिए। तथा मेरी भूख आज मन्द है या तीव्र है इस प्रकार अपने शरीरकी स्थितिकी परीक्षा करनी चाहिये। मैंने पहले यह नियम लिया था कि इस प्रकारका आहार मै नही लूँगा और आज मेरा यह नियम है इस प्रकार विचार करना चाहिए। उसके पश्चात् आगे केवल चार हाथ प्रमाण जमीन देखते हुए न अधिक शीघ्रतासे, न रुक-रुककर किसी प्रकारके वेगके बिना गमन करना चाहिए। गमन करते समय हाथ लटकते हुए हों, चरण निक्षेप अधिक अन्तरालसे न हो, शरीर विकाररहित हो, सिर थोड़ा झुका हुआ हो, मार्गमे कीचड़ और जल न हो तथा त्रसजीवों और हरितकायकी बहुलता न हो। यदि मार्गमें गधे, ऊँट, बैल, हाथी, घोड़े, भैंसे, कुत्ते अथवा कलह करनेवाले मनुष्य हों तो उस मार्गसे दूर हो जाये। पक्षी और खाते पीते हुए मृग भयभीत न हों और अपना आहार छोड़कर न भागें, इस प्रकारसे गमन करे। आवश्यक होनेपर पीछीसे अपने शरीरकी प्रतिलेखना करे। यदि मार्गमे आगे निरन्तर इधर उधर फलादि पड़े हों, या मार्ग बदलता हो या भिन्न वर्णवाली भूमिमें प्रवेश करना हो तो उस वर्णवाले भूमिभागमें ही पीछीसे अपने शरीरको साफ कर लेना चाहिये। तुष, गोबर, राख, भुस, और घासके ढेरसे तथा पत्ते, फल, पत्थर आदिसे बचते हुए चलना चाहिये, इनपर पैर नहीं पड़ना चाहिये। कोई निन्दा करे तो क्रोध न करे और पूजा करे तो प्रसन्न न हो। जिस घरमें गाना नाचना होता हो, झण्डियां लगी हों उस घरमें न जावे। तथा मतवालोंके घरमें न जावे। शराबी, वेश्या, लोकमें निन्दित कुल, यज्ञशाला, दानशाला, विवाहवाला घर तथा जिन घरोंमें जानेकी मनाई हो, आगे रक्षक खड़ा हो, सब कोई न जा सकता हो ऐसे घरोंमें नहीं जावे। दरिद्रकुलोंमें और आचारहीन सम्पन्नकुलोंमें भी प्रवेश न करे। बड़े छोटे और मध्यम गृहोंमें एक साथ ही भ्रमण करे। द्वारपर यदि सांकल लगी हो या कपाट बन्द हों तो उन्हे खोलें नहीं। बालक, बछड़ा, मेढ़ा और कुत्तेको लाँघकर न जावे। जिस भूमिमें पुष्प, फल और बीज फैले हों उसपरसे न जावे। तत्कालकी लिपी भूमिपर न जावे। जिस घरपर अन्य भिक्षार्थी

सत्सु नो तिष्ठेत् । भिक्षाचर भिक्षामार्गणभूमिमतिक्रम्य न गच्छेत् । याच्ञामव्यक्तस्वनं वा स्वागमननिवेदनार्थं न कुर्यात् । विद्युदिव स्वां तनु[1] च दर्शयेत्' कोऽस्मत्भिक्षां दास्यतीति अभिसंधि न कुर्यात् । रहस्यगृहं, वनगृहं, कदलीलतागुल्मगृहं, नाट्यगान्धर्वशालाश्च अभिनन्द्यमानोऽपि न प्रविशेत् । बहुजनप्रचारे प्राणिरहिते अशुच्यपरोपरोधवर्जिते, अनिर्गमनप्रवेशमार्गे गृहिभिरनुज्ञातस्तिष्ठेत् । समे विच्छिद्रे, भूभागे चतुरङ्गुलपादान्तरो निश्चलः कुड्यस्तम्भादिकमनवलम्ब्य तिष्ठेत् । छिद्रद्वार कवाट, प्राकारं वा न पश्येत् चोर इव । दातुरागमनमार्गं अवस्थानदेशं, कडुच्छकभाजनादिकं च शोधयेत् । स्तनं प्रयच्छन्त्या, गर्भिण्या वा दीयमानं न गृह्णीयात् । रोगिणा, अतिवृद्धेन, बालेनोन्मत्तेन, पिशाचेन, मुग्धेनान्धेन, मूकेन, दुर्बलेन, भीतेन, शङ्कितेन, अत्यासन्नेन[2], दूरेण, लज्जाव्यावृतमुख्या, आवृतमुख्या, उपानदुपरिन्यस्तपादेन वा अनेनोन्नतदेशावस्थितेन वा दीयमानं न गृह्णीयात् । न खण्डेन भिन्नेन वा कडकच्छुकेन दीयमानं कपालोच्छिष्टभाजने पद्मकदलीपत्रादिभाजने निक्षिप्य दीयमानं वा मांसं, मधु, नवनीतं, फलं [3]अदारितं, मूलं, पत्रं, साङ्कुरं, कन्द च वर्जयेत् । तत्संस्पृष्टानि सिद्धान्यपि विपन्नरूपरसगन्धानि, कुथितानि, पुष्पितानि, पुराणानि, जन्तुसंस्पृष्टानि च[4] न दद्यान्न खादेत्, न स्पृशेच्च । उद्गमोत्पादनैषणादोषदुष्टं नाभ्यवहरेत् । नवकोटिपरिशुद्धाहारग्रहणमेषणासमिति. ।

भिक्षाके लिए खड़े हों उस घरमें प्रवेश न करे। जिस घरके कुटुम्बी घबराये हो, उनके मुखपर विषाद और दीनता हो वहाँ न ठहरे। भिक्षार्थियोंके लिए भिक्षा माँगनेकी जो भूमि हो, उस भूमिसे आगे न जावे। अपना आगमन बतलानेके लिए याचना या अव्यक्त शब्द न करे। बिजलीकी तरह अपना शरीरमात्र दिखला दे। कौन मुझे निर्दोष भिक्षा देगा ऐसा भाव न करे। एकान्त घरमें, उद्यान घरमें, केले लता और झाड़ियोसे बने घरमे, नाट्यशाला और गायनशालामें आदरपूर्वक आतिथ्य पानेपर भी प्रवेश न करे। जहाँ बहुतसे मनुष्योंका आना जाना हो, जीव जन्तुसे रहित, अपवित्रता रहित, दूसरेके द्वारा रोक-टोकसे रहित तथा जाने आनेके मार्गसे रहित स्थानमें गृहस्थोंकी प्रार्थनासे ठहरे। सम और छिद्ररहित जमीनपर दोनों पैरोके मध्यमें चार अंगुलका अन्तर रखकर निश्चल खड़ा हो और दीवार स्तम्भ आदिका सहारा न ले। चोरकी तरह द्वारमें लगे कपाटोंके छिद्र अथवा चार दीवारीके छिद्रमेंसे न देखे। दाताके आनेके मार्ग, उसके खड़े होनेके स्थान और करछुल आदि भाजनोकी शुद्धताकी ओर ध्यान रखे। जो स्त्री बालकको दूध पिलाती हो या गर्भिणी हो, उसके द्वारा दिये गये आहारको ग्रहण न करे। रोगी, अतिवृद्ध, बालक, पागल, पिशाच, मूढ, अन्धा, गूँगा, दुर्बल, डरपोक, शंकालु, अति निकटवर्ती, दूरवर्ती मनुष्यके द्वारा, जिसने लज्जासे अपना मुख फेर लिया या मुखपर घूँघट डाला है ऐसी स्त्रीके द्वारा, जिसका पैर जूतेपर रखा है या जो ऊँचे स्थानपर खड़ा है ऐसे व्यक्तियोंके द्वारा दिये गये आहारको ग्रहण नहीं करे। टूटे हुए या फूटे हुए करछुल आदिसे दिया हुआ आहार ग्रहण न करे। तथा कपालमें, जूठे पात्रमें, कमल केले आदिके पत्ते आदिमें रखकर दिया हुआ आहार ग्रहण न करे। मांस, मधु, मक्खन, बिना कटा फल, मूल, पत्र, अंकुरित तथा कन्द ग्रहण न करे। इनसे जो भोजन छू गया हो उसे भी ग्रहण न करे। जिस भोजनका रूप रस गन्ध बिगड़ गया हो, दुर्गन्ध आती हो, फफून्द आ गई हो, पुराना हो गया हो और जीव-जन्तु जिसमें पड़े हों उसे न तो किसीको देना चाहिये, न स्वयं खाना चाहिये और उसे छूनातक

---

१. तनु न च–अ० आ० । २. न्नेन अदूरे–अ० आ० मु० । ३. फलाई हरितं–अ० ।
४. चराद–आ० । च दीयाद–अ० ।

प्रतिलिख्यते यत्र यदादीयते यतस्तदुभयं प्रतिलेखनायोग्यं न वेति विलोक्य पश्चात्कृतमार्जनं पुनरवलोक्य निक्षिपेद् गृह्णीयाद्वा । एषा आदाननिक्षेपणसमितिः । ईर्यासमितिर्निरूपितैव तथा मनोगुप्तिश्च । स्फुटतरप्रकाशावलोकितस्य अन्नस्य भोजनमित्यहिंसाव्रतभावना पञ्च ॥१२००॥

द्वितीयव्रतभावना उच्यन्ते—

कोधभयलोभहस्सपइण्णा अणुवीचिभासणं चेव ।
विदियस्स भावणाओ वदस्स पंचेव ता होंति ॥१२०१॥

क्रोधभयलोभहास्यानां प्रत्याख्यानानि चत्वारि । 'अणुवीचिभासणं चेव' सूत्रानुसारेण च भाषणं । सत्या, मृषा, सत्यमृषा, असत्यमृषा चेति चतस्रो वाचः । तत्र सत्या असत्यमृषा वा व्यवहरणीया नेतरद्द्वयं । क्रोधादीनामसत्यवचनकारणानां प्रत्याख्याने असत्यावाक्परिहृता भवति नान्यथा ॥१२०१॥

तृतीयव्रतभावना उच्यन्ते—

अणणुण्णादग्गहणं असंगबुद्धी अणुण्णवित्ता वि ।
एदावंतियउग्गहजायणमध उग्गहाणुस्स ॥१२०२॥

'अणणुण्णादग्गहणं' तस्य स्वामिभिरननुज्ञातस्य अग्रहणं ज्ञानोपकरणादे । 'असंगबुद्धी अणुण्ण वित्ता वि' परानुज्ञां सम्पाद्य गृहीतेऽपि असक्तबुद्धिता । 'एदावंतिय 'उग्गहजायणं' एतत्परिमाणमिदं भवता दातव्यमिति प्रयोजनमात्रपरिग्रह यावद्याचितो यावद्गृह्णामि इति न बुद्धिः कार्या । 'उग्गहाणुस्स' ग्राह्यवस्तुग्रस्य इव

नहीं चाहिये । जो भोजन उद्गम, उत्पादन और एषणा दोषसे दुष्ट है उसे नही खाना चाहिये । इस तरह नौ कोटियोंसे शुद्ध आहार ग्रहण करना एषणा समिति है । जो वस्तु जिस स्थानपर रखी जाय और जो वस्तु जिस स्थानसे उठाई जाये वे दोनों प्रतिलेखनाके योग्य हैं या नही, यह देखनेके पश्चात् पीछीसे उनको झाडकर पुन देखे और तब रखे या ग्रहण करे । यह आदान निक्षेपण समिति है । ईर्यासमिति पहले कही है और मनोगुप्ति भी कही है । अति स्पष्ट प्रकाशमें देखे गये अन्नका भोजन आलोकभोजन है । ये पाँच अहिंसाव्रतकी भावना हैं ॥१२००॥

दूसरे सत्यव्रतकी भावना कहते हैं—

गा०—क्रोधका त्याग, भयका त्याग, लोभका त्याग, हास्यका त्याग और सूत्रके अनुसार बोलना ये पाँच सत्यव्रतकी भावना हैं । वचनके चार भेद हैं—सत्य, असत्य, सत्य असत्य तथा न सत्य न असत्य । इनमेंसे सत्य और अनुभय वचन बोलने योग्य हैं । शेष दो नहीं बोलने चाहिये । क्रोध आदि झूठ बोलनेमे कारण होते हैं । उनको त्याग देने पर असत्य वचनका त्याग हो जाता है अन्यथा नहीं होता ॥१२०१॥

तीसरे व्रतकी भावना कहते हैं—

गा०-टी०—ज्ञानोपकरण आदिके स्वामीकी स्वीकृतिके बिना ज्ञानोपकरण आदिको स्वीकार न करना, स्वामीकी स्वीकृति मिलने पर स्वीकार की गई वस्तुमें भी आसक्ति न होना, 'आपको इतना देना चाहिये' इस प्रकार जितनेसे प्रयोजन हो उतना ही ग्रहण करना, जितना माँगा है उतना ही ग्रहण करूँगा ऐसी बुद्धि नहीं रखनी चाहिये । जो ग्रहण करने योग्य वस्तुको

ज्ञानसंयमयोरन्यतरस्य साधनमन्तरेण ज्ञानं चारित्रं वा मम न सिध्यतीति तस्य ग्रहणं नानुपयोगि यो [1]याचतश्च है ॥१२०२॥

वज्जणमणणुण्णादगिहप्पवेसस्स गोयरादीसु ।
उग्गहजायणमणुवीचिए तहा भावणा तइए ॥१२०३॥

'वज्जणमणणुण्णादगिहप्पवेसस्स' गृहस्वामिभिरननुज्ञातगृहप्रवेशवर्जनं भावना । 'गोयरादीसु' गोचरादिषु इदं वेश्म प्रविश, अत्र वा तिष्ठेति योऽननुज्ञातो देशस्तस्य अप्रवेशनं । 'उग्गहजायणमणुवीचिए' अवग्रहयाचना सूत्रानुसारेण तृतीये भावनाः ॥१२०३॥

महिलालोयणपुव्वरदिसरणसंसत्तवसहिविकहाहिं ।
पणिदरसेहिं य विरदी भावणा पंच बंभस्स ॥१२०४॥

'महिलालोअणपुव्वरदिसरणसंसत्तवसहिविकहाहिं' स्त्रीणामालोकनं, पूर्वरतस्मरणं, स्त्रीभिराकुला या वसतिः शृङ्गारकथा इत्येतद्विरतयः । 'पणिदरसेहिं य विरदो' बलदर्पकरेभ्यो विरतिश्चेति पञ्च व्रतभावनाः ॥१२०४॥

अपडिग्गहस्स मुणिणो सद्दप्फरिसरसरूवगंधेसु ।
रागद्दोसादीणं परिहारो भावणा हुंति ॥१२०५॥

'अपरिग्गहस्स' परिग्रहरहितस्य । 'मुणिणो' मुनेः । 'सद्दप्फरिसरसरूवगंधेसु' शब्दस्पर्शरसरूपगन्धेषु । मनोज्ञामनोज्ञेषु । 'रागद्दोसादीणं' रागद्वेषयोः परिहारो विषयभेदात्पञ्चप्रकारभावनाः पञ्चमस्य ॥१०२५॥

जानता है कि यह वस्तु ज्ञान और संयममेंसे एकका साधन है इसके बिना मुझे ज्ञान अथवा चारित्रकी सिद्धि नहीं होगी और उसीको ग्रहण करता है, अनुपयोगी वस्तुको ग्रहण नहीं करता । उसीके ये भावना होती है ॥१२०२॥

गा०—गोचरी आदिमें गृहस्वामीके द्वारा अनुज्ञा नहीं दिये घरमें प्रवेश न करना अर्थात् इस घरमें प्रवेश करें, अथवा यहाँ ठहरें इस प्रकारसे जहाँ गृहस्वामीकी अनुज्ञा प्राप्त न हो उस देशमें प्रवेश न करे और शास्त्रके अनुसार ग्रहण करने योग्य वस्तुकी याचना करना, ये पाँच अदत्तादानविरमणव्रत की भावना हैं ॥१२०३॥

गा०—स्त्रियोंकी ओर देखना, पूर्वमें भोगे हुए भोगोंका स्मरण, स्त्रियोंसे युक्त वसतिका, शृङ्गारकथा और इन्द्रियोंमें मद और बल पैदा करनेवाले रस, इन सबसे विरत होना ब्रह्मचर्यव्रत की पाँच भावनाएँ हैं ॥१२०४॥

गा०—परिग्रह रहित मुनिका मनोज्ञ शब्द, स्पर्श, रस, रूप और गन्धमें राग और द्वेषका त्याग अर्थात् मनोज्ञसे राग और अमनोज्ञसे द्वेष न करना विषयोंके भेदसे पाँच प्रकारकी भावना पाँचवें अपरिग्रह व्रत की है ॥१२०५॥

---

१. यो याच्यते स्वार्थे—अ० । यो योग्य लभ्यते—अ० । ग्रहणं, इत्यस्य अग्रे पाठो नास्ति आ० ।

भाव माहात्म्यं कथयति—

ण करेदि भावणाभाविदो खु पीडं वदाण सव्वेसिं।
साधू पासुत्तो समुहदो व किमिदाणि वेदंतो ॥१२०६॥

'**ण करेदि खु**' न करोत्येव। कः? '**भावणाभाविदो**' भावनाभिर्भावितः। '**पीड**' पीडा। '**वदाण**' व्रतानां। '**सव्वेसिं**' सर्वेषां। '**साधू**' साधुः। '**पासुत्तो**' प्रकर्षेण निद्रामुपगत। '**समुहदो व**' समुद्घातं गतो वा। '**किमिदाणि**' किमिदानीं। '**वेदितो**' चेतयमानः ॥१२०६॥

एदाहिं भावणाहिं हु तम्हा भावेहिं अप्पमत्तो तं।
अच्छिद्दाणि अखंडाणि ते भविस्संति हु वदाणि ॥१२०७॥

'**एदाहिं**' एताभिः। '**भावणाहिं**' भावनाभिः। '**तम्हा**' तस्मात्। '**भावेहिं**' भावय। '**अप्पमत्तो तं**' अप्रमत्तस्त्वं। '**अच्छिद्दाणि**' अच्छिद्राणि। नैरन्तर्येण प्रवृत्तानि। '**अखंडाणि**' सम्पूर्णानि तव भविष्यन्ति व्रतानि ॥१२०७॥

व्रतपरिणामोपघातनिमित्तानि शल्यानि ततस्तद्वर्जनं कार्यमित्याचष्टे—

णिस्सल्लस्सेव पुणो महव्वदाइं हवंति सव्वाइं।
वदमुवहम्मदि तीहिं दु णिदाणमिच्छत्तमायाहिं ॥१२०८॥

'**णिस्सल्लस्सेव**' शल्यरहितस्यैव। शृणाति हिनस्तीति शल्यं शरकण्टकादि शरीरादिप्रवेशि तेन तुल्यं यत्प्राणिनो बाधानिमित्तं, अन्तर्निविष्टं परिणामजातं तच्छल्यमिह गृहीतं। '**महव्वदाइ**' महाव्रतानि भवन्ति। शल्यं कस्यचिदेव व्रतस्योपघातकं, यथा एषणासमित्यभावो अहिंसाव्रतस्येत्याशङ्कां निरस्यति सर्वशब्दो। ननु च महत्त्वेन व्रतमवशेष्यं। मिथ्यात्वादिशल्यं अणुव्रतान्यपि हन्त्येव। सत्यं प्रस्तुतत्वान्महाव्रतानामित्युक्तं।

भावनाका माहात्म्य कहते हैं—

गा०—भावनाओंसे भावित साधु गहरी नींदमें सोता हुआ भी अथवा मूर्छित हुआ भी सब व्रतोंमें दोष नहीं लगाता। तब जागते हुए की तो बात ही क्या है ॥१२०६॥

गा०—इसलिये हे क्षपक! तुम प्रमाद त्यागकर इन भावनाओंसे अपनेको भावित करो। इससे तुम्हारे व्रत निरन्तर बने रहेंगे और सम्पूर्ण होंगे ॥१२०७॥

शल्य व्रतरूप परिणामोंके घातमें निमित्त होते हैं। अतः उनको त्यागना चाहिये, यह कहते हैं—

गा०-टी०—शल्यरहितके ही सब महाव्रत होते हैं। 'शृणाति' अर्थात् जो कष्ट देता है वह शल्य है। जैसे शरीर आदिमें घुसनेवाला बाण, काँटा आदि। उनके समान जो अन्तरंगमें घुसा परिणाम प्राणीको कष्ट पहुँचानेमें निमित्त है उसे यहाँ शल्य शब्दसे कहा है। जैसे एषणासमिति-का अभाव अहिंसा व्रतका घातक है वैसे ही शल्य किसी एक व्रतका घातक है क्या? इस आशंका को दूर करनेके लिये सर्व शब्दका प्रयोग किया है।

शंका—मिथ्यात्व आदि शल्य अणुव्रतोंका भी घात करते हैं। यहाँ उन्हें महाव्रतोंका घातक क्यों कहा?

अत्र चोद्यं—हिंसादिभ्यो विरतिपरिणाममात्राणि व्रतानि । शल्ये मिथ्यात्वादिके सति किं न भवन्ति । येनैवमुच्यते निःशल्यस्यैव महाव्रतानि भवन्ति इति ? एतत्प्रतिविधानायाह—'वदमुवहम्मदि' व्रतमुपहन्यते । 'तीहिं दु' तिसृभिः । 'णिदाणमिच्छत्तमायाहिं' निदानमिथ्यात्वमायाभिः । अल्पाच्तरत्वान्मायाशब्दस्य पूर्वनिपात इति चेन्न—मिथ्यात्वं व्रतविघातं प्रकर्षेण करोतीति प्रधानं ततो मिथ्यात्वं माया चेति द्विपदे द्वन्द्वे मिथ्यात्वशब्दस्य पूर्वनिपातः पश्चान्निदानशब्देन द्वन्द्वः तस्याल्पाच्तरत्वात्पूर्वनिपातः । सम्यक्चारित्रमिह मोक्षमार्गत्वेन प्रस्तुतं, तच्च नासतोः सम्यग्दर्शनज्ञानयोर्भवति । सति मिथ्यात्वे विरोधिनि न ते स्तः समीचीनज्ञानदर्शने[1] । रत्नत्रयत्वान्मुक्तेः अनन्तज्ञानादिकाच्चान्यत्र चित्तप्रणिधानं इदमेतत्फलं स्यादिति निदानं । तच्च सम्यग्दर्शनादि-परम्परया व्रतोपघातकारि । मनसा स्वातिचारनिगूहनलक्षणा माया च व्रतमुपहन्तीति मन्यते ॥१२०८॥

तत्थं णिदाणं तिविहं होइ पसत्थापसत्थभोगकदं ।
तिविधं पि तं णिदाणं परिपंथो सिद्धिमग्गस्स ॥१२०९॥

'तत्थ' तेषु शल्येषु । 'णिदाणं' निदानाख्यं शल्यं । 'तिविधं' त्रिविधं । 'होदि' भवति । 'पसत्थमप्पसत्थभोगकदं' प्रशस्तनिदानमप्रशस्तनिदानं, भोगनिदानं चेति । 'तिविधं पि तण्णिदाणं' त्रिप्रकारमपि निदानं । 'परिपंथो' विघ्न । 'सिद्धिमग्गस्स' रत्नत्रयस्य ॥१२०९॥

समाधान—आपका कहना सत्य है किन्तु यहाँ महाव्रतका प्रकरण होनेसे महाव्रतोंका घातक कहा है।

शंका—व्रत तो हिंसा आदिसे विरतिरूप परिणाम मात्र है। वे मिथ्यात्व आदि शल्यके होने पर क्यों नहीं होते, जिससे यह कहा गया है कि निःशल्यके ही महाव्रत होते हैं ?

समाधान—इस शङ्काका निराकरण करनेके लिये कहते हैं—निदान, मिथ्यात्व और माया इन तीनोंके द्वारा व्रतका घात होता है।

शंका—माया शब्द अल्प अच्‌वाला है अतः उसे पहले रखना चाहिये ?

समाधान—नहीं, क्योंकि मिथ्यात्व व्रतका घात प्रकर्ष रूपसे करता है अतः प्रधान है। तब 'मिथ्यात्व और माया' ऐसा द्वन्द्व समास करने पर मिथ्यात्व शब्दका पूर्व निपात होता है। फिर निदान शब्दके साथ द्वन्द्व करने पर निदान शब्दका पूर्व निपात होता है क्योंकि वह अल्प अच्‌वाला है। यहाँ मोक्षके मार्ग रूपसे सम्यक्चारित्रका कथन है। वह सम्यक्चारित्र सम्यग्दर्शन और सम्यग्ज्ञानके अभावमें नहीं होता। क्योंकि विरोधी मिथ्यात्वके रहते हुए सम्यग्ज्ञान और सम्यग्दर्शन नहीं होते। रत्नत्रयरूप अथवा अनन्त ज्ञानादिरूप मुक्तिसे अन्यत्र चित्तका उपयोग लगाना कि इसका यह फल मुझे मिले, निदान है। वह सम्यग्दर्शन आदिकी परम्परासे व्रतका घातक है। तथा मनसे अपने दोषोंको छिपाने रूप माया भी व्रतका घात करती है।

विशेषार्थ—निदानसे सम्यग्दर्शनमें अतिचार लगता है और व्रतका मूल सम्यग्दर्शन है। तथा निदानसे व्रतोंका घात होता है ॥१२०८॥

गा०—उन शल्योंमें निदान नामक शल्यके तीन भेद है—प्रशस्त निदान, अप्रशस्त निदान और भोग निदान। तीनों ही प्रकारका निदान मोक्षके मार्ग रत्नत्रयका विरोधी है ॥१२०९॥

---

१. समीचारित्ररत्न—आ० मु०। २. नानि प—आ०।

प्रशस्तनिदाननिरूपणार्थोत्तरगाथा—

संजमहेदुं पुरिसत्तसत्तबलविरियसंघदणबुद्धी ।
सावअबंधुकुलादीणि णिदाणं होदि हु पसत्थं ॥१२१०॥

'**संजमहेदुं**' संयमनिमित्तं । '**पुरिसत्तसत्तबलविरियसंघदणबुद्धी**' पुरुषत्वमुत्साहः, बलं शरीरगतं दार्ढ्यं, वीर्यं वीर्यान्तरायक्षयोपशमजः परिणामः । अस्थिबन्धविषया वज्रऋषभनाराचसंहननादिः । एतानि पुरुषत्वादीनि संयमसाधनानि मम स्युरिति चित्तप्रणिधानं प्रशस्तनिदानं । '**सावयबंधुकुलादिणिदाणं**' श्रावकबन्धुनिदानं । [1]अदरिद्रकुले, अबन्धुकुले वा उत्पत्ति प्रार्थना प्रशस्तनिदानं ॥१२१०॥

अप्रशस्तनिदानमाचष्टे—

माणेण जाइकुलरूवमादि आइरियगणधरजिणत्तं ।
सोभग्गाणादेयं पत्थंतो अप्पसत्थं तु ॥१२११॥

'**माणेण**' मानेन हेतुना । '**जातिकुलरूवमादि**' जातिर्मातृवंशः, कुलं पितृवंशः, जातिकुलरूपमात्रस्य सुलभत्वात्प्रशस्तजात्यादिपरिग्रह । इह '**आइरियगणधरजिणत्तं**' आचार्यत्व, गणधरत्वं, जिनत्वं । '**सोभग्गाणादेयं**' सौभाग्यं, आज्ञा, आदेयत्वं च । '**पत्थंतो**' प्रार्थयतः । '**अप्पसत्थं तु**' अप्रशस्तमेव निदानं मानकषायदूषितत्वात् ॥१२११॥

प्रशस्त निदानका कथन करते हैं—

गा०—संयममें निमित्त होनेसे पुरुषत्व, उत्साह, शरीरगत दृढ़ता, वीर्यान्तरायके क्षयोपशमसे उत्पन्न वीर्यरूप परिणाम, अस्थियोंके बन्धन विशेष रूप वज्रऋषभनाराच संहनन आदि, ये संयम साधन मुझे प्राप्त हों, इस प्रकार चित्तमें विचार होना प्रशस्त निदान है। तथा मेरा जन्म श्रावक कुलमें हो, ऐसे कुलमें हो जो दरिद्र न हो, बन्धु बान्धव परिवार न हो, ऐसो प्रार्थना प्रशस्त निदान है ॥१२१०॥

विशेषार्थ—एक प्रतिमें दरिद्रकुल तथा एकमे बन्धुकुल पाठ भी मिलता है। दीक्षा लेनेके लिये दरिद्रकुल भी उपयोगी हो सकता है और सम्पन्न घर भी उपयोगी हो सकता है। इसी तरह बन्धु बान्धव परिवारवाला कुल भी उपयोगी हो सकता है और एकाकीपना भी। मनुष्यके मनमें विरक्ति उत्पन्न होने की बात है ॥१२१०॥

अप्रशस्त निदान कहते हैं—

गा०—मानकषायके वश जाति, कुल, रूप आदि तथा आचार्यपद, गणधरपद, जिनपद, सौभाग्य, आज्ञा और आदेय आदिकी प्राप्तिकी प्रार्थना करना अप्रशस्त निदान है ॥१२११॥

टी०—माताके वंशको जाति और पिताके वंशको कुल कहते है। जाति कुल और रूप मात्र तो सुलभ हैं क्योंकि मनुष्य पर्यायमें जन्म लेनेपर ये तीनों अवश्य मिलते हैं। इसलिये यहाँ जाति कुल और रूपसे प्रशंसनीय जाति आदि लेना चाहिये। मान कषायसे दूषित होनेसे यह अप्रशस्त निदान है ॥१२११॥

---

१. दरिद्रकुले—अ० ।

कुद्धो वि अप्पसत्थं मरणे पत्थेइ परवधादीयं ।
जह उग्गसेणघादे कदं णिदाणं वसिट्ठेण ॥१२१२॥

'कुद्धो वि' क्रुद्धोऽपि । 'अप्पसत्थं' परवधादिकं । 'मरणे' मरणकाले । 'पत्थेदि' प्रार्थयते । 'जधा' यथा 'उग्गसेणघादे' उग्रसेनवधे । 'कदं णिदाणं' कृतं निदानं 'वसिट्ठेण' वसिष्ठेन यतिना ॥१२१२॥

भोगनिदाननिरूपणा—

देविगमाणुसभोगे णारिस्सरसेट्ठिसत्थवाहत्तं ।
केसवचक्कधरत्तं पत्थंतो होदि भोगकदं ॥१२१३॥

'देविगमाणुसभोगे' देवेषु मनुजेषु च भवान्भोगान् । 'पत्थेंतो' अभिलषति । 'भोगकदं' भोगकृतं निदानं । 'णारिस्सरसेट्ठिसत्थवाहत्तं' नारीत्वं, ईश्वरत्वं, श्रेष्ठित्वं, सार्थवाहत्वं च । 'केसवचक्कधरत्तं' वासुदेवत्वं सकलचक्रवर्तित्वं च वाञ्छति भोगार्थं । भोगनिदानं भवति ॥१२१३॥

संजमसिहरारूढो घोरतवपरक्कमो तिगुत्तो वि ।
पगरिज्ज जइ णिदाणं सोवि य वड्ढेइ दीहसंसारं ॥१२१४॥

'संजमसिहरारूढो' संयमः शिखरमिव दुरारोहत्वादचलत्वाद्वा । एतदुक्तं भवति । प्रकृष्टसंयमोऽपि । 'घोरतवपरक्कमो' घोरे तपसि पराक्रम उत्साहो यस्य सोऽपि दुर्धरतपोऽनुष्ठाय्यपि । 'तिगुत्तो वि' गुप्तित्रय-समन्वितोऽपि । 'पगरिज्ज जइ णिदाणं' निदानं यदि कुर्यात् । "सो वि य' व्यावर्णितगुणोऽपि 'वड्ढेइ' वर्धयति संसारमात्मनः । किमपरस्मिन्निदानकारिणि वाच्यम् ॥१२१४॥

जो अप्पसुक्खहेदुं कुणइ णिदाणमविगणियपरमसुहं ।
सो कागणीए विक्केइ मणिं बहुकोडिसयमोल्लं ॥॥१२१५॥

गा०—क्रोध कषायके वश होकर भी कोई मरते समय दूसरेका वध करनेकी प्रार्थना करता है। जैसे वशिष्ठ ऋषिने उग्रसेनका घात करनेका निदान किया था ॥१२१२॥

विशेषार्थ—वशिष्ठतापसने उग्रसेनको मारनेका निदान किया था। इस निदानके फलसे वह मरकर उग्रसेनका पुत्र कंस हुआ। और उसने पिताको जेलमें डालकर राज्यपद प्राप्त किया। पीछे कृष्णके द्वारा स्वयं भी मारा गया ॥१२१२॥

भोगनिदानका कथन करते हैं—

गा०—देवों और मनुष्योंमें होनेवाले भोगोंकी अभिलाषा करना तथा भोगोंके लिए नारीपना, ईश्वरपना, श्रेष्ठिपना, सार्थवाहपना, नारायण और सकल चक्रवर्तीपना प्राप्त होनेकी वांछा करना भोगनिदान है ॥१२१३॥

गा०-टी०—संयम पर्वतके शिखरके समान है क्योंकि जैसे पर्वतका शिखर अचल और दुःखसे चढ़ने योग्य है वैसा संयम भी है। उस संयमपर जो आरूढ़ है अर्थात् उत्कृष्ट संयमका धारी है, घोर तप करनेमें उत्साही है अर्थात् दुर्धर तप करता है और तीन गुप्तियोंका धारी है, वह भी यदि निदान करता है तो अपना संसार बढ़ाता है, फिर दूसरे निदान करनेवालेका तो कहना ही क्या है ॥१२१४॥

'जो अप्पसुक्खहेदु' योऽल्पसुखनिमित्तं निदानं करोति परमे मुक्तिसुखे अनादरं कृत्वा। स काकण्या विक्रीणीते मणिं बहुकोटिधनमूल्यम् ॥१२१५॥

सो भिंदइ लोहत्थं णावं भिंदइ मणिं च सुत्तत्थं।
छारकदे गोसीरं डहदि णिदाणं खु जो कुणदि ॥१२१६॥

'सो भिंदइ' स भिनत्ति कीलकलोहार्थं नावं अनेकवस्तुभृतां। भिनत्ति रत्नं च सूत्रार्थं। गोशीर्षं चन्दनं दहति भस्मार्थं यो निदानं करोति स्वल्पार्थं। सारविनाशसामर्थ्यविशेषमाचष्टे—¹सूपकारोपरि कथा यो निदानकारी, तेन नौप्रभृतिकं विनाशितं। अर्थाख्यानकानि वाच्यानि ॥१२१६॥

कोढी संतो लद्धूण डहइ उच्छु रसायणं एसो।
सो सामण्णं णासेइ भोगहेदुं णिदाणेण ॥१२१७॥

'कोढी संतो' कुष्ठी सन् रसायनभूतमिक्षुं लब्ध्वा दहति यः समानतां नाशयति सर्वदुःखव्याधिविनाशनोद्यतां भोगार्थनिदानेन ॥१२१७॥

पुरिसत्तादिणिदाणं पि मोक्खकामा मुणी ण इच्छंति।
जं पुरिसत्ताइमओ भवो भवमओ य संसारो ॥१२१८॥

'पुरिसत्तादिणिदाणंपि' पुरुषत्वादिनिदानमपि मोक्षाभिलाषिणो मुनयो न वाञ्छन्ति। यस्मात्पुरुषत्वादिरूपो भवपर्यायः। भवात्मकश्च संसारः भवपर्यायपरिवर्तस्वरूपत्वात् ॥१२१८॥

दुक्खक्खयकम्मक्खयसमाधिमरणं च बोधिलाभो य।
एयं पत्थेयव्वं ण पत्थणीयं तओ अण्णं ॥१२१९॥

गा०—जो मुक्तिके उत्कृष्ट सुखका अनादर करके अल्पसुखके लिए निदान करता है वह करोड़ों रुपयोंके मूल्यवाली मणिको एक कौड़ीके बदले बेचता है ॥१२१५॥

गा०—जो निदान करता है वह लोहेकी कीलके लिए अनेक वस्तुओंसे भरी नाव को—जो समुद्रमें जा रही है तोड़ता है, भस्मके लिए गोशीर्षचन्दनको जलाता है और धागा प्राप्त करनेके लिए मणिनिर्मित हारको तोड़ता है। इस तरह जो निदान करता है वह थोड़ेसे लाभके लिए बहुत हानि करता है। एक सूपकारने अपनी मूर्खतासे अपनी नाव नष्ट कर डाली थी। इनकी कथाएँ (कथाकोशोंसे) जानना ॥१२१६॥

गा०—जैसे कोई कोढ़ी मनुष्य अपने रोगके लिए रसायनके समान ईखको पाकर उसे जलाकर नष्ट करता है वैसे ही भोगके लिए निदान करके मूर्ख मुनि सर्व दुःख और व्याधियोंका विनाश करनेमें तत्पर मुनि पदको नष्ट करता है ॥१२१७॥

गा०—मोक्षके अभिलाषी मुनिगण 'मैं मरकर पुरुष होऊँ' या मेरे वज्रऋषभनाराच संहनन आदि हो, इस प्रकारका भी निदान नहीं करते। क्योंकि पुरुष आदि पर्याय भवरूप है और भवपर्यायका परिवर्तन स्वरूप होनेसे संसार भवमय है। अर्थात् नाना भवधारण करने रूप ही तो संसार है ॥१२१८॥

1. सूपकारोपरिकथा—अ० आ०।

'दुक्खक्खय' दुःखानां शारीराणां, आगन्तुकानां स्वाभाविकानां च क्षयो भवतु। तथा कर्मणां तत्कारणभूतानां रत्नत्रयसम्पादनपुरःसरं मरणं, दीक्षाभिमुखो बोधिलाभश्च एतत्प्रार्थनीयं नान्यत् ॥१२१९॥

पुरिसत्तादीणि पुणो संजमलाभो य होइ परलोए।
आराधयस्स णियमा तदत्थमकदे णिदाणे वि ॥१२२०॥

'पुरिसत्तादीणि' पुरुषत्वादिकं, संयमलाभश्च भविष्यति परजन्मनि। कस्य? कृतरत्नत्रयाराधनस्य निश्चयेन। तदर्थमकृतेऽपि निदाने ॥१२२०॥

माणस्स भंजणत्थं चिंतेदव्वो सरीरणिव्वेदो।
दोसा माणस्स तहा तहेव संसारणिव्वेदो ॥१२२१॥

'माणस्स भंजणत्थं' मानभञ्जनार्थं ध्यातव्यः शरीरनिर्वेदः। तथा दोषाश्च मानस्य। तथैव संसारनिर्वेदश्च ध्यातव्य इति क्षपकं निर्यापकसूरिः शिक्षयति। शरीरस्य अशुचित्वादिस्वभावचिन्तनतः। किमेतेन शरीरेणेति शरीरे अनादरः शरीरनिर्वेदः। स कथं मानस्य भञ्जने निमित्तं। स हि शरीरानुरागमेव[1]विहन्ति तत्प्रतिपक्षत्वात्। अत्रोच्यते—मानशब्दः सामान्यवचनोऽपि रूपाभिमानविषयो गृहीतः। स च शरीरनिर्वेदेन भज्यते। मानस्य दोषा नीचकुलेषूत्पत्तिर्मान्यगुणालाभः, सर्वविद्वेष्यता, रत्नत्रयालाभ इत्यादिकाः। संसारस्य द्रव्यक्षेत्रकालभावभवपरिवर्तनरूपस्य पराङ्मुखता संसारनिर्वेदः। तत्रोपयुक्तस्य अहङ्कारनिमित्तानां विनाशात्,

---

गा०—हमारे शारीरिक, आगन्तुक और स्वाभाविक दुःखोंका नाश हो। तथा उनके कारणभूत कर्मोंका क्षय हो। रत्नत्रयका पालन करते हुए मरण हो और जिनदीक्षाकी ओर अभिमुख करनेवाले ज्ञानका लाभ हो, इतनी ही प्रार्थना करने योग्य है। इनके सिवाय अन्य प्रार्थना करना योग्य नही है ॥१२१९॥

गा०—जो रत्नत्रयकी आराधना करता है उसे निदान न करने पर भी आगामी जन्ममें पुरुषत्व आदि का तथा संयमका लाभ निश्चय ही होता है ॥१२२०॥

गा०-टी०—निर्यापकाचार्य क्षपकको शिक्षा देता है कि तुम्हे मानकषायका विनाश करनेके लिए शरीरसे निर्वेदका, मानके दोषों का और संसारसे निर्वेदका चिन्तन करना चाहिये। शरीरके अशुचित्व आदि स्वभावका चिन्तन करनेसे 'इस शरीरसे क्या लाभ' इस प्रकार शरीरमें अनादर होता है उसे ही शरीर निर्वेद कहते हैं।

शङ्का—शरीरका चिन्तन मानकषायको दूर करनेमें निमित्त कैसे हो सकता है उससे तो शरीरमें अनुराग का ही घात होता है क्योंकि शरीर निर्वेद उसका प्रतिपक्षी है?

समाधान—यद्यपि मान शब्द मानसामान्यका वाचक है तथापि यहाँ रूपविषयक अभिमान लिया है। वह शरीरके निर्वेदसे नष्ट होता है। नीच कुलोंमें जन्म, आदरणीय गुणोंका प्राप्त न होना, सबका अपनेसे द्वेष करना, रत्नत्रय आदिका लाभ न होना, ये सब मानकषायसे होनेवाले दोष हैं। द्रव्य, क्षेत्र, काल, भाव और भवपरिवर्तन रूप संसारसे विमुख होना ससारनिर्वेद है। संसारनिर्वेदमें उपयोग लगानेसे अहंकारके निमित्तोंका विनाश होता है। क्योंकि

---

१. मेवावहति—आ० मु०।

निन्द्यानां च गुणानां बहूनां असकृत्प्रवृत्तिः अनेकप्राणिलभ्यत्वात् । [1]स्वप्राप्तेभ्यो गुणेभ्योऽतिशयितानां गुणानामन्यैरुपलम्भनात् ॥१२२१॥

कुलाभिमाननिरासोपायमाचष्टे—

णीचो वि होइ उच्चो उच्चो णीचत्तणं पुण उवेइ ।
जीवाणं खु कुलाइं पथियस्स व विस्समंताणं ॥१२२२॥

'**णीचो वि होवि**' स्थानमानैश्वर्यादिभिस्तिरोभूतो नीच इत्युच्यते । सोपि '**होवि**' भवति । '**उच्चो**' तैरेवोन्नत । स उच्चो अतिशयितस्थानमानादिकोऽपि '**णीचत्तणं**' तैर्न्यूनता । '**पुण उवेवि**' पुनः उपैति । '**जीवाणं खु**' जीवानां खलु । '**कुलाइं**' कुलानि । कीदृग्भूताना ? '**विस्समंताणं**' विश्रमतां बहूनि कुलानि कुलबहुत्वप्रकटनेन कुलानियतता दर्शिता । अनियतकुलस्य क कुलगर्व । '**पथियस्सव**' पथिकस्य यथा विश्रामस्थानं न नियतमस्ति तद्वदेवास्येति भाव ॥१२२२॥

किं च गर्वो ह्यात्मनो वृद्धि परस्य वा हानिं बुद्धचा सक्षेपते तस्य युक्तोऽहंकार. न चास्य वृद्धिहानी स्त इति कथयति—

उच्चासु व णीचासु व जोणीसु ण तस्स अत्थि जीवस्स ।
वड्ढी वा हाणी वा सव्वत्थ वि तित्तिओ चेव ॥१२२३॥

'**उच्चासु व णीचासु व**' यत्र स्थित आत्मा शरीरं निष्पादयति तद्योनिशब्देनोच्यते । न तस्य उच्चता नीचता वा तत. किमुच्यते उच्चासु व णीचासु व इति । अत्रोच्यते—योनिशब्देन कुलमेवात्रोच्यते । तेनायमर्थः । मान्ये कुले गर्हिते वा उत्पन्नस्य न तस्य जीवस्य वृद्धिर्हानिर्वा सर्वत्र तत्परिमाण एव ज्ञानादि-

---

अनेक निन्दनीय गुण, जो अहकारमे निमित्त होते हैं, अनेक प्राणियोमे पाये जाते हैं । तथा अपनेको जो गुण प्राप्त है उनमें भी अतिशयशाली गुण दूसरोको प्राप्त है । अत उनका अभिमान कैसा ? ॥१२२१॥

कुलका अभिमान दूर करनेका उपाय कहते है—

गा०टी०—स्थान, मान, ऐश्वर्य आदिसे हीन व्यक्तिको नीच कहते हैं । जो स्थान, मान, ऐश्वर्य आदिसे हीन होता है वही नीच हो जाता है । जीवोके कुल पथिकके विश्राम स्थानकी तरह हैं । जैसे पथिकके विश्राम लेनेका स्थान नियत नही है वैसे ही कुल भी नियत नही है । तब अनियत कुलका गर्व कैसा ? 'कुलानि' पद बहुवचनान्त होनेसे कुलोंकी बहुतायत प्रकट करता है । और कुलोंकी बहुतायतसे कुलोकी अनित्यता दिखलाई है ॥१२२२॥

आगे कहते हैं कि अपनी वृद्धि और दूसरेकी हानिकी भावनासे गर्व होता है उसका अहंकार करना युक्त है किन्तु उच्च या नीच कुलमें जन्म लेनेमे आत्माकी हानि वृद्धि नही होती—

गा०-टी०-**शंका**—जिसमें रहकर जीव अपने शरीरको रचता है उसे योनि कहते हैं । योनि तो उच्च या नीच होती नही । तब 'उच्चासु व नीचासु' क्यो कहा ?

समाधान—यहाँ योनि शब्दसे कुलको ही कहा है । अत ऐसा अर्थ होता है—मान्य कुलमे अथवा निन्दनीय कुलमे उत्पन्न हुए जीवको वृद्धि या हानि नही होती । सर्वत्र जीवका परिमाण

---

१ सुप्राप्येभ्यो–आ० मु० ।

गुणातिशयादेव उत्कृष्टता । निन्दितगुणः कुलीनोऽपि न पूज्यतेतरामन्यैः । अमान्येऽपि कुले सम्भूतो यदि गुणी स्यात् । उक्तं च—

संसारकाले भ्रमतो हि जंतोर्न नाम किंचित्कुलमस्ति नित्यं ।
स एव नीचोत्तममध्यजातीः स्वकर्मवश्यः समुपैति तास्ताः ॥

नृपश्च दासः श्वपचश्च विप्रो दरिद्रवंशश्च समृद्धवंशः ।
चोराग्निदावाहितयाचिता (?) च संजायते कर्मवशात्स एव ॥

को वाधिकारः सुकुलेषु नृणां का वा विहिंसान्यकुलप्रसूतौ ।
कार्योऽधिकारो ननु धर्म एव कार्या विहिंसापि च दुष्कृतेषु ॥ [ ] ॥१२२३॥

कालमणंतं णीचागोदो होदूण लहइ सगिमुच्चं ।
जोणीमिदरसलागं ताओ वि गदा अणंताओ ॥१२२४॥

'कालमणंतं णीचागोदो होदूण' अनन्तकालं नीचैर्गोत्रो भूत्वा । 'लभदि सगिमुच्चं जोणिं' लभते सकृदुच्चैर्गोत्रं । कीदृशीं 'इदरसलागं' इतरशलाकां । इतरा नीचैर्योनयः शलाका यस्या उच्चैर्योनेस्तां इतरशलाकां । 'ताओ वि' ता अपि [1]अन्तराले लब्धा अपि उच्चैर्योनयः । 'गदा अणंताओ' अनन्ताः प्राप्ता एकेन जीवेन ॥१२२४॥

उतना ही रहता है। ज्ञानादि गुणोंमें अतिशय होनेसे ही उत्कृष्टता होती है। कुलीन भी यदि निन्दित गुण वाला होता है तो दूसरे उसका आदर सम्मान नहीं करते। और अनादरणीय कुलमें उत्पन्न होकर भी यदि गुणी होता है तो दूसरे उसका सन्मान करते हैं। कहा है—संसारमें भ्रमण करते हुए प्राणीका कोई कुल स्थायी नहीं है। वही जीव अपने कर्मके अधीन होकर नीच, उत्तम अथवा मध्यम कुलोंमें जन्म लेता है। वही जीव अपने कर्मके वश होकर राजा और दास, चाण्डाल या ब्राह्मण, दरिद्र वंश वाला या सम्पन्न वंश वाला होता है तथा चोर, आग और दावानलसे पीड़ित तथा माँगने वाला होता है। उच्च कुलोंमें मनुष्योंको जन्म लेनेका गर्व कैसा? और नीच कुलोंमें जन्म लेने पर घृणा कैसी? गर्व करना हो तो धर्ममें ही करना चाहिए और घृणा भी पापसे करनी चाहिए ॥१२२३॥

गा०—टी०—यह जीव अनन्तकाल तक नीच गोत्रमें जन्म लेकर एक बार उच्च गोत्रमें जन्म लेता है। इस प्रकार उच्च गोत्रकी शलाका नीच गोत्र है। शलाकासे मतलब है अनन्तकाल नीच गोत्रमें जन्म लेकर एक बार उच्च गोत्रमें जन्म। नीच गोत्रोंके अन्तरालमें प्राप्त उच्च गोत्र भी एक जीवने अनन्त बार प्राप्त किये हैं ॥१२२४॥

विशेषार्थ—यद्यपि यह जीव संसारमें भ्रमण करते हुए अनन्तबार नीच गोत्रमें जन्म लेता है तब कहीं एक बार उच्च गोत्रमें जन्म लेता है। तथापि अनन्त बार नीच गोत्रमें जन्म लेनेके पश्चात् एक बार उच्च गोत्रमें जन्म लेनेकी परम्पराको भी इसने अनन्त बार प्राप्त किया है अर्थात् इस क्रमसे इसने उच्च गोत्रमें भी अनन्त बार जन्म लिया है ॥१२२४॥

---

१. अन्तराले अन्तराले लब्धा अपि—अ० मूलारा० ।

बहुसो वि लद्धविजडे को उच्चत्तम्मि विम्भओ णाम ।
बहुसो वि लद्धविजडे णीचत्ते चावि किं दुक्खं ॥१२२५॥

'एवं बहुसो वि' बहुशोऽपि, 'लद्धविजडे' लब्धपरित्यक्ते च । 'उच्चत्तम्मि' मान्यकुलप्रसूतत्वे । 'को णाम विम्भओ' को नाम विस्मयः । कदाचिदलब्धपूर्वमिदानीमेव लब्धमिति भवेद्गर्वः । 'बहुसो वि' बहुशोऽपि । 'लद्धविजडे' लब्धपरित्यक्ते । 'णीचत्ते चावि' नीचैर्गोत्रप्रसूतत्वे अपि । 'किं दुक्खं' किमिदं दुःखं ॥१२२५॥

उच्चत्तणम्मि पीदी संकप्पवसेण होइ जीवस्स ।
णीचत्तणे ण दुक्खं तह होइ कसायबहुलस्स ॥१२२६॥

'उच्चत्तणम्मि' मान्यकुलत्वे । 'पीदी' प्रीतिः । 'संकप्पवसेण' संकल्पवशेन 'होदि जीवस्स' भवति जीवस्य प्रशस्ते कुले जातोऽहमिति मनोनिधानात् प्रीतो भवत्ययं जनः नेत्थंभूतं संकल्पमन्तरेण सामान्यकुलत्वे सत्यपि प्रीतिर्भवति । नीचकुलत्वमेव च न दुःखस्य निमित्तं । अपि च 'णीचत्तणे व' नीचैर्गोत्रत्वे च दुःखं 'तधा होदि' तथा भवति । प्रीतिरिव परनिमित्तकं भवति । कस्य ? 'कसायबहुलस्स' कसायशब्दः सामान्यवचनोऽपि मानकषाये वर्तते । तेनायमर्थः प्रचुरमानकषायो जनयति दुःखमस्य न नीचैर्गोत्रत्वमेव ॥१२२६॥

प्रीतिपरितापौ संकल्पायत्तावित्येतत्स्पष्टयत्युत्तरगाथया—

उच्चत्तणं व जो णीचत्तं पिच्छेज्ज भावदो तस्स ।
उच्चत्तणे व णीचत्तणे वि पीदी ण किं होज्ज ॥१२२७॥

'उच्चत्तणं व' उच्चैर्गोत्रत्वमिव 'जो णीचत्तं पेच्छदि' यो नीचैर्गोत्रं प्रेक्षते इद चण्डालत्वं वरमिति । भावशब्दोऽनेकार्थवाच्यपि इह चित्तवाची । यत् येन लब्धं तत्तस्य शोभनं । अलब्धेन शोभनेनापि किं तेनेति मनसि करोति यदा तदा तत्रैव प्रीतिरस्य जायते इति वदति 'उच्चत्तणे वि' मान्यकुलत्व इव 'णीचत्तणेऽवि' नीचैर्गोत्रत्वेऽपि । 'पीदी किं ण होज्ज' प्रीतिः किं न भवेत् भवत्येवेति यावत् ॥१२२७॥

गा०—इस प्रकार अनन्त बार प्राप्त करके छोड़े हुए उच्च कुलमे जन्म लेनेका गर्व कैसा ? गर्व तो तब होता जब अभी तक न पानेके बाद प्रथम बार ही इसे प्राप्त किया होता । तथा अनन्त बार प्राप्त करके छोड़े हुए नीच गोत्रमें जन्म लेनेका दुःख कैसा ॥१२२५॥

गा०-टी०—'मै उच्च कुलमे जन्मा हू' ऐसा मनमे संकल्प होनेसे जीवका उच्चकुलमें अत्यन्त अनुराग होता है । इस प्रकारके संकल्पके बिना सामान्य कुलमे जन्म होने पर भी अनुराग नहीं होता । तथा नीच कुलमे जन्म लेना ही दुःखका कारण नहीं है । दुःखका कारण है मान-कषायकी बहुतायत । गाथामे कषाय शब्द सामान्यवाची है तथापि यहाँ उसका अर्थ मानकषाय लेना चाहिए । मानकषायकी बहुतायत जीवको दुःख देती है, केवल नीच गोत्रमें जन्म ही दुःखका कारण नही होता ॥१२२६॥

अनुराग और दुःख संकल्पके अधीन है, यह कहते हैं—

गा०-टी०—गाथामे आये भाव शब्दके यद्यपि अनेक अर्थ हैं तथापि यहाँ उसका अर्थ चित्त लिया है । जो मनसे उच्च गोत्रके समान नीच गोत्रको देखता है अर्थात् यह चाण्डाल कुलमें जन्म श्रेष्ठ है ऐसा मानता है । मनमे विचारता है कि जो जिसको प्राप्त है वही उसके लिए उत्तम है । जो प्राप्त नहीं है वह श्रेष्ठ भी हो तो उससे क्या ? ऐसा विचार करते ही उच्च कुलके समान नीच

णीचत्तणं व जो उच्चत्तं पेच्छेज्ज भावदो तस्स ।
णीचत्तणेव उच्चत्तणे वि दुक्खं ण किं होज्ज ॥१२२८॥

एतद्विपरीतार्थोत्तरगाथा । स्पष्टतया[1] वस्तुस्थितिं नापेक्षते । सङ्कल्पायत्ता प्रीतिरप्रीतिर्वेत्यनुभवसिद्धमेतदखिलस्य जगत इति भवति । यस्मादुच्चैर्गोत्रत्वेऽपि न सुखदुःखयोर्भावाभावौ च भवतः संकल्पात् ॥१२२८॥

तम्हा ण उच्चणीचत्तणाइं पीदिं करेंति दुःक्खं वा ।
संकप्पो से पीदीं करेदि दुक्खं च जीवस्स ॥१२२९॥

'तम्हा' तस्मात् । 'उच्चणीचत्तणाणि' मान्यामान्यकुलत्वानि । 'ण करेंति पीदिं दुक्खं वा' न कुरुतः प्रीतिं दुःखं वा । 'संकप्पो पीदिं करेदि' संकल्पो 'से' अस्य जीवस्य तस्मात् प्रीतिं करोति दुःखं वा । सति सकल्पे भावादसति अभावाच्च ॥१२२९॥

मानकषायसाध्योऽयं दोष इति कथयति—

कुणदि य माणो णीचागोदं पुरिसं भवेसु बहुएसु ।
पत्ता दु णीचजोणी बहुसो माणेण लच्छिमदी ॥१२३०॥

'कुणदि य' करोति । 'माणो' अहंकारः । 'णीचागोदं पुरिसं' नीचैर्गोत्रमस्येति नीचैर्गोत्रं 'पुरिसं' आत्मानं । 'भवेसु' जन्मसु । 'बहुगेसु' बहुषु । 'पत्ता' प्राप्ता । 'णीचजोणी खु' नीचैर्गोत्रमेव । का ? 'लच्छिमदी' लक्ष्मीमती । केन निमित्तेन ? 'माणेण' सुरूपा यौवनानुकूला कुलीना चेति गर्वेण ॥१२३०॥

कुलमें भी अनुराग क्यों नहीं होगा ? अवश्य ही होगा ॥१२२७॥

आगेकी गाथामें इससे विपरीत कथन करते हैं—

गा०—जो जीव भावसे उच्चपनेको नीचपनेकी तरह देखता है उसको नीचपनेकी तरह उच्चपनामें क्या दुःख नहीं होता ? होता ही है । किसीसे प्रीति या अप्रीति तो संकल्पके अधीन है यह बात समस्त जगत्के अनुभवसे सिद्ध है । क्योंकि संकल्पसे उच्च गोत्र होते हुए भी सुखका भाव और दुःखका अभाव नहीं होता ॥१२२८॥

गा०—अतः उच्च कुल या नीच कुल सुख या दुःख नहीं देता । किन्तु जीवका संकल्प सुख या दुःख करता है । संकल्पके होने पर सुख दुःख होता है और संकल्पके अभावमें नहीं होता ॥१२२९॥

आगे कहते हैं कि मानकषायके कारण यह दोष होता है—

गा०—मानकषाय अर्थात् अहंकार पुरुषको अनेक जन्मोंमें नीच गोत्री बनाता है । देखो, लक्ष्मीमती, मैं सुन्दर हूँ, कुलीन हूँ यौवनवती हूँ इस गर्वके कारण अनेक बार नीच गोत्रमें उत्पन्न हुई ॥१२३०॥

विशेषार्थ—बृहत्कथा कोशमें १०८ नम्बरमें इसकी कथा दी है ॥१२३०॥

---

१. स्पष्टाया—अ० ।

पूयावमाणरूवविरूवं सुभगत्तदुब्भगत्तं च ।
आणाणाणा य तहा विधिणा तेणेव पडिसेज्ज ॥१२३१॥

'पूयावमाणरूवविरूवं' पूजा, अवमानं परिभवः। रूपशब्दः सामान्यवचनोऽपि शोभनाशोभनरूपविषयतया इह विरूपशब्दसन्निधाने प्रयुज्यमानोऽतिशयिते रूपे प्रवर्तते। तेन सौरूप्यं चेत्यर्थः। 'सुभगत्तदुब्भगत्तं च' सौभाग्यं दौर्भाग्यं च सर्वेषां प्रियत्वं द्वेष्यत्वं चेति यावत्। 'आणाणाणा य तहा' आज्ञा आदेशाप्रतिघातः अनाज्ञा च तथा। 'विधिणा' माननिषेधप्रकारेणैव। 'पडिसेज्ज' प्रतिषेध्याः। अभिधेयवशाल्लिंगवचनप्रवृत्तिरिति लिंग्यन्तरेण पूजादिशब्दोपनीतेन प्रतिषेध्यशब्दस्याभिसम्बन्धः। परिभवं प्राप्तोऽपि बहुशः कदाचित्पूज्यते। एवमपि प्राप्ता ह्यनन्तेषु पूजास्तत्र कोऽनुरागोऽस्य। दुःखं वा परिभवप्राप्तौ। [1]पूज्यमानोऽपि बहुषु पुनः परिभवमवाप्स्यति। न चात्मनः पूजायां काचिद् वृद्धिः परिभवे वा हानिः। सङ्कल्पवशादेवात्मनो जायेते प्रीतिपरितापौ न केवलं पूजापरिभवाभ्यामेवेति। उक्तं च—

यः स्तूयते शुचिगुणैर्मधुरैर्वचोभिः स निन्द्यते च परुषैर्वचनैर्[2]विचित्रैः।
हा चित्रतां कथमयं भवसंकटस्थः प्राप्नोत्यनेकविधिकर्मफलोपभोगं ॥
भूत्वा मनुष्यपतयः पुनरेव दासा हीना भवन्ति शुचयोऽशुचयश्च भूयः।
कान्ता[3] च ये युवतिभिर्विषमानुरूपा द्वेष्या भवन्त्यसुभगत्वमुपेत्य भूयः॥
दृष्टः क्वचित्प्रवररत्नविभूषणो यः संदृश्यते विकलपुण्यतया दरिद्रः।
भूयश्च मित्रबहुबंधुजनोपगूढः संलक्ष्यते व्यसनभारभृदेक[4] एव ॥ [ ] ॥१२३१॥

गा०–टी०—मानकषायका जैसे निषेध किया है वैसे ही पूजा, अपमान, सौरूप्य, वैरूप्य, सौभाग्य, दुर्भाग्य, आज्ञा अनाज्ञाका भी निषेध जानना। गाथामें आगत रूपशब्द यद्यपि सामान्यवाची होनेसे सुन्दर और असुन्दर दोनों ही प्रकारके रूपका वाचक है तथापि विरूप शब्दके साथमें प्रयुक्त होनेसे अतिशयरूपको कहता है। अतः उसका अर्थ सौरूप्य और वैरूप्य लिया गया है। सौभाग्यका अर्थ है सबको प्रिय होना और दुर्भाग्यका अर्थ है सबके द्वारा तिरस्कृत होना। जिसने अनेक जन्मोंमें तिरस्कार पाया है वह भी कभी पूजा जाता है। इसी प्रकार अनन्त जन्मोंमें पूजा प्राप्त करनेवाला भी तिरस्कृत होता है। अतः उनमें अनुराग कैसा और तिरस्कार पानेपर दुःख कैसा? जो बहुत जन्मोंमें पूजा जाता है वह पुनः तिरस्कारको प्राप्त करेगा। पूजा होनेपर आत्मामें वृद्धि नहीं होती और तिरस्कार होनेपर आत्मामें कोई हानि नहीं होती। संकल्पके कारण ही प्रीति और सन्ताप होते हैं केवल पूजा और तिरस्कारसे नहीं होते। कहा भी है—

जो मधुर वचनोंके द्वारा अपने निर्मल गुणोंके लिये संस्तुत होता है वही नाना प्रकारके कठोर वचनोंसे निन्दाका पात्र होता है। कैसा आश्चर्य है कि संसाररूपी संकटमें पड़ा हुआ यह प्राणी अनेक प्रकारके कर्मोंके फलको भोगता है। मनुष्योंका स्वामी होकर उनका नीच दास हो जाता है। पवित्र होकर पुनः अपवित्र हो जाता है। जो युवतियोंके प्रिय होते हैं वे ही दुर्भाग्य आनेपर द्वेषके पात्र बनते हैं। जो मनुष्य कभी उत्कृष्ट रत्नभूषणोंसे भूषित देखा गया है वही मनुष्य पुण्यहीन होनेपर दरिद्र देखा जाता है। जो बहुतसे मित्रों और बन्धु-बान्धवोंसे घिरा हुआ

१. पूजातोऽपि–अ०। २. नैर्बधित्वा–अ० ज०। ३. कान्ता च येषु युवतिः–ज० विषमाणरूपा द्वेष्या भवत्यशुभबन्धमुपेत्य भूयः–आ० ज०। ४. क ये च–अ०।

इच्चेवमादि अविचिंतयदो माणो हवेज्ज पुरिसस्स ।
एदे सव्वं अत्थे पस्सदो णो होइ माणो हु ॥१२३२॥

अहवा उच्चत्तादिणिदाणं संसारवड्ढणं होदि ।
कह दीहं ण करिस्सदि संसारं परवधणिदाणं ॥१२३३॥

'अहवा' यदि तावत् । 'उच्चत्तादिणिदाणं' उच्चैर्गोत्रता, पुरुषत्वं, स्थिरशरीरता, अदरिद्रकुलप्रसूति-बन्धुतेत्येवमादिकं मुक्तेः परम्परया कारणमपि चित्ते क्रियमाणमपि । 'संसारवड्ढणं होदि' संसारवृद्धिं करोति । 'किध ण करिस्सदि' कथं न करिष्यति । 'दीहसंसारं' दीर्घसंसारं । 'परवधणिदाणं' परवधे चित्तप्रणिधानं ॥१२३३॥

आचार्यगणधरत्वादिप्रार्थना कथमशोभना रत्नत्रयातिशयलाभप्रार्थिता हि [1]सेत्याशङ्कायामुच्यते—

आयरियत्तादिणिदाणे वि कदे णत्थि तस्स तम्मि भवे ।
धणिदं पि संजमंतस्स सिज्झणं माणदोसेण ॥१२३४॥

'आयरियत्तादिणिदाणे वि कदे' आचार्यत्वादिनिदानेऽपि कृते । 'णत्थि तस्स' नास्ति तस्य । 'तम्मि भवे' तस्मिन्भवे निदानकरणभवे । 'धणिदं पि संजमंतस्स' नितरामपि संयमं कुर्वतः । किं नास्ति 'सिज्झणं' सेधनं मुक्तिः । केन ? 'माणदोसेण' मानकषायदोषेण । स ह्याचार्यत्वादिप्रार्थनां करोति । पूज्यो भविष्यामीति संकल्पेन, ततोऽस्यहंयुता ॥१२३४॥

भोगदोषचिन्तायां सत्यां निदानं तथा न भवति इति कथयति—

होता है, विपत्तिमें पड़नेपर वही एकाकी देखा जाता है ॥१२३१॥

गा०—इत्यादि बातोंका विचार न करनेवाले पुरुषको मान होता है। और जो इन बातोंको सम्यक्रूपसे देखता है उसको मान नहीं होता ॥१२३२॥

गा०—उच्चगोत्र, पुरुषत्व, शरीरकी स्थिरता, अदरिद्रकुलमें जन्म, बन्धु-बान्धव आदि परम्परासे मुक्तिके कारण हैं ऐसा चित्तमें विचारकर इनका निदान करना कि ये मुझे प्राप्त हों, यदि संसारको बढ़ानेवाला है तो दूसरेके बधका चित्तमें निदान करना दीर्घ संसारका कारण क्यों नहीं है ? अवश्य है ॥१२३३॥

यहाँ कोई शंका करता है कि रत्नत्रयमें अतिशय लाभकी भावनासे मैं आचार्य गणधर आदि बनूँ ऐसी प्रार्थना क्यों बुरी है ? इसका उत्तर देते हैं—

गा०—आचार्य पद आदिका निदान करनेपर भी जिस भवमें निदान किया है उस भवमें अत्यन्त संयमका पालन करनेपर भी मानकषायके दोषके कारण उसकी मुक्ति नहीं होती, क्योंकि वह 'मैं पूज्य होऊँ' इस संकल्पसे आचार्य आदि होनेकी प्रार्थना करता है। इससे उसका अहंकार प्रकट होता है ॥१२३४॥

आगे कहते हैं कि भोगोंके दोषोंका चिन्तवन करनेसे भोगोंका निदान नहीं होता—

---

१. एतां टीकाकारो नेच्छति ।   २. हि सतीत्या—आ० ।

भोगा चिंतेदव्वा किंपागफलोवमा कडुविवागा ।
महुरा व भुंजमाणा पच्छा बहुदुक्खभयपउरा ॥१२३५॥

'भोगा चिंतेदव्वा' भोगाश्चिन्त्याः । 'किंपागफलोवमा' किम्पाकफलसदृशाः । 'कडुविवागा' कटु अनिष्ट विपाकः फलं एषामिति कटुविपाकाः । 'महुरा व' मधुरा इव । 'भुंजमाणा' भुज्यमानाः । 'मज्झे' मध्ये । 'बहुदुक्खभयपउरा' विचित्रदुःखमयाः ॥१२३५॥

भोगनिदानदोषं कथयति—

भोगणिदाणेण य सामण्णं भोगत्थमेव होइ कदं ।
[1]साहालंगा जह अत्थिदो वणे को वि भोगत्थं ॥१२३६॥

'भोगणिदाणेण य' भोगनिदानेन वा । 'सामण्णं' श्रामण्य । 'भोगत्थमेव होइ कदं' भोगार्थमेव कृतं न कर्मक्षयार्थं भवति । भोगनिदाने सति रागव्याकुलितचित्तस्य प्रत्यग्रकर्मप्रवाहस्वीकृतौ उद्यतस्य का संयतता ॥१२३६॥

आवडणत्थं जह ओसरणं मेसस्स होइ मेसादो ।
सणिदाणबंभचेरं अब्बंभत्थं तहा होइ ॥१२३७॥

'आवडणत्थं' अभिघातार्थं । 'जह' यथा । 'ओसरणं' अपगमः । 'मेसस्स होदि' मेषस्य भवति । 'मेसादो' मेषात् । 'सणिदाणबंभचेरं' सनिदानस्य यतेर्ब्रह्मचर्यं । 'अब्बंभत्थं' मैथुनार्थं । 'तहा होदि' तथा भवति ॥१२३७॥

जह वाणिया य पणियं लाभत्थं विक्किणंति लोभेण ।
भोगाण पणिदभूदो सणिदाणो होइ तह धम्मो ॥१२३८॥

गा०—ये भोग किंपाकफलके समान हैं। जैसे किंपाकफल खाते समय मीठा लगता है किन्तु उसका परिणाम अतिकटुक होता है। उसको खानेवाला मर जाता है। उसी प्रकार इन्द्रियोंके भोग भोगनेमें मधुर लगते हैं किन्तु उनका फल अतिकटु होता है पीछेसे जीवको बहुत दुःख और भय भोगना पड़ता है ॥१२३५॥

भोगनिदानके दोष कहते हैं—

गा०-टी०—मुनिपद धारण करके भोगका निदान करनेसे तो मुनिपद भोगोंके लिए ही धारण किया कहलायेगा। कर्मक्षयके लिये नहीं कहलायेगा। क्योंकि भोगका निदान करनेपर चित्त रागसे व्याकुल रहता है और ऐसा होनेसे नवीन कर्मोंका बन्ध होता है तब उसके मुनिपद कैसा? जैसे कोई वनमें वृक्षकी शाखामें लगे फलोंको खानेमें लग जाये तो उसके अपने इच्छित स्थानपर पहुँचनेमें विघ्न आ जाता है वैसे ही भोगका निदान करनेवाले श्रमणकी भी दशा होती है ॥१२३६॥

गा०—जैसे एक मेढ़ा दूसरे मेढेपर अभिघात करनेके लिये पीछे हटता है वैसे ही भोगोंका निदान करनेवाले यतिका ब्रह्मचर्य भी अब्रह्म अर्थात् मैथुनके लिए ही होता है ॥१२३७॥

---

१. साहोलंबो–मु०, मूलारा० । साहासंगा–आ० ।

'जह वाणिया' यथा वणिजः। 'पणियं' पण्यं। 'लाभत्थं' लाभार्थं। 'विक्किणंति' विक्रीणन्ति। 'लोभेण' लोभेन। 'भोगाणं' भोगानां। 'पणिदो भूदो' पण्यभूतः। 'सणिदाणो' सनिदानः। 'तह धम्मो होदि' तथा धर्मो भवति ॥१२३८॥

भोगनिदानवतः[1] श्रामण्यं प्रनिन्दति—

सपरिग्गहस्स अब्बंभचारिणो अविरदस्स से मणसा।
काएण सीलवहणं होदि हु णडसमणरूवं व ॥१२३९॥

'सपरिग्गहस्स' सपरिग्रहस्य भोगनिदानवतो वेदजनितो रागोऽभ्यन्तरः परिग्रह इति सपरिग्रहः। तस्य। 'अब्बंभचारिणो' मनसा मैथुनकर्मणि प्रवृत्तस्य। 'अविरदस्स' अव्यावृत्तस्य मैथुनात्। 'मणसा' चित्तेन। 'से' तस्य कायेन तु शरीरेणैव। 'सीलवहणं' ब्रह्मव्रतवहनं। 'होदि' भवति। 'णडसमणरूवं व' नटानां श्रमणरूपमिव। कायेन भावश्रामण्यरहितं यथा अफलमेवमिदमपि इति भावः ॥१२३९॥

रोगं इच्छेज्ज जहा पडियारसुहस्स कारणे कोई।
तह अण्णेसदि दुक्खं सणिदाणो भोगतण्हाए ॥१२४०॥

'रोगं इच्छेज्ज' व्याधिमभिलषति। 'जहा कोई' यथा कश्चित्। किमर्थं? 'पडियारसुहस्स कारणे' औषधसेवासुखाधिगमनार्थं। 'तह' तथा 'अविरदस्स' अव्यावृत्तस्य। 'अण्णेसदि' अन्वेषते। 'दुक्खं' दुःखं। कः? 'सणिदाणो' सनिदानः। 'भोगतण्हाए' भोगतृष्णया ॥१२४०॥

खंधेण आसणत्थं वहेज्ज गरुगं सिलं जहा कोइ।
तह भोगत्थं होदि हु संजमवहणं णिदाणेण ॥१२४१॥

'खंधेण' स्कन्धेन। 'जहा कोइ' यथा कश्चित्। 'गरुगं सिलं' गुर्वी शिलां। 'वहेज्ज' वहति। किमर्थं?

गा०—जैसे व्यापारी लोभवश लाभके लिये अपना माल बेचता है। वैसे ही निदान करनेवाला मुनि भोगोंके लिए धर्मको बेचता है ॥१२३८॥

भोगोंका निदान करनेवालेके मुनिपदकी निन्दा करते हैं—

गा०-टी०—भोगोंका निदान करनेवालोंके अभ्यन्तरमें वेदजनित राग रहता है अतः वह परिग्रही है। तथा वह मनसे मैथुन कर्ममें प्रवृत्त होनेसे अब्रह्मचारी है और मनसे मैथुनसे निवृत्त न होनेसे अविरत है। वह केवल शरीरसे ब्रह्मचर्यव्रत धारण करता है अतः वह नटश्रमण है। जैसे नट श्रमणका वेश धारण करता है वैसे ही उसने भी श्रमणका वेश धारण किया है। भावश्रामण्यके बिना केवल शरीरसे मुनि बनना जैसे व्यर्थ है उसी तरह उस मुनिका मुनिरूप भी व्यर्थ है ॥१२३९॥

गा०—जैसे कोई औषधि सेवनके सुखकी अभिलाषासे रोगी होना चाहता है वैसे ही निदान करनेवाला भोगोंकी तृष्णासे दुःख चाहता है ॥१२४०॥

गा०—मैं इसके ऊपर सुखपूर्वक बैठूँगा, ऐसा मानकर जैसे कोई भारी शिलाको कन्धेपर उठाता है और उसके उठानेके कष्टकी परवाह नहीं करता। वैसे ही इस दुर्धर संयमको धारण

---

१. -वतः श्रमण्यं प्रणिगदति-आ०।

'आसनत्थं' आसनार्थं। अस्या उपरि सुखेनासे इति मत्वा स यथा गुरुशिलोद्वहनखेदं नापेक्षते, स्वल्पं तस्या उपर्यासनसुखमपेक्षते स्वबुद्धया। 'तह भोगत्थं खु' तथा भोगार्थमेव। 'होदि' भवति। 'संजमवहणं' दुर्वहं संयमधारणं। 'णिदाणेण' निदानेन सह ॥१२४१॥

बाह्यवस्तुजनितादिन्द्रियसुखात्तन्निमित्तवस्तुविनाशे यज्जायते दुःखं तदधिकतरं अतः स्वल्पसुखनिमित्तं को नाम सचेतनो दुःखभीरुर्दुःखाब्धौ पतेदिति दर्शयति—

भोगोवभोगसोक्खं जं जं दुक्खं च भोगणासम्मि।
एदेसु भोगणासे जातं दुक्खं पडिविसिट्ठं ॥१२४२॥

'भोगोवभोगसोक्खं' मृष्टाशनताम्बूलादिकैः स्त्रीवस्त्रालङ्कारादिभिश्च जनितं यत्सुखं। 'भोगणासम्मि' सुखसाधनस्य वस्तुनो विनाशे च। 'जं जं दुक्खं च' यद्यद्दुःखं जायते। 'एदेसु' एतयोः सुखदुःखयोः 'भोगणासे' सुखसाधनानां विनाशे च। 'जातं दुक्खं पडिविसिट्ठं' अधिकतममिति यावत् ॥१२४२॥

देहे छुहादिमहिदे चले य सत्तस्स होज्ज कह सोक्खं।
दुक्खस्स य पडियारो रहस्सणं चेव सोक्खं खु ॥१२४३॥

'देहे' शरीरे मनुजानां। 'छुहादिमहिदे' क्षुधा, पिपासया, शीतोष्णेन, व्याधिभिश्च मथिते। 'चले' अनित्ये च। 'सत्तस्स' आसक्तस्य। 'किं च सुखं होज्ज' किमत्र सुखं भवेत्। 'दुक्खस्स य पडियारो' दुःखस्य प्रतीकारः। 'रहस्सणं चेव' ह्रस्वकरणं एव 'सोक्खं' सौख्यं। खु शब्दः पादपूरणे दुःखप्रतीकारो ऽल्पता वा दुःखस्य सुखमित्यनेनाख्यातम् ॥१२४३॥

सुखमन्तरेणापि अस्ति दुःखं, सुखं पुनरैन्द्रियकं न जायते दुःखं विना ततः सुखार्थी दुःखमेव प्रागात्म-

---

करनेसे मुझे भोगोंकी प्राप्ति हो इस निदानके साथ जो संयम धारण करता है उसका संयम धारण भोगोंके लिये है अर्थात् स्वल्पसुखके लिए बहुत दुःख उठाता है ॥१२४१॥

आगे कहते हैं कि बाह्य वस्तुसे उत्पन्न होनेवाले इन्द्रिय सुखसे उस सुखमें निमित्त वस्तुका विनाश होनेपर जो दुःख होता है वह अधिक है, अतः थोड़ेसे सुखके लिये कौन दुःखभीरु ज्ञानी दुःखके समुद्रमें गिरना पसन्द करेगा—

गा०—भोग अर्थात् सुस्वादु भोजन पान आदि और उपभोग अर्थात् स्त्री वस्त्र अलंकार आदिसे होनेवाला सुख तथा सुखके साधनमें निमित्त वस्तुका विनाश होनेपर होनेवाला दुःख, इन दोनों सुख और दुःखमेंसे भोगके साधनोंका विनाश होनेपर होनेवाला दुःख बहुत अधिक होता है ॥१२४२॥

गा०—यह शरीर भूख, प्यास, शीत, उष्ण तथा रोगोंसे पीड़ित और विनाशशील है। इसमें जो आसक्त है उसे क्या सुख होता है? वास्तवमें दुःखका प्रतीकार अथवा दुःखको कम करना ही सुख है। अर्थात् दुःखके प्रतीकारको या दुःखकी कमीको ही सुख मान लिया गया है। वास्तवमें सुख नहीं है ॥१२४३॥

सुखके विना भी दुःख होता है किन्तु इन्द्रियजन्य सुख दुःखके विना नहीं होता। अतः

---

१. कारोत्पत्तौ वा—आ० मु०।

योऽभिलषति न च दुःखाभिलाषः प्राज्ञस्य युक्त इति कथयति—

सोक्खं अणवेक्खित्ता बाधदि दुक्खमणुगंपि जह पुरिसं ।
तह अणवेक्खिय दुक्खं णत्थि सुहं णाम लोगम्मि ॥१२४५॥

'सोक्खं' सौख्यं । 'अणवेक्खित्ता' अनपेक्ष्य । 'बाधदि दुक्खमणुगं पि' बाधते दुःखमण्वपि । 'जह पुरिसं' यथा पुरुषं । 'तह' तथा । 'अणवेक्खिय' अनपेक्ष्य । 'दुक्खं' दुःखं । 'लोगम्मि णत्थि सुहं' लोके नास्ति सुखं मार्गेन्द्रियकं । क्षुत्पिपासाभ्यां पीडित एवाशनं पानं चान्वेषते । कठोरातपतप्त एव शीतं, शीतसंकुचिततनुरेव प्रावरणादिकं, वातातपाम्बुभिरेवोपद्रुतो भवनमभिलषति । स्थानासनोपजातश्रम एव शय्यां कामयते । पादगमनजातखेदव्यपोहनार्थैव शिबिकादिकं, वैरूप्यनिराकृतये एव वस्त्राणि भूषणानि च दौर्गन्ध्यनाशनायैव पुष्पकालागुर्वादिकं, खेदनाशायैव रमण्य इति सर्वं दुःखप्रतीकारमेव । त्रिविधवेदोदयजनितः प्राणिनां लिङ्गत्रयवर्तिनां परस्पराभिलाषः । स तेषां परस्परशरीरसंसर्गे सत्यपि न विनश्यति । अभिलाषनिमित्तानां कर्मणां सद्भावात् । न हि कार्यमविकलकारणसन्निधौ न भवति । कामो हि सेव्यमानो वेदत्रयं प्रत्यग्रमाकर्षति । सतोऽप्यनुभवमुपबृंहयते । कारणसम्पर्कात्कार्यसम्पादो नित्यमिति निरन्तराभिलाषदहनदह्यमानचेतसो न कदाचिन्निर्वृतिरस्ति । अपनीते तु वेदत्रये कारणाभावात् कार्याभाव इति निरवशेषवेदापगमे स्वास्थ्यं यदस्य तदेव सुखमिति मन्यमानो दृष्टान्तं दर्शयति ॥१२४५॥

जो इन्द्रिय सुखका अभिलाषी है वह पहले दुःख चाहता है किन्तु विद्वान्‌के लिए दुःखको चाह युक्त नहीं है यह कहते हैं—

गा०—जैसे सुखकी अपेक्षाके विना थोड़ा-सा भी दुःख पुरुषको कष्टदायक होता है वैसे ही लोकमें इन्द्रियजन्य सुख दुःखकी अपेक्षाके विना नहीं है ॥१२४५॥

टी०—भूख और प्याससे पीड़ित पुरुष ही भोजन और पेयको खोजता है। कठोर घामसे पीड़ित शीतल प्रदेश खोजता है। शीतसे जिसका शरीर ठिठुर गया है वही ओढ़ना आदि खोजता है। वायु घाम वर्षा आदिसे पीड़ित ही मकान खोजता है। उठने बैठनेमें थका हुआ ही शय्या चाहता है। पैदल चलनेसे हुए कष्टको दूर करनेके लिए ही सवारी आदि चाहता है। विरूपता दूर करनेके लिए ही वस्त्र आभूषण चाहता है। दुर्गन्ध दूर करनेके लिए ही सुगन्धित द्रव्य लोबान आदि होते हैं। खेद दूर करनेके लिए ही सुन्दर स्त्रियाँ होती हैं। इस तरह सब दुःखके प्रतीकारके लिए हैं। स्त्री लिङ्गी, पुरुष लिङ्गी और नपुंसक लिङ्गी प्राणियोंको स्त्रीवेद पुरुषवेद और नपुंसकवेदके उदयसे परस्परमें रमण करनेकी अभिलाषा होती है। किन्तु वह अभिलाषा परस्परमें शारीरिक संसर्ग होनेपर भी नष्ट नहीं होती; क्योंकि उस अभिलाषामें निमित्त वेदकर्मका सद्भाव है। कारणोंके अविकल होते हुए कार्य अवश्य होता है। कामका सेवन करनेसे नवीन स्त्रीवेद पुरुषवेद या नपुंसकवेदका बन्ध होता है। तथा सत्तामें स्थित इन कर्मोंके अनुभागमें वृद्धि होती है क्योंकि कारणके होनेपर कार्य नित्य ही हुआ करता है। जिनके चित्त निरन्तर अभिलाषारूप आगसे जलते हैं उन्हें कभी भी शान्ति नहीं मिलती। तीनों वेदोंके चले जानेपर कारणका अभाव होनेसे कार्यका भी अभाव होता है। अतः वेदोंका पूर्णरूपसे अभाव होनेपर जो स्वास्थ्य होता है वही सुख है ॥१२४५॥

जह कोडिल्लो अग्गिं तप्पंतो णेव उवसमं लभदि ।
तह भोगे भुंजंतो खणं पि णो उवसमं लभदि ॥१२४५॥

'**जह कोडिल्लो**' यथा कुष्ठेनोपद्रुत. । '**अग्गिं तप्पंतो**' अग्निना दह्यमानमूर्तिरपि । '**णेव उवसमं लभदि**' नैव व्याधेरुपशमं लभते । न ह्यग्निरुपशामक: कुष्ठस्यापि तु वर्द्धक. । यद्यस्य वृद्धिनिमित्तं न तत्तदुपशमयति । यथा कुष्ठं नोपशमयति वह्नि: । वर्धयति चाभिलाषं अब्लादिमगम '**तह**' तथा । '**भोगे भुंजंतो**' भोगानुपभोग्यत' । '**खणंपि णो उवसमं लभदि**' क्षणमात्रमपि नोपशमं लभते भोगाभिलाषरोगस्य ॥१२४५॥

कच्छुं कंडुयमाणो सुहाभिमाणं करेदि जह दुक्खे ।
दुक्खे सुहाभिमाणं मेहुण आदीहिं कुणदि तहा ॥१२४६॥

'**कच्छुं**' कच्छुं । '**कंडुयमाणो**' नखैर्मर्दयन् । '**सुहाभिमाणं करेइ**' सुखाभिमानं करोति । '**जह दुक्खं**' यथा दुःखे । '**तह मेहुण आदीहिं**' तथा मैथुनादिदुःखे रभसालिङ्गने, अधरदशने, उरस्ताडने नखैर्निशितैरङ्गच्छेदने कचाकर्षणे । उक्तं च—

> नग्न: प्रेत इवाविष्ट: स्वनन्निव शवन्निव ।
> श्वासायासपरिश्रान्त: स कामी रमते किल ॥१॥ इति ॥ [ ] ॥१२४६॥

घोसादकीं य जह किमि खंतो मधुरित्ति मण्णदि वराओ ।
तह दुक्खं वेदंतो मण्णइ सुक्खं जणो कामी ॥१२४७॥

'**घोसादकीं**' घोषातकीं । '**किमि**' कृमि' । '**खंतो**' भक्षयन् । '**जहा मधुरित्ति**' यथा मधुरमिति मन्यते वराक: । '**तह**' तथैव । '**दुक्खं वेदंतो**' दुःखमनुभवन् । '**मण्णदि सोक्खं जणो कामी**' मन्यते कामिजन: सुखं ॥१२४७॥

इसे दृष्टान्त द्वारा बतलाते हैं—

गा०—जैसे कुष्ठ रोगसे पीड़ित व्यक्तिका शरीर आगमें जलने पर भी कुष्ठ रोग शान्त नहीं होता; क्योंकि आग कुष्ठ रोगको शान्त नहीं करती, बल्कि बढ़ाती है। और जो जिसको बढ़ाता है वह उसको शान्त नहीं कर सकता। जैसे आग कुष्ठ रोगको शान्त नहीं करती। उसी प्रकार स्त्रीका संगम स्त्री विषयक अभिलाषाको बढ़ाता है। अत: जो भोगोंके भोगनेमें तत्पर है उसका भोगकी अभिलाषा रूप रोग एक क्षणके लिए भी शान्त नहीं होता ॥१२४५॥

गा०-टी०—जैसे खाजको नखोंसे खुजाने वाला दुःखको सुख मानता है। उसी प्रकार मैथुनके समय वेगपूर्वक आलिंगन, ओष्ठ काटना, छाती मसलना, तीक्ष्ण नखोंसे शरीर नोंचना, केश खींचना आदिसे होने वाले दुःखको कामी सुख मानता है। कहा भी है—कामी पुरुष पिशाचसे ग्रहीत पुरुषकी तरह नग्न होकर स्त्रीके साथ रमण करता है और श्वास तथा थकानसे पीड़ित होकर शब्द करते हुए श्वास लेता है ॥१२४६॥

गा०—जैसे बेचारा कीट घोषा नामक लताको खाते हुए उसे मीठी मानता है उसी प्रकार कामी जन दुःखका अनुभव करते हुए उसे सुख मानता है ॥१२४७॥

सुट्ठु वि मग्गिज्जंतो कत्थ वि कयलीए णत्थि जह सारो।
तह णत्थि सुहं मग्गिज्जंते भोगेसु अप्पं पि ॥१२४८॥

'सुट्ठु वि' सुष्टु अपि। 'मग्गिज्जंतो' मृग्यमाणोऽपि। सारः कदल्यां क्वचिदपि मूले मध्येऽन्ते वा यथा नास्ति तथा भोगेष्वन्विष्यमाणं सुखं न विद्यते ॥१२४८॥

ण लहदि जह लेहंतो सुक्खल्लयमट्ठियं रसं सुणहो।
से सगतालुगरुहिरं लेहंतो मण्णए सुखं ॥१२४९॥

'जध सुणगो सुक्खल्लयमट्ठियं लेहंतो रसं जहा ण लभदि' श्वा शुष्कमस्थि लिहन् सन् यथा रसं न लभते। 'सगतालुगरुहिरं लेहंतो सो सोक्खं मण्णदे' तीक्ष्णास्थिछिन्नस्वतालुगलितरुधिरमास्वादयन्सुखाभिमानं करोति। 'जह तह' यथा तथा। 'पुरिसो ण किंचि सुखं लभइ' पुरुषो न किंचित्सुखं लभते ॥१२४९॥

महिलादिभोगसेवी ण लहदि किंचिवि सुहं तथा पुरिसो।
सो मण्णदे वराओ सगकायपरिस्समं सुक्खं ॥१२५०॥

'महिलादिभोगसेवी' स्त्र्यादिभोगसेवनोद्यतः। तथा 'पुरिसो ण किंचि वि सुहं लहदि' तथा पुरुषो न किंचिदपि सुखं लभते एव। 'सो वराओ सगकायपरिस्समं सोक्खं मण्णदे' स वराकः स्वकायश्रमं सौख्यं मन्यते ॥१२५०॥

अनुभवसिद्धं सुखं कथं नास्तीति शक्यते वक्तुं इत्याशङ्क्य असत्यपि सुखे सुखज्ञानं जगतो भवति विपर्यस्तं सुखकारणस्येति दृष्टान्तोपन्यासेन वदति—

दीसइ जलं व मयतण्हिया हु जह वणमयस्स तिसिदस्स।
भोगा सुहं व दीसंति तह य रागेण तिसियस्स ॥१२५१॥

'दीसइ वणमयस्स तिसियस्स जहा जलं मयतण्हिया' वने मृगेण हरिणादिना तृषाभिभूतेन जलकांक्षा-

---

गा०—जैसे अच्छी तरह खोजने पर भी केलेके वृक्षमें मूल मध्य या अन्तमें कहीं भी कुछ सार नहीं है वैसे ही खोजने पर भी भोगोंमें कुछ भी सार नहीं है ॥१२४८॥

गा०—जैसे कुत्ता सूखी हड्डीको चबाते हुए रस प्राप्त नहीं करता। किन्तु तीक्ष्ण हड्डीके द्वारा कटे अपने तालुसे झरते हुए रक्तका स्वाद लेते हुए सुख मानता है ॥१२४९॥

गा०—उसी तरह पुरुष स्त्री आदि विषयभोगमें किञ्चित् भी सुख प्राप्त नहीं करता वह बेचारा अपने शरीरके श्रमको ही सुख मानता है ॥१२५०॥

विषयभोगमें सुख अनुभवसे सिद्ध है आप कैसे कहते हैं कि उसमें सुख नहीं है ऐसी आशंका करने पर दृष्टान्त द्वारा कहते हैं कि सुखके नहीं होने पर भी सुखके कारणमें विपरीत बुद्धि होनेसे जगत्को सुखका बोध होता है—

गा०—जैसे वनमें हरिण आदि जब प्याससे व्याकुल होकर जलकी इच्छा करते हैं तो उन्हे मरीचिका जलके समान प्रतीत होती है किन्तु हरिणके उसे जल मानने पर भी वह जल रूप नहीं होती। उसी प्रकार रागके प्यासेको भोग सुखकी तरह प्रतीत होते हैं ॥१२५१॥

यथा जलमिव दृश्यते मृगतृष्णिका। न सा मृगेण जलतयोपलब्धेऽपि जलं भवति। तथा 'रागेण तिसियस्स भोगा सुहं व दीसंति' रागतृषितेन भोगाः सुखमिव दृश्यन्ते ॥१२५१॥

वग्घो सुखेज्ज मदयं अवगासेऊण जह मसाणम्मि।
तह कुणिमदेहसंफंसणेण अबुहा सुहायंति ॥१२५२॥

'वग्घो सुखेज्ज' 'श्मशाने व्याघ्रो मृतकमवग्रास्य तुप्यति यथा तथा कुथितदेहसंस्पर्शनेनाबुधा सुखाधिगमहर्षनिर्भरा भवन्ति ॥१२५२॥

भवतु नाम सुखं भोगस्तथापि तदत्यल्पमिति निवेदयति—

तह अप्पं भोगसुहं जह धावंतस्स अठितवेगस्स।
गिम्हे उण्हातत्तस्स होज्ज छायासुहं अप्पं ॥१२५३॥

'तथा अप्पं भोगसुहं धावंतस्स अठितवेगस्स गिम्हे उण्हातत्तस्स जहा छायासुहं अप्पं तह अप्पं भोगसुहं' धावतोऽस्थितवेगस्य ग्रीष्मे उष्माभितप्तस्य यथा मार्गस्थैकतरुच्छायासुखमल्प भोगसुख तथा ॥१२५३॥

अहवा अप्पं आसाससुहं सरिदाए उप्पियंतस्स।
भूमिच्छिक्कंगुट्ठस्स उब्भमाणस्स होदि सोत्तेण ॥१२५४॥

'अहवा' अथवा। 'अप्पं' अल्पं। 'आसाससुहं' आश्वास एव सुखं। 'सरिदाए' नद्या। 'उप्पियंतस्स' निमज्जतः। 'भूमिच्छिक्कंगुट्ठस्स' भूमिस्पृष्टाङ्गुष्ठस्य। 'सोत्तेण उब्भमाणस्स' स्रोतसा प्रवाहेनोह्यमानस्य। अल्पं आश्वाससुखं तद्वदिन्द्रियसुखमत्यल्पमित्यतिक्रान्तेन संबन्धः ॥१२५४॥

इन्द्रियसुखानि यद्यलब्धपूर्वाणि युक्तो विस्मयस्तव तानि सर्वाणि अनन्तवारपरिभुक्तानि तेषु भुक्तेषु परित्यक्तेषु न युक्तो विस्मय इति अनादरं जनयति तेषु सूरि—

जावंति केइ भोगा पत्ता सव्वे अणंतखुत्ता ते।
को णाम तत्थ भोगेसु विंभओ लद्धविजडेसु ॥१२५५॥

गा०—जैसे स्मशानमें व्याघ्र मुर्देको खाकर सुखी होता है वैसे ही दुर्गन्धित शरीरके आलिंगनमें अज्ञानी सुख मानकर हर्षसे भर जाते हैं ॥१२५२॥

आगे कहते हैं कि भोगमें भले ही सुख हो किन्तु वह सुख अति अल्प है—

गा०—जैसे ग्रीष्म ऋतुमें अत्यन्त वेगसे दौड़ते हुए और मध्यकालके सूर्यकी किरणोंसे संतप्त पुरुषको मार्गमें स्थित एक वृक्षकी छायामें जानेसे थोड़ा-सा सुख होता है वैसे ही भोगमें अति अल्प सुख है ॥१२५३॥

गा०—अथवा नदीमें डूबते हुए और प्रवाहके द्वारा बहाकर ले जाते हुए मनुष्यको भूमिसे अंगूठेके छू जाने पर जैसा अल्प आश्वास सुख होता है कि मैं तट पर लग जाऊँगा, उसी प्रकार इन्द्रियजन्य सुख अति अल्प होता है ॥१२५४॥

गा०—यदि इन्द्रिय सुख पूर्वमें कभी प्राप्त न हुए होते तो उनकी प्राप्तिमें हर्ष होना

---

१. स्मशाने मृतकं शवं भुक्त्वा व्याघ्रस्तृप्यति—आ०।

'जाणंति केइ जीवा' यावन्तः केचन भोगाः । 'ते सव्वे पत्ता अणंतखुत्ता दे' सर्वे प्राप्ता अनन्तवारं तव । 'को णाम तत्थ भोगेसु' को नाम तेषु भोगेषु विस्मयः समुपोज्झितेषु ॥१२५५॥

भोगतृष्णा निरन्तरं दहति भवन्तं, सेव्यमानाः पुनर्भोगास्तामेव तृष्णां वर्द्धयन्ति ततो भोगेच्छां शिथिलतां नेयेति वदति—

जह जह भुंजइ भोगे तह तह भोगेसु वड्ढदे तण्हा ।
अग्गीव इंधणाइं तण्हं दीविंति से भोगा ॥१२५६॥

'जह जह भुंजदि भोगे' यथा यथा भोगाननुभुङ्क्ते । 'तह तह' तथा तथा । 'भोगेसु वड्ढदे तण्हा' भोगेषु वर्धते तृष्णा । 'अग्गि व' अग्निं वा । यथा 'इंधणाइं' इन्धनानि । 'दीविंति' दीपयन्ति । 'तहा' तथा । 'तण्हं' तृष्णां दीपयन्ति । 'से' तस्य भोक्तुर्भोगाः । तथा चोक्तं—

तृष्णार्चिषः परिदहन्ति न शान्तिरासां । इष्टेन्द्रियार्थविभवैः परिवृद्धिरेव ॥ [बृहत्स्वयंभू०] ॥१२५६॥

जीवस्स णत्थि तित्ती चिरं पि भोएहिं भुंजमाणेहिं ।
तित्तीए विणा चित्तं उव्वूरं उव्वुदं होइ ॥१२५७॥

'जीवस्स' जीवस्य । नास्ति तृप्तिश्चिरकालमपि भोगाननुभवतः पल्योपमत्रयं कालं भोगभूमिषु त्रयस्त्रिंशत्सागरोपमकालं अमरेषु । तृप्त्या च विना चित्तं । 'उव्वूरं उव्वुदं' उत्पूरं उच्छृतं भवतीति सूत्रार्थः ॥१२५७॥

जह इंधणेहि अग्गी जह व समुद्दो णदीसहस्सेहिं ।
तह जीवा ण हु सक्का तिप्पेदुं कामभोगेहिं ॥१२५८॥

'जह इंधणेहिं' यथेन्धनैरग्निर्न तृप्यति । यथा वा समुद्रो नदीसहस्रैः । तथा जीवो न शक्यो भोगैस्तर्पयितुं ॥१२५८॥

उचित था, किन्तु उन सबको तुमने अनन्त वार भोगा है। उन भोगकर छोड़े गये विषयोंमें हर्ष मानना उचित नहीं है। इस प्रकार आचार्य विषयोंके प्रति अनादर भाव उत्पन्न करते हैं—जितने संसारके भोग हैं वे सब तुमने अनन्त बार प्राप्त किये हैं उन प्राप्त करके छोड़े गये विषयोंमे आश्चर्य कैसा ? ॥१२५५॥

आगे कहते हैं कि तुम्हें भोगोंकी तृष्णा निरन्तर जलाती है। भोगोंका सेवन उसी तृष्णाको बढ़ाता है अतः भोगोंकी इच्छाको कम करो—

गा०—जैसे जैसे भोगोंको भोगते हो वैसे वैसे भोगोंकी तृष्णा बढ़ती है। जैसे इंधनसे आग प्रज्वलित होती है वैसे ही भोगोंसे तृष्णा बढ़ती है। कहा भी है—यह तृष्णारूपी ज्वाला सदा जलाती है, इष्ट इन्द्रियोंके विषयोंसे इनकी तृप्ति नहीं होती, बल्कि बढ़ती है ॥१२५६॥

गा०—तीन पल्य तक भोगभूमिमें, तेतीस सागर तक देवोंमें इस तरह चिरकाल तक भोगोंको भोगते हुए भी तृप्ति नहीं होती और तृप्तिके विना चित्त अत्यन्त उत्कण्ठित रहता है ॥१२५७॥

गा०—जैसे ईंधनसे आगकी तृप्ति नहीं होती। अथवा जैसे हजारों नदियोंसे समुद्रकी

देविंदचक्कवट्टी य वासुदेवा य भोगभूमीया।
भोगेहिं ण तिप्पंति हु तिप्पदि भोगेसु किह अण्णो ॥१२५९॥

'देविंद' देवानामधिपतयः, चक्रलाञ्छना वासुदेवा अर्धचक्रवर्तिन., भोगभूमिजाश्च भोगैर्न तृप्यन्ति। कथमन्यो अनस्तृप्तिमुपेयाद्भोगैः। सुलभामितभोगसाधनाश्चिरजीविनः स्वतन्त्राश्चामी। अन्ये तु भवादृशा जठरभरणमात्रमपि कर्तुं अशक्ताः स्वल्पायुषः, पराधीनवृत्तयश्च तृप्यन्तीति का कथा ॥१२५९॥

संपत्तिविवत्तीसु य अज्जणरक्खणपरिग्गहादीसु।
भोगत्थं होदि णरो उद्धुयचित्तो य घण्णो य ॥१२६०॥

'संपत्तिविवत्तीसु य' सम्पत्सु विपत्सु च। 'अज्जणरक्खणपरिग्गहादीसु' द्रव्यस्यालब्धस्यार्जने[1], पुञ्जीकरणे, राशीकृतस्य रक्षणे। पर हस्ते विप्रकीर्णस्य ग्रहणे। आदिशब्देन तद्व्ययकरणे वा। भोगत्थं अनुभवार्थं। अर्जनादिषु प्रवृत्तः। 'उद्धुयचित्तो य णरो होदि' चलचित्त उत्कण्ठावांश्च भवति नर.। द्रव्यसम्पदि जातायां रागाच्चलचित्तं भवति। द्रविणादिविनाशे कथं जीवामि पुनर्द्रव्यार्जनं करोमीति ॥१२६०॥

उद्धुयमणस्स ण सुहं सुहेण य विणा कुदो हवदि पीदी।
पीदीए विणा ण रदी उद्धुयचित्तस्य घण्णस्स ॥१२६१॥

'उद्धुयमणस्स' व्याकुलचित्तस्य 'ण सुहं' न सुखं भवति। 'सुहेण य विणा कुदो हवदि पीदी' सुखेन विना कुतो भवति प्रीतिस्तृप्तिः। 'पीदीए विणा' प्रीत्या विना। 'ण रदी' न रतिः। 'उद्धुयचित्तस्स' व्याकुलचेतसः। 'घण्णस्स' उत्कण्ठाडाकिन्या गृहीतस्य ॥१२६१॥

तृप्ति नहीं होती, वैसे ही भोगोंसे जीवकी तृप्ति नहीं होती ॥१२५८॥

गा०–टी०—देवोंके अधिपति इन्द्र, चक्रवर्ती, वासुदेव अर्थात् अर्धचक्री और भोगभूमियाँ जीव भी भोगोंसे तृप्त नहीं होते। तब साधारण मनुष्य कैसे भोगोंसे तृप्त हो सकता है? अर्थात् इनके लिए भोगोंके अपरिमित साधन सुलभ हैं, तथा इनकी आयु भी बहुत होनेसे चिरकालतक ये जीवित रहते हैं और किसीके अधीन न होनेसे स्वतन्त्र होते हैं। आप सरीखे साधारण मनुष्य तो पेट भरनेमें भी असमर्थ और थोड़ी आयुवाले तथा पराधीन होते हैं। अतः उनकी भोगोंसे तृप्ति होनेकी तो बात ही क्या है? ॥१२५९॥

गा०—सम्पत्ति होनेपर मनुष्य अप्राप्त द्रव्यके कमानेमें, एकत्र हुए द्रव्यके रक्षणमें, दूसरेके हाथमें गई सम्पत्तिको उससे लेनेमें और आदि शब्दसे उसे खर्च करनेमें, तथा भोगनेमें व्याकुल रहता है और विपत्तिमें अर्थात् धन आदिका विनाश होनेपर कैसे मैं जीवित रहूँगा? कैसे पुनः द्रव्य कमाऊँगा इस उत्कण्ठासे व्याकुल रहता है ॥१२६०॥

गा०—जिसका चित्त व्याकुल रहता है उसे सुख नहीं होता। सुखके बिना प्रीति नहीं होती। प्रीतिके बिना रति नहो होती। इस तरह जिसका चित्त व्याकुल रहता है और जो उत्कण्ठारूपी डाकिनीसे ग्रस्त है उसे सुख कैसे हो सकता है और सुखके बिना प्रीति और प्रीतिके बिना रति सम्भव नहीं है ॥१२६१॥

१. स्वावर्जनं मु०—आ०।

जो पुण इच्छदि रमिदुं अज्झप्पसुहम्मि णिव्वुदिकरम्मि ।
कुणदि रदिं उवसंतो अज्झप्पसमा हु णत्थि रदी ॥१२६२॥

'जो पुण इच्छदि रमिदुं' यः पुना रमितुं इच्छति । 'सो कुणदि रदिं' स करोतु रतिं । क्व ? 'अज्झप्पसुहम्मि' अध्यात्मसुखे । 'णिव्वुदिकरम्मि' निर्वृतिकरे । 'उवसंतो' उपशान्तरागकोपः । एतदुक्तं भवति—मनोज्ञामनोज्ञविषयसन्निधाने स्वसंकल्पहेतुको यौ रागद्वेषौ तौ परित्यज्य निर्वृतितृप्तिकरे अध्यात्मसुखे रतिं करोतु । 'अज्झप्पसमा' आत्मस्वरूपविषया रतिरध्यात्मशब्देनोच्यते । तया सदृशी रतिः । 'णत्थि हु' न विद्यते एव । यस्मात् भोगरतिरध्यात्मनो रत्या न सदृशी ॥१२६२॥

कथम् ?

अप्पायत्ता अज्झप्परदी भोगरमणं परायत्तं ।
भोगरदीए चइदो होदि ण अज्झप्परमणेण ॥१२६३॥

'अप्पायत्ता' स्वायत्ता । 'अज्झप्परदी' आत्मस्वरूपविषया रतिः परद्रव्यानपेक्षणात् । 'भोगरमणं' भोगरतिः 'परायत्तं' परायत्ता परद्रव्यालम्बनत्वात् । तेषां च कथंचिदेव सान्निध्यं क्वचिदेव कस्यचिदेवेति । एतेन स्वायत्ततया परायत्ततया चासाम्यमाख्यातं । प्रकारान्तरेणापि वैषम्यं दर्शयति । 'भोगरदीए चइदो होदि' भोगरत्या च्युतो भवति । न प्रच्युतो भवति 'अज्झप्परमणेण' अध्यात्मरत्या ॥१२६३॥

अनेकविघ्नसहिता विनाशिनी च भोगरतिः, अध्यात्मरतेस्तु भावितायाः न नाशो नापि विघ्न इति कथयत्युत्तरगाथा—

भोगरदीए णासो णियदो विग्घा य होंति अदिबहुगा ।
अज्झप्परदीए सुभाविदाए णासो ण विग्घो वा ॥१२६४॥

गा०—टी०—हे क्षपक ! जो तू रमण करना चाहता है तो रागद्वेषका शमन करके परम तृप्तिकारक अध्यात्म सुखमें रति कर । कहनेका अभिप्राय यह है कि इष्ट और अनिष्ट विषयोंके प्राप्त होनेपर 'यह अच्छा है और यह बुरा है' इस प्रकारके संकल्पके कारण जो रागद्वेष होते हैं उन्हें त्यागकर तृप्तिकारक अध्यात्म सुखमें रमण कर । यहाँ अध्यात्म शब्दसे आत्मस्वरूप विषयक रति कही है । उसके समान कोई रति नहीं है । क्योंकि भोगसम्बन्धी रति अध्यात्म विषयक रतिके समान नहीं है ॥१२६२॥

गा०—टी०—क्योंकि आत्मस्वरूप विषयक रति अपने अधीन है उसमें परद्रव्यकी अपेक्षा नहीं है । किन्तु भोग रति पराधीन है क्योंकि उसमें परद्रव्यका अवलम्बन लेना होता है । और परद्रव्य कभी-कभी ही किसी किसीको ही थोड़े बहुत प्राप्त होते हैं । इससे स्वाधीन और पराधीन होनेसे दोनोंमें असमानता कही । अन्य प्रकारसे भी दोनोंमें विषमता बतलाते हैं—

भोग रतिसे तो मनुष्य वंचित हो जाता है किन्तु अध्यात्म रतिसे नहीं होता क्योंकि आत्म द्रव्य सर्वत्र सर्वदा और सर्वथा उसके पास रहता है ॥१२६३॥

भोग रतिमें अनेक विघ्न रहते हैं और वह नष्ट होने वाली है किन्तु भावित अध्यात्म रतिका कभी नाश नहीं होता और न उसमें विघ्न आता है, यह आगे कहते हैं—

'भोगरदीए' भोगरत्याः । 'णियदो णासो' नियतो विनाशः । 'विग्धा य हुंति' विघ्नाश्च भवन्ति । 'अविबहुगा' अतीव बहवः । 'अज्झप्परदीए' अध्यात्मरतेः । 'सुभाविदाए' सुष्ठु भाविताया: । 'णासो' नाशो, न विद्यते । 'विग्धा वा' विघ्ना वा न सन्ति । नियतं नश्वरतयाऽनश्वरतया वा बहुविघ्नतया, निर्विघ्नतया च तयो रत्योर्वैषम्यमिति भाव· ॥१२६४॥

इन्द्रियसुखं शत्रुतया सङ्कल्पनीयं तथा च तत्रादरो जन्तोर्निवृतेः अतो अतीन्द्रियसुखत्वमेव वीतरागत्व-हेतुके संवरे इति मत्वा सूरिर्गाथामिमाह—

दुक्खं उप्पादिंता पुरिसा पुरिसस्स होंति जदि सत्तू ।
अदिदुक्खं कदमाणा भोगा सत्तू किहुं ण हुंती ॥१२६५॥

'दुक्खं उप्पादिता' दुःखमुत्पाद्य । 'जदि सत्तू होंति' यदि शत्रवो भवन्ति । 'पुरिसा पुरिसस्स' पुरुषाः पुरुषस्य । 'अदिदुक्खं कुणमाणा भोगा' अतीव दुःखं कुर्वन्तो भोगा इन्द्रियसुखानि । 'किध सत्तू ण हुंति' कथं शत्रवो न भवन्ति भवन्त्येवेति । कथं भोगाना दुःखहेतुता एवं मन्यते ? इन्द्रियसुखं नाम स्त्रीवस्त्रगन्धमालादि-परद्रव्यसन्निधानजन्यं । तच्च स्त्र्यादिकं दुर्लभतमं निर्द्रविणस्य, तेन तदर्थं कृष्यादिकर्मणि प्रयतितव्यं । ततो महानायासः । इहैव भवानुगामी दुःखनिमित्तं च कर्म हिंसादिषु प्रवर्तमानोऽर्जयति । तदिमं दुरन्ते संसाराम्भोधौ निमज्जयति । तत्र च निमग्नेन कतमं दुःखमनेन नावाप्यते ॥१२६५॥

शत्रुतमा भोगा इति कथयति—

इहइं परलोगे वा सत्तू मित्तत्तणं पुणमुवेंति ।
इहइं परलोगे वा सदावि दुःखावहा भोगा ॥१२६६॥

'इहइं' अस्मिन्नेव जन्मनि । 'परलोगे वा' परजन्मनि वा । 'सत्तू' शत्रव. । 'मित्तत्तणं' मित्रतां ।

गा०—भोग रतिका नियमसे विनाश होता है तथा उसमें विघ्न भी बहुत हैं । किन्तु अच्छी रीतिसे भावित अध्यात्म रतिका न विनाश होता है और न उसमें कोई विघ्न आते हैं । इस तरह भोगरति नियमसे नश्वर और बहुत विघ्न वाली है तथा अध्यात्मरति निर्विघ्न और अविनाशी है इसलिए दोनोंमें कोई समानता नहीं है ॥१२६४॥

आचार्य कहते हैं कि इन्द्रिय सुखको शत्रुके समान मानो । ऐसा करनेसे उनमें जो आदर-भाव है वह दूर होगा । तथा अतीन्द्रिय सुख ही वीतरागताका कारण होनेसे संवर रूप है—

गा०-टी०—यदि दुःख देने वाले पुरुष पुरुषके शत्रु होते है तो अति दुःख देने वाले भोग अर्थात् इन्द्रिय सुख शत्रु क्यों नहीं हैं ? अवश्य हैं । भोग दुःखके कारण क्यों हैं यह विचार करें । स्त्री, वस्त्र, गन्धमाला आदि परद्रव्यके मिलनेसे जो होता है उसे इन्द्रिय सुख कहते हैं । वह स्त्री आदि धनहीनके लिए अत्यन्त दुर्लभ हैं । अतः धनकी प्राप्तिके लिए कृषि आदि कर्म करना चाहिए । उससे महान् आरम्भ होता है । हिंसा आदिमें प्रवृत्ति करनेमें इसी भव तथा परभवमें दुःख देने वाले कर्मका उपार्जन करता है । और वह कर्म उसे ऐसे संसार समुद्रमे डुबाता है जिसका पार पाना अत्यन्त कठिन है । उस संसार समुद्रमें डूबकर यह जीव कौन दुःख नहीं भोगता ॥१२६५॥

आगे कहते हैं कि भोग सबसे बड़े शत्रु हैं—

गा०—इस जन्ममें अथवा परजन्ममें शत्रु शत्रुताको छोड़कर मित्र बन जाते हैं । अर्थात्

'ढुक्कुंति' पुनढौकन्ते । क्षणवः शत्रुतामपि यान्तु । कार्यवशात्, उपकारातिशयसम्भावनान्मित्रतां वा यान्ति च । बाधा न स्फुटतरा । इहैव तथा परलोके वा 'सव्वदा दुक्खावहा भोगा' सर्वदा दुःखावहा भोगाः । ततः शत्रुतमा इति भावनीयं ॥१२६६॥

एगम्मि चेव देहे करेज्ज दुक्खं ण वा करेज्ज अरी ।
भोगा से पुण दुक्खं करंति भवकोडिकोडीसु ॥१२६७॥

'एगम्मि चेव देहे' एकस्मिन्नेव देहे । 'करेज्ज दुक्खं' ण वा करेज्ज अरी' कुर्याद्दुःखं न वा शत्रुः । 'भोगा पुण' भोगा पुनः । 'से' तस्य । 'दुक्खं करंति' दुःखं कुर्वन्ति । 'भवकोडिकोडीसु' अनन्तेषु भवेषु । एवं भोगदोषानवेत्यात्र निदानं त्वया न कार्यं इत्युपदिष्टं सूरिणा ॥१२६७॥

मधुमेव पिच्छदि जहा तडिओलंबो ण पिच्छदि पपादं ।
तह सणिदाणो भोगे पिच्छदि ण हु दीहसंसारं ॥१२६८॥

'मधुमेव पिच्छदि' मध्वेव पश्यति यथा तटेऽवलम्बमानः । 'ण पिच्छदि' न प्रेक्षते । 'पपादं' प्रपातमात्मनः । 'तह' तथा 'सणिदाणो' निदानसहितः । 'भोगे पिच्छदि' भोगान्प्रेक्षते । 'ण हु पेच्छदि' नैव प्रेक्षते । 'दीहसंसारं' दीर्घसंसारं ॥१२६८॥

जालस्स जहा अंते रमंति मच्छा भयं अयाणंता ।
तह संगादिसु जीवा रमंति संसारमगणंता ॥१२६९॥

'जालस्स' जालस्य । 'अंते' मध्ये । 'जहा मच्छा रमंति' यथा मत्स्या रमन्ते । 'भयमयाणंता' भयमनवबुध्यमानाः । 'तह संगादिसु' तथा परिग्रहादिषु । 'जीवा रमंति' जीवा रमन्ते । 'संसारमगणंता' संसारमगणयन्तः ॥१२६९॥

दुक्खेण देवमाणुसभोगे लद्धूण चावि परिवडिदो ।
णियदमदीदि कुजोणीं जीवो सघरं पउत्थो वा ॥१२७०॥

उपकार आदि करनेसे प्रभावित होकर शत्रु मित्र बन जाते हैं वह भी केवल कहनेके लिए नहीं किन्तु खुले दिलसे मित्र बन जाते हैं। किन्तु भोग इस जन्ममें और परजन्ममें सदा ही दुःखदायी होते हैं। इसलिए वे शत्रुसे भी बड़े शत्रु हैं ॥१२६६॥

गा०—शत्रु एक ही भवमें दुःख दे या न भी दे। किन्तु भोग तो अनन्त भवोंमें दुःख देते हैं ॥१२६७॥

इस प्रकार भोगोंके दोष जानकर हे क्षपक: तुम्हें निदान नही करना चाहिए, ऐसा आचार्य उपदेश देते हैं—

गा०—इस प्रकार जैसे कुऐंकी दीवारके एक ओर लटका हुआ मनुष्य टपकने वाले मधुकी बूँदोंको ही देखता है किन्तु अपने गिरनेको नहीं देखता। वैसे ही निदान करने वाला भोगोंको तो देखता है किन्तु अपने दीर्घ संसारको नहीं देखता ॥१२६८॥

गा०—जैसे मत्स्य भयको न जानते हुए जालके मध्यमें उछलते-कूदते हैं, वैसे ही जीव संसारकी चिन्ता न करके परिग्रह आदिमें आनन्द मानते हैं ॥१२६९॥

'दुक्खेण लद्धूण' क्लेशेन लब्ध्वा । 'देवमाणुसभोगे' दैवान्मानुषांश्च भोगान् । 'परिवडिदो' परिपतितः प्रच्युतस्ततो भोगाज्जीवः । 'कुजोणीं णियदमवीदि' कुत्सिता योनिं नियतमुपैति । किमिव ? 'सघरं' स्वगृहं, 'पवसो वा' प्रवासीव ॥११७०॥

जीवस्स कुजोणिगदस्स तस्स दुक्खाणि वेदयंतस्स ।
किं ते करंति भोगा मदोव वेज्जो मरंतस्स ॥१२७१॥

'जीवस्स कुजोणिगदस्स' कुयोनिगतस्य जीवस्य । 'दुक्खाणि वेदयंतस्स' दुःखानि वेदयमानस्य । 'किं ते करेंति भोगा' किं ते कुर्वन्ति भोगाः स्त्रीवस्त्रादय । नैव किञ्चिदपि दुःखलवमपनेतुं क्षमाः । 'मदोव वेज्जो' वैद्यो मृतो यथा । 'मरंतस्स' म्रियमाणस्य न किञ्चित्कर्तुं क्षमः ॥१२७१॥

जह सुत्तबद्धसउणो दूरंपि गदो पुणो व एदि तहिं ।
तह संसारमदीहि हु दूरंपि गदो णिदाणगदो ॥१२७२॥

'जह सुत्तबद्धसउणो' यथा सूत्रेण दीर्घेण बद्धः पक्षी । 'दूरंपि गदो' दूरमपि गतः । 'पुणो एदि तहिं' पुनरप्येति तमेव देशं । 'तह संसारमवीदि खु' संसारशब्दात्परः खु शब्दो द्रष्टव्यः, ततोऽयमर्थ —संसारमेवाधिगच्छतीति । 'दूरं पि गदो' महर्द्धिक स्वर्गादिस्थानमुपगत । 'णिदाणगदो' निदान परभवसुखातिशये मन प्रणिधानं गत. ॥१२७२॥

कश्चिद्बद्धः कारागृहे इयता कालेन तव द्रविणं दास्यामि भवदीयमेव तावत्प्रयच्छेति गृहीत्वा द्रव्यं रोधकेभ्य. प्रदाय स्वगृहे सुखं वसन्नपि पुनर्यथा तैरुत्तमर्णैर्धार्यते तथैव निदानकारी स्वकृतेन पुण्येन परिप्राप्तस्वर्गोऽपि पुनरधः पततीति निगदति—

इन्द्रिय सुख नियमसे कुयोनियोंमें भ्रमण करनेका मूल कारण है क्योंकि अत्यधिक राग-द्वेषकी उत्पत्तिमे निमित्त है। उन कुयोनियोंमें उत्पन्न होकर नाना प्रकारके दुःखोंका अनुभव करने वाले जीवके दुःखोंको, देवगति आदिके भोग वस्त्र अलंकार भोजन आदि दूर करनेमे समर्थ नहीं हैं, ऐसा आगे कहते हैं—

गा०—जैसे देशान्तरमें गया व्यक्ति सर्वत्र घूमकर अपने घरको ही जाता है वैसे ही बड़े कष्टसे प्राप्त देव और मनुष्य सम्बन्धी भोगोंको भोगकर उन भोगोके नष्ट हो जाने पर नियमसे कुयोनिमें जाता है ॥१२७०॥

गा०—जैसे मरा हुआ वैद्य मरते हुएकी रक्षा नहीं कर सकता। वैसे ही कुयोनिमें जाकर उस दुःख भोगते हुए जीवका स्त्री वस्त्र आदि भोग क्या कर सकते है? वे उसका किञ्चित् भी दुःख दूर नहीं कर सकते ॥१२७१॥

गा०—जैसे लम्बे धागेसे बंधा पक्षी सुदूर जाकर भी पुनः वही लौट आता है। वैसे ही परभव सम्बन्धी विषय सुखमें मन लगाने वाला निदानी महान् वृद्धिसे सम्पन्न स्वर्गादि स्थानोंमें जाकर भी संसारमें ही लौट आता है ॥१२७२॥

जैसे कोई जेलखानेमें पड़ा व्यक्ति, मैं इतना समय बीतने पर तुम्हारा धन तुम्हें लौटा दूंगा तुम मुझे धन दो, ऐसा वादा करके धन लेता है और वह धन जेलके रक्षकोंको देकर अपने घरमें सुखपूर्वक निवास करता है किन्तु उसे पुनः कर्ज देने वाले पकड़ लेते हैं उसी प्रकार निदान करने

दाऊण जहा अत्थं रोधणमुक्को सुहं घरे वसइ ।
पत्ते समए य पुणो रुंभइ तह चेव धारणिओ ॥१२७३॥

'दाऊण' दत्वा । 'अत्थं' अर्थं । 'जह' यथा । 'रोधणमुक्को' रोधेन मुक्तः । 'सुहं घरे वसदि सु' सुखेन गृहे वसति । 'पत्ते समये य' प्राप्ते चावधिकाले । 'पुणो रु'भइ' पश्चाच्च रुध्यते । 'तथा चेव' पूर्ववदेव । 'धारणीओ' अधमर्णः ॥१२७३॥

दार्ष्टान्तिके योजयति—

तह सामण्णं किच्चा किलेसमुक्कं सुहं वसइ सग्गे ।
संसारमेव गच्छइ तत्तो य चुदो णिदाणकदो ॥१२७४॥

संभूदो वि णिदाणेण देवसुक्खं च चक्कहरसुक्खं ।
पत्तो तत्तो य चुदो उववण्णो [1]तिरियवासम्मि ॥१२७५॥

'संभूदो वि णिदाणेण' निदानेन संभूतः कश्चित् । 'देवसुक्ख'' देवसुखं । 'चक्कधरसोक्ख'' चक्रधर-सौख्य । 'पत्तो' प्राप्त । 'तत्तो य चुदो' तस्मात्सुखात्प्रच्युतः उत्पन्न. । 'उववण्णो' उपपन्नः । '[3]तिरियवासम्मि' [3]तिर्यग्गावासे ॥१२७४॥

णच्चा दुरंतमद्धुयमत्ताणमतप्पयं अविस्सायं ।
भोगसुहं तो तम्हा विरदो मोक्खे मदिं कुज्जा ॥१२७६॥

'णच्चा' ज्ञात्वा । 'दुरंतं' दुरवसानदुःखफलमिति यावत् । 'अद्धुवं' अनित्यं । 'अत्ताणं' अत्राणं । 'अतप्पगं' अतर्पकं । 'अविस्सायं' असकृद्वृत्तं । 'भोगसुखं भोज्यन्ते, सेव्यन्ते इति भोगाः स्त्र्यादयः, तैर्जनितं सुखं । 'तो' पश्चात् । 'तम्हा' तस्मात् । भोगसुखात्, दुरन्तादिदुष्टदोषात् । 'विरदो' व्यावृत्तः । 'मोक्खे' मोक्षे

वाला अपने द्वारा किये गये पुण्यसे स्वर्ग प्राप्त करके भी पुनः गिरता है, यह कहते हैं—

गा०—जैसे धन देकर कारागारसे मुक्त हुआ कर्जदार सुखपूर्वक घरमे रहता है। किन्तु कर्ज चुकानेका समय आने पर पुनः पकड़कर बन्द कर दिया जाता है ॥१२७३॥

गा०—वैसे ही मुनिपद धारण करके निदान करने वाला स्वर्गमें क्लेश रहित सुखपूर्वक रहता है और वहाँसे च्युत होकर संसारमें ही भ्रमण करता है ॥१२७४॥

गा०—संभूत नामक व्यक्ति निदानके द्वारा देवगतिके सुख और चक्रवर्तीके सुखको प्राप्त हुआ अर्थात् मरकर सौधर्म स्वर्गमें उत्पन्न हुआ और वहाँसे मरकर ब्रह्मदत्त चक्रवर्ती हुआ। उसके पश्चात् मरकर तिर्यग्गति (नरक गति) में उत्पन्न हुआ ॥१२७५॥

१. तुण्डैः नारकलोचनं —आ० मु० । ते हि वज्रमयैस्तुण्डैर्मर्माणि तुदन्ति । २. रन्ति नित्यं नखर —आ० मु० ।

शिलासु वज्रमयशृङ्खला बद्धाः शिलाः [illegible] बध्नन्ति दुर्मोचाः । बद्ध्वा च तस्यामेव पातयन्ति । पातितास्तत्र [illegible] असुरविक्रियानिर्मितमहाचक्रकरप्रहारेण जर्जरीभूय निपतन्ति । पुनश्च तटमारूढा [illegible] निश्चलं बध्नन्ति । तानपरिस्पन्दमवस्थितान्लक्षीकृत्य विध्यन्तीति निशातशरशतसहस्रैः । 'पत्तो कयंबवालुयविसमं' प्राप्तः कदंबप्रसूनाकारा वालिका चित्तदुःप्रवेशाः, वज्रालंकृतखदिराङ्गारकणप्रकरोपमानाः परिप्राप्य तत्र बलात्संचार्यमाणः यत्प्राप्तवानसि दुःखं तच्चिन्तते[3] मनसि कुरु ॥१५६३॥

जं णीलमंडवे तत्तलोहपडिमाउले तुमे पत्तं ।
जं पाइओसि खारं कडुयं तत्तं कलयलं च ॥१५६४॥

'जं पत्तं तं चिंतेहि' यत्प्राप्तं दुःखं तच्चिन्तय । क्व ? 'णीलमंडवे' काललोहघटिते मण्डपे । 'तत्तलोहपडिमाउले' तप्तलोहप्रतिमाकुले । बलात्कारसंपाद्यमानतप्तलोहप्रतिमायुवत्यालिङ्गितो यद्दुःखं प्राप्तवानसि तन्मनसि निधेहि । 'जं पाइओसि खारं' यत्पायितोऽसि क्षारं । 'कडुगं' कटुकं । 'तत्तं' तप्तं ॥१५६४॥

जं खाविओसि अवसो लोहंगारे य पज्जलंते तं ।
कंडूसु जं सि रद्धो जं सि कवल्लीए तलिओ सि ॥१५६५॥

'जं खाविओसि' यत्खादितोऽसि । 'अवसो' अवशः । बलाद्यन्त्रविदारिताननः । 'लोहंगारे य पज्जलंते' तं लोहाङ्गारान्प्रज्वलतः त्वं । 'कंडूसु जं सि रद्धो' कंदुकासु यन्मण्डका इव पक्वः ॥१५६५॥

पैर तत्काल जुड़ जाते हैं। उनकी गर्दनोंमें भारी शिलाएँ वज्रमयी सांकलसे बाँध देते हैं जिनको खोलना अति कठिन होता है और उन्हें पुनः उसी वैतरणीमें डाल देते हैं। उसमें गिराये जानेपर वे डूबते उतराते हैं। असुर कुमारोंकी विक्रियासे बनाये गये महाचक्रोंके प्रहारसे उनके मस्तक छिन्न-भिन्न होकर गिर जाते हैं। पुन. वे तट पर जाते हैं और उन्हें पुनः निश्चल बांध देते हैं। तब उन निश्चल स्थित नारकियोंको लक्ष करके लाखों तीक्ष्ण बाणोंसे बींध देते हैं। पुनः कदम्बके फूलोंके आकार वाली बालूमें, जिसमें बालिकाके चित्तकी तरह प्रवेश करना कठिन है और जो वज्रमयदलसे शोभित है तथा खैरकी लकड़ीके अंगारोंके कण समूहकी तरह गर्म है, उसमें बलपूर्वक चलाये जानेपर तुमने जो दुःख पाया है उसका विचार करो ॥१५६३॥

गा०—काललोहसे निर्मित मण्डपमें तपाये हुए लोहेसे बनी प्रतिमारूपी युवतियोंसे बलपूर्वक आलिंगन कराये जानेपर तुमने जो दुःख पाया उसका विचार करो। तथा खारा कडुआ तपा हुआ कलकल पिलाये जानेपर जो दुःख पाया उसका चिन्तन करो ॥१५६४॥

विशेषार्थ—ताम्बा, सीसा, सज्जी, गूगल आदिको पकाकर जो काढ़ा तैयार होता है उसे कलकल कहते हैं।

गा०—बलपूर्वक यंत्रके द्वारा तुम्हारा मुंह फाड़कर जो तुम्हें जलते हुए लोहेके अंगार खिलाये गये और भट्टीमें मांडकी तरह पकाया गया तथा कड़ाहीमें तला गया ॥१५६५॥

---

१. दानुगच्छत तस्तत्र बय–अ० । दाच्चत नक्रभूय–अ० । २. कारावलि[illegible]–आ० । ताः तेषा ताः शिलाः पुनर्नि–मूलारा० । ३. तच्चिन्तय–मु० ।

कुट्टाकदीहिं चुण्णाचुण्णि मुग्गरमुसंढिहत्थेहिं ।
जं पि सचूंचूरावदिं कओ तुमं जनसमूहेण ॥१५६६॥

'कुट्टकदीहिं बहुसो' यत्कुट्टितचूर्णितः मुद्गरमुसंढिहस्तैः, यच्च जनसमूहेन भवान् असकृत्खंडित-स्तदन्तःकरणे कुरु ॥१५६६॥

अनुकूलक्रिया भाषा सज्जनता: सुखशीलता ।
लज्जा कृपा दमो दानं प्रसत्ती मार्दवं क्षमा ॥१॥
इत्येवमाद्याः सुगुणाः प्रशस्ता ये शरीरिणां ।
तेषु ते दुर्लभा नित्यं कान्तारेष्विव मानुषाः ॥२॥
शत्रुमित्रमुदासीन इत्यत्र त्रिविधो जनः ।
शत्रुरेव हि सर्वोऽत्र जनः सर्वस्य नारकः ॥३॥
कम्पनैः कणयैश्चक्रैर्नाराचैः क्रकचैर्नखैः ।
गदाभिर्मुसलैः शूलैः प्रासैः पाषाणयष्टिभिः ॥४॥
मुष्टिभिर्यष्टिभिर्लोष्टैः शङ्कुभिः शक्तिभिः शरैः ।
असिभिः क्षुरिकाभिश्च कुन्तैर्दण्डैः सतोमरैः ॥५॥
तथा प्रकारैरन्यैश्च निशितैर्नैकसंस्थितैः ।
भूस्वभावात्स्वयं जातैर्वैक्रियैरपि चायुधैः ॥६॥
नारकास्तत्र तेऽन्योन्यं रोषवेगेन पूरिताः ।
पूर्ववैराण्यनुस्मृत्य विभंगज्ञानसंभवात् ॥७॥
घ्नंति छिंदंति भिंदंति खादंति च तुदंति च ।
विध्यंति चापि बध्नंति प्रहरन्ति हरन्ति च ॥८॥
श्वशृगालवृकव्याघ्रगृध्ररूपाणि चापरे ।
विकृत्य विविधं पापा खादंतेऽत्र परस्परं ॥९॥

गा०—टी०—अनेक बार हाथमें मुद्गर लेकर तुम्हें कूटा गया, मूसलोंसे जनसमूहने तुम्हें चूर्ण कर डाला। उसका मनमें विचार करो।

अनुकूल क्रिया, भाषा, सज्जनता, नम्रता, सुखशीलता, लज्जा, दया, इन्द्रिय दमन, दान, प्रसन्नता, मार्दव, क्षमा आदि जो प्रशस्त सुगुण प्राणियोंमें होते हैं वे गुण नरकमें वैसे ही दुर्लभ हैं जैसे घोर वनमें मनुष्यका मिलना दुर्लभ है। अन्यत्र शत्रु, मित्र और उदासीन तीन प्रकारके लोग होते हैं। किन्तु नारकी सब सबके शत्रु ही होते हैं। नरकमें नारकी अपने विभंगज्ञानसे पूर्व जन्मके वैरोंको स्मरण करके और क्रोधसे भरकर चक्र, बाण, करोंत, नख, गदा, मूसल, शूल, भाला, पाषाणसे निर्मित अस्त्र विशेष, मुट्ठी, लकड़ी, लोष्ट, शङ्कु, शक्ति, तलवार, छुरी, भाला, डण्डा, गुर्ज तथा इसी प्रकारके अन्य तीक्ष्ण अस्त्र शस्त्रोंसे जो वहाँकी पृथिवीके स्वभावसे स्वयं उत्पन्न हो जाते हैं तथा विक्रियासे निर्मित आयुधसे परस्परमें मारते हैं, छेदते भेदते हैं, खाते हैं कोंचते हैं, प्रहार करते हैं, बाँधते हैं। अन्य नारकी कुत्ता, सियार, भेड़िया, व्याघ्र, गृद्ध

काष्ठशैलशिलारूपैर्निपतंति च केचन ।
पततस्तानवलोक्यांति ते च शूलाग्रसंस्थिताः ॥१०॥
मज्जयंति जलीभूय वायूभूय धुनंति च ।
दहंति वह्नीभूय न दयंति परस्परं ॥११॥
तिष्ठ दासीव हन्मि त्वां त्वं कुतस्त्वः पलायसे ।
निगूहसे महामोहान्मृत्युस्ते समुपस्थितः ॥१२॥
छिंद्धि भिंद्धि गृहाणैनं बंधि हंधि कथाल तं ।
कथानेनं मृवानाशु वह्न पलायन मारय ॥१३॥
प्रबंधे पातयत्यैवमेतेषु पिशीं प्रतीप्य ।
विकसेति च संरभ्य तं मुंचंति गिरोऽशुभाः ॥१४॥

अनेनेदृशा नारकेण प्रापितवेदनां बुद्धि निरूपयति—

जं [1]अवद्धुदो उप्पाडिदाणि अच्छीणि णिरयवासम्मि ।
अवसस्स उक्खया जं सतूलमूलाय ते जिब्भा ॥१५६७॥

'जं अवद्धुयदो उप्पाडिदाणि' शिरःपृष्ठदेशादुत्पाटिते । 'अच्छीणि' लोचने । 'णिरयवासे य' नरकवासे च । 'अवसस्स' अवशस्य । 'उक्खाता' उत्पाटिता । 'जं' यत् । 'सतूलमूलाय ते जिब्भा' निरवशेषा ते जिह्वा ॥१५६७॥

कुंभीपाएसु तुमं उक्कढिओ जं चिरं पि [2]य सोल्लं ।
जं सुठ्ठिउव्व णिरयम्मि पउलिदो पावकम्मेहिं ॥१५६८॥

'कुंभीपाएसु तुमं' कुभीपाकेषु त्वं । 'उक्कढिदो' उत्क्वथितः । 'जं सुट्ठिउव्व' शूलप्रोतमांसवत् । 'णिरयम्मि' नरके । 'सोल्लिओ' अंगारप्रकरे पक्वः । 'पावकम्मेहिं' पापकर्मभिः ॥१५६८॥

आदिका रूप अपनी विक्रियासे बनाकर विस्तारपूर्वक परस्परमें कष्ट देते हैं। कुछ काष्ठ, पर्वत और शिलारूप बनकर उनपर बरसते हैं। उनको अपने ऊपर गिरते देखकर दूसरे नारकी जो सूलीके अग्र भागपर टँगे होते हैं उन्हें ग्रहण करते हैं। वे नारकी जल बनकर दूसरे नारकियोंको डुबाते हैं, वायु बनकर उड़ाते हैं। आग बनकर जलाते हैं। परस्परमें दया नहीं करते। अरे दासीपुत्र! ठहर, कहाँ भागा जाता है। मैं तुझे मारूँगा। तेरी मृत्यु आ गई है। इसका छेदन करो, भेदन करो, पकड़ लो, खींच लो, मार डालो, जला डालो, चीर दो इत्यादि अशुभ वचन बोलते हैं॥१५६६॥

नारकी जीवने इस प्रकार जो वेदना भोगी उसे कहते हैं—

गा०—नरकमें सिरके पिछले भागसे तेरी आँखें निकाली गई। और पराधीनतावश तेरी पूरी जिह्वा जड़मूलसे उखाड़ी गई॥१५६७॥

गा०—पापी नारकियोंके द्वारा नरकमें तुम चिरकाल तक कुम्भीपाकमें औटाये गये। तथा सूलमें पिरोये मांसकी तरह अंगारोंपर पकाये गये॥१५६८॥

---

१. आवद्ठदो मु० । अवद्धुदो मूलारा० । २. पि सोल्लं अ० आ० । सोल्लं पुनर्भिषत तैर्थं भवायैव इत्यन्यः—मूलारा० ।

जं भज्जिदोसि भज्जिदयंपि व जं गालिओसि रसयं व ।
जं कप्पिओसि वल्लूरयं व चुण्णं व चुण्णकदो ॥१५६९॥

'जं भज्जिदोसि' यद् भृष्टोऽसि 'भज्जिदयंपि' भज्जिदयनामधेयशाकवत् । 'जं गालिओसि रसगोव्व' यद् गालितोऽसि रसवत् । 'जं कप्पिओसि' यत् छिन्न । 'जं छिण्णो सि' यत् छिन्न । 'वल्लूरय पि व' वल्लूरवत् । 'चुण्णंव' चूर्णवत् 'चुण्णकदो' चूर्णीकृत ॥१५६९॥

वासीहिं करकचेहिं य जं सि णिकत्तो विकत्तिओ जं च ।
परसूहिं फालिओ ताडिओ य जं तं मुसुंढीहिं ॥१५७०॥

'वासीहिं करकचेहिं' वासीभिः क्रकचैश्च । 'जं सि णिकत्तो' यदसि निकृत्त । 'विकत्तिओ' विविध कृत्त । 'परसूहिं फालिओ' परशुभि पाटित । 'ताडिओ' ताडित । जं यत् त्वं 'मुसुंढीहिं' मुसुंढीभि ॥१५७०॥

पासेहिं जं च गाढं बद्धो भिण्णो य जं सि दुघणेहिं ।
जं खारकद्दमे खुप्पिओ सि ओमत्थिओ अवसो ॥१५७१॥

'पासेहिं' पाशैः । 'जं' यत् । 'गाढं बद्धो' दृढं बद्ध । 'भिण्णो य' भिन्नश्च । 'जं सि' यदसि । 'दुघणेहिं' घनैः । 'जं' यत् । 'खारकद्दमे' क्षारकर्दमे । 'खुप्पिओसि' निखातोऽसि । ओमत्थिओ अधोमस्तक । 'अवसो' परवश ॥१५७१॥

जं छोडिओसि जं मोडिओसि जं फाडिओसि मलिदो सि ।
जं छोल्लिदोसि सिंघाडएसु तिक्खेसु वेएण ॥१५७२॥

यत्छुन्नः, पाटितः, मर्दित, छोल्लितश्च तीक्ष्णेषु शृङ्गाटकेषु वेगेन ॥१५७२॥

विच्छिण्णंगोवंगो खारं सिंचित्तु वीजिदो जं सि ।
सचीहिं वि हुक्कोहिं य अद्दयाए खुंपिओ जं सि ॥१५७३॥

'विच्छिण्णंगोवंगो' विच्छिन्नाङ्गोपाङ्ग । 'खारं सिंचित्तु' क्षारं सिक्त्वा । 'वीजिदो जं सि' यद्वीजित ।

गा०—तुम भाजीकी तरह भूंजे गये हो। गुडके रसकी तरह छाने गये हो। मासके टुकडोकी तरह काटे गये हो और चूर्णकी तरह चूर्ण किये गये हो ॥१५६९॥

गा०—वसूलेके द्वारा छेदे गये हो। आरेके द्वारा चीरे गये हो। परसुके द्वारा फाडे गये हो। और मुसुंढी नामक विशेषसे पीटे गये हो ॥१५७०॥

गा०—पाशके द्वारा मजबूतीसे बाधे गये हो। घनोके द्वारा छिन्न-भिन्न किये गये हो। पराधीन होकर खारी कीचडमें नीचेको मस्तक करके गाडे गये हो ॥१५७१॥

गा०—तुम बिथारे गये हो। मोड़े गये हो, फाडे गये हो, पैरोंसे मले गये हो, तथा वेगसे तीक्ष्ण लोहकी सिंघाडोंपर घसीटे गये हो ॥१५७२॥

गा०—अंग उपांगके विच्छिन्न होनेपर खारे जल आदिसे सींचे गये। फिर पखासे

---

१. खुप्पिओसि आ० ।

'सत्तीहिं' शक्तिभिः । 'विमुक्कीहिं य' यष्टोलककण्टकसंकीर्णाभिः । 'अदयाए' दयामन्तरेण । 'खुंचिदो' परा-कर्षितः ॥१५७३॥

पगलंतरुधिरधारो पलंबचम्मो पभिन्नपोट्टसिरो ।
पउलिदहिदओ जं फुडिदच्छो पडिचूरियंगो य ॥१५७४॥

'पगलंतरुधिरधारो' प्रगलद्रुधिरधारः । 'पलंबचम्मो' प्रलम्बत्वक् । 'पभिन्नपोट्टसिरो' प्रभिन्नोदर शिराः । 'पउलिदहिदओ' प्रतप्तहृदयः । 'जं' यत् । 'फुडिदच्छो' स्फुटितलोचनः । 'पडिचूरिदंगो य' परिचूर्णि-ताङ्गः ॥१५७४॥

जं थरथरिदकरचरणंगो पत्तो सि वेदणं तिव्वं ।
णिरए अणंतखुत्तो तं अणुचिंतेहि णिस्सेसं ॥१५७५॥

'जं' यत् । 'थरथरिदकरचरणंगो' वेपमानकरचरणाङ्गः । 'पत्तो सि वेदणं तिव्वं' प्राप्तोऽसि वेदना तीव्रां । 'णिरए' नरके । 'अणंतखुत्तो' अनंतवारं तत् 'अणुचिंतेहि' अनुक्रमेण चिन्तय । 'णिस्सेसं' निरवशेष ॥ नरकगतिदुःखं वर्णितम् ॥१५७५॥

तिरियगदिं अणुपत्तो भीममहावेदणाउलमपारं ।
जम्मणमरणरहट्टं अणंतखुत्तो परिगदो जं ॥१५७६॥

'तिरियगदिं अणुपत्तो' तिर्यग्गतिमनुप्राप्तः । 'भीममहावेदणाउलमपारं' । भीममहावेदनाकुलमपारं 'जम्मणमरणरहट्टं' जन्ममरणघटीयंत्रं । 'अणंतखुत्तो' अनंतवारं । 'परिगदो' परिप्राप्तोऽसि । यत् चिंतेहि तं इति वक्ष्यमाणेन संबन्धः । तिर्यंचो हि नानाविधाः पृथिव्यप्तेजोवायुवनस्पतित्रसभेदेन ॥१५७६॥

हवा की गई जिससे वेदना बढ़े। फिर शक्ति नामक अस्त्रसे और लोहेके दण्डेसे जिसके आगे कांटे लगे हों, निर्दयतापूर्वक खींचे गये ॥१५७३॥

गा०—रुधिरकी धार बह रही है, चमड़ा लटक रहा है, उदर और सिर फट गया है, हृदय दुःखसे संतप्त है, आँखें फूट गई हैं। समस्त शरीर छिन्न-भिन्न है ॥१५७४॥

गा०—हाथ पैर कांपते हैं। ऐसी दशामें तुमने नरकमें जो अनन्त बार तीव्र कष्ट भोगा उस सबका क्रमसे चिन्तन करो ॥१५७५॥

नरकगतिके दुःखका वर्णन समाप्त हुआ।

गा०-टी०—नरकसे निकलकर तुम तिर्यञ्चगतिमें आये। यह जन्म मरणरूपी घटीयंत्र (रहट) भयानक महावेदनाओंसे भरा है, इसका पार नहीं है। इसे तुमने अनन्तवार प्राप्त किया है। तिर्यञ्च पृथिवी, जल, तेज, वायु, वनस्पति और त्रसके भेदसे अनेक प्रकारके हैं ॥१५७६॥

---

१. थरथरंत—मु०, मूलारा०।

आत्मनानुभूतान्यपि न स्मरन्ति दुःखानि केचिदिह नराः प्रमत्ताः ।
दृष्टश्रुतान्यन्यानुभूतानि ते विस्मरन्तीति न विस्मयोऽत्र ॥१॥
प्रमादलोपार्थमतो नरेभ्यो ज्ञातोऽपि लोकैः परिकथ्य एवं ।
संस्मार्यमाणे प्रभवन्ति यस्मिन्गुणा न दोषास्तु समुद्भवन्ति ॥२॥
शीते निवातं सलिलादि घर्मे भीतं [1]भये संश्रयितुं समर्थाः ।
ये जंगमास्ते न तु सन्ति शक्तिरेकेन्द्रियाणां बत जीवकानां ॥३॥
सर्वोपसर्गानिह मोक्षकामा यथा विरागा मुनयः सहन्ते ।
सर्वोपसर्गानवशा वराका एकेन्द्रिया ये च सदा सहन्ते ॥४॥
बालान्धमूका बधिराश्च बाला रथ्यासु रक्षाशरणप्रहीनाः ।
प्रमर्द्यमाना गजवाजियानैर्यथा [2]म्रियेरन् विवशा वराकाः ॥५॥
तथा प्रकारो विकलेन्द्रियाणां प्रवर्तते नारकदुःखतुल्यः ।
मृत्युः समंतात् सततं सुघोरो ग्रामेष्वरण्येषु च निःशरण्यः ॥६॥
गोऽजाविकाद्यैः परिमर्द्यमाना शकटादिचक्रैः परिपिष्यमाणाः ।
अन्योन्यवक्त्रैः परिपीड्यमानाः दुःखं च मृत्युं च हि ते लभन्ते ॥७॥
छिन्नैः शिरोभिश्चरणैश्च भग्नैर्गात्रावयवैश्च रुजाभिभूताः ।
चिरं स्फुरन्तः प्रतिकारहीनाः कृच्छ्रेण केचिज्जहति स्वमायुः ॥८॥
निमज्जमाना उदबिन्दुनापि निःश्वासवातैरपि पीड्यमानाः ।
प्रपीड्यमाना लघुनोष्मणापि मरन्ति ये तेषु कथा भवेत् का ॥९॥

कितने ही प्रमादी मनुष्य अपने द्वारा अनुभूत दुःखोंको भी भूल जाते हैं। तब देखे हुए, सुने हुए और दूसरोंके भोगे हुए दुःखोंको भूल जायें तो इसमें क्या आश्चर्य है। अतः मनुष्योंके द्वारा जाना हुआ भी यथार्थ प्रमाद दूर करनेके लिये कहा जाता है। जिसका स्मरण होनेपर गुण प्रकट होते हैं और दोष प्रकट नहीं होते। जो जगम प्राणी होते हैं वे शीतमें वायु रहित स्थानमें, गर्मीमें जलादिमें, भय उपस्थित होनेपर निरापद स्थानमें आश्रय ले सकते हैं। किन्तु खेद है कि एकेन्द्रिय जीवोंमें ऐसी शक्ति नहीं होती। जैसे मोक्षके इच्छुक विरागी मुनि सब उपसर्गोंको सहते हैं। पराधीन बेचारे एकेन्द्रिय भी सब उपसर्गोंको सदा सहते हैं। जैसे जन्मसे अन्धे गूँगे बहरे बालक रक्षा और शरणसे विहीन हुए बेचारे विवश होकर मार्गोंमें हाथी घोड़े सवारी आदिसे कुचलकर मर जाते हैं। विकलेन्द्रिय जीवोंकी भी ऐसी ही दशा है। उनका दुःख भी नारकियोंके समान है। ग्रामों और वनोंमें भी उनको शरण नहीं है। उनकी घोर मृत्यु सदा होती रहती है। गाय बैल, बकरा मेढा आदिके द्वारा वे कुचले जाते हैं। गाड़ी आदिके चकोंके नीचे पिस जाते हैं। परस्परमें एक दूसरेके मुखोंके द्वारा पीड़ित होकर वे दुःख और मृत्युको प्राप्त होते हैं। सिरोंके भग्न हो जानेपर, पैरोंके टूट जानेपर तथा शरीरके अवयवोंके रोगसे ग्रस्त होनेपर वे चिरकाल तक तड़फड़ाते रहते हैं, उनका कोई इलाज नहीं करता। बड़े कष्टसे वे आयु पूरी करते हैं। जो जलकी एक बूंदमें भी डूब जाते हैं, प्राणियोंके श्वासकी वायुसे भी पीड़ित होते हैं। जरा सी भी गर्मीसे पीड़ित होनेपर मर जाते हैं उनकी क्या कथा कही जाये ?

---

१. भयो मु० । २. म्रियते मु० ।

सरः प्रविश्येह यथा नरः सन्मुन्मज्जनं चैव निमज्जनं च ।
क्रीडासक्तो बहुशोऽपि कुर्यान्निमज्जनं स्वतन्त्रो वयस्कः ॥१०॥
प्रविश्य जन्मोदधिमध्यमेवं शरीरिणस्ते बहु जन्ममृत्यून् ।
अन्तर्मुहूर्तेऽपि समाप्नुवन्ति पेपीयमानाः कटुदुःखतोयम् ॥११॥
सूक्ष्मैः शरीरैरपि ते महान्ति दुःखानि नित्यं समवाप्नुवन्ति ।
[1]स्थूलेषु देहेषु समीहितेषु दुःखोदयो देहिभिरेव दृष्टः ॥१२॥
येषां न माता न पिता न बन्धुर्न चापि मित्रं न गुरुर्न नाथः ।
न भेषजं नाभिजनो न भक्ष्यं न ज्ञानमस्त्येव कुतः सुखं स्यात् ? ॥१३॥
मात्रा वियोगेऽपि सतीह तावद् दुःखाम्बु तत्तु न जनो सहेत ।
मात्रा वियोगस्तु भवेन्न येषां स्यात्तं कथं ते न हि दुःखराशेः ॥१४॥
मा भैष्ट मा भूत्तव दुः[2]खजालं मा खिद्य मा वेति वराककाणां ।
आश्वासको वाप्यनुकम्पिता वा तेषां जनः कोऽस्ति यथा नराणां ॥१५॥
तैस्तैः प्रकारैः सततं समन्तादत्युग्रबाधा अपि मृत्युमुग्रं ।
करोति वा को ग्रहणं निरीक्ष्य विमुच्य संबन्धविदो मनुष्यान् ॥१६॥
अन्योन्यतो मर्त्यजनाच्च पापात् क्षुधापिपासाद्यपि महाभयानि ।
पञ्चेन्द्रिया यानि समाप्नुवन्ति दुःखानि तेषामिह कोपमा स्यात् ॥१७॥
स्तनंधयान्स्वानपि भक्षयन्त [3]श्रुतास्तिरश्चोऽपि न निष्कृपाकाः ।
निहत्य खादन्तु परान्परेषु तिर्यक्षु किं विस्मयनीयमस्ति ॥१८॥

जैसे कोई स्वाधीन वयस्क पुरुष क्रीड़ासक्त हो, सरोवरमें प्रवेश करके बहुत बार जलमें डूबता और उतराता है। वैसे ही शरीरधारी प्राणी जन्मरूपी समुद्रके मध्यमें प्रवेश करके कटुक दुःखरूपी जलको पीते हुए एक अन्तर्मुहूर्तमें भी बहुत बार जन्म लेते और मरते हैं। यद्यपि उनके शरीर सूक्ष्म होते हैं फिर भी वे महान् दुःख भोगते हैं। स्थूल शरीर मिलने पर उनका दुःख अन्य प्राणी भी देख सकते हैं। जिनका न पिता है, न माता है, न बन्धु है, न मित्र है, न गुरु है, न स्वामी है, न औषध है, न वंश है, न भोजन है और न ज्ञान है उन्हे सुख कैसे हो सकता है। माताका वियोग भी होनेपर इतना दुःख होता है जिसे मनुष्य सह नही पाता। जिनके माता ही नही है उनकी दुःख राशिका तो कहना ही क्या है। तुम मत डरो, तुम्हें दुःख न हो, इस प्रकार उन बेचारोंको मनुष्योंकी तरह न कोई सान्त्वना देनेवाला है और न कोई उनपर दया करनेवाला है। विभिन्न प्रकारोंसे निरन्तर सदा चहुँ ओरसे उग्र मृत्युको प्राप्त उन प्राणियोंको देखकर उनके सम्बन्धमें जानने वाले मनुष्योंके सिवाय अन्य कौन उनकी सुध लेता है। पञ्चेन्द्रिय तिर्यञ्च परस्परमें एक दूसरेसे, पापी मनुष्योंसे भूख प्यास आदिसे जिन महाभयकारी दुःखोंको प्राप्त होते हैं उनकी कोई उपमा नहीं है। वे अपने बच्चोंको भी खा जाते हैं। तिर्यञ्च भी दयाहीन नहीं सुने गये हैं। किन्तु जो अपने ही बच्चोंको खाते हैं वे यदि दूसरोंको खा जावें तो इसमें आश्चर्य ही क्या। वे परस्परमें एक दूसरेका घात करनेके लिये प्रहार करते हैं। उनको मारनेके लिये

---

१. स्थूलानुदेहेषु समीहितेषु सुखोदयो देहिभुजैव दृष्टः ।'—अ० । २. दुःख च स्या आविष्ट—अ० ।
३. सुता आ० ।

अन्योन्यभक्षणार्थमनुधावति दृष्टुं अन्यः कुतश्चोऽनुधावति ।
तं कश्चिदन्यः सहसा निहन्ति हा [1]धिक्ततो भीकरं किमन्यत् ॥१९॥
अन्योन्यरन्ध्रेक्षणनष्टनिद्रा अन्योन्यमाहन्तुं जिजीविषन्तः ।
स्वस्थाश्च न येऽन्योन्यभयात्स्वपन्ति किं ते भवेयुः सुखिनः कदाचित् ॥२०॥
वने मृगास्तोयतृणाङ्कुराद्यैः पुष्टिमाप्नुवन्ति रमणीयुताश्च ।
व्याधादिभिर्व्यापदमाप्नुवन्ति निरेनसः कारणमत्र कर्म ॥२१॥
वियोजिता बालसुतैश्च वत्सैर्दुःखं ... मनोऽनुकूलैः ।
दिशस्तु दीनाक्षिनिरीक्षमाणाः मृत्युं भयङ्करं प्राप्नुवन्ति ॥२२॥
स्वभावपापाः कुकवीरितार्थैः प्रोत्साहिता दुःश्रुतिभिः कुभाव ।
अबिभ्यतो दुर्गतितो वधेऽत्र मन्यन्तेऽथ यान्ति हितानुरूपाः ? ॥२३॥
वने मृगेभ्यः पिशिताशिनेभ्यो ग्रामेषु मर्त्येभ्य उताशिनेभ्यः ।
ते बिभ्यते न क्वचिदात्मवश्यास्ते अनुच्छया निर्भया जीवितानि ॥२४॥
मदद्विपाङ्कुशाभिहतैर्हयाश्च कशादिघातैश्च वृषा वृषाणाः ।
वाहाश्च तोत्रादिवधैः परेषां कुर्वन्ति कर्माजरणान्तकालाः ॥२५॥
[2]मत्वानुतापान्मतिशालिनो हि वैराग्यमस्मादुपयाति नित्यम् ।
तासामियत्ता बहवो हि कोटयः कथं प्रकुर्वन्त्य[3]भिवीक्षणं तत् ॥२६॥
दवानलानां ज्वलनैर्महाजलौघैश्च समूह्यमानाः ।
मृगाः खगाः सर्पसरीसृपाश्च सार्धं म्रियन्ते बहवो वराके ॥२७॥

दूसरा पशु उसके पीछे लग जाता है। उसको भी कोई तीसरा मार देता है। धिक्कार है इसे, इससे भयानक और क्या हो सकता है। परस्परमें एक दूसरेके छिद्रोंको देखनेसे जिनकी नींद भाग जाती है, जो एक दूसरेको मारकर जीना चाहते हैं, जो परस्परमें एक दूसरेके भयसे स्वस्थ होकर सो नहीं सकते वे कभी सुखी कैसे हो सकते हैं? वनमें मृग जल और तृण खाकर पुष्ट होते हैं। हिरनी उनकी सहचरी होती है। परस्परमें प्रेमसे रहते हैं। बिना किसी अपराधके भी व्याध आदिसे उन्हें भय रहता है इसमें कारण उनका पूर्व कर्म है। उन्हें अपने बच्चोंसे वियोगका दुःख उठाना पड़ता है। अपने मनके अनुकूल मृगोंकी खोजमें दीन दृष्टिसे दिशाओंको देखा करते हैं और इस तरह भयंकर मृत्युको प्राप्त होते हैं। जो स्वभावसे ही पापी हैं, और कुकवियोंके द्वारा कही गई न सुनने योग्य कविताओंसे उत्साहित होकर, दुर्गतिसे भी नहीं डरते वे उन पशुओंको यथेच्छ मारते हैं और इसे हित मानते हैं। वनमें मांसाहारी पशुओंसे, ग्रामोंमें मांसाहारी मनुष्योंसे डरते हैं। वे कहीं भी अपनी इच्छानुसार निर्भय जीवन नहीं बिताते। हाथी अंकुश आदिके प्रहारोंसे, घोड़े कोड़े आदिकी मारसे और बैल पैनी आदिके घावसे मरणपर्यन्त दूसरोंका काम करते हैं। जो बुद्धिमान् हैं उनके वैराग्य उत्पन्न होनेमें यह सब ही निमित्त है। उनकी बहुतसी कोटियाँ हैं वे एक दूसरेको कष्ट कैसे दे सकते हैं। जंगलकी आगके वेगसे चलते हुए महाजलसमूहके प्रवाहसे बहाये जाते हुए मृग, पक्षी, सर्प, सरीसृप तथा अन्य भी बहुतसे जीव एक साथ मर जाते हैं ॥१५७६॥

१. हा धिक् ततो भीकरं किमन्यत्' –आ० । २. मत्वानुतापान्मत–आ० । ३. न्त्यभिते मारस्य –आ० ब० ।

ताडणतासणबंधणवाहणलंछणविहेडणं[1] दमणं ।
कण्णच्छेदणणासावेहणणिल्लंछणं चेव ॥१५७७॥

'ताडणतासण' ताडनत्रासनबन्धनवाहनलाञ्छनविहेडनदमनकर्णच्छेदननासिकावेधनबीजविनाशनानि ॥१५७७॥

छेदणभेदणडहणं णिपीलणं गालणं छुहातण्हा ।
भक्खणमद्दणमलणं विकत्तणं सीदउण्हं च ॥१५७८॥

छेदनभेदनदहननिपीडनगालनानि क्षुत्तृषाभक्षणमर्दनमलनविकर्तनानि । शीतमुष्णं च ॥१५७८॥

जं अत्ताणो णिप्पडियम्मो बहुवेदणुद्दिओ पडिओ ।
बहुएहिं मदो दिवसेहिं चडफडंतो अणाहो तं ॥१५७९॥

'जं अत्ताणो' यदत्राणो । 'णिप्पडियम्मो' निष्प्रतीकारः । 'बहुवेदणट्टिओ' बहुवेदनार्दितः । 'पडिदो' पतितः । 'बहुगेहिं मदो दिवसेहिं' बहुभिर्मृतो दिवसैः । 'चडफडिंतो' स्फुरद्देहः । 'अणाहो' अनाथः । 'तं' त्वं ॥१५७९॥

रोगा विविहा बाधाओ तह य णिच्चं भयं च सव्वत्तो ।
तिव्वाओ वेदणाओ धाडणपादाभिघादाओ १५८०॥

'रोगा विविहा' व्याधयो नानाप्रकाराः । 'बाधाओ' बाधाश्च । 'तथा णिच्चं भयं च सव्वत्तो' नित्यं भयं च सर्वतः । 'तिव्वाओ वेदणाओ' तीव्रा वेदना धाटनपादाभिघाताश्च ॥१५८०॥

सुविहिय अदीदकाले अणंतकायं तुमे अदिगदेण ।
जम्मणमरणमणंतं अणंतखुत्तो समणुभूदं ॥१५८१॥

'सुविहिद' सुचारित्र । 'अदीदकाले' अतीतकाले । 'अणंतकायं तुमे अदिगदेण' अनंतकायं त्वया प्रविष्टेन । 'जम्मणमरणमणंतं' जन्ममरणं चानन्तं । 'अणंतखुत्तो' अनन्तवारं क्षिप्तः । 'समणुभूदं' समनुभूतं ॥१५८१॥

गा०—लाठी आदिसे मारना, डराना, रस्सी आदिसे बांधना, बोझा लादकर देशान्तरमें ले जाना, गर्म लोहेसे दागना, पीड़ा देना, दमन करना, अण्डकोषोंको दबा देना। अंगोंको छेदना, भेदना, जलाना, दबाना, रोग आदि होनेपर रक्त निकालना, भूख प्यासकी बाधा, भक्षण, मर्दन, मलना, कान आदिको काटना, शीत उष्ण इत्यादि दुःख तिर्यञ्च गतिमें तुमने सहे हैं ॥१५७७-७८॥

गा०—जहाँ कोई रक्षक नहीं, कोई प्रतीकार नहीं, बहुत कष्टसे पीड़ित होकर गिरे और अनाथ दशामें तड़फड़ाते हुए तुम बहुत दिनोंमें मरे ॥१५७९॥

गा०—तिर्यञ्चगतिमें नाना प्रकारके रोग, नाना प्रकारकी बाधाएँ, सदा सब ओरसे भय, तीव्र वेदनाएँ, पैरसे मारना आदि कष्ट है ॥१५८०॥

गा०—हे चारित्रसे सम्पन्न क्षपक! अतीतकालमें तुमने अनन्तकायमें जन्म लेकर अनन्त बार अनन्त जन्म मरणोंको भोगा ॥१५८१॥

---

१. मं मलणं अ० । २. णेण लंछण चेव—अ० । ३. चाडणं अणं—अ०, आ० ।

इच्चेवमादिदुक्खं अणंतखुत्तो तिरिक्खजोणीए ।
जं पत्तोसि अदीदे काले चिंतेहि तं सव्वं ॥१५८२॥

'इच्चेवमादिदुक्खं' इत्येवमादिदुःखं । 'अणंतखुत्तो' अनन्तवारं । 'तिरिक्खजोणीए' तिर्यग्योनौ । 'जं' यत् । 'पत्तोसि' प्राप्तोऽसि । 'अदीदकाले' अतीतकाले । 'चिंतेहि तं सव्वं' तत्सर्वं चिन्तय । तिरिक्खगदी ॥१५८२॥

देवत्तमाणुसत्ते जं ते जाएण सकयकम्मवसा ।
दुक्खाणि किलेसा वि य अणंतखुत्तो समणुभूदं ॥१५८३॥

'देवत्तमाणुसत्ते' देवत्वमानुषत्वयोः । 'जादेण' जातेन । 'सकयकम्मवसा' स्वकृतकर्मवशात् । 'दुक्खाणि किलेसा वि य' दुःखानि क्लेशाश्च । 'अणंतखुत्तो' अनन्तवारं समनुभूताः ॥१५८३॥

पियविप्पओगदुक्खं अप्पियसंवासजादुक्खं च ।
जं वेमणस्सदुक्खं जं दुक्खं पत्थिदालाभे ॥१५८४॥

'पियविप्पओगदुक्खं' प्रियविप्रयोगजातं दुःखं । 'अप्पियसंवासजादुक्खं च' अप्रियैः सहवासेन जातं च दुःखं । येषां नामश्रवणेऽपि शिरःशूलो जायते, येषां दर्शनाद्दृशौ घूर्णायेते । 'जं वेमणस्सदुक्खं' यद्वैमनस्यदुःखं 'पत्थिदालाभे जं दुक्खं' यद्दुःखं प्रार्थितालाभे ॥१५८४॥

परभिच्चदाए जं ते असब्भवयणेहिं कडुगफरुसेहिं ।
णिब्भच्छणावमाणणतज्जणदुक्खाइं पत्ताइं ॥१५८५॥

'परभिच्चदाए' परभृत्यतायां सत्यां 'ते' तव 'जं' यज्जातं । 'असब्भवयणेहिं' अशिष्टवचनैः । 'कडुगफरुसेहिं' कटुकैः परुषैश्च । 'णिब्भच्छणावमाणणतज्जणदुक्खाइं' 'पत्ताइं' निर्भर्त्सनापमानतर्जनदुःखानि प्राप्तानि ॥१५८५॥

हीणपरोसचिंतासोगामरिसग्गिपउलिदमणो जं ।
पत्तो घोरं दुक्खं माणुसजोणीए संतेण ॥१५८६॥

गा०—तिर्यञ्चयोनिमें तुमने अतीतकालमें अनन्तबार जो इस प्रकारके दुःख भोगे हैं उन सबका विचार करो ॥१५८२॥

गा०—अपने किये हुए कर्मके वशीभूत होकर तुमने देवपर्याय और मनुष्य पर्यायमें जन्म लिया और वहाँ भी अनन्तबार दुःख और क्लेशोंको भोगा ॥१५८३॥

गा०-टी०—प्रिय जनके वियोगका दुःख, अप्रियजनोंके साथमें रहनेका दुःख, जिनका नाम सुनकर भी सिरमें दर्द होता है, जिनके देखने मात्रसे आँखें लाल हो जाती हैं उन्हें अप्रिय कहते हैं। उनके साथमें रहनेका दुःख, वैमनस्यका दुःख और इच्छित वस्तुके न मिलनेका दुःख, दूसरे मालिककी नौकरी करनेपर अशिष्ट और कटुक वचनोंका दुःख, धिक्कार, तिरस्कार, अपमान और डाँटनेका दुःख तुमने सहा है ॥१५८४-८५॥

---

१. जं ते जायणदुक्खं —मूलारा० ।

'दीणत्तरोसचिंतासोगामरिसग्गिपरिगदो संतो' दीनत्वरोषचिन्ताशोकामर्षाग्निभिः संतप्तमना सन्। 'पत्तो घोरं दुक्खं' प्राप्तो घोरं दुःखं। 'माणुसजोणीए संतेण' मनुष्ययोनौ सता भवता ॥१५८६॥

दंडणमुंडणताडणधरिसणपरिमोससंकिलेसा य।
धणहरणदारधरिसणघरदाहजलादिधणणासं ॥१५८७॥

दंडणमुंडण—दण्डनमुण्डनताडनधर्षणपरिमोषणसंक्लेशाः धनापहरणदारधर्षणानि गृहदाहजलादिभिर्द्र-विणनाशात् ॥१५८७॥

दंडकसालट्ठिसदाणि डंगुराकंटमद्दणं घोरं।
कुंभीपाको मच्छयपलीवणं भत्तवुच्छेदो ॥१५८८॥

'दण्डकसालट्ठिसदाणि' दण्डकशायष्टिशतैस्ताडनानि दण्डादिकार्यत्वाद्दण्डादिशब्देनोच्यन्ते। डंगुरा मुष्टि-प्रहाराः। 'कंटमद्दणं' कण्टकानामुपरि प्रक्षिप्य मर्दनं घोरं। कुम्भीपाकः। 'मच्छयपलीवणं' मस्तके अग्नि-प्रज्वालनं। 'भत्तवुच्छेदो' आहारनिरोधः ॥१५८८॥

दमणं च हत्थिपादस्स णिगलबंधूवरत्तरज्जूहिं।
बंधणमाकोडणयं ओलंबणणिहणणं चेव ॥१५८९॥

'दमणं च हत्थिपादस्स' हस्तिपादेनोन्मर्दनं। 'णिगलबंधूवरत्तरज्जूहिं' निगडेन, अन्दुकाभिः, वरत्राभिः, रज्जुभिश्च बन्धनं। 'आकोडणयं' हस्तौ पृष्ठतो नीत्वा बन्धनं। 'ओलंबणं' ग्रीवाबद्धपाशस्य तरुशाखासु लम्बनं। 'णिहणणं' चेव गर्ते निक्षिप्य पूरणं ॥१५८९॥

कण्णोट्ठसीसणासाछेदणदंताण भंजणं चेव।
उप्पाडणं च अच्छीणं तहा जिब्भायणीहरणं ॥१५९०॥

'कण्णोट्ठसीसणासाछेदण' कर्णयोरोष्ठयोः, शिरसो, नासिकायाश्च छेदः। 'दंताण भंजणं चेव' दंतानां भञ्जनं। 'उप्पाडणं च अच्छीणं' अक्ष्णोरुत्पाटनं, तथा 'जिब्भाए णीहरणं' जिह्वानिर्हरणं ॥१५९०॥

गा०—दीनता, रोष, चिन्ता, शोक और क्रोधरूप आगसे मनके संतप्त होनेपर तुमने मनुष्ययोनिमें रहते हुए घोर दुःख पाया है ॥१५८६॥

गा०—राजा आदिसे दण्डित होना, सिर मुण्डा करा देना, पीटा जाना, तिरस्कारपूर्वक दोष लगाया जाना, चोरी होना, राजा आदिके द्वारा धनका हरण, स्त्रियोंको दोष लगाना, घरमें आग लगाना, बाढ़ वगैरहसे संपत्तिका नष्ट होना, डण्डे कोड़े लाठी आदिसे पीटा जाना, मुट्ठीका प्रहार होना, कांटोंके ऊपर लिटाकर घोर मर्दन करना, कड़ाहीमें डालकर पकाना, मस्तकपर आग जलाना, आहारका रोक देना इत्यादि दुःख तुमने मनुष्यगतिमें सहे हैं ॥१५८७–८८॥

गा०—हाथीके पैरसे दबाया जाना, सांकल, चमड़ेकी रस्सी या साधारण रस्सीसे बांधा जाना, दोनों हाथ पीछे करके बांधना, गर्दनमें रस्सी डालकर वृक्षसे लटकाना, गड्ढेमें डालकर उसे पूर देना। कान, ओष्ठ और नाक काटना, दांत तोड़ना, आंखें निकाल लेना, जीभ उखाड़ लेना, इत्यादि दुःख तुमने भोगे हैं ॥१५८९–९०॥

अग्गिविसचोरसप्पादियाघसत्थाभिघादवादेहिं ।
सीदुण्हदंसमसयेहिं तण्हाछुहादीहिं ॥१५९१॥

'अग्गिविसचोरसप्पादियादिसत्थाभिघादवादेहिं' अग्नेर्विषस्य, चौराणां, सर्पसिंहव्याघ्रादीनां, शस्त्रप्रहारस्य च वातैः । 'सीदुण्हदंसमसयेहिं' शीतोष्णेन, दंशमशकैः, 'तण्हाछुहादीहिं' तृट्क्षुधादिभिः ॥१५९१॥

जं दुक्खं संपत्तो अणंतखुत्तो मणे सरीरे य ।
माणुसभवे वि तं सव्वमेव चिंतेहि तं धीर ! ॥१५९२॥

'जं दुक्खं संपत्तो' यद्दुःखं संप्राप्तः । 'अणंतखुत्तो' अनन्तवारं । 'मणे सरीरे य' मनसि शरीरे च । मानसं शारीरं च दुःखं प्राप्तः । 'माणुसभवे वि' मनुष्यभवेऽपि । 'तं सव्वमेव चिंतेहि' तत्सर्वमेव चिन्तय । 'तं धीर' त्वं धीर ! ॥१५९२॥

सारीरादो दुक्खादु होइ देवेसु माणसं तिव्वं ।
दुक्खं दुस्सहमवसस्स परेण अभिजुज्जमाणस्स ॥१५९३॥

'सारीरादो दुक्खादु' शारीराद्दुःखात् । 'होदि' भवति । 'देवेसु' देवेषु । 'माणसं तिव्वं' मानसं तीव्रं दुःखं । 'दुस्सह' सोढुमशक्यं । 'अवसस्स' अवशस्य । 'परेण' अन्येन 'अभिजुज्जमाणस्स' अभियुज्यमानस्य वाहनतां नीयमानस्य ॥१५९३॥

देवो माणी संतो पासिय देवे महड्ढिए अण्णे ।
जं दुक्खं संपत्तो घोरं भग्गेण माणेण ॥१५९४॥

'देवो माणी संतो' देवो मानी सन् । 'पासिय देवे' देवान् दृष्ट्वा । 'महड्ढिए' महर्द्धिकान् । 'अण्णे' अन्यान् । 'जं दुक्खं संपत्तो घोरं' यद्घोरं दुःखं प्राप्तः । 'भग्गेण माणेण' भग्नेन मानेन ॥१५९४॥

दिव्वे भोगे अच्छरसाओ अवसस्स सग्गवासं च ।
पजहंतगस्स जं ते दुक्खं जादं चयणकाले ॥१५९५॥

गा०—आग, विष, शत्रु, सर्प आदि तथा सिंह, शस्त्रके प्रहारसे घात, शीत, उष्ण, डांस मच्छर, भूख प्यास, इनसे तुमने मनुष्यभवमें जो शारीरिक और मानसिक दुःख पाया है, हे धीर ! उस सबका विचार करो ॥१५९१-१५९२॥

गा०—जब देवगतिमें अभियोग्य जातिका देव होकर वह परवश होकर इन्द्रादिके द्वारा वाहन बनाया जाता है तब उसे शारीरिक दुःखसे तीव्र मानसिक दुःख होता है जो असह्य होता है ॥१५९३॥

गा०—अभिमानी देव हुआ तो अन्य महर्द्धिक देवोंको देखकर मानका भंग होनेसे जो घोर दुःख हुआ उसका विचार करो ॥१५९४॥

गा०—परवश होकर दिव्य भोग, देवांगनाएँ और स्वर्गवास त्यागनेपर स्वर्गसे च्युत होते समय जो दुःख हुआ उसको स्मरण करो ॥१५९५॥

'दिव्वे भोगे' दिव्यान्भोगान् । '[illegible]' [illegible] । '[illegible] च' [illegible] च । '[illegible]' परित्यजतः । '[illegible]' परवशस्य । 'जं से दुक्खं आसि' यत्तस्य दुःखं प्राप्तं । '[illegible]' [illegible] ॥१५९५॥

जं गब्भवासकुणिमं कुणिमाहारं छुहादिदुक्खं च ।
चिंतंतयस्स यं सुचिसुहिदस्स दुक्खं चयणकाले ॥१५९६॥

'जं गब्भवासकुणिमं' यद्गर्भवासकुणितं । 'कुणिमाहारं' कुणिताहारं । क्षुधादिदुःखं च । 'चिंतंतयस्स' चिन्तयतः । 'सुचिसुहिदस्स' शुचेः सुखितस्य । 'जं दुक्खं चयणकाले' स्वर्गाच्च्यवनकाले ॥१५९६॥

एवं एदं सव्वं दुक्खं चदुगदिगदं च जं पत्तो ।
तत्तो अणंतभागो होज्ज ण वा दुक्खमिमगं ते ॥१५९७॥

'एवं एवं सव्वं' एवमेतत्सर्वं । 'दुक्खं चदुगदिगदं' दुःखं चतुर्गतिगतं । 'जं पत्तो' यत्प्राप्तवान् । 'तत्तो' ततः । 'अणंतभागो' अनन्तभागाः । 'होज्ज ण वा' भवेद्वा न वा । 'दुक्खमिमग ते' दुःखमिदं तव मनुजजन्मनि ॥१५९७॥

संखेज्जमसंखेज्जं कालं ताइं अविस्समंतेण ।
दुक्खाइं सोढाइं किं पुण अदिअप्पकालमिमं ॥१५९८॥

'संखिज्जमसंखिज्जं कालं' संख्यातमसंख्यातं वा कालं । 'ताइं दुक्खाइं सोढाइं' तानि दुःखानि सोढानि । 'अविस्समंतेण' विश्रामरहितेन । 'किं पुणो' किं पुनः सह्यते । 'अदिअप्पकालमिमं' अत्यल्पकालमिदं दुःखं ॥१५९८॥

जदि तारिसाओ तुम्हे सोढाओ वेदणाओ अवसेण ।
धम्मोत्ति इमा सवसेण कहं सोढुं ण तीरेज्ज ॥१५९९॥

'जदि तारिसाओ' यदि तादृश्यः । 'तुम्हे सोढाओ वेदणाओ' त्वया सोढा वेदनाः । 'परवसेण'

गा०—पवित्र और सुखी देव स्वर्गसे च्युत होते समय विचारता है कि मुझे अब दुर्गन्धयुक्त गर्भमें आना होगा। वहाँ दुर्गन्धित भोजन होगा। भूख प्यासकी बाधा होगी। ऐसा विचार करते समय जो दुःख होता है उसका चिन्तन करो ॥१५९६॥

गा०—इस प्रकार चारों गतियोंमें तुमने जो यह सब दुःख भोगा है उसके अनन्तवें भाग दुःख इस मनुष्य जन्ममें हो न भी हो ॥१५९७॥

गा०—तुमने संख्यात वा असंख्यात काल पर्यन्त बिना विश्राम लिये ये दुःख सहे हैं। तब अति अल्पकालके लिये यह थोड़ासा दुःख क्यों नहीं सहते हो ॥१५९८॥

गा०-टी०—यदि तुमने परवश होकर उक्त प्रकारकी वेदनाएँ सही हैं तो इस समय इस वेदनाको धर्म मानकर स्वयं अपनी इच्छासे क्यों नहीं सहते।

शंका—वेदना धर्म कैसे है ?

१. मिदं भवे मनु —आ० मु०।

पराधीनेन । 'धम्मोत्ति' धर्म इति । 'इमा' इमं वेदना । 'सकसेण' स्ववशेन सता । 'सोढुं ण तीरेज्ज' सोढुं न शक्यते ? । कथं वेदना धर्मः ? उत्तमक्षमामार्दवार्जवादिविकल्पः दशप्रकारो धर्म उच्यते । वेदनासहनं धर्म इति कृत्वा कथं न शक्यते सोढुं संबन्धोऽयं ॥१५९९॥

[1]तण्हा अणंतखुत्तो संसारे तारिसी तुमं आसी ।
जं पसमेदुं सव्वोदधीणमुदगं ण तीरेज्ज ॥१६००॥
आसी अणंतखुत्तो संसारे ते छुधावि तारिसिया ।
जं पसमेदुं सव्वो पुग्गलकायो ण तीरेज्ज ॥१६०१॥
जदि तारिसया तण्हा छुहा य अवसेण ते तदा सोढा ।
धम्मोत्ति इमा सवसेण कधं सोढुं ण तीरेज्ज ॥१६०२॥
सुदपाणएण अणुसट्ठिभोयणेण य [2]गुणोववहिएण ।
झाणोसहेण तिव्वा वि वेदणा तीरदे सहिदुं ॥१६०३॥

'सुदपाणएण' विविधधर्मकथामृतपानेन । 'अणुसट्ठिभोयणेण य' अनुशासनभोजनेन । 'उववहिदेण' उपगृहीतेन । 'झाणोसहेण' शुभध्यानौषधेन च । 'तिव्वा वि वेदणा' तीव्रापि वेदना । 'तीरदे सहिदुं' शक्यते सोढुं ॥१६००॥१६०१॥१६०२॥१६०३॥

भीदो व अभीदो वा णिप्पडियम्मो व सपडियम्मो वा ।
मुच्चइ ण वेदणाए जीवो कम्मे उदिण्णम्मि ॥१६०४॥

'भीदो व अभीदो वा' भीतोऽभीतो वा । 'णिप्पडियम्मो सप्पडियम्मो वा' निष्प्रतिकारः सप्रतिकारो वा । 'मुच्चदि ण वेदणाए जीवो' न मुच्यते वेदनाया जीवः । 'कम्मे उदिण्णम्मि' कर्मण्यसद्वेद्ये उदीर्णे ॥१६०४॥

समाधान—उत्तम क्षमा मार्दव आर्जव आदिके भेदसे दस प्रकारका धर्म कहा है अतः वेदनाको सहना भी धर्म है ॥१५९९॥

गा०—हे क्षपक ! संसारमें तुम्हें ऐसी प्यासकी वेदना अनन्त बार हुई है जिसको शान्त करनेके लिये सब समुद्रोंका जल भी समर्थ नहीं है ॥१६००॥

गा०—संसारमें तुम्हें ऐसी भूखकी वेदना अनन्त बार हुई है जिसको शान्त करनेके लिये समस्त पुद्गल काय भी समर्थ नहीं है ॥१६०१॥

गा०—यदि तुमने परवश होकर वैसी भूख प्यासकी घोर वेदनाको सहा है तो अब धर्म मानकर इस वेदनाको स्वेच्छापूर्वक क्यों नहीं सहते ॥१६०२॥

गा०—तीन प्रकारकी धर्मकथाको कानोंके द्वारा पीकर, तथा गुरुकी शिक्षारूपी भोजन करके और शुभध्यानरूपी औषधको ग्रहण करके तीव्र भी वेदनाको सहा जा सकता है ॥१६०३॥

गा०—असातावेदनीय कर्मकी उदीरणा होनेपर डरो या न डरो, प्रतीकार करो या न करो, जीव वेदनासे छुटकारा नहीं पाता ॥१६०४॥

---

१. एतद् गाथाद्वयं टीकाकारो नेच्छति । २. गुणो उवक्कमिए,—आ० ।

पुरिसस्स पावकम्मोदयम्मि ण करंति वेदणोवसमं ।
सुट्ठु पउत्ताणि वि ओसधाणि अदिवीरियाणी वि ॥१६०५॥

'पुरिसस्स पावकम्मोदयम्मि' पुरुषस्य पापकर्मोदये 'ण करेंति' न कुर्वन्ति । 'वेदणोवसमं' वेदनोपशमं । 'सुट्ठु पउत्ताणि वि' सुष्ठु प्रयुक्तान्यपि । 'ओसधाणि वि' औषधानि 'अदिवीरियाणि' अतिवीर्याण्यपि ॥१६०५॥

रायादिकुडुंबीणं अदयाए असंजमं करंताणं ।
धण्णंतरी वि कादुं ण समत्थो वेदणोवसमं ॥१६०६॥

'रायादिकुडुंबीणं' राजादीनां कुटुम्बीनां अनेक द्रव्यसंपत्परिचारकसंपत्प्रख्यातानां । 'अदयाए असंजमं करेंताणं' दयामन्तरेणासंयमं कुर्वतां । 'धण्णंतरी वि कादुं' धन्वंतरिरपि कर्तुं असमर्थः । 'वेदणोवसमं' वेदनाया उपशमं । वैद्यसंपत्ता धन्वन्तरेर्ग्रहणेन सूचिता ॥१६०६॥

किं पुण जीवणिकाये दयंतया जादणेण लद्धेहिं ।
फासुगदव्वेहिं करेंति साहुणो वेदणोवसमं ॥१६०७॥

'किं पुणं' किं पुनः । 'जीवणिकाए' जीवनिकायान् । 'दयंतगा' दयमानाः । 'जायणेण लद्धेहिं' याञ्चया लब्धैः । 'फासुगदव्वेहिं' प्रासुकद्रव्यैः । 'करेज्ज' कुर्यात् । 'साहुणो वेदणोवसमं' साधोर्वेदनोपशमं । परिचारकसंपदभावो दर्श्यते 'जीवणिकाए दयंतगा' इत्यनेन । यथा व्याधेरुपशमो भवति तथा कुर्वंति परिचारकाः । अमी पुनर्यतयः षड्जीवनिकायबाधापरिहारोद्यता स्वसंयमविनाशभीरवो । 'जायणेण लद्धेहिं' इत्यनेन द्रव्यसंपदभाव आख्यायते ॥१६०७॥

मोक्खाभिलासिणो संजदस्स णिधणगमणं पि होदि वरं ।
ण य वेदणाभित्तं अप्पासुगसेवणं कादुं ॥१६०८॥

गा०—जब पुरुषके पापकर्मका उदय होता है तो अच्छी तरहसे प्रयुक्त और अतिशक्तिशाली भी औषधियाँ वेदनाको शान्त नहीं करतीं ॥१६०५॥

गा०-टी०—राजा आदि कुटुम्बी जिनके पास अनेक प्रकारकी धन-सम्पदा और सेवा करनेवाले दास-दासियोंकी प्रचुरता होती है, किन्तु जो दयाहीन होकर असंयमी जीवन बिताते हैं, उनकी वेदनाको शान्त करनेके लिये धन्वन्तरि भी समर्थ नहीं है। धन्वन्तरिपदसे वैद्यरूपी सम्पदाको सूचित किया है। अर्थात् धन्वन्तरि जैसा वैद्य भी उनकी वेदनाको दूर नहीं कर सकता ॥१६०६॥

गा०-टी०—तब जीवमात्रपर दया करनेवाले याचनासे प्राप्त प्रासुक द्रव्योंसे साधुकी वेदनाका उपशम कहाँ तक कर सकते हैं? अर्थात् परिचारक साधु जहाँ तक शक्य होता है व्याधिको शान्त करनेका प्रयत्न करते हैं क्योंकि उनके पास परिचारक रूप सम्पदा—दासदासी तो है नहीं और यतिगण छह कायके जीवोंको बाधा न पहुँचे इसके लिये सदा तत्पर रहते हैं तथा अपने संयमके विनाशसे भी भयभीत रहते हैं। साथ 'याचनासे प्राप्त' कहनेसे उनके पास धनसम्पदाका भी अभाव कहा है ॥१६०७॥

'मोक्खाभिलासिणो' निरवशेषकर्मापायाभिलाषिणः । 'संजदस्स' प्राणसंयमवतः । 'णिव्वाणगमणं वि होदि वरं' मरणमपि वरं । 'ण य' नैव वरं युक्तं । 'वेयणाणिमित्तं' वेदनोपशमार्थं । 'अप्पासुगसेवणं कादु' अयोग्यद्रव्यसेवनं कर्तुम् ॥१६०८॥

णिव्वाणगमणं एयभवे णासो पुणो पुरिल्लजम्मेसु ।
णासं असंजमो पुण कुणइ भवसएसु बहुगेसु ॥१६०९॥

'णिव्वाणगमणं एयभवे' निधनगमनमेकभवे । 'णासो' नाशः । 'ण पुणो' न पुनर्नाशः । 'पुरिल्लजम्मेसु' भाविषु जन्मसु । 'असंजमो पुण' असयमः पुनः । 'भवसएसु' जन्मशतेषु । 'बहुएसु' बहुषु । 'णासं कुणइ' नाशं करोति । वेदना हि न संयतमनुभवति रत्नत्रयभावनोद्यतं । सा हि असातं मन्दं करोति । असंयमः पुन असद्वेद्यं प्रकृष्टानुभवं करोति । उक्तं च—'दुःखशोकतापाक्रन्दनवधपरिदेवनान्यात्मपरोभयस्थान्यसद्वेद्यस्येति' [त० सू० ६।११] ॥१६०९॥

ण करेंति णिव्वुदं इच्छया वि देवा सइंदिया सव्वे ।
पुरिसस्स पावकम्मे अणक्कमग्गे उदिण्णम्मि ॥१६१०॥

'णं करेंति णिव्वुदं' न कुर्वन्ति निर्वृतिं । 'पुरिसस्स' पुरुषस्य । 'सइंदिया देवा सव्वे इच्छया वि' सेन्द्रकाः सर्वे देवा इच्छन्तोऽपि । 'पावकम्मे' पापकर्मणि । 'अणुक्कमगे' अनुक्रमके । 'उदिण्णम्मि' उदयमुपगते ॥१६१०॥

किह पुण अण्णो काहिदि उदिण्णकम्मस्स णिव्वुदिं पुरिसो ।
हत्थीहिं अतीरंतं भंतुं भंजिहिदि किह ससओ ॥१६११॥

'किह पुण' कथं पुन । 'अण्णो काहिदि पुरिसो' अन्यः करिष्यति पुरुषः । 'उदिण्णकम्मस्स' उदया-

---

गा०—समस्त कर्मबन्धनके विनाशरूप मोक्षके अभिलाषी संयमीका मरण होना भी श्रेष्ठ है। किन्तु वेदनाकी शान्तिके लिये अप्रासुक अयोग्य द्रव्यका सेवन करना श्रेष्ठ नहीं है ॥१६०८॥

गा०-टी०—मरण होना तो एक भवका ही विनाश है भावि जन्मोंका नाश नहीं है किन्तु असयम तो सैकड़ों जन्मोंको नष्ट कर देता है। जो संयमी रत्नत्रयकी भावनामें तत्पर रहते हैं वेदना उनको पीड़ा नहीं करती। क्योंकि रत्नत्रयको भावना असाताके उदयको मन्द करती है। और असंयम असातावेदनीयके अनुभागको बढ़ाता है। कहा भी है दुःख, शोक, पश्चात्ताप, रुदन, वध और हृदयको व्याकुल करनेवाला रुदन स्वयं करनेसे, दूसरोंमें करनेसे या दोनोंमें करनेसे असातावेदनीयका आस्रव होता है ॥१६०९॥

गा०—पुरुषके पापकर्मके अनुक्रमसे उदय आनेपर इन्द्रसहित सब देव इच्छा करनेपर भी सुखी नहीं कर सकते ॥१६१०॥

गा०—तब असातावेदनीय कर्मका उदय आनेपर अन्य साधारण पुरुष क्या कर सकते हैं ? जिसे महाबलशाली हाथी भी तोड़नेमें असमर्थ है क्या उसे बेचारा कमजोर खरगोश तोड़ सकता है ॥१६११॥

---

१. अनुक्रमेण—आ० । अणवक्कमगे निष्प्रतीकारे—मूलारा० ।

गतासद्दे शशकगणः । 'णिव्वुदि' निर्वृति । 'हत्थीहिं अतीरंतं वंतु' हस्तिभिर्महद्भिः कर्तुमशक्यं वञ्चनं । 'किय सलगो अंगीहिं' कथं स्वल्पप्राणो मङ्क्ष्यति शशकः ॥१६११॥

ते अप्पणो वि देवा कम्मोदयपच्चयं मरणदुक्खं ।
वारेदुं ण समत्था घणिदं पि विकुव्वमाणा वि ॥१६१२॥

'ते देवा अप्पणो वि कम्मोदयपच्चयं मरणदुक्खं' ते देवाः सेन्द्रकाः आत्मनोऽपि कर्मोदयहेतुकं मरणदुःखं 'वारेदुं ण समत्था' निवारयितुं न समर्थाः । 'घणिदंवि विकुव्वमाणा' नितरां विक्रियां कुर्वन्तोऽपि ॥१६१२॥

[1]उज्झंति जत्थ हत्थी महाबलपरक्कमा महाकाया ।
सुत्ते तम्मि वहंते ससया [2]ऊढेल्लया चेव ॥१६१३॥

'उज्झंति' यस्मिन् स्रोतसि हस्तिनः ऊह्यंते महाबलपराक्रमा महाकायाः । तस्मिन् स्रोतसि वहन्ति शशका गता एव ॥१६१३॥

किह पुण अण्णो मुच्चहिदि सगेण उदयागदेण कम्मेण ।
तेलोक्केण वि कम्मं अवारणिज्जं खु समुवेदं ॥१६१४॥

'किह पुण अण्णो मुच्चहिदि' कथं पुनरन्यो मोक्ष्यते, स्वेन कर्मणा उदयागतेन । त्रैलोक्येनापि कर्मानिवार्यमेव समुपगतं ॥१६१४॥

कह ठाइ सुक्कपत्तं वाएण पडंतयम्मि मेरुम्मि ।
देवे वि य विहेडयदो कम्मस्स तुमम्मि का गण्णा ॥१६१५॥

'कह ठाइ सुक्कपत्तं' कथं तिष्ठेत् शुष्कपत्रं । वातेन पतति मेरौ । अणिमाद्यष्टगुणसंपन्नान्देवानपि कुत्सीकुर्वतः कर्मणो भवत्यल्पबले का संज्ञा ॥१६१५॥

गा०—वे देव कर्मके उदयके कारण होनेवाले अपने भी मरणके दुःखको दूर करनेमें समर्थ नहीं है यद्यपि वे दिव्यशक्तिसे सम्पन्न होनेसे अनेक प्रकारकी विक्रिया करनेमें समर्थ होते हैं ॥१६१२॥

गा०—जिस प्रवाहमें महाबली, महापराक्रमी और विशाल शरीरवाले हाथी बह जाते हैं उस प्रवाहमें बेचारे खरगोश स्वयं ही बह जाते हैं ॥१६१३॥

गा०—जब देव भी अपने उदयागत कर्मको टालनेमें असमर्थ है तब अन्य साधारण प्राणी अपने उदयागत कर्मसे कैसे छूट सकता है ? उदयागत कर्मको तीनों लोक भी नहीं टाल सकते ॥१६१४॥

गा०—जिस वायुसे मेरुपर्वतका पतन हो सकता है उसके सामने सूखा पत्ता कैसे ठहर सकता है ? इसी प्रकार जो कर्म अणिमा आदि आठ गुणोंसे सम्पन्न देवोंकी भी दुर्गति कर देता है उसके सामने तुम्हारे जैसे मरणोन्मुख मनुष्यकी क्या गिनती है ॥१६१५॥

---

१. वुज्झंति—मूलारा० । २ ससिल्लिया अ० आ० ज० । बूडेल्लया मूलारा० ।

कम्माइं बलियाइं बलिओ कम्मादु णत्थि कोवि जगे ।
सव्वबलाइं कम्मं मलेदि हत्थीव णलिणिवणं ॥१६१६॥

'कम्माइं' कर्माणि बलवंति, कर्मभ्यो बलवान्नास्ति जगति । कस्मात्कस्मात्सर्वाणि बंधुविद्याद्रव्य-शरीरपरिवारबलानि कर्म मर्दयति हस्तीव नलिनवनं ॥१६१६॥

इच्चेवं कम्मुदओ अवारणिज्जोत्ति सुट्ठु णाऊण ।
मा दुक्खायसु मणसा कम्मम्मि सगे उदिण्णम्मि ॥१६१७॥

'इच्चेवं कम्मुदओ' इतिशब्दः प्रक्रांतपरिसमाप्तिं सूचयति । एवं इत्युक्तपरामर्शे । 'कम्मुदओ' कर्मोदय. । 'अवारणिज्जोत्ति' अनिवार्य इति । 'सुट्ठु णाऊण' सम्यग्ज्ञात्वा । 'मा दुक्खायसु मणसा' मा कार्षीर्दुःखं मनसा । 'कम्मम्मि सगे उदिण्णम्मि' कर्मणि स्वके उदीर्णे ॥१६१७॥

पडिकूविदे विसण्णे रडिदे दुक्खाइदे किलिट्ठे वा ।
ण य वेदणोवसामदि णेव विसेसो हवदि तिस्से ॥१६१८॥

'पडिकूविदे' परिदेवने कृते शोके । विषादे रटने, दुःखे, संक्लेशे वा न वेदनोपशाम्यति । नापि कश्चिदतिशयो भवति वेदनायाः ॥१६१८॥

अण्णो वि को वि ण गुणोत्थ संकिलेसेण होइ खवयस्स ।
अट्टं सुसंकिलेसो ज्झाणं तिरियाउगणिमित्तं ॥१६१९॥

'अण्णो वि को वि ण गुणोत्थ' अन्योप्यत्र गुणो न कश्चिच्छोकादिना संक्लेशेन । प्रेक्षापूर्वकारिणो हि तत्कर्तुं प्रारंभंते यस्य साध्यं फलं अस्ति । संक्लेशेन न किंचित् अपि मुमुक्षोः फलं अपि तु संक्लेशपरिणामो ह्यार्तं ध्यानममनोज्ञविप्रयोगाख्यं तच्च तिर्यगायुषो निमित्तं । ततोऽल्पदुःखभीरुं भवंतं त्वदीयः संक्लेशो दुस्तरे तिर्यगावर्ते निपातयतीति भयोपदर्शनं कृतं ॥१६१९॥

गा०—कर्म बड़े बलवान हैं । जगत्में कर्मसे बलवान कोई नहीं है । जैसे हाथी कमलोंके वनको रौंद डालता है । वैसे ही कर्म बन्धु, ज्ञान, द्रव्य, शरीर और परिवार आदि सब बलोंको नष्ट कर देता है । कर्मके सामने ये सब बल क्षीण हो जाते हैं ॥१६१६॥

गा०—इस प्रकार कर्मका उदय अनिवार्य है उसे रोका नहीं जा सकता इस बातको अच्छी तरहसे जानकर अपने कर्मका उदय आनेपर मनमें दुःख मत करो ॥१६१७॥

गा०—रोनेपर, विषाद करनेपर, चिल्लानेपर अथवा दुःख और संक्लेश करनेपर वेदना शान्त नहीं होती और उसमें कोई विशेषता भी नहीं आती ॥१६१८॥

गा०-टी०—शोक आदि संक्लेश करनेसे क्षपकका कोई अन्य लाभ भी नहीं है । बुद्धिमान पुरुष उसी कार्यको करना प्रारम्भ करते हैं जिससे कोई लाभ होता है । संक्लेशसे मुमुक्षुका जरा भी लाभ नहीं है । बल्कि इष्ट वियोग नामक आर्तध्यान संक्लेश परिणामरूप होनेसे तिर्यञ्चायुके बन्धका कारण है अतः थोड़ेसे दुःखसे डरनेवाले आपको तुम्हारा संक्लेश ऐसी तिर्यञ्चगतिरूपी भँवरमें डाल देगा जिससे निकलना बहुत कठिन है ॥१६१९॥

संक्लेशस्य नैरर्थक्यप्रकटनार्थोत्तरगाथा—

हदमाकासं मुट्ठीहिं होइ तह कंडिया तुसा होंति ।
सिगदाओ पीलिदाओ घुसिलिदमुदयं च होइ जहा ॥१६२०॥

'हदमागासं' हतं मुष्टिभिराकाशं ताडितुं । तुषकंडनं तंडुलार्थं । सिकतापीडनं तिलयंत्रे तैलार्थं । जलमंथनं च घृतार्थं यथापार्थकं तथानर्थकः संक्लेशो वेदनाकुलस्य । वेदनायाः अनिराकरणत्वान्नैरर्थक्य-साम्यादमेवोपन्यासो दृष्टान्तदार्ष्टान्तिकयोः ॥१६२०॥

पुव्वं सयमुवभुत्तं काले णाएण तेत्तियं दव्वं ।
को धारणिओ धणिदस्स देंतओ दुक्खिओ होज्ज ॥१६२१॥

'पुव्वं सयमुवभुत्तं' पूर्वं स्वयमुपभुक्तं । काले 'णाएण' न्यायेन । 'तेत्तियं दव्वं' तावद्द्रव्यं । 'को दुक्खिओ होज्ज धारणिगो' को दुःखितो भवेदधमर्णः । 'धणिदस्स' उत्तमर्णे । 'हरंते' स्वं द्रव्य हरति ॥१६२१॥

तह चेव सयं पुव्वं कदस्स कम्मस्स पाककालम्मि ।
णायागयम्मि को णाम दुक्खिओ होज्ज जाणंतो ॥१६२२॥

'तह चेव' तथा चैव । 'सयं पुव्वं कदस्स कम्मस्स' आत्मना पूर्वं कृतस्य कर्मण । 'पाककालम्मि' फलदानकाले न्यायेनागते । 'को णाम दुक्खिओ होज्ज जाणंतो' को नाम दुःखितो भवेज्ज्ञानी ॥१६२२॥

इय पुव्वकदं इणमज्ज महं कम्माणुगत्ति णाऊण ।
रिणमुक्खणं च दुक्खं पेच्छसु मा दुक्खिओ होहि ॥१६२३॥

'इय पुव्वकदं' 'इय' एवभूतं । 'दुक्खं पुव्वकदं' पूर्वकर्मणा कृत । 'इणं' इदं दुःखं । 'अज्ज' अद्य । 'महं कम्माणुगत्ति' मम कर्मणामिति । 'णाऊण' ज्ञात्वा । 'रिणमुक्खणं वा' ऋणमोक्षण इव । 'दुक्खं पिच्छसु' दुःखं प्रेक्षस्व । 'मा दुक्खिओ होहि' दुःखितो मा भू. ॥१६२३॥

आगे संक्लेशकी निरर्थकता बतलाते हैं—

गा०—जैसे मुट्ठियोसे आकाशको मारना, चावलके लिये उसके छिलकोंको कूटना, तेलके लिये कोल्हूमें रेत पेलना, और घीके लिये जलको मथना निरर्थक है उसी प्रकार वेदनासे पीड़ित व्यक्तिका संक्लेश करना निरर्थक है। संक्लेश करनेसे वेदना दूर नहीं होती है अतः निरर्थक होनेसे दृष्टान्त और दार्ष्टान्तमें समानता है ॥१६२०॥

गा०—जैसे कोई क़र्जदार साहूकारसे ऋण लेकर स्वयं उसका उपभोग करता है। और ऋण चुकानेका समय आनेपर उतना ही द्रव्य देते हुए उसे दुःख नहीं होता। उसी प्रकार पूर्वमें स्वयं बांधे हुए पापकर्मका फल भोगनेवाले ज्ञानीको दुःख कैसा? अतः पूर्वमें बांधे गये कर्मका उदयकाल आनेपर कौन ज्ञानी दुःखी होता है ॥१६२१–२२॥

गा०—यह दुःख मेरे पूर्वमें किये गये कर्मोंका ही फल है ऐसा जानकर दुःखको ऋण मुक्तिके समान देखो। दुःखी मत होओ ॥१६२३॥

पुव्वकदमज्झ कम्मं फलिदं दोसो ण इत्थ अण्णस्स ।
इदि अप्पणो पओगं णच्चा मा दुक्खिदो होहि ॥१६२४॥

'पुव्वकदमज्झ कम्मं' पूर्वकृत मदीयं कर्म, **'फलिदं'** फलित । **'दोसो ण एत्थ अण्णस्स'** दोषो नैवान्यस्य इति । **'अप्पणो पओगं 'णच्चा'** ज्ञात्वा । **'मा दुक्खिदो होहि'** मा कृथा दुःखं ॥१६२४॥

जदिदा अभूदपुव्वं अण्णेसिं दुक्खमप्पणो चेव ।
आदं हविज्ज तो णाय होज्ज दुक्खाइदुं जुत्तं ॥१६२५॥

'जदिदा' यदि तावत् । दुःखमन्येषा अभूतपूर्वं । **'अप्पणो चेव'** आत्मन एव **'आदं हविज्ज'** 'जातं भवेत्' **'तो णाम होज्ज दुक्खाइदुं जुत्तं'** । ततो नाम दुःखं कर्तुं युक्त ॥१६२५॥

सव्वेसिं सामण्णं अवस्सदायव्वयं करं काले ।
णाएण य को दाऊण णरो दुक्खादि विलवदि वा ॥१६२६॥

'सव्वेसिं सामण्णं' सर्वेषा भव्याना श्रामण्य । **'काले'** कर्मविनाशनकाले । **'अवस्स दायव्वय'** अवश्य दातव्य । यस्मात्तस्मात् । **'करं'** करशब्दवाच्य **'दाऊण'** दत्वा । **'णाएण य'** न्यायेन च **'को णरो दुक्खदि विलवदि वा'** को नरो दुःख करोति विलपति वा ॥१६२६॥

सव्वेसिं सामण्णं करभूदमवस्सभाविकम्मफलं ।
इण मज्ज मेत्ति णच्चा लभसु सदिं तं धिदिं कुणसु ॥१६२७॥

'सव्वेसिं' सर्वेषा विनेयाना । **'सामण्ण करभूदं'** श्रामण्य करभूत । **'अवस्सभाविकम्मफलं'** अवश्यभाविकर्मफल । **'इणमज्जमेत्ति'** इदं श्रामण्य अद्य करभूत ममेति । **'णच्चा'** ज्ञात्वा । **'लभसु सदिं'** स्मृति प्रतिपद्यस्व । **'तं'** त्व **'धिदिं कुणसु'** धृति कुरु ॥१६२७॥

अरहंतसिद्धकेवलि अविउत्ता सव्वसघसक्खिस्स ।
पच्चक्खाणस्स कदस्स भंजणादो वरं मरणं ॥१६२८॥

गा०—यह मेरे पूर्वकृत कर्मो का फल है। इसमें किसी दूसरेका दोष नहीं है। अतः इसे अपना ही प्रयोग जानकर दुःखी मत होओ ॥१६२४॥

गा०—हे क्षपक ! यदि यह दुःख दूसरोंको पहिले कभी नहीं हुआ और तुमको ही हुआ होता तो दुःख करना युक्त था ॥१६२५॥

गा०—कर्मो के विनाशका समय आनेपर सभी भव्य जीवोंको मुनिपद अवश्य धारण करना होता है। इसलिये इसे 'कर' कहा है। इस करको न्यायपूर्वक देकर कौन मनुष्य दुःखी होता है या विलाप करता है ॥१६२६॥

गा०—सभी मोक्षमार्गियोंके लिये यह श्रामण्य अवश्य भाविकर्मफल होनेसे करके समान देय है अर्थात् सभीको मुनिपद धारण करना होता है। आज यह श्रामण्य मेरे लिये करके समान देय है ऐसा जानकर अपने स्वरूपका स्मरण करो और धैर्य धारण करो ॥१६२७॥

'अरहंत सिद्धकेवलि अविउत्ता सव्वसंघसक्खिस्स'। अर्हतः, सिद्धान्, केवलिनः, तत्रस्था देवता सर्वं च संघं साक्षित्वेनोपादाय कृतस्य। 'पच्चक्खाणस्स भंगादो' प्रत्याख्यानस्य विनाशनात्। 'वरं' शोभनं 'मरणं' प्राणपरित्यागः ॥१६२८॥

कथं मरणादशोभनता [1]प्रत्याख्यानभंगस्येत्याशंकायामाचष्टे प्रबंधमुत्तरं प्रत्याख्यानभंजने दुष्टतां निवेदयितुम्—

आसादिदा तओ होंति तेण ते अप्पमाणकरणेण ।
राया विव सक्खिकदो विसंवदंतेण कज्जम्मि ॥१६२९॥

'आसादिदा' परिभूताः। 'तओ' ततः पश्चात्। प्रत्याख्यानग्रहणोत्तरकालं। तेन प्रत्याख्यानभंगकारिणा। ते अर्हदादयः। 'अप्पमाणकरणेण' अप्रमाणकरणेन। तत्साक्षिकं कर्म प्रतिज्ञातं विनाशयता ते अप्रमाणीकृता भवन्ति। अप्रमाणकरणेन च ते परिभूता भवन्ति। 'राया विव सक्खिकदो' राजेव साक्षीकृतः। 'कज्जम्मि विसंवदंतेण' कार्ये विसंवदता। एतदुक्तं भवति राजसाक्षिकं प्रतिज्ञातं कर्म चान्यथा कुर्वता राजा यथा परिभूतो भवति एवमर्हदादय इति ॥१६२९॥

जइ दे कदा पमाणं अरहंतादी हवेज्ज खवएण ।
तस्सक्खिदं कथं सो पच्चक्खाणं ण भंजिज्ज ॥१६३०॥

'जइ दे कदा पमाणं' यदि ते कृताः प्रमाणं। 'अरहंतादी' अर्हदादयः। 'भवेज्ज' भवेयुः। 'खवएण' क्षपकेण। 'तस्सक्खिदं कधं पच्चक्खाणं' तत्साक्षिकं कृतं प्रत्याख्यानं। 'सो ण भंजिज्ज' क्षपको न नाशयेत् ॥१६३०॥

सक्खिकदरायहीलणमावहइ णरस्स जह महादोसं ।
तह जिणवरादिआसादणा वि दोसं महं कुणदि ॥१६३१॥

गा०—अरहन्त, सिद्ध, केवली, उस स्थानके वासी देवता और सर्व संघको साक्षी बनाकर ग्रहण किये त्यागको तोड़नेसे मरण श्रेष्ठ है ॥१६२८॥

त्यागका भंग करना मरनेसे भी बुरा कैसे है ऐसी शंका होनेपर त्यागके भंगकी बुराई कहते हैं—

गा०—जैसे राजाको साक्षी बनाकर किये गये कार्यमें विसंवाद करनेवाला पुरुष राजाकी अवज्ञा करनेका दोषी होता है। वैसे ही अरहन्त आदि पंचपरमेष्ठीकी साक्षीपूर्वक स्वीकार किये गये त्यागको तोड़नेवाला मुनि अरहन्त आदिको भी प्रमाण न माननेसे उनकी अवज्ञा करनेका दोषी होता है ॥१६२९॥

गा०—यदि हे क्षपक ! तुम अरहंत आदिको प्रमाण मानते हो तो तुम्हे उनकी साक्षिपूर्वक किये गये त्यागको भंग नहीं करना चाहिये ॥ ६३०॥

गा०—जैसे राजाको साक्षी बनाकर उनकी अवज्ञा करना मनुष्यको महादोषका भागी बनाता है वैसे ही अर्हन्त आदिकी आसादना भी महादोषको करनेवाली है ॥१६३१॥

1. न अन्यास्ये—अ०।

'सक्खिकयरायहीलणं' साक्षीकृतराजपरिभव । 'आवहदि णरस्स जह महादोसं' आनयति यथा नरस्य महान्तं दोषं । 'तह जिणवरादि आसादणा' तथा अर्हदाद्यासादनापि । 'दोसं महं कुणदि' दोषं महान्तं करोति ॥१६३१॥

तं महान्तं दोषं कथयति—

तित्थयरपवयणसुदे आइरिए गणहरे महड्ढीए ।
एदे आसादंतो पावइ पारंचियं ठाणं ॥१६३२॥

'तित्थयरपवयणसुदे' तीर्थकरान्, रत्नत्रयं, आगमं । 'आयरिए' आचार्यान् । 'गणहरे' गणधरान् । 'महड्ढीए' महर्द्धिकान् । 'एदे' एतान् । 'असादंतो' असादयन् । 'पावदि' प्राप्नोति । 'पारंचियं ठाणं' पारंचियनामधेयं प्रायश्चित्तस्थान ॥१६३२॥

सक्खीकयरायासादणे हु दोसं करे हु एवभवे ।
भवकोडीसु य दोसं जिणादि आसादणं कुणइ ॥१६३३॥

साक्षीकृतराजावमानजाताद्दोषादर्हदाद्यवमानजनितदोषो महानिति दर्शयति । स्पष्टार्था गाथा ॥१६३३॥

[1]मोक्खाभिलासिणो संजदस्स णिधणगमणं पि होइ वरं ।
पच्चक्खाणं भंजंतस्स ण वरमरहदादिसक्खिकदा ॥१६३४॥
णिधणगमणमेयभवे णासो ण पुणो पुरिल्लजम्मेसु ।
णासं वयभंगो पुण कुणइ भवसएसु बहुएसु ॥१६३५॥
ण तहा दोसं पावइ पच्चक्खाणमकरित्तु कालगदो ।
जह भंजणा हु पावदि पच्चक्खाणं महादोसं ॥१६३६॥

उस महान दोषको कहते हैं—

गा०—तीर्थङ्कर, रत्नत्रय, आगम, आचार्य और महान् ऋद्धिधारियोंकी आसादना करने वाला पारंचिक नामक प्रायश्चित्तका भागी होता है ॥१६३२॥

गा०—साक्षी बनाये गये राजाकी आसादना करनेपर तो एक ही भवमें दोषका भागी होता है। किन्तु अरहन्त आदिकी आसादना करनेपर करोड़ों भवोंमें दोषका भागी होता है। अतः साक्षी बनाये गये राजाकी अवज्ञाके दोषसे अर्हन्त आदिकी अवज्ञासे होनेवाला दोष महान होता है ॥१६३३॥

मोक्षके अभिलाषी संयमीका मरना भी श्रेष्ठ होता है किन्तु अरहन्त आदिको साक्षी करके किये गये त्यागका भंग करना श्रेष्ठ नहीं है। मरणको प्राप्त होनेपर तो एक भवका ही विनाश होता है, आगेके भवोंका विनाश नहीं होता। किन्तु व्रतका भंग बहुतसे भवोंमें विनाशकारी होता है ॥१६३४-३५॥

---

१. एते द्वे गाथे टीकाकारो नेच्छति ।

'ण तहा दोसं पावदि' न तथा दोषं प्राप्नोति। 'पच्चक्खाणमकरित्तु' प्रत्याख्यानमकृत्वा। कालगतो मृतः। 'जह भंजतो पावदि' यथा प्रत्याख्यानभंगान्महादोषं प्राप्नोति ॥१६३४॥१६३५॥१६३६॥

प्रत्याख्याताहारसेवा हि प्रत्याख्यानभंगः स चाहारं प्रार्थ्यमानो हिंसादिदोषानखिलानानयतीति निगदति—

आहारत्थं हिंसइ भणइ असच्चं करेइ तेणेक्कं।
रूसइ लुब्भइ मायं करेइ परिगिण्हदि य संगे ॥१६३७॥

'आहारत्थं हिंसइ' आहारार्थं षड्जीवनिकायान्हिनस्ति। असत्यं भणति, स्तैन्यं करोति। रुष्यत्यलाभे, लुभ्यति लाभे, माया करोति, परिगृह्णाति संगान् ॥१६३७॥

होइ णरो णिल्लज्जो पयहइ तवणाणदंसणचरित्तं।
आमिसकलिणा ठइओ छायं मइलेइ य कुलस्स ॥१६३८॥

'होइ णरो णिल्लज्जो' निर्लज्जो भवति नर आहारार्थं परयाञ्चाकरणात्। प्रजहाति च तपो, ज्ञानं दर्शनं चारित्रं च। आमिषाख्येन कलिनावष्टब्धः छायां कुलस्य मलिनयति परोच्छिष्टभोजनादिना ॥१६३८॥

णासदि बुद्धी जिब्भावसस्स मंदा वि होदि तिक्खा वि।
जो णिगमिलेसलग्गो व होइ पुरिसो अणप्पवसो ॥१६३९॥

'णासदि बुद्धी' बुद्धिर्नश्यति आहारलम्पटतया युक्तायुक्तविवेकाकरणात्। कस्य? जिह्वावशस्य तीक्ष्णा पि सती पूर्वं बुद्धिः कुण्ठा भवति। रसरागमलोपप्लुता अर्थयाथात्म्यं न पश्यतीति पारसीकश्लेशलग्नलिंग इव भवति पुरुषोऽनात्मवशः ॥१६३९॥

गा०—बिना त्याग ग्रहण किये मरनेपर इतना दोष नहीं होता जितना महादोष त्याग लेकर उसका भंग करनेपर होता है ॥१६३६॥

त्यागे हुए आहारको ग्रहण करना व्रतभंग है। वह आहार हिंसा आदि सब दोषोंको लानेवाला है यह कहते हैं—

गा०—आहारके लिये मनुष्य छहकायके जीवोंका घात करता है। असत्य बोलता है, चोरी करता है। आहार न मिलनेपर क्रोध करता है। मिलनेपर उसका लोभ करता है। मायाचार करता है। घर पत्नी आदि परिग्रह स्वीकार करता है ॥१६३७॥

गा०—आहारके लिये मनुष्य निर्लज्ज होता है क्योंकि दूसरोंसे माँगता है। अपना तप, ज्ञान, दर्शन और चारित्र तक त्याग देता है। आहाररूपी कलिके द्वारा ग्रस्त होकर अपने कुलकी छायाको मलिन करता है दूसरोंका झूठा भोजन खाता है ॥१६३८॥

गा०—जो जिह्वाके वशीभूत है उसकी बुद्धि नष्ट हो जाती है क्योंकि भोजनका लम्पटी होनेसे वह भक्ष्य अभक्ष्यका विचार नहीं करता। यदि उसकी बुद्धि तीक्ष्ण होती है तो वह मन्द हो जाती है क्योंकि रसोंमें रागरूपी मलसे लिप्त होनेसे बुद्धि भक्ष्य वस्तुके यथार्थ स्वरूपको नहीं

---

१. जोणिकविलेस—अ०।

धीरत्तणमाहप्पं कदण्णदं विणयधम्मसद्धाओ ।
पयहइ कुणइ अणत्थं गललग्गो मच्छओ चेव ॥१६४०॥

'धीरत्तं' धीरत्वं, माहात्म्यं, कृतज्ञतां, विनयं, धर्मश्रद्धा च प्रजहाति । करोत्यनर्थश्रद्धा च । प्रजहाति करोत्यनर्थमात्मनः । गलावलग्नमत्स्य इव ॥१६४०॥

आहारत्थं पुरिसो माणी कुलजादि पहियकित्ती वि ।
भुंजंति अभोज्जाए कुणइ कम्मं अकिच्चं खु ॥१६४१॥

'आहारत्थं'—आहारार्थं, भुंक्ते अभोज्यानि पुरुषो मानी कुलीन., प्रथितकीर्तिरपि अकरणीयं करोति ॥१६४१॥

आहारत्थं मज्जारिसुंसुमारी अही मणुस्सी वि ।
दुब्भिक्खादिसु खायंति पुत्तभंडाणि दइयाणि ॥१६४२॥
इहपरलोइयदुक्खाणि आवहंते णरस्स जे दोसा ।
ते दोसे कुणइ णरो सव्वे आहारगिद्धीए ॥१६४३॥

स्पष्टम् उत्तरगाथाद्वयम् ॥१६४२॥१६४३॥

आहारलोलुपतया स्वयंभूरमणसमुद्रे तिमितिमिंगिलादयो मत्स्या महाकाया योजनसहस्रायामाः षण्मासं विवृतवदनाः स्वपन्ति । निद्राविमोक्षानन्तरं पिहिताननाः स्वजठरप्रविष्टमत्स्यादीनाहारीकृत्य अवधिष्ठानना-मधेयं नरकं प्रविशंति । तत्कर्णावलग्नमलाहाराः शालिसिक्थमात्रतनुरवाच्च शालिसिक्थसंज्ञकाः यदीदृशमस्माकं शरीरं भवेत् किं निःसतु एकोऽपि जन्तुर्लभते ? सर्वान्भक्षयामीति कृतमनःप्रणिधानास्ते तमेवावधिस्थानं प्रविशंति । इति कथयति गाथया—

देख पाती । तथा आहारका लम्पटी मनुष्य विषय सेवन करते हुए मनुष्यकी तरह अपनें वशमें नहीं रहता ॥१६३९॥

गा०—वह धीरता, माहात्म्य, कृतज्ञता, विनय और धर्मश्रद्धाको भी आहारके पीछे छोड़ देता है और गलेमें फँसी मछलीकी तरह अनर्थ करता है ॥१६४०॥

गा०—मानी, कुलीन और प्रख्यातकीर्ति वाला भी आहारके लिये अभक्ष्यका भक्षण करता है और न करने योग्य कर्म करता है ॥१६४१॥

गा०—भूखसे पीड़ित होनेपर बिल्ली, मच्छ, सर्पिणि और दुर्भिक्ष आदिमें मनुष्य भी अपने प्रिय पुत्रोंको खा जाते हैं ॥१६४२॥

गा०—मनुष्यके जो दोष इस लोक और परलोकमें दुःखदायी हैं वे सब दोष मनुष्य आहारकी लम्पटताके कारण ही करता है ॥१६४३॥

आगे कहते हैं—स्वयंभूरमण समुद्रमें तिमितिमिंगल आदि महाकाय वाले महामच्छ जो एक हजार योजन लम्बे होते हैं, छह मास तक मुंह खोले सोते रहते हैं । जागने पर अपने मुखमें घुसे मच्छों आदिको खाकर मरकर सातवें नरकमें जाते हैं । उसके कानमें एक सालिसिक्थ नामक मत्स्य रहता है जो उसके कानका मैल खाता है । उसका शरीर चावलके बराबर होता

अवधिट्ठाणं णिरयं मच्छा आहारहेदु गच्छंति ।
तत्थेवाहारमिलासेण गदो सालिसिच्छो वि ॥१६४४॥

अवधिट्ठाणमित्यादिका गाथा ॥१६४४॥

चक्कधरो वि सुभूमो फलरसगिद्धीए वंचिओ संतो ।
णट्ठो समुद्दमज्झे सपरिजणो तो गओ णिरयं ॥१६४५॥

'चक्कधरो वि सुभूमो' नाम चक्रलांछनः फलरसगृद्धया वंचितः समुद्रमध्ये विनष्टः सपरिजनः । पश्चाच्च नरकं गत. ॥१६४५॥

आहारत्थं काऊण पावकम्माणि तं परिगओ सि ।
संसारमणादीयं दुक्खसहस्साणि पावंतो ॥१६४६॥

आहारार्थं पापानि कर्माणि कृत्वा संसारमनादिकं प्रविष्टो भवान्दुःखसहस्राणि वेदयमानः ॥१६४६ ।

पुणरवि तहेव संसारं किं भमिदूणमिच्छसि अणंतं ।
जं णाम ण वोच्छिज्जइ अज्जवि आहारसण्णा ते ॥१६४७॥

'पुणरवि' पुनरपि । तथैव संसारमनंतमटितुं किमिच्छसि ? यस्मादद्याप्याहारे तृष्णा न नश्यति ॥१६४७॥

जीवस्स णत्थि तित्ती चिरंपि भुंजंतस्य आहारं ।
तित्तीए विणा चित्तं उव्वूरं उव्वुदं होइ ॥१६४८॥

'जीवस्स णत्थि तित्ती' जीवस्य नास्ति तृप्ति चिरमप्याहारं भुञ्जानस्य । तृप्त्या च विना चित्त नितरामुज्ज्वलं भवति ॥१६४८॥

है इसलिये उसे सालिसिक्थ कहते हैं । वह कानमे बैठा हुआ मनमे, सोचा करता है कि यदि मेरा शरीर ऐसा होता तो क्या एक भी जन्तु बचकर जा सकता मै सबको खा जाता । इसी संकल्पसे वह भी मरकर सातवें नरक जाता है—

स्यात्सुरसंततयः समकालाः, तन्न भवंति हि कर्मवशेन ॥
अब्ध्युपमामितजीवितदेवे, स्त्री चिरजीवितवत्यपि तस्याः ।
पल्यमितं बत जीवितकालं तेन वियोगमितः सुरलोकः ॥
मृत्युकृतं च विचिन्त्य सुदुःखं भावि सुराः परिभीतमनस्काः ।
तत्र भवन्ति मृगा इव बद्धा व्याघ्रसमीपमुपेत्य सभीकाः ॥
गर्भकृतामपि ते दुरवस्थां संपरिचिन्त्य पुन. समवाप्य ।
शोकभये विपुले परियान्ति चारकरोध इवाभ्युपयाते ॥
मूत्रपथादशुचेरतिदुःखं निर्गमनं स्मरतां च शुचीनां ।
जन्मतयेति भयं त्रिदिवानां, स्वावधिकं तदवाप्य सुखं तत् ॥
तामपि यातु पतेत् क्षुदनिष्टा पश्यत सर्पवधूरिव कष्टा ।
वर्षसहस्रमितीह् गतेऽपि कालवरो न जहात्यहमिन्द्रं ॥
उच्छ्वसनं भ्रमदं गुरुतोपि-पक्षमितैर्दिवसैर्यदि यान्ति ।
काभ्यसुरेषु कथा बत लोके ही सततो भ्रमणार्णववासः ॥

सुन्दर फूलोंसे रचित माला धारण करते हैं जो कभी मुरझाती नहीं है ॥ सुखपूर्वक माला और गन्धसे विलिप्त वे देव अत्यन्त स्वच्छ वस्त्र धारण करते हैं और रतिमें निपुण अपनी देवांगनाओं-के साथ रमण करते हैं ॥ इस प्रकार सुखपूर्वक जीवन यापन करते हुए वियोगजन्य सन्तापको सहते हैं। क्योंकि स्वर्गोंमें महर्द्धिक भी देव-देवांगना समान आयुवाले नहीं होते। आगे-पीछे मरते हैं ॥ मध्यलोकसे यहाँके प्राणियोंकी कषाय तीव्रतर होती है। अतः कर्मवश देव-देवांगनाओंकी आयु समान नहीं होती ॥ देवकी आयु सागरप्रमाण होती है और देवांगना चिरकाल तक भी जीवित रहे तो उसकी आयु पल्यप्रमाण ही होती है इसलिये देवलोकमें वियोगजन्य सन्ताप होता है। भविष्यमें होनेवाले मृत्यु जन्य दुःखका विचार करके देव डर जाते हैं और वहाँ ऐसे भयभीत रहते हैं जैसे व्याघ्रके समीपमें बांधे गये मृग। स्वर्गलोकसे च्युत होनेपर गर्भमें होनेवाली दुरवस्थाका भी विचार करके वे महान् शोक और भयसे युक्त होते हैं जैसे कोई जेलखानेसे डरता है। पवित्र देवोंको देवलोकमें जितना सुख होता है उससे भी अधिक भय स्त्रीके अपवित्र मूत्रमार्ग-से जन्म लेनेका स्मरण करके जन्मसे ही होता है। यहाँ स्वर्गमें तो हजार वर्ष बीतनेपर भी भूख नहीं सताती थी। किन्तु मनुष्य पर्यायमें जन्म लेनेपर सर्पिणीकी तरह भूख सताती है, यह भय अहमिन्द्रदेवको भी नहीं छोड़ता। स्वर्गमें तो पन्द्रह दिनमें एक बार श्वास लेनेका श्रम उठाना होता

१. वांमृष्टं –आ० मु० । २. मा वस्त्राव –अ० । ३. तत्र सुखं तोऽपि यांति –आ० ।

रोगजरादिकलङ्कविहीनास्तत्र पुनश्च भवाम्बुधिमध्यात् ।
तत्सहितं प्रसमीक्ष्य पुरस्तात् प्राप्यमवश्यमतश्च्युतमात्रे ॥
अन्यवशादवशा विलपन्तो देशमिवान्यमुपद्रवयुक्तं ।
संप्रतिपत्तस्य उपगर्भं ते शोकवशा बहुशोऽपि भवन्ति ॥
यत्सुरसौख्यमवाप्य विमाने भूतलको जननीरपि यान्ति ।
तत्परिचिन्तयतां कुशलानां केन सुरेषु भवेद्बहुमानं ॥
तेऽवधिना विधिना बहुतत्त्वं दूरगतान्यपि जानत एव ।
तेन भयान्यनुभूय पुरस्तात्तदनुभवते [1]भयमृत्युमपश्चात् ॥
यः सहसा भयमभ्युपयाति पूर्वतरं न भयं स उपैति ।
प्राग्विदितात्मवधस्तु नरः प्राक् प्राप्य भयं वधमेति हि पश्चात् ॥
अतो न सौख्यं तदिहास्ति किंचन विमृश्यमानं मनसा भवार्णवे ।
सुखे प्रसक्तो विपुले [2]पुमानयं भजेत दुःखेन विनाणुनापि यत् ॥
यथाणुकेशोपहतेऽपि भोजने न तं नरो रोचयते कुलोचितः ।
तथाल्पको [3]लेशोऽप्यसुखे सुखे सति न तद्बुधो रोचयते कथाचन ॥
[4]प्रपीयमानेऽम्बुनि पातितो यथा लवोऽपि मूत्रस्य तदंबु दूषयेत् ।
तथा लवांशोऽप्यसुखस्य सत्सुखे करोति सर्वस्य सुखस्य दूषणं ॥

किन्तु मनुष्यगतिमें तो सतत श्वास लेना होता है। हा, जन्मरूपी समुद्रका वास भयकारक है। यहाँ देवगतिमें तो रोग, बुढ़ापा आदि नहीं है। किन्तु मनुष्योंमें तो ये सब हैं। यहाँसे च्युत होने पर ये सब अवश्य प्राप्त होंगे। ऐसा देख वे देव दुःखी होते हैं। जैसे कोई परवश होकर उपद्रवसे युक्त अन्य देशमें जानेपर विलाप करता है वैसे ही देव स्वाधीन होते हुए भी परवश होकर देवगतिसे मनुष्यगतिमें जानेका बहुत शोक करते हैं। स्वर्गके विमानोंमें देवोंका सुख प्राप्त करके भी जीवोंको पुनः इसी मनुष्यलोकमें जन्म लेना होता है ऐसा विचार करनेवाले बुद्धिमानोंको देवोंके प्रति बहुमान कैसे हो सकता है। वे देव अवधिज्ञानके द्वारा दूरवर्ती तत्त्वोंको भी जानते ही हैं। इससे पहले ही भयका अनुभव करते हैं।

जो भय अचानक उपस्थित होता है उसका भय पहलेसे नहीं होता। किन्तु जिस मनुष्यको पहलेसे यह ज्ञात हो जाता है कि मेरा वध होगा वह पहले भयभीत होता है, पीछे मारा जाता है। अर्थात् मनुष्यगतिमें तो मृत्युका बोध पहलेसे नहीं होता। किन्तु देवगतिमें तो मृत्युसे छह मास पूर्व माला मुरझा जाती है। अतः मृत्यु पीछे होती है और उसका भय पहले आ जाता है। अतः विचार करनेपर इस संसाररूपी समुद्रमें कुछ भी सुख नहीं है। बहुत सुखमें आसक्त मनुष्य भी एक परमाणु प्रमाण दुःखके बिना सुख नहीं भोग सकता। अर्थात् संसारके सुखमें दुःखका मिश्रण रहता ही है। जैसे कुलीन मनुष्यको यदि भोजनमें जरा सा भी बाल आदि गिर जाये तो भोजन नहीं रुचता उसी प्रकार ज्ञानीको बहुतसे सुखमें थोड़ा सा भी दुःख मिला हो तो वह सुख नहीं रुचता। जैसे पीनेके पानीमें मूत्रकी एक बूँद भी गिरनेपर वह पानी दूषित

---

१. भयमप्यय पश्चात् –आ० । २. पुमानयं –आ० मु० । ३. दोषोऽप्य–अ० मु० । ४. प्रपीयमाने –अ० आ० ।

गुणैरनेकैरपि संयुतां स्त्रियं कुलापचारां सकृदप्यनिर्घृणः ।
नरो जहात्येव यथा तथा बुधो न दुःखदोषाविव सोऽनुभिच्छति (?)

'कुणिमम्मि वसति गब्भे' कुथितगर्भे वसति । 'धिगत्थु संसारवासस्स' धिगस्तु ससारवासस्य । उक्तं च—

त्यागात्क्रमेणादेव [1]समुत्थं मनुजेषु गर्भस्मृत्या गर्भनिपातं च समीक्ष्य ।
त्रस्तादेव [2]देहाशुचीनपि निरोक्ष्य गर्भाविष्टा दुःखमिवान्तेऽनुभवन्ति ॥१७९७॥

इय किं परलोगे वा सत्तू पुरिसस्स हुंति णीया वि ।
इहइं परत्त वा खाइ पुत्तमंसं णियमादा ॥१७९८॥

'इत्थ किं परलोगे वा' इहलोके परलोके वा, 'पुरिसस्स णीया वि सत्तू होंति' बान्धवोऽपि शत्रवो भवंति पुरुषस्य । 'इहइं परत्त वा खाइ' इह वा परत्र वा अत्ति, 'पुत्तमंसं णियमादा' पुत्रस्य मांस आत्मीया जननी अत्ति किमत· पर कष्टं ॥१७९८॥

होऊण रिऊ बहुदुक्खकारओ बंधवो पुणो होदि ।
इय परिवत्तइ णीयत्तणं च सत्तुत्तणं च जये ॥१७९९॥

'होऊण रिऊ' रिपुर्भूत्वा पूर्वं । 'बहुदुक्खकरो' विचित्रदुःखकारी । स एव पुणो पश्चादपि । 'पिय बन्धवो होदि' प्रियबांधवो भवति । 'इय परिवत्तदि' एवं परिवर्तते । 'णीयत्तणं च सत्तुत्तणं च' बन्धुत्व च शत्रुत्वं च । 'जगे' जीवलोके ॥१७९९॥

विमलाहेदुं वंकेण मारिओ णियमारियागब्भे ।
जाओ जाओ जादिंभरो सुदिट्ठी सकम्मेहिं ॥१८००॥

'विमलाहेदुं' विमलानिमित्तं । 'वंकेण मारिदो' वक्राख्येन भृतकेन मारितः । कः ? 'सुदिट्ठी' सुदृष्टि-

हो जाता है उसी प्रकार दुःखका जरा सा भी अंश सब सुखको दूषित कर देता है। जैसे अनेक गुणोंसे युक्त स्त्री यदि एक बार भी व्यभिचार दोषसे दूषित हो जाये तो दयालु भी मनुष्य उसे त्याग देता है। उसी प्रकार ज्ञानी मनुष्य भी दुःखसे मिश्रित सुखको त्याग देता है।

अतः कहा है—मनुष्योंमें गर्भका स्मरण करके तथा गर्भपातको देखकर और मनुष्योंके अपवित्र शरीरको देखकर देव दुःखी होते हैं और मरण होनेपर गर्भमें प्रवेश करके दुःख भोगते हैं ॥१७९७॥

गा०—इस लोक अथवा परलोकमें बन्धु भी मनुष्यके शत्रु हो जाते हैं। इस लोक तथा परलोकमें माता भी अपने पुत्रके मांसको खाती है इससे अधिक कष्टकी बात और क्या है ? ॥१७९८॥

गा०—बहुत दुःख देनेवाला शत्रु भी पुनः प्रिय बन्धु हो जाता है। इस प्रकार जगत्में बन्धुता और शत्रुता परिवर्तनशील है ॥१७९९॥

गा०—सुदृष्टि नामक रत्नपारखी मैथुन करते समय अपनी पत्नी विमलाके निमित्तसे

१. समुत्थान् अ० । २. त्रस्ता देहचशुनीवि -अ० ।

नामधेयः। 'सकम्मेहिं' आत्मीयैः कर्मभिः। 'जादो' उत्पन्नः। क्व 'णियभारियागब्भे' निजभार्यागर्भे। 'जाविभरो जादो' जातिस्मरश्च जातः ॥१८००॥

होऊण बंभणो सोत्तिओ खु पावं करित्तु माणेण।
सुणगो व सूयरो वा पाणो वा होइ परलोए ॥१८०१॥

'होऊण बंभणो सोत्तिओ' श्रोत्रियो ब्राह्मणो भूत्वा। 'माणेण' जातिमदेन। गुणिजननिन्दावमानाभ्यां 'पावं करित्तु' पापं कृत्वा नीचैर्गोत्रमुपचित्य। 'सुणगो व सूयरो वा पाणो वा होदि परलोए' श्वा शूकरश्चाण्डालो वा भवति परजन्मनि ॥१८०१॥

दारिद्दं अड्ढत्तं णिंदं च थुदिं च वसणमब्भुदयं।
पावदि बहुसो जीवो पुरिसित्थिणवुंसयत्तं च ॥१८०२॥

'दारिद्दं' दारिद्र्यं। 'बहुसो जीवो पावदि' बहुशः जीवः प्राप्नोति लाभान्तरायोदयात्। 'अड्ढत्तं' आढ्यतां पूर्ववदेव सम्बन्धः। 'पावदि बहुसो इमो' इत्यनेन। लाभान्तरायक्षयोपशमादीप्सितानि द्रव्याणि लभते, लब्धानि च नश्यन्ति ततः आढ्यता। 'णिंदा' श्वपाकश्चण्डालः कुण. काणो दुर्भगो मूर्ख. कृपण इत्यादिकां। 'थुदिं च' स्तुतिं च कुलीनो रूपवान् वाग्मी आढ्यः प्राज्ञ इत्यादिका यशस्कीर्तेरुदयात्। 'एव वसणं' दुःखं असद्वेद्योदयात्। 'अब्भुदयं' देवमनुजभवजं सुखं सद्वेद्योदयात्। 'पुरिसित्थिणवुंसयत्तं च' पुरुषत्वं च स्त्रीत्वं च नपुंसकत्वं च बहुशः प्राप्नोति ॥१८०२॥

कारी होइ अकारी अप्पडिभोगो जणो हु लोगम्मि।
कारी वि जणसमक्खं होइ अकारी सपडिभोगो ॥१८०३॥

'अकारी अपि' दोषमकुर्वन्नपि कारी भवति, 'अप्पडिभोगो जणो' पुण्यरहितो जनः। 'कारीवि' कुर्व-

---

अपने सेवक बकके द्वारा मारा गया और मरकर अपनी पत्नी विमलाके गर्भसे उत्पन्न हुआ। उत्पन्न होनेपर उसे पूर्वजन्मका स्मरण हो आया ॥१८००॥

विशेषार्थ—बृहत्कथाकोशमें १५३वें नम्बर पर इसकी कथा है।

गा०—श्रोत्रिय ब्राह्मण होकर यह जीव अपनी जातिका अभिमान करके गुणी जनोंकी निन्दा और अपमानके द्वारा नीच गोत्रका बन्ध करता है और मरकर परलोकमें कुत्ता, सूकर या चण्डाल होता है ॥१८०१॥

गा०-टी०—यह जीव लाभान्तरायका उदय होनेसे अनेक बार दरिद्र अवस्था पाता है। लाभान्तरायका क्षयोपशम होनेसे अनेक बार इच्छित धन पाता है। इस प्रकार अनेक बार धनीसे दरिद्र और दरिद्रसे धनी होता है। अयशकीर्तिका उदय होनेसे चण्डाल, काना, अभागा, मूर्ख, कंजूस आदि निन्दाका पात्र होता है। यशःकीर्तिका उदय होनेसे कुलीन, रूपवान, धनी, पण्डित इत्यादि स्तुतिका पात्र होता है। असातावेदनीयका उदय होनेसे दुःख उठाता है और सातावेदनीयका उदय होनेसे देव और मनुष्य भवका सुख भोगता है। इसी प्रकार अनेक बार स्त्री, पुरुष और नपुंसक होता है ॥१८०२॥

गा०—पुण्यहीन मनुष्य लोकमें दोष नहीं करनेपर भी दोषका भागी होता है। और पुण्यवान अनाचार करके भी लोगोंके सन्मुख दुराचारी सिद्ध नहीं होता ॥१८०३॥

मध्यमाचारं, 'जणसमक्खं' जनानां प्रत्यक्षं 'अकारी होदि' दुराचारो न भवति। 'सपडिभगा पुण्यवान् ॥१८०३॥

सरिसीए चंदिगाए कालो वेस्सो पिओ जहा जोण्हो।
सरिसे वि तहाचारे कोई वेस्सो पिओ कोई ॥१८०४॥

'सरिसीए चंदिगाए' चंद्रिकायां समानायामपि। 'कालो वेस्सो' कालपक्षो द्वेष्यः। 'पिओ जहा जोण्हो' शुक्लपक्षो यथा प्रियः। 'सरिसे वि तहाचारे' मदृशेऽप्याचारे द्वयो: पुंसो:। 'कोई वेस्सो पिओ कोई' कश्चित् द्वेष्यः कश्चित् प्रियः ॥१८०४॥

इय एस लोगधम्मो चिंतिज्जंतो करेइ णिव्वेदं।
धण्णा ते भयवंता जे मुक्का लोगधम्मादो ॥१८०५॥

'इय एस लोगधम्मो' अयमेव प्राणिधर्मः। 'चिंतिज्जंतो' चिन्त्यमानो। 'करेइ णिव्वेदं' निर्वेदं करोति। 'धण्णा ते भयवंता' पुण्यवन्तस्ते यतयः। 'जे मुक्का लोगधम्मादो' ये मुक्ता: प्राणिधर्माद् व्यावर्णितात् ॥१८०५॥

विज्जू व चंचलं फेणदुब्बलं वाधिमहियमच्चुहदं।
णाणी किह पेच्छंतो रमेज्ज दुक्खुद्धुदं लोगं ॥१८०६॥

'विज्जू व चंचलं' विद्युदिव चंचलं, 'फेणदुब्बलं' फेनमिव दुर्बलं। 'वाधिमहियमच्चुहदं' व्याधिभिर्मथितं मृत्युना हतं। 'लोगं पेच्छंतो' लोकं पश्यन्। 'णाणी किह रमेज्ज' ज्ञानी कथं तत्र रतिं कुर्यात्। लोगधम्मचिन्ता ॥१८०६॥

अशुभत्वानुप्रेक्षा प्रक्रम्यते—

असुहा अत्था कामा य हुंति देहो य सव्वमणुयाणं।
एओ चेव सुभो णवरि सव्वसोक्खायरो धम्मो ॥१८०७॥

'असुहा अत्था कामा य हुंति' अशुभा अर्था: कामाश्च भवन्ति। 'देहो य सव्वमणुयाणं' देहश्च सर्व

गा०—जैसे चांदकी चांदनोके समान होनेपर भी लोग कृष्णपक्षसे द्वेष करते हैं और शुक्लपक्षसे प्रेम करते हैं। वैसे ही समान आचार होते हुए भी कोई मनुष्य लोगोको प्रिय होता है और कोई अप्रिय होता है ॥१८०४॥

गा०—इस प्रकार लोकदशाका चिन्तन करनेसे वैराग्य उत्पन्न होता है। वे पुण्यवान यतिजन धन्य हैं जो इस ऊपर कही संसारकी दशासे मुक्त हो गये हैं ॥१८०५॥

गा०—बिजलीकी तरह चचल, फेनकी तरह दुर्बल, रोगोसे ग्रस्त और मृत्युसे पीड़ित इस लोकका देखकर ज्ञानी इसमें कैसे अनुराग कर सकता है ॥१८०६॥

इस प्रकार लोकानुप्रेक्षाका कथन समाप्त हुआ।

अब अशुभत्व अनुप्रेक्षाका कथन करते है—

गा०—अर्थ, काम और सब मनुष्योकी देह अशुभ है। एक सब सुखोकी खान धर्म ही शुभ है। शेष सब अशुभ है ॥१८०७॥

मनुष्याणाम् । 'एक्को चेव सुभो' एक एव शुभः पुनः । 'सव्वसुहायरो धम्मो' सर्वेषां सौख्यानामाकरो धर्मः ॥१८०७॥

अर्थस्याशुभतां व्याचष्टे—

इहलोगियपरलोगियदोसे पुरिसस्स आवहइ णिच्चं ।
अत्थो अणत्थमूलं महाभयं मुत्तिपडिपंथो ॥१८०८॥

'इहलोगियपरलोगियदोसे' ऐहिकान् पारलौकिकांश्च दोषान् । 'पुरिसस्स आवहइ णिच्चं' पुरुषस्य आवहति नित्यं । 'अत्थो अणत्थमूलं' अर्थोऽनर्थानां मूलं, 'महाभयं' महतो भयस्य मूलत्वान्महाभयं । 'मुत्ति-पडिपंथो' मुक्तेरर्गलीभूतः ॥१८०८॥

कामस्याशुभत्वतामाचष्टे—

कुणिमकुडिभवा लहुगत्तकारया अप्पकालिया कामा ।
उवधो लोए दुक्खावहा य ण य हुंति ते सुलहा ॥१८०९॥

'कुणिमकुडिभवा लहुगत्तकारया' अशुचिकुटिभवाः लघुत्वकारिणः । 'अप्पकालिया कामा' अल्प-कालेषु भवाः कामाः । 'उवधो लोए' लोकद्वये दुःखावहाश्च । 'ण य होंति ते सुलभाः' नैव ते सुलभा भवन्ति ॥१८०९॥

कामाशुभत्वमाख्याति—

अट्ठिदलिया छिरावक्कवद्धिया मंसमट्टियालित्ता ।
बहुकुणिमभण्डभरिदा विहिंसणिज्जा खु कुणिमकुडी ॥१८१०॥

'अट्ठिदलिया' अस्थिदलनिष्पन्ना । 'छिरावक्कवद्धिया' शिरावल्कलबद्धा । 'मंसमट्टियालित्ता' मांस

अर्थकी अशुभता बतलाते हैं—

गा०—टी०—धन सब अनर्थोंकी जड है। यह पुरुषमें इस लोक और परलोक सम्बन्धी दोष लाता है अर्थात् धन पाकर मनुष्य व्यसनोंमें फँस जाता है और उससे वह इस लोकमें भी निन्दाका पात्र होता है और परलोकमें भी कष्ट उठाता है। मृत्यु आदि महान् भयोंका मूल होनेसे धन महाभय रूप है। और मोक्षमार्गके लिये तो अर्गला है। धनमें मस्त मनुष्य मोक्षकी बात भी सुनना नहीं चाहता ॥१८०८॥

अब कामकी अशुभता बतलाते हैं—

गा०—यह कामभोग अपवित्र अपने और परके शरीरके संयोगसे पैदा होता है। यह मनुष्यको गिराता है, उसे लोगोंकी दृष्टिमें लघु करता है। यह अल्पकालके लिये होता है तथा दोनों ही लोकोमें दुःखदायी है। तथा सुलभ भी नहीं है ॥१८०९॥

अब शरीरकी अशुचिता कहते हैं—

गा०—यह शरीर रूपी कुटी हड्डी रूपी पत्तोंसे बनी है। सिराएँ रूपी वल्कल (छाल) से

मृत्तिकालिप्ता। 'बहुकुणिमभंडभरिदा' अनेकाशुचिद्रव्यपूर्णा। 'विहिंसणिज्जा खु कुणिमकुडी' जुगुप्सनीया अशुचिकुटी ॥१८१०॥

इंगालो धुव्वंतो ण सुद्धिमुवयादि जह जलादीहिं।
तह देहो धोव्वंतो ण जाइ सुद्धिं जलादीहिं ॥१८११॥

'इंगालो धोव्वंतो' प्रक्षाल्यमाना मषी न शुद्धमुपयाति न शुक्लतामुपयाति। 'जह' यथा। 'जलादीहिं' जलादिभिः। 'तह देहो धोव्वंतो' तथा शरीरं प्रक्षाल्यमानं। 'ण जादि सुद्धिं जलादीहिं' न याति शुद्धिं जलादिभिः ॥१८११॥

सलिलादीणि अमेज्झं कुणइ अमेज्झाणि ण दु जलादीणि।
मेज्झममेज्झं कुव्वंति सयमवि मेज्झाणि संताणि ॥१८१२॥

'सलिलादीणि' सलिलादीनि द्रव्याणि शुचीनि। 'अमेज्झं कुणदि' अमेध्य करोति। 'अमेज्झाणि' अशुचीनि। 'ण दु जलादीणि मेज्झं कुणदि' नैवं जलादीनि शुचितामापादयन्तीति। 'अमेज्झाणि' अशुचीनि 'सयममेज्झाणि संताणि' अमेध्ययोगात् स्वयमशुचीनि सन्ति ॥१८१२॥

तारिसयममेज्झमयं सरीरयं किह जलादिजोगेण।
मेज्झं हवेज्ज मेज्झं ण हु होदि अमेज्झमयघडओ ॥१८१३॥

'तारिसयममेज्झमयं' शुचीनामशुचिताकरणसमर्थाशुचिमयं शरीरकं। 'किह' कथं। 'जलादिजोगेण' जलादिसम्बन्धेन। 'मेज्झं हवेज्ज' शुचिर्भवेत्। 'अमेज्झमय घडगो' अमेध्यमयो घटः। 'ण हु मेज्झो होदि' नैव शुचिर्भवति। यथा जलादियोगेन ॥१८१३॥

यदि शरीरमशुचि किं तर्हि शुचीत्यत्राह—

णवरि हु धम्मो मेज्झो धम्मत्थस्स वि णमंति देवा वि।
धम्मेण चेव[1] जादि खु साहू जल्लोमधादीया ॥१८१४॥

बाँधी हुई है। मांसरूपी मिट्टीसे लीपी गई है तथा अनेक अपवित्र वस्तुओंसे भरी हुई है। इस तरह यह शरीररूपी कुटिया घृणास्पद है ॥१८१०॥

गा०—जैसे कोयलेको जलादिसे धोनेपर भी वे सफेद नही होते। उसी प्रकार जलादिसे धोनेपर भी शरीरकी शुद्धि नहीं होती ॥१८११॥

गा०—अपवित्र शरीर जलादिको भी अपवित्र कर देता है। अर्थात् शरीरके सम्बन्धसे निर्मल जल मैला हो जाता है। जल स्वयं मैला नही है, स्वयं तो निर्मल ही है किन्तु जल शरीरको पवित्र नहीं बनाता। बल्कि शरीरके संयोगसे जल ही अपवित्र हो जाता है ॥१८१२॥

गा०—निर्मलको मलीन करनेवाला अपवित्र शरीर जलादिके सम्बन्धसे कैसे पवित्र हो सकता है। क्या मलसे भरा घडा पानीसे धानेसे पवित्र हो सकता है ॥१८१३॥

यह शरीर अपवित्र है तो पवित्र कौन है, इसका उत्तर देते है—

गा०—किन्तु धर्म पवित्र है क्योकि रत्नत्रयात्मक धर्ममें स्थितको देव भी नमस्कार करते

---

१. चेव हुंति हु साहू —अ०।

'धम्मेरि हु धम्मो चेक्खो' धर्मः पुनः शुचिः। कस्मात् खुशब्दो यस्मादित्यर्थे वर्तते। 'धम्मसहस्स वि णमंति देवा वि' यस्माद्धर्मे रत्नत्रयात्मके स्थितस्य देवा अपि नमस्कारं कुर्वन्ति। धर्मेण शुचिना योगात्मापि शुचिरिति। 'धम्मेण चेव जादि खु साधू' धर्मेणैव प्राप्नुवन्ति साधव.। किं ? 'जल्लोसधादीया' जल्लौषध्यादिकमृद्धयन्तितम् ॥१८१४॥ अशुभत्वं।

आस्रवानुप्रेक्षा निरूप्यते—

जम्मसमुद्दे बहुदोसवीचिए दुक्खजलयराइण्णे।
जीवस्स दु परिब्भमणम्मि कारणं आसवो होदि ॥१८१५॥

'जम्मसमुद्दे' जन्मसमुद्रे। 'बहुदोसवीचिए' विचित्रदोषतरङ्गे। 'दुक्खजलयराकिण्णे' दुःखजलचरैराकीर्णे। 'जीवस्स परिब्भमणम्मि' जीवस्य परिभ्रमणे यत् कारणं तत् 'आसवो' आस्रवो भवति। ननु च कर्माणि कारणानि नत्वास्रवः। अत्रोच्यते। कर्मणा परिभ्रमणकारणानां कारणत्वादास्रवः कारणमित्युक्तं ॥१८१५॥

संसारसागरे से कम्मजलमसंवुडस्स आसवदि।
आसवणीए णावाए जह सलिलं उदधिमज्झम्मि ॥१८१६॥

'संसारसागरे' संसारसमुद्रे। 'से' तस्य। 'असंवुडस्स' संवररहितस्य सम्यक्त्वसंयमक्षमामार्दवार्जवसंतोषपरिणामरहितस्य। 'कम्मजलमासवदि' ज्ञानावरणादिकर्मजलमास्रवत्यागच्छति। 'आसवणीए णावाए' आस्रवणशीलायां नावि यथा सलिलं प्रविशति। 'उदधिमज्झे' समुद्रमध्ये ॥१८१६॥

धूली णेहुगुप्पिदगत्ते लग्गा मलो जहा होदि।
मिच्छत्तादिसिणेहोल्लिदस्स कम्मं तहा होदि ॥१८१७॥

हैं। पवित्र धर्मके सम्बन्धसे आत्मा भी पवित्र है। धर्मसे ही साधु भी जल्लौषधी आदि ऋद्धियोंको प्राप्त करते हैं। अर्थात् रत्नत्रयरूप धर्मका साधन करनेसे साधुओंके शरीरका मल भी औषधीरूप हो जाता है ॥१८१४॥

आगे आस्रवानुप्रेक्षाको कहते हैं—

गा०-टी०—यह जन्ममरणरूपी समुद्र विविध दोषरूपी लहरोंसे युक्त है तथा दुःखरूपी जलचर जीवोंसे भरा है। इस समुद्रमें परिभ्रमणका कारण आस्रव है।

शंका—संसार समुद्रमें परिभ्रमणका कारण तो कर्म है, आस्रव नहीं है।

समाधान—परिभ्रमणका कारण कर्म हैं यह ठीक है। किन्तु उन कर्मोंका कारण आस्रव है। अतः आस्रवको परिभ्रमणका कारण कहा है ॥१८१५॥

गा०—जैसे समुद्रके मध्यमें छेदयुक्त नावमें जल प्रवेश करता है वैसे ही संसाररूपी समुद्रमें जो जीव संवरसे रहित है अर्थात् सम्यक्त्व, संयम, क्षमा, मार्दव, आर्जव, सन्तोष आदि रूप परिणामोंसे रहित हैं उसके ज्ञानावरण आदि कर्मरूप जलका आस्रव होता है ॥१८१६॥

गा०—जैसे तेलसे लिप्त शरीरमें लगी हुई धूल मलरूप हो जाती है वैसे ही जो आत्मा

'धूली णेहुत्तुप्पियगत्ते लग्गा' धूली स्नेहाभ्यक्तशरीरलग्ना । 'जहा मलो होइ' यथा मलं भवति । 'मिच्छत्तादिसिणेहोल्लिदस्स' मिथ्यात्वासयमकषायपरिणामस्नेहाभ्यक्तस्यात्मनः प्रदेशेष्ववस्थितं कर्मप्रायोग्यं द्रव्यं । 'तहा' तथा । 'कम्मं होदि' कर्म भवति । एतदुक्तं भवति-आत्मपरिणामान्मिथ्यात्वादिकात् विशिष्टं पुद्गलद्रव्यं कर्मत्वेन परिणमयतीति कर्मत्वपर्यायहेतुरात्मनः परिणाम आस्रव इत्यर्थः ॥१८१७॥

ओगाढगाढणिचिदो पुग्गलदव्वेहिं सव्वदो लोगो ।
सुहमेहिं बादरेहिं य दिस्सादिस्सेहिं य तहेव ॥१८१८॥

'ओगाढगाढणिचिदो' अनुप्रवेशगाढं निचितः । 'पुग्गलदव्वेहिं' पुद्गलद्रव्यैः 'सव्वदो लोगो' कात्स्न्येन लोक । 'सुहमेहि बादरेहि य' सूक्ष्मै स्थूलैश्च । 'दिस्सादिस्सेहिं' चक्षुषा दृश्यैरदृश्यैश्च । 'तहेव' तथैव । एतया गाथया कर्मत्वपर्यायियोग्यानां पुद्गलद्रव्याणा सर्वत्र लोकाकाशे बहूनामस्तित्वमाख्यातम् ॥१८१८॥

के ते आस्रवा इत्यत्राह—

मिच्छत्तं अविरमणं कसाय जोगा य आसवा होंति ।
अरहंतवुत्तअत्थेसु विमोहो होइ मिच्छत्तं ॥१८१९॥

'मिच्छत्तं अविरमण कसायजोगा य आसवा होंति' मिथ्यात्वमसयम. कषाययोगाश्च आस्रवा भवन्ति । आस्रवत्यागच्छन्ति कर्मत्वपर्याय पुद्गला एभिः कारणभूतैरिति मिथ्यात्वादय आस्रवशब्दवाच्या तेष्वास्रवेषु । मिथ्यात्वस्वरूपं कथयति । 'अरहंतवुत्त अत्थेसु' अर्हदुक्तेषु अनन्तद्रव्यपर्यायात्मकेषु अर्थेषु 'विमोहो मिच्छत्त होदि' अश्रद्धान मिथ्यात्वं भवति ॥१८१९॥

असंयममाचष्टे—

अविरमणं हिंसादी पच वि दोसा हवंति णायव्वा ।
कोधादीया चत्तारि कसाया रागदोसमया ॥१८२०॥

मिथ्यात्व, असंयम और कषायपरिणामरूप तैलसे लिप्त होता है उस आत्माके प्रदेशोमें स्थित कर्मरूप होनेके योग्य पुद्गलस्कन्ध कर्मरूप हो जाते हैं। इसका आशय यह है, मिथ्यात्व आदि रूप आत्माके परिणामोसे विशिष्ट पुद्गलद्रव्य कर्मरूपसे परिणमन करना है इसलिये कर्मरूप परिणमनमे कारण आत्माके परिणाम ही आस्रव हैं ॥१८१७॥

गा०—यह लोक सर्वत्र पुद्गल द्रव्योंसे ठसाठस भरा हुआ है। वे पुद्गल सूक्ष्म भी है और बादर भी हैं। चक्षुके द्वारा दिखाई देने योग्य भी हैं और न दिखाई देने योग्य भी हैं।

टी०—इस गाथाके द्वारा कर्मरूप होनेके योग्य पुद्गल द्रव्योंका सर्वत्र लोकाकाशमें अस्तित्व बतलाया है ॥१८१८॥

वे आस्रव कौन हैं यह बतलाते हैं—

गा०—मिथ्यात्व, असंयम, कषाय और योग ये आस्रव हैं। जिन कारणोंसे पुद्गल कर्मरूप होकर आते हैं उन मिथ्यात्व आदिको आस्रव कहते हैं। उनमेंसे मिथ्यात्वका स्वरूप कहते हैं—अर्हन्त भगवान्के द्वारा कहे गये अनन्त द्रव्य पर्यायात्मक पदार्थों में अश्रद्धान करना मिथ्यात्व है ॥१८१९॥

'अविरमणं' अविरमणं नाम। 'हिंसादि पंच वि दोसा' हिंसानृतस्तेयाब्रह्मपरिग्रहाख्या. पञ्चापि दोषाः। 'हवंति णादव्वा' अविरमणं भवन्तीति ज्ञातव्याः। प्रमत्तयोगात्प्राणव्यपरोपणं, असदभिधानं, अदत्तादानं, मैथुनकर्म विशेषः, मूर्छा चेति एते परिणामा अविरमणशब्देनोच्यन्ते। विरमणं हि निवृत्तिस्ततोऽन्यत्वात्। प्रवृत्तिरूपा हिंसादयः अविरमणं इत्युच्यते। 'कोधादीया' क्रोधमानमायालोभाः। 'चत्तारि' चत्वारः। 'कसाया' कषाया इत्युच्यन्ते। 'रागदोसमया' रागद्वेषात्मकाः ॥१८२०॥

रागद्वेषयोर्माहात्म्यं वर्णयति—

किहदा राओ रंजेदि णरं कुणिमे वि जाणुगं देहे।
किहदा दोसो वेसं खणेण णीयंपि कुणइ णरं ॥१८२१॥

'किहदा राओ रंजेदि णरं' कथं तावद्रागो रञ्जयति नरं। 'कुणिमे वि देहे' अशुचावपि देहे, अनुरागस्यायोग्ये। 'जाणुगं' शरीराशुचित्वं जानन्तं अज्ञं रंजयति। सारे वस्तुनि नरं रञ्जयतीति न तच्चित्रं ज्ञातारमशुचिन्यसारे शरीरे रञ्जयतीत्येतदद्भुतमिति भावः। 'दोसो' दोषः, 'किहदा वेसं कुणदि' कथ तावद्द्वेष्यं करोति। 'खणेण' क्षणमात्रेण। 'णीयंपि णरं' बान्धवमपि नरं। अनेनापि द्वेषमाहात्म्यमाख्यायते। रागाश्रयानपि बंधून् द्वेष्यान् करोतीति ॥१८२१॥

सम्मादिट्ठी वि णरो जेसिं दोसेण कुणइ पावाणि।
धिद्धेसि गारविंदियसण्णामयरागदोसाणं ॥१८२२॥

'सम्मादिट्ठी वि णरो' तत्त्वज्ञानश्रद्धानसमन्वितोऽपि नरः। 'जेसिं दोसेण कुणदि पावाणि' येषां दोषेण करोति पापानि। 'धिद्धेसिं गारवेंदियसण्णामयरागदोसाणं' धिक्कान्गौरवानिन्द्रियाणि संज्ञामदान् रागद्वेषांश्च ॥१८२२॥

असंयमका स्वरूप कहते हैं—

गा०—हिंसा, झूठ, चोरी, अब्रह्म और परिग्रह इन पाँच दोषोंको असंयम कहते हैं। कषाययुक्त आत्मपरिणामके योगसे प्राणोके घातको हिंसा कहते हैं। प्राणि पीड़ाकारक अप्रशस्त वचन बोलनेको असत्य कहते हैं। बिना दी हुई वस्तुके ग्रहणको चोरी कहते हैं। मैथुन कर्मको अब्रह्म कहते हैं और ममत्व भावको परिग्रह कहते हैं। ये सब परिणाम असंयम कहे जाते हैं। इन सबसे निवृत्तिको संयम कहते हैं। और प्रवृत्तिरूप हिंसादि परिणाम असंयम है। तथा राग-द्वेषमय चार कषाय हैं। अर्थात् हिंसादिरूप परिणाम असंयम हैं और क्रोधादि कषाय हैं इनमेंसे क्रोध और मान द्वेषरूप हैं और माया, लोभ रागरूप हैं ॥१८२०॥

राग और द्वेषका माहात्म्य बतलाते हैं—

गा०-टी०—यह शरीर अशुचि है। रागके अयोग्य है। यह राग शरीरकी अशुचिताको जाननेवाले अज्ञानीको उसमें अनुरक्त करता है सारवान् वस्तुमे मनुष्यको अनुरक्त नहीं करता। इसमें कोई आश्चर्य नहीं है। आश्चर्य इसमें है कि यह जाननेवालेको भी असार शरीरमें अनुरक्त करता है। तथा द्वेष क्षणमात्रमें बन्धु मनुष्यको भी द्वेषका पात्र बनाता है। इससे द्वेषका माहात्म्य कहते हैं कि जो बन्धु राग करने योग्य हैं उन्हे भी वह द्वेषका पात्र बनाता है ॥१८२१॥

गा०—तत्त्वोंके ज्ञान और श्रद्धानसे युक्त मनुष्य भी अर्थात् सम्यग्दृष्टी मनुष्य भी जिनके

जो अभिलासो विसएसु तेण ण य पावए सुहं पुरिसो ।
पावदि य कम्मबंधं पुरिसो विसयाभिलासेण ॥१८२३॥

'**जो अभिलासो विसएसु**' यो अभिलाषो विषयेषु स्पर्शादिषु । '**तेण विसयाभिलासेण ण य पावदे सुहं पुरिसो**' प्राप्नोति नैव सुखं पुरुषः । '**पावदि य कम्मबंधं**' प्राप्नोति च कर्मबन्धं, '**पुरिसो विसयाभिलासेण**' पुरुषो विषयाभिलाषेण निमित्तेन । एतेन विषयाभिलाषपरिणामस्य प्राणिनामसकृत् प्रवर्तमानस्याहितता निवेदिता, सुखं न प्रयच्छति कर्मबन्धकारणं तु भवतीति विषयाभिलाषस्यास्रवस्य स्वरूपं कथितं ॥१८२३॥

विषयाभिलाषस्य दुष्टतां प्रकारान्तरेणाचष्टे—

कोई डहिज्ज जह चंदणं णरो दारुगं च बहुमोल्लं ।
णासेइ मणुस्सभवं पुरिसो तह विसयलोहेण ॥१८२४॥

'**कोई डहिज्ज जह चंदणं**' कश्चिद्यथा दहेच्चन्दनं । '**बहुमोल्लं**' महामूल्यं । '**दारुगं च**' अगुर्वादिदारु च, यथा दहति भस्मादिकं स्वल्पं समुद्दिश्य । '**तहा णासेदि मणुस्सभवं**' तथा नाशयति मानुषभव अतीन्द्रियानन्त-सुखकारणं । '**पुरिसो तह विसयलोभेण**' अतितुच्छविषयगार्ध्येन ॥१८२४॥ उक्तं च—

> विषया अमितेन्द्रियोत्सवा बहुभिश्चापि समन्विता रतेः ।
> विषगर्भसुसंस्कृतान्नवत् परिभुक्ताः परिणामदारुणाः ॥
> विषयसुखप्रतिबद्धलोलचित्तो विषयनिमित्तमनिष्टकर्म कृत्वा ।
> विषयसुखप्रविहीनजातिजातो विषयसुखं लभते न ना विपुण्यः ॥

दोषसे पाप करता है उन गारवोंको, इन्द्रियोंको, संज्ञामदोंको और राग द्वेषको धिक्कार हो ॥१८२२॥

गा०—विषयोंमें जो अभिलाषा है उसके कारण पुरुष सुख नहीं पाता विषयोंकी चाहके निमित्तसे पुरुष कर्मबन्ध करता है ॥१८२३॥

टी०—इससे प्राणियोंमें निरन्तर प्रवर्तमान विषयोंकी चाहरूप परिणामको अहितकारी बतलाया है । उससे सुख तो नही होता, किन्तु कर्मबन्ध होता है । अत. विषयोंकी अभिलाषाको आस्रवरूप कहा है ॥१८२३॥

गा०–टी०—अन्य प्रकारसे विषयोंकी अभिलाषाकी दुष्टता बतलाते हैं—जैसे कोई मनुष्य राख आदिके लिये बहुमूल्य चन्दनकी लकड़ीको जला देता है । वैसे ही मनुष्य अति तुच्छ विषयों-के लोभसे उस मनुष्य भवको नष्ट कर देता है जिसके द्वारा अतीन्द्रिय अनन्त सुख प्राप्त हो सकता है । कहा भी है—ये विषय इन्द्रियोंके लिये आनन्द उत्पन्न करते हैं तो बहुतसे रत उन विषयोंमें रहते हैं । किन्तु विषसे संस्कार किये गये अन्नकी तरह उनको भोगनेपर अत्यन्त भयंकर परिणाम होता है । जिसका चंचल चित्त विषय सुखमें अत्यासक्त होता है वह विषयोंकी प्राप्तिके लिये अनिष्ट कार्य करके ऐसी पर्यायमें जन्म लेता है जहाँ उसे विषयसुख मिलता ही नहीं । ठीक ही है, पुण्यहीन मनुष्य विषयसुखको नहीं पाता ॥१८२४॥

छड्डिय रयणाणि जहा रयणद्दीवा हरेज्ज कट्ठाणि ।
माणुसभवे वि छड्डिय धम्मं भोगे भिलसदि तहा ॥१८२५॥

'**छड्डिय रयणाणि जहा**' रत्नानि त्यक्त्वा यथा, '**रयणद्दीवा हरेज्ज कट्ठाणि**' रत्नद्वीपात्काष्ठान्याहरति । '**तहा माणुसभवे वि**' मनुष्यभवेऽपि, '**छड्डिय धम्मं**' धर्मं विहाय । '**भोगे भिलसदि**' भोगान्वाञ्छति । एतदुक्तं भवति—अनेकसाररत्नास्पदं रत्नद्वीपं सुदुर्लभं प्राप्य मुधा लब्धान्यपि रत्नान्यनुपादाय असारमिन्धनं सुलभं सारबुद्धया यथा कश्चिदाहरति जडः । तथानेकगुणरत्नाकरं मनुष्यभवं दुरवापमवाप्य अतर्पकं पराधीनं अल्पकालिकं विषयसुखमभिलषति ॥१८२५॥

गंतूण णंदणवणं अमयं छंडिय विसं जह पियइ ।
माणुसभवे वि छड्डिय धम्मं भोगे भिलसदि तहा ॥१८२६॥

'**गंतूण णंदणवणं**' गत्वा नन्दनवनं । '**अमयं छडि्डय**' अमृतं त्यक्त्वा । '**विसं जहा पियइ**' विषं यथा पिबति कश्चित् । '**माणुसभवे वि छडि्डय**' मनुष्यभवेऽपि त्यक्त्वा । '**धम्मं**' धर्मं । '**भोगेभिलसदि तहा**' भोगानाभिलषति तथा ॥१८२६॥

योगशब्दार्थमाचष्टे—

पावपओगा मणवचिकाया कम्मासवं पकुव्वंति ।
भुज्जंतो दुब्भत्तं वणम्मि जह आसवं कुणइ ॥१८२७॥

'**पावपओगा**' पाप प्रयुञ्ज्यते, प्रवर्त्यंते एभिरिति पापप्रयोगाः । '**मणवचिकाया**' मनोवाक्कायाः, '**कम्मासवं पकुव्वंति**' कर्मत्वपर्यायागमं पुद्गलाना कुर्वन्ति । '**भुंजतो दुब्भत्तं**' भुञ्जमानो दुराहारं । '**वणंमि जह आसवं कुणदि**' व्रणे यथा आस्रवं स्रु ति पूतीना करोति ॥१८२७॥

गा०—टी०—जैसे कोई मनुष्य रत्नद्वीपमें जाकर रत्नोंको छोड़ लकड़ी बीनता है वैसे ही मनुष्यभवमें धर्मको छोड़ भोगोंकी अभिलाषा करता है। इसका अभिप्राय यह है कि जैसे कोई मूर्ख अनेक बहुमूल्य रत्नोंसे भरे तथा अतिदुर्लभ रत्नद्वीपमें जाकर बिना प्रयत्नके ही प्राप्त भी रत्नोंको ग्रहण न करके असार और सुलभ ईंधनको ही सारभूत मानकर ग्रहण करता है, उसी प्रकार जो मनुष्यभव अनेक गुणरूपी रत्नोंकी खान है, जिसका मिलना बहुत कठिन है उसे प्राप्त करके भी अज्ञानी ऐसे विषयसुखकी अभिलाषा करता है जो तृप्ति प्रदान नहीं करता तथा पराधीन है और अल्प काल ही रहता है ॥१८२५॥

गा०—जैसे कोई पुरुष नन्दन वनमें जाकर भी अमृतको छोड़ विष पीता है। वैसे ही मनुष्यभवको पाकर भी मनुष्य धर्मको छोड़ भोगोंकी अभिलाषा करता है ॥१८२६॥

योगशब्दका अर्थ कहते हैं—

गा०—जिनके द्वारा पापमें प्रवृत्ति की जाती है वे मन, वचन, काय, पुद्गलोंको कर्मरूपसे परिणमाते हैं। जैसे अपथ्य सेवन करनेवाला अपने घावमें पीब पैदा करता है। अर्थात् जैसे अपथ्य सेवन करनेसे घावमें पीब आता है वैसे ही मन, वचन, कायकी प्रवृत्तिसे कर्मोंका आस्रव होता है ॥१८२७॥

कर्माणि शुभाशुभरूपाणि द्विविधानि, तत्र कस्य कर्मणः क आस्रव इत्यत्राह—

अणुकंपासुद्धुवओगो वि य पुण्णस्स आसवदुवारं ।
तं विवरीदं आसवदारं पावस्स कम्मस्स ॥१८२८॥

'**अणुकंपा**' अनुकम्पा। '**सुद्धुवओगो**' शुद्धश्च प्रयोगः परिणामः, '**पुण्णस्स आसवदुवारं**' पुद्गलानां पुण्यत्वपर्यायागमनमुखं सद्वेद्यं सम्यक्त्वं रतिहास्यपुंवेदाः शुभे नामगोत्रे शुभं चायु. पुण्यं एतेभ्योऽन्यानि पापानि। अनुकम्पा त्रिप्रकारा। धर्मानुकम्पा मिश्रानुकम्पा सर्वानुकम्पा चेति। तत्र धर्मानुकम्पा नाम परित्यक्तासंयमेषु मानावमानसुखदुःखलाभालाभतृणसुवर्णादिषु समानचित्तेषु दान्तेन्द्रियान्तःकरणेषु [1]जननीमिव मुक्तिमाश्रितेषु परिहृतोग्रकषायविषयेषु दिव्येषु भोगेषु दोषान्विचिन्त्य विरागतामुपगतेषु संसारमहासमुद्राद्भयेन निशास्वप्यल्पनिद्रेषु, अङ्गीकृतनिस्सङ्गत्वेषु, क्षमादिदशविधधर्मपरिणतेषु यानुकम्पा सा धर्मानुकम्पा, यया प्रयुक्तो जनो विवेकी तद्योग्यान्नपानावसथौषणादिकं संयमसाधनं यतिभ्य प्रयच्छति। स्वामविनिगुह्य शक्ति उपसर्गदोषानपसारयति आज्ञाप्यतामिति सेवा करोति भ्रष्टमार्गाणा पन्थानमुपदर्शयति। तैः प्रसंयोगमवाप्य अहो सपुण्या वयमिति हृष्यति, सभासु तेषां गुणानुत्कीर्तयति[2], तान् गुरुमिव पश्यति। तेषा गुणानामाभीक्ष्णं स्मरति, महात्मभि कदा नु मम समागम इति। तै. संयोगं समीप्सति, तदीयान् गुणान् परैरभिवर्ण्यमानान्निशम्य तुष्यति। इत्थमनुकम्पापरः साधुगुणानुमननानुकारी भवति। त्रिधा च सन्तो बन्धमुपदिशन्ति, स्वयं कृतेः, कारणाया., परै. कृतस्यानुमतेश्च। ततो महागुणराशिगतहर्षात् महान् पुण्यास्रव.।

कर्म शुभ और अशुभके भेदसे दो प्रकारके हैं। किससे किस कर्मका आस्रव होता है यह कहते हैं—

गा०—अनुकम्पा और शुद्ध उपयोग पुण्य कर्मके आस्रवके द्वार हैं। और अनुकम्पा तथा शुद्ध उपयोगसे विपरीत परिणाम पाप कर्मके आस्रवके द्वार हैं ॥१८२८॥

टी०—अनुकम्पाके तीन भेद हैं—धर्मानुकम्पा, मिश्रानुकम्पा, सर्वानुकम्पा। जिन्होंने असयमका त्याग कर दिया है, मान, अपमान, सुख-दुख, लाभ-अलाभ तथा तृण-सुवर्ण आदिमें जिनका समभाव है, इन्द्रिय और मनका जिन्होंने दमन किया है, जो माताके समान मुक्तिके आश्रित है, जिन्होने उग्र कषाय विषयोंका परित्याग किया है, दिव्य भोगोंमे दोषोंका विचार करके विरागताको अपनाया है, ससाररूपी महासमुद्रके भयसे रात्रिमें भी जो अल्प निद्रा लेते हैं, जिन्होने निःसंगताको स्वीकार किया है और जो उत्तम क्षमा आदि दस प्रकारके धर्मोंमे लीन हैं उनमें जो अनुकम्पा है उसे धर्मानुकम्पा कहते है। उस धर्मानुकम्पासे प्रेरित होकर विवेकी जन उन मुनियोंके योग्य अन्नपान, वसतिका आदि संयमके साधन प्रदान करते हैं। अपनी शक्तिको न छिपाकर उपसर्ग और दोषोको दूर करते हैं। 'हमे आज्ञा कीजिये' इस प्रकार निवेदन करके सेवा करते हैं। जो मार्गसे भ्रष्ट हो जाते है उन्हे सन्मार्ग दिखलाते हैं। उन मुनियोंका संयोग प्राप्त होनेपर 'अहो हम बड़े पुण्यशाली हैं।' इस प्रकार विचार कर प्रसन्न होते हैं। सभाओंमें उनके गुणोंका बखान करते हैं। उनको गुरुके समान मानते है। उनके गुणोंका सदा स्मरण करते है कि कब उनका समागम हो। उनके संयोगकी अभिलाषा रखते हैं। दूसरे द्वारा उनके गुणोंकी प्रशंसा सुनकर सन्तुष्ट होते हैं। इस प्रकार अनुकम्पामें तत्पर साधु गुणोंकी अनुमोदना करनेवाला

---

१. मातरमिव —आ० मु०। २ ति स्वान्ते मु—आ० मु०।

मिश्रानुकम्पोच्यते—पृथुपापकर्ममूलेभ्यो हिंसादिभ्यो व्यावृत्ताः संतोषवैराग्यपरता विनीताः दिग्विरतिं, देशविरतिं, अनर्थदण्डविरतिं चोपगतास्तीव्रदोषाद् भोगोपभोगान्निवृत्य शेषे च भोगे कृतप्रमाणाः पापात्परिभीतचित्ताः, विशिष्टदेशे काले च विवर्जितसर्वसावद्याः पर्वस्वारम्भयोगं सकलं विसृज्य उपवासं ये कुर्वन्ति तेषु संयतासंयतेषु क्रियमाणानुकम्पा मिश्रानुकम्पेत्युच्यते। जीवामि जीवेषु दया च कृत्वा कृत्स्नामबुध्यमानाः जिनसूत्राद्बाह्या येऽन्यपाखण्डरताविनीताः कष्टानि तपांसि कुर्वन्ति, तेषु क्रियमाणानुकम्पा तया सर्वोऽपि कर्मपुण्यं प्रचिनोति।

देशप्रवृत्तिर्गृहिणामकृत्स्नात् मिथ्यात्वदोषोपहतोऽन्यधर्मः।
इत्येषु मिश्रो भवतीति धर्मो मिश्रानुकम्पां कथयन्त्यनल्पाः॥
सदृष्टयो वापि कुदृष्टयो वा स्वभावतो मार्दवसंप्रयुक्ताः।
यां कुर्वते सर्वशरीरवर्गे सर्वानुकम्पेत्यभिधीयते सा॥

छिन्नान् बद्धान् रुद्धान् प्रहतान् विलुप्यमानांश्च मर्त्यान्, सहैनसो निरैनसो वा परिदृश्य मृगान्विहगान् सरीसृपान् पशूश्च मामादिनिमित्तं प्रहन्यमानान् परलोकैः परस्परं वा तान् हिंसतो भक्षयतश्च दृष्ट्वा सूक्ष्माननेकान् कुन्थुपिपीलिकाप्रभृति प्राणभृतो मनुजकरभखरशरभकरितुरगादिभि संमृद्यमानानभिवीक्ष्य असाध्यरोगोरगदशनात् परितप्यमानान् मृतोऽस्मि नष्टोऽस्म्यभिधावतेति रोगानुभूयमानान्, गुरुपुत्रकलत्रादिभिर-

होता है। पूर्व ज्ञानियोंने बन्धको तीन प्रकारसे कहा है। स्वयं करनेसे, दूसरोसे करानेसे और दूसरोंके करने पर उसकी अनुमोदना करनेसे। अत महागुणशाली मुनियोंको देखकर हर्ष प्रकट करनेसे महान् पुण्यास्रव होता है।

अब मिश्रानुकम्पा कहते हैं। जो महान् पाप कर्मके मूल हिंसा आदिसे निवृत्त हैं, सन्तोष और वैराग्यमे तत्पर हैं, विनीत हैं, दिग्विरति, देशविरति और अनर्थदण्डविरतिको धारण किये हुए हैं, तीव्र दोषवाले भोग उपभोगोका त्याग करके शेष भोगोंका जिन्होंने परिमाण कर लिया है, जिनका चित्त पापसे भीत रहता है, जो विशिष्ट देश और कालमे सर्व सावद्यका त्याग करते हैं अर्थात् त्रिकाल सामायिक करते हैं, पर्वके दिनोमे समस्त आरम्भको त्याग उपवास करते हैं उन संयमासयमियोंमे जो अनुकम्पा की जाती है वह मिश्रानुकम्पा है। मै जिलाता हू ऐसा मान जो जीवोपर दया तो करते हैं किन्तु पूर्णरूपसे दयाको नहीं जानते। ऐसे जो जिनागमसे बाह्य अन्य धर्मोंको माननेवाले विनयी तपस्वी है कष्टदायक तपस्या करते हैं उनमें अनुकम्पा भी मिश्रानुकम्पा है। उससे सब जीव पुण्य कर्मका संचय करते हैं। कहा भी है—

गृहस्थ एकदेशमे प्रवृत्तिशील होनेसे पूर्ण संयमका पालक नहीं होता। तथा मिथ्यात्वके दोषसे सदोष अन्य धर्मवालोंमे अनुकम्पा मिश्रानुकम्पा है। सम्यग्दृष्टि अथवा मिथ्यादृष्टि जो स्वभावमे ही मार्दव भावसे युक्त हैं वे जो समस्त प्राणियोमें अनुकम्पा करते हैं उसे सर्वानुकम्पा कहते हैं। जिनके अवयव कट गये हैं, जो बाधे गये है, रोके गये हैं, पीटे गये हैं, खोये गये हैं ऐसे निरपराधी अथवा अपराधी मनुष्योंको देखकर तथा मृगो, पक्षियों, सरीसृपों और पशुओंको मांस के लिये दूसरे लोगोंके द्वारा मारा जाता अथवा उन्हे परस्परमें ही एक दूसरेकी हिंसा करते और एक दूसरेका भक्षण करते देखकर, तथा कुथु चींटी आदि अनेक छोटे जन्तुओको मनुष्य, ऊँट, गधा, शरभ, हाथी, घोड़े आदिके द्वारा कुचले जाते देखकर, तथा असाध्य रोगरूपी सर्पके द्वारा

१ 'पाखण्डतज अ०।

प्राप्तकालः सहसा वियुज्य ऊर्ध्वभुजान् विक्रोशतः, स्वाङ्गानि घ्नतश्च शोकेन, उपार्जितद्रविणैर्विमुच्यमानान् कृपणान् प्रनष्टबन्धून् धैर्यशिल्पविद्याव्यवसायहीनान् या [1]न् प्रज्ञाप्रसक्त्या वराकान् निरीक्ष्य तद् दुःखमात्मस्थमिव विचिन्त्य स्वास्थ्यमुपनयनमनुकम्पा ।

सुदुर्लभं मानुषजन्म लब्ध्वा मा क्लेशपात्राणि वृथैव भूत ।
धर्मे शुभे भूतहिते यतध्वमित्येवमाद्यैरपि चोपदेशैः ॥

कृतकरिष्यमाणोपकारानपेक्षैरनुकम्पा कृता भवति ।

पुण्यास्रवं सा त्रिविधानुकम्पा सुतेषु पुत्रं जननी शुभेव ।
स्वेतानुकम्पा प्रभवाद्धि पुण्यात्नाके भृता अभ्युपपत्तिमीयुः ॥

शुद्धप्रयोगो निरूप्यते स च द्विप्रकार. यतिगृहिगोचरभेदेन । यतेः शुद्धोपयोग इत्थम्भूतः—

जीवान्न हन्यां न मृषा वदेयं चौर्यं न कुर्यान्न भजेय भोगान् ।
धनं न सेवेय न च क्षपासु भुञ्जीय कृच्छ्रेऽपि शरीरतापे ॥१॥
रोषेण मानेन च मायया च लोभेन चाहं बहुदोषकेन ।
युञ्जेय नारम्भपरिग्रहैश्च दीक्षां शुभामभ्युपगम्य भूय ॥२॥
यथा न भात्यज्ज्वलमौलिमालो भिक्षां चरन्कामुं कबाणपाणिः ।
तथा न भाया यदि दीक्षितः सन् वहेय दोषानवहाय लज्जाम् ॥३॥

डसे जानेसे पीडित मै मर गया, मै नष्ट हो गया इत्यादि चिल्लानेवाले रोगियोंको देख तथा जिनकी अवस्था अभी मरनेकी नही है ऐसे गुरु, पुत्र, स्त्री आदिका सहसा वियोग हो जानेसे चिल्लाते हुए, अपने अंगोंको शोकसे पीटते हुए, कमाये हुए धनके नष्ट हो जानेसे दीन हुए तथा धैर्य, शिल्प, विद्या और व्यवसायसे रहित गरीब प्राणियोंको देख उनके दुःखको अपना ही दुःख मानकर उसको शान्त करना अनुकम्पा है। 'अति दुर्लभ मनुष्य जन्म पाकर वृथा ही क्लेशके पात्र मत बनो। प्राणियोके लिये कल्याणकारी धर्ममें मन लगाओ' इत्यादि उपदेशोंके द्वारा किये गये अथवा भविष्यमे किये जानेवाले उपकारकी अपेक्षाके विना अनुकम्पा करना चाहिये।

ये तीनो प्रकारकी अनुकम्पा पुण्य कर्मका आस्रव करती है। वह जैसे माता पुत्रके लिये शुभ होती है उसी प्रकार शुभ है। उस अनुकम्पासे हुए पुण्यके विपाकसे मरकर स्वर्गमें देव होते हैं।

अब शुद्ध प्रयोगका स्वरूप कहते हैं—उसके दो भेद है—एक यति सम्बन्धी शुद्धसप्रयोग और दूसरा गृहस्थ सम्बन्धी शुद्ध संप्रयोग। यतिका शुद्ध प्रयोग इस प्रकार है—मैं जीवोंका घात नही करूँगा। झूठ नहीं बोलूंगा। चोरी नही करूँगा। भोगोको नही भोगूँगा। धनका सेवन नहीं करूँगा। शरीरमें अत्यन्त कष्ट होनेपर भी रात्रिमे भोजन नहीं करूँगा। शुभ दीक्षा लेकर बहुदोषपूर्ण क्रोध माना माया लोभसे आरम्भ और परिग्रहसे सम्बन्ध नहीं रखूंगा। जैसे कोई मनुष्य सिरपर मुकुटमाला धारण करके और हाथमें धनुष बाण लेकर भिक्षा मांगे तो शोभा नहीं देता। उसी प्रकार यदि मैं दीक्षा लेकर लज्जा त्याग दोषोंको वहन करूँ तो शोभा नहीं देता। महान्

१. यं वा प्रज्ञा प्रसक्तापकरं नि —अ० ।

लिङ्गं गृहीत्वा महतामृषीणां, अङ्गं च बिभ्रत्परिकर्महीनम् ।
भङ्गं व्रतानामविचिन्त्य कष्टं संगं कथं कामगुणेषु कुर्याम् ॥४॥
चर्यामनार्याचरितामयेयां धैर्येण हीनः कृपणत्वमेत्य ।
कथं वृथामुण्डशिरश्चरेयं लिङ्गी भवन्नङ्गविकारयुक्तः ॥५॥
इत्येवमादिः शुभकर्मचिन्ता सिद्धार्हदाचार्यबहुश्रुतेषु ।
चैत्येषु संघे जिनशासने च भक्तिर्विरक्तिर्गुणरागिता च ॥

विनीतता संयमो अप्रमत्तता, मृदुता, क्षमा, आर्जवः, संतोषः, संज्ञाशल्यगौरवविजयः, उपसर्गपरीषहजयः, सम्यग्दर्शनं, तत्त्वज्ञानं, सरागसंयमं, दशविधधर्मध्यानं, जिनेन्द्रपूजा, पूजोपदेशः निःशंकित्वादिगुणाष्टकं, प्रशस्तरागसमेता तपोभावना, पञ्चसमितयः, तिस्रो गुप्तय इत्येवमाद्याः शुद्धप्रयोगाः। गृहिणां शुद्धोपयोग उच्यते—गृहीतव्रतानां धारणपालनयोरिच्छा क्षणमपि व्रतभङ्गोऽनिष्टः, अभीक्ष्णं यतिसंप्रयोगः अन्नादिदानं श्रद्धादिविधिपुरस्सरं श्रमनोदनाय भोगान् भुक्त्वापि स्वगित [1]सक्तिविगर्हणं, सदा गृहप्रमोक्षप्रार्थना, धर्मश्रवणोपलम्भात्मनसोऽतितुष्टि, भक्त्या पञ्चगुरुस्तवनप्रणमने तत्पूजा, परेषां च स्थिरीकरणमुपबृंहणं, वात्सल्यं, जिनेन्द्रभक्तानामुपकारकरण, जिनेन्द्रशास्त्राभिगमः, जिनशासनप्रभावना इत्यादिकः। 'तव्विवरीदं' अनुकम्पाशुद्धप्रयोगाभ्यां विपरीत परिणाम। 'आसवदारं' आस्रवद्वारं, 'पावस्स कम्मस्स' अशुभस्य कर्मणः। आस्रव। ॥१८२८॥

ऋषियोंका लिंग स्वीकार करके और स्नान आदिके बिना शरीर धारण करके व्रतोंके भंगका विचार न करते हुए काम सेवन आदिका संसर्ग मैं कैसे कर सकता हूँ। मैं धैर्य खो, दीन बनकर अनार्योंके द्वारा आचरण करके योग्य चर्या कैसे कर सकता हूँ। शरीरमें विकार युक्त होकर घूमने पर साधु होकर सिर मुड़ाना व्यर्थ है। इत्यादि प्रकारसे शुभ कर्मकी चिन्ता करना, सिद्ध, अर्हन्त, आचार्य, उपाध्याय, प्रतिमा, संघ और जिनशासनमें भक्ति, वैराग्य, गुणोंमें अनुराग, विनययुक्त प्रवृत्ति, संयम, अप्रमादीपना, परिणामोंमें कोमलता, क्षमा, आर्जव, सन्तोष, आहारादि संज्ञा मिथ्यात्व आदि शल्य और ऋद्धि आदिके मदको जीतना, उपसर्ग और परीषहको जीतना, सम्यग्दर्शन, सम्यग्ज्ञान, सरागसंयम, दस प्रकारका धर्मध्यान, जिनपूजा, जिनपूजाका उपदेश, निःशंकित आदि आठ गुण, प्रशस्तराग, तपोभावना, पाँच समिति, तीन गुप्ति इत्यादि शुद्ध प्रयोग हैं।

अब गृहस्थोंका शुद्ध प्रयोग कहते हैं—ग्रहण किये हुए व्रतोंके धारण और पालनकी इच्छा, एक क्षणके लिये भी व्रतभंगको इष्ट न मानना, निरन्तर यतियोंको दान देना, श्रद्धा आदि विधिपूर्वक अन्न आदि देना, भोगोंको भोगकर भी थकान दूर करनेके लिये अपनी भोगासक्तिकी निन्दा करना, सदा घर छोड़नेकी भावना करना, धर्मका श्रवण करनेको मिले तो मनका अतितुष्ट होना, भक्तिपूर्वक पंचपरमेष्ठीका स्तवन और प्रणाम करना, उनकी पूजा करना, दूसरोंको धर्ममें स्थिर करना, धर्मका बढ़ाना, साधर्मीवात्सल्य, जिनेन्द्रदेवके भक्तोंका उपकार करना, जिन शास्त्रोंका अभ्यास करना, जिनशासनकी प्रभावना करना आदि श्रावकोंका शुद्ध प्रयोग है। अनुकम्पा और शुद्ध प्रयोगसे विपरीत परिणाम अशुभ कर्मके आस्रवके द्वार हैं ॥१८२८॥

---

१. सक्तिवि —अ० मु०।

संवरानुप्रेक्षा कथ्यते । संव्रियन्ते निरुध्यन्तेऽभिनवाः कर्मपर्यायाः पुद्गलानां येन जीवपरिणामेन । मिथ्यात्वादिपरिणामो वा निरुध्यते स संवरः । तत्राद्य सूरिर्मिथ्यात्वादिपरिणामसंवरात् सम्यक्त्वादीनां संवरतामाचष्टे—

मिच्छत्तासवदारं रुंभइ सम्मत्तदिढकवाडेण ।
हिंसादिदुवाराणि व दढवदफलहेहिं रुंभंति ।।१८२९।।

'**मिच्छत्तासवदारं**' तत्त्वाश्रद्धानमास्रवद्वारं । 'रुंभंति' रुध्यते, '**सम्मत्तदिढकवाडेण**' तत्त्वश्रद्धान कवाटेन । '**हिंसादिदुवाराणि वि**' हिंसादिद्वाराण्यपि, '**दढवदफलहेहिं रुंभंति**' दृढव्रतपरिघैः स्थगयन्ति ।।१८२९।।

उवसमदयादमाउहकरेण रक्खा कसायचोरेहिं ।
सक्का काउं आउहकरेण रक्खाव चोराणं ।।१८३०।।

'**उवसमदयादमाउहकरेण**' उपशमः कषायवेदनीयस्य कर्मणस्तिरोभवनं, दया सर्वप्राणिविषया, दमः कषायदोषभावनया चित्तनिग्रहः । एते त्रय आयुधाः करे यस्य तेन । '**कसायचोरेहिं**' कषायचोरेभ्यः । '**रक्खा सक्का काउं**' रक्षा शक्या कर्तुं, '**आयुधकरेण रक्खाव चोरेहिं**' आयुधहस्तेन चोरेभ्यो रक्षेव, कषायदोषपरिज्ञानेनासकृत् प्रवृत्तेन क्रोधादिनिमित्तवस्तुपरिहारेण तत्प्रतिपक्षक्षमादिपरिणामेन च कषायनिवारणं । उक्तं च—

अयेत्सदा क्रोधमुपाश्रितः क्षमां जयेच्च मानं समुपेत्य मार्दवं ।
तथैव मायामपि चार्जवाज्जयेत्, जयेच्च संतोषवशेन लुब्धतां ।।
जिताः कषाया यदि किन्न तैर्जितं कषायमूलं सकलं हि बन्धनमिति ।।१८३०।।

मिथ्यात्वसंवरं कषायसंवरं च निरूप्य इन्द्रियसंवरं व्याचष्टे—

इंदियदुद्दंतस्सा णिग्घिप्पंति दमणाणखलिणेहिं ।
उप्पहगामी णिग्घिप्पंति हु खलिणेहिं जह तुरया ।।१८३१।।

अब संवर अनुप्रेक्षा कहते है। जिस जीव परिणामसे पुद्गलोंके नवीन कर्म पर्याये अथवा मिथ्यात्वादि परिणाम रुकते है उसे संवर कहते हैं। उनमेंसे ग्रन्थकार मिथ्यात्व आदि परिणामोका संवर करनेसे सम्यक्त्व आदिको संवर कहते है—

गा०—मिथ्यात्व अर्थात् तत्त्वके अश्रद्धानरूप आस्रवका द्वार सम्यक्त्व अर्थात् तत्त्वके श्रद्धान रूप दृढ़ कपाटोंके द्वारा रोका जाता है और हिंसा आदि आस्रव द्वारोंको दृढ़ व्रतरूपी अर्गलाओंसे रोका जाता है ।।१८२९।।

गा०-टी०—कषायवेदनीय कर्मके तिरोभाव अर्थात् उदय अवस्थाको प्राप्त न होनेको उपसम कहते हैं। सब प्राणियोंपर दयाभाव होना दया है। कषायोंके दोषोंका विचार करके चित्तका निग्रह करना दम है। ये तीन अस्त्र जिसके पास हैं वह कषायरूप चोरोंसे अपनी रक्षा कर सकता है। जैसे जिसके हाथमें अस्त्र होता है वह चोरोंसे अपनी रक्षा कर सकता है उसी प्रकार कषायके दोषोंको जाननेसे, क्रोध आदिमें निमित्त वस्तुसे बचनेसे और कषायोंके विरोधी क्षमा आदि परिणामोंसे कषायको दूर किया जा सकता है। कहा भी है—सदा क्षमाकी उपासना करके क्रोधको जीतना चाहिये। मार्दवको धारण करके मानको जीतना चाहिये। तथा आर्जवभावसे मायाको जीतना चाहिये और सन्तोषसे लोभको जीतना चाहिये। जिसने कषायोंको जीत लिया उन्होंने क्या नहीं जीता। अर्थात् सबको जीत लिया। क्योंकि सब बन्धनका मूल कषाय है।।१८३०।।

'इंदियदुद्दंतस्सा' इन्द्रियदुर्दान्ताश्वाः। 'णिगिण्हंति' निगृह्यन्ते निरुध्यन्ते। केन? 'दमणाणखलिणेहिं' दमप्रधानानि दमज्ञानानि, तान्येव खलिनानि तैः। शब्दादिषु वर्तमानानि इन्द्रियज्ञानानि रागद्वेषमूलानि तानीहेन्द्रियशब्देनोच्यन्ते। तेषां चास्रवाणां निरोधस्तत्त्वज्ञानभावनया भवति। द्वयो रूपयोर्युगपदेकस्मिन्नात्मन्य-प्रवृत्तेः। 'उप्पहगामी' उन्मार्गयायिनः। 'जह तुरगा णिगिण्हंति' यथाश्वा निगृह्यन्ते। 'खलिणेहिं' खरैः खलिनैः ॥१८३१॥

अणिहुदमणसा इंदियसप्पाणि णिगेण्हिदुं ण तीरंति।
विज्जामंतोसघहीणेण व आसीविसा सप्पा ॥१८३२॥

'अणिहुदमणसा' ज्ञानेन अनिभृतचेतसा। 'इंदियसप्पाइं' इन्द्रियसर्पाः। 'णिगिण्हेदुं' निग्रहीतु। 'ण तीरंति' न शक्यन्ते। 'विज्जामंतोसहीहीणेण व' विद्यया मन्त्रेण औषधेन वा हीनेन, 'आसीविसा सप्पा' आशीविषाः सर्पा यथा न गृह्यन्ते ॥१८३२॥

प्रमादसंवरं कथयत्युत्तरगाथा—

पावपयोगासवदारणिरोधो अप्पमादफलिगेण।
कीरइ फलिगेण जहा णावाए जलासवणिरोधो ॥१८३३॥

'पावपयोगासवदारणिरोधो' अशुभपरिणामास्रवद्वारनिरोधः। विकथादयः पञ्चदशप्रमादपरिणामाः 'पावपयोगा' इत्युच्यन्ते। तेषां निरोधः 'अप्पमादफलगेण' अप्रमादफलकेन। केन फलकेन कः प्रमाद उच्यते सत्यासत्यमृषाभाषा विकथा निरुणद्धि, स्वाध्यायो ध्यानं एकाग्रतेति चेति एते प्रमादविकथाप्रतिपक्षभूता.।

मिथ्यात्व और कषायके संवरका कथन करके इन्द्रिय सवर कहते है—

गा०-टी०—जैसे कुमार्गमें जानेवाले दुष्ट घोड़ोंको कठोर लगामके द्वारा वशमें किया जाता है। वैसे ही दमप्रधान ज्ञानके द्वारा इन्द्रियरूपी दुर्दान्त घोड़ोंको वशमें किया जाता है। यहाँ इन्द्रिय शब्दसे शब्द आदि विषयोमे प्रवर्तमान इन्द्रिय ज्ञानको कहा है जिसका मूल राग और द्वेष है। उनसे होनेवाले आस्रवोंका निरोध तत्त्वज्ञानकी भावनासे होना है क्योंकि एक आत्मामें एक साथ दो रूप—तत्त्वज्ञान भी और इन्द्रिय विषयोंमें प्रवृत्ति भी नही हो सकते ॥१८३१॥

गा०—जैसे जिसके पास विद्या, मंत्र और औषध नहीं है वह सर्पोंको वशमें नही कर सकता। उसी प्रकार जिसका मन चंचल है वह इन्द्रियरूपी सर्पोंको वशमे नहीं कर सकता ॥१८३२॥

आगे प्रमादके संवरको कहते हैं—

गा०—जैसे लकड़ीके पाटिये से नावमें जलका आना रोका जाता है। वैसे ही अप्रमादरूपी पाटियेसे अशुभ परिणामोंरूपी आस्रव द्वारको रोका जाता है ॥१८३३॥

टी०—किस पाटियेसे किस प्रमादको रोका जाता है यह कहते हैं—सत्य और अनुभयरूप वचन विकथा नामक प्रमादको रोकते है। स्वाध्याय, ध्यान, एकाग्रता ये विकथा नामक प्रमादके प्रतिपक्षी हैं। इनमें लगे रहनेसे खोटी कथाका अवसर ही नहीं मिलता। क्षमा, मार्दव, आर्जव

---

१. दो रुध्यत इत्याह —आ० मु०।

क्षमामार्दवार्जवसंतोषाः, कषायप्रमादस्य प्रत्यनीकभूताः। ज्ञानभावना, रागद्वेषेन्द्रियविषयविविक्तदेशाव- स्थानं ज्ञानेन मनःप्रणिधानं, इन्द्रियविषयरागद्वेषजदोषाणामनुस्मरणं, विषयोपलब्धावनादरश्चेति एते इन्द्रिय- प्रमादप्रतिपक्षाः। तथा चोक्तं—

वराङ्गनाङ्गानि च रागचोदितो यदृच्छया वा न निरीक्ष्य रज्यति।
तथैव रूपाण्यशुभानि वीक्षितुं, न नेच्छति द्वेषवशप्रचोदितः ॥१॥
निरीक्ष्य न द्वेष्टि यदृच्छयापि च भवेत्स जेता पुरुषः स्वचक्षुषः।
सुगीतवादित्रभवान्मनोहरान् स्वरान्मनोज्ञान्युवतीरितानपि ॥२॥
न वाञ्छति श्रोतुमिहादरेण यो यदृच्छया वा न निशम्य रज्यति।
स्वराननेकानमनोहरानपि न नेच्छति द्वेषवशेन सेवितुं ॥३॥
निशम्य न द्वेष्टि यदृच्छयापि च भवेत्स जेता श्रवणेन्द्रियस्य च।
तुरुष्ककालागुरुकुष्ठकुङ्कुमान् तमालपत्रोत्पलचम्पकादिकान् ॥४॥
शुभं न जिघ्रासति गन्धमादरात् यदृच्छयाघ्राय न चापि रज्यति।
तथैव गन्धानशुभानपोह यो न नेच्छति घ्रातुमसूनतद्विषान् ॥५॥
निषेव्य न द्वेष्टि यदृच्छयापि च भवेत्स नासेन्द्रियजिन्नरोत्तमः।
न यो महामृष्टविशिष्टभोजनम्प्रि[1]यापलेह्यापि मनोहरान् रसान् ॥६॥
निषेवितुं रागवशेन काङ्क्षति यदृच्छया या न निषेव्य रज्यति।
रसाननेकानमनोहरानपि न नेच्छति द्वेषवशेन सेवितुं ॥७॥
निषेव्य न द्वेष्टि यदृच्छयापि च भवेत्स जेता रसनेन्द्रियस्य च।

कषायनामक प्रमादके विरोधी हैं। ज्ञानकी भावना, रागद्वेषके कारण इन्द्रिय विषयोंसे रहित देशमें रहना, ज्ञानके द्वारा मनको एकाग्र करना, इन्द्रियोंके विषयोंमें रागद्वेषसे उत्पन्न हुए दोषोंका स्मरण करना, और विषयोकी उपलब्धिमें आदरभाव न होना, ये इन्द्रिय नामक प्रमादके विरोधी है। कहा भी है—

रागसे प्रेरित होकर अथवा स्वेच्छासे सुन्दर स्त्रीके अंगोको देखकर राग नहीं करता। तथा द्वेषसे प्रेरित होकर अशुभ रूपोको देखनेकी इच्छा नही करता। जो यदृच्छासे देखकर भी द्वेष नहीं करता वह पुरुष अपनी आँखोका विजेता है। अच्छे गीत, और वादित्रोंके मनोहर स्वरोंको तथा युवती स्त्रियोंके द्वारा कहे गये शब्दोंको भी जो आदरपूर्वक सुनना नहीं चाहता और अचानक सुनकर भी उनमे अनुराग नहीं करता। तथा द्वेषवश अनेक अमनोहर स्वरोंको भी सुननेकी इच्छा नहीं करता। अचानक अमनोज्ञ स्वर सुनाई पड़ जाये तो उससे द्वेष नहीं करता, वह श्रवणेन्द्रियका जेता है। लोबान, काला अगर, कुष्ठ, कुकुम, तमालपत्र, कमल, चम्पक आदिकी सुगन्धको आदरभावसे जो नही सूँघता, और अचानक सूँघनेमें आ जाये तो उसमें राग नहीं करता। उसी प्रकार जो अशुभ गन्धको भी सूँघनेसे द्वेष नही करता। और अचानक दुर्गन्ध सूँघ ले तो उससे द्वेष नही करना वह श्रेष्ठ पुरुष नासा इन्द्रियको जीतनेवाला है। जो अत्यन्त मीठे विशिष्ट भोजनको और मनोहर रसोंको रागवश सेवन करना नही चाहता, अचानक सेवनमें आ जाये तो उसमें राग नहीं करता। तथा द्वेषवश अनेक अमनोहर रसोंको भी सेवन

१. प्रियः प्रलेह्यादिमनी मनोहरान् –आ०।

मनोज्ञशय्यासनकान्तयोषितां, शुभांश्च यः स्पर्शविधीन् मनोहरान् ॥८॥
न सेवितुं रागवशेन वाञ्छति यदृच्छया वा न निषेव्य रज्यति ।
प्रमर्दनाच्छादनमार्जनानि वा विलेपनाभ्यञ्जनमज्जनानि च ॥९॥
शरीरसौख्याय न यश्च सेवते विवृद्धवैराग्ययुतो महायतिः ।
हिमोष्णभूशैलशिलातृणादिकानशोभनान् स्पर्शविधींश्च सर्वदा ॥१०॥
न नेच्छति द्वेष्टि न चाप्युपागतान् स्पर्शेन्द्रियस्यैव भवेद्विजेतृता ।
रणे रिपूणामिव निर्भयो जयेद् यथेन्द्रियाणां जयमाश्रितो यतिरिति ॥११॥

निद्रायाः प्रतिपक्षभूतोऽप्रमादः, अनशनमवमोदर्यं, रसपरित्यागः, संसाराद्भीतिर्निद्रादोषचिन्ता रत्नत्रयेऽनुरागः स्वदुश्चरितानां स्मरणेन शोक इत्येवमादिकः। स्नेहप्रमादप्रतिपक्षभावनोच्यते—बन्धुताया अनवस्थितत्वभावना, तदर्थानेकारम्भपरिग्रहप्रवृत्तिचिन्ता, धर्मविघ्नता, दोषापेक्षणमित्यादिकः। एवंभूतेनाप्रमादफलकेन प्रवर्तता निरुध्यते। 'कोरदि फलगेण जहा' क्रियते फलकेन यथा। 'णावाए जलासवणिरोधो' नाव जलास्रवनिरोधः ॥१८३३॥

गुत्तिपरिखाइ हि गुत्तं संजमणयरं ण कम्मरिउसेणा।
बंधेइ[3] सत्तुसेणा पुरं व परिखादिहिं सुगुत्तं ॥१८३४॥

'गुत्तिपरिखाहिगुत्तं' गुप्तिपरिखाभिर्गुप्त, सयमनगरं कर्मरिपुसेना न भंक्तुं शक्नोति। परिखादिभिर्गुप्तं शत्रुसेनेवेति। गुप्तेः संवरताख्याता ॥१८३४॥

न करनेकी इच्छा नही करता। और अचानक सेवनमें आ जाय तो द्वेष नहीं करता, वह रसना इन्द्रियका जेता होता है। जो मनोज्ञ शय्या, मनोज्ञ आसन, सुन्दर स्त्री, तथा मनोहर शुभ स्पर्शवाली वस्तुओको रागके वशीभूत हो सेवन करनेकी इच्छा नहीं करता। अचानक सेवनमें आनेपर उनसे राग नही करता। तथा जो बढे हुए वैराग्यसे शोभित महायती शारीरिक सुखके लिये शरीरका दबाना, आच्छादन, मार्जन, लेपन, तेल, स्नान आदिका सेवन नहीं करता। तथा सर्वदा अतिशीतल या अतिउष्ण पृथ्वी, पहाड़, पत्थर, तृण आदि जन्य अप्रिय स्पर्शोंको सेवन न करनेकी इच्छा नहीं करता और ऐसे अप्रिय स्पर्श प्राप्त होनेपर उनसे द्वेष नहीं करता वह स्पर्शन इन्द्रियका जीतनेवाला होता है। जैसे युद्धमे निर्भय व्यक्ति शत्रुओंको जीतता है। उसी प्रकार वह यति इन्द्रियोंको जीतता है। निद्राका विरोधी है अप्रमाद, अनशन, अवमौदर्य, रसपरित्याग, संसारसे भय, निद्राके दोषोका चिन्तन, रत्नत्रयमें अनुराग, अपने बुरे आचरणोका स्मरण करके शोक करना आदि। स्नेह नामक प्रमादकी विरोधी भावना कहते है—बन्धुता अस्थिर है ऐसा विचारना जिनके प्रति स्नेह होता है उनके लिये अनेक आरम्भ परिग्रह आदिकी चिन्ता करना होती है। धर्म साधनमें विघ्न होता है। इत्यादि दोषोका चिन्तन स्नेहका प्रतिपक्षी है। इस प्रकारके अप्रमादरूप पाटियेसे प्रमादजन्य आश्रवका संवर होता है ॥१८३३॥

गा०—जैसे शत्रुकी सेना परिखा आदिसे सुरक्षित नगरको नष्ट नही कर सकती। वैसे ही कर्मरूपी शत्रुकी सेना गुप्तिरूपी परिखा आदिसे युक्त संयमरूपी नगरको नष्ट नही कर सकती ॥१८३४॥

---

१. योषितः शुभांश्च —आ०। २. मार्जनानि अ० मु०। ३. बंधदि—मूलारा०।

गुप्तीनां संवरतामाख्याति—

समिदिदिढणावमारुहिय अप्पमत्तो भवोदधिं तरदि ।
छज्जीवणिकायवधादिपावमगरेहिं अच्छित्तो ॥१८३५॥

'**समिदिदिढणावमारुहिय**' समितिसंज्ञिता दृढनावमारुह्य । '**अप्पमत्तो**' अप्रमत्तो भवोदधि तरति षड्जीवनिकायवधादिपापमकरैरस्पृष्टः । एतेन समितेः संवरताख्याता ॥१८३५॥

दारेव दारवालो हिदये सुप्पणिहिदा सदी जस्स ।
दोसा घंसंति ण तं पुरं सुगुत्तं जहा सत्तू ॥१८३६॥

'**दारेव दारवालो**' द्वारे द्वारपाल इव । हृदये सम्यक्प्रणिहिता वस्तुतत्त्वाना स्मृतिर्यस्य त दोषा नाऽभिभवन्ति पुर सुगुप्त शत्रव इव ॥१८३६॥

जो हु सदिविप्पहूणो सो दोसरिऊण गेज्झओ होइ ।
अधलगो व चरंतो [1]अरीणमविदिज्जओ चेव ॥१८३७॥

'**जो हु सदिविप्पहूणो**' य स्मृतिहीन । '**सो दोसरिऊण गेज्झओ होइ**' असौ दोषारिपुभिर्ग्राह्यो भवति । अरीणा मध्ये असहायोऽन्ध शत्रुग्राह्यो यथा ॥१८३७॥

अमु[2]यंतो सम्मत्तं परीसहचमुक्करे उदीरंतो ।
णेव सदी मोत्तव्वा एत्थ दु आराधणा भणिया ॥१८३८॥

'**अमुयंतेण**' अमुञ्चता । **सम्मत्त** रत्नत्रय । '**परीसहसमोगरे**' परीषहप्रकरे आ विर्भवत्यपि नैव स्मृतिर्मोक्तव्या । अत्राराधना कथिता । सवर । ॥१८३८॥

इससे गुप्तिको सवरका कारण कहा है—

गा०—प्रमादरहित साधु समितिरूपी दृढ नावपर आरूढ होकर छह कायके जीवोंके घातमे होनेवाले पापरूपी मगरमच्छोसे अछूता रहकर ससार समुद्रको पार करता है ॥१८३५॥

इससे समितिको सवरका कारण कहा है—

गा०—जैसे सुरक्षित नगरका शत्रु ध्वस नही कर सकत, उसी प्रकार द्वारपर खड़े द्वारपालकी तरह जिसके हृदयमे वस्तु तत्त्वोकी स्मृति बनी रहती है, दोष उसका अनिष्ट नहीं कर सकते ॥१८३६॥

गा०—जैसे शत्रुओके मध्यमे असहाय अन्धा व्यक्ति शत्रुओंके द्वारा पकडा जाता है। वैसे हो जिसे वस्तु तत्त्वोका सतत स्मरण नही रहता, वह दोषरूपी शत्रुओंसे पकड़ा जाता है ॥१८३७॥

गा०—परीषहोके समूहसे पीडित होते हुए भी साधुको रत्नत्रयको न छोड़ते हुए तत्त्वोंका स्मरण नही छोड़ना चाहिये। सदा तत्त्वका स्मरण करते रहना चाहिये। इसीको यहाँ आराधना कहा है ॥१८३८॥

सवर अनुप्रेक्षाका कथन समाप्त हुआ।

---

१ अइवीमाव –अ० आ० । २. अमुयंतेण आ० ।

निर्जरानुप्रेक्षोच्यते—

इय सव्वत्थवि संवरसंवुडकम्मासवो भवित्तु मुणी ।
कुव्वंति तवं विविहं सुत्तुत्तं णिज्जराहेदुं ॥१८३९॥

'इय' एवं । 'सव्वत्थवि' उक्तैः संवरप्रकारैः । 'संवुडकम्मासवो भवित्तु मुणी' संवृतकर्मास्रवो भूत्वा मुनिः करोति विविधं तपः सूत्रोक्तं निर्जराहेतु ॥१८३९॥

तवसा विणा ण मोक्खो संवरमित्तेण होइ कम्मस्स ।
उवभोगादीहिं विणा धणं ण हु खीयदि सुगुत्तं ॥१८४०॥

'तवसा विणा' तपसोऽन्तरेण न कर्ममोक्षो भवति संवरमात्रेण । सुरक्षितमपि धनं नैव हीयते उपभोगमन्तरेण तथा । तस्मात् तपोनुष्ठातव्यं निर्जरार्थं । का सा निर्जरा नाम ? पूर्वकृतकर्मशातनं तु निर्जरा ॥१८४०॥

पुव्वकदकम्मसडणं तु णिज्जरा सा पुणो हवे दुविहा ।
पढमा विवागजादा विदिया अविवागजाया य ॥१८४१॥

'पुव्वगदकम्मसडणं' पूर्वकृतकर्मपुद्गलस्कन्धावृतानामवयवाना जीवप्रदेशेभ्योऽपगमनं निर्जरा । तथा चोक्तं 'एकदेशकर्मसंक्षयलक्षणा निर्जरेति' । निर्जरा द्विविधा द्रव्यनिर्जरा भावनिर्जरा चेति । द्रव्यनिर्जरा नाम गृहीतानामशनपानादिद्रव्याणां एकदेशापगमनं वमनादिव । भावनिर्जरा नाम कर्मत्वपर्यायविगमः पुद्गलानां । सा पुनर्द्विविधा, आद्या विपाकजाता दत्तफलाना कर्मणा गलनं विपाकजा निर्जरा । द्वितीयाऽविपाकजाता ॥१८४१॥

अब निर्जरा अनुप्रेक्षाको कहते हैं—

गा०—इस प्रकार संवरके उक्त भेदोंके द्वारा मुनि कर्मों का आस्रव रोककर आगममें कहे अनेक प्रकारके तपोंको करता है जो निर्जराके कारण हैं ॥१८३९॥

गा०—जैसे सुरक्षित भी धन उपभोग किये बिना नहीं घटता, उसी प्रकार तपके बिना कर्मों के संवरमात्रसे कर्मों का क्षय नहीं होता। अतः निर्जराके लिये तप करना चाहिये। पूर्वमें बद्ध कर्मों के क्रमसे क्षयको निर्जरा कहते हैं ॥१८४०॥

गा०-टी०—पूर्वमें बांधे हुए पौद्‌गलिक कर्मस्कन्धोंके अवयवोंका जीवके प्रदेशोंसे अलग होना निर्जरा है। कहा भी है—'कर्मो के एकदेशका क्षय निर्जराका लक्षण है। निर्जराके दो भेद हैं—द्रव्यनिर्जरा और भावनिर्जरा। खाये हुए भोजन पान आदि द्रव्योंके एकदेशका वमन आदिके द्वारा बाहर निकलना द्रव्यनिर्जरा है। और पुद्‌गलोका कर्मरूप पर्यायको त्यागना भावनिर्जरा है। भावनिर्जराके भी दो भेद हैं—सविपाक निर्जरा और अविपाक निर्जरा। जो कर्म अपना फल दे चुके हैं उनकी निर्जरा सविपाक निर्जरा है और जिन कर्मो का विपाक काल नहीं आया है उन्हें तप आदिके द्वारा बलात् उदयमें लाकर खेरना अविपाक निर्जरा है ॥१८४१॥

